Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Baroda

General Editor :
A. N. Jani,
M.A., Ph.D., D.Litt.,
Kāvyatīrtha,
Director, Oriental Institute,
Baroda

No. 169

अभयतिलकोपाध्यायविरचितः

पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यारूपो

न्यायालङ्कारः ।

Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Baroda

General Editor :
A. N. Jani,
M.A., Ph.D., D.Litt.,
Kāvyatīrtha,
Director, Oriental Institute,
Baroda

No. 169

अभयतिलकोपाध्यायविरचितः
पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यारूपो
न्यायालङ्कारः ।

NYĀYĀLAṄKĀRA

(Pañcaprasthānanyāyamahātarkaviṣamapadavyākhyā)

A Commentary on the
five classical texts of the Nyāya Philosophy
of
Abhayatilaka Upādhyāya

Edited by
Prof. Anantalal Thakur,
M.A., Kāvyatīrtha, Nyāyālaṅkāra
and
Late Dr. J. S. Jetly,
M.A., Ph.D., Nyāyācārya

Oriental Institute,
Baroda
1981

First Edition : 1981
Copies : 500

Published with the Financial Aid of the University Grants Commission, the Government of Gujarat and the M. S. University of Baroda.

Price : Rs. 143-00

Copies can be had from :—

The Manager,
UNIVERSITY PUBLICATIONS SALES UNIT,
M. S. University of Baroda Press (Sadhana Press),
Near Palace Gate, Palace Road, Baroda-390 001.

Printed by Shri Bansilal M. Shah, Manager, Maharaja Sayajirao University of Baroda Press (Sadhana Press), near Palace Gate, Palace Road, Baroda and published by Prof. A. N. Jani, Director, Oriental Institute, Maharaja Sayajirao University of Baroda, Baroda-2. March, 1981.

FOREWORD

It is gratifying that after quite a considerable period the Nyāyālaṅkāra of Abhayatilaka Upādhyāya is now appearing in print.

The full title of the present commentary (popularly and shortly called Nyāyālaṅkāra) Pañcaprasthānanyāyamahātarkaviṣamapadavyākhyā adequately brings out its scope and nature. It is a commentary on the abstruse passages of the following five fundamental works (prasthāna) on the nyāyaśāstra :

(1) Nyāyasūtra of Gautama
(2) Nyāyabhāṣya of Vātsyāyana
(3) Nyāyavārtika of Udyotakara
(4) Tātparyaṭīkā of Vācaspati
(5) Tātparyapariśuddhi of Udayana.

Nyāyālaṅkāra is not the first work of its kind. Śrīkaṇṭha, the author of a similar commentary called Pañcaprasthanyāyatarka had already explained these obscure passages in his work and Nyāyālaṅkāra is based on this commentary of Śrīkaṇṭha. Abhayatilaka acknowledges his indebtedness to Śrīkaṇṭha in the last verse of his introduction (p. 1) in which he says :—

"This is another commentary on that much portion of Pañcaprasthanyāyatarka—a commentary on the obscure passages written by Śrī Śrīkaṇṭha—which was available to me".

Thus it is obvious that Abhayatilaka kept before him the commentary of Śrīkaṇṭha. However, a comparison of the two commentaries makes Abhayatilaka's contribution clear. One can see he has taken Śrīkaṇṭha's work further by supplying additional details and thus made some of the obscure passages clearer.

The task of editing this important commentary was undertaken jointly by two great Indian nyāya-vaiśeṣika scholars—the late Dr. J. S. Jetly and Dr. A. L. Thakur. The late Dr. Jetly was the only Nyāyācārya in Gujarat and was to revise the press-copy of the text prepared by Dr. Thakur. Both the veteran scholars were to write jointly a full introduction to the present work. Most unfortunately however, Dr. Jetly died rather suddenly in 1972 and his collaborator Dr. Thakur was so shocked by this loss that his enthusiasm dwindled. However, after my repeated personal requests and promptings his interest revived and he could finally submit the press-copy of the work, the printing of which we could start in January, 1976. This was completed in 1979, but some of his domestic troubles

did not allow Dr. Thakur to write the introduction and to prepare Indices etc. However, I am thankful to Dr. Thakur for complying with my repeated requests for completing the work.

I thank my colleague Dr. B. N. Bhatt, Research Officer, for conscientiously going through the proofs.

My thanks are due to the University Grants Commission and the Government of Gujarat for giving financial help towards the publication of this volume.

My thanks are also due to Shri Bansilal M. Shah, Manager of the M. S. University Press and his staff for completing the printing during the stipulated period.

Oriental Institute,
BARODA: 2-3-1981.

A. N. JANI
Director

PREFACE

The *Nyāyālaṅkāra* or *Pañcaprasthānanyāyamahātarkaviṣamapadavyākhyā* of Abhayalilaka upādhyāya is being presented to the world of scholars. It was during the sixteenth session of the All India Oriental Conference in 1951 at Lucknow that I came in contact with Dr. J. S. Jetly (Born 20-6-1916; Died 26-9-1972). And this culminated into cordial friendship and scholarly co-operation. It was partly due to the fact that both of us were students of Nyāya-vaiśeṣika and partly to his suavity of manners. His services to the Nyāyavaiśeṣika philosophy have been recognised on all hands. Through his help we could procure the photo-copies of the Nyāyasūtra, Nyāyabhāṣya, Nyāya-vārttika, Tātparyaṭīkā, Tātparyapariśuddhi, Nyāyālaṅkāra and the Śrīkaṇṭha Tippaṇaka for the Mithila Research Institute from the Jaisalmir Jaina Bhandara. These formed the basis of our edition of the Nyāyacaturgranthikā. Subsequently we received the photo-copy of the Tātparyavivaraṇapañjikā of Aniruddha through his active help. Dr. Jetly advised me to include the Nyāyālaṅkāra also in the Nyāyacaturgranthikā scheme which, however, was not possible due to administrative difficulties. We subsequently agreed to jointly edit the Nyāyālaṅkāra of Abhayatilaka. It was decided that I should prepare the press-copy on the basis of the photo-copy (J) and one transcript from the Jaisalmir Bhandar and a collation from a Surat ms(S). It was to be revised by Dr. Jetly and the introductions etc. were to be written jointly by both of us.

But alas ! heavy preoccupations stood in my way to finish the press-copy in time. When finished, I proposed to hand it over to him during the Ujjain session of the Oriental Conference which both of us were to attend. On reaching Ujjain I received the news of his sad demise. It was a hard blow to me I could neither finish the remaining work nor think of its publication for long.

But kind interest of our learned friends like Dr. B. J. Sandesara and Dr. U. P. Shah of the Oriental Institute Baroda, again actuated me to finish the remaining work and it was taken up for publication in the Gaekwad's Oriental series of that learned body.

The printing could begin in January, 1976 and was completed in October, 1979. Family troubles and other serious difficulties did not allow me to prepare the Indices and the Introduction for about a year. And I am sorry for this.

I am conscious of the shortcomings of the publication and to associate the name of Dr. Jetly as its joint editor. I crave the indulgence of the learned

readers not to associate any of its draw-backs with my late lamented friend who was not spared to make due improvements.

Sincere thanks are due to Dr. B. J. Sandesara and Dr. U. P. Shah, whose kind interest in this work was responsible for its inclusion in the G.O. series. Dr. A. N. Jani the present Director of the Oriental Institute, Baroda, had to undergo severe strain to bring the affair to a successful close. Any language would be inadequate to express my indebtedness to him. I cordially thank Dr. B. N. Bhatt, Research Officer of the Oriental Institute, Baroda, who very efficiently saw the work through the press. Thanks are due also to my other friends in the Institute and the authorities of the M. S. University of Baroda Press who had to complete the job with an editor hundrends of miles away.

Guru Purnima,
1980

ANANTALAL THAKUR

CONTENTS

		Page
Foreword		v
Preface		vii
Abbreviations		x
MSS Used		xi
Errata		xii
Introduction		xv
Text		1-794
Adhyāya	Āhnika	
I	1	1
I	2	290
II	1	339
II	2	440
III	1	497
III	2	550
IV	1	609
IV	2	671
V	1	703
V	2	759
Appendix 1		795
Appendix 2		798

ABBREVIATIONS

Bibl. Ind.	Bibliotheca Indica Series of the Asiatic Society.
C	Calcutta Sanskrit Series edition of the Nyāyadarśana with Bhāśya, Vārttika, Tātparyaṭīkā and Vṛtti.
Chā. Upa, छान्दोग्य°	Chāndogya Upaniṣat.
J	Jaisalmir Bada Bhandar Paper MS of the Nyāyālaṅkāra.
N. Bh., भाष्य	Nyāyabhāṣya of Vātsyāyana.
N.S.	Nyāyasūtra of Gautama Akṣapāda.
Paṇ. Pā. Sū. पा. सू.	Aṣṭādhyāyī of Pāṇini.
S	Palm-leaf MS of the Nyāyālaṅkāra in Muni Hukamji's Bhāṇḍāra at Surat.
Tā. Ti.	Tātparyaṭīkā of Vācaspati.
V.S., Vai. Sū.	Vaiśeṣikasūtra of Kaṇāda.

उने, परिशुद्धि	उदयनकृततात्पर्यपरिशुद्धौ
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
टीयाम्, तात्पर्यटी.	वाचस्पतिमिश्रकृततात्पर्यटीकायाम्
तै. ब्रा.	तैत्तिरीयब्राह्मण
तै. सं.	तैत्तिरीयसंहिता
प्र. वा.	धर्मकीर्त्तिकृतप्रमाणवार्त्तिकम्
मनुसं.	मनुसंहिता
महाभा. पश्यशा.	व्याकरणमहाभाष्यपश्पशाह्निकम्
रामायण कि.	वाल्मीकिरामायणे किष्किन्धाकाण्डे
वाके	उद्द्योतकरकृतन्यायवार्त्तिके
शत. ब्रा.	शतपथब्राह्मणम्
शाबरभा.	शबरस्वामिकृतपूर्वमीमांसाभाष्यम्
षड्वि. ब्रा.	षड्विंशब्राह्मणम्

MANUSCRIPTS USED

The present edition of the Nyāyālaṅkāra is mainly based on the Jaisalmir Bada Bhandar Paper MS of the work (folios 616b-821b) written in Jaina Devanāgarī Script and copied about five-hundred years ago. The photostat copy shows that some folia are missing and some more are torn or otherwise damaged. The MS is very carefully written and is free from scribal errors. The lacunae could be filled up on the basis of the collations taken by Dr. J. S. Jetly from the Palm-leaf MS of the same work preserved in Muni Hukamji's Bhāndāra at Surat copied in Saṁvat 1590 (= 1533 A.D.) by Payāka during the reign of Raul Sri Bhatthapāla at Sri Pārśva caityālaya in Dungarpur. The collations seem to show that the Surat MS is not as correct as the Jaisalmir one.

The transcript of the Jaisalmir MS prepared by Sri Līlādhar Prabhulal Joshi of Jaisalmir and received through Dr. Jetly also was of much help in the preparation of the Press-copy.

Details of the Jaisalmir MS upon a Photo-copy of which the text of the Nyāyālaṅkāra is mainly based.

It was 10.5 × 4 inches in size. A few folia were damaged and the details thereof are recorded in the foot-notes of the printed text. Page nos. 616b and 821b consist of sixteen lines and one line respectively. The others have fifteen lines each. The number of syllables to a line is about sixty-five. The left-hand margin top gives the Title श्रीन्यायालङ्कारटिप्पनक. The page mark in the left-hand margin middle is in western code numerals. The right-hand margin middle again gives the page-marks in Devanāgarī numerals. The MS begins with अर्हं // श्रीयुगादिदेवाय नम: in 616b.1 and ends in 821b.1 with शोध्यं महाकुशलैः // The MS is correct and neatly written in Jaina Devanāgarī characters. The special featuie thereof consists of a left-hand curb instead of the top one for e-kāra before the consonant and addition of a perpendicular stroke in the right-hand side thereof with the said left-hand curb for o-kāra.

शुद्धिपत्रकम्

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
२२	८	°लक्षणा°	°क्षणा°
६७	१७	विपर्यसा°	विपर्ययसा°
७१	१८	°द्विन्धादौ	°द्विन्ध्यादौ
९६	४	आद्रेन्धना°	आर्द्रेन्धन
	२३	परामर्शेव	परामर्शेन
११२	११	बिशेष°	विशेष°
११७	४	सीमा यादु°	सीमाया दु°
	१६	°तारयत्	तारयेत्
१२०	१४	पटतुरी	पटतन्तवः
		तन्तुतुरीसं	तन्तुसं
१३७	१७	उपव्यस्ते	उपन्यस्ते
१५३	१७	कर्तुमिन्न°	कर्तुर्भिन्न°
१६५	९	°स्तेष्वष्युपा	स्तेष्वप्युपा°
१७८	८, ९, ११	°ब्रीहि	°व्रीहि
१८४	१०	°प्रयत्नजा वि°	°प्रयत्नजावि°
१९१	१५	अपृथक्त्वे नैवा°	अपृथक्त्वेनैवा°
१९३	६	°त्वासिद्धोऽयं	त्वादसिद्धोऽयं
२७५	२३	°तद्धितरौ	°तदितरौ
२७८	१०	°वाण्यादि°	°रात्र्यादि°
	२४	५।२।	५।२।११
३९४	२०	द्रवदव्य°	द्रवद्रव्य°
३९५	३	स्तत्वादीन्	स्तन्त्वादीन्
४१४	२२	संबन्ध्यमाना°	संबध्यमाना°
४१८	१४	च रुचि°	च[।]रुचि°
४२१	९	प्रवृत्तादीन्	प्रवृत्त्यादीन्
४२३	४	संभावनास्यात्	संभावना स्यात्
४३६	११	[क] तमो°	[क]तमो
४४१	२१	सामायिकं	सामयिकं
४४६, ४४७	headings	शब्दनित्यत्व°	शब्दानित्यत्व°
४४९	१२	प्राधानिकास्यो°	प्राधानिकस्यो°

४६६	११	सन्तति पतिताः	सन्ततिपतिताः
४८६	२२	°यथासुति°	यथाश्रुति°
४८७	७	बूते	ब्रूते
४९२	२०	°भयोग्ये	°मयोग्ये
५५०	६	त्वो कीर्तनेन	°त्वोत्कीर्तनेन
५५१	१३	बुद्धिरूप°	बुद्धिरुप°
५७१	१७	प्रसङ्गात°	प्रसङ्गत°
५८६	१३	°प्रदेशमेदशमेद°	°प्रदेशमेद°
५८८	१७	°थभिचारो°	°व्यभिचारो°
५९८	१९-२०	मृतकचरणादित्ये	°मृतकचरणादिवदित्ये°
६०१	१०	च	च[न]
६०६	१७	सत्रम्	सूत्रम्
६११	१४	सुखत्वा°	सुखत्वा°
६१३	२	प्रयत्नी°	प्रत्यनी°
६५०	४	संख्यैकान्त प्रक°	संख्यैकान्तप्रक°
६५७	२२	°ष्पत्तेवृक्ष°	°ष्पत्तेर्वृक्ष°
६९१	९	नि तै ानम्	निवर्तमानम्
६९३	१८	ग्र ह्य वं	ग्राह्यत्वं
७१६	२०	°युक्त	°युक्तम्
७१७	२२	सप्रतिपक्षः	सत्प्रतिपक्षः ।
७५२	२१	जीवच्छरं	जीवच्छरीरं
७९४	१७	भयका	मयका

Addenda

On p. 497 add in the beginning ॥ तृतीयाध्याये प्रथमाह्निकम् ॥

INTRODUCTION

Indian Logic has a long and varied history. Its rudiments are found scattered in the Vedic and Post-Vedic literature. The *Nyāyadarśana* is attributed to Akṣapāda belonging to the family of Gotam which produced several Vedic seers. The extant materials go to prove that even in the Vedic period the Gautamas made significant contributions to our philosophical thought. The Epics and the Purāṇas narrate the stories and contributions of several Gautamas. The *Mahābhārata* evinces acquaintance with the *Nyāyaśāstra.* Its Origin is described there in (XII. 59). That there were several *Nyāya* Schools following different *Nyāya* treatises is mentioned and one is asked to follow the text furnished with reasoning and support from the scriptures and behaviour of the honest people:

nyāyatantrāṇy anekāni tais tair uktāni vādibhiḥ |
hetvāgamasadācārair yad yuktaṃ tad upāsyatām ||

M. Bh. XII. 210.22

The hermitage of the sage Kaṇva was full of logicians who knew the truth as taught in the *Nyāyaśāstra,* were experts in the formation and combination of the different propositions and attained proficiency in the doctrines of establishment of one's own thesis and refutation of that of others. They knew the causal law / and the truth about some *Vaiśeṣika* categories. In connection with the *Rājasūya* and *Aśvamedha* sacrifices of Yudhiṣṭhira we hear about *Jalpa* and *Vitaṇḍā.* Lord Kṛṣṇa identifies himself with *vāda.* Kathakas i.e., logicians adept in the *vāda, jalpa* and *vitaṇḍā* debates accompanied Arjuna when he started for *tīrthayātrā.* Nārada is said to be conversant with the merits and demerits of the five-membered syllogism (II.5 3-9). The *Mahābhārata* refers to the four *pramāṇas* (XII. 56.41). The individual souls (XII. p. 521), body as the substratum of enjoyment (XII, 171.218 XII. 174.21), the sense organs (XIII. 3.67; 134 and 54, 36), mind (XII. 88.16; 178.12; 381. 18-20 etc.), objects of senses (XIII. 145) the five elements (XIII. P. 145), pain (XII. p. 541), pleasure (XII. 177.35), rebirth (I. 34.12; VII. 85.31; XIII. 42.333), final emancipation (XII. 47.56), doubt, ascertainment of the truth, purpose (XII. 24) and *nigraha* (XII. 260.2) have been used in the *Nyāya* sense in the *Mahābhārata.* Aśvatthāman is said to have special attraction for the *Vitaṇḍā* form of disputation (VII. 85, 13). We may thus conclude that the *Nyāya* categories were fairly known to the latest versions of the *Mahābhārata.* Gautama, the husband of Ahalyā has been traditionally identified with Akṣapāda, author of the *Nyāyadarśana.* cf.

akṣopādo mahāyogī gautamas tapasi sthitaḥ |
godāvarisamānetā ahalyāyāḥ patiḥ prabhuḥ ||

But modern scholars hesitate to ascribe a very old date on the grounds that late Buddhist theories are found mentioned in the *Nyāyadarśana* and that Kauṭilya shows no knowledge of this *śāstra* though he knows the three forms of *ānvīkṣikī* viz. *Sāṁkhya, Yoga* and *Lokāyata.* These arguments require some examination. The Buddhist views referred to in the *Nyāyasutras* do not exactly correspond to those available in the extant texts. On the other hand, Nāgārjuna in his *Pramāṇavihetana* and the *Vaidalyasūtra* refutes the *Nyāya* position of Akṣapāda. Akṣapāda might therefore refer to some pre-Nāgārjuna Buddhist view which does not stand in the way of assigning a pre-Nāgārjuna date to the *Nyāyadarśana.* Again Kauṭilya is eloquent in the praise of *Ānvīṣīkī.* His *Sāṁkhya* includes both *seśvarasāṁkhya* of Patañjali and *nirīśvara Sāṁkhya* of Kapila. It is to be noted that epistemology of both of them is almost the same and Pātañjala works are still called *śāṁkhya.* The *Yoga* of Kauṭilya must have been identical with *Nyāya.* Our grounds for this assumption are that the Jain authors use the term '*Yoga*' or '*Yauga*' for the *Naiyāyikas* or *Vaiśeṣikas* or both. Again *Vātsyāyana* in his *Nyāyabhāṣya* ascribes a *Nyāya* view to the '*Yoga*' which is quite opposite to the view of the *Pātañjaladarśana* (vide *Nyāyabhāṣya* I. i. 29). As the *Naiyāyikas* and *Vaiśeṣikas* are *ārambhavādins*, according to them no composite substance can come out without a 'contact' between its components. This might have been the cause of the application of the term '*Yoga*' to these branches of philosophy. Moreover, both the *Nyāya* and *Vaiśeṣika* schools are found to be associated with the *Pāśupatayoga* system. It may also account for the use of the term in the sense of either or both of them. We may remember in this connection that there is a tradition identifying Kauṭilya with Vātsyāyana, the *Bhāṣyakāra.* Common ideas and expressions in the *Arthaśāstra* and the *Nyāyabhāṣya* go to support this identification. *Ānvīkṣikī* is one of the four traditionally recognised *śāstras.* It has always been identified with the *Nyāyaśāstra.* It is therefore quite unlikely that Kauṭilya should omit the *Nyāyaśāstra* from his list. The traditions of the *Mahābhārata* and the *Manusaṁhitā* are generally respected by him. And both of them accept *Ānvīkṣikī* as an important item in the then curriculum.

A divergence in the present case cannot be explained. We therefore think that Kauṭilya knew the *Nyāyaśāstra* and his eloquent praise for *Ānvīkṣikī* fully suits the *Nyāyaśāstra* alone.

Nyāya and the Nyāya Categories

The term *Nyāya* has been defined as the examination of some authoritative notion by means of the four recognised *pramāṇas.* It thus conforms to a five membered syllogistic reasoning in which the first four members viz. *Pratijñā, hetu, udāharaṇa* and *upanaya* are respectively connected with verbal knowledge,

inference, perception and analogy. And this *Nyāya* constitutes the central point of the *śāstra*. The *śāstra* is divided into five chapters of two daily lessons each. The sixteen *Nyāya* categories viz. *pramāṇa* (means of knowledge), *prameya* (object of knowledge), *saṁśaya* (doubt), *prayojana* (purpose), *dṛṣṭānta* (illustrative example), *siddhānta* (accepted tenets), *avayava* (members of a syllogism), *tarka* (argumentation), *nirṇaya* (ascertainment), *vāda* (amicable discussion for the ascertainment of a truth), *jalpa* (disputation), *vitaṇḍā* (destructive criticism), *hetvābhāsa* (fallacy of the probans), *chala* (quibble), *jāti* (futile rejoinder) and *nigrahasthāna* (points of defeat) are enumerated in the first *sūtra*. The first nine categories are then defined (with classification when necessary) in the first daily lesson of the first chapter. In the second lesson the remaining seven categories are similarly treated with this distinction that quibble has been examined also and the last two categories have been defined without classification. The first lesson of the second chapter examines doubt and the four means of knowledge counted before. The second lesson shows the inclusion of the other *parmāṇas* recognised by other schools in those accepted by the *Naiyāyika* along with a detailed discussion on verbal testimony. The first lesson of the third chapter examines the first four objects of knowledge viz. soul, body, sense-organs and objects of senses and the second examines the intellect and mind and adds a discussion on the association of the soul with the body due to its merits and demerits. The first lesson of the fourth chapter examines endeavour, rebirth, result, sorrow and salvation and examines eight theories about creation prevalent at the time of Akṣapāda. The second lesson examines composite bodies and the partlessness of the ultimate particles, reconsiders the refutation of eternal objects and shows the way of enhancement and preservation of true knowledge. The two daily lessons of the fifth and the last chapter divide, define (and examine wherever necessary) the last two categories—futile rejoinder and points of defeat respectively. Thus Akṣapāda enumerates and defines all the categories, divides those admitting division and examines only a few among them. Examination here means the examination of the definitions of the accepted categories and sub-categories.

The Nyāya Literature

The *Nyāya* literature consists of the *Nyāyasūtras*, commentaries and sub-commentaries on these *sūtras*, digests, *prakaraṇas* and *lakṣaṇa* works. The *Sūtras* form the basis of all the later *Nyāya* speculations and are exerting influence on our culture through centuries. But in course of time corruptions appeared in the *sūtra* text and Vācaspatimiśra felt the necessity of fixing up the *sūtra* text in his *Nyāyasūcīnibandha*. His investigtions suggest that the *Nyāyadarśana* consisted of five chapters, ten daily lessons, eighty four sections and five hundred and thirty *sūtras*, Vācaspatimiśra II prepared another *Nyāyasūtra* text called

Nyāyasūtroddhāra which counts two more *sūtras* while the list of Keśavamiśra Tarkācārya in his *Gautamīyasūtraprakāśa* accepts five hundred and twenty one *sūtras* only. It is to be noted that one *Vaiśeṣikasūtra* (*anekadravyasamavāyād rūpaviśeṣāc ca rūpopalabdhiḥ* V.S. IV. 1.9) has been accepted as a *Nyāyasūtra* by Vācaspati I and Vācaspati II. But *Nyāya* commentators like Bhaṭṭavāgīśvara, Viśvanātha, Keśavamiśra, Vaṁśadhara and Rādhāmohana reject it from their *Nyāyasūtra* text. This is just to show that the *Nyāyasūtra* text requires further critical examination.

At the earliest stage, the *sūtras* seem to have been expounded orally with the help of the *tantrayuktis*, a set of expository principles, versions of which are now available in the *Arthaśāstra* of Kauṭilya, the medical treatises of Caraka, Suśruta and Vāgbhaṭa as well as in the *Viṣṇudharmottarapurāṇa*. The *Yukti dīpikā* on the *Sāṅkhyakārikā* uses and explains some of these principles. The *Nyāya* authors like Vātsyāyana, Uddyotakara and Vācaspati also show acquaintance with them. The first regular commentary on the *Nyāya sūtras* is the *Bhāṣya* of Vātsyāyana. Some alternative explanations in the cases of some *sūtras* in the *Bhāṣya* led some modern scholars to hold that the original import of the *sūtras* was partly forgotten at the time of Vātsyāyana who added imaginary explanations in these cases. Others hold that these alternative explanations are nothing but remnants of earlier commentaries on the *Nyāyasūtras*. We, on our part, have tried to show that most of these alternative explanations crop up where there is a difference of views between the *Nyāya* and the *Vaiśeṣika* systems. Vātsyāyana is always found to hold a balance between the two systems and seems to have given the *Vaiśeṣika* views side by side with the *Nyāya* ones wherever there is disagreement between the two systems.[1]

A considerable number of sub-commentaries on the *Nyāyabhāṣya* were written and became current in course of time. Śāntarakṣita, Kamalaśīla, Durvekamiśra and others show that Aviddhakarṇa wrote the *Tattvaṭīkā*, Adhyayana wrote the *Ruciṭīkā*, Bhavivikta wrote a third *Bhāṣyaṭīkā* and *Viśvarūpa* had one more *Bhāṣyaṭīkā* to his credit. We learn from the *Āgamaḍambaranāṭaka* of Jayantabhaṭṭa of Kashmir that this Viśvarūpa was contemporary of Jayanta and the fragments from his *Bhāṣyaṭīkā* in the *Pramāṇaviniścayavivaraṇa* of Vādirāja when compared with the *Nyāyamañjarī* show that Jayanta and Viśvarūpa held similar views on many *Nyāya* topics. Trilocana, the preceptor of Vācaspati wrote another *Nyāyamañjarī* on the *Nyāyabhāṣya* and is said to have written a *Nyāyaprakīrṇaka* also. The views of these authors as far as available have been collected and discussed by me in various journals. The *Nyāyabhāṣyavārttikā* of Uddyotakara is alone available among the ancient subcommentaries on the

---

1. Visvesvaranand Indological Journal, Vol. I, 1963, pp. 78-86.

Nyāyabhāṣya. A comparison shows that some of the sub-commentators just mentioned preceded Uddyotakara, who preserved, some earlier views though anonymously. That Vācaspatimiśra should prefer to write his *Tātparyaṭīkā* on the work of Uddyotakara has some special significance when his own preceptor's work was before him. The *Tātparyaṭīkā* served to popularise the *Vārttika* and the other works were gradually forgotten.

Vācaspati's immediate successors in the field of Buddhist logic are Jñānaśrīmitra and Ratnakīrti. Their logical tracts were discovered in Tibet by *Mahāpaṇḍita* Rāhula Sāṅkṛtyāyana and published under the auspices of the K. P. Jayaswal Research Institute, Patna. They have disclosed the fact that after Uddyotakara and before Jñānaśrī's own time there were several *Nyāya* authors whose contributions were regarded highly important.

Among them, Śaṅkara, the *Naiyāyika,* also mentioned by Jayantabhaṭṭa, had a commentary on the *Nyāyabhāṣya* to his credit. Bhāsarvajña is placed next. He wrote a *saṁgraha* named *Nyāyasāra,* which, as we learn from Guṇaratnasūri had eighteen commentaries on it. Among them, the *Nyāyabhūṣaṇa,* the auto-commentary also called the *Saṅgraha vārttika* was the most important. But it was long lost. The *Nyāyasāra* was first published in the Bibliotheca Indica series along with the commentary of Jayasiṁhasūri. I had the opportunity to collect the views of the *Nyāyabhūṣaṇa* from quotations in the pages of the Journal of the Vangīya Sāhitya Pariṣat. And Svāmī Satyasvarūpānanda discovered a manuscript of the work after painstaking searches. The *Nyāyabhūṣaṇa* has since been edited by Svāmī Yogindrananda and published from Varanasi. I had again the opportunity to consult an incomplete manuscript of the *Nyāyasāravicāra* by Bhaṭṭa Raghava in Varanasi. It has also been edited by Dr. Umaramana Jha of the Rāṣṭrīya Sanskrit Saṁsthāna.

Jñānaśrimitra preserves some passages from Trilocana's work also. Besides we learn from Jñānaśrī and Ratnakīrti that there were some more *Naiyāyika*s viz. Vittoka, Satānanda and Narasiṁha. They might have written *Nyāya*-Commentaries or independent tracts. But their views on problems like *Kṣaṇa-bhaṅga, Apoha* and *Īśvaravāda* were seriously considered by their opponents in the Buddhist camp. It may be added in this connection that many of the arguments of Udayana in favour of the existence of God and against *Kṣaṇabhaṅga* and *Apoha* in the *Nyāyakusumāñjali* and the *Ātmatattvaviveka* have really been borrowed from his predecessors.

The Jaisalmir Jaina Bhandara presented the last four chapters of the long forgotten *Nyāyabhāṣyavārttikatātparyavivaraṇapañjikā* of Aniruddha offering short notes, both exegetical and historical on select topics from the *Bhāṣya, Vārttika* and *Tātparyaṭīkā.* It served as the prototype of a class of such sub-

commentaries in the *Nyâya* School each covering a number of works. Again it shows that some innovations introduced by Vācaspati in the *Nyāya* system are sometimes due to his partiality to the views of Trilocana and Viśvarūpa. Udayana is found to have utilised the work of Aniruddha which was known to Rudra Tarkavāgīśa of Navadvīpa also. The *Anumānadīdhitiṭīkā* of this Rudra, extant in a signle manuscript at Ulwar quotes passages from Aniruddha's *Pañjikā*.

The *Nyāyavārttikatātparyapariśuddhi* also called the *Nyāyanibandha* by Udayana is the last unit and the most important work in the *Caturgranthikā*. It began to be published in the Bibliotheca Indica series along with the *Nyāyanibandhaprakāśa* of Vardhamāna Upādhyāya. But it was discontinued before the fifth *sūtra* of the first chapter could be completed, presumably for want of dependable manuscripts. I had the privilege of consulting four complete and untapped manuscripts of the *Pariśuddhi*. The first chapter of the work has been published by the Mithila Institute while the rest is ready for the press. Udayana is found to mention Trilocana and Aniruddha as important *Nyāya* authors. But according to him Uddyotakara represents the youth of the *śāstra* which Vācaspati had to rejuvinate by the elixir received from his preceptor, Trilocana.

Another commentator on the *Nyāyasūtras*, Sānātani by name, whom Udayana quotes and designates as *prauḍhagauḍanaiyāyika*—the verteran *Nyāya* scholar from Gauḍadeśa, deserves mention here. He seems to be older than Vācaspatimiśra and we find Vardhyamāna, Saṅkaramiśra and Vācaspati II to refer to him. Very little information about Sānātani's contributions is preserved. But the reference in the *Pariśuddhi* shows the impoitant fact that Bengal produced a *Nyāya* commentary even before the days of Vācaspatimiśra. Udayana at the beginning of the second chapter of the *Pariśuddhi* refers to one Śrīvatsa :

Saṁśodhya darśitarasā marukūparūpāṣṭīkākṛtaḥ prathama eva giro gabhirāḥ |
Tātparyato yad adhunā punar udyamo naḥ Śrīvatsavatsalatayai va tayā tathāpi ||

Professor D. C. Bhattacharya took Śrīvatsa as the preceptor of Udayana. Abhayatilaka makes him a student of the latter.[2] But Udayana is found to quote and criticise the views of Śrīvatsa which becomes incongruous with either of the capacities and we hold that the expression *vatsalatā* has been used sarcastically. Śrīvatsa must have completed his *Nyāyasūtraṭīkā* before Udayana began his *Pariśuddhi*. The latter seems to have been undertaken, among other things, to defend the position of Vācaspati from whom Śrīvatsa is found to differ at least in some points.

Besides the *Lakṣaṇāvali* defining the *Vaiśeṣika* categories, Udayana wrote one *Lakṣaṇamālā* with a view to giving scientific definitions of the *Nyāya* cate-

---

2 श्रीवत्स उदयनशिष्यः । Nyāyālaṅkāra, p. 339.

gories. First published from Madras it was attributed to Śivāditya Miśra. Professor D. C. Bhattacharya identified it with the work of Udayana. I had to re-examine the question of this identity in the introduction to the Mithila Institute edition of the *Lakṣaṇamālā* and could find some more materials to support Professor Bhattacharya's identification.

Śrīkaṇṭha, another little known *Nyāya* author took up the ambitious scheme of simultaneously commenting upon the five major *Nyāya* works, referred to above. His commentary remained unifinished and the extant portion covers only the first few *sūtras*. Abhayatilaka Upādhyāya the author of the work under discussion took up the clue from Śrīkaṇṭha and his *Nyāyālaṅkāra*, otherwise called the *pañcaprasthānanyāyatarkaṭīkā*. These are the two very important contributions to the old school of logic after Udayana.

The *Nyāyanibandha* was further commented upon by Divākara, Vaṭeśvara and Śaṅkaramiśra in *Nyāyanibandhoddyota*, *Nyāyanibandhadarpaṇa* and *Trisūtrīnibandhavyākhyā* respectively.

A small portion of the *Nyāyanibandhaprakāśa* of Vardhamāna Upādhyāya has been published in the Bibliotheca Indica series along with the *Tātparyapariśuddhi* Some more parts of this *Prakāśa* can be reconstituted from fragmentary manuscripts available in manuscript libraries. The firth chapter of the *Anvīkṣātattvabodha*, an independent commentary on the *Nyāyasūtras* by Vardhamāna has recently been published by the Rāṣṭrīya Sanskrit Saṁsthāna. Its first chapter and a portion of the second are also available in manuscript.

Kaṇāda Tarkavāgīśa refers to one Pre-Gaṅgeśa *Nyāyasūtra* commentary, *Nyāyabhāskara* by name. Vācaspati II refers to it as a very important work. No Ms. of it seems to exist. Similarly, the *Ratnakośa* commentary on the *Nyāyasūtras*, held in high esteem by neologicians has not been discovered in manuscript.

The above will suffice to show that the *Nyāya* literature assumed a huge extent. And it was almost impossible for an individual scholar to have a thorough knowledge of it. Hence arose the necessity of digests and smaller commentaries. Jayantabhaṭṭa explained select *Nyāyasūtras* in his *Nyāyamañjarī* and wrote a digest, *Nyāyakalikā* by name even before Vācaspatimiśra's time.

Qutations from the *Nyāyapallava* of Jayanta in the *Syādvādaratnākara* of Vādi Devasūri suggest that he had a third *Nyāya* work to his credit. We have already mentioned the *Nyāyasāra*, which disregarded many traditional views, denied any relation between the *Nyāya* and the *Vaiśeṣika*, omitted *upamāna* as a means of knowledge, and accepted the enjoyment of bliss in emancipation. Its author, Bhāsarvajña was regarded as a sectarian (*ekadeśī*) though he was a *Saṁgrahakāra*. But among the other *Saṁgraha* works the *Tārkikarakṣā* of

Varadaıāja along with his own commentary, the *Sārasaṁgraha* is the best of all as it faithfully presents the views of the traditional *Nyāya* authors. This work, though published long ago, unfortunately did not receive the attention of scholars, which it richly deserves. I have consulted a manuscript of a commentary on it by Cannibhaṭṭa and Rāmeśvara of the Vijayanagara court. It shows that the *Saravadarśanasaṁgraha,* so far attributed to Mādhavācārya is really the contribution of Cannibhaṭṭa himself. This has been confirmed by a comparison of the *Sarvadarśanasaṁgraha* with the commentary in question as well as with his *Tarkabhāṣāprakāśikā*. Small *Vṛtti*s on the *Nyāyasūtra*s began to be written very early. Here also many important works are lost. We learn from the *Vyomavatī* a commentary on the *Padārthadharmasaṁgraha* of Praśastapāda, that the preceptor of Vyomaśiva, its author, had a *Nyāyavṛtti* to his credit. Similarly Śivadāsasena refers to another *Nyāyavṛtti* by Cakrapāṇidatta, the celebrated commentator on the *Carakasaṁhitā* who belonged to the court of the *Pāla* kings. We have come across references to a third lost work of this category in an anonymous *Vaiśeṣika* work written under Vallālasena of Bengal. It shows that Śrīmān, the preceptor of the author of this *Vaiśeṣika* work, revived the *Nyāya* studies that became weaker due to the onslaughts of the antagonists. These antagonists seem to be the Buddhist scholars.[3] Unfortunately we possess no more information about Śrīmān or his work.

Professor D. C. Bhattacarya has shown that Śūlapāṇi wrote a *Nyāyasūtravṛtti.* No manuscript of the work also is preserved.

The *Śāṇḍilyasūtrabhāṣya* of Svapneśvara mentions another *Nyāyavṛtti* by the same author. Here also no other information is available.

The number of available *Nyāyavṛtti*s is also not small. In connection with the editing work of the *Nyāyacaturgranthikā* we had to consult some of them and informations about a few more were collected. The *Nyāyasūtratātparyadīpikā* of Bhaṭṭa Vāgīśvara of the south is found to follow the traditional works, which the author also admits in his initial verse—

anvīkṣyā 'nupadam bhāṣyam apy anukramya vārttikam |
nyāyasūtrārthatātparyadīpike'yam vidhāsyate ||

---

३ दुर्वारासमदृप्तदुर्जनवचोवज्रानलेनाहताः
श्रीमद्गोतमनिर्मिता रसयुतास्ता भारतीवल्लयः ।
येन प्रौढविकल्पजालसलिलैरुज्जीविताः सन्ततं
जीयादद्भुतकीर्तिरुज्ज्वलगुणः श्रीमानसौ मे गुरुः ॥
J.O.I, Baroda, Vol. XIV, 1964-65, p. 331.

The *Nyāyatattvāloka* of Vācaspatimiśra II is undoubtedly the most elaborate and learned among the extant *Nyāyavṛttis*. It has recently been edited by Dr. Kishoranath Jha and published by the Rāṣṭrīya Sanskrit Saṁsthāna.

Jānakīnāth Bhaṭṭācārya *Cūḍāmaṇi*, the author of the *Nyāyasiddhāntamañjarī* also wrote a *Vṛtti* called *Ānvīkṣikitattvavivaraṇa* on Chapter V of the *Nyāya-darśana*. Rāmabhadra, son of Jānakīnātha commented upon the other chapters in his *Vṛtti* called *Nyāyarahasya.*

Keśavamiśra Tarkācārya of the court of king Kaṁsanārāyaṇa of Mithilā wrote the *Keśavīyasūtraprakāśa* which has also been edited by Dr. Kishoranāth Jha and published by the Rāṣṭrīya Sanskrit Saṁsthāna. Mathurānātha *Tarka-vāgīśa* also wrote a *Nyāyasūtravyākhyā*, a manuscript of which is preserved in the Asiatic Society. Manuscripts of the *Anvīkṣātattvaparīkṣā* of Vaṁśadhara are available in Mithilā.

Besides we hear of the *Nyāyāloka* of Viśvanātha Pañcānana, whose *Nyāya-sūtravṛtti* is well known. Candranārāyaṇa the famous Professor of the Sanskrit College, Varanasi also is said to have written a *Gautamīyasūtravṛtti*. Mm. Kailasa Śiromaṇi of the same college wrote the *Bhāṣyachāyā* on the *Nyāyasūtras*.

These *Nyāyavṛttis* have much to offer to us. Some of them are store-houses of brilliant discussions while others help us to check the current *sūtra* text.

Buddhist and Orthodox Logic—Ancient and Mediaeval Schools

Logical speculations in India flowed through two more channels besides the one just described. The *Nyāyasūtra* of Gautama Akṣapāda provided the disputants with a hand-book which was primarily meant to regulate their discussions. But the literature of which it formed the basis gradually began to put emphasis on individual topics according to the demand of time until epistemology assumed the highest importance. In course of the history of the *Nyāya* philosophy it came in contact with several other systems. Its relation with the *Vaiśeṣika* system has been alluded to earlier. *Sāṅkhya* and *Mīmāṁsā* also came in conflict with the *Nyāya* school in different epochs. But its relation with the Buddhists was of an enduring nature contributing to its healthy growth.

The early Buddhist Philosophers followed the treatise of Akṣapāda. Nāgārjuna in the *Vaidalyasūtra* and the *Pramāṇavihetana* discusses the sixteen categories of the *Nyāyasūtra*. The pre-Diṅnāga Buddhist tracts are found to accept the four *pramāṇas*, five members of a syllogism, five attributes of a *hetu* and five *hetvābhāsas*. As Buddhism arose as a protestant religion, opposition on the part of Buddhist scholars to orthodox logic is but natural. But the agreement is still striking. Diṅnāga brought about a change in the Buddhist

logical scheme. Since his time three *hetvābhāsas*, three attributes of a *hetu* and only two means of knowledge were accepted. This change may be the indirect influence of the *Vaiśeṣikas* upon Diṅnāga. However after Diṅnāga the antagonism between the orthodox and Buddhist logical schools came into bold relief. The existence and prosperity of Buddhism depended on the success of its adherents in discussions and disputations with their opponents. They therefore had to use the same language, same terminology and the same rules of debate to disarm those in the *Nyāya* school who were the chief exponents of the Vedic culture. The literature of both these schools upto the advent of Islam in India present the picture of a healthy rivalry which helped both the systems to flourish. The *Nyāyabhāṣya* of Vātsyāyana criticises some logical views which may be attributed to the early Buddhist thinkers. The views of Vātsyāyana received similar treatment from the Buddhist scholars including Diṅnāga. Uddyotakara defended the position of Vātsyāyana and wrote the *Nyāyavārttika* in order to remove the ignorance of the mischievous logicians (*Kutārkikājñānanivṛttihetoḥ*). Vācaspati identifies these *kutārkikas* with Diṅnāga and others. Dharmakīrti refuted Uddyotakara's position and defended that of Diṅnāga in his *Pramāṇavārttika* and other works. A host of Dharmakīrti's followers including Dharmottara and Prajñākaragupta strengthened the Buddhist position which was next severely attacked by Vācaspatimiśra from the *Nyāya, Mīmāṁsā, Sāṁkhya, Yoga* and *Vedānta* points of view. Jñānaśrīmitra in many of his tracts supported Dharmakīrti and Prajñākara and demolished the position of Vācaspati, Trilocana, Bhāsarvajña and Śaṅkara whom he considered the pillars of the *Varṇāśrama* system.[4] Jñānaśri is found to feel satisfaction at his own success in his attempt when he says that the position of Dharmakīrti and Prajñākara in the line of Ārya Maitreyanātha, Asaṅga, Vasubandhu and Diṅnāga became free from blemishes by dint of his exposition.[5] Udayanācārya defended Vācaspatimiśra against Jñānaśrī and others in his *Nyāyanibandha* otherwise called *Tātparyapariśuddhi*, *Ātmatattvaviveka* and the *Nyāyakusumāñjali*. Shortly after Udayana the Buddhist centres of learning were looted, scholars slaughtered or driven out of the Indian soil and manuscripts burnt by foreign invaders. And thus Buddhist scholarship in India received a death blow.

The orthodox *Nyāya* school was not directly hit by this invasion as, unlike the Buddhists, their opponents from the beginning preferred decentralisation. But the sudden disappearance of the Buddhists from the arena indirectly told upon the growth of the *Nyāya*. Scholars remained satisfied with having a knowledge of a few texts in their own school and search for new light came to a stand still. Thus the first creative epoch of the orthodox logic came to an end with

---

4 *Jñānaśrīmitranibandhāvali*, p. 159.

5 *Ibid.*, p. 506.

Udayanācārya. The main features of the doctrine of this old school were adherence to the theory of sixteen categories and the *sūtras* of Akṣapāda, friendliness to the *Vaiśeṣikas* and opposition to the Buddhists.

After Uddyotakara we find the gradual emergence of a separate sub-school of the *Nyāya* in Kashmir. Due to local conditions it had to make some compromises. Jayanta Bhaṭṭa explains only a part of the *Nyāyadarśana*, shows less interest in the *Vaiśeṣika* school, advocates the authenticity of all the traditional *Āgamas* and the *sāmagrīprāmāṇyavāda*. The next important *Nyāya* scholar from Kashmir is Bhāsarvajña who is regarded as the founder of the Mediaeval sub-school of *Nyāya*. His *Nyāyasāra* is a *sūtra*-work re-arranging the *Nyāya* categories and putting the highest emphasis to the epistemological problems. The treatise is divided into three chapters viz. perception, inference and verbal cognition. The other categories are casually referred to and analogy as a means of cognition is totally discarded. The auto-commentary on the *Nyāyasāra*, *Nyāyabhūṣaṇa* by name, makes the author's position clearer vis-a-vis the work of Akṣapāda. Bhāsarvajña discards the adherence to the *Vaiśeṣika* tenets, accepts the enjoyment of bliss in emancipation and evinces inclination to the *Pāśupata* and *Pātañjala yoga*. The antagonism towards the Buddhists persisted in this school also. The commentators on the *Nyāyasāra* included Jayasiṁhasūri and Vijayasiṁha Gaṇi who were evidently *Jaina* by faith. Jaina logicians are found to quote and criticise the *Nyāyasāra* and the *Nyāyabhūṣaṇa* in their own works. The school of Bhāsarvajña, however, could not maintain its eminence and came to be regarded as a secterian (*ekadeśī*) by the orthodox logicians.

The Jaina position

The relation between the orthodox logicians and their Buddhist counterparts was of constructive rivalry as the Buddhist *Ācāryas* were in most cases converts from the orthodox fold. They had their education in the Brahmanical schools. *Brāhmaṇa* scholars also studied the Buddhist works in their anxiety to save their own position. But the relation between the Jaina and Brahmanical logicians was a bit different. The former cultivated a non-sectarian attitude and respected the views of others. They accepted the tenents of others where they could agree and considered the rest as offering partial aspects of the ultimate truth, whereas their own position, the *anekānta* was considered as all-embracing and complete. Both the Brahmanical and Buddhist logical schools mainly flourished in North-eastern India while Jaina logicians mostly hailed from Rajasthan, Gujarat and their neighbourhood. Thus inspite of the devoted studies in orthodox *Nyāya* on the part of the Jaina scholars, the *Naiyāyikas* are not equally enthusiastic in studying Jaina Philosophy. There is only one dubious reference to the Jaina view in the *Tātparyaṭīkā* of Vācaspati. Udayana in his *Nyāyakusumāñjali* raises

the Jaina objection to the existence of God as creator of the universe. But he also shows no deep knowledge in the Jaina speculations.

The Jaina scholars rendered immense service to the propagation and preservation of the views of Buddhist and Brahmanical logicians. They have preserved valuable quotations from long forgotten works which were once held in high esteem. They wrote commentaries on some texts of both the schools. Lastly they stored their works in their *Bhaṇḍāra*s and saved them from total extinction.

That Abhayatilaka, a Jaina scholar should undertake an elaborate scheme to simultaneously comment on the five major *Nyāya* classics should not surprise anyone conversant with the background outlined above. Jaina contributions to the other branches of Indological speculations are now receiving the attention of scholars. Such significant studies of Dr. J. S. Jetly in the field of the *Vaiśeṣika* philosophy are to be remembered in this connection.

Abhayatilaka and the Nyāyālaṅkāra

Coming to Abhayatilaka again, we find him conversant with the *Nyāya*, *Vaiśeṣika* (old and new schools) and Buddhist authors. He quotes from their works and explains the quotations found in the texts he comments upon. Casual references in them also do not escape his notice. Thus he is found to explain the verses from the *Hetucakraḍamaru* of Diṅnāga quoted by Vācaspati and Udayana. He supplies the chart of the nine *hetu*s and *hetvābhāsa*s according to Diṅnāga's work. There are some Buddhist *kārikā*s quoted by Abhayatilaka which could not be traced in the known texts. His quotations do not come from philosophical works alone, Vedic, Brahmanical and Upaniṣadic texts, *Purāṇa*s and *Dharma-śāstra* works and grammatical texts have also been quoted. Our author is equally mindful to the textual problems also. He notes the variants and accepts the appropriate readings. Suitable emendation is also suggested when the current reading is found unsatisfactory.

We take the opportunity to present the solution of Abhayatilaka of a very naughty problem defying solution for long centuries.

In connection with the exposition of *aprāptakāla* (mistimed) a point of defeat, Vācaspatimiśra in his *Nyāyavārttikatātparyaṭīkā* quotes a verse foot *Kṛtsnāsadivādarabhūtadivā* (*Nyāyadarśana*, Cal. Sanskrit Series, p. 1184, cf. *Ibid.*, Chowkhamba edn. p. 715).

Akṣapāda defines this point of defeat as *avayavaviparyāsavacanam aprāpta-kālam* (*Nyāyadarśana* Vol. ii, 11). The *sūtra* means to say that the propositions in a syllogistic reasoning should be arranged in a definite order. The *pratijñā*

(thesis) should come first. The *hetu* (reason), *udāharaṇa* (example), *upanaya* (application) and *nigamana* (conclusion) should follow one after the other. In case this order is broken by either of the disputants, his adversary may point out this irregularity and the former will have to court defeat according to the *Nyāya* convention. The later literature on the *Nyāyasūtras* shows that several objections were raised against this point of defeat and the followers of Akṣapāda tried to refute them by adducing fresh arguments. Uddyotakara, for instance, answered three such objections put forward by the Buddhists. In connection with the refutation of one of these objections, Uddyotakara adds—*Śāstre vākyāny arthasaṁgrahārtham upādīyante* meaning thereby that in the *Śāstras* the propositions are used to sum up the observed truths. Vācaspati in his *Tātparyaṭīka* makes the point clear by drawing a line of distinction between Śāstric propositions and the proposition used in a debate. The veracity of the former, says Vācaspati, is already proved while that of the latter is subject to minute scrutiny. In the different forms of discussions and disputations—viz. *Vāda, jalpa* and *vitaṇḍā* the language as well as the content of the propoitions are equally examined. The argument of Vācaspati seems to point out that the syllogisms of the contestants should be put in plain and unambiguous language and in their proper form as prescribed by Akaṣapāda. It will not suffice if the import is intelligible to only a few as is the case in the *Śāstras* where sometimes laconic language is used for the sake of brevity and the meaning is learnt with the help of a teacher. Vācaspati in order to show an instance of a laconic Śāstric proposition quotes the verse-foot in question. The context clearly indicates that it has been taken from some reliable scientific work. That it is difficult to be understood by the average scholars is implied by Vācaspati's language. It came before many old *Nyāya* scholars who thought it either too familiar or too difficult to explain. As a result, readings have also become corrupt to defy the attempts of renowned traditional scholars to explain it. Thus the Chowkhamba and Calcutta Sanskrit Series editions of the *Nyāyavārttikatātparyaṭīkā* (*NVTT*) give the reading *Kṛtsnāsadivādarabhūtadivā*. A Calcutta manuscript reads *Kṛtṛrāsadivādarabhrāt*. A manuscript belonging to the late *Swāmī* Viśuddhānanda Sarasvatī gives *Kṛtṛnāsadivādarabhūtadivā*. The printed editions seem to inherit the reading from a manuscript preserved in the Sanskrit College Library, Varanasi with which they are in complete agreement. The Jaisalmir Jaina Bhaṇḍāra manuscript of the *Tātparyaṭīkā* reads *kṛ tṛ rā sa divā da ra bhūta divā*.

This passage has been quoted or referred to by many followers of Vācaspati in the field of *Nyāya-śāstra*. Thus Udayana (c. 1025-1100 A.D.) in the *Nyāya-pariśiṣṭa* refers to it. But Vardhamāna Upādhyāya c. 1325 A.D. in the *Nyāya-pariśiṣṭaprakāśa* and *Anvīkṣānayatattvabodha* makes no mention of the passage. Varadarāja (c. 1150 A.D.) in his *Tārkikarakṣāsārasaṁgraha* says that in case we use propositions with the apprehension of the existence of some meaning,

one will have to allow sentences like *Kṛtavāsadivādarabhūtadivā* in logical debates also. Jñānapūrṇa (c. 1200 A.D.) in his gloss on the above confesses his inability to explain the passage. Cannibhaṭṭa and Rāmeśvara (14th cent. A.D.) in their sub-commentary on this *Sārasaṁgraha* are also silent on this point.

Traditional scholars of Varanasi tried to explain the passage with suitable emendations depending, however, on their imagination alone. The late Mm. Sudhākara Dvivedin connects it with Astronomy. He says that the astronomers regard the co-existence of Sunday with *Caturdaśī* (the last but one day of the lunar half-month) as very inauspicious and quotes *Śīghrabodha*, an astronomical work in his support. On the strength of this evidence he seeks to emend the reading of the passage as *kṛtyā sadivākarabhūtadivā*, meaning thereby that the co-incidence of Sunday and *Caturdaśi* is very inauspicious.

The late Mm. Śivakumāra Śāstrin assumes the reading *Kṛtsnāsadivādara-bhūtadiva* and splits the passage into two parts *kṛtsnāsad iva* and *ādarabhūtat iva*. The meaning according to him is as follows: " I agree with the *Śūnyavādin* in the rejection of the external world. But with regard to the existence of knowledge, I follow the *Naiyāyika* who accepts the existence of both the inner and the outer worlds.

Svāmī Viśuddhānanda Sarasvatī emends the reading and reads *kartari nāsadivādaro'bhūt tadiva* and adds an explanation also.

None of the meanings suggested satisfactorily fits in with the context. Fortunately for us Abhayatilaka Upādhyāya appears to preserve the correct reading and the proper explanation of the complete verse.

Ṭī(kā)yām—Kṛ tṛ rā sa divā da ra bhūta divā iti |
Śu ca rā ṣṭa divaika ra pūrṇa divā |
yadi candragatiś ca tithiś ca samā |
iti viṣṭigaṇam pravadanti budhāḥ ||

iti pādatrayam aparam.

arthasaṁgraha iti. kṛ Kṛṣṇapakṣe tṛ tṛtīyāyām rā rātrau viṣṭiḥ. tathā sa saptamyāṃ divā viṣṭiḥ. tathā da daśamyām rā rātrau viṣṭih. tathā bhūta bhūtāṣṭamyāṃ caturdaśyāṃ divā viṣṭih. tathā śu śucipakṣe ca caturdaśyāṃ rā rātrau, aṣṭa aṣṭamyāṃ divā (ekā)—daśyāṃ rā rātrau, pūrṇa pūrṇimāyām divā viṣṭir iti rūpaḥ. (*Nyāyā lamkāra*, p. 778-779).

Thus according to the passage quoted the verse foot in question belongs to a verse giving the definition of *viṣṭi*, a *karaṇa* (astrological division of time). It means to say that if the duration of the *tithi* coincides with the movement of the moon, the *viṣṭi* covers the day time on the seventh and fourteenth and the night of the third and tenth day of the black fortnight. In the bright one on the other hand, the fourth and eleventh nights as well as the eighth and fifteenth days are covered by it. Abhayatilaka's explanation seems to be more convincing

than any mentioned before. But as regards the source of the verse, Abhayatilaka also is silent. The definition of *viṣṭi* as given above agrees in full with that quoted in the *Jyotiṣatattva* of Raghunandana Bhattacarya, the Bengal Law-giver.[6]

King Bhoja of Dhāra (1010-1062 A.D.) also knew the verse. He has quoted it in the *Rājamārtaṇḍa* along with another explanatory verse added to it.[7]

Abhayatilaka thus appears to have preserved the correct reading and the most plausible explanation of a verse with regard to which other known authorities are either silent or ignorant.[8]

Abhayatilaka flourished at a time when Neo-logic has made its full appearance and logicians of Mithilā were busy with epistemological problems alone leaving aside the other branches of the *Nyāya śāstra. Vedāntins and Prābhākara Mīmāṁsakas* now replaced the Buddhists as their rivals. *Nyāya* tracts and sometimes portions thereof replaced the original five texts in the *Nyāya* syllabus. Abhayatilaka seems to be unaware of this development or even if aware, he did not like the new trend. To understand his position we may compare his work with the other available commentary on the *Nyāyanibandha* of Udayana, the *Nyāyanibandhaprakāśa* of Vardhamāna Upādhyāya (c. 1350 A.D.). The latter explains Udayana's texts in the light of neo-logic and profusely quotes his father's *Tattvacintāmaṇi* in support of his own view. On the other hand, Abhayatilaka receives inspiration from classical masters and as such he may be accepted as a master of the old school of logicians though Neo-logic made its appearance with the departure of Udayanācārya in whose works the field was prepared for its arrival. For the *Tattvacintāmaṇi* as the mature digest of Neo-logic does not give anything which is not introduced by Udayana's works.

Abhayatilaka Upādhyāya: Personal Account

It is gratifying to note that Abhayatilaka has left some account of his activities in the post-colophon *praśasti*s of the *Nyāyālaṅkāra* and his commentary on the *Dvyāśraya kāvya* of Hemacandra. Both give the account of the succession of teachers of the line to which Abhayatilaka belonged. Jineśvarasūri the earliest chief of a *Śvetāmbara* sect was contemporaneous with king Durlabharāja of

---

6 एकादश्याश्चतुर्थ्याश्च शेषार्धे शुक्लपक्षके ।
अष्टमीपूर्णमास्योश्च पूर्वार्धे विष्टिरुच्यते ॥
कृष्णपक्षे तृतीयाया दशम्याश्च परार्धतः ।
सप्तम्याश्च चतुर्दश्याः पूर्वार्धे विष्टिसंभवः ॥ *Jyotiṣatattvaṃ*

7 कृष्णे च तृ दशा रात्रौ दिवा सप्तचतुर्दशी ।
चतुर्थ्येकादशी रात्रावष्टमी पूर्णिमा दिवा ॥
Rājamārtaṇḍa, 1818, Venkaṭeśvara Press.

8 *Journal of the Oriental Institute*, Baroda, Vol XVI, 1966,-67, pp. 159-160.

Gujarat. Then came Abhayadevasūri, Jinavallabhasūri, Jinadattasūri, Jinacandrasūri, Jinapatisūri and Jineśvarasūri as chiefs of the same one after another. The *praśasti* in the *Dvyāśraya-kāvyaṭīkā* mentions some of the notable activities of these teachers while the *praśasti* appended to the *Nyāyālaṅkāra* is brief. Jineśvarasūri had a number of disciples among whom Lakṣmītilaka Upādhyaya was prominent. Abhayatilaka another disciple of Jineśvara is the author of the *Dvyāśrayakāvyaṭīkā* and the *Nyāyālaṅkāra*. Abhayatilaka in the beginning (p. 1) and at the end of each of the ten *āhnika*s of his *Nyāyālaṅkāra* (pp. 289, 338, 439, 496, 549, 648, 670, 702, 758 and 793) pays due respects to his preceptor and humbly acknowledges his debt to Upādhyāya Lakṣmītilaka. When finished Lakṣmītilaka is said to have corrected it with much care.[9] The *Dvyāśrayakāvyaṭīkā* also received a similar treatment from him.[10]

The *Dvyāśrayakāvyaṭīkā* was completed at Prahlādanapattana on the *Dīpāvali* day of *Vikrama Saṁvat* 1312 (1256 A.D.).[11] The *Kharataragacchagurvavali* (Singhi Jaina Series p. 49) gives the date of *padasthāpanā* (coronation for the headship of the sect) of Jineśvarasūri as *Māgha Sudi* 6, *Saṁvat* 1278 (1222 A.D.). According to the same source (p. 49) the initiation of Lakṣmītilaka under him took place at Jāvālipura on *Pauśa Sudi* 11, *Saṁvat*, 1288 (1232 A.D.) and that of Abhayatilaka also on *Vaiśākha Sudi* 10, *Saṁvat* 1291 (1235 A.D.) at the same place. The same *Gurvāvali* (p. 51) adds that Lakṣmītilaka and Abhayatilaka were awarded the title of *Upādhyāya* on *Māgha Sudi* 12, *Saṁvat* 1317 (1261 A.D.) and *Mārga Sudi* 7, *Saṁvat* 1319 (1263 A.D.) respectively. Now as the epithet *Upādhyāya* has been used with regard to both the author and the mentor the *Nyāyālaṅkāra* must have been completed after 1263 A.D. The *praśasti* appended to the *Dvyāśrayakāvyaṭīkā* refers to Lakṣmītilaka as *a tilakakaviraviḥ* (verse no. 12) and to its author as Abhayatilakagaṇi (verse no. 11).

The *Gurvāvali* further adds that in a śāstric disputation at Ujjayinī Abhayatilaka defeated Ācārya Vidyānanda a *Digambara* scholar and received a certificate in the very year of receiving the title of *Upādhyāya*. He was thereafter received in Prahlādanapura and other places with due pomp.[12]

---

9 श्रीलक्ष्मीतिलकोपाध्यायैः संशोधितमतिनिपुणम् । p. 794

10 टीकामेतां सलक्ष्मीतिलककविरविः, शोधयामास सम्यक् ॥ *Praśasti* verse No. 12

11 अब्दे द्वादशभिस्त्रयोदशशते श्रीविक्रमाब्देष्वियम् ।
श्रीप्रल्हादनपत्तने शुभदिने दीपोत्सवेऽपूर्यत ॥ *Ibid.*, I verse 13

12 सं. १३१९ मार्ग सुदि ७ अभयतिलकगणेरुपाध्यायपदम् । तस्मिन्नेव वर्षे श्रीअभयतिलकोपाध्यायैः पं. देवमूर्त्यादिसाधुपरिवृतैरुज्जयिन्यां विहृत्य तपमतीयं पं. विद्यानन्दं निर्जित्य प्रासुकं शीतलं जलं यतिकस्य [कल्पत] इति सिद्धान्तबलेन व्यवस्थाप्य च जयपत्रं गृहीतम् । तस्य च प्रल्हादनपुरादिषु विस्तरेण प्रवेशोत्सवः ॥ p. 51.

Some more works including the *Mahāvīrarāsa*, *Vādasthala*, *Yugādideva-stotra*, *Stambhanastotra* and the *Ādināthastava* are also attributed to Abhayatilaka.

His personal equipments must have been of a very high order. Besides Jainism, he must have studied the principal Buddhist philosophical texts and those of different branches of the Vedic school as is amply attested by the *Nyāyālaṅkāra*.

Before drawing the topic to a close I want to add that the *Nyāyālaṅkāra* did not receive wide publicity. It may be due to the fact that the neo-logicians of those days were more interested in later *nyāya*-digests like the *Nyāyaratna* of Maṇikaṇṭha and the *Tattvacintāmaṇi* of Gaṅgeśa. Guṇaratnasūri at the conclusion of the *Nyāya* section of the *Tarkarahasyadīpikā* on the *Ṣaḍdarśana-samuccaya* of Haribhadra enumerates the important *Nyāya* works and authors. The list attributes *Nyāyālaṅkāra* to Śrīkaṇṭha and a *Vṛtti* to Abhayatilaka.[13] This must have been a slip on the part of Guṇaratna as the work under review shows.

Professor D. C. Bhattacharya has shown that Jñānapūrṇa refers to the *Nyāyālaṅkāra* in his *ṭīkā* on the *Khaṇḍanakhaṇḍakhādya*.[14]

ANANTLAL THAKUR

---

13 ...°परिशुद्धिन्यायालङ्कारवृत्तयः क्रमेण...°श्रीउदयनश्रीकण्ठाभयतिलकोपाध्यायरचिताः।
T. R. Dīpikā, Bibl. Ind.

14 *History of Navya-Nyāya in Mithilā*, Professor Dineshchandra Bhattacharya, Darbhanga, 1958, p. 43.

॥ न्यायालङ्कारः ॥

प्रथमाध्याये प्रथमाह्निकम् ।

[616 b]

'दिनेश्वरश्वेतकरौ गवां भरैः सितप्रकाशप्रविलासिनौ भृशम् ।
यस्यास्य केलीसचिवौ तु राजतो लोकेऽप्यलोके विभु तन्महः स्तुमः ॥

कान्त्याश्लिष्टजटाच्छटाकपटतः संसारकूलङ्कषा-
कूलोल्लेखनकृत्त्वतोऽधिशिरसं संलग्नवल्लयद्भुतः ।
त्राट्कुर्वन् मधुरैर्यशोध्वनिभरैर्न्याय्ये ममोद्यच्छतो
मार्गे सिद्धिकृते समस्तु वृषभेशः संमुखीनः शुभः ॥

स मम भवतु प्रेयःश्रेयःश्रिये परमेश्वरः
सकलजगतीदीपः पार्श्वप्रभुः प्रणतामरः ।
यदुपरिफणाचक्रं भव्याञ्जनाय शिवश्रिया
किल विनिहितं माहानीलं सुपात्रमराजत ॥

आज्ञाकल्पलतां जिनेश्वरगुरोस्तज्जेतदत्तं मह-
श्चिन्तारत्नमथाप्य लक्ष्मितिलकोपाध्यायगीःस्वर्गवीम् ।
श्रीन्यायाभिधतर्कशक्रमपि पुंमात्रेण धीदुःस्थता-
भाजोद्वाहयितुं सुदुर्गमपदव्याख्याङ्गजारभ्यते ॥

श्रीश्रीकण्ठेनाहिता दुर्गमार्थव्याख्यास्माभिर्यावतीक्षांबभूवे ।
पञ्चप्रस्थन्यायतर्कस्य तस्यास्तावत्याः सान्या विधेयेति बोध्यम् ॥

॥ सप्रयोजनाभिसंबन्धप्रकरणम् ॥

[१, १, १–२]

उदयने ॥ तत्त्वाध्यवसायसंरक्षणक्षमेति । एतेन तायिशब्दस्य

---

१ अर्हं । श्रीयुगादिदेवायनमः ।

पालकत्वरूपोऽप्यर्थः उक्तः । तत्त्वाध्यवसायसंरक्षणक्षमस्य हि सम्प्रदायस्यैतस्य **शास्त्रस्य** प्रवर्तकत्वेनोच्यमाने मुनौ वस्तुतो मुनिरेव तत्त्वाध्यवसायसंरक्षक उक्तः स्यात् ।

दर्शित इति—**टीकाकृता** ।

कथन्तासंबोधविधुर इति । कथमिदं घटत इति कथन्ता आक्षेपः । एवमेवं घटत इति संबोधः परिहारः । ताभ्यां विधुरः । आक्षेपपरिहाररहित इत्यर्थः ।

विवक्षित इति । न च शिष्याणां वक्तुमिष्टो नाभिप्रेत इत्यर्थः ।

तथात्वे वेति । विवक्षितत्वे वा ।

उपनिषद एवेति । कथन्तासंबोधविधुरा आत्मादिस्वरूपमात्रप्रतिपादका आगमा एव ।

[1]**शिवमुष्टिन्यायेनेति** । उपपत्त्यपेक्षाराहित्येनेत्यर्थः ।

अनेनेति । **टीका**ग्रन्थेन ।

साम्प्रतमिति । **वार्त्तिक**करणकाले ।

तस्येति । अक्षपादस्य ।

तत्प्रणयनमेवेति । न्यायशास्त्रस्य करणमेव कर्तृ ।

तद्विषयतापीति । जगदुपशमनिदानशास्त्रविषयता ।

तद्व्याख्यानादेवेति । शास्त्रव्याख्यानादेव ।

उत्तानताप्रतिभास एवेति । न्यायवन्नाममात्रधारिणोऽप्यौद्धत्यपरिहाराय करिष्यमाणं न कदाचिदपि वदन्ति । तन्न्यायमहोदधेः **वार्त्तिककृ**तः **करिष्यते तस्य मया निबन्ध** इत्यौद्धत्यप्रतिभासो न प्रथमत एव कर्तुमुचित इत्यर्थः ।

शास्त्रस्यैवायं निबन्ध इति दर्शितमिति । एतेन **सूत्र**स्यैवायं निबन्ध इति दर्शयितुं करिष्यते तस्य मया निबन्ध इति उक्तम् । तथा च **स्वनिबन्धस्ये**त्यादि पराशङ्कितमपास्तम् । एतेनैव च **न चैतदतिशयेन साम्प्रतमुपयुज्यत** इति निरस्तम्, **सूत्रकर्तुः** प्रवरत्वोत्कीर्तनस्य व्याख्याया उपादेयताहेतुत्वेनात्यन्तमुपयुक्तत्वात् ।

---

१ शव° (?)

अत एवेति। **भाष्यस्य** सूत्रादनाधिक्यमननादेव **अथ भगवता** इत्यादि-कायाः **तदपनीयते** इत्येतदन्तायाः **अक्षपाद**प्रणीतसूत्रस्यैवोपरीदं **वार्त्तिक**मित्यर्थ-प्रकाशनपराया**ष्टीकाया**

यदक्षपादप्रतिमो भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥

इति **वार्त्तिका**न्तश्लोकेन **भाष्य**स्योपरीदं **वार्त्तिक**मित्यर्थकथनपरेण सह न विरोधः ।

इत्यभिसन्धिर्वार्त्तिककृत इत्यर्थ इति । एतेन **जगदुपशमनिदान-शास्त्रप्रणेतृत्वं तु** इत्यादि पराशङ्कितं निरस्तम् । **स्वनिबन्धस्य** इत्यादि पराशङ्कितं तु **उद्द्योतकरेण** [617a] **निबन्धोद्द्योतेन तदपनीयते** इति प्रयोजनवा-नारम्भ इति **टीका**यां स्पष्टमेव निरस्तम् ।

अन्तर्भावितेत्यादि। अन्तर्भावितः फलवत्सन्निधावफलं तदङ्गं फलवत्सन्निधौ तदङ्गं फलवतोऽङ्गमफलं नान्येन फलेन फलवदित्यर्थ इति न्यायो यत्र तस्मात् । अत्रैक-देशिनां मतमाह—**ननु चेति।** अनुष्ठातैव कीदृगित्याह—**शास्त्रान्तरेति।** अस्माच्छा-स्त्रादन्येभ्यः शास्त्रेभ्यो लब्धानि ब्रह्मत्वादीनि रूपाणि येन सः । आदिपदलब्धानि रूपाणि आह—**तस्य च रूपाणीति।**

शमदमेति। शमः कर्मेन्द्रियजयः, दमश्च बुद्धीन्द्रियजयः ।

कर्मकाण्डवदिति। यथा योऽनधिकारी शूद्रादिः प्रवर्तते कर्मकाण्डे यागादौ स फलभाङ् न स्यात्, तथा ब्रह्मकाण्डे तत्त्वज्ञानप्रतिपादके शास्त्रे योऽनधिकारी प्रवर्तते स न फलभाक् स्यात् ।

अत्रै**कदेशिन** एव तटस्थमाशङ्कन्ते—**तत्रैतत् स्यादिति।** स्यादेतदित्यर्थः।

तस्यैवेति। उपायस्यैव ।

तदर्थतया तत्त्वज्ञानमपीति। मोक्षार्थं यत् तत्त्वज्ञानं तदपि ।

एकदेशिनः समादधते—**सतामिति।**

प्रतिसन्धानायेति। पुनर्जन्मनेऽनधिकृतस्य फलभागित्वमेव भावयति ।

न चेति। न हि तस्य कर्मणः ।

टीकायाम् ।। **आहितमिति** । आरोपितम् ।

उने ।। **सतीति** नमस्कारे विद्यमाने ।

टीकायाम् ।। **अपदिशतीति** ज्ञानपदेन । **न स्वरूपेणेति** शास्त्रेत्यनेन ।

उने ।। किलास्य हेतुत्वं निःश्रेयसं प्रति करणत्वं च पदार्थतत्त्वं प्रति इति मनसि निधायाह **परः—ननु हेत्विति** ।

न विषयभेदेन भवत इति । करणस्य हेतुविशेषरूपत्वात् ।

नान्तरीयकत्वादिति । व्यापारस्य प्रतिपादितसंबन्धाविनाभूतत्वात् । नान्तरीयकत्वमेव **नही**त्यादिना क्रमेण भावयति । केवलं नाप्यतत्कर्म तद्व्यापारविषय इत्येकेनैव वाक्येन द्वितीयतृतीयसंबन्धद्वयनान्तरीयकत्वम् । नापि तत्फलाननुगुणस्तस्य व्यापारस्तद्व्यापारविषयो वेति । न ह्यस्ति संभवस्तस्य व्यापारिणो यत्फलं तदननुगुणश्च स्यात् तस्य व्यापारिणो व्यापारश्च । तस्य व्यापारिणो व्यापारविषयश्च वेति ।

ननु ज्ञानमिति यदि करणसाधनं तर्हि **भाष्ये** तत्त्वस्य ज्ञानमिति **कर्मणि षष्ठी** विरुध्यते । सा हि भावप्रधाने एव संगच्छत इत्याशङ्कयाह—**एनमेवेति** ।

प्रवृत्तिफलत्वादिति । शिष्याचार्यादिसंबन्धा हि अध्याप्याध्यापकभावादयः । ते च शास्त्रे प्रवृत्तौ सत्यां स्युरिति तत्फलमित्यर्थः ।

शास्त्रादीनामिति । आदिपदात् शिष्याचार्यादिग्रहः ।

स्वरूपेति । अल्पाक्षरासन्दिग्धत्वादि ।

प्रमाणान्तरेति । शास्त्रान्तरसिद्धत्वात् ।

आत्मा च तथेति । मिथ्याज्ञाने संसारजनकः, तत्त्वज्ञाने च मुक्तिहेतुः ।

तदन्येषामिति । प्रमाणादीनाम् ।

टीकायाम् ।। **यत्पदार्थेति** । यश्चासौ पदार्थश्च यत्पदार्थः, तस्य यत् तत्त्वज्ञानम्, तस्य ।

उदयने ।। **इत एवेति** । अस्मिन् शास्त्रे प्रवृत्तेरेव ।

तन्निश्चयः । प्रयोजननिश्चयः ।

प्रथमसूत्र एवेति । मुनिवचनरूपे ।

तथात्वप्रसङ्ग इति । प्रयोजननिश्चयानपेक्षत्वप्रसङ्गः ।

साधनगोचराविति । उपायगोचरौ ।

प्रवृत्तिर्हि प्रयोजननिश्चयापेक्षया व्याप्ता अनुभवफलेच्छातस्तु सा निवर्तमाना स्वव्याप्यं प्रवृत्तित्वमपि निवर्तयतीत्याह— **न त्वनुभवः फलेत्यादि** । न त्वेतावता [6r7b] प्रथमसूत्रविषयोऽनुभवः प्रयोजननिश्चयापेक्षां विनापि स्वरसेन स्यादिति नानवस्थेत्युक्तम् । यथा चायमनुभवः स्वरसतः तथैव तच्छास्त्रविषया इच्छालक्षणा प्रयत्नलक्षणा वा प्रवृत्तिरपि स्वरसेनैव भविष्यति, किं प्रयोजनाभिधानेनेत्याशङ्कयाह—**पुरुषार्थसाधने त्विति** ।

स्वरससिद्धेति । अनपेक्षितप्रयोजना ।

असाविति । प्रयोजनसामान्यनिश्चयः ।

न त्ववश्यंभावीति । अवश्यं निःश्रेयसं भवत्येव शास्त्रादिति न ।

अत्रापीति । शास्त्रे ।

तेन नेष्टेति । यदि किल प्रयोजनस्य प्रवृत्तिविषयतया प्रवर्तकत्वमुच्येत, तदेष्टाभ्युपायता विधि । इष्टाभ्युपायतैव विधिः प्रवृत्तिविषयत्वेन प्रवर्तिकेत्यर्थो विरुध्येत । यदा तु भविष्यत्त्वेनासत्त्वात् प्रयोजनस्य प्रवृत्तिविषयतया प्रवर्तकत्वं नोच्यते, किं त्विष्यमाणतया तदा न विरोध इत्यर्थः ।

अर्थसंशयादिति । प्रयोजनसंशयात् ।

तथापि तमिति । यद्यपि च भविष्यत्तया संशयोऽस्ति, तथापि तं सस्याद्यधिगमं निष्प्रयोजनमिति न तु निरभिधेयमिति व्याख्येयम् ।

इन्द्रियादीनामिति । आदिपदादिन्द्रियार्थसन्निकर्षादिग्रहः ।

तथाभूतस्यैवेति । निश्चयाकारस्यैव ज्ञानस्य ।

सन्देह इति । यथार्थमयथार्थं वेति संशयः ।

तदिति । ज्ञानम् ।

एकस्मिन्नर्थ इति प्रमाणे ।

कृतकत्वानित्यत्वयोरिति । कृतकत्वमुत्पत्तिमात्रोपलक्षिता सत्ता । विनाशोपलक्षिता सत्ता अनित्यत्वम् ।

प्रामाण्यावधारणमिति । यद्यव्यभिचारित्वावधारणेन प्रमाणं स्वगोचरावधारणायालम्, तर्हि प्रामाण्यावधारणेन किं कार्यमित्यर्थः ।

टीकायाम् ॥ तदेव हीति । अव्यभिचारित्वमेव ॥

उने । न च करणत्वादय इति । यद्यत् प्रमाणं तत्तत् करणमेवेति नास्ति कदाचित् प्रमाणभूताया अपि राजतुलाया अन्यतुलया तोलने प्रमेयत्वस्यापि संभवात् । यद्यत् करणं तत्तत् प्रमाणमेवेत्यपि न, परश्वादेरप्रमाणरूपस्यापि करणत्वात् । एवमिन्द्रियादिकं जलादिज्ञानजनकं प्रमाणमपि यदान्येन प्रवृत्तिसामर्थ्यादिना प्रमाणेन प्रमीयते तदा प्रमेयं भवति ।

धर्मधर्मिणोरिति । प्रमात्वप्रमयोः ।

भेदपक्षे प्रागेवेति । दूषणमिति संबन्धः ।

न तद्धर्मतयेति । न व्योमभूम्यादिधर्मतया । यदा च भूमेरयं गन्ध इत्येवं तद्धर्मतया ग्रहः, तदा भूम्यां गृहीतायामेव । प्रकृते तु ज्ञानस्य प्रामाण्यं स्वतो वा निश्चीयते इत्यादिना तद्धर्मतयैव जिज्ञास्यमानं प्रामाण्यमास्ते इति भावः ।

स्वग्राहकेण वेति दूषयतीति । येन प्रमा गृह्यते तेनैव प्रमात्वमपीति कल्पं दूषयति ।

तद्धीति । प्रमावत् प्रमात्वस्यापि ग्राहकं ज्ञानम् ।

ननु मनसो ज्ञाततालक्षणलिङ्गस्य वा स्वाकारणस्याविशिष्टत्वात् मा भूत् प्रमाग्राहकस्य मानसस्य लैङ्गिकस्य वा तदाभासात् यथार्थत्वेन वैशिष्ट्यम्, परमस्य यो विषयो ज्ञानलक्षणः तस्येदृशः स्वभावविशेषो येन यथारूपं तत् तद्रूपस्यैव ग्राहकं मानसादि स्यात्, नान्यद्रूपस्य, तथा च यथावस्थितविषयग्राहित्वात् तदाभासाद् विशिष्टं भविष्यति । अत आह—**विषयविशेषास्त्विति ।**

अप्रामाण्यस्यापीति । अप्रमात्वस्यापीति ।

तत्रापीति । [618a]अप्रमायामपि ।

विषयवैशिष्ट्यस्येति । ज्ञानस्वभावविशेषस्य ।

तथाप्यासञ्जकस्यापीति । प्रमावासनाया समुत्कटत्वेनाप्रमापि प्रमेत्येव गृह्य-ताम् । मानसादिना परमस्यारोपकस्य मानसादेर्यद्यारोपकत्वं मानसान्तरादिना गृहीतम्, तदा स्वतोऽप्रामाण्यग्रहणं प्राप्नोति ।

तत्रापीति । आसञ्जकेऽपि ।

नानवस्थेति । आसञ्जकस्यापि यद्यासञ्जकत्वमवगतमित्याद्या वृत्त्या ।

नन्वासञ्जकज्ञानस्य मानसादिना आसञ्जकत्वानासञ्जकत्वविशेषरहितं सामान्येन ग्रहणं भविष्यतीत्यत आह —**न च कृत्रिममिति** ।

कृत्रिमं रूपम् । आसञ्जकज्ञाने आरोपितप्रामाण्यरूपम् ।

संशयेनेति । किमिदमासञ्जकमनासञ्जकं चेति ।

मायालिङ्गिनीति । यथा मायालिङ्गिनि झटिति परिव्राजकबुद्धिः, किमयं परिव्राजकः, किं वा मायालिङ्गीति संशयेनाभिभूतत्वात् न ग्रहणमित्युच्यते ।

तस्माज् ज्ञानं न गृह्यत एवेति । ज्ञानं ज्ञानान्तरेण न गृह्यते तावत् । न हि ज्ञाने उत्पन्नेऽवश्यं तद्ग्राहकं ज्ञानान्तरं जायत इति भावः ।

अयमिति । प्रमाणाप्रमाणविभागव्यवहारः ।

सौष्ठवादिति । दार्ढ्यात् ।

तेनेति । स्वसंवेदननयेन ।

अनुमानत्रयमिति । कार्यलिङ्गकमकार्यलिङ्गकं च किञ्चित् केवलान्वयिरूपं किञ्चिद् व्यतिरेकिरूपं किञ्चिचान्वयव्यतिरेकिरूपमिति भावः ।

उने । अर्थतथात्वमिति । अर्थयथार्थत्वम् ।

अर्थवत्त्वमिति । अव्यभिचारित्वम् ।

प्रवर्तकस्येति । ज्ञानस्य ॥

टीकायाम् । देशकालावस्थान्तरेति । अन्तरशब्दः प्रत्येकमभिसंबध्यः ।

अर्थस्वरूपप्रकारयोरिति । इदमिति स्वरूपम् । रजतमिति प्रकारः ॥

उने । अभिन्नाश्रयत्वादिति । ज्ञानलक्षणैकाश्रयत्वात् ।

तदभेदेऽपीति । देशावस्थयोरभेदेऽपि ।

तदुपग्रहः इति । कालग्रहणम् ।

तदनेनेति । कालग्रहणेन ।

स चेति । संबन्धः ।

तच्चेति । समर्थप्रवृत्तिजनकत्वम् ।

क्वचिदप्यसिद्धेरिति । प्रवृत्तिसामर्थ्येनाधुनैव साध्यत्वात् ।

सिद्धौ वेति । प्रत्यक्षादिना ।

किमनुमानेनेति । अन्वयग्राहकानुमानेन हि प्रामाण्यसमर्थप्रवृत्तिजनकत्वयोरन्वयो गृह्यते । तस्मिंश्च सति समर्थप्रवृत्तिजनकत्वेन प्रामाण्यं साध्यते । प्रामाण्यं चेदन्यथासिद्धं किमन्वयग्राहकानुमानेन ?

अथैवं मन्यसे, अनुमानान्तरेण सिद्धस्य प्रामाण्यस्य प्रवृत्तिसामर्थ्येन सहानुमानेनान्वयग्रह इत्याशङ्क्याह—**अनुमानान्तरेत्यादि** ।

अत्रापि प्रामाण्यं चेदनुमानान्तरेण सिद्धं किमन्वयग्राहकानुमानेनेति प्राच्यं दूषणमस्त्येव, येनानुमानान्तरेण प्रामाण्यं सिद्धम् । तस्याप्यविनाभावे गृहीत एव । स चाशक्यग्रह इति अनवस्था तु दूषणान्तरमिति भावः ।

तदवधारणे वेति । प्रमाणानामर्थवत्त्वसाधकं समर्थप्रवृत्तिजनकत्वादित्यनुमानं समर्थप्रवृत्तिजनकत्वात् स्वयमर्थवदित्येवं समर्थत्वावधारणे वा ।

अनवधृतप्रामाण्येनेति । अनवधृतप्रमाजनकत्वेन ।

प्रामाण्यानवधारणे इति । प्रवृत्तिसामर्थ्येनाधुनैव प्रामाण्यस्यावधारयिष्यमाणत्वात् ।

व्यतिरेकनिश्चयोऽपीति । यः स्वविषयपरिच्छेदे कर्तव्येऽनुमानेनावश्यम् अपेक्षते ।

स्वरूपतो [6:8b] **धर्मतश्चेति** । प्रमाणानां प्रामाण्यसाधकमिदमिति स्वरूपतः । इदं च यथार्थमेवेति धर्मतः ।

अनवधारितेनैव सता प्रमाणेन इति । प्रामाण्यानवधारणेऽपि । व्यतिरेकनिश्चयस्तु यथा स्यात्, तथा अग्रे वक्ष्यति ।

तदतद्रूपेति । प्रामाण्याप्रामाण्यरूपसन्देहोऽपि ।

तदुपायस्त्विति । तस्य प्रामाण्यनिश्चयस्योपायः । साधनं तु विचारमर्हति । प्रामाण्यनिश्चयोऽस्त्येव । परमसौ कः स्वेन साध्यते, कश्च परेणेति चिन्ता तत्र यत्रानुमानादौ प्रामाण्यनिश्चये स्वमुपायः तत्रान्वयो गृह्यत इत्याह— **एवं चेति** ।

प्रमाणादितत्त्वेति । प्रमाणादीनां तत्त्वज्ञानस्य साध्यतया निःश्रेयसलक्षणं प्रयोजनं कथ्यते ।

उत्तरयतीति । उत्तररूपं करोति **टीकाकारः** ।

अनवधेयत्वेति । अनादरणीयत्वप्रसङ्गात् ।

नात्रापीति । शिष्याकाङ्क्षाक्रमेण शास्त्रप्रवृत्तिविषये न किञ्चिद् वचनमपेक्षते। एतद्वाक्यानन्तरं **तदनुभवसिद्धमपी**त्यादि योज्यते। ननु प्रामाण्याद्यभिधायकत्वम् । यः कश्चिद् व्यामोहात् न प्रतिपद्यते तं प्रति व्याख्याता **वार्त्तिककारः** शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वादित्येतत् किमाचष्टे? अत आह—**उक्ताबोद्धारमिति** । य उक्तं न बुध्यते, तं प्रति व्याख्यातारो भवन्ति ।

केनोल्लेखेन—**यत एवमयमाहेति** । यतोऽयं प्रतिपादयितैवमाह, अतोऽनेनेदम् उक्तमिति न वाच्यमित्येवंविधेन ।

विवरिष्यतीति । **वार्त्तिककारः** ।

न च वाक्यसामान्यमपि पदसमूहमात्रमिति पदसमूहमात्रं वाक्यसामान्यमपि न, किं पुनर्वाक्यविशेषरूपं सूत्रम् ?

तत्रापीति । उत्तराह्निकेऽपि ।

प्रथमे इति । अध्याये ।

स्वरूपप्रदर्शनमिति । स्वरूपव्याख्यानम् ।

तन्निराकरणीयामिति । षोडशत्वानुवादनिराकार्याम् ।

साधर्म्यविशेष इति । न तु जातिविशेषो यतः प्रमाणप्रमेयादयः प्रमाणानि प्रमेयाश्च ततो जातिसंकरप्रसङ्गात् ॥

टीकायाम् । **वैनयिकबुद्धीति** । शास्त्रपरिशीलनोत्थबुद्धिः ॥

उने । कथमिति । वादम् ।

मोहादपीति । अज्ञानादपि मोक्षरूपम् अजानतोऽपीत्यर्थः ॥

टीकायां । प्रमाणान्तरे इति । शास्त्रादन्यस्मिन् प्रमाणे ।

कथंचिद् विषयं जिज्ञासवो यदेन्द्रियाद्यपेक्षन्ते इति । यदा प्रत्यक्ष-सामग्र्या प्रत्यक्षोपलभ्यमर्थं जिज्ञासन्तीत्यर्थः ॥

उने । परमपुरुषार्थसाधनं तु जिज्ञासव इति शेषे न्यायेनेति शेष इति । एतेन **वार्त्तिके** यदा पुनरुपदेशमपेक्षन्ते इत्यनन्तरं परमपुरुषार्थसाधनं तु न्यायेन जिज्ञासव इति शेषः सिद्धः ॥

विधायकप्रमाणेति । विधायकं प्रमाणमनुभवः ।

इष्टमिति । श्रेयसः सामान्यलक्षणम् ।

एतत्साध्यमिति । एतस्य शास्त्रस्य साध्यम् ।

तदप्रसक्ताविति । कण्टकादेर्हिंसादेरप्रसक्तौ ।

पुनर्भिनत्तीति । वार्त्तिककृत् ।

तथात्वे इति । आत्यन्तिकत्वे ।

सर्वत्रैवेति । घटादावपि ।

कारणकार्यशब्देन शरीरेति । अत्र पक्षे कार्यशब्दो वस्तुवचनः ।

ननु दुःखस्य कारणानि शरीरादीनि । अतस्तन्निवृत्तौ कथं दुःखं भवेदत आह— **मा भूद् दुःखमिति ।**

तस्यापि तत्कार्यत्वादिति । सुखस्यापि शरीरादिकार्यत्वात् ।

भवत्विति । उत्पद्यमानं तु ।

प्रदेशान्तरेऽपीति । स्थानान्तरे[619a]ऽपि ।

साक्षाद् दुःखं जनयन्तीति । स्रगादयस्त्विच्छाद्यन्तरा कृत्वा ।

साधारणनिमित्ततायामिति । सुखदुःखयोः साधारणनिमित्तं शरीरादि ।

असाधारणनिमित्तेति । दुःखस्यासाधारणनिमित्तमधर्मः, सुखस्य तु धर्मः ।

कार्यतश्चेति । प्रवृत्तितः ।

अनर्थसूत्रमिति । अनर्थं सूत्रयति ।

आहत्येति । मुख्यवृत्त्या ॥

टीकायां । **सकलसुखानुषङ्गिण** इति । सकलसुखव्यापकाः, यत्र सुखं तत्रैतान् विनेत्यर्थः ।

दुःखानुषङ्गीति । दुःखव्याप्तं यत्सुखं तन्न दुःखं विनेत्यर्थः ।

उने । **अनियतविपाकसमयत्वादिति** । अनियतफलकालत्वात् ।

मोक्षमाणस्येति । अस्यैव मुक्तिमिच्छतः ।

परिकरज्ञानमिति । संशयादिज्ञानम् ।

प्रसंख्यानमिति । समाधिः ।

समूलदोषेति । मिथ्यावासनासहितरागादिनिर्मूलनम् ।

अप्रवृत्तिरिति । धर्माधर्महेतोः प्रवृत्तेरभावः ।

तत्कार्यासमर्थत्वादिति । धर्माधर्मासमर्थत्वादित्यर्थः ।

आरम्भे इति । उत्पादे ।

तच्चेति । अधिकारिशरीरम् ।

तस्येति । शरीरस्य ।

तस्य चेति । परिमितस्य नियतविपाकसमयस्य च कर्मणः ।

तदेवेति । भोजनादिसुखम् ।

क्वचिद् दुःखाभावेऽपीति । आधिभौतिकादिदुःखरहितस्याघ्रातुं पुष्पमालोपादाने इव ।

क्वचित् स्वभावेऽपीति । यथा सर्पात् पलायने सुखस्यानुत्पादेऽपि ।

तत्रेति । परदारेषु ।

अचिरमनुभूयत एवेति । नष्टे शरीरे ज्ञाननाशक्षणे ।

असत्यानीति । अफलानि ॥

टीयाम् । **एतच्च प्रवृत्त्यङ्गमिति** । एतत् केवलस्य दुःखस्यात्यन्तिकी निवृत्तिः श्रेयः ॥

उने । **अत्रेति** । विषसंयुक्तान्ने ।

न तथा अपवर्गेऽपीति । अर्थस्य स्वरूपत्वम् ।

एवं सतीति । अस्य शास्त्रस्य रागादिमतः प्रति **प्रवृत्त्यनङ्ग**त्वे ।

तदनेनेत्यादिना प्रकृतमुपसंहरत एव **टीकाकृत** उक्त**वार्त्तिका**नुकीर्तनं **तदवयवमित्यादिना** चाप्रकृतोपनिपातशङ्कामपनेतुं वक्ष्यमाण**वार्त्तिका**नुकीर्तनमित्याह **—प्रकृतमिति** ।

[1]मिथो व्यापकविरुद्धमिति । प्रमाणस्यार्थवत्त्वं व्यापकं तथा च तेनानर्थवत्त्वं विरुद्धम् । तथा अनर्थवत्त्वस्याप्रमाणं व्यापकम् ; तथा च तेन प्रमाणं विरुद्धमित्यर्थः ।

निष्कम्पप्रवृत्त्यापीति । निःशङ्कप्रवृत्त्यै ।

नन्विदं शुक्लभास्वररूपवद् द्रव्यं रजतमित्याकारं रजतज्ञानं न स्वालम्बनविषयं ज्ञानान्तरं जनयति, तत्कथं परिच्छिनत्तीत्युच्यते? अत आह—**परिच्छिनत्ति उक्तमर्थमिति** । उक्तोऽर्थः पुरोवर्तिशुक्लभास्वररूपवद्द्रव्यरूपः ॥

परिच्छित्तिरूपमिति । निश्चयरूपम् ।

न रजतमितीति । इत्याकारम् ।

यद्येवमिति । यदि रजतज्ञानं शुक्तिज्ञानं च पुरोवर्तिशुक्लभास्वरद्रव्यविषयं तदा ।

अनयोरिति । रजतज्ञानशुक्तिज्ञानयोः ।

समारोपापवादस्वभावतयेत्यर्थ इति । रजतज्ञानं समारोपस्वभावं शुक्तिज्ञानं चारोपनिराकरणस्वभावमित्यनयोर्बाध्यबाधकभाव इति भावः ।

दर्शिते इति । **टीकाकृता** रजतविज्ञानमपीत्यादिना ।

जात्येति । स्वभावे ।

स्वरूपस्थितेनार्थेनेति । सामान्यलक्षणेन ।

---

१ J तिथो S मिथ्या

अप्रमाणस्यापीति । मिथ्याज्ञानस्य ।

सामान्यपरिच्छेदकत्वमिति । सामान्यपरिच्छेदरूपभवनम् ।

अस्ति तावदित्यादि । यथा यथार्थत्वायथार्थत्वसन्देहेऽपि जलज्ञानेन सामान्यतो जलं व्यवस्थाप्यते, ततोऽग्रे प्रवृत्तस्य यत्र जलप्राप्तिर्यत्र च जलाप्राप्तिस्तज्ज्ञानयोः सत्यत्वासत्यत्वसन्देहेऽपि इयं समर्था प्रवृत्तिरियं चासमर्थेति, तथैव ताभ्यां सामान्यतो व्यवस्थाप्यते । ततश्च सामान्यत उपस्थापिता असमर्था प्रवृत्तिः स्वस्यासाधारणं [61gb] समर्थप्रवृत्तिकारणव्यतिरिक्तं विपरीतार्थपरिच्छेदव्यापारं कारणमुन्नाययति । तदेव चाप्रमाणमिति व्यवह्रियते । एवं चासमर्थप्रवृत्त्या सन्दिग्धयापि स्वकारणेऽप्रमाणेऽवगमिते सामर्थ्यासामर्थ्यसन्देहेऽपीत्याद्युल्लेखेन समर्थप्रवृत्तेरप्रमाणाद् व्यतिरेको निश्चीयते ।

विरुद्धकार्यत्वं लिङ्गमिति । समर्था प्रवृत्तिरसमर्थकारणजन्या न भवति विरुद्धकार्यत्वात् । एवमितरापि ।

इदमपि लिङ्गं कथं ग्राह्यमित्याह—**प्रकृतेति** । प्रकृतं कार्यं समर्था प्रवृत्तिः । तद्व्यभिचारोऽसमर्था प्रवृत्तिः । तद्ग्राहि च प्रत्यक्षं लिङ्गेन तद्ग्राहिप्रत्यक्षेण च व्यतिरेको गृह्यत इति भावः । एतेन प्रवृत्तिसामर्थ्यासामर्थ्याभ्यां सन्दिग्धाभ्यामपि व्यतिरेकः साध्यते । प्रवृत्तिसामर्थ्यान्तिरेण निश्चिताभ्यामेव तु ताभ्यां प्रामाण्याप्रामाण्ये साध्येते इत्युक्तम् । एवं च प्राग् यदुक्तम् **एतेनैतदपि निरस्तं यदित्यादि** तदपि युक्तियुक्तं सम्पन्नम् ॥

श्रेयोहेतुतालिङ्गेत्यादि । श्रेयोहेतुताया यल्लिङ्गं तज्जातीयत्वं तस्य परामर्शः । तज्जातीयं चेदमिति । तत्प्रसवोचितं श्रेयोहेतुता तज्जातीयत्वयोर्व्याप्तिस्मरणसहितमित्यर्थः ।

संभाविताप्तत्वेति । संभावितमाप्तत्वं यस्य तस्य वचनात् ।

अनुमानप्रवृत्तेरिति । प्रवृत्तिसामर्थ्येन प्रामाण्यं नावधार्यत इति शेषः ।

परामृश्यत इति । अनुमानं क्रियते ।

अतीन्द्रियस्येति । प्रतिषेध्यस्य भविष्यत्त्वेनातीन्द्रियत्वात् प्रागभावोऽतीन्द्रिय एव ।

तस्येति । समर्थप्रवृत्तिप्रागभावस्य ।

अनुभूते तस्मिन्निति । स्वरूपेणोपलक्षिते तस्मिन्ननुभवेऽनुभूते ।

स्वरूपप्रकारेणेति । स्वरूपं चासौ प्रकारश्च स्वधर्म इत्यर्थः ।

विभ्रमविषय इति । विभ्रमस्य विषयो रजतादिः ।

तदसिद्धिरिति । या पुनर्मन्त्रायुर्वेदस्य प्रामाण्याविनाभावासिद्धिः, सैवानभ्यासदशापन्नत्वं निष्प्रयोजनीभूतत्वादिति परीक्षायाम् ॥

उत्तरोत्तरफलाभिसन्धानेनेति । यथोत्तरकाले जलपानेनोदन्योपशमः क्रियत इत्यभिप्रायेण ।

तत्सन्तानगोचराया एवेति । उत्तरोत्तरफलगोचरा उत्तरोत्तरं फलं सुखशरीरसौष्ठवाद्युद्दिश्योदन्योपशमादिफलविषया एवेत्यर्थः ॥

टीकायाम् । **अनादित्वमुक्तमिति** । यद्यपि प्रवृत्तिसामर्थ्यं स्वोत्पत्तावर्थनिश्चयं नापेक्षते, अर्थसन्देहादपि प्रवृत्तिसंभवात्, तथापि यदा प्रामाण्यसाधनाय हेतूक्रियते तदा स्वनिश्चयार्थं निश्चयमपेक्षते । प्रवृत्तिसामर्थ्यज्ञानस्य प्रामाण्यमवधार्यते तज्जातीयत्वेन प्रवृत्तिसामर्थ्यान्तरेण वा लिङ्गेन । ते च लिङ्गे दृष्टान्तीक्रियमाणस्यार्थस्य निश्चये सति साधके स्याताम् । एवं च प्रवृत्तिसामर्थ्यमर्थनिश्चयमपेक्षते, अर्थनिश्चयश्च प्रवृत्तिसामर्थ्यमित्यभिप्रायेण **वार्त्तिके** अनादितापरिहार उक्त इत्यर्थः ॥

उने । **तदिति** । अविपरीतार्थत्वम् ।

तदेवेति । अविपरीतार्थत्वमेव ।

एवंभूतावसायेऽपीति । वह्निमानेवायमिति ज्ञानस्याविपरीतार्थत्वावसायेऽपि ।

विपर्ययत्वशङ्केति । वह्निं विनापीदं वह्निज्ञानमित्युल्लेखेन ।

तदिति । अनुमानम् ।

साचेत्यादि । वह्न्यनुमानं हि धूमलिङ्गोद्भवम् । लिङ्गं च न लिङ्गिनं विनेत्यनुमाने विपर्ययत्वशङ्का नास्तीत्यर्थः ।

न त्वनुमाने लिङ्गोत्थत्वाद् विपर्ययत्वशङ्का मा भूत् तत्प्रामाण्यग्राहिणि त्वनुव्यवसाये सा भविष्यतीत्याह—**न चेति** । अनुव्यवसायो हि लिङ्गसमुत्थत्वग्रहण [1]एवोत्पद्यते अतो वह्निज्ञानं विपरीता[620a]र्थमप्यविपरीतार्थतया अनुव्यवसायो गृह्णातीत्येवं शङ्काया नैवावकाश इत्यर्थः ॥

---

१ J एवोद्यच्छति

टीकायां । ननु यद्यनुमेयाव्यभिचारिलिङ्गसमुत्थमनुमानम्, एतावतापि कथमस्य स्वकीयात् प्रामाण्यमित्याह—**न हीति ।**

स्वत एवेति । स्वत एव निष्कम्पमिति योजना ॥

उने । नायोगव्यवच्छेदात्मके इति । स्वविषयस्य योऽयोगव्यवच्छेदोऽव्यभिचारः तदात्मके ।

नियामकं तज्जातीयत्वम् ।

परामर्शकालानपेक्षणादिति । प्रत्यक्षं हि धूमं वह्निं च युगपदाभासयद् अयं धूमो वह्न्यव्यभिचारीति विमर्शं नापेक्षत एवेत्यर्थः ।

अपरामृष्टस्येति । धूमादेः ।

एतेन शङ्केत्यादि । प्रत्यक्षादेः स्वत एव प्रामाण्यम्, ज्ञानान्तरैस्तु प्रवृत्तिसामर्थ्यादिभिः तस्य शङ्कामात्रमपनीयते इति यत् **कैश्चिद्** उक्तं तदेतेन प्रत्यक्षज्ञानं त्वर्थादित्यादिना **टीका**वाक्येन प्रत्यक्षादेः स्वतःप्रामाण्यं निषेधता निरस्तम् ।

तथा चेत्यादि तत्त्वनिर्णयोपायेऽनुस्रियमाणेऽनुमानमेवोपायो यतो यथार्थत्वायथार्थत्वरहितस्वरूपमात्रग्राहित्वात् मानसं प्रत्यक्षं यथार्थत्वादिग्रहणे कुण्ठमित्यर्थः ।

सैव युक्तिरिति । या अनुमाने उक्ता ।

युक्तिमेव भावयति—**अतद्रूपेत्यादि ।** तज्जातीयमेवेदमित्येवं ज्ञानगतातज्जातीयत्वव्यवच्छेदेनैव ज्ञानगतं तज्जातीयत्वमाश्रित्यानुव्यवसाय उत्पद्यते । अतो द्वितीयानुव्यवसायेनायं तथैवानुभूयते । द्वितीयश्चानुव्यवसाय उत्पद्यमान एव हि विषयविशेषग्रहणव्याप्त एवोत्पद्यते इत्यतः अत्र प्रथमानुव्यवसायं विपरीतार्थमप्यविपरीतार्थतया द्वितीयानुव्यवसायो गृह्णातीत्येवं शङ्काया नावकाशः ।

ननु यद्यनु[1]व्यवसायो विषयविशेषग्रस्त एतावतापि कथमत्र शङ्कानवकाश इत्याह—**विशेषश्चानुव्यवसायत्वमेवेति ।** द्वितीयस्यानुव्यवसायस्य हि यो विषयविशेषः सोऽनुव्यवसाय एव । अनु[1]व्यवसायश्च न कदाचिदपि विपरीतार्थ इत्यर्थः ।

अनुव्यवसायस्याविपरीतार्थत्वमेव भावयति—**न हीत्यादि ।** ज्ञाने विषये सत्येवानुव्यवसायः । तत्रापि यादृशाकारं ज्ञानं तथोल्लेख्येव स्यादित्यनुव्यवसायस्य यथार्थविषयतैवेत्युक्तं स्यात् ।

1–1 omitted in S

तज्जातीयत्वलिङ्गानीति । तज्जातीयत्वलक्षणानि लिङ्गानि ।

तथापीत्यादि । यद्यप्यनुमानादिषु तज्जातीयत्वलिङ्गानि सन्ति तथापि वस्तुवृत्त्या न तानि प्रामाण्यग्रहे उपयुक्तानि, किं तु स्वकीयमेव प्रामाण्यग्रहे उपयुक्तं निरस्तसमस्तव्यभिचाराशङ्कत्वादनुमानादीनां स्वत एव प्रामाण्यग्रह इत्यत्र स्वत एवेत्यस्य स्वात्मना इत्यर्थं परो मा शङ्किष्ट इत्याह—**न स्वयमितीति** ।

तदिति । अनुमानादीनामपि प्रामाण्यम् ।

स्वत एवेत्यवधारणमिति । अनुमानस्य तु प्रवृत्तिसामर्थ्यलिङ्गजन्मनोऽन्यस्य वा निरस्तसमस्तव्यभिचाराशङ्कस्य स्वत एव प्रामाण्यमित्यर्थः ।

तदाश्रयस्यैवेति । प्रामाण्याश्रयस्य ।

तथा सतीति । संवेदनस्य सर्वत्रावधारणेऽनुव्यवसायेन ।

तीव्रसंवेगतयेति । अत्यादरतया ।

पाक्षिकीमपीति । एकपक्षप्राप्तामपीत्यर्थः ।

यद्यप्यर्थशब्द इति । अत्रेत्यस्य शेषः ।

प्रवृत्तिविषयत्वादिति । एतेनापेक्षितोपायस्यैवाधिकृतत्वमुक्तम् ।

[620b] **अर्यमाणत्वाच्चेति** । अर्यमाणत्वलक्षणनिरुक्तिबलेनार्थशब्देन वाच्यत्वाच्चेत्यर्थः ।

यमेत्यादि । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । पद्मासनप्रभृतीन्यासनानि । कोष्ठवायुनिरोधः प्राणायामः । प्रत्याहृतचेतसस्तत्रैवावस्थापनं धारणा ।

परमो वशीकार इति । प्रत्याहार इन्द्रियाणां विषयेभ्यः समाहृतिरित्यर्थः ।

तथापीति । तत्रेदमुपतिष्ठते इत्यादिना परिहारे दत्तेऽपि ।

स्वरूपतः फलतश्च प्रमाणान्तर्भूतत्वादिति । श्रवणं मननं साक्षात्कारश्च प्रवृत्तयः प्रमाणान्येव । निदिध्यासनं च ध्यानाभ्यासलक्षणा प्रवृत्तिः प्रमाणफलं श्रवणमननकार्यत्वात् ।

न हि लोकवृत्तमित्यादि । लोकवृत्तं तावन्न स्वरूपेणानुवादे उपयुज्यते, किं तर्ह्यवश्याभ्युपेयं स तथा च तस्य लोकवृत्तस्यावश्याभ्युपेयतया तदुपायोऽप्यवश्याभ्युपेय इत्यभिप्रायेण सोपायमेतल्लोकवृत्तमनूद्यते ।

तादृश एवेति । अर्थपदानीत्याकारस्य ।

अभिधेयानामिति । हेयाद्यर्थानाम् ।

टीयाम् । अर्यमाणतया अर्थपदसूचिते इति । एतद्धेयादिचतुर्वर्गे इत्यस्य विशेषणम् ।

तदिदमुक्तमिति । भाष्यकृतेति शेषः ।

उने । तदितरेत्युक्तमिति । तदितरप्रतिलम्भादित्यत्र ।

निष्पत्तिरपीति । न केवलं मानसप्रत्यक्षेण प्रतीतिरेवेत्यप्यर्थः ।

टीयाम् । तदितरप्रतिलम्भादिति । तस्मात् प्रमाणादितरेषां प्रमेयादीनां प्रतिलम्भाद् यथायोगं प्रतीतेर्निष्पत्तेश्चेत्यर्थः ।

प्रमायाश्च तत्कार्यत्वादिति । तेन प्रमाणेन कार्यत्वादुपलक्षणात् प्रत्येतव्यत्वादित्यपि द्रष्टव्यम् ।

उने । तदनुपपत्तेरिति । विकल्पद्वयानुपपत्तेः ।

निमित्तभेदमिति । हेयत्वादि प्रमेयत्वादि ।

निरर्थकं च प्रमाणं स्यादिति । प्रमाणत्वेन ज्ञेयस्य प्रमाणस्य फलमिदमेव यदनेन हेयस्य हानम् । यदि च प्रमाणं हानत्वेन न ज्ञेयं तदा निष्फलमेव प्रमाणमित्यर्थः ।

यद्येवं तर्हि हानत्वेनैवेदं ज्ञेयमस्तु, किं प्रमाणत्वज्ञेयत्वेन इत्याह—**प्रमाणत्वे चेति ।**

निरर्थकाश्चैते स्युरिति । प्रमाणपरिकरत्वेन ज्ञेयानां संशयादीनामिदमेव फलं यद्धानोपायत्वभवनम् । यदि चैते हानोपायत्वेन न ज्ञेयास्तदा निष्फलमेव संशयादीनां प्रमाणपरिकरत्वमित्यर्थः ।

नन्वेवं तर्हि हानोपायत्वज्ञानमेवैषामस्तु किं प्रमाणपरिकरताज्ञानेनेत्याह—**परिकरत्वे चेति ।** प्रमाणपरिकरत्वज्ञाननिबन्धना हि संशयादीनां हानोपायता ततश्च परिकरत्वं चेदज्ञातमेषां कथमिवहानोपायता स्यात् ?

अनवस्था च स्यादिति । प्रमात्रन्तरमपि प्रमेयं ततश्च पुनरपि प्रमात्रन्तरमनुश्रीयेतेत्येवम् ।

बुद्धित्वेनेति । बुद्धिरूपप्रमेयत्वेन ।

तद्भेद इति । बुद्धिभेदोऽविपरीतानुभवः ।

टीयाम् । **प्रमेयस्यैवेति** । प्राथम्यमिति च योगः ।

अथोपायत्वादिति । अथ प्रमेयत्वादिसिद्धावुपायत्वात् प्राथम्यं तत् तदा संशयादीनां प्राथम्यम् ।

प्रमाणाधीनत्वादितीति । एतेन प्राधान्यात् प्रमाणस्य प्राथम्यमित्युक्तम् । न चैवं सति प्रमेयस्यैव प्राथम्यमिति वाच्यम्, तस्यापि प्रमाणाधीनत्वेनाप्राधान्यात् ।

[621a] **करणभावनान्तरीयकस्येति** । करणभावे सत्यवश्यभाविनः ।

प्रमाणप्रातिपदिकेति । प्रमाणेति नाम ॥

उने । **यत इति** । अर्थसामर्थ्यसमुत्थं यस्मात् प्रत्यक्षम्, अतोऽर्थगोचरम् ॥

टीयाम् । **ज्ञानप्रतिभासमिति** । ज्ञाने आकारम् ।

अन्वयव्यतिरेकाविति । अर्थे सति ज्ञाने आकारो भवति, असति न भवतीति । **अर्थसामर्थ्ये**त्यादिना **अनुकारयती**त्यन्तेन जनकः स्वाकारार्पकश्च विषय इत्युक्तम् ।

एवमिति । जनकमाकारार्पकं च ।

उने । **सांव्यवहारिकस्वलक्षणमपीति** । सजातीयविजातीयव्यावृत्तं स्थिरस्थूलं घटादिवस्त्वपि ।

एवमेवेति । न जनकं नापि स्वाकारार्पकं च । वस्तुतस्तस्याप्यसत्त्वादेतेनोक्तलक्षणं विषयत्वम् ।

न क्वापीति । पराशय उक्तः ।

टीयाम् । स्वलक्षणं तु स्यादिति । जनकमाकारार्पकं च ।

अदेशात्मकस्येति । निर्भागस्य ।

सामान्यधर्माविति । सामान्यरूपे धूमवत्त्ववह्निमत्त्वे ।

विकल्पाधिष्ठानविकल्पाकारस्येति । विकल्पोऽयं गौरयं गौरित्येवंरूपोऽधिष्ठानमाश्रयो यस्य स यो विकल्पाकारस्तस्य, **योगाचार**मते ।

अलीकस्य वेति । माध्यमिकमते ।

तच्चेति । उक्तरूपं सामान्यम् ।

विकल्पगोचर इति । बाह्यतया विकल्पाकारः ।

तस्मात् सामान्यमित्यादि । सामान्यं कर्म बाह्यभेदाग्रहाद् बाह्यत्वेन स्वलक्षणत्वेनावगाहमानमवलम्बमानमनुमानं कर्तृ प्रमातारं स्वलक्षणे प्रवर्तयति ।

पारम्पर्येण बाह्यप्रतिबन्धादिति । अनुमानं व्याप्त्युत्थम् । व्याप्तिश्च सामान्योत्था । सामान्यं च विकल्पात्मकमनुभवोत्थम् । अनुभवश्च स्वलक्षणोत्थ इत्येवं परम्परया स्वलक्षणेन संबन्धात् ।

अस्येति । अनुमानस्य ।

उने । विषयाप्रतिबद्धत्वाच्चेति । शब्दादिकं स्वसाध्यं विनापि स्यादिति स्वसाध्याव्याप्यत्वात् नानुमानेऽन्तर्भवतीत्यर्थः ।

तद्वदिति । सामान्यवत् स्वलक्षणम् ॥

टीयाम् । अन्त्यश्चेति । नित्यद्रव्यवृत्तिरन्त्यो विशेषः ॥

उने । तासामिति । अधिगतिसन्ततीनाम् ।

तत एवेति । उपदर्शितार्थविषयत्वादेव ।

प्रमाणमिति । प्रमा ।

विषयाधिगम इति । प्रथमप्रमा ।

प्रमाणकारणेति । द्वितीयप्रमाकारके ।

तस्मिन्निति । विषयाधिगमे ॥

टीयाम् । अयमनुयोग इति । अधिगतेऽर्थे प्रमाता प्रमाणं किमिति व्यापारयतीत्येवंरूपः प्रश्नः ।

ननु क्वचित् प्रमात्रभिसन्धानात् प्रवृत्त्यप्रवृत्ती प्रमाणस्य दृश्येते, तस्मात् सर्वत्र प्रमात्रभिसन्धानमेव प्रवृत्त्यप्रवृत्त्योः कारणं न स्वसामर्थ्यमित्याह—**यत्त्विति ।**

किमायातं प्रमाणस्येति । प्रमाजनकत्वलक्षणस्वसामर्थ्ये किं क्षुण्णमित्यर्थः । इदमुक्तं स्यात् यत्र प्रमात्रभिसन्धानाधीनवृत्तेः प्रमाणस्य न प्रवृत्तिः, तत्रापि प्रमाणस्य प्रमाजनकत्वलक्षणं स्वरूपसामर्थ्यमस्त्येव । यत्तु स्वरूपसामर्थ्ये सत्यपि प्रमाणस्याप्रवृत्तिः, तत्प्रमात्रा न व्यापारितमिति प्रमातृव्यापारणालक्षणसहकारिसामर्थ्याभावात् न तु प्रमित्सावशात्, यतः प्रमित्साया अभावेऽपि प्रमातृव्यापारसद्भावे दुर्जनवचनादौ प्रमाणं प्रवर्तते । तत् सिद्धमेतन्न प्रमात्रभिसन्धानात् प्रमाणप्रवृत्तिरप्रवृत्तिर्वा [1]अर्थे, किं तु स्वसामर्थ्यादिति ॥

उने । चतुष्टयसन्निकर्षेति । आत्ममनइन्द्रियार्थानां परस्परसंबन्धः । **आनर्थक्यमिति ।** द्वितीयादेः प्रमाणस्य ।

यथार्थानुभव[62Ib]त्वेत्यादि । यदि तत्फलं प्रमारूपमेव न भवतीति कोऽर्थः? यथार्थानुभवरूपं न भवति । तदा कालात्ययापदिष्टोऽयं हेतुर्द्वितीयप्रमाणफलस्य प्रमाया एवाप्रमात्वेन साधनात् । अथ प्रमारूपं न भवति अधिकार्थं न भवति गृहीतमात्रगोचरं भवतीत्यर्थो विवक्षितः, तदा सिद्धं साध्यते, [2]साध्याविशिष्टश्च हेतुः । यदि तु प्रमारूपं न भवतीति कोऽर्थः? प्रमारूपत्वेन यथार्थानुभवत्वेन न व्यवह्रियते, तदा गृहीतमात्रगोचरत्वादिति हेतुः सोपाधिः । तथा हि न हि स्मृतिर्गृहीतमात्रगोचरत्वात् प्रमेति न व्यवह्रियते, किं तु प्रमेतिव्यवहारप्रवृत्तिनिमित्तस्य यथार्थानुभवत्वस्य विरहात् ॥

टीयाम् । स एव चेति । प्रत्युत्पन्नकारणसामग्रीजनिता बुद्धिः प्रमेत्येवं य उक्तः ।

व्यवस्थायामिति । भिन्नविषयत्वे ॥

उने । तदीयतयेति । अर्थसंबन्धितया ।

तथार्थेनेति । तदीयतया ।

तस्यामिति । प्रतीतौ ।

अस्येति । ज्ञानस्य ।

तद्वशेनेति । सारूप्यवशेन ।

दर्शनव्यापारमिति । अर्थप्रकाशनव्यापारम् ।

---

१ J अर्थं

२ J °वशिष्ट°

टीयाम् ।। **भावभवितारावितिं** । भावः प्रमाणत्वम, भविता भावाश्रयः प्रमाणम् ।

विषयसारूप्यम् । विषयसादृश्यं विषयाकारधारित्वम् ।

उने । **नार्थक्रियासु चोपयुज्यते** इति वदता हि **टीकाकृता** विकल्प्यमानस्य विसंवाद उक्त एव । विसंवादपूर्वकत्वादर्थक्रियास्वनुपयुक्तेर्विसंवादश्चात्राधिकृत इति पूर्वं विसंवादमाह—**यतो न प्राप्यत** इति ।

सूत्रयतेति । बुद्धिलक्षणसूत्रं रचयता ।

तथा हीति । प्रमाशब्दस्य यत् प्रमाणोपपन्नं प्रवृत्तिनिमित्तं तत् स्फुटयतीत्यर्थः।

ज्ञानत्वादिकमिति । आदिपदाद् विषयित्वादि ।

सामान्यविशेषः समस्तीति । प्रमाशब्दनिमित्तमिति शेषः ।

तदभाववतीति । प्रमात्वाभाववति ।

अनुमितिप्रभृतय इति । प्रभृतिशब्दात् स्मृत्यादयः । विपर्ययबुद्धिर्न साक्षात्कारवती स्यादप्रमात्वादितीति विपर्ययो दत्तजलाञ्जलिः स्यादिति परमार्थः ।

यादृश इति । पूर्वावस्थाविशिष्टः ।

पूर्वावस्थानिवृत्तौ अनुभवाप्रवृत्तेरिति । अनुभवकालीनाया हि दशाया अनुभवकाले पूर्वत्वमेव नास्ति, अतीतस्यैव पूर्वत्वात् । यदा च सा दशा अतीत्य पूर्वत्वं प्राप्ता तदानुभव इति तस्या दशाया अतीततया पूर्वत्वव्यवहारं प्राप्ताया नानुभवगोचरत्वमित्यर्थः ।

अतीतश्यामताप्रत्यय इति । अयं रक्तघटः पूर्वं श्याम आसीदित्युल्लेखः ।

तत्रेति । रक्तघटे ।

तद्विषयस्येत्यादि । तस्यातीतश्यामताप्रत्ययस्य यो विषयोऽतीतश्यामतारूपः स तदानीमेवातीतश्यामताग्रहणविशिष्टे वर्तमानकाले **तदवस्थो**ऽतीतश्यामतावस्थ एवेति अतीतश्यामताप्रत्ययो यथार्थो भवति । यस्तु स्मर्यमाणावस्थः स्मर्यमाणपूर्वदिग्देशकालाद्यवस्थः स तदानीं स्मरणविशिष्टे वर्तमानकाले न तदवस्थः, पूर्वावस्थाया अतीतत्वादिति स्मृतिः कथं यथार्थेत्यर्थः ।

उभयथापीति। यदि स्मृतेरयथार्थत्वं यदि च यथार्थत्वस्यानुभवपारतन्त्र्यमिति प्रकारद्वयेऽपि।

अन्यस्येति। ज्ञानस्य।

धर्मिण्यपि स्मृतेः प्रामाण्यं मा भूदिति। यथा विपर्ययस्यायथार्थत्वादप्रामाण्ये उच्यमाने [1]धर्मिणि प्रामाण्यं भवत्येव तथा स्मृतेरपि लोकसिद्धादेवायथार्थत्वाद्यप्रामाण्यमुच्यते तदा धर्मिणि प्रामाण्यं स्यात् तदपि निषेद्धुमित्यर्थः।

अनित्येष्वपीति। अनधिगतत्वं नास्तीति योगः।

चतुःपञ्चलक्षणा[1]वस्थायिनीति। तथा हि उत्पन्नं कर्मविभागमारभते। ततः संयोगनाशः। तत उत्तरसंयोगो[622a]त्पत्तिः। ततः कर्मविनाशः। तेन चतुरः क्षणानवतिष्ठते, पञ्चमे क्षणे विनश्यति। यत्र तु विभागजो विभागः, तत्रावयवे कर्मोत्पत्तिः। ततो विभागोऽवयवयोः। ततः संयोगनाशः। ततो द्रव्यनाशः तत आकाशादिभ्यस्तस्य सक्रियस्यावयवस्य विभागजो विभागः। तत आकाशादि[2]संयोगनाशः। ततः संयोगान्तरोदयः। ततः[2] कर्मविनाश इति सप्तक्षणान् कर्मावतिष्ठते। अष्टमे क्षणे विनश्यति।

असम्भव एवेति। क्रमस्य।

कालतदुपाधिप्रत्यक्षत्वेऽपीति। मतान्तरे कालस्य प्रत्यक्षत्वं ज्ञेयम्।

स्वात्मीभूतेत्यादि। आकारेण तदीयतया नियता प्रतीतिस्तदा ज्ञाप्येत, यदि तद्विषयं ज्ञानं जन्येत। न चाकारेण स्वस्वरूपीभूतप्रतीतिविषयं किञ्चिज्ज्ञानान्तरं जन्यमानमस्ति।

नापि निश्चाययन्निति। तदीयतयार्थप्रतीतिमनिश्चितां निश्चितां कुर्वन्नाकारः प्रमाणमित्यपि न वाच्यमित्यर्थः।

ननु नीलाकारनीलाकारवत्प्रतीत्योरभेदेन भेदनिबन्धनो निश्चेयनिश्चायकत्वनियमो मा भूद् व्यावृत्त्योस्तु कल्पितभेदयोरयं भविष्यतीत्याह—**व्यावृत्त्योश्चेति**। यथैकविकल्पविषययोरधूमव्यावृत्त्यनग्निव्यावृत्त्योर्न निश्चेयनिश्चायकत्वनियमः, तथा अनीलाकारव्यावृत्त्यनर्थव्यावृत्त्योर्नीलमहं जानामीत्येवंरूपैकविषयत्वेन न निश्चेयनिश्चायकत्वनियम

---

1 धर्मिणि प्रामाण्यं...चतुःपञ्चलक्षणा omitted in J

2 S. om. संयोगनाशः...संयोगान्तरोदयः ततः

उपपद्यते। निश्चितो हि निश्चायकोऽनिश्चितस्तु निश्चेयः। एकज्ञानारूढौ तूभावपि निश्चितावेव।

व्यावृत्त्योरेकनिश्चयगोचरत्वमेव द्रढयति—**नीलमित्यादि**। नीलमहं जानामीति हि आकारस्यानीलाकारव्यावृत्तेर्निश्चयो, न चात आकारनिश्चयादन्यस्तदीयतायाः प्रतीतेर्नीलार्थसंबन्धित्वस्यानीलार्थप्रतीतिव्यावृत्तेरित्यर्थो निश्चयः। य एव नीलमहं जानामीति अनीलाकारव्यावृत्तेर्निश्चयः, स एव नीलार्थप्रतीतिव्यावृत्तेरपीति कथमनयोर्व्यावृत्त्योर्नैकनिश्चयगोचरत्वमित्यर्थः।

अथाकारनिश्चयात् तदीयतानिश्चयस्य भेदमाशङ्कते—**नीलमिदमितीति**। **अथे**त्यनन्तरम्।

निश्चितैव परं न तदीयतयेति चेदिति। नीलमिदमित्याकारव्यवसायकाले बुद्धिर्निश्चितैवाकारलक्षणविशेषनिश्चयस्य सामान्यनिश्चयाविनाभूतत्वात्, परं सा न तदीयतया निश्चितेति चेत्? सिद्धान्ती परं पृच्छति—**अथ केयमर्थाकारादन्या तदीयता नामेति**। या बुद्धावर्थाकारे च निश्चितेऽपि न निश्चिता?

तदुद्भवत्वमिति चेदिति। तदीयता अर्थीयता अर्थोद्भवत्वमर्थकार्यत्वमित्यनर्थान्तरम्। बुद्धिरर्थाकारश्च निश्चितौ। अर्थोद्भवत्वं तु बुद्धेरनिश्चितम्। तन्निश्चाययन्नर्थाकारः प्रमाणमिति पराशय इत्यर्थः॥

एवमिति। नीलबुद्धिर्नीलार्थकार्या इत्यत्रैव नीलाकारो निश्चायक इत्यङ्गीकारे।

अनुमितिं भावयन्निति। नीलाकारमिदं ज्ञानं तस्माद् बहिरपि नीलेन भाव्यमिति नीलार्थानुमितिं कुर्वन् बहिर्नीलेऽर्थे गृहीत एव नीलबुद्धेर्नीलार्थकार्यत्वं निश्चेतुं शक्यम्। स चार्थो विनैतामनुमितिं न ग्राह्य इत्यर्थः।

हन्त हन्त तर्हि पामरप्रत्यक्षमित्यादि। नीलमिदमित्युल्लेखेन यत् पामरस्य प्रत्यक्षज्ञानं [622b] तन्न स्यादित्यर्थो यतो नीलाकारं मे ज्ञानं तस्माद् बहिरपि नीलेन भाव्यमित्येवं स्वस्मादतिरिक्तमर्थमनुमापयता आकारेण नीलस्यैवेदं कार्यं ज्ञानमिति नीलसंबन्धितया नियमितं सन्नीलमिदमिति प्रत्यक्षं प्रत्यक्षं स्यात्। न चैवं पामरप्रत्यक्षमतिरिक्तमर्थमनुमापयता आकारेण नियमितम्, नीलाकारं मे ज्ञानं तस्माद् बहिरपि नीलेन भाव्यमित्येवमनुमितेरेवाभावात् पामरस्य।

टीयाम् । **भवितृव्याख्यानेनेति** । यदुपलब्धिनिमित्तं तत् प्रमाणमित्येवंरूपेण ॥

भाव इति । उपलब्धिहेतुत्वं च प्रमाणत्वमित्येवंरूपः ।

संयोगस्येति । गोचर इति योगः ।

अन्यत्रेति । क्रियाया अपरत्र कारके इत्यर्थः ।

चरितार्थमिति । कृतप्रयोजनं सव्यापारम् ।

उने । **तत्र फलविषयत्वमित्यादि** । यदि यः फलविषयस्तत्कर्मेति कर्मलक्षणं स्यात् तदा असत्त्वेनाकारणस्यापि फलाकारकस्यापि सतोऽतीतानागतादेः फलविषयत्वात् कर्मत्वं प्रसज्येत । न चाकारकं कर्मेष्यते । तस्मात् करणव्यापारविषयः कर्मेति कर्मलक्षणं युक्तम् । तदाह—**करणेत्यादि** ।

न ह्यस्तीति । कर्मत्वं करणव्यापारविषयत्वं विना नास्ति, अतो नाव्यापकमिदं लक्षणमित्यर्थः ।

नन्वसत्त्वेन करणव्यापाराकारकस्याप्यतीतानागतादेः करणव्यापारविषयता अस्ति अन्यथा अस्य फलविषयतापि न स्यात् । तस्मादत्रापि कर्मलक्षणे असत्त्वेनाकारणस्यापि सतः कर्मत्वं प्राप्नोति । तथा च फलविषयः कर्मेतिवदिदं लक्षणमतिव्याप्तिदुष्टम् । सत्यम्, करणव्यापारो विषयं विना न निर्वहतीति करणव्यापारनिर्वाहकारकत्वादेवातीतानागतादेरपि विषयस्य कारकत्वं स्थितम् । तथा च कारकस्यैव सतोऽतीतानागतादेरपि विषयस्य कर्मत्वम्। एतदेव कर्मणः करणव्यापारे एव चरितार्थत्वं दर्शयन्नाह—**तत्र करणस्येति** । तत्रेत्येवं सति विषयं विना फलमपि न निर्वहेदिति फलं प्रत्यप्यस्य विषयत्वेन निर्वाहकत्वात् कारणत्वं प्रसक्तमिति न वाच्यं करणव्यापारनिर्वाहं विना अस्य फलमेव न स्यादिति फलार्थमप्यनेन करणव्यापार एव निर्वाहणीय इति करणव्यापारं प्रत्येवास्य करणत्वम् । फलं तु करणव्यापार-निर्वाहकतैव निर्वाहयिष्यतीत्यभिप्रायेणोक्तम्—**तन्निर्वाह एवास्य चरितार्थ-त्वमिति** ।

तन्निर्वाह एव । करणव्यापारनिर्वाह एव, न तु फले ।

अधिकव्यापारत्वादिति । अधिको व्यापारः फलविषयो यस्य तद्भावात् ।

नापि कर्मव्यापारविषयः करणमिति । यथा किल करणव्यापारविषयः कर्म, न तथा करणमपि कर्मव्यापारस्य विषयः, कुतः ? तदुद्देशेन करणोद्देशेन कर्मणः कर्त्रा

अव्यापारणात् । नापि करणं फलस्य विषयः। कुतः? फलस्य तन्निरूपणानधीननिरूपणात्। न हि यथा फलं कर्मनिरूपणाधीननिरूपणं तथा करणनिरूपणाधीननिरूपणम् ।

समवायित्वविषयत्वकृतामिति । प्रमा हि प्रमातरि समवैति कर्म च विषयीकरोति ।

सन्निपत्येति । अव्यवधानेन ॥

टीयाम् । तदीय इति । प्रमातृसंबन्धी ।

लक्षणलक्ष्ययोरभेदविवक्षया [1]सामानाधिकरण्यमिति । अन्यथा यस्य भावाभावयोस्तद्वत्ता स साधकतमार्थ इति [623a] वैयधिकरण्यमेव प्राप्तम् ।

अन्ययोगव्यवच्छेदेन संबन्ध इति । प्रमातृप्रमेययोः सतोरेव प्रमोत्पादो नासतोरित्यन्ययोगव्यवच्छेदः ॥

उने । अमुं चार्थमनन्तरमेव भावयिष्यतीति । प्रमातृप्रमेये हीत्यादिना ।

टीयाम् । तथात्वेनेति । करणत्वेन ।

उने । कर्तृव्यापार्यत्वमपीति । यद्वान् प्रमिमीते सोऽतिशय इत्यस्य तात्पर्यार्थोऽयम् ।

न व्यभिचरत्येवेति करणम् ।

प्रकृते इति । यद्वानेवेत्यत्र ।

आगामिवार्त्तिकस्येति । प्रमाणे सतीत्यादेः ।

स चेति । चोऽवधारणे इति **टीका** व्याख्याति विकल्पेत्यादिना ॥

टीयाम् ॥ अशेषपुरुष इति । चतुर्विधः ।

उने ॥ विवक्षितजातिभेदौपयिकत्वेनेति । विवक्षितजातिभेदः प्रत्यक्षादिः ।

स्वरूपादित्यादि कारिका । स्वरूपाद्धेतोर्मानलक्षणं प्रमाणलक्षणं यथा व्यापारवतोऽन्यत्राचरितार्थस्वभावत्वम् । कार्यतो यथा व्यापारवतः कार्याव्यभिचारित्वम् । कर्तृतो यथा साक्षात्कर्तृव्यापार्यत्वम् । कर्तुरर्वाक्शब्दाद्वचनाद् यथा कारकान्तरेभ्यश्चरमव्यापारत्वम् ।

---

1 J समाना°

कार्यस्य प्राक् प्राथम्यादानन्तर्यतो यथा अनन्तरफलत्वम् । प्रत्यक्षादिप्रमाजातेर्यथा प्रमा-विवक्षितजातिभेदव्यपदेशकत्वम् । प्रमाहेतुविशेषाद् यथा प्रमित्यसमवायिकारणविशेषकत्वम् ।

टीयाम् । **निषिध्यत** इति । व्यवच्छिद्यते ॥

उने । **प्रमाणविषयस्येति** । ज्ञानस्य ।

कथञ्चिदिति । व्यवच्छेद्यभेदेन, न तु फलभेदेन ।

भागासिद्धतेति । प्रमाणतः प्रतिपत्तौ समर्थप्रवृत्तिजनकत्वादित्यस्य हेतोर्या भागासिद्धता अर्थग्रहणं विना प्रमाणविषयज्ञानोपेक्षाविषयज्ञानयोः प्रवृत्तेरजनकत्वात् । तस्याः परिहाररूपस्य फलस्यैक्यात् ॥

टीयाम् । **प्रमाणसाधर्म्येणेति** । तज्जातीयत्वेन ॥

उने ॥ **असंभवद्बाधसंवादित्वमिति** । प्रत्यक्षाद्युत्थो निर्बाधः संवाद एव तज्जातीयत्वम् ।

साक्षाज्जनकत्वमिति । अर्थप्रतिपत्तेरिति शेषः ।

टीयाम् । **अर्थगम्यमपीति** । परमार्थगम्यमपीत्यर्थः ।

द्योतनीयमिति । शब्दतो वाच्यम् ।

किं केन संगतमिति । हेतोरपक्षधर्मता स्यादित्यर्थः ।

वार्त्तिके । **अतश्च प्रमाणग्रहणमित्यर्थग्रहणमिति** । उभावेतावुप-संहारावित्यर्थः ॥

उने ॥ **अनुक्तायुक्त एवेति** । न केनापि भणितोऽयुक्तश्च ॥

टीयाम् ॥ **सर्वस्येति** । प्रमाणादेः ।

अभावप्रसङ्गादिति । उपादेयत्वाभावप्राप्तेः ।

प्रमाणादेरिति । आदिपदात् शास्त्रम् ।

स्वच्छेदाय पर्याप्त इति । यथा प्रमाणं शास्त्रं च हेयोच्छेदं कुर्वती हेयेषु हानोपायौ एवं स्वमुच्छिन्दातां, तदैव स्वहानोपायौ भवेतां न च स्वोच्छेदाय पर्याप्ते स्वात्मनि क्रियाविरोधात् । तस्मान्न शक्यं प्रमाणादिहानं स्वेन स्वहानमित्यर्थः ।

उने । **तत्त्वेनार्यमाणतया** । सुखदुःखहेतुत्वेन ज्ञायमानतया ॥

तदभ्युपगमे इति । सुखदुःखतद्धेतुत्वेनार्थशब्दवाच्यत्वाङ्गीकारे ।

शास्त्रप्रमाणयोरिति । प्रमाणमात्मज्ञानम् ।

तद्धेतुतयेति । परमपुरुषार्थहेतुतया । स एव व्याघात इति शास्त्रमनारम्भणीयं स्यात् ।

असुखतद्धेतुत्वेनेति । प्रमाणादिर्न सुखं नापि तद्धेतुरित्युपादेयमपि नास्ति । लोके सुखं तद्धेतुश्चोपादेयतयोक्तम् ।

अहानिरेवेति । अक्षय एव ।

हेत्वोरिति । सुखदुःखतद्धेतुत्वार्यमाणत्वरूपयोः ।

कथमसंवेद्यत्वमिति । प्रमाणसद्भावे प्रमाणेनैव ज्ञायमानत्वात् ।

तदभावे इति । प्रमाणाभावे ॥

टीयाम् ॥ **संविद्गोचरा** इति । संविद्गोचरो विषयो यासां ता ज्ञानग्राहिकाः सत्यः ॥

उने । **तद्विपर्यय** इति । [623b] विपर्ययापर्यवसितानां प्रसङ्गाभासत्वेनास्यापि प्रसङ्गस्य विपर्यये प्रमाणं दर्शनीयमिति । तस्यानवस्थाप्रसङ्गस्य विपर्ययेऽनवस्थाप्रसङ्गापादितज्ञानप्रवाहस्याभावे इत्यर्थः ।

ननु **नैयायिको**ऽनवस्थाप्रसङ्गेन [1]सर्वज्ञानानां संवेद्यत्वं निषेधन् कस्यचित् [2]ज्ञानस्याज्ञातोपरतत्वं साधयति । तस्मिंश्चाज्ञातस्वरूपे कथमनवस्थातर्को भावयितुं शक्य आश्रयस्यैवासिद्धेरित्यनवस्थाभावनाकाले तस्य ग्रहणोपायमाह—**अज्ञातोपरतेत्यादि** ।

व्यवहारे इति । सत्त्वज्ञाने ।

कालान्तरे इति । अज्ञातोपरतज्ञानकालादन्यस्मिन् काले ।

तद्विषयस्मरणं निमित्तमिति । अज्ञातोपरतज्ञानस्य यो विषयस्तस्य स्मरणेनान्यथासिद्धेन एतद्विषयविषयं ज्ञानमभूदित्येवमज्ञातोपरतत्वलक्षणस्य धर्मस्य धर्मिमात्रं ज्ञानं व्यवस्थाप्यत इत्यर्थः ।

---

1 S सर्वज्ञानां 2 S अज्ञान

एवं चेति । तद्विषयस्मरणेनाज्ञातोपरतत्वरूपधर्मसंबन्धिनि धर्मिमात्रे एव ज्ञाने व्यवस्थापिते ।

सामान्याकारेणेति । स्मरणलिङ्गजत्वेन सामान्यमात्रविषयत्वात् संवेद्यत्वासंवेद्यत्वापरनामज्ञातोपरतत्वाज्ञातोपरतत्वविशेषौदासीन्येनेत्यर्थो ज्ञानविषयं ज्ञानमस्त्येव जिज्ञासानुरोधात् । यदा तत्र ज्ञाने विचारं कर्तुं जिज्ञासा स्यादित्यर्थः ।

विचारक्षणे कस्मात् तज्ज्ञानं सदैवेष्यते इत्याह—**अज्ञातस्येति ।**

सामान्याकारसिद्धमिति । ज्ञातोपरतत्वाज्ञातोपरतत्वविशेषोदासीनमज्ञातोपरतज्ञानम् ।

विचारेणेति । अज्ञातोपरतत्वस्य ।

अनुपलम्भेति । मानसप्रत्यक्षम् ।

तदेतावता प्रबन्धेन विषयग्रहणकाले कस्यचित् ज्ञानस्य ग्राहकप्रमाणाभावेनासंवेद्यत्वम्, कालान्तरे च जिज्ञासायां ग्राहकप्रमाणसद्भावात् सत्ताव्यवहार इत्युक्तम् । तथा च **नन्वसंवेद्यमानाया संविद** इत्यादि समाहितम् ॥

टीयाम् ॥ एवं किलात्र शङ्कयते इति । **अर्थस्तु सुखं सुखहेतुश्च दुःखं दुःखहेतुश्चेति** वदता **भाष्यकृता** प्रमाणतः सुखदुःखतद्धेतुप्रतीतिस्तस्यां च सुखदुःखप्राप्तिलक्षणा समर्था **प्रवृत्तिरिति** प्रमाणस्य फलं सुखं दुःखं च दर्शितमिति **बौद्धै**नाशङ्कयते ।

उने ॥ तदपारमार्थिकत्वे त्वनभिमतसिद्धिरेवेति । अनेन सुखदुःखहेतूनां कार्यकारणभावोऽपारमार्थिकोऽनियतत्वात् । यः पुनः पारमार्थिकः स नियतो यथा नील इति व्यतिरेकानुमानं सूचितम् । अत्र च नीलो वैधर्म्यदृष्टान्तः सन् यद्यपारमार्थिकस्तदा कार्यकारणभावः पारमार्थिकः स्यादित्यनभिमतसिद्धिः ।

न च कार्येति । यदि हि नीलादिक्षणानां यः कार्यकारणभावः सोऽपारमार्थिकस्तदा कथं नीलादि पारमार्थिकं स्यात्? अथ नीलादि पारमार्थिकं, कार्यकारणभावस्त्वस्यापारमार्थिकः, तदा नित्यत्वं नीलादेः प्रसज्यते । तथा च तत्रापि तुल्यमेतदिति एक एव नीलक्षणः पूर्वस्य कार्यमपरस्य कारणमित्यनियतोऽपि नीलादेः कार्यकारणभावो यथा पारमार्थिकस्त्वन्मते, एवं सुखदुःखहेतुरपि अनियतोऽपि पारमार्थिको भविष्यतीति भावः ।

टीयाम् । **विशेषो वाच्य इतीति** । **अन्यतमापायेऽर्थस्यानुपपत्तेरिति भाष्य**वाक्येनेति शेषः ।

अदृष्टार्थविषयस्येत्यादि । इहार्थवत्ताव्युत्पादनप्रस्तावे । अदृष्टार्थस्य च चतुर्वर्गस्य प्रमाणार्थवत्त्वयैवार्थवत्त्वं ज्ञायत इति प्रमाणस्यैवार्थवत्ता व्युत्पादितेत्यर्थः ।

तत् किं दृष्टार्थे चतुर्वर्गे अर्थवत्ता नास्त्येव, सत्यपि वा प्रवृत्त्यादिव्यवहारानुपयोगिनीति [624a] तद्व्युत्पादनेन प्रयोजनम्? तत्राह—**दृष्टार्थे इत्यादि** । एतेन व्यवहारानुपयोगादिहास्या अव्युत्पाद्यत्वमित्यर्थः ।

चतुर्वर्गविभागपरे भाष्ये इति । प्रमाता प्रमेयं प्रमितिरित्येवं निर्देशपरे **भाष्ये** ।

उपलक्षणान्तरमिति । एतदपि कुत इत्याह **यतः कर्तृत्वोत्तरकालभावि** । कर्तृत्वाविनाभूतमित्यर्थः ।

ननु कर्तृत्वाविनाभूतं सत्कारकफलोपभोक्तृत्वलक्षणमेव कुतो न स्यादित्याह—**न हीति** ।

इदमुक्तं भवति, लक्षणं हि समव्याप्तिकं सन्नातिव्यापकं नाव्यापकं स्यात् । कारकफलोपभोक्तृत्वं तु यद्यपि कर्तृत्वाविनाभूतं, तथापि कर्तृत्वं न फलोपभोक्तृत्वाविनाभूतमृत्विजादीनां कर्तृणामपि फलोपभोक्तृत्वाभावादित्यव्यापकत्वान्नेदं लक्षणं स्यादित्यर्थः ।

कर्तृत्वाविनाभूतत्वात्त्विदमुपलक्षणं स्यादेवेत्याह—**कारकस्य त्वित्यादि** ।

ननु यजमानादिषु न कर्तृत्वाविनाभूतं फलोपभोक्तृत्वमिति कथमिदमुपलक्षणं नेत्याह—**यजमानस्येति** ।

उने ॥ **शब्दप्रयोगमात्रस्येति** । मुख्यत्वेन कर्तृव्यापारप्रतिपादकस्याख्यातसहितधातुमात्रस्याव्यवस्थापकत्वात् कर्तुरनियामकत्वात् । पचतीत्यादिप्रयोगो हि यथा सङ्केतवशात् कर्तारं वक्ति एवं कर्मापि वदेत् । अतो [1]नैष प्रयोगः कर्तुरेव नियामकः ।

अभिधानयोग्यतेति । कर्तृशब्दाभिधानयोग्यः कर्तेति कर्तृलक्षणमित्यर्थः ।

निमित्तमन्तरेणेति । विवक्षा हि निमित्तेनैव व्यवस्थिता भवति । यथा प्रमाणादिषोडशपदार्थानां संग्राहित्वेनाभेदेऽपि प्रमाणादिहेयादिचतुर्वर्गद्वये हेयादिविवक्षा ।

---

1 S नव

स्वेतरेति । स्वश्चेतरश्च स्वेतरौ । तयोः परस्परविसदृशानि यानि कारकाणि मृद्दण्डादीनि, तन्तुतुरीवेमादीनि च ।

तत्परं सर्वकारकाणीति । अदृष्टं तु सर्वकर्तृसाधारणमिति ।

नातिव्यापकत्वमिति । प्रयोक्तृत्वं हि कर्तृलक्षणम् । तच्च परस्परप्रयोजकेष्वितरकारकेष्वकर्तृरूपेषु, देवदत्ते च कारकाण्यव्यापारयति अकर्तृरूपे च गमनादतिव्यापकं भवेत् । यदात्वधिकस्याधिकं फलमिति न्यायेन कारकान्तराणां परस्परप्रयोजकत्वं व्यवच्छिन्नं, चेतनस्यापि कारकाणि व्यापारयत एव कर्तृत्वमुक्तं, तदा नातिव्यापकमिति ।

स्यादेतत् प्रमेयेत्यादि । प्रतीतिभेदः प्रमेयभेदं विना न स्याद् यदि तदा भिन्ना प्रतीतिर्भिन्नं प्रमेयं गमयेदिति नियमः स्यात् । यदा तु प्रमाणभेदेनापि भिन्ना प्रतीतिर्जन्यते यथेन्द्रियलिङ्गादिना साक्षात्कारादिरूपा प्रतीतिस्तदा नायं नियम इतीदं नास्तीति प्रतीतिः सदन्तरविषयैव कदाचित् स्यात्, नत्वभावविषयैवेति शङ्कार्थः ॥

टीयाम् । **नतु स्तेनाभावनिश्चयायोपायान्तरमाददते** इति । एतेन यथा लोके भावाभावयोर्द्वयोरपि ग्रहणे दीप एवैक उपायः प्रसिद्ध एवं प्रमाणमप्येकमेवोपायः । ततो नास्तीति प्रतीतिर्न प्रमाणान्तरजन्या, किं त्वभावप्रमेयेणैव जन्येत्यभावमियं साधयत्येवेत्युक्तं स्यात् ॥

उने । **तेन निःश्रेयसोपयोगीत्यादि** । एतेन भागासिद्धता परिहृता । एतच्च निःश्रेयसानुपयोगिनीत्यादिना **टीकाकृता**क्तम् ।

नोच्यते इति च साध्यमिति । एतेन [624b] हेतोर्विरुद्धता परिहृता । एतच्च **टीकाकृता न वक्तव्य** इत्यनेनोक्तम् ।

इति हीत्यादि हीत्यर्थ इति । [1]**इति हि बहुवचनप्रयोजनमिति टीका**वाक्ये आदिशब्दाध्याहारात्, इत्यादि हि बहुवचनप्रयोजनमित्यर्थः । तेन संशयादीनामपि परस्परनिरपेक्षाणां न्यायप्रवर्तकत्वादिबहुवचनप्रयोजनं ज्ञेयम् ।

टीयाम् । **अतिप्रसङ्गापादनेनेति** । यदि हानोपादानोपेक्षालक्षणं दृष्टं निःश्रेयसमत्र गृह्येत, तदा प्रमेयत्वेनानभिमतानामपि आत्मादिव्यतिरिक्तानां सर्वेषामपि पदार्थानां प्रमेयतया तथा चात्मादिवाचकप्रमेयपदाभिधानं निरर्थकं स्यादित्यतिप्रसङ्गः ।

---

1 इति हि...ज्ञेयम् omitted in S

अर्थस्य तथाभावादिति । आत्मादेरर्थस्य तथाभावात् जन्माभावादिमत्त्वादित्यर्थः ।

अनुमानमेवात्रार्थे इत्यादि । अयमात्मा दुःखाभाववान् तत्कारणजन्माभाववत्त्वात् । यो यत्कारणाभाववान् स तत्कार्याभाववान् यथा तन्त्वादिकारणाभाववान् कुविन्दः पटकार्याभाववान् । तथा चायम् । तस्मात् तथा ॥

उने ॥ **अनुमानं चेच्छादीत्यादि ।** इच्छादयः क्वचिदाश्रिताः गुणत्वात् रूपादिवत् । योऽसौ गुणी स आत्मा ।

ज्ञानसद्भाव इति । अयमात्मा आत्मविषयमिथ्याज्ञानाभाववान् तद्विषयतत्त्वज्ञानवत्त्वात् । यो यद्विषयतत्त्वज्ञानवान् स तद्विषयमिथ्याज्ञानाभाववान् यथा घटविषयतत्त्वज्ञानवान् तद्विषयमिथ्याज्ञानाभाववान् ।

उपायाभ्यासेत्यादि । आत्मविषय उपायाभ्यासप्रकर्षस्तत्त्वज्ञानहेतुरुपायाभ्यासप्रकर्षात् यथा शिल्पाद्युपायाभ्यासप्रकर्षः ।

सन्तानानुमानस्येति । दीपसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात्, दीपसन्ततिवत् ।

उत्तरवार्त्तिकविषयभूतमिति । उत्तरवार्त्तिकस्य गोचरीभूतम् । एतेन **टीकाकृता न्यायवार्त्तिक**तात्पर्यव्याख्यैव कृतेति न प्रतिज्ञाहानिरस्येत्युक्तम् ।

वार्त्तिके ॥ तच्चैतदुत्तरेण सूत्रेणानूद्यत इति भाष्यमिति । अत्रेतिशब्दस्याद्यर्थत्वाच्चैतदुत्तरेण सूत्रेणानूद्यत इत्यादिकस्याधिगच्छतीत्यन्तस्य **भाष्य**स्यानुवादोऽयमित्यर्थः । अस्यैव **भाष्यस्य** हेयेत्यादिना गच्छतीत्यन्तेन **वार्त्तिकेन** सामान्येन व्याख्या । हेयमित्यादिना अनुवार्त्तिकेन विशेषतो व्याख्या ॥

उने ॥ **हेयमित्याद्यनुवादवार्त्तिकमिति ।** व्याख्यार्थोपात्तहेयादिरूपेण य**द्भाष्या**नुवादरूप**वार्त्तिक**मित्यर्थः ।

अयथाभाष्यता त्वित्यादि । व्याख्यातुकामेन **वार्त्तिककृता** अधिगन्तव्य इति यदनूदितं तद् **भाष्ये** नास्ति, परं **भाष्येणा**र्थतोऽधिगन्तव्यः संगृहीत इति अर्थानुवादेनाधिगन्तव्यो मोक्ष इत्यत्र न **भाष्याक्षरा**नुसारिता दोषायेति भावः ।

नापि प्रमाणेत्यादि । यदि प्रमाणप्रवृत्तिविषयः सर्वथा निर्णीतः स्यात्, तदा प्रमाणप्रवृत्तिविषय एवायं न स्यादित्यर्थः ।

एतद्यथाश्रुतमिति । एतद्वार्त्तिकं यथाश्रुतमुपलक्षणव्याख्यानसहितम् ।

तत्साधनेति । फलसाधनम् ।

तद्विषयामिति । उद्देश्यविषयाम् ।

नानुमेयविषय इति । अनुमेयो विषयो यस्य स, तथा न लिङ्गविषयत्वात् ।

तदधिगम इति । [625a] प्रमेयाधिगमः ।

अत्र शंकते इति । अत्र प्रसङ्गे । **बौद्धो** हि पक्षेऽपि व्यभिचारं साधयितुं **न च सपक्षेत्यादि** शङ्कां करोति । यदि तु हेतुः पक्षधर्म एव न स्यात् तदा पक्षे व्यभिचारं साधयितुमियं शङ्का निरर्थिकैव स्यादित्याह—**पक्षधर्मत्वं स्वीकृत्येत्यादि** ।

सर्वोपसंहारो न संभवत्येवेति । अग्निप्रतीतावुष्णत्वस्यापि प्रतीतेः ।

प्रवृत्तानुमानेत्यादि । **बौद्ध**स्यायमाशयः, प्रत्यक्षेण पक्षापरिभवादनुमाने प्रवर्तमानेऽपि चेत्तेनौष्ण्यं गृहीतं तदा यत् कृतकं तदनुष्णमिति व्याप्तिर्भग्नैव । ततोऽनैकान्तिकत्वादेवानुमानाप्रवृत्तिः, न तु पक्षबोधेन, तं प्रत्युच्यते, अत्र प्रत्यक्षेणौष्ण्य[1]मात्रसाधनात् पक्षोऽनौष्ण्यलक्षणः केनापि न पराभूतः । ततोऽस्खलिततया कृतकत्वादित्यनुमानमनौष्ण्यं साधयत्येव । एवं चानौष्ण्यस्य स्थितत्वादनौष्ण्याभावेऽपि कृतकत्वमस्तीत्युल्लेखेन व्याप्तिभङ्गः कथं स्यादित्यर्थः ।

न त्वन्येन के[न]चित् प्रतिरुद्धं कृतकत्वानुमानमनौष्ण्यं नोपस्थापयिष्यतीत्याशङ्कयाह — **तत्प्रतीति** ।

एवं च पक्षापरिभवपक्षे न व्याप्त्यवादस्य[?] कथमपि संभव इति ।

इत्याशय इति । अनुमानप्रवृत्तिविषये साध्यधर्मिणि हेतोर्व्यभिचारानुद्भावनादित्यस्याः **टीकाया** अयमेवोक्तोऽभिप्रायः । तथा हि यतः केनापि पक्षापरिभवादनुमानस्य कृतकत्वादित्यस्य प्रवृत्तिविषयः साध्यधर्मी वह्निरनुष्ण इति स्वरूपः तस्मादत्र हेतोः कृतकत्वादित्यस्य व्यभिचारानुद्भावनात् अनौष्ण्यस्य तादवस्थ्येन व्यभिचारस्योद्भावयितुमशक्यत्वादित्यर्थः ।

1 न चानौष्ण्यनिषेधोऽपि साध्यते इति मात्रशब्दार्थः ॥

नन्वेतावता पक्षपरिभवानङ्गीकारेऽत्रानुमाने पक्षेण व्यभिचारो न संभवत्येवेति नोद्भाव्यत इति **टीका**भिप्राय **उदयने**नोक्तः । स चायुक्तो यदि ह्ययमभिप्राय**ष्टीकाकृतः** स्यात् तदा व्यभिचारासंभवादिति कुर्यात् । तस्मादत्र व्यभिचारः संभवन्नेव नोद्भाव्य इति **टीका**भिप्रायः । इत्थमेव च नन्वित्यादिना स्वयमेवाशङ्क्य **टीकाकारात्** प्रतिबन्द्या समाधापितं संगच्छते इत्याशङ्क्य पक्षे व्यभिचारासंभवं स्थापयन् प्रतिबन्देर्विषयान्तरं [1]स्फोर-यति **उदयनः** ।

न पक्षतेत्यादि । अत्रानुमाने व्यभिचारस्तदैव स्यात्, यदि पक्षं सन्दिग्धानु-ष्णत्वलक्षणसाध्यधर्मतां मुक्त्वा अनुष्णत्वविरहेण निर्णितो विपक्षः स्यात् । न चैतत् संभवति पक्षापरिभववादिनः ।

एतेनात्र व्यभिचारो न संभवत्येवेति नोद्भाव्यत इत्युक्तम् । ततश्च **टीका-कृतो**ऽपि पक्षे व्यभिचारो न संभवत्येवात्रेत्ययमेवाशयः । शून्यचित्तप्रतिबोधनाय तु पक्षे व्यभिचारसंभवमभ्युपगम्य प्रतिबन्दिः कृतेत्यर्थः ।

यथासाध्येत्यादि । अत्र **बौद्ध**स्यायमाशयो वह्निरनुष्ण इत्यत्र प्रत्यक्षेण साध्यविपर्ययस्यौष्ण्यस्य साधनात् साध्यस्यानौष्ण्यस्य निवृत्तेरिति साध्याभावे साधनसद्भाव इति रूपव्याप्तिभङ्गेऽनैकान्तिकता हेतोः । सिद्धान्तिनस्त्वयमाशयो यथा प्रत्यक्षेण साध्यविपर्ययं साधयता अनुष्णत्वलक्षणः पक्षः पराभूयत इत्यङ्गीक्रियते, तथा तेन साधनमपि पराभूयत इत्यङ्गीकार्यम् । अन्यथा कृतकत्वादिति साधनमपराभूतत्वात् स्वसाध्यमनुष्णत्वं साधयेदेवेति पक्षपराभवोऽपि न स्यात् । तस्मात् पक्षस्यापराभवे पराभवे च प्रत्यक्षेणानुमाने बाधित एव व्याप्तिभङ्ग इति सिद्धम् ॥

टीयाम् । सन्दिग्धसाध्यधर्मे दृष्टान्त इवेति । अयं रागादिमान् वक्तृत्वात् रथ्यापुरुषवत् ।

वेदानुमानमूलमिति । एतदथर्ववेद[625b]वाक्यास्तित्वे लिङ्गम् ।

शब्दोपलम्भलक्षणेनेति । शब्दोपलब्धिः करणसाध्या क्रियात्वात् छिदि-क्रियावत् । यच्च करणं तत् श्रवणेन्द्रियम् । तथा शब्दः श्रवणेन्द्रियसंबद्धः, तज्जनितोपलब्धि-विषयत्वात् । यो यदिन्द्रियजनितोपलब्धिविषयः स तदिन्द्रियसंबद्धो यथा घ्राणजनितो-पलब्धिविषयो गन्धो घ्राणसंबद्ध इत्यनुमानद्वयम् ॥

---

1 S स्फोट-

समर्थानुमानद्वयेति । मूर्तं मनः क्रियावत्त्वात् शरवत् । अमूर्तं मनः सर्वदा स्पर्शरहितद्रव्यत्वात् , गगनवत् ।

संभवतीति । समानबलानुमानयोरेकत्र समावेशाभावात् ।

ननु यदि समानबलयोर्बाध्यबाधकभावो नास्ति, तर्हि ते उभे अपि स्वस्वसाध्यप्रमां कुरुतामित्याह—**किं त्विति** । यावदनयोर्विशेषो न गृह्यते तावन्मिथः सत्प्रतिपक्षत्वान्नैते प्रमां कुरुतः ।

उने ॥ एतदेव वार्त्तिकेति । समावेशाभावान्नानयोर्बाध्यं बाधकं संभवति । अगृह्यमाणविशेषावस्थायां सत्प्रतिपक्षतया त्वेते प्रमां न कुरुत इत्येतत् ।

टीयाम् ॥ एतैः संपन्नयोरिति चतुर्भी रूपैः संपन्नयोः सतोर्यथोपजीव्योपजीवकानुमानयोः समावेशः स्यादेवं यदि समानबलयोरपि स्यादित्यर्थः ।

असत्प्रतिपक्षतासंपत्तेरभावादिति । अगृह्यमाणविशेषावस्थायामपि समानबले अनुमाने मिथः सत्प्रतिपक्षे अतो नैकत्र समाविशतः । ततो नानयोर्बाध्यबाधकत्वमित्यर्थः ॥

उने ॥ अबाधितविषयेणेत्यादि । यदि हि पञ्चरूपसम्पन्नयोरनुमानयोः समावेशासंभवात् नानुमानविरोध इत्युच्येत तदा पञ्चरूपानुमानेन सह प्रत्यक्षस्यापि समावेशो नास्ति इति तद्विरुद्धमपि न वाच्यं स्यात् । यदा तु चतूरूपानुमानयोः समावेशसंभवात् नानुमानविरुद्धमित्युच्यते, तदा चतूरूपानुमानप्रत्यक्षयोः समावेशसंभवात् तद्विरुद्धं वाच्यमेवेति विशेष उक्तः स्यात् ।

एष साधनेत्यादि टीका । वैतण्डिको हि परपक्षनिषेधज्ञापनेनैव प्रयोजनेन वितण्डयति । तच्च प्रयोजनमेव तदैव स्यात् यद्येष साधनवादी परः स्वसाध्यं ज्ञापयतीत्येवम् अहं वैतण्डिको जाने इत्येवमनेन पञ्चावयवेन साधनवाक्येनेदं साध्यं परपक्षनिषेधलक्षणं ज्ञाप्यत इत्येवं चतुर्वर्गोऽभ्युपगतोऽनेन स्यात् । तथा च यदि वितण्डया परपक्षनिषेधः प्रयोजनं साध्यते, तदा अवश्यं वैतण्डिकत्वात् वितण्डयैव प्रथमं चतुर्वर्गः साध्यः प्रसज्यते इति वितण्डा न निष्प्रयोजनेत्यर्थः ॥

उने ॥ पक्षे कथं व्यवस्थापयेदिति । विशेषलक्षणविषयोपस्थापनेन व्यवस्थितां पक्षधर्मतां पक्षे कथं कुर्यात् व्याप्तेः सामान्यविषयत्वेन सामान्यमात्रस्यैवोपस्थापकत्वात् । तस्मात् यथा धर्मी अभ्युपगम्यते, तथा विशेषोऽप्यभ्युपगम्य इत्यर्थः ।

टीयाम् ॥ एककार्यत्वमिति । वर्णानामेककालत्वासंभवेऽपि एककार्यकारित्वात् समूहत्वम् । एतदर्थज्ञापनायैव च विशेषः पदार्थ एक इत्यत्र एकशब्दो विशेषप्रतिपत्तिहेतुरिति विशेषणस्य प्राग्व्याख्या च ॥

उने ॥ ननु प्रत्येकं व्यभिचारे इत्यादि । यदि हि कारणे कार्यं प्रति प्रत्येकं व्यभिचरत', तदैकमत्येनानुगृहीतमिति स्यात् । यदा त्वेकमपि कारणं न व्यभिचरति तदैकाक्यपि तदेव निरपेक्षत्वात् कार्यकरणसमर्थम् । तत् किं तस्यान्येनानुग्रहीतव्येनेति स्मृत्यनुग्रहेणेत्यनेन पदेन पदार्थस्मृतेः पदस्मृतिं प्रति यदनुग्राहकत्वमुक्तं[626a][1] तन्न युक्तमित्यर्थः ॥

टीयाम् ॥ तन्नान्तरीयकतयेति । तस्यात्मादिप्रमेयप्रतिपादनस्य नान्तरीयकता । तया प्रमेयप्रतिपादनं न्यायमन्तरा विना यतो न भवतीत्यर्थः ।

स्मृतिरिति । स्मृतिविषयस्य प्रत्यक्षत इति । इति हेतोरेतावन्मात्रकारणात् प्रत्यक्षतः प्रत्यक्षेण स्मृतिविषयस्यान्यथाप्रत्यक्षतः प्रत्यक्षविषयतैव स्यादित्यर्थः ।

उने ॥ इति वक्तव्ये इति । पूर्वं प्रत्यक्षपरिच्छिन्नो महानसादिर्दृष्टान्त उदाहरणकाले स्मृत्योपदर्श्यत इति प्रत्यक्षविषयस्य स्मृतिः । [त]तः पुनरुपदर्शनादिति वक्तुमुचितम् । न तु स्मृतिविषयस्य प्रत्यक्षत इति । प्रत्यक्षेण प्रत्यक्षविषयतायां सत्यां स्मृतिविषयत्वस्य भावात् ॥

टीयाम् ॥ पदार्थानां धर्म इति । धर्मः स्वरूपविशेषः ।

इह चेति । निगमनेनावयवानामेकवाक्यत्वबुद्धिजननविषयस्य सामर्थ्यस्य भणनप्रस्तावे ।

साकाङ्क्षत्वमेव धर्म इति । यद्यपि स्वरूपसामर्थ्ये सत्येव सहकारिसामर्थ्यं स्यात् , न हि शिलाशकलं क्षितिजलादिसहकृतमपि अङ्कुरजनने समर्थं स्यात् तथापि यथा करणव्यापारानन्तरं क्रिया भवतीति करणस्य साधकतमत्वं तथैव स्वरूपसामर्थ्ये सत्यपि सहकारिसामर्थ्यानन्तरमेव क्रियोत्पद्यते इति सहकारिसामर्थ्यस्यैव प्राधान्यम् । अतस्तदेव अवयवानामेकवाक्यत्वबुद्धिजनने सापेक्षत्वलक्षणं सहकारिसामर्थ्यं **वार्त्तिकटीक**योरुक्तम् । एतच्चैकप्रयोजनत्वलक्षणं सहकारिसामर्थ्यान्तिरमुपलक्षयति । तदपि हि विनावयवानामेकवाक्यत्वबुद्धिर्न स्यादत एवोपसंहारे तदत्र समस्तेत्यादिना एकं प्रयोजनं साकाङ्क्षत्वं चोभे अपि सहकारिसामर्थ्ये एकवाक्यत्वबुद्धिजननं प्रत्युक्ते **टीकाकृता ।**

---

1 Not available in the photocopy of J.

उने ॥ **गोचराभिप्रायमिदमिति ।** इदं प्रत्यक्षादीनामेकशोऽपीति ।

टीयाम् । **अन्यथा त्विति ।** अपरिच्छेदकत्वाङ्गीकारे ।

तर्कस्येति । प्रमाणविषययुक्तायुक्तविचारात्मकस्य प्रमाणविषययुक्तत्वसंभावनं प्रति कारणभूतस्य धूमाभावाद्यासञ्जनरूपस्य ।

प्रमाणविषयविभागहेतुतयेति । प्रमाणस्य धूमत्वादेर्यो विषयो वह्निमत्त्वादिस्तस्य विभागो विपक्षेऽवह्निमत्त्वादौ विरोधकप्रमाणोद्भावनेन युक्तत्वसंभावनम् । तस्य हेतुतया। इदमेव रूपं तर्कस्यानेन च रूपेण प्रमाणविषयेऽयमनिश्चायकोऽभ्युपगम्यत इत्यर्थः ॥

उने । **तस्य तर्कस्याहार्यारोपरूपत्वादिति ।** आहार्यस्य निर्धूमवत्त्वस्यासञ्जनीयस्य य आरोपो धूमवति पर्वते प्रसञ्जनं तद्रूपत्वात् । न ह्यारोपः प्रमा ।

तत्करणस्येति । अवह्निमत्त्वस्य ।

स्वविषयव्याप्यविपर्यय इति । तर्कविषयो निर्धूमत्वं तस्य व्याप्यं निरग्निकत्वं तद्विपर्ययः साग्निकत्वं च ।

तेन चास्येति । यथा धूमो लिङ्गद्वारेण लिङ्गपरामर्शस्य वह्निमत्त्वेन सह स्वाभाविकः संबन्धः, एवं तेन विपर्ययेण वह्निमत्त्वेन सहास्य तर्कस्य स्वविषयाधूमवत्त्वद्वारा व्यवस्थापकः संबन्धो नास्ति ।

तद्विपर्ययस्य धूमवत्त्वस्य । तेनाग्निमत्त्वेन तत्संवलितस्य धूमवत्त्वरूपप्रमाणानुयायिनस्तर्कस्य प्रवृत्तेः ॥

तदितिकर्तव्यत्वमेव । प्रमाणव्यापारत्वमेव ।

प्रसङ्गतद्विपर्ययपिण्ड एवेति । आसञ्जितनिर्धूमत्वधूमवत्त्वयोर्मिलितयोरेव ।

यद्येवं नाभविष्यदित्यादि । यदि वह्निमान् न [626b] स्यादित्यादिप्रसङ्गे इदं वाक्यमित्थं योज्यते, यद्येवं नाभविष्यद् वह्निमान् नाभविष्यत्, तदैव युक्तं प्रमाणाविरुद्धं वह्निमत्त्वमहास्यत धूमवानपि नाभविष्यत्, इदं चाधूमवत्त्वमयुक्तं प्रत्यक्षप्रमाणविरुद्धमग्रहीष्यतेत्येवं प्रसङ्ग एव युक्तायुक्तविचारात्मा, वह्निमत्त्वं युक्तमवह्निमत्त्वमयुक्तमिति संभावनाफलः संपन्न इति ॥

टीयाम् ॥ **तथा हीति ।** प्रसङ्गस्याहेतुत्वोपदर्शने ॥

उने ॥ धात्वर्थस्य वा यागस्य तत्फलत्वे स्वर्गफलत्वे ।

उपलम्भयोग्यत्वेन दुःखत्वेन वेति । उपलक्षणत्वात् धूमाभावादौ प्रसज्यमाने वह्निव्याप्तत्वादिरनिष्टप्रसङ्गको हेतुर्ज्ञेयः ॥

तुल्योपलम्भयोग्यत्वेन हि घटोपलम्भरूपानिष्टप्रसङ्गो दुःखत्वेन च साध्ये धात्वर्थे प्रेक्षावत्प्रवृत्त्यभावरूपानिष्टप्रसङ्गो वह्निव्याप्तत्वेन वह्न्यभावे धूमाभावरूपानिष्टप्रसङ्गः ।

स एवेति । घटः साध्यो धात्वर्थोऽवह्निमत्त्वादिश्चेत्यर्थः । **साधनासिद्धि-रिति ।** यदा हि तर्कस्याश्रयोऽसिद्धस्तदास्या गृहीतसंबन्धत्वात् साधनस्याप्यसिद्धिरिति भावः ॥

पूर्वं चेति । अस्ति हि प्रसङ्गो न प्रसङ्गहेतुरित्यत्र ।

स्वविषये इति । उपलम्भप्रेक्षावत्प्रवृत्त्यभावधूमाभावादौ ।

स्वविषयव्याप्यविपर्यये चेति । स्वविषय उपलम्भादिस्तद्व्याप्यं घटास्तित्वादि । तद्विपर्ययो घटाभावादिः, तत्र ॥

टीयाम् । परीक्ष्य निर्णयं कृत्वेत्यर्थ इति । तर्कनिर्णयाभ्यां बुद्ध्वेत्यस्यायमर्थः ॥

वार्त्तिके ॥ यस्मात् किलैते वादे नोद्यन्ते, अतः पृथगुपदिश्यन्ते इति । वादे नोद्यत्वात् पृथगुपदिश्यन्त इति । अस्य हि अयमर्थो वादे नोद्यत्वं पृथगुपदेशस्य प्रयोजनम् । ततश्च वादे नोद्यत्वेन कारणेन हेत्वाभासाः पृथगुपदिश्यन्ते । वादे नोद्यत्वकारणेन च तदैव पृथगुपदिश्यन्ते यदि पृथगुपदेशमन्तरेणान्येन वादे नोद्यत्वं न स्यात्, अथ च पृथगनुपदिष्टस्यापि न्यूनादेर्वादे नोद्यत्वमस्ति तथा वादे नोद्यत्वकारणात् पृथगुपदेशस्तदैव क्रियते यदि पृथगुपदेशो वादे नोद्यत्वं प्रतिपादयितुं शक्तः स्यात् । स च तदैव शक्तः स्याद् यदि वादे नोद्यत्वमन्तरेणान्येन पृथगुपदेशो न स्यात् । अयं च वादे नोद्यानामपि संशयादीनामस्ति । एवं च वादे नोद्यत्वप्रयोजनतया पृथगुपदेशं प्रति हेतुं ब्रुवतै**कदेशिना** पृथगुपदेशोऽपि वादे नोद्यत्वं प्रति हेतुः स्वीकृतः । ततश्च **वार्त्तिककृता एकदेशि**व्याख्यां निराकुर्वता उभयोरपि मिथो व्यभिचार उद्भावित इत्यर्थः ।

उने ॥ परिसंख्यासमभिव्याहार इति । षोडशपदार्थमध्ये पृथक्त्वेन गणनम् ।

परस्परविरुद्धयोरिति । वादजल्पवितण्डायुग्मयोः ।

वादजल्पयोरिति । अत्र जल्पशब्देन जल्पवितण्डायुग्मं गृह्यते ।

एकत्र । वादे ।

अन्यत्र । जल्पवितण्डयोः ।

[1]**पृथगभिधानमात्रमत्र प्रमाणयितुं शक्यमिति ।** संशयादीनामपि पृथगभिहितत्वेन वादे नोद्यत्वप्रसङ्गात् ।

व्युत्पाद्य सजातीयेत्यादि । स्वप्रामाण्यव्यवस्थितये प्रमाणान्तरोपेक्षायामपि यथा प्रत्यक्षेण स्वव्युत्पाद्यं प्रमाणत्वेन सजातीयमुपजीवकानुमानं नापेक्ष्यते तथान्वीक्षिक्या प्रणेतृश्रोतृप्रमाणापेक्षायामपि स्वव्युत्पाद्याविद्यात्वेन सजातीया अन्या विद्या कदा- [627a]चिदपि नापेक्ष्यन्ते इत्युक्तमिदमुदाहरणम् ॥

टीयाम् ॥ गोचरयति । उपजीवकं करोतीत्यर्थः ।

उने ॥ प्रमाणान्तरादनुवादादेव वेति । उभयस्मादपि तर्कोत्थापकात् ।

किं तु प्रतिपन्नस्येत्यादि । प्रतिपन्नोऽपि सभ्यानां तत्त्वप्रतीतिरक्षार्थं दुःखक्लिष्टस्य तत्त्वप्रतीत्यर्थं चैव जल्पवितण्डे प्रयुङ्क्ते, न त्वन्यजिगीषामात्रेण । ततोऽस्य प्रयोक्तुस्तावत् न जल्पादयो मदादिहेतवः । परस्य तु अहङ्कारशातकत्वात् जल्पादयो मदाद्युच्छेदका इति विरुद्धो हेतुरित्यर्थः ।

यथाश्रुतस्येति । परविजयमात्रोपायलक्षणस्येत्यर्थः ।

टीयाम् । तत्रोत्सूत्रेणेति । तत्र **सूत्रे** व्याख्यातव्ये उत्सूत्रेण सूत्रव्याख्याया यत् पूर्वपक्ष**भाष्य**मस्ति तत् विभजत इत्यर्थः ॥

उने ॥ अक्षरार्थीकर्तुमिति । निःश्रेयसेत्यक्षराभिधेयं कर्तुमित्यर्थः ॥

टीयाम् । तदिदं सूत्रग्रहणप्रयोजनमिति । अर्थाक्षिप्तं **सूत्रकारा** न दर्शयन्तीत्येत**द्वार्त्तिके** सूत्रग्रहणस्य प्रयोजनमित्यर्थः ।

पूर्वमाक्षिप्त इति । निराकृतः ।

तत्रायं भेद इति । तत्र मिथ्याज्ञाने ।

भाष्ये ॥ आत्मनि तावत् नास्तीति । सुगतबृहस्पतिमतसंस्कृतमतेरेवं भवति विभ्रमो, न शुक्तिरजतादिज्ञानवद्रूपसाधर्म्यकृतः ॥

1 J °मात्रप्रमाण°

टीयाम् ॥ **तदसंबन्धाग्रहणेति** । तयोः पीतगुणशङ्खयोरसंबन्धेन वैयधिकरण्येनाग्रहः ॥

उने ॥ **तथाविधापेक्षाबुद्धीति** । द्वित्वकारणीभूतानेकालम्बना एकत्वबुद्धिः ।

विभागवैपरीत्यमिति । विभागेन वैपरीत्यं दूरनिकटादिप्रागवस्थाया अन्यथात्वम् ।

टीयाम् ॥ **अन्य** इति । असत्ख्यातिवादिनो **माध्यमिकाः** ।

अन्य इति । अनिर्वचनीयख्यातिवादिनो **वेदान्तिनः** ।

अनिर्वचनीयमिति । न रजतमसत् प्रतीयमानत्वात् । नापि सत् बाध्यमानत्वादिति सदसद्विषयत्वेन न वक्तुं शक्यम् ।

अपर इति । अख्यातिवादिनः **प्रभाकराः** ।

उने ॥ **यथेदं नेदमित्यादि** । यथेदंतया निश्चिते वस्तुनि नेदंताया तत्र भ्रमोऽपि न स्यात्, तथा नेदं रजतमिति बाधकेन अहंतया रजते निश्चिते नाहं रजतमिति, तत्र [1]नाहंताया भ्रमोऽपि न स्यात् । अस्ति च तवाभ्युपगमे भ्रमरूपोऽपि नाहंप्रत्ययः । स च तदैव घटते यदि नेदं रजतं किमित्यनेन अहंता नोपस्थाप्येत । तथा च सति नेदं रजतमिति पुरोवर्तिद्रव्याकारतां रजतस्य निषेधति । नाहं रजतमिति, किं तु रजतस्याहंतामिति भावः ।

ख्यातेरिति । इदं रजतमिति ज्ञानस्य ।

सत्यज्ञानविषयनिवृत्तिरिति । सत्यौ लोकप्रतीतौ यौ ज्ञानविषयौ भावोऽभावो वा, तन्निवृत्तिः ।

तन्निरुक्तीति । सत्यज्ञानविषयनिरुक्तिः ।

प्रतीत्यगोचरत्वमिति चेदिति । प्रतीत्यगोचर एवानिर्वचनीयत्वं प्रथते इति चेदित्यर्थः ॥

टीयाम् ॥ **ननु रजतज्ञानमित्यादि** । रजतज्ञानं रजतं पुरोवर्तिद्रव्यतया न गृह्णाति । पुरोवर्तिद्रव्यज्ञानं च पुरोवर्तिद्रव्यं न रजतत्वेन गृह्णातीत्यर्थः ।

---

1 S °तया-

अभेदाग्रहात् कस्मान्न समीचीनेति। विपर्ययज्ञानात् प्राक् यथा शुक्तिरजते भेदेन न गृह्येते; तथा अभेदेनापि न गृह्येते इति तयोरभेदाग्रहोऽप्यस्ति।

उने॥ अथ वा दृश्यकारणसाम्येऽपीत्यादि। भेदाग्रहे सत्यपि दोषसहकृतचक्षुरादिभिरदृश्यकारणैर्विना भ्रान्तेरनुत्पादात् दोषसहकृतचक्षुरादय एव भ्रान्तौ कारणम्। भेदाग्रहस्तु सन्नप्यकिञ्चित्कर इति तात्पर्यम्। एतेन भेदाग्रहात् यथा विपर्ययज्ञानोत्पाद एवमभेदाग्रहात् कस्मात् न समीचीनज्ञानोत्पाद इति यदुक्तम्, तन्निरस्तम्, दुष्ट [627b] चक्षुरादीनां विपर्ययं प्रति कारणत्वेनाभ्युपगमात्। दुष्टचक्षुरादीनि तु समीचीनज्ञानं प्रति न कारणानि॥

टीयाम्। विवेकाग्रहवदित्यादि। यथा विवेकाग्रहो विद्यते तथा तत्परिपन्थी अभेदाग्रहोऽपि विद्यत इति संबन्धः॥

भाष्ये शरीरादौ मनःपर्यन्ते मिथ्याज्ञानं प्रतिपादयति—**अनात्मन्यात्मेति** अत्रापि कुदर्शनाभ्यास एव निमित्तमिति **जयन्तमञ्जर्याम्**॥

टीयाम्॥ शरीरादिषु मनःपर्यन्तेष्विति। फलदुःखयोः शरीराद्यन्तर्गतत्वेन शरीरादिग्रहणेनैव ग्रहणम्।

भाष्ये। जन्तुरित्यादि नानापर्यायोच्चारणं क्वचित् दर्शने केनचिदभिधानेनात्मनो व्यवहार इत्याशयेन॥

चार्वाकमतमवलम्ब्याह—**अनिमित्तमिति।**

नैमित्तिकश्चेति। अनिमित्तं जन्मेत्यत्र सर्वनिमित्तनिषेधो दर्शितः। इह तु व्यक्तनिमित्तताभ्युपगमेन कर्मनिमित्तता निषिध्यते इति विशेषः॥

अथ **सौगत**मतमवलम्ब्य तत्रैव च्छायान्तरेण मिथ्याज्ञानं दर्शयति—**देहेन्द्रियेति**॥

मिथ्याज्ञानकार्यत्वं तावत् दोषाणामाह—**एतस्मादित्यादि।**

रागद्वेषाधिकरणा इति। न तदाश्रयत्वं तदधिकरणत्वमिह विवक्षितम्, अपि तु तदभिन्नत्वम्।

दोषाणां प्रवृत्तिं प्रति कारणत्वमाह—**दोषैरिति।**

प्रवृत्तेर्जन्मकारणतामाह—**सेयमिति।**

जन्म च दुःखस्य निमित्तमित्याह—**तस्मिन्निति** ।

टीयाम् ॥ **परस्पराभावधर्मणोरिति** । ननु परस्पराभावविशिष्टयोरपि पृथिवीत्व-गन्धत्वयोरेकत्र समवायोऽस्त्येव । सत्यम् , परस्पराभावलक्षणो धर्मो धर्मिनिष्ठो ययोर्धर्मयोः । अयमर्थः, परस्पराभावविशिष्टयोर्धर्मिणोर्यौ धर्मौ तयोर्नैकत्र समवायः ।

[1]**भाविकमिति** । पारमार्थिकम् ।

ननु पूर्वज्ञानेनोत्तरं सापेक्षामपि कथं बाध्यते इत्याह—**नत् खल्वित्यादि** । तदुत्तरं ज्ञानं पूर्वविरोधे सति यतो न जायते, अयमेव चास्य बाध इत्यर्थः । ततश्चाजातं सत् तदुत्तरं ज्ञानं कर्तृपूर्वं कर्म कथं बाधेत ? सम्यग्ज्ञानेन मिथ्याज्ञानं तदैव निवर्त्यते यद्यनयोर्बाध्यबाधकभावः स्यादित्यतः **टीकाकृता** उक्तम् ।

तदनेन **मिथ्याज्ञानस्यासहायत्वादि**त्यादि **वार्त्तिक**ग्रन्थेन **बाध्यत्वा-बाध्यत्वे मिथ्यातत्त्वज्ञानयोरुपलक्षिते** इति । मिथ्यातत्त्वज्ञानयोरर्थो(?) सहायत्वमर्थसहायत्वं च बाध्यत्वमबाध्यत्वं च विना न स्यातामिति अर्थसहायत्वासहायत्वाभ्यां बाध्यत्वाबाध्यत्वे उपस्थापिते इत्यर्थः ।

तथा चानुपजातेति । अर्थासहायत्वसहायत्वोपस्थापितयोर्बाध्यत्वाबाध्यत्वयोर-नुपजातविरोधित्वोपजातविरोधित्वे तु व्यवस्थापके इत्यर्थः ॥

॥ इति प्रयोजनाभिसम्बन्धप्रतिपादकं प्रथमं प्रकरणं संपूर्णम् ॥

---

1 Printed edition स्वाभा°

॥ प्रमाणलक्षणप्रकरणम् ॥

[१.१.३–८]

भाष्ये ॥ तत्त्वव्यवस्थापक इति। समानासमानजातीयव्यावृत्तं पदार्थस्य स्वरूपम्। तस्य नियामकः कश्चिदसाधारणो धर्मो लक्षणम्, लक्ष्यतेऽनेनेति तदभिधायकं वचनमपि लक्षणम्।

प्रमाणैरिति। स्वयमवमर्श[स]मये प्रत्यक्षादिभिः। परप्रत्यायनकाले तु प्रमाणमूलैरवयवैरिति ज्ञेयम्, तान् विना परस्य प्रत्याययितुमशक्यत्वात्।

उने ॥ आशङ्क्य विमृशतीति तत् किमपरमवशिष्यते यदनुमानगोचर इति विमर्शः॥

टीयाम् ॥ प्रत्यक्षाप्रत्यक्षाणामिति। एतेन स्वरूपं प्रत्यक्षत्वादेव, नानुमानगोचरः, सहकारिणः प्रत्यक्षा अप्रत्यक्षाश्चेति तेऽनुमानगोचराः संभवन्तीत्युक्तम्॥

उने ॥ सामर्थ्यमवशिष्यते इति। अतीन्द्रियसामर्थ्यानुमानं त्वेवम्। जलादिषु सामर्थ्यं स्वरूपसहकारि साकल्यातिरिक्तम्, कार्योत्पादेतरानुमेयसामर्थ्यत्वात्। यत् स्वरूप-सहकारि [628a] साकल्यातिरिक्तं न स्यात् तत् कार्योत्पादेतरानुमेयसामर्थ्यं न स्यात्। यथा धूमानुमेयो वह्निः।

इदमेव चास्य तदुपधानमिति। यदि जलादेः स्वकार्यात् प्राग्भावित्व-मङ्गीक्रियेत तदैवेतरेतराश्रयत्वम्। यदा तु स्वपरविभागरहितात् कार्यात् प्राग्भावित्वमङ्गी-क्रियते तदा न किञ्चित् दूषणमित्यर्थः।

न तावत् प्रतिव्यक्तीति। यद्यपि सर्वव्यक्तीनां ग्रहणाभावेनागृहीत-व्यक्तिषु व्यभिचाराशङ्कया व्याप्तिग्रहणासंभवात् प्रतिव्यक्त्यनुमानं नोदेतुमर्हति तथापि दृष्टव्यक्तिषु व्यभिचारेणैव स्पष्टतया व्याप्तिभङ्गं दर्शयित्वा अनुमानाभाव उक्तः **तदुत्तर-कार्येत्यादिना**।

सहकारिसाकल्ये कुर्यादिति। साध्यत्वादिति। जलादि पिपासो-पशमादिकार्यादवश्यं पूर्वभावीति कोऽर्थः? सहकारिसाकल्ये सति कार्यं करोति, सहकार्यसा-कल्ये न करोतीति। अयमेव चार्थ **आनन्तर्ये त्वनियम** इत्यनेन **टीकाकृ**तोक्तः॥

टीयाम् ॥ **तत्र फलविशेषेति** । यतः शब्दार्थं प्रति फलस्य विशेषणत्वमङ्गीकृत्येत्यर्थः।

अन्यथा प्रमाणेति । यदि हेयत्वादिर्विषयो न स्यात् फलस्य तदा फलस्य विषयो वह्निः प्रमाणव्यापारस्य च विषयो हेयत्वादिः स्यादिति प्रमाणफलयोर्भिन्नविषयता स्यादित्यर्थः ।

स्वविषये इति । वह्न्यादौ ।

तद्व्यापारस्येति । फलव्यापार आत्मजनकत्वलक्षणः ।

तज्जनकेनैव । फलजनकेन कारणेन ।

इति नियमवादिनां मतमिति । हेयादिबुद्ध्योऽनुमानस्यैव फलं न प्रत्यक्षज्ञानस्येति प्रत्यक्षज्ञानं निर्विकल्पं सविकल्पं वा अफलत्वात् न प्रमाणमिति तेषामभिप्रायः ॥

उने ॥ **अन्य एव दृष्टान्त** इति । शब्द आदावुद्देश्यो महाविषयत्वात् । सामान्यं परमपरं चेत्यत्र परं यथा ॥

भाष्ये ॥ **समाख्यानिर्वचनसामर्थ्यादिति** । समाख्या व्यपदेशकशब्दः । तस्या निर्वचनं प्रकृतिप्रत्ययविभागेन व्युत्पादनम् । तदेव सामर्थ्यम्, तस्मात् ।

विशेषसमाख्यास्वपीति । न केवलं प्रमाणमिति सामान्यसमाख्यायाः करणवाचित्वम्, विशेषसमाख्यास्वपि अनुमानादिष्वपि तथैव करणवाचित्वमेवानुमीयते ।

तेनेत्यादि । प्रत्यक्षेऽपि सन्निकर्षात्मिकां ज्ञानात्मिकां च वृत्तिं व्याचक्षाणेन तत्फलं पृथगुपदर्शयता करणत्वं सूचितमेव ॥

उने ॥ **प्रकृतसंगतिस्वरूपकथनार्थमिति** । अन्यथा तु विशेषलक्षणानां सामान्यलक्षणविभागोद्देशहेतुत्वेनेति सर्वत्र छलादिष्वप्युपयुक्तम् ॥

सर्वाप्रतिपत्तिरिति । सर्वस्य ज्ञेयस्याप्रतिपत्तिः ॥

टीयाम् ॥ **इतरस्त्वित्यादि** । यथा प्रत्यक्षेण गृहीतो धूमो वह्निं साधयति तथा अनेन **सूत्रेणेदं** लक्षणं गृहीतमविविक्तप्रत्यक्षस्य विविक्तप्रत्यक्षत्वसाधकमित्यर्थः ॥

उने ॥ **तमभ्युपगमयन्** चतुर्थसन्निकर्षमङ्गीकारयन् ।

विशिष्टोपलब्धेः रूपाद्युपलब्धेः ।

परस्पराश्रयत्वमिति । रूपोपलब्धौ सत्यां चाक्षुषत्वं तयैव चक्षुषोऽनुमेयत्वात् । चाक्षुषत्वे च सति रूपोपलब्धिश्चाक्षुषत्वोपहितत्वात् रूपस्य ।

न चाविशिष्टेत्यादि । या उपलब्धिः सा करणसाध्या क्रियात्वात् छिदिक्रियावत् । [628b] यच्च करणं तदिन्द्रियमित्येवंरूपाद्यविशिष्टोपलब्धिमात्रेणोपनीतमविशिष्टं चक्षुरादिविशेषरहितं यदिन्द्रियमात्रं तदुपाधिः । अनन्तासु रूपव्यक्तिषु यद्रूपमिति विशिष्टव्यपदेशः, तत्र सामान्येनेन्द्रियग्राह्यत्वमुपाधिः न चाक्षुषत्वमित्यर्थः ॥

चाक्षुषत्वादीति । चाक्षुषत्वाद्युपाधिनिबन्धनं यस्य रूपादिव्यपदेशो भेदस्य तत्त्वाभिमानो रूपादिव्यपदेशाभेदे परस्यास्ति । चाक्षुषत्वाद्युपाधिमेव रूपादिव्यपदेशाभेदे कारणं मन्यते इत्यर्थः[1] ।

सोऽपीति । चाक्षुषत्वाद्युपाधिनिबन्धनत्वाभिमानः ।

अभिमतलाभ इति । नीलादिगुणसमवेतसामान्यसिद्ध्या चतुर्थसन्निकर्षलाभः ॥

टीयाम् ॥ भेदाधिष्ठानस्येत्यादि । द्वित्वं भेदाभेदरूपद्व्यात्मकत्वमेकात्मनि विरुद्धम्, यतो भेदाधिष्ठानं द्व्यात्माश्रयमेतत् स्यादित्यर्थः । तस्मात् भिन्ने एव वस्तुनी संबद्धे सामानाधिकरण्येन प्रतिभासेते इति । योऽयं सामानाधिकरण्येन प्रतिभासः स भिन्नयोरेव वस्तुनोः संबद्धयोः प्रतिभासो न तु तादात्म्यस्येत्यर्थः ।

शब्दवृत्तिभेदेनेति । शब्दव्यापारविशेषेण ।

उने । व्यतिरेकः स्वाभाविक इति । यत्र भेदसंबन्धौ तत्रावश्यं सामानाधिकरण्यव्यावृत्तिरित्येवं सामानाधिकरण्याभावाविनाभूतौ भेदसंबन्धौ स्याताम् । न चैवमस्ति । रक्तः पटोऽग्निर्माणवक इत्यादौ रक्तो महारजनादिः अग्निः शुक्लभास्वरं द्रव्यमित्येवं भेदेऽपि सामानाधिकरण्यदर्शनात् । तस्माद् यथा अत्र भेदे सत्यपि शब्दव्यापारविशेषेण सामानाधिकरण्यम्, तथा शुक्लः पट इत्यादौ भेदे सत्यपि सामानाधिकरण्यम्, कुण्डे दधीत्यादौ तु वैयधिकरण्यम् ।

सङ्केतौपाधिक इति । अर्थभेदेऽपि यत्र शब्दाः सामानाधिकरण्येन सङ्केतिताः तत्र सामानाधिकरण्येन व्याप्रियन्ते, यत्र तु वैयधिकरण्येन सङ्केतिताः तत्र तथेति ।

---

1 चाक्षुषत्वादीति...इत्यर्थः repeated in S

अभिन्नं च तत्संबन्धि चेति । यदि हि न भिन्ने नापि संबद्धे इति साध्यं स्यात्, तदा सपक्षः शुक्लत्वाद्यविशिष्टः पटादिरस्तीत्यसाधारणता हेतोः स्यादित्यर्थः ॥

तेनैव तस्यासंबन्धादिति । यदि हि दध्नैव दध्नः संबन्धः स्यात्, तदा संबद्धमभिन्नं च स्यादित्यर्थः ॥

प्रकारभेदमिति । केनचित् प्रकारविशेषेण संबद्धोऽप्यभिन्नो भविष्यतीत्यर्थः ।

केनचिदाकारेण तथेति चेदिति । साधारणत्वेन भिन्नस्वभावापि सत्ता केनाप्याकारेण तयोः स्वभावो भविष्यतीत्यर्थः ।

द्रव्यगुणयोः सत्तैवेत्यादि । द्रव्यगुणयोः सत्ताव्यतिरिक्तं न साधारणं रूपं विशेषणं द्रव्यत्वगुणयोर्न द्रव्ये व्यतिरिक्तं किञ्चित् विशेष्यम् । ते च भिन्ने एवेत्युक्तमित्यर्थः ।

बोध्यमिति । ज्ञेयं समवाय इत्यर्थः ।

विशिष्टप्रतिपत्तिमेवेति । समवायविशिष्टं ज्ञानम्, अभावविशिष्टं ज्ञानम् ।

साक्षात्कार इति । निरुपधानं ज्ञानम् ।

स्वाश्रयाविशेषणस्यापीति । शब्दप्रतीतावाकाशस्याप्रतीयमानत्वात् स्वाश्रयाविशेषणत्वं शब्दस्य ।

अतथाभूतयोरपीति । गन्धरसयोः क्वचित् अकस्मात् ग्रहणे द्रव्याप्रतीत्या अविशेषणीभूतयोरपि ।

संबन्धान्तरनिरपेक्ष एवेति । समवाये ॥

टीयाम् । एवमभावेऽपीत्यादि **ग्रहणमि**त्येतदन्तम् । अभावेऽपि ग्रहणं [629a] केनेत्याह—**तस्य संयुक्तस्य विशेषणभावेनेन्द्रियप्रत्यासत्त्या** ।

उल्लेखमाह—**यथा भूतले घटो नास्तीति वेति**। एवं शेषमपि योज्यम् ।

उने ॥ अभावव्यवहारकालेऽपि चेति । ननु द्रव्यादयः केचित् घटेन सह न संभवन्ति अतस्तेष्वन्यतमो विरोधी भविष्यतीति चेत्—न, यथैते घटेन सह न संभवन्ति एवं यदि घटाभावव्यवहारकाले संभवेयुः, तदा तेष्वन्यतमो घटस्य विरोधी स्यात् । न चैवमस्ति, तेषां घटाभावव्यवहारकालेऽप्यसंभवात् । एतेन सहासंभवलक्षणविरोधाभाव उक्तः । बाध्यबाधकभावावरणलक्षणावपि विरोधौ न स्त इत्याह—**भूतलधर्माणामित्यादि** ।

यथोपलम्भनिषेधकात् प्रमाणादिति मानसात् ।

एवं तर्हीति । संबन्धमात्राङ्गीकारे ।

तस्य नाधिकरणे इत्यादि । वायौ रूपाभावे गृह्यमाणे चक्षुस्तावत् नाधिकरणेन वायुना स्वग्रहणायापेक्ष्यते,[1] तस्य तत्राव्यापारात् । नापि प्रतियोगिना रूपेण स्वस्मरणायापेक्षते स्मरणे चक्षुरादेरव्यापारस्य प्रसिद्धत्वात् रूपाभावप्रतीत्या त्ववश्यमपेक्षितं चक्षुरित्यर्थः ।

स्वरससिद्धस्य । यथा विषयः स्वभावेनादुष्टः, तथा स्मरणाभावस्यापि स्वभावेनादुष्टस्येत्यर्थः ।

शङ्कामपनयन्नेवेति । नोद्य**भाष्य**मिति भावनेनेति शेषः ।

विशेषे वेति । अनेकद्रव्यवत्त्वं विना महत्त्वं न स्यादिति । अनेकद्रव्यवत्त्वं महत्त्वे एवोपयुक्तम्, महत्त्वमेव तु चाक्षुषत्वं प्रति कारणमित्याद्युक्त्या यद्यनयोरेकतरस्य विशेषोऽभ्युपगम्यते तदेत्यर्थः ।

चाक्षुषद्रव्यलक्षणे कर्तव्ये इति । आत्ममनःसंयोगादिभिः कारणैश्चक्षुर्ग्राह्यं स्यादित्येवं लक्षणे क्रियमाणे इत्यर्थः ।

एतेन **विकल्प एव न्याय्य** इति **टीका**वाक्यं द्रव्यचाक्षुषत्वस्य लक्षणं प्रत्येव महत्त्वानेकद्रव्यवत्त्वयोर्विकल्पमाह **ननु कारणत्वं प्रतीतिभावः, अतिव्यापकतयेति** । आत्मादीनां परोक्षज्ञानसाधारणत्वात् ।

अव्यापकतयेति । आलोकादीनां गन्धादिप्रतीतौ प्रत्यक्षरूपायामप्यनुपयुक्तत्वात् ॥

टीयाम् । **तत् किमिदानीं भिद्यमानस्ये**त्यादि । प्रत्यक्षज्ञाने भिद्यमानेऽपि अयमिन्द्रियमनःसन्निकर्षो न भिद्यते इत्ययं समानत्वात् भिद्यमानेऽपि प्रत्यक्षे साधारणत्वान्नोक्त इति **भाष्या**र्थाभिमानिनः पृच्छा ।

यदि स्वसंबन्धीत्यादि । यथा दण्डसंबन्धवानित्यत्र दण्डसंबन्धः स्वसंबन्धिवाचकपदस्य दण्डस्य व्यपदेशेनात्मानमदण्डसंबन्धाद् व्यावृत्य तेन दण्डेन विशेषणेन विशिष्टं

---

1 S °योपे°

पुरुषमपि व्यावर्तयति, तथा यदि इन्द्रियमनःसन्निकर्षः स्वसंबन्धिनो मनसो वाचकं यत् पदं मनोलक्षणं तद्व्यपदेशेन स्वमात्मानमन्यतोऽमनःसन्निकर्षोऽयमिति व्यवच्छिद्यते न विशेषणेन मनोलक्षणेन विशेष्यज्ञानमप्यन्यतो व्यावर्तयेत् मनोज्ञानं मनःसन्निकर्षोत्थं ज्ञानमित्यर्थं इत्येव मनोज्ञानाद् व्यवच्छिन्द्यादित्यर्थः ।

तस्माद् व्यपदेशाभाव इत्यादि । **भिद्यमानस्ये**त्यादि **भाष्येण भिद्यते** इत्यन्तेन व्यपदेशाभावलक्षणं समानत्वं दर्शितमिति । एवंरूपं **भाष्यस्य** तात्पर्यं **टीकया** व्याख्यातमित्यर्थः ॥

उने ॥ समवा[629b]**येनेति**[1] । समवायेन यः शुक्लगुणो यच्च गमनकर्म तयोर्ज्ञानमिति योजना ।

अव्यपदेशकत्वव्यापकत्वादिति । अव्यापदेश्यत्वं व्यापकं यस्याप्रसिद्धत्वस्य तद्भावात् ।

तदभिधानेनेति । अव्यपदेशकत्वाभिधानेन ॥

टीयाम् ॥ अतीन्द्रियाधारत्वं सामान्यमिति । आत्ममनःसन्निकर्षेण सह तुल्यत्वम् ॥

उने ॥ तृष्णातत्कर्मसंभव इति । तृष्णा च तत्कर्म च कृष्णसारनिर्वर्तकमदृष्टं च तयोः संभवः ।

अस्येति । कृष्णसारस्य ।

अतः कार्येऽपीति । न केवलं कृष्णसारोत्पत्तौ कार्यस्योपलम्भलक्षणे ।

तत्कार्यस्येति । संयोगकार्यस्य तदभावादिति प्रादेशिकासमवायिकारणाभावात् ।

तद्द्वारेणोपलभ्यमाना इति । शब्देनानुमीयमाना इत्यर्थः ।

टीयाम् ॥ बहिर्वर्तित्वादित्यादि । यदि कृष्णसारमात्रमिन्द्रियमिष्यते, तेन चार्थस्य प्राप्तौ ग्रहणं तदा सान्तरग्रहणं न स्यात् । यदा तु बहिर्वर्त्यपि इन्द्रियमिष्यते तदा कृष्णसारापेक्षया सान्तरग्रहणमुपपन्नमेवेत्यर्थः ।

न चापातजन्मेत्यादि । कुड्यादिविषयं निर्विकल्पकं सविकल्पकं वा द्रव्यानुमानात् प्रागेव स्यादित्यर्थः ।

---

१ अत्र श्रीकण्ठटिप्पणी समाप्ता ।

आश्रयाणामिति । शब्दाद्याश्रयाणाम् ।

विषक्तेति । विशकलिता ।

समारोपमात्रेणेति । [1]समाश्रयणमात्रेण ।

उने ॥ ननु मा भूत् सहान्तरेण ग्रहणमित्यादि । अप्राप्यकारि चक्षुः सान्तरग्रहणादित्यस्य हेतोः सहान्तरेण ग्रहणं सान्तर इति वा ग्रहणमर्थो मा भूत्, उभयस्यापि शरीरासंबद्धग्रहनिमित्तत्वादिति परं शरीरेन्द्रियाधिष्ठानासंबद्धस्य ग्रहणमेव हेतोरर्थो भविष्यति ।

कुत इत्याह — **न ह्ययमन्यथासिद्ध** इति । यथा हि सान्तरेण ग्रहणं सान्तरमिति वा ग्रहणमन्यथा अप्राप्तिमन्तरेणापि शरीरेन्द्रियाधिष्ठानासंबद्धग्रहणेन सिध्यति, न तथायं शरीरेन्द्रियाधिष्ठानसंबद्धग्रहोऽन्यथा अप्राप्तिमन्तरेण सिद्धो निष्पन्नः, किं त्वप्राप्तिनिमित्तक एवायमित्यर्थः ।

नन्वयमप्यन्यनिमित्तो भविष्यति तत्कथमप्राप्तो[2] हेत्वर्थ इत्याह—**एतस्यैवेत्यादि** । एतस्यैव शरीरसंबद्धग्रहणस्यैव इतरोपाधित्वेन इतरस्य सान्तरग्रहणस्योपाधित्वेन कारणत्वेन सान्तरग्रहणं प्रति प्रयोजकत्वात् । एतत्प्रति तु अप्राप्तिमन्तरेण नान्यत्किञ्चित् प्रयोजकमित्यर्थः ॥

टीयाम् ॥ इन्द्रियसंबन्धो भवत्वित्यादि । शरीरसंबन्धाविनाभूतो नैरन्तर्याभिमानिनः शरीरासंबन्धाविनाभूतश्च सान्तरत्वाभिमान इति नियम इन्द्रियसंबन्धविनाभूतः शरीरसंबन्धः, इन्द्रियासंबन्धाविनाभूतश्च शरीरसंबन्ध इति तु नियमो नास्तीत्यैदम्पर्यम् ॥

उने ॥ यच्छरीरसंबद्धं तदवश्यमिन्द्रियसंबद्धमित्यनुषङ्गादुक्तम् । उपयुक्तं त्वत्र यदिन्द्रियसंबद्धं तदवश्यं शरीरसंबद्धमिति ।

तत्रेति । इन्द्रियासंबद्धत्वे ॥

टीयाम् ॥ विषयरूपाधीननिरूपणा इति । विषयरूपाधीनं निरूपणं ग्रहणं येषां ते तथा । एतेन प्रत्ययानां विषया अन्तरङ्गा इत्युक्तम् ॥

उने । **असिद्धिव्यवच्छेदार्थमिति** । अथ रूपवद्द्रव्यान्तरमन्तरशब्दवाच्यम्, तस्य व्यवधायकत्वात् तेन सह ग्रहणं न युक्तमिति **वार्त्तिके** सहान्तरेण ग्रहणादित्यस्या-

---

1 J °श्रयेण मात्रेण 2 J °प्तौ

सिद्धिरुक्ता। सा च पर[630a]मार्थतो नास्ति, अन्तरेण बहलतमालोकेन सह ग्रहणस्य संभवात्। तस्मात् सहान्तरेण ग्रहणस्यापि [1]शरीरसंबद्धग्रहनिमित्तकत्वादन्यथासिद्धत्वमेव परमार्थत इत्यसिद्धिव्यवच्छेदाय ॥

टीयाम् ॥ तस्मादन्यथासिद्धिरेवेत्यत्रैवकार इत्यर्थः।

एतावन्मात्रे त्विति। अप्राप्तावजनकत्वादित्यैतावत्येव।

विपर्ययेण प्रयोगो द्रष्टव्य इति। प्राप्यकारि चक्षुरनुविहितदूरान्तिकभावत्वात् वास्यादिवदित्ययम्।

गृह्यन्त इत्यर्थ इति। न हीत्यनेन योगः।

सहकारिप्रत्यया इति। कारणानि।

भावानिति। बीजादीन्।

सैवेति। प्रत्यासत्तिः।

विप्रतिपद्येतेति। विप्रतिपत्तुमर्हति।

[2]**न तु निरन्तरोत्पादेऽपीति**। एतेन **बौद्धा**दिना अकामेनापि इन्द्रियार्थयोः प्राप्तिरङ्गीकर्तव्येत्युक्तम्।

टीयाम्। निषेत्स्येते हीत्यादि। यदि हि क्षणभङ्गपरिणामौ निषिद्धौ नाभविष्यताम्, तदा इन्द्रियक्षणोऽर्थक्षणश्च निरन्तरावुत्पन्नौ परिणतौ चेति तयोरतिरिक्तप्राप्तिरहितयोरेव ग्रहणग्राह्यभावोऽप्य[घ]टिष्यत। यदा तु तौ निषेत्स्येते तदा स्थेमवतां भावानां स्वरूपयोग्यता चेत्यादिभणितनीत्या भिन्ना प्राप्तिः सिध्यतीति भावः।

योग्यतयैव हि इत्यादि। [3]करणानां वास्यादीनां स्वकार्यं कुर्वतां योग्यतैव कारणम्, न तु प्राप्तिरित्यर्थः। ननु कारणानि प्राप्तिपूर्वकाण्येव सन्ति स्वकार्यं कुर्वाणानि दृश्यन्ते। तत् कथं प्राप्तिकारणमित्याह—**प्राप्तिस्त्वित्यादि**। कारणानां स्वकार्यकरणं योग्यतयैव कारणेन व्याप्तम्। प्राप्तेस्तु सहचारितामात्रमित्यर्थः ॥

उने ॥ नन्वयस्कान्तस्येत्यादि। अयस्कान्तश्चेदप्राप्यकारी तदा कारणत्वादिति हेत्वन्तरमपि प्राप्यकारित्वसाधनायोपन्यस्तमनैकान्तिकमित्यर्थः ॥

---

1 J शरीरा 2 S ननु 3 J कारण°

न च कृष्णसारस्येत्यादि । यदि हि कृष्णसारमण्योर्वृत्तयोऽङ्गीक्रियन्ते, तदा तासामर्थेन लोहेन च निरन्तरोत्पादः स्यात् ।

आचरतीति । कुर्वाणे ।

[1]**स्थिरनये** इति । एतेनास्थिरमते तावत् कार्यं जनयन्ति, कारणानि परस्परप्राप्तिं न व्यभिचरन्तीति व्यवस्थापितमिति ज्ञापितम् ।

सामान्योपसंहारे इति । यज्जातीयकार्यहेतुचक्रानुगमो यत्र, तत तज्जातीयम्, यथा यवाङ्कुरोऽङ्कुरजातीयः । ज्ञानकारणानुगतं च सुखं तस्मात् ज्ञानजातीयमिति सामान्यतो व्याप्तौ ।

विशेषोपसंहारे त्विति । ज्ञानजातीयकारणानुगमो यत्र तत् ज्ञानजातीयम्, यथा रूपज्ञानं ज्ञानजातीयम् । यत् पुनर्ज्ञानजातीयं न भवति तत् ज्ञानकारणानुगतमपि नास्ति यथा घटः । ज्ञानकारणानुगतं च सुखं तस्मात् ज्ञानजातीयमिति । विशेषव्याप्तौ तु सन्दिग्धानैकान्तिकत्वं घटो ज्ञानकारणानुगतोऽपि भविष्यति ज्ञानजातीयश्च न भविष्यतीति ज्ञानकारणानुगमस्य विपक्षादज्ञानजातीयात् व्यावृत्तिः सन्दिग्धा । सन्देहश्च बीजकारणानुगमेऽपि अङ्कुरस्याबीजजातीयत्वदर्शनात् ।

ननु यदि कारणानां भेदो न स्यात् तदा कार्याणां भेद आकस्मिकः प्रसज्येतेति ज्ञानकारणानुगमस्य विपक्षादज्ञानजा[630b]तीयात् व्यावृत्तिर्न सन्दिग्धेत्याह—**आकस्मिकत्वेत्यादि ।**

अनाकस्मिक इत्यर्थ इति । ततश्च ज्ञानकारणानुगमस्य सन्दिग्धविपक्षव्यावृत्तिकत्वात् सुखं ज्ञानकारणानुगतं च भविष्यति ज्ञानजातीयं च न भविष्यतीति सिद्धं स्यात् ।

अवान्तरैकजातीयत्वमिति । अवान्तरा एकजातिर्यस्य तद्भावः । अनेकावान्तरजातीयः ।

कार्यकरणस्वभावस्येति । कारणस्येति शेषः ।

कस्यचिदेवेति । कार्यस्योत्पादे उत्पादने नियमः । रूपज्ञानस्य समनन्तरप्रत्ययस्योपादानभूतस्यैकजातीयत्वेऽपि विलक्षणानेकसहकारिवशात् किञ्चित् रूपज्ञानं रूपज्ञानमेव जनयति किञ्चिच्च रसज्ञानमित्यर्थः ।

---

1 S °तये

एकजातीयोपादानत्वेऽपि इति । ज्ञानसुखयोः ।

व्यापकोपादानवदिति । व्यापकमुपादानमस्यास्ति ।

परमत इति । परस्य **नैयायिक**स्य मत इष्टः ।

सत्तयेत्यादि । एकोपादानत्वात् सुखज्ञानयोरेकजातीयत्वम् । कोऽर्थः ? सज्जातीयत्वं गुणजातीयत्वं वा चेत् साध्यते **बौद्धे**न तदा सिद्धसाधनम्, यतो **नैयायिके**नापि सुखज्ञानयोरुपादानवत्त्वात् सज्जातीयत्वं व्यापकोपादानवत्त्वात् गुणजातीयत्वं चैकजातीयत्वमिष्टमेव । यत् पुनरन्यत् किञ्चित् ज्ञानत्वादिनैकजातीयत्वं साध्यते, तत्र नियमो नास्तीति तत् न सिध्यतीत्यर्थः ।

असङ्कीर्णमिति । **बौद्धे**न सह ।

स एवेति । उपाधिरेव ।

तेन चेति । अनुकूलत्वेन ।

यद्धेतुतयेति । यस्य हेतुतया ॥

टीयाम् । **तीव्रसंवेगतया** । विषयप्रकर्षवत्तया ॥

उने । **सगोत्रानिति** । **वैशेषिका**न् ।

अन्यथा त्विति । व्यापारिव्यभिचारित्वेऽपि ।

अनियमप्रसङ्ग इति । सर्वैः सर्वस्य व्यापारः स्यात् ।

तद्विषय एवेति । तस्य स्मरणस्य विषये ।

अस्येति । स्वप्नज्ञानस्य ।

तत्कार्यत्वे । कामिनीकार्यत्वे ।

तदनुवृत्तौ । चरमधातुविसर्गाद्यनुवृत्तौ ।

अन्येषाम् । दशननखक्षतादीनाम् ।

अन्यथेति । इदानीन्तनसुखस्य बाधो यदि प्राक्तनस्य स्यात् ।

आशुतरविनाशिताम् । विद्युदादीनाम् ।

तज्ज्ञानेति । सुखज्ञाने ।

तत्संभवेति । सुखसंभवः ।

तदेतदेकेत्यादि । तत् तस्मादेकस्य सुखस्य एकजातीयत्वे सर्वमसमञ्जसं स्यात्, विषयसंभोगाद्यर्थं प्रवृत्तिर्न स्यात् ।

अत्रेति । सुखविशेषे ।

सिद्धान्तिन इति । सतीन्द्रियार्थसन्निकर्ष इति वदतः ।

तच्चान्यथासिद्धमिति । तच्चेन्द्रियार्थसन्निकर्षस्य सत्तानुविधानं सुखोत्पत्ते-रन्यथा कार्यकारणभावमन्तरेण सिद्धम् ।

अनुविहितभावाभाव इति । अनुविहितौ भावाभावौ यस्य कार्येण स तथा ।

सुखदुःखसमुत्पादेति । सुखदुःखविशेषोत्पादः ।

सुखदुःखतद्बोधान्यत्वे सतीति । सुखं दुखं तयोरनुभवश्चान्यत्र सुखान्त-राद्युत्पादेऽचरितार्था न च सुखाद्युत्पादप्रयोजना इत्यनेन पदेन तद्व्यवच्छेदः ।

बाह्येन्द्रियजन्यत्वे सतीति। अनेन प्रयत्नेच्छामानसविकल्पादिव्यवच्छेदः।

आजानत इति । स्वरूपतः ।

कार्ये इति । सुखादौ ।

तस्येति । इन्द्रियार्थसन्निकर्षस्य ॥

टीयाम् ॥ **संयोगभेदादेवेति** । अन्त्यतन्तुसंयोगात् ।

[631a]**तत्सहितस्य त्विति** । अन्त्यतन्तुसंयोगसहितस्य तन्त्वादेः पुनस्तत्कारणत्वं पटकारणत्वम् ॥

उने । **व्यपदेश** इति पदं व्याख्याति **उदयनो व्यपदिशति** इत्यादिना ।

टीयाम् । **विशेषणविशेष्यभावेनेति** । विशेषणविशेष्यभावात्रगाहीत्यर्थः ॥

उने ॥ **लक्षणविशेषणमेतदिति चेदिति** । विशेषणस्य यल्लक्षणं तस्य विशेषण-मेतत् सदिति, नत्वेतदेव लक्षणमित्यर्थः ।

उदाहरत् । उदाहृतवान् ।

तदेवेति । विशेषणमात्रमेव ।

व्यवच्छेद्यमिति यावदित्यर्थ इति । विशेष्यपदस्यायमर्थो व्याख्यातो विशेष्योपलक्षणयोः संग्रहार्थम् ।

करणताभ्रम इति । करणताभ्रमे हि शब्दप्रमाणकोऽर्थसंप्रत्यय इति स्यात् ।

टीयाम् ॥ तत्सामानाधिकरण्येनेति । तेन शब्देन ।

रूपादीति कर्तृ ।

यत इति । **तस्मादिति ।**

तैरर्थसंप्रत्यय इति एवंविधे **भाष्ये** य इतिशब्दस्तस्य पर्यायस्**तस्मादिति**।

उने ॥ उपाधिः स्यादिति । कारणरूपः ।

उपायत्वनिवृत्तावेव तदपि निवर्तेतेति । उपायत्वनिवृत्तौ सामानाधिकरण्यं निवर्तेतैवेत्यर्थः ॥

टीयाम् । शब्दापकर्ष इत्यादि । शब्दापकर्षेऽर्थोऽपकृष्टस्तावत् प्रतीयते । स च तदैव स्यात् यदि शब्दापकर्षेऽर्थापकर्षः स्यात् । शब्दापकर्षेऽर्थापकर्षश्च तदा यदि शब्देन सहार्थस्य तादात्म्यं स्यात् ।

समधिकः प्रत्यय इति । नामधेयोत्कर्षादौ अर्थस्योत्कर्षादिप्रत्यय इत्यर्थः ॥

उने ॥ न चेदं व्यवहारमात्रमिति । इदं शब्दाप्राशस्त्यादावर्थस्याप्राशस्त्यादिना पारमार्थिकमित्यर्थः ।

दृष्टान्तार्थमिति । यथा षड्जाद्युत्कर्षनिबन्धनो मयूराद्युत्कर्षव्यवहारस्तथा नामधेयोत्कर्षनिबन्धनोऽर्थोत्कर्षव्यवहार इत्येवं दृष्टान्तार्थं षड्जादिष्वित्युक्तमित्यर्थः ।

सिद्धान्ते इति । उत्तरे ।

इत्याहेति । टीकाकारः ।

योग्यतयेति । अबाधितसामानाधिकरण्यरूपया ।

धर्मिणा चेत्यर्थ इति । द्रव्येणेत्यर्थः ।

टीयाम् ॥ अर्थसंप्रत्ययाच्च व्यवहार इति । अर्थसामानाधिकरण्यप्रत्ययात् सामानाधिकरण्यव्यवहारः स्यात् । एतेनार्थसामानाधिकरण्यप्रत्ययोऽबाधित इति ज्ञापितम् । तदितमुक्तम्—ततश्चाविसंवादात् प्रमाणं सन्निति अर्थसम्प्रत्यये इति शेषः ॥

उने ॥ आदिशेषाविति ॥ यदवोचदित्यस्यादौ न चेदमप्रामाणिकमिति शेषः। आद्यः करणेत्यस्यादौ प्रमाणमिति शेषश्चेत्यर्थः।

अनुभव इत्यादिना **उच्चारणेच्छा** इत्यन्तेन **न विनाशब्दभावनाम्** इत्यस्य तात्पर्यमुक्तम्। **प्रयत्न** इत्यादिना च **आद्यः करणविन्यासः** इत्यादेः।

एष एव क्रम इति। प्राग्भवीयशब्दानुभवः संस्कार इत्यादिः ॥

टीयाम् ॥ करणविन्यास इति। करणं प्रयत्नः। तस्य विन्यासस्तथा तथा करणम्।

अस्येति। सविकल्पकमेव ज्ञानमित्यस्य।

सूचितेऽप्यर्थे इति। आलोचनज्ञानलक्षणे।

अव्यपदेश्यपदं योजयति। अव्यपदेश्यतां दर्शयतीत्यर्थः ॥

उने ॥ अनुभूयमानं च भूतलं घटसंभिन्नं भवेदिति। घटाभावे गृह्यमाणे घटस्य स्मर्यमाणत्वादिति शेषः।

अभ्युपेत्येति। अवैषद्यमिति शेषः।

सोऽयमित्यादि। संबन्धग्रहापेक्षार्थं तादात्म्यातिरिक्तं वाच्यवाचकभावं चेदङ्गीकुरुते परः, तदा शब्दार्थानां भेदप्रत्ययः [631b] प्रसज्यते। ततश्च सोऽयं भेदप्रत्ययो भ्रान्तः काल्पनिको भविष्यतीति यदि शङ्कत इत्यर्थः।

शब्दसंभेद इति। शब्दसंभिन्नार्थविषयता।

तद्विषयत्वादिति। सशब्दात्मकोऽर्थो विषयो येषां तद्भावात्।

टीयाम्। इतिकरणः। इतिशब्दः।

ज्ञानपरामर्शप्रधान इति। अस्यार्थस्यायं शब्दो नामधेयमिति स्वरूपोल्लेखेन गृहीतेऽपि शब्दार्थसंबन्धे इत्यर्थः।

तथा चेति। सामानाधिकरण्याभावे सोऽयं डित्थ इत्यत्र पिण्डप्रत्ययः स्यात्, न तु शब्दप्रत्यय इत्यर्थः।

उने ॥ स्वपरतेति। शब्दपरता।

असङ्केतितत्वादिति। तदैव सङ्केतस्य गृह्यमाणत्वेन।

स्वपरोऽपीति। शब्दपरः।

अतदुपाया तद्विषयताया इति । अतदुपायत्वादतद्विषयत्वाच्चेत्यर्थः ।

निर्विकल्पत्वानुपपत्तिरेव । यदि हि शब्दो विकल्पे ज्ञात उपायः स्यात, तदा तेन स्वज्ञानार्थं निर्विकल्पमपेक्ष्येतेति निर्विकल्पमुपपद्येत । यदा तु शब्दोऽज्ञात एवोपायः, तदा तेन ज्ञानानपेक्षैणैव विकल्पो जन्यते इति निर्विकल्पं निरर्थकमेव ।

वक्तव्य इति। निर्विकल्पमङ्गीकुर्वता त्वया न तावच्छब्दः पूर्वं नियमतो भवतिं विकल्पस्येति बालमूकादीनां विकल्पेऽर्थनिश्चये सत्यपि शब्दस्याभावात् ।

शब्दस्मरणपुरःसरत्वमिति । विकल्पस्येति शेषः ।

तत्स्मृतिमिति । महानसस्थदहनस्मृतिम् ।

न चैतावता नियमेनेति । स्मरणपुरःसरत्वनियमेन ।

शब्दस्मरणेति । स्मर्यमाणः शब्द इत्यर्थः । तथा च येन स्मर्यमाणशब्दस्य पिण्डविकल्पं प्रत्युपायत्वेन शब्दस्य वा विकल्पविषयत्वेन तयोः शब्दार्थयोस्तादात्म्यं शङ्केतेति घटते । स्मर्यमाणः शब्द इति व्याख्याने हि शब्दस्योपायता । उपायश्च सन्नेव स्यादिति तादात्म्यशङ्का सूचिता स्यादिति भावः ।

न च प्रयोजनेत्यादि । पटुतरप्रत्यक्षनिश्चितत्वादविकल्पकं न प्रयोजनाप्रतिपत्तिमात्रेण निराकर्तुं शक्यमित्यर्थः ।

अलीकमुत्तरं परस्येति शेषः।

वैधर्म्यस्येति विशेषस्य ।

योग्यप्रमाणबाधितत्वादिति । यदि विशेषणावच्छिन्नं ज्ञानमभविष्यत्, तदा अर्थावच्छिन्नमिव विशेषावच्छिन्नमपि ज्ञानमनुव्यवसायेनाग्रहीष्यत ।

न च गृह्यते इति । योग्यस्य विशेषावच्छिन्नस्यानुपलम्भबाधितत्वादित्यर्थः ।

व्यपदेशव्याख्ययेति । नामधेयशब्देन व्यपदिश्यमानं शाब्दं प्रसज्यत इत्यनया ।

अर्थाद् भिन्नेनापि शब्देनार्थव्यपदेशे को दोष इत्याह—**अन्येनेति** भिन्नेन रूपशब्देन भिन्नस्य रूपार्थस्य व्यपदेशे भिन्नत्वाविशेषात् रूपशब्देन रसोऽपि व्यपदिश्येत, रसशब्देन रूपमपीत्यतिप्रसङ्गः ।

सिद्धान्ती प्राह–**तन्नामधेयत्वादेवेति**। रूपशब्दो रूपार्थस्य नामेति। तेन रूपमेव व्यपदिश्यत इति नियमः **तस्मात् ज्ञेयस्यार्थस्य संज्ञाशब्देने**त्यादि **भाष्ये** स्फुटः।

इत्येतत् विवृण्वन् परिहरतीति भाष्यं विवृण्वन्नित्येतत् परिहरतीति योगः।

परस्य त्विति। प्रयोज्यवृद्धस्य।

परज्ञानमिति। प्रयोजकवृद्धज्ञानम्।

वाचकमुच्चारयतीति। परस्य वाचकज्ञानार्थम्।

कर्णजप्ते इति। स्वरादिरहिते।

अपभ्रंशे गोवी गोणीत्यादिके।

साधुत्वादिभेदवत इति। प्रयोगार्हत्वप्रयोगान[632a]र्हत्वादिविशेषवतः।

अतिप्रसङ्गादित्यर्थ इति। अन्योत्कर्षादिनान्येषामभेदे सर्वस्याभेदप्रसङ्गा-दित्यतिप्रसङ्गः।

यत्कार्ये यस्य संयोगादेः।

यत्कारणम् यस्य शब्दान्तरस्य।

यद्ग्राह्यो येन श्रोत्रेण।

यत्प्रमाणं यत्राकाशे।

यद्विरोधी यस्याद्यशब्दस्य द्वितीयः शब्दो विरोधी, अन्त्यस्य तूपान्त्यः।

यद्धर्म उदात्तादिधर्माः।

यद्रूपो ध्वनिवर्णात्मकः।

विषयभेदानुविधायित्वमिति। तदकार्यत्वादिधर्मविशिष्टविषयग्राहित्वमर्थ-ज्ञानस्य यत् तदेव शब्दात् यत्कार्यत्वादिधर्मविशिष्टाद् भेदग्राहित्वम्।

उक्तधर्माणामित्यादि। यत्कार्यत्वतदकार्यत्वादीनामविरोधे धर्मिपरिवर्तेनापि शब्दार्थयोर्विनिमयेनाप्युक्तधर्माणामुपलम्भाः स्युः। शब्दधर्मा अर्थेऽप्युपलभ्येरन्, अर्थ-धर्माश्च शब्देऽपीत्यर्थः।

कांश्चिदिति। धर्मिपरिवर्तेन धर्मोपलम्भान्।

विषयिविषयनियमप्रसङ्गमुक्त्वेति। श्रोत्रजज्ञानविषयत्वं शब्दस्य धर्मं रूपे प्रसक्तमुक्त्वा कर्मकरणानियमप्रसङ्गमाहेति। श्रोत्रकरणत्वं शब्दस्य धर्मो रूपस्य प्रसज्यते, नेत्रकरणत्वं च रूपस्य धर्मः शब्दस्य प्रसज्यते इत्याह इत्यर्थः।

इतरेतराभाववत्त्वाव्यवहाराभावप्रसङ्गमिति। घटः शब्दो न भवतीत्येवमितरस्मिन् घटे य इतराभाववत्ताव्यवहारः, तस्याभावप्रसङ्गम्।

टीयाम् ॥ **अशब्दोऽभाव इती**त्यादि। घटोऽशब्दः शब्दो न भवतीत्येवं घटोऽभावः शब्दाभावो विवक्षितस्तस्य विपरीतापत्तिर्भावापत्तिः।

स एवास्यार्थ इति। स एव शब्दाभाव एव, अस्य शब्दस्यार्थः॥

उने ॥ **विवक्षितविपरीतमिति।** अनुत्पन्नादौ घटे यः प्रागभावादिसत्ताव्यवहारः तस्माद् विपरीतो भावव्यवहारः प्रसज्यते, अनुत्पन्नादेः शब्दस्य सत्त्वात्।

इतरेतराभावव्यपदेशो विरोधप्रसङ्गमिति। इतरस्मिन् घटे इतराभावः पटाद्यभाव इत्येवं योऽभावव्यपदेशः स विरुद्धः प्रसज्यते, अभावस्य शब्दत्वेन सत्त्वात् भावव्यपदेशापत्तेः। शब्दार्थयोस्तादात्म्ये शब्दस्य यद् भावस्वरूपत्वं तदभावस्याप्यर्थस्य स्यात्। ततोऽभावव्यवहाराभावव्यपदेशौ न स्यातामिति समुदायार्थः।

अर्यमाणतयेतीति। अत्रेन्द्रियस्य सन्निधानादिन्द्रियेणार्यमाणोऽर्थ इति व्याख्यानादित्यर्थः।

अमी इति। घटादयः।

अन्यविषयेति। पटविषयः।

अतदर्था एवेति। अनिन्द्रियार्था एव पटज्ञानस्य पटविषयत्वेन घटादीनामिन्द्रियजन्यज्ञानाविषयत्वात्।

तदपेक्षयेति। इन्द्रियगतिज्ञानापेक्षया। न हि तदर्था इन्द्रियार्था ऐन्द्रियकत्वेन प्रसज्यमानस्येन्द्रियगतिज्ञानस्य इन्द्रियगतिमात्रविषयत्वेन घटादीनामिन्द्रियजन्यज्ञानाविषयत्वात्। तस्मात् यदर्थविषयं ज्ञानं यदि तस्यैवार्थस्येन्द्रियेण सन्निकर्षो भवति, तदा तज्ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणतात्पर्यम्, न चेदमिन्द्रियगतिज्ञाने। तद्धि इन्द्रियगतिविषयमस्ति। न त्विन्द्रियगतेरिन्द्रियेण सन्निकर्ष इति।

अप्रसक्तेऽपीति। इन्द्रियगत्यनुमानस्य प्रत्यक्षत्वेऽप्राप्तेऽपि।

सत्तामभिप्रेत्येति । सत्तानिवृत्त्यर्थम्, न तु लिङ्गनिवारणाय मात्रग्रहणम्।

तत्कालेति । धूम[632b]कालः ।

प्रतियोगिज्ञानेति । घटस्मरणम् ।

प्रतियोगिन इति । न घटस्य कालानुविधानम् ।

गतिद्वयवाद इति । यदि लिङ्गज्ञानमात्रं लिङ्गनिरपेक्षं प्रमाणं स्यात, तदा ज्ञानस्याज्ञायमानस्यैव प्रमाणत्वे न किञ्चित् प्रमाणं चक्षुराद्यज्ञानं किञ्चिच्च लिङ्गादिज्ञानमिति ज्ञाताज्ञातत्ववादः प्रमाणानां न स्यात् ।

न ह्यनुमेयस्येन्द्रियेण सन्निकर्षादिति वदता हीति । अनुमेयस्येन्द्रियगतिरूपस्य इन्द्रियेण सन्निकर्षः । तस्मान्न ह्यनुमानं भवतीति वदता **वार्त्तिककृता** इत्यर्थः ।

यस्य इति । अर्थस्य घटादेः ।

तज्ज्ञानमिति । इन्द्रियज्ञानम् ।

असौ अर्थः ।

यस्त्विति । इन्द्रियगतिरूपः ।

तदर्थविषयमेवेति । इन्द्रियार्थविषयमेव ।

तद्व्यावर्त्त्यस्येति । अध्याहारव्यावर्त्यस्य, अन्यथैव **टीको**क्तप्रकारेणैव व्यावर्तितत्वात् । [1]इन्द्रियजन्यज्ञानविषयेऽर्थे इत्येवमर्थस्य व्याख्यायां तद्व्यावर्त्यस्याप्रसक्तेश्च ।

तदनुवर्तनीयमिति । सामान्यलक्षणम् ।

नन्वव्यभिचारिपदं कथं प्रमाणपदमुच्यत इत्याह— **प्रमाणस्यैवेति ।**

तत्रेति । तत्पूर्वकं त्रिविधमनुमानमित्यत्र ।

उक्तरूपे इति । इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिनोक्तलक्षणे द्वे प्रत्यक्षे पक्षधर्मताव्याप्तिग्राहके ॥

---

1 S °जन्य ज्ञानविषयोऽर्थे

एवंभूतप्रत्यक्षद्वयेति । उक्तलक्षणाविकल्पसविकल्परूपः । प्रमाणपदं कर्तव्यमिति शेषः ।

अनुमानवदिति । व्यतिरेकिदृष्टान्तोऽयम् । यथानुमानेऽव्यभिचारसिद्ध्या फलसिद्धिः तथा न प्रत्यक्षे । यथा न प्रत्यक्षे तथा न शब्देऽपि । अतस्तदवबोधार्थमनुमानाद् विशेषज्ञापनार्थम् ।

तत्रापि । शब्देऽपि ।

अयं च नियम इति । प्रत्यक्षे फलाव्यभिचारेत्यादिनोक्तो नियमः स्यादिति संबन्धः ।

प्रत्यक्षमुन्नीयत इति । इन्द्रियादिस्वरूपेणापि फलेनैवानुमीयते ।

उत्पत्तिज्ञप्तिभ्यां नियमद्वयं श्लिष्टमाहेति । प्रत्यक्षाव्यभिचारादेवानुमानाद्यव्यभिचारस्योत्पत्तिर्ज्ञानं चेत्येवमनुमानाव्यभिचारविषयाभ्यामुत्पत्तिज्ञप्तिभ्यां यदव्यभिचरितप्रत्यक्षस्य नियमद्वयमुत्पादकत्वप्रत्यायकत्वलक्षणम्, तत् कारणशब्देन श्लिष्टेन श्लिष्टमाहेत्यर्थः ।

उत्पादकं प्रत्यायकं चेति । मूलभूताव्यभिचरितप्रत्यक्षं हि अनुमानं स्वसाध्याव्यभिचरितमुत्पादयति ज्ञापयति च ॥

टीयाम् । **व्याप्तिग्रहणदोषेणेति** । व्याप्तिव्यभिचारेणेत्यर्थः ।

उने ॥ **उत्पत्तौ ज्ञप्तौ चेति** । प्रत्यक्षाव्यभिचारादेव वक्तर्यागमाव्यभिचारोत्पत्तिः । वक्तृप्रत्यक्षाव्यभिचारादेव च श्रोतर्यागमाव्यभिचारज्ञानमित्येवमागमस्यापि स्वाव्यभिचारस्योत्पत्तौ ज्ञप्तौ च प्रत्यक्षापेक्षा ।

टीयाम् ॥ **तन्मूलमिति** अनुमानादीनां मूलम् ।

उने ॥ **अयमर्थ** इति नियमलक्षणः ।

सोऽयमिति । अव्यभिचारिपदोपादानलक्षणः ।

इहेति । **सूत्रे** ।

इहैवेति । प्रत्यक्ष एव ।

तद्ग्रहायेति । अव्यभिचारग्रहाय ।

स एवार्थ इति। **भाष्यवार्त्तिको**क्त एव व्यभिचारव्यावृत्तिमात्रलक्षणः। अन्यथार्थदर्शनस्वभावस्य चोत्पत्तिरिति व्यभिचार इति योज्यम्।

अनियतस्येति। द्विरूपस्य।

नो खल्वित्यादि। उत्तरमिदम्।

अनु[633a]**भयात्मक** इति। अस्थाणुपुरुषात्मके।

सोदर इति। अभीष्टः।

न ह्यर्थे शब्दाः सन्तीत्यादि वदता यदि अर्थे शब्दाः स्युः, तदा अर्थज्ञानं शब्देन योजयितुं शक्येतेत्ययमर्थः **टीकाकृता** विवक्षितः। तस्य तात्पर्यं वदन् योजयति—**अभिधानाभिधेयेत्यादि**।

तन्निरपेक्षेति। ग्राह्याकारनिरपेक्षः।

ज्ञातृत्वादिरिति। ज्ञाताहमित्येवं यथा ज्ञानसामानाधिकरण्येन ज्ञातृत्वं प्रतीयते, न तथा शब्दोऽहमित्येवमित्यर्थः।

तस्मादर्थादित्यादे**र्नाभिलाप**मित्यन्तस्य **टीका**शकलस्य व्याख्या—**तस्मादिदमि**त्यादिना। ज्ञानमित्यस्य पर्यायो विकल्परूपम्।

स्वकारणादित्यादि। स्वकारणादीदृशं जातं यदस्य किञ्चित् कारणं किञ्चिचा-कारणमपि विषयः।

साकारवादसिद्धाविति। **सौत्रान्तिक**मते।

विकल्पकाले तदभावादिति। उच्चारकाधीनत्वात् शब्दस्य।

निराकारपक्षेऽपीति। **वैभाषिक**मते।

इन्द्रियान्तरविषये इति। श्रोत्रविषये शब्दे आकाराधायको यत्रेन्द्रियं नियतसामर्थ्यं स एव विषयोऽन्यथा अतिप्रसङ्ग इति वदता **उदयने**न कारणमकारणं वा कश्चिदेव विषय इति परोक्तं निरस्तम्।

विपर्यये इति। अर्थसामर्थ्यसमुत्थत्वे।

तस्येत्यर्थ इति। अर्थस्य।

दृश्यतयैवेति। साक्षात्कारतया।

विकल्पेष्विति स्मरणादिषु पुरस्कारो भेदाग्रहो वा।

तद्धेतुको भेदाग्रहहेतुकः।

आरोपे चेति[1]। स्वव्यापारं दर्शनव्यापारेण सह भिन्नमगृहीत्वा स्वव्यापारे दर्शनव्यापारमारोप्य चेत्यर्थः।

तदनुगतत्वमिति। स्वतन्त्रसाधने यत् तदनुगतत्वमित्यस्ति तस्येदं ग्रहणं न तु प्रसङ्गस्थस्य।

पूर्वोक्तस्मारणेनेति। न ह्यर्थे शब्दाः सन्तीत्यस्य स्मारणम्।

असंबद्धरूपानुकारे त्वित्यादेष्टीकाखण्डस्य व्याख्या **तादात्म्यतदुत्पत्तिभ्यामि**त्यादिः। अस्यैदम्पर्यम्। अर्थे शब्दो नास्त्यतोऽर्थोद्भवस्य ज्ञानस्य न शब्द उत्पादकोऽनुत्पादकश्च। कथं स्वरूपानुकारकः? अथानुत्पादकोऽपि स्वरूपानुकारक इष्यते तदा अनुत्पादकत्वाविशेषात् सर्वार्थानां स्वरूपानुकारत्वप्रसङ्गेन सर्वेषां सर्वज्ञत्वं स्यात्, तदा ह्यनुत्पादकोऽपि स्वरूपानुकारको विषय इति विषयलक्षणापत्तेरिति।

तादात्म्यतदुत्पत्तीत्यादि। अस्मादर्थादुत्पन्नं ज्ञानमित्युक्तिः सत्तामात्रेण न विषयिविषयभावे उपयुज्यते। किं तर्हि? अस्मादर्थादुत्पन्नं ज्ञानम्, अतोऽयमेवार्थोऽस्य ज्ञानस्य विषय इति नियमयन्तीत्यर्थः।

एतन्नियमेनेति। नियतानित्यर्थः।

अनुगमगोचर इति। अनुगतप्रत्ययविषयः।

अकुर्वद्वीति। शीतापनोदनमकुर्वदौष्ण्यम्।

आरोपितं [2]**चेति**। अन्यथा गृहीतम्।

शब्दकल्पनोल्लिखितमित्यादि। अवस्त्वेव वस्त्वाभासं शब्दकल्पनयोल्लिख्यते इत्यर्थः। एतच्चारोपितत्वात् न शीतापनोदं करोतीति घटते।

न सुकरसङ्केत इति। स्वतन्त्राणां जात्यादीनामग्रहणादेव।

तथा चेति। सङ्केतस्यासौकर्ये।

न संसृष्टवेदनमिति। न जात्यादिविशिष्टद्रव्यप्रत्ययः।

---

1 J वेति 2 J वेति

एतेनेति । सङ्केतस्य दुर्निरूपणत्वेन ।

वस्तुत्रयेति । सामान्यविशेषतद्वद्रूपत्रयम् ।

ननु न ह्येकेत्यादि । केचिदङ्गुल्यावेकविज्ञानविषयौ समानकाले न कार्यकारणभूते इत्यतो [633b] [1]कांचिदङ्गुल्यौ नियतपूर्वापरत्वे अपि सर्वज्ञैकविज्ञानस्य गोचरौ सत्यौ न तथा न कार्यकारणभूते इति वक्तुं न हि युक्तम् ।

दोषमाह—**न हीति** । एवं हि उपलब्धिभेदाभेदप्रयुक्ते कारणाकारणत्वे स्याताम्, न चैवम् । न हि भिन्नविज्ञानविषयो घटः पटस्य कारणम् । न च सर्वज्ञैकविज्ञानगोचरयोर्नियतपूर्वापरत्वयोरङ्गुल्योर्न पूर्वा कारणमुत्तरस्याः । तस्माद् ये अप्यङ्गुल्यावेकविज्ञानविषयौ न कार्यकारणभूते, तेऽपि नैकज्ञानविषयत्वात्, किं तु समानकालत्वात् । अतएव समानकाले इति पदम् । ततश्च सर्वज्ञैकविज्ञानगोचरत्वेऽपि यथा नियतपूर्वापरत्वयोरङ्गुल्योरपेक्षणीयापेक्षकत्वे सति कार्यकारणभावः, तथैकज्ञानगोचरत्वेऽपि अनयोरवच्छेद्यावच्छेदकभावे विशेषणविशेष्यभावो भविष्यतीत्यर्थः ।

स्वरूपत इत्यादि । यत् स्वरूपयोः पौर्वापर्यं नियतम्, तयोः स्वरूपतः पौर्वापर्यनियमो यज्ज्ञानयोश्च पौर्वापर्यं नियतं तयोः ज्ञप्तितः पौर्वापर्यनियमः ।

स चायमित्यादि । अङ्गुल्योरिव परमार्थसद्वस्तुत्रये एकज्ञानविषयत्वात् न ज्ञाप्यज्ञापकभावः । समानकालत्वाच्च न कार्यकारणभावः । तयोरभावे च न विशेषणविशेष्यभाव इत्यर्थः ।

ननु क्षणक्षयित्वाद् भावानामाधाराधेयवार्तापि न संभवतीत्याह—**क्षणभङ्गस्त्विति** । क्षणभङ्गस्त्वयाप्यधुना स्थापयिष्यते, मयाप्यधुना निराकरिष्यते इति त्वया क्षणभङ्गद्वारा न प्रत्यवस्थेयम् । मया च तदभावद्वारा न प्रत्युत्तरणीयमित्यर्थः ।

तीर्थिकैरिति । **नैयायिकैः** ।

उपजनापायेति । यथा वदरसंबन्धिनो गुरुत्वप्रतिबन्धकसंयोगरूपस्य धर्मस्योत्पत्तिर्गतिलक्षणस्य च विनाश उपकारः कुण्डेन वदरे क्रियते न तथा जात्यादीनां कस्यापि धर्मस्योत्पत्तिविनाशाभ्यां द्रव्येणोपक्रियते इत्यर्थः ।

सन्नित्यनेन । सन्नित्यनेनाकारेण ।

---

1 Mss indistinct

एते इति । द्रव्यादिविकल्पाः ।

यस्य दर्शन इति । यस्य **नैयायिक**स्य मते ।

परे इति । **नैयायिकाः ।**

उपाध्युपाधिमद्भेदाच्चेति । उपाधयो ह्युपाधिमतो भिन्ना इत्येकोपाधिविशिष्टस्य ग्रहेऽप्यन्योपाधिविशिष्टस्याग्रहात् तद्ग्रहाय विकल्पान्तरोपपत्तौ न पौनरुक्त्यम् । न पुनः **सौगता** इत्युपपादयितुं शक्ता इति योगः ।

तस्येति । सामान्यस्य ।

तदायत्ताविति । विषयायत्तौ ।

अत्र त्विति । सविकल्पके ।

टीयाम् ॥ न च यदेवेति । इन्द्रियं कर्तृ ।

उने ॥ ततश्च स एवार्थोपयोगोऽविशिष्ट इत्यर्थ इतीदं **स पश्चादप्यजनक** इति **टीका**खण्डस्य व्याख्यानम् ।

टीयाम् ॥ तदिति । अक्षम् ।

उने ॥ वासनाभावेऽपीति । अनुभवोत्थसंस्काराभावेऽपि ।

टीयाम् ॥ द्रव्यकल्पनापीति । प्रत्येतीत्यनेन योगः ।

लौकिकीं स्थितिमिति । न हि भवति पुरुषो दण्ड इत्यादिकाम् ।

एतदिति विशेषणादि ।

तथेति । विशेषणत्वादिना ।

एतन्न संभवत्येवेति । जात्यादीनां विवेकेनाग्रहणात् सङ्कलनमेव न संभवति, दूरेऽस्तु विशेषणादितया प्रत्यय इत्यर्थः ।

उने ॥ तदिति । अन्वयव्यतिरेकानुविधानम् ।

तयोरिति । इन्द्रियार्थयोः ।

तथा सतीति । अन्यनिरपेक्षस्यालोचनस्य विकल्पं प्रति कारण[त]ाभ्युपगमे । तस्मा[634a]दालोचनान्न कदाचिदप्यालोचनं जायेतेति कारणसामग्रीपूर्तौ कार्यस्यावश्योत्पादेन विकल्पस्यैवोत्पत्तेः ।

वासनेत्यादि । वासनापरिपाकेन हि विकल्पो जन्यते । केवलं चालोचनं वासनापरिपाकाभावान्न तथा नालोचनानुत्पादकमिति यदि तर्हि स वासनापरिपाको यदि इन्द्रियार्थसापेक्ष एव विकल्पजनकः, तदा इन्द्रियार्थापेक्षा विकल्पस्यायातैव । अथ इन्द्रियार्थसन्निधिर्वासनापरिपाकस्य काकतालीयः कादाचित्क इन्द्रियार्थनिरपेक्ष एव जनक इत्यर्थः, तदा कदाचित् विशिष्टात् वासनापरिपाकात् स्मृत्यादिविकल्पोऽपि साक्षात्कारवानुत्पद्येत । इन्द्रियार्थापेक्षानपेक्षाधीनत्वात् निर्विकल्पापेक्षानपेक्षयोरिति वासनापरिपाकस्य न ते विकल्पिते ।

ननु विकल्पस्यार्थसाक्षात्कारवत्त्वेऽनन्यथासिद्धे इन्द्रियार्थजत्वमनन्यथासिद्धं स्यात्, अर्थसाक्षात्कारवत्त्वमेव त्वस्यान्यथासिद्धमित्याह—**न वै कश्चिदिति ।**

तद्धर्म इति । विकल्पधर्मः ।

कालभेदस्येति । यथा विकल्पो भविष्यंस्तथाऽविकल्पोऽप्यतीत इति कालभेद उभयत्रापि तुल्यः ।

समान इति । उभयनिष्ठत्वात् ।

अप्रतिसंक्रमादिति । मतद्वयेऽप्यसतः कार्यस्योत्पादाभ्युपगमात् ।

अनियम इति । काल्पनिकस्य संक्रमस्योभयत्रापि सुकरत्वात् ।

तथोत्पद्यत इति । साक्षात्कारवानुत्पद्यते ।

तथात्वं साक्षात्कारवत्त्वम् । कथमौपाधिकम् ? उत्पन्नत्वादेव ।

तावन्मात्रादेवेति । आलोचनमात्रात् ।

तदुपाधिकमिति । आलोचनोपाधि[1]कमविकल्पस्य साक्षात्कारवत्त्वम् ।

असाक्षात्कारानुत्पादप्रसङ्ग इति । धूमादिसाक्षात्काराद् वह्न्यादेरसाक्षात्कारो न स्यादित्यर्थः ।

असाक्षात्कारिण इति । समनन्तरप्रत्ययान्[2] ।

एवमपीति । साक्षात्कारिणोऽप्यसाक्षात्कारोऽसाक्षात्कारिणोऽपि साक्षात्कारश्च ।

तर्हीति । सहकारिविशेषाद् यदा कार्यविशेषोऽभ्युपगतस्तदा ।

---

1 S °कं सवि° 2 S °त्ययात्

एवं तावदित्यादि । उक्तरीत्या तावदर्थसाक्षात्करणं व्यवस्थितम् । तच्चेन्द्रिय-सामर्थ्यसमुत्थत्वमन्तरेण न स्यादिति तदपि व्यवस्थितम् ।

प्रतीयमानोऽप्यौपाधिक इति । यथा जले वस्तुतोऽगन्धे सौरभं प्रतीय-मानमपि औपाधिकं संभाव्यते, तथा वस्तुतो विसंवादिनि विकल्पे अविसंवाद औपाधिकः संभाव्यते ।

अननुगतमेवेति । देशकालाकाराननुयायि स्वलक्षणमेवानुगततया देशकाला-कारानुगतत्वेन ।

असाधारणस्येति । यथा रजतज्ञानं शुक्तिविषयमेव सत् रजतमादर्शयति, न तथा विकल्पः स्वलक्षणविषयः सन् सामान्यमादर्शयति, स्वलक्षणासंस्पर्शित्वाङ्गीकारात् ।

तज्जन्यत्वप्रसङ्ग इति । यथा रजतज्ञानं शुक्तिजन्यमेवं विकल्पोऽपि स्वलक्षण-जन्यः प्रसज्यते ।

अजनकस्यैवेति । यदि तु वस्तुसतः स्वलक्षणस्याजनकस्यैव विकल्पं प्रति विषयत्वमङ्गीक्रियते, तदा यत् प्रत्यक्षं तदर्थसामर्थ्यसमुत्थमिति व्याहन्यतेऽनेनैव साधित-प्रत्यक्षत्वेन विकल्पेन व्यभिचारात् ।

विकल्प्यते इति । विकल्पेन गृह्यते ।

तस्मादिति । असाधारणोल्लेखाभावाद् विकल्पस्तदसमर्थं समर्थमिव दर्शयतीत्य-भ्युपगम्यम् ।

नन्वेवमपि विकल्पोऽसमर्थे समर्थमुपचरत्येवेत्याह—**इवार्थश्चेति**। उपमानं समर्थः।

तत्र इति । असमर्थे ।

विकल्पार्थस्य इति । असमर्थस्य ।

ननु तत्त्वान्तरमिति । असाधारणं रूपम् ।

तस्य [1]चेति । असमर्थव्यावृत्तिमात्रस्य ।

तथा चेति । यदि हि [634b] सामर्थ्यमसाधारण्यमेवोच्येत, तदा तदारोपे असाधारणोल्लेखेन साधारणप्रधानं स्यात् । यदा तु सामर्थ्यमसामर्थ्यव्यावृत्तिमात्रमुच्यते, तदा तदारोपेऽपि अविरोधादसामर्थ्यं सामर्थ्यात्मकं प्रथत एवेत्यर्थः ।

---

१ वेति J

यद् यतो विरुद्धमिति । शुक्तिकायां शुक्लभास्वरत्वादिवत् ।

तस्मादिति । आरोपाघटनात् विकल्पाद् या प्रवृत्तिः सा अविकल्पेन भेदाग्रहादभ्युपेयत्वेऽप्यनारोपादित्यर्थः ।

स्वप्रतिभासे इति पदमवस्थाप्या**नर्थे** इति पदं विकल्प्य दूषयति–**अनर्थत्वं हीत्यादि** । किं विकल्पादभिन्नो विकल्प्यो ग्राहकाभिन्नत्वेनाग्राह्यत्वादनर्थोऽपि यत्रार्थत्वमध्यवस्यति विकल्प आहो आलोचनीयात् स्वलक्षणाद्भिन्नो विकल्प्योऽर्थाद् भिन्नत्वेनानर्थः ?

नाद्यः न तावदिति । विकल्प्यो वस्त्वसन् कल्पनया वस्तुसत्या सहाभिन्नो न संभवत्येव । तत् कथं योऽयं भिन्नस्योल्लेखः स आरोप इति स्यात् ?

नापि द्वितीयः । **आलोचनीयादिति** । आलोचनीयाद् यद्यपि विकल्प्यो भिन्नः प्रथते, परमसौ भिन्न एव प्रथते नाभिन्न इति कथं तस्याप्यारोपः ?

अथावस्थापितं **स्वप्रतिभास** इति पदं दूषयितुमुपस्थापयति–**स्वप्रतिभास** इति । अनर्थे न ह्यलीके, किं तु स्वप्रतिभासे इत्यभ्युपगमात् नानन्तरो दोषः ।

दोषाभावप्रकारमाह—**स खल्विति** ।

विज्ञाननयमिति । केवलं ज्ञानमेव न बाह्यं किञ्चनेति **योगाचार**मतम् ।

साधारणाकार इति । विकल्पज्ञानस्य सत्त्वेनासाधारणत्वात् ।

असदुल्लेखे त्विति । यदि तु विकल्पो यथा स्वाकारमसाधारणमेव बाह्यतयोल्लिखति, तथा साधारण्यमपि सर्वथा असदेवोल्लिखतीत्यभ्युपगम्यते, तदा विकल्पोऽलीकालम्बन इत्यायातम् । तत्र चालीकालम्बनत्वे आरोपसंभावनैव नास्ति, तथा हि कल्पनालम्बनस्यासत आरोपोऽयमेव यद्भिन्नतयोल्लिखनम् । स चाभेदे सति स्याद् विकल्पेन च । वस्तुमता असत आलम्बनस्याभेदो न संभवत्येवेत्युक्तं प्राक् ॥

आकारिणमिति । विकल्पानाम् ।

तादात्म्याभ्युपगमादिति । आकाराकारिणोः ।

विकल्पात्मनामिति । अयं घट इति पूर्वापराणां विकल्पस्वरूपाणां भेदावसायेऽपि नाकाराणां भेदावसायो विकल्पस्वरूपेभ्यो व्यतिरिक्तानां बाह्यतयारोपादेव ततस्तदेकतया आकाराणामेकतया अनुसन्धानमित्यर्थः ।

तथेतीति । विकल्पात्मत्वेन विकल्पाभिन्नत्वेन प्रतीयेत कथं बाह्यत्वेनारोप्येत तस्माद् विकल्पस्यात्माप्याकारो भिन्नो बाह्यतयारोपित इति यदुक्तं तद्विरुद्धमित्यर्थः ।

ननु विकल्पात्मन आकारस्य बाह्यत्वेनारोपस्तदा न स्यात्, यद्यस्य तादात्म्यप्रतीतिः स्यात् सैव तु न भविष्यतीत्याह—**तादात्म्येति ।**

सर्वैरेवेति । अनभ्युपगमादिति योगः ।

अवगतं त्विति । तादात्म्यम् ।

भेदापत्तिरिति । विकल्पो निश्चितस्तादात्म्यं त्वनिश्चितमिति तादात्म्यं भिन्नमेव प्रसज्येतेत्यर्थः ।

व्यावृत्त्योरिति । नन्वविकल्पव्यावृत्त्यतादात्म्यव्यावृत्त्योर्भेद एव न तु वस्तु निर्विकल्पात्मनि आकारे ।

तथा चेति । व्यावृत्त्योर्न किञ्चित्त्वेनाकारस्य विकल्पात्मत्वनिश्चयाद् बाह्यत्वा-रोपाभावे ।

अस्येति । विकल्पस्य ।

यथा विषयमात्रमिति । सदसद् वा ।

प्रामाण्यमिति । प्रमात्वम् ।

प्रसङ्गहेतुरिति । प्रसङ्गस्य विपर्ययफलस्य[1] विपर्यय एव [635a] प्रत्यक्षा-दिबाधा संभवतीति विपर्ययसाधको हेतुरित्यर्थः ।

तदर्थस्येति । विकल्पविषयस्य जात्यादेः ।

तन्निराकरणसिद्धयैवेति । जात्यादिनिराकरणं सिद्धं मन्यमान इत्यर्थः ।

एतेनेति । प्रसङ्गनिराकरणेन **टीको**क्तेन विपर्ययोऽपि यदभिलापकल्पनानुगत-मित्यादिः **टीको**क्त एव ।

अविद्यमानशब्दालम्बनत्वादिति । विकल्पज्ञानस्येति योगः ।

किं नाम योजनात्मके इत्यादि किं यो नाम योजनात्मको विकल्पः तत्र शब्दार्थयोर्बाह्यकेन्द्रियग्राह्यता प्रसज्येत येन बाह्येन्द्रियेण नाम योजनात्मकेऽर्थे विकल्पो जन्यते तेनैवेन्द्रियेण शब्दोऽपि ग्राह्यः प्रसज्यते इत्यर्थः । एवमग्रेऽपि ज्ञेयम् ।

---

१ फलश्च S

नाम्नो विशेषणत्वेति । नाम विशेषणात्मको विकल्पो नाभ्युपगम्यत एवेत्यर्थः ।

तच्चेति । उपलक्षणत्वम् ।

इन्द्रियान्तरोपनीतस्यापीति । मनःप्रभृतीन्द्रियान्तरेण गृहीतस्यापि ।

ऐन्द्रियके विकल्पे नामस्फुरणमिति । नाम्न ऐन्द्रियकविकल्पविषयत्वमित्यर्थः ।

नोपयुज्यते इति । यदा हि शब्द उपलक्षकत्वात् तटस्थ एव मनःप्रभृतीन्द्रियान्तरेण गृहीतोऽर्थावच्छेदकः सिद्धः, तदा शब्दस्यैन्द्रियकविकल्पविषयत्वेन किं साध्यमित्यर्थः ।

तद्ग्रहणस्येति । शब्दग्रहणस्य ।

इन्द्रियजविकल्पोत्पादं प्रतीति । न कश्चिदुपयोग इत्यनेन योगः ।

सङ्केतसमयवर्त्यवस्थास्मरणे सहकारिण्युच्यमाने बालमूकानामैन्द्रियविकल्पो न स्यादित्याह—**पूर्वावस्थेति ।**

विषयमित्यर्थ इति । निवेशशब्दस्य तात्पर्यमिदम् ।

प्रत्येकमसमर्थेष्वित्यादि । प्रत्येकमजनकेष्वपि येषु क्षितिबीजादिषु गुणः कार्यं संभाव्यते संहतौ अतिशयपरम्परोत्पादेन सामग्रीमध्यासीनानामित्यर्थः । तेषामेव हेतुता जनकता न तु शिलाशकलादीनाम् । एतेन य एव क्षित्यादयो जनकास्त एव जनकाः, न तु शिलाशकलादय इत्युक्तमिति न्यायेन प्रकृते नास्ति कश्चिद् विरोध इति योगः । तथा हि, यदेवेन्द्रियमजनकं सदतिशयपरम्परोत्पादेन पूर्वावस्थादिसहकारिमध्यमध्यास्ते तदेव विकल्पजनकं नेतरदिन्द्रियमिति ।

परस्पराधिपत्यमिति । सहकारित्वम् ।

किं प्रतिपत्त्यनुबन्धिनो व्यापारानुबन्धिनो वेति । इन्द्रियसंस्कारजयोः प्रतिपत्त्योर्भिन्नविषयत्वादिन्द्रियसंस्कारयोः किं न सहकारिता, किं वेन्द्रियसंस्कारजयोर्व्यापारयोर्भिन्नविषयत्वादित्यर्थः ।

तथाविधविषयभेदेऽपीति । प्रतिपत्तिकृतविषयभेदे सत्यपि ।

द्वितीयस्त्वसिद्ध इति । इन्द्रियसंस्कारजयोर्व्यापारयोर्भिन्नविषयत्वं नास्त्येवेत्यर्थः ।

तस्येति । व्यापारयोर्भिन्नविषयत्वाभावस्य कार्येण विकल्पज्ञानेन कर्त्रा यदनुविधीयमानतामात्रं तेनोन्नेयत्वात् इन्द्रियसंस्कारजव्यापारयोर्भिन्नविषयत्वाभावे सत्येव भवता विकल्पेन व्यापारयोर्भिन्नविषयत्वाभावो लभ्यत एव यत इत्यर्थः ।

उभयवादिसिद्धमिति । गन्धज्ञानचाक्षुषप्रतिपत्त्योर्भिन्नविषयत्वेऽपि गन्धज्ञानचक्षुषो रूपज्ञानं प्रति सहकारित्वमङ्गीकुर्वता **बौद्धे**नापि गन्धज्ञानचक्षुर्जयोर्व्यापारयोर्भिन्नविषयत्वाभावो[635b]ऽभ्युपगतोऽन्यथा रूपज्ञानमेव न स्यादिति इन्द्रियसंस्कारयोः प्रतिपत्तिकृतविषयभेदे सत्यपि सहकारित्वं व्यापारकृतविषयभेदाभावश्चोभयोरपि वादिनोः सिद्धमित्यर्थः ।

अन्यविषय इति । पुरोवर्तिविषयः ।

अन्यत्र क्रियेति । अतीतावस्थाविषयः प्रतिभासः ।

समनन्तरप्रत्ययास्त्वित्यादि । इन्द्रियसंस्कारौ प्रतिपत्तितोभिन्नविषयौ तथोक्तरीत्या व्यापारतोऽपीत्यनयोर्न सहकारिता समनन्तरप्रत्ययः पुनः प्रतिपत्तितो गन्धविषयोऽपि व्यापारतो रूपविषय इत्यभिन्नव्यापारविषयत्वाद् रूपविषयव्यापारं चक्षुरपेक्षते ।

समनन्तरप्रत्ययस्य व्यापारतो रूपविषयत्वमेव समर्थयते—**न हीति** ।

सहकारिभेदादेवेति । न स्वभावत इत्येवकारार्थः ।

तथा सतीति । स्वभावादेव भिन्नविषयव्यापारत्वे ।

तस्मात् केवलस्येत्यादि । यथा त्वन्मते केवलस्य गन्धज्ञानस्य गन्धविषयव्यापारस्यापि रूपविषयव्यापारचक्षुःसहकारिवशाद् रूपं व्यापारविषयः तथा रूपविषयव्यापारस्यापि चक्षुषः पूर्वावस्थाविषयसंस्कारसहकारिवशात् पूर्वावस्थावानेव पुरोवर्तिव्यापारविषयः । एतेन द्वितीयस्त्वसिद्धः, तस्य कार्येणानुविधीयमानतामात्रोन्नेयत्वादिप्रागुक्तमेव द्रढितम् ।

तत्संबद्धत्वमेवेत्यादि । यः संबद्धः, स व्यापारविषय इति व्याप्तिः, यो व्यापारविषयः, स संबद्ध इति व्याप्तिर्वा इत्यर्थः ।

प्रधानव्यापारेति । च्छिदादिः ।

अवान्तरव्यापारेति । उद्यमनादिः ।

सा चेति । अवान्तरव्यापारविषयता । प्रकृते त्विन्द्रियसन्निकर्षविषयता ।

तामपीति । प्रधानव्यापारविषयताम् ।

अस्यापीति । संयुक्तविशेषणत्वस्य ।

विद्यमानधर्मविषयैवेति । पूर्वावस्था यद्यपि भावरूपो धर्मस्तथाप्यतीत इति न तत्र संबन्धान्तरगर्भो विशेषणविशेष्यभाव इत्यर्थः ।

सूचीकटाहन्यायेनेति । यथा सूचीं कुरु कटाहं चेत्युक्ते अल्पप्रयास-साध्यत्वात् पूर्वं सूचीमाधत्ते, तथेहाप्यल्पव्याख्येयत्वात् पूर्वं [1]विरुद्धधर्माध्यासं व्याचष्टे ।

तावदस्तीति । तदित्युल्लेख इति योगः ।

तस्य चेति । प्रतिसन्धानज्ञानस्य ।

परेणापीति । **बौद्धेन** ।

तदेवेति वस्तु[2]स्थैर्यव्यवस्थापकं प्रतिसन्धानज्ञानम् ।

पर इति । **नैयायिकः** ।

अस्माकं । **बौद्धानाम्** ।

किं त्विति । परं तदनेकमालम्बनं विकल्पे प्रतिसन्धानात्मके न स्फुरत्येव ।

पराभिप्रायगोचर इति । प्रतिसन्धानज्ञाने यदेकत्वमस्ति तन्नानावस्था-विशिष्टपारमार्थिकैकविषयतया **नैयायिकेन** अभिप्रायीकृतम् ।

तच्चेति । एकत्वम् ।

न हि तदित्युल्लेखादेवेति । न हि तदित्युल्लेखि परोक्षमिति परोक्षलक्षण-मित्यर्थः ।

अपसिद्धान्तप्रसङ्गादिति । न हि निर्विकल्पकमिदमास्पदम् ।

अनुभूतावस्थेति । यदनुभूतावस्थाविशिष्टविषयं ज्ञानं तत् तदित्युल्लेखि । यत् पुनः सन्निहितविषयं तदिदमित्युल्लेखि स्यात् ।

---

१ विरुद्धं S २ °स्थैर्यं S

सोऽयं विषयकृतो इति। न तु स्वरूपतः। तथा सति प्रत्यभिज्ञानस्यापरोक्षैकस्वभावत्वात् न कश्चिद् विरोध इत्यर्थः॥

तत्र च विशेष्ये परोक्षत्वमेवास्य प्रतिसन्धानस्य।

नानादिग्देशसंबन्ध इति। स्वलक्षणस्य।

प्रतिवन्दी कर्तव्य इति। यदि कालभेदेन विषयो [636a]भिद्यते, तदा दिग्देशभेदेन स्वलक्षणमपि त्वन्मते भिद्येतेति प्रतिवन्दिः कार्या।

ननु प्रत्यभिज्ञानादित्यादि। पूर्वापरकालविशिष्टयोः परस्पराभावाभावस्तादात्म्येन सिध्यति तादात्म्यं च स एवायं पद्मराग इति प्रत्यभिज्ञानात्। तच्च प्रत्यभिज्ञानमप्रमाणमिति न तयोः परस्पराभावाभाव इत्यर्थः।

प्रतिवन्दिं करोति—**ननु नानादिग्देशसंबन्धस्यापीति** स्वलक्षणस्य। तव मते कदाचिन्नानाकालसंबन्धाभावे।

तस्यापीति। नानादिग्देशसंबद्धस्यापि।

स्वाश्रयं भेदयित्वा न निवर्तते इति निर्वहति। स्वाश्रयं भेदवन्तं न करोतीत्यर्थः।

भेदने बाधकमाह—**निःस्वभावतामापादयेदिति**। निरंशं स्वाश्रयं यदि भेदयेत् तदा निःस्वभावमेव तं कुर्यादित्यर्थः। तत् किं न भेदयत्येव? नेत्याह—

अनैकान्तिको वा स्यादिति। यदि स्वाश्रयं न भेदयेत् तदा नानादिग्देशसंसर्गोऽनैकान्तिकः स्यात्, हिमवद्विन्ध्यादौ तस्य भेदकत्वात्। उक्तनीत्या यतो भेदनेऽप्यस्य बाधनमभेदनेऽप्यतो नायं विरुद्ध इति नानादिग्देशसंसर्गे सत्यपि वस्तुन एकत्वं न विरुध्यते इत्यर्थः।

सिद्धास्तर्हि संयोगावयव्यादय इति। नानादिग्देशादिसंसर्गे सत्यपि संयोगादीनामेकत्वस्याविरुद्धत्वात्।

तुल्यं चैतत् कालभेदेऽपि इति। एतद्वस्त्वेकत्वस्याविरुद्धत्वम्।

विरोधे बाधकमाह—**तथा हीति**।

---

१ नानादिग्देशसंबन्धो यदि परमाणुं भेदयेत् तदा तद्वत्तदन्तर्देशान् प्रत्यंशादींश्च भेदयेदेव। एवं चावधेरभावात् परमाणुं निःस्वभावमेव कुर्यात्। अथ द्वितीयकक्षायां तृतीयकक्षायां वा क्वापि स्वाश्रयं न भेदयति, तर्हि तेनैवानैकान्तिको दिग्देशसंबन्ध इत्याह—**अनैकान्तिको वा स्यादिति**। S

मूलाभावादिति। प्रवृत्तिनिवृत्तिमूलकारणप्रतिसन्धानाभावात्।

सर्वज्ञश्च दत्तजलाञ्जलिरिति। तज्ज्ञानस्यापि नियतार्थत्वात्।

अतीतानागतेत्यादि। यदि विषयस्यातीतत्वे वर्तमानत्वे च ज्ञानस्याप्येकस्यातीतत्वं वर्तमानत्वं च स्वीक्रियेत, तदा तद्विरुध्येत। ततश्च पूर्वापरकालसंबद्धस्य वस्तुनि विरोधे ज्ञानेऽपि विरोधः स्यात् न चैतदङ्गीकुर्म इत्यर्थः।

किमिदं वर्तमानत्वमिति। यदेकस्मिन् ज्ञाने नास्तीति स्वीक्रियते।

सदन्तरसंबन्धो वेति। स्वतोऽन्येन सता संबन्धः।

नष्टान्तरसंबन्धो वेति। स्वतोऽन्येन नष्टेन संबन्धः।

एवं तर्हीति। यदा सदन्तरनष्टान्तरसंबन्धेऽपि प्रतिसन्धानं परस्परविरुद्धं सन्नष्टस्वरूपं नास्तीत्यविरुद्धमभ्युपगतं तदेत्यर्थः।

स एवेति। सत्स्वरूप एव पद्मरागः।

सतेति। वर्तमानावस्थारूपेण।

असतेति। अतीतावस्थारूपेण।

इत्यभिप्रायेणेति। यथा त्वन्मते नानादिग्देशसंबन्धेऽपि न वस्तुनोऽभेद एवमस्माकं कालभेदेऽपि नेत्याशयेन।

यदि विकल्पेत्यादि। यो विकल्पः स इन्द्रियार्थसन्निकर्षज इति व्याप्तिर्यद्यभ्युपेयेतास्माभिः, तदा व्यभिचारोद्भावनं युज्येत यदा तु यो विकल्पविशेषः स इन्द्रियार्थसन्निकर्षज इति व्याप्तिरभ्युपेयते, तदा क्व व्यभिचारावकाश इत्यर्थः।

असाविति। साक्षात्कारी विकल्पः।

इतिसारमिति। इदमेवोत्तररहस्यम्।

सामान्यव्यभिचारादिति। विकल्पसामान्यस्येन्द्रियार्थसन्निकर्षजत्वे व्यभिचारात्।

साक्षात्कारादिति। आदिपदान्नियतार्थविषयत्वादिः।

प्रागेव निराकृतत्वादिति । दर्शनव्यापारत्वं कल्पनानुगतत्वेन व्याप्तमित्यादिना । य एव सामान्यविशेषवान् विषय इन्द्रियस्य स एव शब्दस्येति । **नैयायिक** इति तदभ्युपगमेनाह—**नत्विन्द्रियविषय** [636b]**एवेति ।**

उत्प्रेक्षाव्यापारिणमिति । प्रत्ययमादध्यादिति योगः ।

तस्मादिति । बाधकसद्भावात् न तावदिन्द्रियविषयो विषयः शब्दस्येति सिद्धं यस्मादित्यर्थः ।

तदस्पर्शे इति । इन्द्रियविषयास्पर्शे ।

न स्वाभाविकमिति । साक्षात्कारित्वव्यापकेन्द्रियविषयस्पर्शित्वस्याभावादौपाधिकम् ।

अस्येति । विकल्पस्य ।

एकत्रेति । अपरोक्षे ।

अन्यत्रेति । परोक्षे ।

तन्निरपेक्ष इति । अर्थेन्द्रियनिरपेक्षः शब्दादिः कारणं शब्दादिज्ञाने हि अर्थो विषयः स्यात् न तु कारणम् ।

तुच्छतयोपेक्षणीयमपीति । तथा च **शब्दादपि तस्मिन् प्रतीते शीतापनोदप्रसङ्ग** इति प्राक् प्रसञ्जितम् ।

तदनुपलम्भ इति । शीतद्रव्यानुपलम्भः ।

तद्धेतुकेति । शीतद्रव्यापगमहेतुकः ।

वार्त्तिकार्थमिति । श्लोकार्थम् ।

एवमेवेति । उपाधीनामुपकारकस्वभावानन्तर्भावेनैव ।

स एव दोष इति । स्थूलप्रतिभासो भ्रान्तोऽपि न स्यादित्यर्थः ।

एकज्ञानेति । एकस्य प्रमातुर्ज्ञानम् ।

कार्यकारणभावेऽपि को नियन्तेति । ज्ञानं कार्यं ज्ञेयं कारणमित्यत्र **को** हेतुरिति ।

इत्यर्थ इति । **स्वभाव एवार्थज्ञाने**त्यादेः **स्वभावातिरिक्तं संबन्धमुपपादयिष्याम** इत्यन्तस्य **टीका**शकलस्येति योगः ॥

टीयाम् । अस्तु तावद् वासनवेत्यादि । विशेषणविशेष्यभावो वास्तवोऽवास्तवो वेत्यग्रे निर्णेष्यते । परं यो भवतां **बौद्धा**नामस्य विशेषणविशेष्यव्यवहारस्य मानसत्वे काल्पनिकत्वेऽवास्तवत्वे प्रयासोऽपारमार्थिकोऽयं व्यवहारस्ततो वासनयापि घटेतेत्येवमस्य व्यवहारस्योपपत्त्यर्थं वासनाङ्गीकारलक्षणः प्रयत्नः, स चरमस्य व्यवहारस्येन्द्रियजत्व एवाकाल्पनिकत्वे वास्तवत्वे एव भवतु पारमार्थिक एवायं विशेषणविशेष्यभावव्यवहारो वासनया घटतामित्यर्थः ।

उने । तथापि वास्तव एवायमितीति । यदि विशेषणविशेष्यभावव्यवहारो वास्तवत्वेन निश्चितः स्यात् तदा वास्तव एवायं व्यवहारो वासनया घटतामिति वक्तुं युज्येतापि तदस्य वास्तवत्वे प्रमाणं वाच्यमित्यर्थः ।

टीयाम् । तथा सतीत्यादि । इन्द्रियजस्यैव विशेषणविशेष्यभावज्ञानस्य वासनया निर्वाहे यदस्य विशेषणविशेष्यभावज्ञानस्य साक्षान्निरुपाधिकं दर्शनव्यापारत्वं तत् समर्थितं भवति । इतरथा यदि पुनरवास्तवस्यैव विशेषणविशेष्यभावज्ञानस्य वासनातो घटमानत्वमङ्गीक्रियेत, तदास्य दर्शनव्यापारत्वं निष्प्रमाणकनिर्विकल्पोपाधिकं कल्प्येत । इदमुक्तं स्यात् यथा गिरौ धूमे साक्षात्क्रियमाणे यदि तत्र वह्निरभ्युपेयेत, तदैव धूमो दृश्यमानः समर्थितः स्यात् । यदि तु वह्निस्तत्र नाभ्युपेयेत, तदा धूमो दृश्यमानो निष्प्रमाणमन्योपाधिकः कल्पितः स्यात् । तथा विशेषणविशेष्यभावज्ञानस्य यदीन्द्रियजत्वमङ्गीक्रियेत, तदात्र विद्यमानो दर्शनव्यापारः साक्षात् समर्थितो भवति । यदि त्विन्द्रियजत्वं नाङ्गीक्रियेत, तदा दर्शनव्यापारमन्योपाधिकः कल्पितः स्यादिति । तस्माद् विशेषणविशेष्यभावव्यवहारस्य वास्तवत्वे स्वाभाविको दर्शनव्यापार एव प्रमाणम् । [637a]तथा च वास्तव एवायं व्यवहारो वासनया निर्वहतामिति सिद्धम् । इममर्थं हृदि संकलय्योक्त**मुदयनेन—अस्येन्द्रियार्थे**त्यादि ॥

उने ॥ अविचारकत्वमिति । इन्द्रियज्ञानस्येति शेषः ।

टीयाम् ॥ तत्कारणस्येति । विशेषणविशेष्यादिज्ञानकारणस्य ।

उने ॥ परस्येति । बौद्धस्य ।

तथाभावव्यवस्थापनादिति। अतीतविषयव्यापारत्वव्यवस्थापनेन व्यापारानुबन्धितया सर्वविषयत्वस्य व्यवस्थापितत्वात्।

प्रतिपत्त्यनुबन्धितया वा स्यादिति। सर्वविषयत्वमित्यस्य योगः।

टीयाम्। पूर्वकं विज्ञानमिति। गन्धज्ञानादिसमनन्तरप्रत्ययः।

कथं तस्य सर्वविषयतेति। प्रतिनियतगन्धादिप्रतिपत्तिरूपत्वात्।

उने॥ सर्वविषयमपीत्यत्रापिशब्देनाक्षिप्तस्यासर्वविषयमित्यस्य तात्पर्यमाह—**प्रतिपत्तिरूपत्वादिति भाव** इति। यतोऽस्मन्मते मनो न ज्ञानस्वरूपमतः प्रतिपत्त्यनुबन्धितया न सर्वविषयमित्यर्थः। यत्तु मानस्याः प्रतिपत्ते रूपाद्यनेकविषयत्वेन प्रतिपत्त्यनुबन्धितया मनसः सर्वविषयत्वं तदिन्द्रियार्थस्यापि संस्कारसहितस्य तुल्यमिन्द्रियजाया अपि प्रतिपत्तेरतीतविषयत्वादिति न तदपि प्रयोजकम्।

न विचारकमिति वाक्यं हेत्वर्थतया व्याख्यातुं हेतुरूपत्वेनैव गृह्णाति।

अविचारकत्वादितीति। यतोऽचेतनतया न विचारकं न विचारहेतुसकलवासनाधारः, ततः सकलसंस्काराधारतयापि मनो न सर्वविषयमित्यर्थः।

अत्रेति। आत्मनो बोद्धृत्वे।

प्रमाणमिति। इच्छादयः क्वचिदाश्रिता गुणत्वादित्यनुमानम्।

टीयाम्॥ कलयिष्यतीति। संकलयिष्यति।

उने॥ तथापीति। विशेषणविशेष्यभावस्य एकज्ञानगोचरत्वेन्द्रियज्ञानसंकलनयोर्व्यवस्थापनेऽपि।

क उपकार इति। विशेषणविशेष्ययोः।

अतदधिकरणव्यवच्छेदेति। तस्य नीलस्याधिकरणं तदधिकरणमुत्पलम्। न तथा अतदधिकरणम्, तद्व्यवच्छेदः।

न चोपकार्योपकारकेति। योऽपि बीजाङ्कुरादिषु कार्यकारणभावादिरुपकार्योपकारकभाव, सोऽपि नोपकारान्तरप्राप्तो नोपकारान्तरेण बीजमङ्कुरस्योपकुरुते, किं तु स्वभावेनेत्यर्थः।

अभिधीयत इति। **उपकारकत्वमि**ति पदेन विशेषणविशेष्यभावहेतुतयोपकार्योपकारकभाव इति योगः।

टीयाम् ॥ रूपरूपिभावेनेति । धर्मधर्मिभावेन ।

उने ॥ आपादितमिति । प्रसञ्जितम् ।

संकलय्येति । प्रागुक्तं सर्वं विकल्पस्वरूपमिति शेषः ।

क्षणभङ्गे परमिति । यद्यात्मेन्द्रियादिक्रमवत् क्षणनश्वरत्वमभ्युपेयेत, तदा प्रथमक्षणेऽसमर्थत्वात् विकल्पस्याजनकम् । द्वितीयक्षणे समर्थत्वाच्च जनकं घटेत । यदा च तदक्रमवत् स्थिरमभ्युपेयते तदा कथं तत् क्रमेण जनकं स्यात, पूर्वक्षणे एव समर्थत्वात् इत्येवं क्षणनश्वरत्व एव विवादोऽवतिष्ठते इत्यर्थः ।

सिद्धसाध्यतेति । विकल्पानां स्वस्वरूपे प्रत्यक्षत्वं **बौद्धै**रप्यभ्युपगम्यत एव ।

अत्र चेति । अव्यभिचारित्वे ।

कुतः प्रयत्न इति । प्रमाणतोऽर्थप्रतिपत्तावित्यत्र ।

टीयाम् । तद्व्यवच्छेद्येति । तस्य व्यवच्छेदस्य व्यवच्छेद्यं विषयः ।

पदस्यार्थमिति । प्रयोजनम् ।

स चेति । विशेषापेक्षो विमर्शः ।

धर्माविति । स्थाणुत्वपुरुषत्वरूपौ ।

अन्यतरमिति । एकमपि ।

समर्पणमिति । उपस्थापनम् ।

सन्दिग्धं[637b]संशेते-**सन्दिग्धे तस्मिन्नितीति।** तस्मिन् विशेषे संशेते।

अनयोरिति । सिद्धान्त्यभिप्रेतस्येन्द्रियजस्य, चोदकाभिप्रेतस्य चानिन्द्रियजस्य।

अस्य कारणं नेन्द्रियमिति । इन्द्रियं संशयस्य कारणं न स्यात ।

उने ॥ अतत्कारणतयेति । अनिन्द्रियार्थसन्निकर्षकारणत्वेन ।

दृष्टो ह्यस्येति । मनसः ।

मनसा हीत्येतस्यादौ तन्नेति ज्ञेयम् ।

सन्निकृष्टेनेति । यत्रैवात्मनि मनः संयुक्तं तत्रैवानुव्यवसीयमानं घटज्ञानलक्षणं विशेष्यं समवेतमिति संयुक्तसमवायसन्निकर्षेण सन्निकृष्टेन ।

अवच्छेदकतया व्यवसीयत इति। घटादिरनुव्यवसीयमानज्ञानस्य विशेषणं सत् गृह्यत इत्यर्थः।

संशयज्ञानं त्वित्यादि। यदि संशयज्ञानमूर्ध्वार्थोपलब्धिविषयं स्थाणुपुरुषस्मृतिविषयं वा स्यात्, तदा संशयज्ञानोत्पादकेन मनसा ऊर्ध्वार्थोपलब्ध्या स्थाणुपुरुषस्मृत्या वा सह संयुक्तसमवायसन्निकर्षेण सन्निकृष्टेनासन्निकृष्टोऽपि ऊर्ध्वार्थः, स्थाणुपुरुषौ वा अवच्छेदकतया गृह्येरन्। यदा तु संशयज्ञानमनिर्धारितस्थाणुपुरुषयोर्य ऊर्ध्वपदार्थस्तद्विषयम्, तदा अनिर्धारितस्थाणुपुरुषत्वोर्ध्वपदार्थेन सह मनो न केनापि सन्निकर्षेण सन्निकृष्टं कथमिव तद्विषयं ज्ञानमुत्पादयेत्? असन्निकृष्टमपि चेदुत्पादयेत्, अन्धादीनामप्युत्पादयेत्, असन्निकृष्टत्वाविशेषादिति भावः।

टीयाम् ॥ **ईदृश** इति। घटमहं जानामीत्येवंरूपः।

अन्धबधिरादीनामभावादिति। ईदृशानुव्यवसायस्येति योगः।

तत्पूर्वव्यवसायेत्यादि। तस्मादनुव्यवसायात् पूर्वो यो व्यवसायः, तस्योत्पत्तौ अनुव्यवसायो हि व्यवसायविषयो व्यवसायश्चक्षुरादि विना न स्यादित्यनुव्यवसायेन स्वविषयप्राप्त्यर्थं चक्षुराद्यपेक्षणीयमित्यर्थः॥

उने ॥ **अव्यापकत्वेने**त्यादि **चोदयतीति**। **अव्यापकत्वेनेति टीका**पाठग्रहणं [1]चोदयतीत्यादिपदानां सुखेन ज्ञानार्थम्।

पार्श्वस्थ इति। तटस्थः, न तु मूलसिद्धान्ती **भाष्यकारः**। अयं तु **इन्द्रियस्य वै सतः** इत्यादिना अग्रे उत्तरिष्यति॥

टीयाम्। **अनुशयबीजं** विप्रतिपत्तिबीजम्।

उने ॥ **तत्प्रकरणे इति**। इन्द्रियलक्षणप्रकरणे।

अभिधाने प्राप्ते इति। लक्ष्यतयेति शेषः।

करोतीति। अभिधानम्।

अस्येति। मनसः।

अगमिका फक्किकेति। **तच्च नेत्यादि वार्त्तिक**फक्किका न स्वार्थव्यवस्थापिका स्वार्थिकप्रत्ययानामपि **व्याकरणे**ऽभिधानात्।

---

1 J नोद

तज्जातीयेनेत्यादि । एतच्च सगुणत्वं श्रोत्रस्याप्यस्ति तेनापि शब्दो गृह्यते, स च विशेषगुणजातीयः श्रोत्र [2]एव चाकाशे समवेतः ।

ग्राह्यैरिति । ग्राह्यजातीयैः ।

संबन्ध इति । समवायः ॥

टीयाम् । सर्वस्येत्यादि । शेषाभिधानवैयर्थ्यदोषादिति वदतो हि **परस्य** यत् प्रसिद्धं तन्न वाच्यमित्यभिप्रायः । तथा च **किंचित्** तन्त्रान्तरे **किंचिच्च लोके** प्रसिद्धमिति न किमपि वाच्यं स्यात् । एवं च स्वमतमपि न स्यात्, यतो वचनेनैव ज्ञायते यदेतदेतस्य मतमिति । यदा तु न किञ्चिद् वाच्यम्, तदा स्वमतमेव न स्यात् । स्वमताभावे च न परमतम् । ततश्च कथं परमतस्यानिषिद्धस्यानुमतिः स्यात् ?

उने । [638a] **लघीयानिति ।** अकार्यत्वेन ।

आहेतीत्यादि । आहेति **वार्त्तिकं भाष्यकार** इत्यनेन पूरयति **टीकाकारः** ॥

शाब्देत्यने[ने]त्यादि । ननु इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति पदत्रयेण प्रत्यक्षं सामस्त्येन समानासमानजातीयेभ्यो व्यावृत्तं शक्यमेव लक्षयितुमिति कथं यावता शब्देत्यनेन शाब्देन्द्रियसमाहारजमयमसावश्व इति ज्ञानमव्यपदेश्यपदेन व्यवच्छेद्य-मभिमतं **वार्त्तिककृत** इति केषाञ्चिन्मतम्, तन्निराकुर्वन्नाहेत्यर्थः ॥

टीयाम् ॥ तत्र द्रव्यमित्यादि । तत्र यदि इन्द्रियशब्दजं ज्ञानं द्रव्यगोचरमुच्येत तदा द्रव्यमिन्द्रियग्राह्यमेव न शब्दग्राह्यमित्यतो हेतोर्हि स्फुटं तज्ज्ञानं शब्दव्यवच्छेदार्थेना-व्यपदेश्यपदेन न व्यवच्छेत्तुं शक्यम् । यदि वा कथमपि शक्यं भवतु, तथापि व्यवच्छेत्तुं नाभिमतं चैन्द्रियकत्वात् ।

अन्यच्चेति । वाच्यत्वस्यैन्द्रियकत्वे ॥

उने । तथैवेति । अश्वशब्दवाच्य इत्येवं विशेष्यनिष्ठत्वेन ।

तद्व्यतिरेको न शङ्कित इति । वाच्यत्वगोचरं तु ज्ञानमैन्द्रियकमेव । यदि त्वैन्द्रियकं न स्यात्, तदा असन्निकृष्टेन्द्रियोऽपि नरः शब्दादश्वशब्दवाच्योऽयमिति गृह्णीया-दित्येवमिन्द्रियव्यतिरेको न शङ्कितः । कुतः ? इन्द्रियव्यतिरेकव्यभिचारात् । इन्द्रियव्यति-

2 S एव

रेकेऽपि वाच्यत्वग्रहणस्याव्यतिरेकादिन्द्रियसन्निकर्षाभावेऽपि वाच्यत्वग्रहणस्य सद्भावदर्शनादित्यर्थः ।

इममेवाह—**गृहीते हीत्यादि ।**

तदसन्निकर्षेऽपीति । इन्द्रियासन्निकर्षेऽपि ।

केवलादेवेति । इन्द्रियसन्निकर्षनिरपेक्षात् ।

संबन्धीति । वाच्यत्वसंबद्धस्य पिण्डस्य ।

एवमुत्तरत्रापीति । वाच्यत्वविशिष्टद्रव्यज्ञानमपि शाब्दमेवेत्यत्र ॥

टीयाम् । वह्निविशिष्टधूमज्ञानमिवेति । धूमेन वह्नावनुमिते यत् कदाचिद् वह्निविशिष्टधूमज्ञानं तद् यथानुमानिकम् ।

अन्यथेति । यद्यानुमानिकं नेष्येत, तदा वह्निविशिष्टधूमज्ञानमप्यैन्द्रियकम् । अतो यथा वाच्यत्वविशिष्टद्रव्यज्ञानमैन्द्रियकमिति कृत्वा तद्व्यवच्छेदायाव्यपदेश्यपदं विशेषीकृतम्, तथास्यापि व्यवच्छेदाय किञ्चित्पदमङ्गीकार्यं स्यात्, वाच्यत्वविशिष्टद्रव्यज्ञानव्यवच्छेदार्थेनाव्यपदेश्यपदेन वह्निविशिष्टधूमज्ञानस्याव्यवच्छेद्यत्वात् । न च किञ्चित् पद-[मङ्गी]कृतम्, तस्माद् वह्निविशिष्टधूमज्ञानं यथानुमानिकं तथा वा वाच्यत्वविशिष्टद्रव्यज्ञानमपि शाब्दमेव ।

अतीन्द्रियमिति । मीमांसकानामिवातीन्द्रियं स्यात् तदा इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेनैव व्यवच्छिद्येत, न त्वतीन्द्रियम् । किं त्वस्माद् घटादेः शब्दादिदं कम्बुग्रीवादिमदादि वस्तु प्रत्येतव्यमित्येवंविधं सङ्केतमात्रमेतद्वाच्यत्वम् । अतोऽस्य व्यवच्छेदाय अव्यपदेश्यपदमिति **पराशयः** ।

विशेषविधानेत्यादिना विशेषप्रतिषेधश्च विशेषाभ्यनुज्ञाविषयो भवतीत्येतद् **वार्त्तिकं** व्याख्यातम् ।

उने ॥ स चेति । तदाभासविवेकः ।

एवं चायोगव्यवच्छेद एवेति । एतेन ततोऽर्थादित्यत्र हीत्यादि **टीकया** योऽयोगव्यवच्छेद उद्भावितः, स सव्यपदेशको हेतुरेव यस्य न पुनरहेतुरपीत्येवं निर्वहणीयोऽन्यथा तच्छब्दस्य पूर्वप्रक्रान्तार्थाभिधायित्वात् तत्परोऽप्येवकारोऽन्ययोगव्यवच्छेदक एव स्यादिति सूचितम् ।

निराकर्तव्य इति । न ह्यतस्मात् तद्भवतीत्यादिना ।

एतावतैवेति । अयोगव्यवच्छेदेनैव ।

न हि ज्ञानव्यपदेश इत्यादेर्भावार्थमाह--**तेन व्यपदेश्ये हीति** । तदुपाधिकं तदुपरक्तम् ।

[6,8b] **टीयाम्** ॥ **यस्य तद्व्यपदिश्यत इतीति** । यस्यार्थस्य संबन्धितया तज्ज्ञानं व्यपदिश्यते इत्येवं व्यपदेशसंबन्धी व्यपदेशकः । एतेनास्य सन्निहितत्वमुक्तम् ।

उने ॥ **व्यपदेशकाधिपत्यनिरपेक्षतयेति** । अत्र ज्ञानजनका इतीति योज्यम् ॥

टीयाम् । **यद्विपक्षादिति** नियम्य विरोधिनः ।

न हि तदर्थात् जायत इति । अनुमानादेः सामान्यविषयत्वात् ।

उने ॥ **श्रुतीति** । शब्दम् ।

व्यपदेशकादपि न भवतीति बोद्धव्यमिति । यथापाठं नञि स्वीक्रियमाणे अतस्मादप्यव्यपदेशकादपि मिथ्याज्ञानं भवति न व्यापदेशकादेवेति तदन्ययोगव्यवच्छेदेन व्यवच्छेद्यं स्यात्, परस्य तु मिथ्याज्ञानं व्यपदेशकादपि न भवति, न तु व्यपदेशकाद् भवत्येवेति अयोगव्यवच्छेदेन व्यवच्छेद्यं विवक्षितमित्यर्थः ।

ननु व्यपदेशकादित्यादि । यदि हि मिथ्याज्ञानमतस्मादपि अशुक्ले रजतादपि भवतीत्येवं **परेण** नोदितं स्यात्, तदा न ह्यतस्मात् तद्भवति अतस्मादशुक्ले रजतान्न मिथ्याज्ञानमुत्पद्यते इत्युत्तरं युज्येत, यदा तु **परेण** मिथ्याज्ञानमतस्मादपि भवति व्यपदेशकान्नोत्पद्यते इति नोद्यं विवक्षितम, तदा न ह्यतस्माद् भवति अशुक्ले रजतान्नोत्पद्यते इति वचनच्छलेनोत्तरमित्यर्थः ॥

अत्रापि **टीका** संमुग्धैवेत्याह - **अयमर्थ** इति ।

तत्रापि भावादिति । मिथ्याज्ञानेऽपि विद्यमानत्वात् । मिथ्याज्ञानमपि हि इदमिति व्यपदेशकादेव सामान्यरूपात् जायते, न त्वव्यपदेशकात् ।

तदा हि स न स्यादिति । सोऽन्ययोगव्यवच्छेदः । मिथ्याज्ञानमव्यपदेशकादपि तदा स्यादित्यर्थः ।

अव्यपदेशकस्यैवेति । अप्रतिभासमानस्यैव ।

स्वतन्त्रस्येति । पुरोवर्त्यनात्मनः ।

हेतुत्वमिति । मिथ्याज्ञानं प्रति जनकत्वं स्यात् ।

तत्रासत इति। तत्र पुरोवर्तिन्यसतो वणिग्वीथ्याद्यवस्थितादित्यर्थः।

सामानाधिकरण्यानुपपत्तेरित्यादि। यदि रजतं स्वातन्त्र्येण व्यपदेशकं प्रतिभासमानं स्यात् तदा इदमिति पुरोवर्तिना सह रजतस्य सामानाधिकरण्यं नोपपद्येत किं तु तद्रजतमिति स्यात्, सत्यरजतविषयत्वाच्च मिथ्याज्ञानस्य अमिथ्यात्वं प्रसज्येत।

पुरोवर्त्यात्मनेति। तस्मात् पुरोवर्तिस्वरूपेण तद् रजतं भवति व्यपदेशकं प्रतिभासमानम्।

अस्य विषय इति। अस्येदं रजतमिति मिथ्याज्ञानस्य यदारोपितं रजतं विषयो व्यपदेशकं प्रतिभासमानमित्यर्थः।

तत् कथमित्याह—दृश्यमानाकारतया पुरोवर्तिस्वरूपेण, न तु स्वातन्त्र्येणेत्यतो मिथ्याज्ञानस्य पुरोवर्तिस्वरूपं व्यपदेशकं हेतुरेव। तदस्मिन् प्रत्यक्षलक्षणे क्रियमाणे मिथ्याज्ञानमपि प्रत्यक्षं प्रसज्यत इत्यर्थः।

तदेतेन प्रबन्धेन न **वार्त्तिककृता** वाक्छलेन समाहितमित्युक्तम्। तथा हि, यज्ज्ञानं व्यपदेशकादेव स्यात् तत् प्रत्यक्षम्, मिथ्याज्ञानं तु अतस्मादपि भवत्यव्यपदेशकादपि भवतीति न प्रत्यक्षमिति पूर्वपक्षः। यदि वा यज्ज्ञानं व्यपदेशकाद् भवत्येव तत्प्रत्यक्षम्, मिथ्याज्ञानं त्वतस्मादपि भवति व्यपदेशकादपि न भवतीति न प्रत्यक्षमिति पूर्वपक्षः।

तत्राद्यमाश्रित्य **वार्त्तिककृता** समाहितम्—**न ह्यतस्मात् तद् भवतीति**। न ह्यतस्मात् पुरोवर्तिनः। कोऽर्थः? वणिग्वीथ्याद्यवस्थितादप्रतिभासमानात् स्वतन्त्रात् रजतात् मिथ्याज्ञानमुत्पद्यते यत उत्पद्यमानमव्यपदेशकादिदमुत्पद्यते इत्यप्रत्यक्षं स्यात्, किं तु इदमिति व्यपदेशकादेवो[639a]त्पद्यते। तस्मात् प्रत्यक्षं प्राप्नोति।

द्वितीयं च पक्षमाश्रित्य समाहितम्—**अतस्मिंस्तु तदिति तद्भवतीति**।

अतस्मिन् अरजते। कोऽर्थः? पुरोवर्तिनि। तदिति रजतमित्येवं तन्मिथ्याज्ञानं भवति। मिथ्याज्ञाने पुरोवर्त्येव रजतत्वेन प्रतिभासते, न तु स्वतन्त्ररजतम्। [1]अतो मिथ्याज्ञानस्य पुरोवर्त्येवावभासमानो हेतुश्च। तदिदं व्यपदेशकाद् भवत्येवेति प्रसज्यत इति॥

अयं त्वभिप्रायः स्यादिति। मिथ्याज्ञानव्यवच्छेदक इति शेषः। ततोऽर्थाद् विज्ञानं प्रत्यक्षमिति लक्षणकर्तुः॥

---

1 S इतो

यादृशाकारेणेत्यादि । मिथ्याज्ञानस्य हि पुरोवर्ती रजताकारो व्यपदेशकोऽस्ति । न त्विदं पुरोवर्तिनो रजताकारादुत्पन्नमित्यनेन तद्व्यवच्छेदः स्यात् ।

प्रत्यभिज्ञेत्यादि । प्रत्यभिज्ञायां पूर्वावस्थाविशिष्टोऽर्थोऽवभासते, [1]न तु सा तादृशादुत्पद्यते पूर्वावस्थाया विनष्टत्वात् । स्वसंवेदनज्ञानमपि स्वरूपेणावभासते, न तु स्वस्मादुत्पद्यते इति तयोः प्रत्यक्षयोरव्यापकं चेदमाभिप्रायिकं लक्षणम् ।

जैमनीये इति । प्रत्यक्षलक्षणे ॥

टीयाम् । क्षणिकत्वादित्यादि । सर्वे हि भावास्तावत् क्षणिकाः सिद्धाः । तथा चैकस्मिन्नेव क्षणे कारणस्य विनाशेन कार्यस्य चोत्पादेन च भाव्यमेव । न च वाच्यम्, तथा सति कारणस्य विनष्टत्वात् कथं ग्राह्यता, यतः कारणस्य ज्ञानं प्रति ग्राह्यत्वमिदमेव यत् स्वसदृशज्ञानजननम्, न तु प्रतिभासमानत्वम् । क्षणिकत्वे सिद्धे कार्यकारणयोर्नाशोत्पादौ समं सिध्यतः । तत्सिद्धौ च कारणस्य ग्राह्यता स्वसदृशज्ञानजननमेव सिध्यति इति क्षणिकत्वस्यैवासिद्धिमाह—**पूर्वापरेति ।**

उने ॥ स्वभाषयेति । भिन्नकालमिति । स्ववचनेनैव ।

अवभासनमिति, सत्यत्वमिति । आभ्यां सहापजानीमहे इति संबध्यते ॥

टीयाम् । विच्छेदग्रहो मिथ्येति । नीलादेर्भेदवेदनं मिथ्यार्थाकारव्यतिरेकेणान्यस्य वेद्यत्वानभ्युपगमात् ।

गिरां गतय इति । शब्दानां धर्माः ।

उने । प्रमाणान्तरोच्छेदेति । धूमादिप्रत्यक्षेणाग्न्यादेः प्रत्यक्षस्यैव सिद्धत्वादनुमानाद्यभावः प्रसज्येत ।

फलतः प्रत्यक्षोऽर्थ इति । फलस्याकारस्य प्रत्यक्षत्वेनैवार्थः प्रत्यक्षः ।

तदभ्युपगमे इति । बाह्यार्थस्य ।

टीयाम् । सेयं कल्पनेति । सेयं नामादिविशिष्टकल्पना यत्र ज्ञानेऽर्थतो नास्ति, नामजात्यादिविशिष्टोऽर्थो यत्र ज्ञाने नावभासते इत्यर्थः । स्वरूपतो वा नामजात्यादिविशिष्टं स्वस्वरूपमेव यत्र ज्ञानेनावभासते इत्यर्थः ।

---

1 JS ननु

तदिति । ज्ञानम् ।

न नाम्नाभिधीयतेऽर्थतः स्वरूपतश्चेति । नामविशिष्टोऽर्थः स्वस्वरूपं च यस्य ज्ञानस्य नाभिधेयमित्यर्थः । एवमग्रेऽपि योज्यम् ।

विषयकारणत्वमिति । विषयः कारणं यस्य तद्भावं गृह्णन्तीति सामान्यं रूपम् ।

अध्यवस्यन्तीति । सन्तानरूपम् ।

अस्येति । प्रत्यक्षस्य ।

कीर्तिनेति । **धर्मकीर्ति**ना ।

तज्ज्ञाने इति । तत्प्रत्यक्षलक्षणम् ।

उने । **वार्त्तिकशेष इति** । **वार्त्तिक**गतं शेषः ।

टीयाम् । **सा च मिथ्याप्रत्ययेऽपि तुल्येति** । संशयादिज्ञानमपि ऊर्ध्वत्वादि-विशिष्टपुरोवर्तिवस्तुविषयमेवेत्यत्रापि सतार्थेन सह इन्द्रियस्य सत एव सन्निकर्ष इत्यर्थः ।

व्यत्ययेऽपीति । [639b] सत्संप्रयोगे इत्यस्य स्थाने तत्संप्रयोगे इति पाठा-न्तराभ्युपगमेऽपीत्यर्थः ।

यथा बोध्यमिति । यादृशो बुद्धिविषयस्तादृशा सहेन्द्रियाणां संबन्धो नास्ति मिथ्याज्ञानेऽतो न तत्प्रत्यक्षमित्यर्थः ।

सत्ताप्रकारस्येति । पूर्वावस्थायाः ।

तत्संयोगजमिति । यादृशं बोध्यं स्वरूपरूपं तादृशा सह इन्द्रियसंबन्धात् जातम् ॥

उने ॥ **यद्यपीत्यादि** । यतः प्रत्यक्षज्ञानेऽपि यादृशं ज्ञानस्वरूपं प्रतिभासते न तादृशा सह इन्द्रियसन्निकर्षात् तज्जातम् ।

वार्त्तिके ॥ **तथा चोक्तमित्यादि** । यदि इन्द्रियार्थसन्निकर्ष इत्यादिना आक्षेपपूर्वमिन्द्रियार्थसन्निकर्षेतरकारणनिरासकेन वाक्येन प्रत्यक्षमिन्द्रियार्थेत्यादि परकीयं प्रत्यक्षलक्षणं निराकृतमिति अर्थत उक्तमित्यर्थः ।

अनेनैवेति । पञ्चपदपरिग्रहेणैव ॥

॥ अथानुमानम् ॥

टीयाम् ॥ **अत्रेति** । अनुमानलक्षणसूत्रे ।

सिद्धवदिति । सिद्धस्येव ॥

उने ॥ **विशेषनिषेधेनेति** । अप्रत्यक्षनिषेधेन ।

कण्ठत इति । शाब्द्या वृत्त्या ।

अत्रेति । उभयत्र ।

स्वप्रत्यये इत्यादि । स्वप्रत्यये हि कार्ये शब्दोपमाने तावन्नोपयुज्येते, परप्रत्यये तु कार्ये यद्यप्युपयुज्येते तथापि वक्तुः **चार्वाक**स्य धर्मी अनुमानसिद्धो यस्याप्रामाण्यं शब्देन परस्मै प्रतिपादयेत् । यद् वा अन्येषामनुमानं सिद्धमिति सिद्धमाश्रीयते तथापि परस्य प्रतिपाद्यस्य प्रतिपादकोऽयमाप्त इति निश्चयाभावः ।

तदिति । अनुमानम् ।

आविष्करोतीति । शब्दप्रयोग इति योगः ।

टीयाम् ॥ **तद्वचनादिति** । विप्रतिपन्नादिवचनात् ।

लक्षणं विधत्ते इति । **सूत्रकारः** । सामान्यतः सिद्धमनुमानमनूद्यानेन **सूत्रे**ण लक्षणं सिद्धं साध्यते । ततश्च लक्षणं सिद्धं सदनुमानमितरव्यावृत्तं साधयतीति ॥

उने । **व्यवच्छिद्येति** । लक्षणपदेन ।

टीयाम् ॥ **तानीति** तानीत्यनेनानन्तरं **सूत्र**मिति इन्द्रियार्थसन्निकर्षेत्यादि **सूत्रम्** ।

तदिदं तदित्युच्यत इति । तदिदं प्रत्यक्षं तदित्यनुमानमुच्यते ।

सर्वसन्देहेष्विति । लिङ्गलिङ्गिसंबन्धदर्शनं लिङ्गदर्शनं चैते एव प्रत्यक्षे यत्पूर्वे तदनुमानमिति कथं तथैतत्प्रत्यक्षद्वयपूर्वकत्वेऽपि लिङ्गलिङ्गिसंबन्धस्मृतिर्नानुमानमिति कथमित्येवं सन्देहेषु ॥

उने ॥ **भाष्यानुसारि**णः । केचिदिति शेषः ।

तानिति । यथाश्रुत**भाष्यानु**सारिणः ।

अधिकमिति । द्वितीयलिङ्गदर्शनादतिरिक्तम् ।

एकैकस्येति । व्याप्तिस्मरणलिङ्गदर्शनयोरेकतरस्य कस्यचिदित्यर्थः ।

उभयस्य वेति । व्याप्तिस्मरणस्य लिङ्गदर्शनस्य च ।

एतावतैवेति । लिङ्गत्वं रूपानुल्लेख्यपि परमार्थतो लिङ्गविषयमेतदित्येतावतैव ।

दूराद् धूमविषयवस्तुत्वज्ञानस्यापीति । दूराद् धूमे दृष्टे किञ्चिदिदं वस्त्वस्तीति वस्तुत्वज्ञानस्यापि वस्तुगत्या लिङ्गविषयस्य ।

प्रकारान्तरायातेति । कारणान्तरागतः ।

अयमिति । आत्मा ।

व्यापारेणेति । धूमश्चायमित्येवं परामर्शरूपेण ॥

टीयाम् । तत्प्रतिबन्धादिति । अग्निस्वलक्षणप्रतिबन्धात् ।

अनुमानविकल्प इति । वह्निविकल्पः ।

प्रत्यक्षमेवाध्यवस्यतीति । तिरस्कृतोपेक्षालक्षणस्वव्यापारः । प्रत्यक्षव्यापारेण च दर्शन[640a]लक्षणेनानुगतो विकल्प एवाध्यवस्यतीति अतिशयोक्तेः प्रत्यक्षमध्यवस्यतीत्युच्यते ।

इत्यपि प्रत्यक्षमेवेति । अध्यवस्यतीति योगः ॥

ननु यद्यग्निधूमविविक्तवस्तूपलम्भ एवाग्निधूमानुपलम्भावेतावतापि कथमग्निधूमयोरभावः प्रत्यक्ष इत्याह— **नाप्यनयोरिति ।** अग्निधूमविविक्तवस्त्वेवाग्निधूमयोरभावस्तद्विविक्तं च वस्तु प्रत्यक्षम् । अतस्तयोरभावोऽपि प्रत्यक्ष इत्यर्थः ।

उने ॥ ते एवेति । तादात्म्यतदुत्पत्ती ।

समानोपायो वेति । समान उपायो यस्य स तथा । य उपायस्तादात्म्यतदुत्पत्त्योः स एव प्रतिबन्धस्यापि यदि स्यादित्यर्थः ।

तत्रेति । प्रतिबन्धनिश्चये ।

सहचारावसाये वेति । धूमोऽग्निना सहचरित इति निश्चये ।

व्यभिचारशङ्कानिरासे वेति । धूमो वह्निं विनापि भविष्यतीति या शङ्का तन्निरासे ।

कयोश्चिदर्थयोरिति । यथा पार्थिवत्वलोहलेख्यत्वयोः ।

योग्यानुपलम्भबाधादेवेति । यद्यग्निधूमयोर्व्यभिचारशङ्काकृद्दर्शनयोग्यः कश्चिदुपाधिः स्यात्, तदोपलभ्येत । न चोपलभ्यते तस्मान्नास्तीत्यनुपलम्भबाधेनैव निरस्तः । किं तदुत्पत्तिनिश्चयेन कार्यम् ? एतेन व्यभिचारशङ्काद्युपाधिदर्शनाद् वेति निरस्तम् ।

शङ्किता अपीति । धूमस्य वह्निसंबन्धे अमुक उपाधिर्भविष्यतीत्येवं शङ्किता अपि[1] ।

प्रमाणपथानवतीर्णोपाधिशङ्का त्विति । धूमस्य वह्निसंबन्धे कश्चिदुपाधिर्भविष्यतीति ।

तदुत्पत्तिनिश्चयमित्यादि । धूमस्याग्नित उत्पत्तौ पिशाचादिः कश्चिदुपाधिर्भविष्यतीत्येवं निष्प्रमाणिका शङ्का तदुत्पत्तिनिश्चयमप्याक्रामति । अतः कथं तेन शङ्कितोपाधिकत्वादनिश्चितेन तदुत्पत्तिनिश्चयेन सा धूमाग्न्योः प्रतिबन्धे निष्प्रमाणिका शङ्का [2]निवर्त्त्या । एतेनोपाधिशङ्कया या व्यभिचारशङ्का, तस्या निरासे उपायः । सती तादात्म्यतदुत्पत्ती प्रतिबन्धनिश्चयोपाय इति पक्षो निरस्तः ॥

टीयाम् ॥ यदित्यादि । यद् धूमादि ।

क्वचित् । पर्वतादौ ।

तस्य धूमादेः ।

यत्र अग्न्यादौ ।

तद्विदः प्रतिबन्धविदः ।

तस्य प्रमातुः ।

तद् धूमादि ।

तत्र अग्न्यादौ ।

असंभवमेवाह—**का पुनरिति ।**

स तादृश इति । सोऽनन्तरभावो रासभस्याप्यस्ति धूमं प्रति । रासभानन्तरमपि धूम उपलभ्यते इत्यर्थः ।

---

1 S °तामपि 2 S निर्वर्त्या

तत्प्रतिबद्धोऽपीति । रासभप्रतिबद्धः ।

तस्मिन्निति । रासभे ।

उत्तरवादी प्राह—**अथेति** ।

तद्भाव इति । वह्निभावाभावानुविधानभावः ।

अस्येति । धूमस्य ।

स धूमः ।

तत्कार्यो रासभकार्यः ।

रासभवदिति । रासभदृष्टान्तेन । यथा रासभे सति दृष्टो धूमः क्वचित् रासभाभावे तज्जातीयो धूमः सति वह्नौ स्यात् ।

ननु तदनन्तरमेव भवनं नियामकं भविष्यतीत्याह—तदन**न्तरमेवेति** ।

शङ्कापनयनम् । धूमः पिशाचादेव भविष्यतीति शङ्काया निरासम् ।

बौद्धः प्राह—**स्यादेतदिति** ।

तन्निमित्तमिति । पिशाचादि ।

असौ पिशाचादि ।

वह्निरपि कारणं पिशाचोऽपि कारणमित्यनेककारणको धूमो भविष्यतीत्याशङ्क्याह—**नापीति** ।

अकारणकत्वप्रसङ्गमेवाह—**वह्नीति** ।

तत्कार्यत्वेति । यदि धूमो वह्निकार्यं सिद्धः स्यात् तदा भवदभिप्रायीकृतं वह्नेरनन्तरमेव [640b] भवनं सिध्येदित्यर्थः ।

तदेवेति । तत्कार्यत्वमेव ।

तदभावेऽपीति । वह्न्यभावेऽपि कदाचिद्धूमः स्यादिति संबन्धः ।

तज्जातीय एवेति । न त्वन्य इत्यर्थः ।

कारणाभेदजन्मेति । पिशाचकारणक इत्यर्थः ।

अनुपलब्ध्यन्तराण्यपीति । न केवलं स्वभावानुपलब्धिः कार्यानुपलब्ध्यादीन्यपि ।

एवंरूपेति । अनन्तरमेव भावित्वरूपम् ।

यदिति । धूमादि ।

यदन्यसहितानन्तरं वह्न्यादिसहितपिशाचाद्यनन्तरम् ।

तत् धूमादि ।

तदन्यरहितात् वह्न्यादिरहितात् पिशाचादेः ।

स्वनिवारकमिति । शङ्कानिवारकम् । तदुत्पत्तिनिश्चयेन हि व्यभिचारशङ्का निवर्त्तते इति **बौद्धा**भ्युपगमः ।

उने ॥ **सहचरितयोरिति** । कयोश्चित् सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोर्व्यभिचारो दृष्ट इत्येवं व्यभिचारदर्शनमात्रेण धूमाग्न्योर्या व्यभिचारशङ्का संभवति । सा तदुत्पत्त्या निरस्यते इति तदुत्पत्तिः प्रतिबन्धनिश्चयोपाय इत्ययमपि पक्षो न वाच्यो यत एषा व्यभिचारशङ्का धूमो वह्नेरुत्पद्यते इति निश्चयविषयापि संभवत्येवेति कथं तदुत्पत्त्या निरस्यते इत्यर्थः ।

ननु यदा कथमपि धूमो वह्नेरुत्पद्यते इति निश्चितम्, तदा कथं वह्निं विनापि कदाचित् धूमो भविष्यतीति व्यभिचारशङ्काया अवकाशः । यदि हि कारणमन्तरेणापि कार्यं भवेत् तदा तस्य नित्यं सत्त्वमसत्त्वं वा स्यादिति विपक्षे बाधकप्रमाणप्रवृत्त्यैव शङ्काया निवर्त्तितत्वादित्येतदाह—**तदुत्पत्तीति** ।

सिद्धाविति । निश्चये ।

विपक्षे बाधकप्रमाणप्रवृत्त्यैवेति । यदि हि धूमस्यान्यप्रतिबद्धता स्यात् धूमतैव न स्यात्, अग्निप्रतिबद्धस्वभावत्वात् धूमताया इति ।

इत्याहेति । एतदेवाह ॥

टीयाम् । **अहेतोरिति** । अकारणकस्यार्थस्य ।

अस्तु तर्हीति । तदुत्पत्तिनिश्चये सत्यपि यदि कार्यकारणयोर्व्यभिचारशङ्का कादाचित्कत्वविहतिरूपबाधकोपस्थापनेन निवर्त्यते, तदा धूमस्य वह्निना यः संबन्धः स एव गमकाङ्गं धूमस्य वह्निगमकत्वे हेतुर्भवतु, यतः कीदृक्संबन्धोऽव्यभिचारी कुतोऽन्यानपेक्षत्वात् वह्निं मुक्त्वा अन्यनिरपेक्षत्वादेतदपि कुत इत्याह—**स्वाभाविकया** । एतेन यदि धूमो

वह्निसंबद्धो वह्निं व्यभिचरेत्, स्वस्वभावमेव जह्यादिति बाधकसद्भावेनात्रापि व्यभिचारशङ्का नास्तीत्युक्तम् ।

नन्वेतावता तदुत्पत्तिनिश्चयस्वाभाविकसंबन्धयोः साम्यमेव । तत् कुतो विशेषात् स्वाभाविकसंबन्धस्य गमकत्वाङ्गत्वेन स्वीकारोऽनुमन्यते इत्यस्य व्यापकत्वरूपं विशेषमाह—**स चेति ।**

एतदिति । स्वाभाविकसंबन्धस्य व्यापकत्वम् ।

अत्रैवेति । अपि चाद्यतनस्येत्यत्र ।

उने ॥ ताभ्यां समानोपायत्वपक्षं निरस्यति—**न च समानोपायत्वादिति ।** य एव तदुत्पत्तेरुपायः स एव प्रतिबन्धस्य, य एव च प्रतिबन्धस्योपायः स एव तदुत्पत्तेरिति हेतोः तयोस्तदुत्पत्तिप्रतिबन्धयोर्मध्ये यदि तदुत्पत्तेर्न निश्चयस्तदा प्रतिबन्धस्यापि न निश्चयः । अथ प्रतिबन्धस्य न निश्चयस्तदा तदुत्पत्तेरपि न निश्चय इति तदुत्पत्तिः प्रतिबन्धनिश्चयाङ्गमित्यपि पक्षो न युक्त इत्यर्थः ।

धामधूमयोरिति । वह्निधूमयोः ।

अनुमिमते इति । प्रमातारः ।

टीयाम् । न तदर्थिनः प्रवर्तन्ते [641a] इति । निःशङ्का इति शेषः ।

यादृशा तेन जनित इत्यादि स्वोक्तमेव व्याचष्टे ।

स चेति, पूर्वरूपक्षणः ।

हेतुधर्मानुमानेनेति । हेतोः कारणस्य पूर्वरूपक्षणस्य यो धर्मोऽनुमापकरसक्षणसमानकालरूपक्षणान्तरजनकत्वरूपस्तदनुमानेन ।

धूमेन्धनविकारवदिति । यथा धूमात् हेतुधर्मानुमानेनेन्धनविकारस्याभिगतिः स्यात् ।

तदवच्छेदकत्वादिति । जनकरूपक्षणविशेषकत्वात् ।

एतावतापीति । अवच्छेदकत्वेऽपि ।

अस्येति । गमकः, रससमानकालरूपक्षणस्य ।

कार्यहेतोरिति । कार्यलक्षणात् हेतोः ।

विशिष्टेनेति । रूपक्षणान्तरजनकत्वविशिष्टेन ।

विशेषणतयेति । अवच्छेदकत्वात् ।

कारणमिति । कर्तृ ।

तदिति । कार्यं रूपं कर्म ।

ननु कारणमज्ञायमानत्वात् कार्यं मा गमयतु । परं कार्य एव रसक्षणो गमयिष्यतीत्याह—**न चेति ।**

कार्यमिति । रसः ।

अस्य रूपोत्तरक्षणस्य ।

अकारणत्वादिति । रसक्षणं प्रति ।

अगमकमिति । कारणम् ।

अत एवेति स्वोक्तं व्याख्याति—**स्वज्ञानेनेति ।** कारणं हि तावत् स्वज्ञानेन गमकं न स्वसत्तया, कार्यस्य च रूपक्षणस्य ज्ञानं कारणानुमितिज्ञानसमकालमेवेत्यभ्युपगमः तथा च किमित्याह—**उभयश्चेति ।**

तथा चेति । विकल्पद्वयाघटने सति तृतीयं पश्चाद् वेति विकल्पमाह—**रसादिति ।**

उने ॥ तामिति । शङ्काम् ।

अनेनेति । बौद्धेन ।

स इति । कार्यकारणभावः ।

तद्रूप एवेति । अव्यभिचारापरनामव्याप्यव्यापकभाव एव ।

तन्निश्चयेनैवेति । अव्यभिचारनिश्चयेनैव ।

सर्वलोकसिद्धमिति । नियतप्राग्भावि कारणं नियतपश्चाद्भावि कार्यमिति कारणकार्यलक्षणम् ।

एतदिति । लक्षणम् ।

असिद्धमित्यादि । असिद्धमनिष्पन्नं कार्यं सिद्धेन निष्पन्नेन कारणेन साध्यते इति तावत् सर्वं सिद्धम् । ततः किमित्याह—न तु तदेव तदात्मकमेकमेव सिद्धमसिद्धं च

विरोधात् । तस्मात् तदात्मनो व्याप्यव्यापकभावे सत्यपि कार्यकारणभावो विरुध्यते इति तद्व्यवच्छेदार्थं भेदग्रहणं युक्तमित्यर्थः ।

उत्तरयति--**हन्तैवमिति** । व्याप्यव्यापकभावे सत्यपि यथा तदात्मकं न कारणं कार्यं च विरोधात् एवमनागतमपि वर्षादि नीलजलदादिव्यापकतामात्रेण कथं कारणम्, अनागतस्यासिद्धत्वादेव सिद्धस्वरूपकारणत्वेन सह विरोधात् ? तथा वर्तमानमपि नीलजलदादि अनागतवर्षादिव्याप्यतामात्रेण कथं कार्यम् वर्तमानस्य सिद्धत्वादेव सिद्धस्वरूपकार्यत्वेन विरोधात् ।

समानकाले इति । रूपरसलक्षणे ।

समानकालयोरसिद्धावस्था वा स्यात्, सिद्धावस्था वा ? तत्रोभयत्रापि कारणभावविरोध इत्याह—**असिद्धेति** ।

तयोरेवेति । क्षणयोरेव ।

यदि क्षणौ प्रत्यक्षे नारोहतस्ततः किमित्याह—**तत्रेति** । कार्यकारणभावे ।

तस्येति । प्रत्यक्षानुपलम्भस्य ।

टीयाम् । **प्रवृत्तरूपोत्पादनसामर्थ्यमिति** । प्रवृत्तं रूपस्योत्तरलक्षणस्योत्पादने सामर्थ्यं यस्य तत् ।

रसहेतुं रसस्य कारणम् ।

लक्षणानुरोधेनेति । तादात्म्यतदुत्पत्तिभ्यामेव प्रतिबन्ध इति लक्षणवशेन ।

लक्ष्यान्यथाकरणमिति । तादात्म्य[641b]तदुत्पत्तिरहितानामपि प्रतिबन्धवतां तादात्म्यतदुत्पत्तिकल्पनमित्यर्थः ।

तत्त्वेति । परीक्षकत्वे ।

सिद्धानुगममात्रमिति । सिद्धस्य लोकप्रसिद्धस्य ॥

उने । **प्रत्युत विरुद्धमिति** । एतेन तदुत्पत्तिर्गम्यगमकभावेऽनैकान्तिक्येवेत्युक्तम् ।

एकस्याप्यात्मनः स्वज्ञाने कर्तृकर्मभावो दृश्यत एवेति यादृशः कर्तृकर्मभाव एकस्य न संभवति तादृशं व्याख्याति ।

नहीति । ईदृशश्च कर्तृकर्मभावो नात्मन्यपि । आत्मा हि निश्चायकोऽस्ति न तु स्वं निश्चित्य ।

टीयाम् । **भेदान्तरप्रतिक्षेपेति** । अशिंशपाव्यावृत्त्या हि धवादि भेदान्तरं प्रतिक्षिप्यते अवृक्षव्यावृत्त्या तु न, अनया घटादेरेव प्रतिक्षिप्यमाणत्वात् ।

यथा न भिन्नमिति । सर्वोपाख्यारहितं हि काल्पनिकं यदि चैतस्मादिदं भिन्नमित्यवधिमत्त्वेनोपाख्यायते, ततः कथं तस्य सर्वोपाख्याराहित्यम् ? तस्मान्न भिन्नम् ।

तथा सतीति । यदि व्यावृत्त्योर्वस्तुना सह मिथो वा न तादात्म्यं स्यात् ।

पर्यायत्वप्रसङ्गादिति । विकल्पानां पक्षे पौनरुक्त्यप्रसङ्गादित्यर्थः ।

तच्चेति । द्रव्यमधिकरणमेकं जात्यादीनाम् ।

उने ॥ **सामान्यमिति** वृक्षत्वम् ।

विशेष इति । शिंशपात्वम् ।

केनचिदिति । **बौद्धेन** ।

तमिति । **बौद्धम्** ।

स इति । यो **भिन्नयोरेवे**त्यादि **व्यवह्रियते** इत्येतदन्तं ब्रूते ।

प्रमाणेति । एवं तादात्म्यव्यवहारे न किञ्चित् प्रमाणं न च प्रयोजनम् । एनं विनैव प्रतिबन्धस्य व्यवस्थापयितुमशक्यत्वादित्यर्थः ।

टीयाम् । **अस्येदं कार्यमिति** । यथा श्यामलजलदात् वृष्टिः ।

अस्येदं कारणमिति । यथा नदीपूरादुपरि वृष्टिः ।

संबन्धीति । यथा धूमात् वह्निः ।

एकार्थसमवायीति । यथा रसाद् रूपम् ।

विरोधीति । यथा स्फूर्जन्नकुलात् सर्पः ।

न चैवमिति । संबन्धिपदोपात्तस्यानुमानाङ्गत्वे ।

तच्चेति । चातुर्विध्यमिष्यते **वैशेषिकैः** ।

तथा चेति । चातुर्विधस्येष्टौ ।

असाविति । नकुलजयः ।

अभूतस्येति । सर्पपराजयस्य ।

मात्रेति । परिच्छेदः ।

निमित्तेति । पिपीलिकाण्डसञ्चारेण वृष्टिः ॥

उने । उपसंहृत्येति । तस्मात् यो वासवेत्यादिना ।

तौ हीति । व्यभिचाराव्यभिचारौ ।

अन्यनिमित्ताविति । औपाधिकत्वानौपाधिकत्वेतरकारणकौ ।

तथा सतीति । अन्यनिमित्तत्वे ।

कार्यात्मनोरपीति । धूमशिंशपयोः । **कारणात्मव्यभिचारो**ऽग्निना वृक्षेण च व्यभिचारः ।

तदर्थत्वादिति । व्यभिचारस्फुटीकरणार्थत्वात् ।

अन्योऽन्यव्याप्तिदर्शनमात्रप्रयुक्त इति । व्यभिचारोपाध्योरन्योन्यं व्याप्तिरस्तीत्येतदेव दर्शयितुमित्यर्थः ।

व्यभिचारमुद्राव्यापीति । ते हि विनापि धूमादिभिरुपलभ्यन्ते इत्यनेन ।

द्वारीभूतेति । उपायीभूतः ।

अन्यथेत्यादि । यदि निष्प्रमाणक एवोपाधिरुच्येत, तदा तदुत्पत्तितादात्म्य-सर्वज्ञादयो येऽनुमानाङ्गत्वसर्वार्थसाक्षात्कारित्वादिनेष्टाः, तेऽन्यथापि संभाव्येरन् । ये चाद्वैतादयोऽप्रमाणत्वेनेष्टाः, ते प्रमाणोपपन्ना अपि संभाव्येरन्नित्यर्थः ॥

टीयाम् ॥ नायमिति । प्रमाता ।

उने ॥ उत्प्रेक्षितार्थनिश्चयवदिति । यथा कल्पितार्थनिश्चयो बन्ध्यः, तथा तच्छङ्कापि कल्पितार्थशङ्कापि बन्ध्यैव ।

सदानुवृत्तिप्रसङ्ग इति । [642a] उपाधीनां नित्यत्वेन सदानुवर्तमानत्वात् तद्व्याप्यस्य वह्नेरपि सदानुवृत्तिप्राप्तिः ।

उपाधिलक्षणाभावादेव नोपाधय इति । यदि साध्यसाधनाभ्यां व्याप्यमात्ररूपाः सन्तः उभयाव्यभिचारिणः, तदा साध्यव्यापकत्वाभावादेव नोपाधयः । यदि च व्याप्यव्यापकरूपाः सन्तः साध्यसाधनोभयाव्यभिचारिणः, तदा साधनव्यापकत्वादेव नोपाधयः । अन्यश्चाव्यभिचारप्रकारो नास्ति । साध्यसाधनोभयव्यभिचारिणस्तु अनुपाधयः स्फुटा एवेत्यर्थः ।

लक्षणाभावादेवेति । वह्निव्यभिचारित्वेन साध्याव्यापकत्वादेव ।

पूर्ववदिति । व्याप्यमात्रत्वेन साध्याव्यापकत्वादनुपाधय इत्यर्थः ।

उभयरूपास्त्विति । व्याप्यव्यापकरूपा वह्निना समव्यापिकाः पुनरुपाधयो वह्निजननसामग्र्येवेत्यर्थः ।

सा चेति । सामग्री ।

धूमस्येत्यादि । यथा धूमस्य वह्निना स्वाभाविकः संबन्धः, तथा सामग्र्यापि । ततश्च वह्निनेव सामग्र्यापि धूमो व्याप्य इति न साधनाव्यापकता यत इत्यर्थः ।

वह्निजननेत्यादि । उभयरूपा ह्युपाधयस्तावद्वह्निजननसामग्र्येव तस्यां च वह्नेरप्यन्तर्भावे वह्नेरपि वह्निजननसामग्रीत्वात् । तथा च वह्नेः स्वात्मा व्यापकत्वेन न साध्याव्यापकता यतश्चेत्यर्थः ।

न त्वन्ये उपाधयो मा संभूवन् परं पक्षेतरत्वमुपाधिर्भविष्यतीत्याह—**न चेति** ।

इहापीति । धूमवत्त्ववह्निमत्त्वयोः संबन्धेऽपि ।

साध्यधर्मिजातीयेतरत्वमिति । अपर्वतजातीयत्वादि ।

तस्य प्रमाणबाधैकमात्रनियतत्वादिति । यत्र प्रमाणबाधा स्यात् , तत्रैव पक्षेतरत्वमुपाधिर्नान्यत्रेत्यर्थः ।

तर्कश्चेति । न केवलं सर्वथोपाध्यनुपलम्भ इति चार्थः ।

टीयाम् ॥ **अथान्यस्य चेदित्यादि** । उत्तरमेतत् ॥

उने ॥ **ननु प्रमाणेत्यादि** । यदि हि प्रमाणसिद्धः स्वाभाविकः संबन्धो भवेत्, तदा स्वाभाविकोऽयं संबन्ध इत्येवं स्वभावालम्बनं युज्येत, न पुनः स्वभाववादालम्बनेनैव निष्प्रमाणकेन स्वाभाविकोऽयं संबन्ध इति वस्तुव्यवस्था युक्तेत्यभिप्रायवानिति परमार्थः ।

योऽयमिति । वह्न्यादिः ।

उपाधिमिति । आर्द्रेन्धनादिकम् ।

येनेति । धूमादिना ।

स इति । वह्न्यादिः ।

तस्येति । धूमादेः ।

स एवेति । उपाधेरेव ।

न तूपहित इति । न पुनः सोपाधिर्गमकः ।

सोपाधिरपीति । किन्तु यस्योपाधिर्भवति, नासौ गमकः स्यादिति ज्ञापनार्थोऽपिः ।

तत्कस्य हेतोरिति । यद् वह्निरार्द्रेन्धनेन सोपाधिरपि धूमं गमयति तत्र को हेतुरित्यर्थः ।

विशिष्टस्य निरुपाधित्वादिति । केवलस्यैव वह्नेः सोपाधित्वादित्यर्थः ।

टीयाम् ॥ तत्तदसाधारणेत्यादि । यदि चक्षुर्लिङ्गाद्यसाधारणकारणापेक्षया प्रत्यक्षलैङ्गिकादिव्यपदेशैः प्रत्यया व्यपदिश्यन्ते, न मानसव्यपदेशेन, तदा स्वाभाविकसंबन्धज्ञानमपि न मानसं स्यादित्यर्थः ॥

उने ॥ अत्रेति स्वाभाविकसंबन्धग्रहणे ।

लक्षणशास्त्रवैयर्थ्यमिति । तत्पूर्वकमित्यस्यानुमानलक्षणशास्त्रस्य वैयर्थ्यं वारसंख्यानियमाभावेनानियामकत्वात् नियामकं च लक्षणं स्यात् ।

पञ्चप्रत्यक्षानुपलम्भा इति । तथा चोक्तम्—

धूमाधीर्वह्निविज्ञानं धूमज्ञानमधीस्तयोः ।
प्रत्यक्षानुपलम्भाभ्यां त्रिकपञ्चभिरन्वयः ॥

तत्रासत इति धूमादेः ।

तदनन्तरमिति । वह्न्यनन्तरम् ।

ततोऽन्यस्मादिति । वह्नेरन्यस्मात् ।

भूयः प्रवृत्तौ त्विति । भूयोदर्शनव्यापारे पुनः, यदि [642b] कदाचिद् व्यभिचारोपलम्भो न भवेत्, तथापि व्यभिचारोपलम्भहेतुरुपाध्युपलम्भोऽपि स्यात् ।

द्वयापगमे इति । व्यभिचारोपाध्योः ।

यत्त्वत्रोक्तमिति । केनचिदुपाधिनिराकारकेणेति शेषः ।

तथा सत्यपीति । कस्मिंश्चिन्मैत्रतनये श्यामतोपलम्भेऽपि ।

उपाधिवादो व्यर्थ इति । एतेन वस्तुत उपाधिर्न संभवत्येवेत्युक्तम् ।

नोपहितस्येत्यादि । उपहितस्योपाधिमतो वह्न्यादेर्यः साध्येन धूमादिना व्यभिचारो निश्चितो व्यभिचारनिश्चय इत्यर्थः । स **नोपाधेर्लक्षणम्, नोपाधिर्लक्षणाङ्गम्, किंतु** साधनाव्यापकत्वं साध्यव्यापकत्वं च । **एते द्वे एवो**पाधिलक्षणाङ्गे इत्यर्थः ।

तयोरिति । आर्द्रेन्धनान्नपानपरिणतिभेदयोः ।

वह्नेर्धूमेनेवेत्यादि । यथा वह्नेर्धूमेन विनाभाव आर्द्रेन्धनोपाधिप्रयोजकः साक्षादुपलभ्यते, तथा वह्नेरार्द्रेन्धनेनापि विनाभाव उपाधेः साधनाव्यापकत्वरूपोपाधित्वाङ्ग-व्यवस्थापकः साक्षादेवोपलभ्यते। मैत्रतनयस्य तु यथा श्यामत्वेन विनाभावोऽन्नपानपरिणामो-पाधिप्रयोजकः अन्नपानोपाधेरेवोन्नीयते, तथा मैत्रतनयत्वस्यान्नपानपरिणामेनापि सह विना-भावोऽन्नपानपरिणामोपाधेः साधनव्यापकत्वरूपोपाधित्वाङ्गव्यवस्थापकः श्यामत्वोपाधेरेवोन्नीयते। अत्र च परस्पराश्रयताप्रसङ्गपरिहार **उदयनो**पाधिप्रकरणादवसेयः ।

तन्निवृत्ताविति । यथा पवेः प्रशिथिलत्वनिवृत्तौ पवौ लोहलेख्यत्वनिवृत्ति-स्तथा स्फाटिकादपि प्रशिथिलत्वनिवृत्तौ स्फटिके लोहलेख्यत्वनिवृत्तिः प्रसज्यते ।

सेति । पक्षधर्मता ।

किं परामर्शेनेति । पक्षधर्मतामात्रप्रतिपादनफलेन ।

व्याप्त्या सह प्रतिसंहितेति। यो वह्न्यविनाभावी धूमस्तद्धूमवांश्चायमिति व्याप्त्या सह सङ्कलिता ।

तादृशीति । व्याप्त्या सह प्रतिसंहिता ।

तस्य त्विति । द्वितीयलिङ्गदर्शनस्य ।

तदिति । पक्षधर्मतामात्रम् ।

नानुमानोपयोगीति । व्याप्तिप्रतिसंहिता हि पक्षधर्मता अनुमानोपयोगिनी ।

उपनयार्थ इति । व्याप्त्या प्रतिसंहितं परामर्शज्ञानम् ।

तस्येति । उपनयार्थस्य ।

परामर्शैकार्थ इति । परामर्शेन सहैकार्थो यस्य स तथा ।

टीयाम् । तस्येति वृक्षस्य ।

[1]**तत** इति। अवयवद्वैधीभावात् न परशोः।

तण्डुलेन पिठरं लक्षयतीति। अन्यथौष्ण्यापेक्षो वह्निसंयोगः करणं न तण्डुलेष्विति कथं करणक्रिययोरेकविषयता स्यात्।

यदाग्निविषयं ज्ञानं प्रमाणमिति। अनुमितोऽयमग्निरुपादेयोऽग्नित्वात्, अग्रेतनाग्निवदित्यादौ।

अत्रेत्याक्षेपे।

यद्यपीति। तस्मादित्यस्यानन्तरं योज्यम्।

लिङ्गविषयमित्यादि। प्रत्यक्षफलतया प्रत्यक्षफलं सत् यल्लिङ्गज्ञानं तल्लिङ्ग-विषयम्। कुतः? तस्य लिङ्गमहं जानामीति लिङ्गज्ञानस्य तदनुबद्धस्य लिङ्गानुबद्धस्य। न तु लिङ्ग्यनुबद्धस्य मानसप्रत्यक्षेण ग्राह्यत्वात्।

एतदपि कुत इत्याह—लिङ्गरूपं विना लिङ्गज्ञानस्यानिरूपणात्।

ननु लिङ्गज्ञानं लिङ्गेन निरूप्यताम्, परं लिङ्गज्ञानं लिङ्गिनं विनापि न निरूपयि-ष्यते इत्याह—**न त्विति**।

प्रतिपत्त्यनुबन्धितयेति। प्रतिभासमानतया।

उने॥ ननु धूमज्ञानं कस्मात् वह्निविषयं वह्नेर्व्यापारानुबन्धित्वादिति चेत्? ननु धूम-ज्ञानस्य वह्नेर्व्यापारानुबन्ध्यपि कुतो विषयत्वादिति चेत्—तर्हि परस्पराश्रयता इत्याह-**ननु व्यापारे**[643a]**त्यादि**।

ननु धूमज्ञानं वह्निविषयं वह्न्याश्रितव्यापारमित्येकोऽर्थ इति व्यापारानुबन्धिता-विषयत्वयोरैक्यमेवेत्यत आह—**अथ व्यापारेति**।

टीयाम्॥ **प्रतिपत्त्यनुबन्धितेति**। ज्ञेयता॥

प्रतिपाद्यता चेति। ज्ञाप्यता।

फलस्येति। वह्निज्ञानस्य।

प्रमाणस्येति। धूमज्ञानस्य। वह्निज्ञानस्य वह्निर्ज्ञेयः सन् विषयः, धूम-ज्ञानस्य तु ज्ञाप्यः सन् विषय इत्यर्थः।

---

1 S तेन

परस्परापेक्षमिति । ते प्रत्यक्षे पूर्वं यस्येति तत्पूर्वकस्य प्रत्यक्षपूर्वकस्यानुमानलक्षणत्वेऽनुमानादिपूर्वकस्यानुमानस्याव्याप्तिः स्यादिति तानि विभागसूत्रगतानि प्रत्यक्षादीनि प्रमाणानि पूर्वं यस्येति तत्पूर्वकमिति विग्रहाश्रयणादनुमानादिपूर्वकस्यानुमानत्वं सिद्धम् । एवं च ते प्रत्यक्षे पूर्वं यस्येति लक्षणमव्याप्तिपरिहाराय तानि पूर्वं यस्येति लक्षणापेक्षम् । तानि पूर्वं यस्येत्येतदपि लक्षणं लक्ष्यानुमानात् पूर्वभूतानामप्यनुमानादीनां प्रत्यक्षनिष्ठत्वेन ते प्रत्यक्षे पूर्वं यस्येति लक्षणापेक्षम् । तदेवं तानि ते इति विग्रहद्वयेन परस्परापेक्षेणानुमानलक्षणमुपपन्नम् । एवं तानि तदिति विग्रहद्वयेनापि । तदित्यनेन हि अभेदविवक्ष[ा]द्वयमेवोपात्तम् ।

तन्निमित्तादिति । अनुमितिकारणात् ।

अतत्पूर्वकत्वादिति । प्रमाणरूपलिङ्गदर्शनद्वयापूर्वकत्वात् प्रत्यक्षादिफलेन लिङ्गपरामर्शेन व्यवहितत्वात् वह्निज्ञानाद्यनुमितेः ।

तस्यापीति । व्यापारस्यापि ।

निमित्तभाव इति । कारकत्वम् ।

एतस्मिंश्च कल्पे इति । अनुमितेः कारकत्वपक्षे ।

तदेति । तच्छब्देन हानादिसंबन्धावधारणसमये हानादिभिः सह वह्नित्वस्य व्याप्तिग्रहणकाले ।

आनुमानिकमिति । धूमपरामर्शोद्भवम् ।

तत्पूर्वको हीति । तथा चायमनुमीयमानो वह्निरिति लिङ्गपरामर्शो यतस्तत्पूर्वकस्त्रयपूर्वकोऽतोऽनुमितेरनुमानप्रमाणत्वपक्षे तत्पूर्वकमिति लक्षणे तच्छब्देनोक्तरूपं त्रयं परामर्शनीयमित्यर्थः ।

तस्मादिति । उपादेयत्वाविनाभूतो यो वह्निः, स एवायं तस्मात् ।

ततश्च तत्पूर्वकत्वमपि सिद्धमिति । न केवलमुक्तरीत्यानुमितेः कारकत्वं सिद्धम् , त्रयपूर्वकत्वमपि ।

उने । निर्णयविशेषाविति । फलरूपो निर्णयः ।

फलत इति । प्रमातः ।

उभयमिति । विज्ञानप्रमाणरूपम् ।

उभयत्रेति । संस्कारनिर्णयविशेषरूपे ।

टीयाम् ॥ **अत्रेति** । गुणप्रधानभावावधारणे ।

स्वकारणविशेषकमिति । यतोऽनुभवरूपं ज्ञानमुत्पद्यते, तत् तत्पूर्वकमनुमानमित्येवं विज्ञानं यत इति स्वकारणस्य विशेषकम् ।

विभागसूत्रेति । **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि** [१.१.३] इति विभागसूत्रम् ।

विशेषप्रमाणलक्षणमिति । अनुमानलक्षणम् ।

तदिति । प्रमासाधकं प्रमाणमिति प्रमाणसामान्यलक्षणम् ।

उद्भाष्यमिति । **भाष्या**तिक्रमेण ।

विवक्षितोपपत्तेरिति । विवक्षिते पक्षे उपपत्तिर्वृत्तिरित्यर्थः ।

तज्जातीयोपपत्तिरिति । सपक्षे वृत्तिः ।

नन्वन्वयव्यतिरेकिणो यथा तज्जातीयोपपत्तिर्विपक्षावृत्तिश्च रूपे **वार्त्तिक**[643b] **कृता** दर्शिते तथा अबाधितविषयत्वासत्प्रतिपक्षत्वे सती अपि हेतुरूपे किमिति न दर्शिते इत्याह—**अन्वयिमात्रादित्यादि** । किल त्रिविधानुमानभननप्रस्तावे अन्वयव्यतिरेकी अन्वयिव्यतिरेकिभ्यामेव व्यावृत्तो दर्शनीयः । तच्चान्वयव्यतिरेकरूपद्वये न स्यादिति तदेव दर्शितमित्यर्थः ।

विवक्षितप्रत्ययमिति । पक्षज्ञानम् ।

उने ॥ **इहावस्तुन इत्यादि** । यदभावस्याभावाधिकरणतया विधिनिषेधव्यवहारविषयत्वं परेणेष्यते तत्किं लौकिकप्रवृत्तिनिवृत्तिविषयत्वात् । यथा शुक्तिरूपं रजतम् । तत्र शुक्ते रजतत्वाधिकरणतया विधिव्यवहारविषयत्वं लोकप्रवृत्तिविषयत्वात् । यथा च रज्जुरूपः सर्पो रज्जुसर्पः, तत्र रज्ज्वोः सर्पत्वाधिकरणतया निषेधव्यवहारविषयत्वं लोकनिवृत्तिविषयत्वात् ।

प्रमाणेत्यादि । यद् वा, अभावाधिकरणोऽयमभावः प्रामाणिक इत्यभावाधिकरणतया अभावोऽयं विधीयते निषिध्यते वा । यथा गन्धं प्रति गन्धाधिकरणतया पृथिवी प्रत्यक्षप्रमाणोपपन्नेति, तथैव तद्विषयो विधिव्यवहारो यथा चोदकं गन्धाभावाधिकरणतया प्रत्यक्षसिद्धमिति तथैव तद्विषयो निषेधव्यवहारः ॥

वचनेत्यादि । यद् वा, यथा प्रधानं शशशृङ्गं च शब्दमात्रेणास्तीति यथासंख्यं विधिनिषेधविषयः, तथा अभावोऽप्यभावाधिकरणतया शब्दमात्रेणास्तीति विधिनिषेधविषयः ।

मूढेत्यादि । यद् वा यथा प्रधानं व्यापकमव्यापकं वेति, शशशृङ्गं तीक्ष्णमतीक्ष्णं वेति मूढप्रश्नविषयत्वाद् इमौ धर्मान्तराधिकरणतया यथासंख्यं विधिनिषेधविषयौ तथा अभावोऽभावाधिकरणः कथमिति मूढप्रश्नविषयत्वात् विधिनिषेधविषयः ।

पञ्चमस्तु विकल्पः सुगमः ॥

वस्तुमात्रविषयत्वादिति । न ह्यभावविषया प्रवृत्तिर्निवृत्तिर्वा लोकानाम् ।

द्वितीयादिष्वेव च परम्परया प्रविशतीति । लौकिकसमीहानुरोधस्तावदवस्तुनि असंभवी । अन्यच्च प्रमाणप्रतीते इच्छा, ततः प्रयत्न इत्येवमयं परम्परया प्रमाणानुरोधादिष्वेवान्तर्भवति । तथा चावस्तुनि प्रमाणानुरोधनिराकरणेनैवायं निराकर्तव्य इति **टीकाकृता** पृथक् न निराक्रियते ।

द्वितीयनिराकरणायेत्यादि । प्रमाणानुरोधं निराकर्तुं प्रामाणिको योऽसौ निषेधव्यवहारस्तस्य रीतिम् ।

अभावाधिकरणाभावविलक्षणं व्यवस्थामाह—**तद्विविक्तेतरस्वभाव** इति । तस्मात् निषेध्यात् घटादेर्यो विविक्तेतरो भूतलादिः तत्स्वभावोऽभावः **प्राभाकरा**दिमते ।

उभयातिरिक्तस्वभाव इति निषेध्यनिषेधाधिकरणातिरिक्तस्वभावो **नैयायिक**मते ।

अनेनेति । **सद्वयामभाव** इत्यादिना **टीका**ग्रन्थेन ।

असत्यधिकरण इति । अभावरूपे ।

निवृत्तिरेवेत्यादि । **आचार्ये**ण निवृत्तिरेव निषिद्धा, न निवृत्तिनिरूपणमित्येवं भ्रान्तः परश्चोदयति ।

यत्रेति शशे ।

भाव इति शृङ्गरूपः ।

तदधिकरणतयेति । शशाधिकरणतया ।

तस्येति । शृङ्गस्य ।

अन्यत्रेति । गवि ।

स्ववचनविरोधभयमिति । पञ्चमं विकल्पम् ।

ज्ञानश्रियेति । [444a] **बौद्धग्रन्थेन ।**

धर्मस्येति । कृतकत्वादेः ।

बाधेति । निषेधः ।

इयन्तीति । केवलान्वयिनिषेधप्रसङ्गादीनि ।

स्ववचनप्रतिरोधसिद्धिरिति । तथा हि, अवस्तुनिषेधविधिव्यवहृतिर्नास्तीत्युच्यते । अथ च नास्तीत्यनेन निषेधव्यवहृतिरेव क्रियतेऽवस्तुनि ।

अन्यथेति । यदि स्ववचनविरोधभिया विचारार्होऽर्थो न स्वीकार्यः ।

परिहरेदिति । विकल्पशब्दौ **बौद्धस्त्यक्तुमर्हति ।**

तदेकेति । शब्दैकः ।

इयन्तीति । शब्दविकल्पयोर्वस्तुविषयत्वप्रसङ्गादीनि ।

स्ववचनप्रतिरोधसिद्धिरिति । व्यवहृतिर्नास्तीति पक्षे हि नास्तीति वाक्येन शब्दस्य वस्तुविषये बाधाविधिर्व्यवहृतिर्निषिध्यते । तेनैव च शब्दस्य व्यवहारनिषेधरूपो व्यवहारो विधीयते, निषेधव्यवहारनिषेधश्च व्यवहारनिषेधविधिना विरुध्यते ।

टीयाम् ॥ हेतोर्व्यतिरेकं न व्यसेधाम इति । हेत्वभावनिषेधं न कुर्मः ।

तर्हि हेतुभावनिषेधं करिष्यथेत्याह—**न वा हेतुं व्यसेधामो** हेतुनिषेधमपि न कुर्मः ।

तर्हि हेतुं करिष्यथेत्याह—नाप्यन्वयं विदध्मो नापि हेतुं कुर्मः ।

उने ॥ निषेधव्यवहारभाजनत्वेनैव निर्वहेदिति । यतः सर्वप्रतिपत्त्यभाजनमिति कोऽर्थः? सर्वप्रतिपत्तिभाजनत्वनिषेधविषयः ।

अन्यथेति । यदि निषेधव्यवहारभाजनत्वं नाङ्गीक्रियते, तदा सर्वप्रतिपत्त्यभाजनमिति वचनमेव सर्वप्रतिपत्तिभाजनत्वनिषेधविषयार्थं विरुध्यते ।

तद्भयमिति । स्ववचनविरोधभयम् ।

सकलव्यवहाराभाजनं चेति । बौद्धेन निरुपाख्यत्वाङ्गीकारात् ।

किञ्चिदिति। किञ्चिदभिप्रायेणापि **बौद्धस्य** स्ववचनविरोधः स्यादेवेत्याह—[1]**उभयथापीति**।

अवस्तुत्वमेव समर्थयति—**वस्तुन इत्यादि**। सर्वव्यवहारश्च सर्वव्यवहारस्य विरहश्च तयोरनुपपत्तेः सर्वव्यवहाराभाजनं नेति पक्षे हि सर्वव्यवहारभाजनत्वमाप्नोति। तच्च वस्तुनो नास्ति निषेधव्यवहाराभावात्। सदेव हि वस्तु। तत्र कथं निषेधव्यवहारः? सर्वव्यवहाराङ्गीकारेण च निषेधव्यवहाराङ्गीकारे किञ्चिद्वाच्यस्यावस्तुत्वमेव स्यात्। सर्वव्यवहाराभाजनं व्यवह्रियत इति पक्षे तु विधिव्यवहारस्याप्यभाजनत्वमभ्युपगतं स्यात्, विधिव्यहारभाजनत्वं त्ववस्तुन एवेत्यत्रापि पक्षे किञ्चिद्वाच्यस्यावस्तुत्वं स्यात्।

अथ स्वचनविरोधमुद्भावयाति—**नेति पक्षे इत्यादि**।

विरोधादिति। सर्वव्यवहाराभाजनमित्यनेन सर्वव्यवहारनिषेध उच्यते। तत्र च न व्यवह्रियते इत्यनेन सर्वव्यवहारनिषेधविषयो व्यवहारनिषेध उच्यते। स चासति व्यवहारे न स्यादिति व्यवहारनिषेधेन किञ्चिद्वाच्ये वस्तुनि व्यवहार आसञ्ज्यते, सर्वव्यवहाराभाजनमित्यनेन च व्यवहारो निषिध्यते इत्यनयोर्विरोधः।

तत्रापीति। वक्तृत्वेऽपि साध्ये।

एवंरूपत्वादिति। वचनमात्रत्वात्।

स्वभावान्तरमेवेति। जडरूपं न तु निःस्वभावम्।

असुतनिवृत्तीत्यादि। असुतनिवृत्तिमात्रं हि खरूपतो निःस्वभावत्वेन न कस्यचित् करणे समर्थम्, नापि ज्ञापने, किं तु किञ्चित् समर्थमर्थान्तरमवसेयमसुतत्वनिवृत्तिमन्तं पदार्थमन्तर्भाव्यैव। तच्चात्र वन्ध्यासुतस्या[644b]सत्त्वेनानन्तर्भाव्यम्। अतः कथमसुतत्वनिवृत्तिमात्रं हेतुरित्यर्थः।

यदतस्मादेवेति। यदतस्मादेवास्वस्मादेव व्यावृत्तिरूपम्, न तु स्वस्मादपीत्यर्थः।

यथा शिंशपात्वमिति। यथा शिंशपात्वमस्वस्मादेवाशिंशपाया एव व्यावृत्तिरूपं सङ्गमकम्।

वन्ध्यासुतस्त्वयति। वन्ध्यासुतगतं सुतत्वमित्यर्थः। वन्ध्यासुतो हि न किञ्चित्। ततोऽत्र यथा सुतत्वं न घटत्वादि तथा न देवदत्ताद्यभिधसुतत्वमपि।

1 Bibl. Ind. °त्रापि

तद्विविक्तविकल्पनमात्रमिति । तेन वक्तृत्वेन विविक्तस्य विरहितस्य वन्ध्यासुतस्य विकल्पनमात्रम् ।

तत्संसृष्टविकल्पनेऽपीति । तेन वक्तृत्वेन संसृष्टस्य वन्ध्यासुतस्य कल्पनेऽपि ।

तत्रेति । अवस्तुनि ।

तस्येति । अवक्तृत्वस्य ।

सर्वसामर्थ्येत्यादि । नन्ववक्ता वचनेतरकर्ता नेष्यते योऽसति विरुध्यते, किं नाम वचनसामर्थ्यरहितः ? स च सर्वसामर्थ्यरहितेऽविरुद्धः । एतेन वन्ध्यासुतोऽवक्ता वचनसामर्थ्यरहितः सर्वसामर्थ्यरहितत्वादित्यनुमानं **परे**ण ज्ञापितम् ।

एतदपि कथमिति । अवस्तुत्वमपि कथं सिद्धम् ?

क्रमयौगपद्यविरहादिति चेदिति । अवस्तुत्वं न सर्वसामर्थ्यविरहेण साध्यते । किं तर्हि क्रमयौगपद्यविरहेणातो नेतरेतराश्रयतेति चेदित्यर्थः ।

तद्विरहेत्यादि । वन्ध्यासुते क्रमयौगपद्येन स्त इत्यत्रापि किं प्रमाणमित्यर्थः ।

सुतत्वे च परामृष्यमाणे इति । क्रमयौगपद्यरहितश्चायं वन्ध्यासुत इत्येवम् ।

तदविनाभूतेति । सुताविनाभूतः ।

क्रमयौगपद्यविरहसाधनस्येति । क्रमयौगपद्यविरहलक्षणस्य साधनस्य ।

अवक्तृत्वादिसाधनानामिति । अवक्तृत्वादेरादिपदादगन्तृत्वादेः साधनानां सर्वसामर्थ्यविरहादीनाम् ।

ततश्चेत्यादि । एतेन विधिव्यवहारो निषेधव्यवहारो वा नियतः प्रमाणेनैव, प्रमाणाभावे त्वनियत एवेति सिद्धमित्यर्थः ।

अनेनाभिप्रायेणेति । निषेधव्यवहारस्वीकारे विधिव्यवहारः प्रसज्यत एवेत्यभिप्रायेण ।

यदि यत्र किञ्चिदप्रमाणेन निषिध्यते, तदा तत्र नियामकाभावादेव तस्य विधिर्निषेद्धुं न केनापि शक्य इत्यप्रमाणेन विधिप्रसङ्गं सिद्धमेव मत्वा अप्रमाणमवधीर्योक्तम्—**प्रमाणेनेति** ।

अनुत्तरविषय इति। न विद्यते उत्तरं यत्र तस्मिन् विषये।

न केवलमित्यादि। न केवलमनुत्तरविषये य उत्तरं ददाति स एवाहृदयः, किन्तु यः पृच्छति सोऽपि। एतेन मूढप्रश्नानुरोधः परिहृतः।

अथ वचनमात्रानुरोधमाशङ्क्य परिहरति—**न त्वप्रतीते इत्यादि**।

ननु भवन्त्येते विकल्पाः परमेतद्विषयाणां कूर्मरोमादीनामत्यन्तासत्त्वेनाप्रामाणिकत्वात् कथमेते व्यवहारास्पदमित्याह—**न चेति**। स्ववचनप्रतिरोध एवेति। अत्यन्तादृष्टपूर्वाणां कल्पनाज्ञानगोचरत्वमिति वदता हि **बौद्धेनेदमुक्तं** स्यात्, यदुतात्यन्तादृष्टपूर्वेषु व्यवहाराभाव एव। परमेते कूर्मरोमादयोऽत्यन्तादृष्टपूर्वा अपि विकल्पविषयत्वाद् व्यवहारास्पदमिति। अयं च **बौद्धस्य** स्ववचनविरोध एवात्यन्तादृष्टपूर्वेषु व्यवहारनिषेधविध्योर्मिथो विरुद्धत्वात्।

प्रागेवेति। उपयोगे वा न निरुपाख्यो भवेदित्यत्र।

[645a] **आशङ्कामात्रमिति**। कल्पनाज्ञानगोचरत्वमात्रम्।

[1]**समर्थितमिति**। निराकृतमित्यर्थः।

तथा हीति। कल्पनाज्ञानगोचरत्वमात्रनिराकरणे।

तथा सतीति। अन्यथाख्यातिरोचने।

जितं नैयायिकैरिति। दृष्टपूर्वाणामेव कल्पनाज्ञानगोचरत्वोपपत्तेः।

कारणानुपपत्तिमेवाह—**इन्द्रियस्येति**।

अपहस्तितस्वार्थयोरिति। मुक्तस्वार्थयोर्लिङ्गशब्दाभासयोः।

शशविषाणशब्दादिति। अपहस्तितस्वार्थात् शशविषाणेति शब्दाभासात्।

स हीति। नियामकः।

सङ्केतविषयाप्रतीतेरेवेति। सङ्केतविषयस्यासत्त्वात्[2]।

अत एव प्रतीतेरिति। यदि सङ्केतादेव सङ्केतविषयप्रतीतिरित्यभ्युपेयते इत्यर्थः।

पदसङ्केतेति। पदयोः शशविषाणशब्दयोर्यः शशे शृङ्गे चार्थयोः सङ्केतस्तद्बलेन।

---

1 J समर्थमिति 2 J °स्य सत्त्वात्

तथा चेति । शशविषाणपदाभ्यां स्वार्थपरित्यागे ।

अव्युत्पन्नस्यापीति । शशविषाणपदयोरगृहीतसङ्केतस्यापि ।

द्वितीयोऽपीति । परिपाकः ।

पूर्ववदिति । वासनैवेति पक्षानुपपत्तिः ।

तदन्योऽपीति । इन्द्रियं वा लिङ्गाभासः शब्दाभासो वा ।

अथ सामान्यतः प्रागुक्तां सङ्केतविषयाप्रतीतिमेव स्पष्टयति—**न चेति** ।

परबुद्धीनामिति । परे गृहीतसङ्केताः । यदि गृहीतसङ्केतसत्कधियामुल्लेखः स्यात्, तदा तद्ग्राह्यस्याप्युल्लेखे सङ्केतग्रहः स्यात् । न त्वेतदस्ति ।

न चार्थक्रियाविशेषोऽप्यस्तीति । असदर्थेषु वृद्धव्यवहारोऽपि नास्ति असत्त्वादित्यर्थः ।

तदवगम इति । सङ्केतावगमः ।

तद्विषयाणामिति । असदर्थविषयाणाम् ।

तद्विषयोऽस्य वाच्य इति । तस्याभिप्रायस्य यो विषयः स शशविषाण-शब्दस्य वाच्यः । शशविषाणशब्दस्य हि यदि विकल्पविशेषो विषयः स्यात्, तदा तस्य सङ्केतग्रहो दुःशकः स्यात् । यदा तु विकल्पविशेषविकल्पकल्पनामात्रमेवास्य[1] विषयस्तदा सङ्केतोऽस्य सुग्रह एव । तथा हि शशविषयाणशब्दोच्चारणे उच्चारयित्रानेन किञ्चिद् विकल्पितमिति । विकल्पमात्रविषयं ज्ञानं स्यात् ।

विकल्पमात्रमेव[2] च शशविषाणशब्दस्य वाच्यमित्याह—**न चेति** ।

तदर्थत्वप्रसङ्गादिति । यथा हि शशविषाणं कल्पनामात्रविषयं तथा बौद्ध-मते घटकूर्मरोमादयोऽपि । अतः शशविषाणेनैते एकार्थाः सन्तः शशविषाणपर्यायाः प्रसज्ये-रन्नित्यर्थः ।

स्वस्ववासनयेति । न तु सङ्केतापेक्षया ।

परस्परवार्तानभिज्ञतयेति । स्वस्ववासनोद्भूतत्वेनासदर्थशब्दसंबन्धप्रति-पत्तयो वयमेकविषया इत्येवं परस्परवार्तानभिज्ञा इत्यतोऽसदर्थशब्दाः परप्रयोजनका न स्युरित्यर्थः ।

---

1 S °मेकस्य 2 S °मेवंशश

स्वयंकृतसंङ्केतमिति। स्वयंकृतो यः सङ्केतस्तम्।

ग्राहयितुमपीति। सङ्केतं न शक्यते इति योगः।

तथात्वे इति। असत्ख्यातित्वे।

असांव्यवहारिकत्वप्रसङ्गाच्चेति। असांव्यवहारिकत्वं च न च सर्वे इत्यादिना अनन्तरमेव दर्शितम्।

एतदनुरोधेनापीति। न केवलं प्रमाणानुरोधेन, विकल्पानुरोधेनापि।

भवतु चेति। अवस्तुनो निषेधव्यवहारः।

यदिति। हेतुरूपम्।

यत इति। शशविषाणात्।

तस्येति। हेतुरूपस्य।

तत्रेति। शशविषाणे।

तदभावेति हेत्वभावः।

वृक्षरहितभूभृत्कटकवदिति। [645b] यथा वृक्षरहितोऽद्रिकटकः प्रमाणविषयः।

घटाभाववदिति। यथा घटाभावः प्रमाणेनोपलभ्यते।

तस्येत्यादि। तस्य घटाभावस्य तस्मान्निषेध्यात् घटात् यद्विविक्तमितरद् भूतलादि, तत्स्वभावस्यापि प्रमाणत एव सिद्धेः, निषेध्यनिषेधाधिकरणोभयातिरिक्तस्तावत् घटाभावः प्रमाणसिद्ध एव। यस्तु तद्विविक्तेतरस्वभावो भावो **बौद्धा**चैरभ्युपगम्यते, सोऽपि प्रमाणसिद्ध एव तैरभ्युपगम्यते। यदि तु प्रामाणिको नाभ्युपगम्यते तदा तत्राप्यव्यवहार एव।

ताद्रूप्येणेति। स्वाभावत्वेन।

एतावतैवेति। घटस्य स्वाभावविरहस्वभावस्य प्रामाणिकत्वसिद्ध्यैव।

तदभावोऽपीति। घटाभावः।

सिद्ध इति। एतावता अभावस्याप्रामाणिकत्वं व्यवहारविषयत्वं चोक्तं स्यात् **बौद्धे**न। तदभावविरहस्वभावत्वानभ्युपगमादिति प्रामाणिको हि घटभावः स्वलक्षणरूप एवाभ्युपेयते **बौद्धे**न।

अन्यस्येति । घटभावस्य ।

स्वभावे इति । स्वाभावविरहरूपे ।

तदन्योऽपि । घटाभावोऽपि ।

एकस्येत्यादि । घटस्य ज्ञानमेव घटाभावस्य व्यवच्छेदो निषेधो घटाभावज्ञानमेव च घटनिषेधः ।

घटवदिति । यथा घटः प्रामाणिकोऽभ्युपगम्यते ।

स्वभाववादेति । एवंभूतावेवेति वदता स्वभाव एवाभ्युपगत इति भावः ।

सोऽपि इति । घटः ।

तद्विरहस्वभाव इति । स्वाभावविरहस्वभावः ।

तथैवेति । स्वभावविरहस्वभावतयैव ।

अनयोरिति । घटघटाभावयोः ।

अप्रामाणिकत्वे [1]**वेति** । अभावस्य ।

न तथाभाव इति । न परस्परविरहलक्षणव्यतिरेकभावः, तथा हि यदा घटाभावः कोऽपि नास्ति, तदा घटाभावाधीननिरूपणो घटाभावविरहस्वभावो घटोऽपि कोऽपि नास्ति । यदा च घटः कोऽपि नास्ति तदा घटाधीननिरूपणो घटाभावोऽपि नास्ति ।

इयमेव गतिरिति । शशविषाणादीनामपि प्रामाणिकत्वे व्यतिरेकसिद्धिरप्रामाणिकत्वे तु नेत्यर्थः ।

काल्पनिकान्निरग्नेरिति । शशशृङ्गादेः ।

सा चेति । प्रामाणिकी व्यावृत्तिः ।

तस्येति । प्रमेयत्वादेः ।

असाविति । प्रामाणिकः सद्भावः ।

कृतकस्यापीति । अत्र च प्रामाणिकात् जलह्रदादेः प्रामाणिक्येषितव्येत्यादिवत् प्रामाणिके आकाशादौ । कृतकत्वस्यान्वयो वास्तव एव वक्तव्य इति वक्तुं प्राप्ते यत्कृतकत्वस्यापि वस्त्वेकनियतस्य धर्मस्येत्युक्तम्, तद् यदक्षणिकं तदसदिति नित्यस्याकाशादेर्बौद्धेनावस्तुताभ्युपगमेनात एवाह—**वस्तुनो विपक्षाच्चेति** । अनित्याद् घटादेः ।

---

1 S चेति

प्रलपितमेतदिति । प्रलापमात्रमेतत् । अयं च प्रलापो **बौद्धस्य** कल्पनयापि व्यतिरेकरूपसंपत्तिः स्यादिति साधयितुम् । अतस्तामेव निराकरोति—**नहीति** ।

संपदमिति । व्यतिरेकरूपप्रवृत्तिम् ।

विपदमिति । व्यतिरेकरूपनिवृत्तिम् ।

तथा चेति । विपदं प्रति कल्पनायास्त्वरणे ।

वास्तव्यामित्यादि । यदा हि धूमानुमाने जलाशयादेर्वास्तवो व्यतिरेकः संपन्नः, तदा कूर्मरोमादेः काल्पनिकव्यतिरेकाभावोऽकिञ्चित्कर एवेत्यर्थः ।

वास्तव्यामसंपत्ताविति । केवलान्वयिनि ।

तयेति । व्यतिरेक [646a] संपत्त्या ।

समानमिति । यथा काल्पनिकी रूपासंपत्तिर्नानुमानभङ्गाङ्गमित्युपेक्ष्या, तथा काल्पनिकी रूपसंपत्तिरपि नानुमानाङ्गमित्युपेक्ष्या, तथा चोपेक्ष्यत्वेनोभयोरपि न विशेष इत्यर्थः ।

विरोधाविरोधाविति । काल्पनिक्यां रूपासंपत्तौ विरोधः । काल्पनिक्यां रूपसंपत्तौ चाविरोधः ।

उभयोरित्यादि । एकत्र काल्पनिकव्यतिरेकरूपासंपत्तिवादिनो **नैयायिक**स्य मते हेतोर्धूमस्य वस्तुत्वात्, हेत्वधिकरणस्य च कूर्मरोम्णोऽवस्तुत्वात् । अन्यत्र काल्पनिकव्यतिरेकरूपसंपत्तिवादिनो **बौद्धस्य** मते तूभयोर्व्यतिरेकतदधिकरणयोरवस्तुत्वात् ।

क्वचिदिति । महानसादौ ।

क्वचिदिति । जलाशयादौ ।

वस्तुभूतमिति । प्रमाणोपनीते तु प्रामाणिका एव पक्षधर्मत्वान्वयव्यतिरेका इति वदता **बौद्धे**नैव क्वचित् धूमाभावस्य वस्तुताङ्गीकृतैव ।

तेनापीति निर्धूमत्वेन ।

विरोध एवेति । कूर्मरोमणि ।

काल्पनिकी विपत्तिरिति । धूमानुमाने ।

काल्पनिकी रूपसंपत्तिरपीति । केवलान्वयिनि व्यतिरेककल्पनारूपा ।

गुणाद्येति । इत्युक्तप्रकारेण तस्याश्च कल्पनाया सर्वत्र संपत्तावसंपत्तौ च ।

एतच्चेति । तस्याः सर्वत्र सुलभत्वादित्येतत् ।

प्रष्टुरिति । तटस्थस्य ।

एतेनेति । वचनविरोधस्यैव मूकतां प्रति हेतुत्वभणनेन ।

मूकताहेतुविकल्पा इति । अभावस्य मूकतां प्रति हेतुत्वं प्रामाणिकं काल्पनिकं वेत्यादयः ।

रूपान्तरविकलमपीति । पक्षधर्मत्वादिरहितमपि ।

अनेनेति । **बौद्धेन** ।

प्रतिमल्ल इतीति । एतत् नैयायिकमुपहसता **बौद्धेन** स्वयमेवोल्लपितं मूकीभवनं यदुपहसितं **बौद्धेन** तदेव स्वीकार्यमित्यर्थः ॥

टीयाम् । **अवच्छिद्येति** । पृथगुक्त्वा ।

व्युत्पाद्येति । अर्थेन संघट्य ।

उने न काचिदिति । मुख्या गौणी वा ।

उक्तविशेषेत्यादि । सामान्यं हि विशेषरहितं स्यात् । विपक्षोऽप्युक्तविशेषरहितः । उक्तविशेषः साध्यलक्षणः तेन रहितः । तस्मात् सोऽपि सामान्य इत्युच्यते ।

योग्यदर्शननिवृत्त्या चेत्यादि । अदृष्टमिति योग्यदर्शननिवृत्तेर्हि दृश्याभावो विषयः । ततस्तयात्र स्वविषयो हेत्वभावो लक्षित इत्यर्थः । विपक्षे हेतोरसत्त्वमेव हि लिङ्गरूपं न तु तत्रादर्शनमित्यतोऽत्रैव[1] लक्षणा ।

सिद्धवदिति । साक्षात्प्रतिपादितामिव ।

किं लिङ्गमिति । यस्य परामर्शोऽनुमानं तत् किं लिङ्गम् ?

त्रिविधमितीति । किं लिङ्गमिति प्रश्नस्योत्तरं लिङ्गस्वरूपभणनं त्रिविधमित्युत्तरेणैवोक्तं ज्ञेयम्, त्रैविध्यस्यान्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति लिङ्गस्वरूपभणनाविनाभावित्वात् ।

किं लक्षणकमिति । त्रिविधमपि लिङ्गं किंलक्षणकम् ?

1 J °त्रैवं

परामर्शविषय इति । लिङ्गम् ।

संज्ञित इति । अनुमानमित्येवम् ।

विभक्त इति । त्रिविधमित्येवम् ।

लक्षितश्चेति । पूर्ववदित्यादिना ।

ननु यदि तत्पूर्वकं कोऽर्थो, लिङ्गपरामर्शोऽनुमानमित्येवं सामानाधिकरण्यम् । तत्कथं लिङ्गमनुमानमिति सामानाधिकरण्यमित्याह—**विषयेति** ।

सामानाधिकरण्यमिति । तत्पूर्वकमप्यनुमानं त्रिविधम्-पूर्ववदित्यादौ ।

टीयाम् । **प्रथममेवेति** । [646b] आलोचनात्पूर्वमेव ।

तृतीयक्षणे इति । अन्यत एवोद्बुद्धसंस्कारस्य प्रथमेक्षणेऽन्त्यतन्तूत्पत्तिक्रियालोचनं क्रियातो विभागश्च । अथ द्वितीयक्षणे विभागात् पूर्वसंयोगविनाशः परामर्शश्च । अथ तृतीयक्षणेऽनुमानोत्पादोऽन्त्यतन्तुसंयोगश्च । चतुर्थे पटोत्पादः । पञ्चमे रूपाद्युत्पादः । षष्ठे प्रत्यक्षदर्शनम् इति भवत्यनुमानोत्पादस्य परस्तात् तृतीयेक्षणे प्रत्यक्षम् ॥

उने ॥ **वृद्धप्रयोगादिति** । सामान्यतो दृष्टस्य ।

पर्यालोचनयैवेति । य एव प्राङ्मुखेनोपलब्धः स एव परावृत्त्य यः प्रत्यभिज्ञायते इत्येषां पदानां पर्यालोचनेनैवाशुतरविनाशिव्यवच्छेदः सिद्धः । न हि य एव प्राङ्मुखेनोपलब्धो दीपः, स एव परावृत्त्य प्रत्यभिज्ञायते इत्यर्थः ।

स्फोरितस्येति । उपलभ्यता चेत्यादिना ।

टीयाम् । ननूपलब्धस्योपलब्धताव्याख्या पूर्वापरजलधिवेलावगाहिहिमाचलेन व्यभिचारनिवृत्त्यर्थः । स चैवंव्याख्यानेऽपि तदवस्थो यतोऽतीतप्राङ्मुखोपलम्भोऽपि हिमाचलः परावृत्त्य प्रत्यभिज्ञायते इत्याह—**यद्यपीति** ।

अयमिति । हिमाचलः ।

उने । **तदेतन्नरपदेन सूचितमिति** । नरा हि मर्त्यलोके एव, न [1]लोकान्तरे । अतो नरपदमुपन्यस्यतैव **टीकाकृता** [2]लोकान्तरवर्तिपुरुषव्यवच्छेदेन तत्समानदेशस्थः सूचित इत्यर्थः ।

1 J °कोत्तरे 2 J °कोत्तर

हेतोःक्षतिमावहतीति । व्यभिचारानौपयिकत्वात् ।

ननु इयं कोऽर्थोऽङ्गुल्या निर्दिश्यमाना ? दिगित्येव दिशोऽङ्गुलीव्यपदेशेन सह सामानाधिकरण्यं दृश्यते । तेनैवाङ्गुलीव्यपदेशस्य दिगधिकरणता सिध्यतीत्याह— **दिश** इति ।

तदधिकरणतेति । दिगधिकरणता ।

अन्यथासिद्धत्वादिति । सामानाधिकरण्यमपि तरुनगरादिसंबन्धप्रयुक्तमित्यर्थः ।

यस्यां दिशीत्यादि । अस्यां हि भणितो तर्वादिद्वारेण दिश्यप्यङ्गुलीव्यपदेशोऽस्तीति न व्यधिकरणत्वं साक्षादभिधातुं शक्यते ।

अविदितसमयेनाशक्यत्वादिति । यो हि वृक्षशब्दोऽयं वृक्षार्थवाचक इति न गृहीतसङ्केतस्तेन वृक्षशब्दप्रयोगशिंशपात्वयोर्व्याप्तिरेव न गृहीता कुतस्त्यमनुमानम् ?

व्यर्थत्वादिति । शिंशपात्वं ग्रहणकाले एव वृक्षशब्दव्यवहारग्रहणादनुमानेन किं कार्यमित्यर्थः ।

व्युत्पन्न इति । शाखादिमति गृहीतवृक्षशब्दसङ्केतः ।

विदितशब्दप्रवृत्तिनिमित्त इति । विदितं साध्यधर्मविशिष्टायां पुरोवर्तिव्यक्तौ गृहीतं वृक्षशब्दप्रवृत्तिनिमित्तं शाखादिमत्त्वं येन स तथा ।

स्वयमेव व्यवहरेदिति । येन हि शाखादिमान् वृक्षशब्दवाच्य इति गृहीतं साध्यव्यक्तौ शाखादिमत्त्वं च गृहीतं तस्य किमपरमपेक्षणीयं येनासौ वृक्षशब्दवाच्योऽयमिति न व्यवहरेत् ।

विपरीतस्त्विति । यः पुनः परो व्युत्पन्नोऽपि न गृहीतशाखादिमत्त्वः स शिंशपामपि न प्रतीयात्, शाखादिमत्त्वज्ञानाविनाभावित्वात् शिंशपाज्ञानस्य ।

न चायं समयग्रहणप्रकार इति । वृक्षोऽयं शिंशपात्वादित्यनेन सङ्केत एव गृह्यते इति न वाच्यमित्यर्थः ।

शिंशपात्वादित्यादि । यथा शाखादिमत्त्वादयं वृक्षो व्यवहर्तव्य इत्यत्र शाखा[647a]दिमत्त्वं प्रवृत्तिनिमित्तमाकलयति, तथा शिंशपात्वमाकलयेत् तथा च शिंशपैव वृक्षशब्दवाच्या स्यात् ।

ननु यदि हि शिंशपात्वादयं वृक्षो व्यवहर्तव्य इत्येवं शिंशपात्वात् सङ्केतः साध्यते तदा शिंशपात्वं प्रवृत्तिनिमित्तमाकलयेत् । यदा तु शिंशपात्वादयं वृक्षो व्यवहर्तव्यः, कोऽर्थो वृक्षशब्दप्रवृत्तिनिमित्तवानित्येवं सङ्केतः साध्यते, तदा न प्राच्यं दूषणम् । अनेन हि वाक्येन शाखादिमत्त्वस्य वृक्षशब्दवाच्यत्वं साधयता शाखादिमत्येव वृक्षशब्दसङ्केतः क्रियते इति पराशयमाशङ्कयाह—**न चेति ।**

वाक्यार्थ इति । समयग्रहणोपयोगी ।

विदितेत्यादि । येन हि सङ्केतेन शाखादिमत्त्वं वृक्षशब्दवाच्यमित्येतद् गृहीतमेव, तस्य तावत् सङ्केतसाधकेन शिंशपात्वानुमानेन न किञ्चित् कार्यम् । यः पुनरविदिततन्निमित्तः, तेन वृक्षशब्दप्रवृत्तिनिमित्तत्वं न क्वचिद् गृहीतम् । अत इदं पक्षस्य विशेषणं तस्याप्रसिद्धमेव प्रसज्यते ।

ननु यदि सङ्केतो विशेषविषयः साध्येत तदा तस्य विदितत्वे शिंशपात्वानुमानस्य व्यर्थता । अविदितत्वे चाप्रसिद्धविशेषणता स्यात् । यदा तु शिंशपात्वादयं वृक्षो वृक्षशब्दप्रवृत्तिनिमित्तवान् कोऽर्थोऽस्मिन् पुरोवर्त्तिनि व्यक्तिविशेषे किञ्चिद् वृक्षस्य प्रवृत्तिनिमित्तमस्तीति सामान्यविषयः सङ्केतः साध्यते, तदा अन्यत्रसिद्धस्य शब्दप्रवृत्तिनिमित्तमात्रवत्त्वस्यात्र वासिद्धस्य साधनात् नाप्रसिद्धविशेषणता । नापि व्यर्थता शिंशपात्वानुमानस्य भविष्यतीति पराशयमाशङ्कयाह—**सामान्येति** । सामान्यविषयस्य सङ्केतस्य साधने इत्यर्थः । सङ्केतो हि शाखादिमत्त्ववृक्षशब्दयोर्वाच्यवाचकभावः । स कथं शाखादिमत्त्वे विशेषेऽनुपस्थापिते गृह्येतेति भावः ॥

नन्वनुमानेन सामान्यतोऽपि सिद्धं वृक्षशब्दप्रवृत्तिनिमित्तं पक्षधर्मताबलात् पुरोवर्तिव्यक्तिसंबन्धिशाखादिमत्त्वविशेषनियतं सत् समयग्रहे उपयोक्ष्यत इत्याशङ्कयाह—**पुरुषेत्यादि** । पक्षधर्मताबलाद्धि स एव विशेषः सिध्यति, यं विना अनुमानोपस्थापितः साध्यधर्मो नोपपद्यते । अत्र च समयस्य पुरुषेच्छामात्राधीनत्वात् शाखादिमत्त्वविशेषादन्येनापि शिंशपात्वानुमानोपस्थापितप्रवृत्तिनिमित्तमात्रवत्त्वमुपपद्यत एवेति पक्षधर्मतावशात् न शाखादिमत्त्वविशेषेण तन्नियन्तुं शक्यत इत्यर्थः ।

नन्वेवं तर्हि वृक्षशब्दप्रवृत्तिनिमित्तत्वेनाप्रसिद्धमपि शाखादिमत्त्वमेव पुरोवर्तिव्यक्तौ शिंशपात्वानुमानेन साधयिष्यते । यथान्यत्राप्रसिद्धोऽपि जीवच्छरीरे नैरात्म्यनिषेधः प्राणादिमत्वानुमानेन साध्यते इत्याशङ्कयाह—**अविदितेति** । येन शाखादिमत्त्वं वृक्षशब्दप्रवृत्तिनिमित्तत्वेन न क्वापि गृहीतं, तं प्रत्यन्वयोपक्रमस्यान्वयद्वारेण साध्यसाधनस्यायुक्तत्वात् ।

केवलव्यतिरेकिण्येव हि अन्यत्रानुपलब्धचरः साध्यधर्मः साध्यते, न त्वन्वयव्यतिरेकिणि[1]। इदं चानुमानमन्वयव्यतिरेक्येवेत्यर्थः ।

प्रथमं तात्पर्यमिति । त्रिविधपदार्थस्य ।

इति न पौनरुक्त्यमिति । इति हेतोस्तात्पर्यभेदादित्यर्थो न[647b]पौनरुक्त्यं पूर्वोक्तवक्ष्यमाणत्रिविधपदार्थयोः ।

वृत्तवर्तिष्यमाणानुकीर्तनफलमिति । वृत्तवर्तिष्यमाणयो पूर्वोक्तवक्ष्यमाणयोस्त्रिविधपदार्थयोर्येऽनुकीर्तने तयोः फलं त्रिविधमिति न्यूनाधिकेत्यादिना यत्पूर्वोक्तस्य यच्च संप्रत्यान्तर्गणिकेत्यादिना वक्ष्यमाणस्य त्रिविधपदार्थस्यानुकीर्तनं **टीकाकृता** तयोः प्रयोजनं तात्पर्यभेदेन पौनरुक्त्याभावप्रतिपादनमित्यर्थः ।

टीयाम् ॥ **सत्त्वादिति** । इह सत्त्वं सत्तासंबन्धः । तच्च द्रव्यादित्रये सत् , सामान्यादौ त्वसत् । न तु स्वरूपसत्त्वं, अस्य सामान्यादित्रये भावात् ॥

उने ॥ **अध्यवसिताभ्यनुज्ञानमिति** । निश्चितस्य पुनर्ज्ञानम् ॥

वस्तुबलायातमिति । अनुमानरूपस्वकारणबलापतितम् ।

अपेक्षिते इति । इष्टे ।

तस्यापीति । प्रतिपन्नस्यापि ।

आदिवाक्ये इति । प्रमाणतोऽर्थप्रतिपत्तावित्यादौ ।

प्रतिपादयितैवेति । न पुनः प्रतिपाद्यः ।

टीयाम् । पूर्ववदित्यस्य व्याख्यायोजना सामान्यतो दृष्टेन घटते इत्याह-- **सामान्यतो दृष्टे चेति** ।

धर्मान्तरमिति । वह्निम् ।

संबन्धमिति । पर्वताग्न्योः ।

सिद्धत्वाद् धर्मधर्मिणोरिति । वह्न्यविनाभाविधूमग्रहणकाले यथा धर्मी गिरिर्गृहीतः, तथा अग्निरूपो धर्मोऽपि गृहीतोऽन्यथा धूमस्य वह्न्यव्यभिचारित्वमेव न गृह्येत ।

---

1 S °किण

प्रथमं पक्षं **बौद्धा** दूषयन्ति—**लिङ्गमित्**यादिना। यदि धर्मे वह्नौ लिङ्गं धूमः प्रसिद्धम्, [1]तदा धर्मिवद् धर्मोऽप्यसौ गृहीत एव, अन्यथा **लिङ्गग्रहणासंभवात्**। ततश्च किमन्यत् तेन लिङ्गेनानुमीयते? अथ लिङ्गं धर्मिणि गिरौ सिद्धं तर्हि तस्यैव [2]धर्मिण एव किमर्थं नानुमेयता? अस्मत्पक्ष एव सिध्यतीत्यर्थः।

द्वितीयपक्षं दूषयति—**संबन्धेऽपीति**। अवाच्यः संबन्धोऽपि मेयत्वेन न वाच्यः। हेतुमाह—संबन्धे द्वयमपि नास्ति। धर्मान्तरे हि मेये पक्षधर्मतैव नास्ति, व्याप्ति-स्त्वस्ति संबन्धेऽनुमेयेन पक्षधर्मतालिङ्गस्य संबन्धेऽसिद्धत्वात्। नापि व्याप्तिः पर्वताग्निसंबन्ध-व्यतिरेकेणापि धूमस्य सद्भावात्। तथा यदि संबन्धो मेयः स्यात्, तदा तद्वति संबन्धवति पर्वतेऽग्नौ च षष्ठी श्रूयेत। धूमात् पर्वताग्न्योः संबन्ध इति स्यात्, न त्वयमग्निमानिति तथार्थ-गृहीतत्वात्। लिङ्गग्रहणकाल एव गिरिर्गृहीतोऽग्निरपि सामान्यतो गृहीतः ततस्तयोः संबन्धि-नोर्ग्रहणे तन्निष्ठस्य संबन्धस्यापि गृहीतत्वादित्यर्थः।

बौद्धः स्वमतं दर्शयति—**लिङ्गस्येति**। **धर्मिणेति** अग्निना। अन्यत्र महानसादौ। **तत्रेति** धर्मिणि गिरौ। **प्रसिद्धं** लिङ्गं कर्तृ। **तद्युक्तं धर्मिण-मिति**। साध्यधर्मयुक्तं धर्मिणम्॥

वार्त्तिके। प्रतीतत्वाच्चेति। अस्यादौ यदि धूमोऽग्नेर्धर्मः स्यात् तदेत्यध्या-हार्यम्।

एतेनेति। प्रतीतत्वकथनेन॥

टीयाम्। **बौद्ध** आक्षिपति—**तत् किमसंबद्धावेवेति** इत्यत्र आह—**संबन्ध-मात्रमितीति**। संबन्धमात्रं तत्र वर्तते इत्येतदन्तं **नैयायिक** आहेत्यर्थः। धूमाग्न्योः संबन्धलक्षणोऽविनाभावोऽस्ति, संबन्धमात्रत्वाच्चानेन धूमो देशविशेषं प्रतिपादयतीति भावार्थः।

तदेव तर्हि अवधार्यतामिति। इति चेत् धूमाग्न्योः संबन्धमात्रं यदि वर्तते, तर्हि तदेव [648a] धूममात्रमेवानुमीयतामित्यर्थः।

अनैकान्तिकत्वमिति। नासिद्धत्वम्॥

वार्त्तिके॥ अनग्निकस्यापि धूमस्य दर्शनादिति। अभ्रंलिहो हि धूमो निरग्निकोऽपि दृश्यते॥

1 S तथा 2 S °र्मिण

उने ॥ **अस्येति** । शब्दस्य ।

अनुपलब्धिकारणेत्यादि । उपलभ्यमानत्वात् कार्यत्वमित्युक्ते सामान्यादिना व्यभिचार इत्युक्तम्—अनुपलब्धिकारणाभावे सत्यनुपलब्धस्येति । सामान्यादि तर्हि अनुपलब्धिकारणानां व्यवधानादीनां भावे सत्येवानुपलब्ध उपलभ्यते । शब्दस्तु व्यवधानाद्यभावेऽप्यनुपलब्ध उपलभ्यते ।

प्रत्यक्षाद् वेति । ताल्वादिसंयोगान्वयव्यतिरेकानुविधानं हि घटस्येव मृदादीनां प्रत्यक्षम् ।

विपर्ययेण हेतुरिति । क्वचिदुपलभ्यमानत्वादित्ययम् अव्याप्यवृत्तिरित्यादि । क्वचिदुपलभ्यमानत्वादित्युच्यमाने स्वाश्रयव्याप्यवृत्तिभी रूपादिभिर्व्यभिचार इत्युक्तमाश्रयप्राप्तावपि ।

क्वचिदनुपलभ्यमानत्वे सतीति । रूपादयो हि स्वाश्रयप्राप्तौ न क्वचित् नोपलभ्यन्ते ।

एतावन्मात्रेणेति । व्यापकसमवायिकारणस्याव्यापकत्वाभिधानेनैव ।

गुणत्वं सिध्यतीति । यो हि व्यापककारणोऽव्यापकः स गुण एव ।

भाष्यकारीयो हेतुरिति । सजातीयारम्भकत्वम् ।

प्रकृते इति । सजातीयारम्भकत्वे ।

लगतीति । प्रवर्तते **टीकाकारः** ।

अत्रापीति । सजातीयारम्भकत्वे ।

प्रकारान्तरेति । ग्राहकस्य ग्राह्यदेशगमनादि प्रकारान्तरम् ।

टीयाम् । **एष** इति । शब्दो गुणो द्रव्यकर्मान्यत्वे सत्त्वादित्ययम् ।

सदाद्यभेदस्य । सत्तादिभेदस्य ।

भाष्ये । **केनचिदर्थेनेत्यादि** । केनचिदर्थेन परतन्त्रेण रूपादीना सह लिङ्गस्य गुणत्वस्य सामान्यात् यदिच्छागुणत्वलक्षणं सादृश्यं तस्मात् ।

वार्त्तिके ॥ **इतरधर्मेत्यादि** । इतरस्य परतन्त्रस्य रूपादेर्यो धर्मो गुणत्वं तस्य यद्दर्शनं धर्मिण इच्छादेस्तस्मात् यदधिगतिसाधनं परोक्षार्थसाधनम् ।

टीयाम् ॥ **स्वरूपतो वा साध्येतेति** । आत्मास्ति इच्छादिगुणवत्त्वादित्येवम् ।

दृष्टधर्मिविशेषणतयेति । इच्छादय आत्माश्रिता गुणत्वादित्येवम् ।

साध्यधर्मिणीति । इच्छादौ ।

अस्येति । आत्माश्रितत्वस्य ।

ननु यद्यात्मा अस्मदादिभिः साध्यधर्मिणि कदाचिदपि व्याप्तिग्राहकप्रमाणेनोपलब्धः, तत्कथं विशेषणतयाप्यनुमेय इत्याह—**तज्जातीयेनेति** । पराश्रितेन ।

गुणभूतोऽवच्छेदकतया यतः इति । गुणभूतो यतोऽवच्छेदकतयेत्यर्थः ।

न सन्देहविषयत्वमिति । धर्मिण इति शेषः ।

अनुमेयात्मवादिनामिति । मते इति शेषः ।

उने ॥ **उभयथापीति** । पृथिव्यादिपरतन्त्रतया, तदितरपरतन्त्रतया च ।

तत्रेति । प्रमाणान्तरविषयत्वे ।

विधायकप्रमाणाभावे इति । विधायकप्रमाणेति विधिमुखं प्रमाणमन्वयि ।

तदधिष्ठाने इति । परमाण्वदृष्टाधिष्ठाने ।

तदिति । सर्वज्ञत्वम् ।

धूमगतेत्यादि । यथा धूमस्य पलालसंबन्धित्वम्, अपलालत्वं च संभावितमेव परं धूमगतनीलत्वेनापालालत्वं बाध्यते ।

तमिति । आत्मानम् ।

तदुत्तरकालमिति । परमात्रोपस्थापनानन्तरम् ।

तदन्येति । पृथिव्याद्यष्टकातिरिक्तः ।

[648b] **तथाभूते** इति । अप्रसिद्धविशेषणे ।

समानेत्यादि । समानप्रतिपत्त्यसमानप्रतिपत्तिविविधप्रतिपत्तयो हि सन्देहकारणानि । तासां च नानुपलब्धपूर्वो विषयः ।

अन्वयिनोऽप्यनुत्थानमिति । अन्वयिनि धूमानुमानेऽपि हि वह्निविशिष्टो गिरिरनुमेयो वाक्यार्थोऽपूर्व एवान्यथायमनुमेय एव न स्यात् । वाक्यार्थापूर्वतया च पदार्थानां

वह्निधूमयोर्विशेषणभावो गिरेश्च विशेष्यभावोऽ[1]पहतस्तथा च पर्वतोऽयं वह्निमानिति पक्षस्याप्रसिद्धविशेषणत्वादन्वयिनोऽप्यनुत्थानमित्यर्थः। एतेन पदार्थपूर्वतयैव विशेषणविशेष्यभावो विहन्यते इत्युक्तम्।

सामान्यतोदृष्टपूर्वकत्वनियमसीमा यादुर्लङ्घ्यत्वादिति। सामान्यतोदृष्टपूर्वकत्वस्य यो नियमस्तत्सीमाया दुर्लङ्घ्यत्वात्। यत् सामान्यतः पूर्वं दृष्टं तत् पक्षविशेषणत्वेनादरणीयमित्यर्थः। द्रव्याष्टकातिरिक्तशब्दार्थोऽपि गुणादौ सिद्ध एवेत्यतः सोऽपि आत्मत्वरूपविशेषं विना सामान्यतोदृष्ट एव। ततस्तस्यापि द्रव्याष्टकातिरिक्ताश्रिता इति पक्षविशेषणत्वं न दुर्घटम्। शशविषाणस्य तु कथञ्चिदप्यसिद्धत्वे विशेषणत्वं नैव स्यादित्यर्थः।

अथात्र द्रव्याष्टकातिरिक्तार्थं आत्मरूपत्वेन विशेषतः क्वचिदपि न सिद्धोऽतः सामान्यतोऽप्यसिद्ध इत्याश्रीयेत[2] तदा प्रसिद्धानुमानस्यापि विलोपप्रसङ्ग इत्याह—**अन्यथेति**। अन्यथा यदि यो विशेषतो न सिद्धः स सामान्यतोऽपि न सिध्यति, तदा प्रसिद्धानुमानेऽपि वह्निः पर्वताश्रितत्वविशेषणासिद्धतया सामान्यतोऽपि वह्नित्वमात्रेणाप्यसिद्धः सन् कथं निष्प्रमाणकः सर्वथा असिद्धार्थतया प्रमाणरहितो यः शब्दो वह्निलक्षणस्तत्सामर्थ्यमाश्रित्य परामृश्येत पर्वतोऽयं वह्निमानित्येवंविशेषणविशेष्यभावेन ज्ञायेत। अज्ञातश्च कथं धूमानुमानप्रमाणव्यवहारमवतारयत्? तस्माद् द्रव्याष्टकातिरिक्तोऽर्थः सामान्यतोऽपि सिद्धो विशेषणं स्यादेवेत्यर्थः।

एवं चेति। यदा हि सामान्यतो द्रव्याष्टकातिरिक्तोऽर्थः सिद्धस्तदा।

अधिकरणे इति। परमात्रे।

उभाभ्यामिति। वादिप्रतिवादिभ्याम्।

तदतिरिक्ताश्रिते इति। पृथिव्यतिरिक्ताद्याश्रिते।

सर्वद्रव्येष्विति। गुणत्वमन्वाश्रिते स्नेहादौ दृष्टम्। तदतिरिक्ताश्रिते औष्ण्यादौ च दृष्टमिच्छादिषु च। तत् किमिच्छादयो गुणाः सन्तोऽन्वाश्रिता, उत तदतिरिक्ताश्रिता इत्यादिप्रकारेण।

समानधर्मेति गुणत्वम्।

तथैव किं न स्यादिति। प्रत्यक्षमपि त्रैकाल्यविषयं किं न स्यात्॥

---

1 S °हतः 2 S °यते

टीयाम् ॥ **प्रमाणमन्तरेणेति** । यस्यासौ तर्कोऽवान्तरव्यापारः, तत्प्रमाणं विना ।

उने ॥ **तात्पर्यार्थेन संबन्धमाह—न सन्देह इत्युक्तम्** । तदेव स्फोरयति **न्याये**त्यादिना **युक्तमि**त्यन्तेन । न्यायं विना हि तर्कस्य अनवस्थाप्रसङ्गस्य न्यायावान्तर-व्यापारस्य निश्चयापर्याप्तौ समवाये । नैव समवायान्तरवानित्येवं निश्चयासामर्थ्ये समवायः समवायान्तरवान् स्यान्नवेति सन्देहस्तदवस्थ इति **हेतोराहो** न्यायोऽप्यस्तीत्येवमाशङ्कितं **परेण** ।

तन्निषेध एव । सन्देहनिषेध एव ।

उत्तरं युक्तमिति । न सन्देह इति [649a] नञा सन्देहः संबद्धीकृत इत्यर्थः ।

तन्नात्मनीति । न ह्यात्मा इह बुद्धिविषयः ।

न तत्साध्ये इति । न हि समवाय इह बुद्ध्युपादानम् ।

अवच्छेदकतामात्रेणेति । नाधारत्वेन ।

परमाणवन्ता इति । एतेनात्यव्यापका उक्ताः ।

अन्तरेतीति । विषयीभूतात् कारणादन्यत्कारणं कारणान्तरमिति ह्यन्तरशब्द-स्यात्रार्थः ।

एतच्चेति । कारणान्तरम् ।

तत इति । घटादिभ्यः ।

तदुपलब्धीति । घटाद्युपलब्धिः ।

परमाणवादिगुणैरिति । रूपादिभिः ।

परमाणवादीत्यादिपदात् घटादिग्रहः ।

यावद्द्रव्यभाविभिरिति । अनेन संयोगादिव्यवच्छेदः ।

आश्रयाधीननिरूपणैरिति । अनेनोपलब्धिकारणान्तरस्याश्रयस्य द्रव्यस्य समवधानमुक्तम् ।

अनेकसंबन्धे सतीति । अनेकावच्छेदकत्वे रूपादयो हि स्वाश्रयस्यैकस्यैवा-वच्छेदका इत्यनेन तद्व्यवच्छेदः ।

सर्वत्रेत्यनेन सूचितमिति । सर्वशब्दस्यानेकार्थवाचित्वात् ।

कर्त्रेत्यादि । करणं निर्व्यापारमपि स्यात् न च तदपि कार्यकरणे पर्याप्तमिति व्यापारोऽपि गवेष्य इत्यभिप्रायवानित्यर्थः ।

प्रमाणबलादिति । पटस्य कारणस्य तुरीसंयोगं कार्यं प्रति प्राग्भावित्वान्यथानुपपत्तेः ।

इष्ट एवायमर्थ इति । प्रथमे क्षणे तुर्या असंयुक्त एव पटः इत्ययम् ।

इदमिति । अनाधारत्वम् ।

वार्त्तिके ॥ प्राप्तिः संयोगोवर्तते इति । प्राप्तिः सन् संयोगो वर्तते इति व्याहतम् । नैतद् घटत इत्यर्थः ।

तदेव स्फोरयति—**किमियमित्यादिना** ।

तथा चेति । यदा कार्यधर्मो वृत्तिस्तदा कार्यान्तराण्यपि घटादीनि प्राप्तिमन्ति सन्ति वृत्तिमन्ति भवन्ति ॥

टीयाम् ॥ तत्प्रयोजकस्य वृत्तिप्रयोजकस्य संयोगो न प्राप्तित्वाद् वृत्तिमान्, किं तु कार्यत्वात् । ततश्च संयोगवत् प्राप्तित्वान्न समवायो वृत्तिमानित्यर्थः ।

उने ॥ अनादितायां हीत्यादि । अनादितायां हि सत्यामङ्कुरत्वं कर्तृ तस्याङ्कुरस्य बीजपूर्वकत्वमवगमयतीति युज्यते इति संबन्धः ।

नन्वङ्कुरत्वं बीजपूर्वकत्वं कस्माद् गमयतीत्याह—**अङ्कुरे वर्तमानम्** ।

तथापि कथं गमयतीत्याह—**अङ्कुरोत्पादानुगुणसमयसंभविना** । यदा अङ्कुर उत्पद्यते तदा संभवता बीजेन जनित एतेन बीजपूर्वकत्वाङ्कुरत्वयोर्व्याप्तिर्ग्रहीतुं शक्यते एवेत्युक्तम् । एवमग्रेऽपि योजना कार्या ।

अविकलस्येति । व्याप्त्यादिसंपन्नस्य ।

हेतोः प्रमाणस्येति । अङ्कुरोऽयं बीजपूर्वकोऽङ्कुरत्वात् , दृष्टाङ्कुरवदित्याह—**इदं प्रथमतायां त्वित्यादि** । यदा तु कल्पनयेदमेव बीजं प्रथममिति स्यात् , तदा कार्योत्पादानुगुणसमये कल्पनयाङ्कुरोत्पादकाले भविष्यत्त्वादेव भविष्यत्प्रवाहो नास्ति । यदायं नास्ति तदा प्रथमस्याङ्कुरस्याप्यनुत्पादो भविष्यत्प्रवाहस्यादिभूतत्वात् तस्य । तथा च तदाश्रयस्य प्रथमाश्रयस्य हेतोरङ्कुरत्वस्य तस्मिन् प्रथमेऽङ्कुरे सति आश्रयासिद्धतया सर्वस्यापि भविष्यत्प्रवाहस्यागमकत्वे भविष्यत्प्रवाहानन्तताख्पायामनवस्थायां न प्रमाणमिति भावः ।

एतेन समवायोऽपि न बीजाङ्कुरवदनादितया उपलभ्यते। ततश्चास्यापि भविष्यत्समवायान्तर प्रवाहानन्ततारूपानवस्थायां न प्रमाणमिति नेयमिहाद्रियत इत्युक्तम्।

टीयाम् [649b] **व्यतिरेकी हेतुरिति**। यत्पुनः स्वोपादानेन कृतकसंबन्धवन्न भवति तदाधारवन्न भवति यथाकाशमिति।

उने ॥ **अन्यथेति**। यदि स्वसमवायिनेत्यर्थो न स्यात्।

जात्यादिषु विपक्षेष्विति। जात्यादयो हि नित्यत्वेनोपादानाभावात् न तेनाकृतकसंबन्धवन्त इति स्वोपादानेनाकृतकसंबन्धवन्तो[1] विपक्षाः।

किं त्वधिकरणं कारकमिति। जात्यादिषु आधारवत्त्वं [2]विद्यते, न त्वधिकरणकारकवत्त्वम्, तेषामकारकवत्त्वादिति हेतुर्विरुद्धो न स्यादित्यर्थः।

स्वसमवायेनैवेत्यादि। यदि हि कार्यमाधारवद्भवति तदा स्वसमवायेनैव, न तु समवायाधारकसमवायान्तरेण। यदा तु कार्यस्य स्वसमवाय एव नास्ति, तदा कुतस्त्योऽन्यैकार्थसमवाय इत्यर्थः।

टीयाम् ॥ **संयोगजसंयोगस्येति**। तन्तुतुरीसंयोगाज्जातस्य पटतुरीसंयोगस्य।

कारणत्रयसंभवादिति। पटतुरी समवायिकारणम् ?। तन्तुतुरीसंयोगोऽसमवायिकारणम्। अन्यत्सर्वं निमित्तकारणम्।

विषयभेद इति। अनुमानस्य निषिध्यमानविषयत्वात् प्रत्यक्षस्य तु निषेधविषयत्वात्।

न तु सामान्यमिति। सत्त्वं ह्यत्र कृतकत्वस्य धर्मः। तच्चेत् सामान्यरूपं स्यात् कृतकत्वस्य धर्मो न स्यात् सामान्याभावात्।

तद्विशेष्यमिति। पृथिवीत्वसामान्येन विशेष्यम्।

ग्रहमिति। पात्रविशेषम्॥

उने। **विशेषपर** एवेति। नान्तरीयकार्थपर एव।

तथा चेति। प्रयत्नान्तरेणैव नान्तरीयकार्थवाचकत्वेनान्तरीयकशब्दस्याभ्युपगते।

पूर्वदूषणानतिवृत्तिरिति। अर्थशब्दवैयर्थ्यापत्तिः प्रयत्नान्तरेणैव नान्तरीयकत्वस्य व्यवच्छेद्यत्वात्।

---

1 J °वतो 2 S वेद्य°

टीयाम् ॥ **यद्येवं स्यादिति** । यदि यः संश्चासंश्च स सन्निति वक्तुं न शक्यते तदेत्यर्थः ।

उने ॥ **अनियतप्रसरेणेति** सद्भावेन ।

तस्येति । असाधारणस्य ।

तस्यापीति । असाधारणस्यापि ।

एवंभूतत्वादिति । पक्षसत्त्वविपक्षव्यावृत्तिमत्त्वात् ।

प्रसक्तस्येति । सद्भावस्य ।

तद्विपरीतस्येति । असद्भावस्य ।

तद्विपरीतहानमिति । सद्भावहानमसाधारणस्यैव हेतुत्वप्रवर्तकम् ।

संभाव्येतेति । ततः सद्भावहानव्यवच्छेदार्थम् ।

तत्तुल्ले सद्भाव इति । सार्थकं भवेदिति शेषः ।

असंभवस्य निषेध्यत्वेनानुपादानादिति । यदि हि प्रमेयेणासद्भाव इत्येवमसंभवो निषेध्यत्वेनोपात्तोऽभविष्यत् , तदा असंभवस्य प्राधान्येनोपादानात् तस्य प्रसङ्गे तद्विपरीतहानं समभविष्यन्न चैतदस्ति ।

अथैकवाक्यत्वमित्यादि । अथावधारणस्येत्यादिटीकाखण्डस्यार्थः ।

एतदेवेति । एकवाक्यत्वमेव स्फुटयतीति योगः ।

अनूद्यमानसमुच्चयमिति । अनूद्यमानस्य विधीयमानेन सह समुच्चयम्

उभयत्वविशिष्टं हविरुदितमिति । उभयं हविः स्यादित्येवम् ।

अनुवादपक्षे इत्यादि । उभयं हविरित्येतत् यद्यनूद्यमानमभ्युपेयते, तदात्रोभयत्वमनूद्यमानत्वेन न विवक्षितम् , किं तु हविरेव तन्मात्रस्यैवोदितत्वात् , नोभयत्वविशिष्टस्य । अथात्रोभयत्वमप्यनूद्यत्वेन विवक्ष्यते तदोभयं हविरित्येतत् सकलमपि नानुवादः, किं तु वाद एव । तथा चोभयं हविरित्येतद् भिन्नं वाक्यं स्यात् ।

अयमेवेति । [650a] अनुमेये सद्भाव एवेति रूपः ।

तद् यदीत्यादि । यस्यानुमेये सद्भाव एवेत्यत्र यदि यस्येत्यनुवादः, तदा अनुमेये सद्भाव एवेति विशेषणं नानूद्यत्वेन विवक्षितं हेतुमात्रस्यैवोदितत्वात् । नानुमेये

सद्भाव एवेति विशेषणविशिष्टस्य । अथानुमेये सद्भाव एवेति विशेषणमप्यनूद्यत्वेन विवक्षितम्, तर्हि यस्यानुमेये सद्भाव एवेत्यनेनैव सकलेन वाक्येन विशिष्टो वादः कार्यः ॥

टीयाम् ॥ **तद्विशेषणायेति** । अनूद्यविशेषणाय ।

उभयमिति । आज्यपुरोडाशरूपम् ।

आर्तिमाच्छेदिति । उपप्लवं विनाशं वाप्नुयात् ।

ऐन्द्रमिति । इन्द्रदेवतम् ।

पञ्चशरावमिति । पञ्चसु शरावेषु संस्कृतम् ।

निर्वपेदिति । दद्यात् । पञ्चशरावा इन्द्रमुद्दिश्य ओदनपूर्णा देया इति तस्य प्रायश्चित्तमित्यर्थः ।

उने ॥ आर्तिरपि कथं हविषा विशिष्यत इति । न ह्यार्तिरपि हविषा विशिष्टोदितेति भावः ।

उभयत्वविवक्षापक्षे इति । उभयत्वं यद्यनूद्यत्वेन विवक्ष्येत, तदेत्यर्थः ॥

वाक्यभेदेति । उभयं हविरित्येतद् वाक्यं भिन्नमेव स्यात् ॥

टीयाम् ॥ **तद्विवक्षयैवेति** । अनुमेये इत्यस्य विशेषणतया विवक्षयैव ॥

उने ॥ **विषयान्तरेति** । अनुमेयः स चेति विषयान्तरसंकोचः ।

तदेकवाक्यतयेति । **तत्तुल्य एव सद्भाव** इत्यनेन सहैकवाक्यतया ।

परस्पराश्रयदोषमेव भावयति—**अन्यथेति** । विषयान्तरसङ्कोचं विना ।

उभयोरपीति । प्रमेयविपक्षयोस्तत्तुल्यादन्यत्वस्याविशेषे ।

विहितत्वात् तस्येति चेदिति । अनुमेये सद्भाव एवेत्यनेनानुमेययोगो विहित इति न तस्य व्यवच्छेद इति चेत्? **आचार्यः** प्राह—**अत एवेति** । यत एवानुमेययोगो विहितः ।

अस्येति । तत्तुल्य एवेत्यन्ययोगव्यवच्छेदस्य ।

सापीति । तदेकवाक्यता ।

तस्मिन्निति । विपक्षमात्रविषयत्वे ।

दुरुत्तरदोषापत्तिरिति । परस्पराश्रयदोषप्रसङ्ग इत्यर्थः ।

समुच्चय एव न निर्वहेदिति । पदानामेव विरोधात् ।

विरोधः सूक्ष्मेक्षिकयेति । इतरेतराश्रयरूपया ।

सोऽयमिति । अन्यापोहार्थत्वात् पदानां विरोधः ।

विशेषनिष्ठतयेति । अनुमेये सद्भाव एवेत्यादिनिष्ठतया ।

टीयाम् ॥ एकपदपर्युदासेनेति । एकं पदं यत्र लक्षणे तद्व्युदासेन । एवमग्रेऽपि ।

मा भूद्विरुद्धाव्यभिचारीति । एकस्मादिति पदेन व्यवच्छिन्नत्वात् ।

प्राधानिकत्वादिति । प्रकृतिप्रभवत्वात् ।

आसन्दिकेति । मञ्चिका ।

भोगेत्यादि । भोगापवर्गलक्षणौ यौ पुरुषार्थौ पुरुषप्रयोजने तद्धेतुकाः ।

॥ इत्यनुमानम् ॥

उने ॥ तस्येति । ज्ञानस्य ।

सादृश्यं नित्यमनित्यं वा, नित्यमप्यनाश्रितमाश्रितं वा ? तत्र नित्यमनाश्रितमन्याश्रयत्वानन्याश्रयत्वादिभिर्विकल्प्य दूषयति—**अनाश्रितस्येत्यादिना ।**

गोगवयेति । गोगवयादयो ये युतसिद्धाः तन्निष्ठा या सादृश्यस्याभिव्यक्तिस्तदनुपपत्तेः ।

अभावत्वप्रसङ्गादिति । प्रध्वंस एव हि नित्योऽनाश्रितोऽनन्याश्रयो युतसिद्धैः मुद्गरकपालादिभिरभिव्यङ्ग्यश्च ।

अयुतसिद्धेति । पटतन्त्वादिगतसादृश्याभिव्यक्त्यघटनाच्च ।

अथ नित्यमाश्रितमनेकाश्रितत्वैकाश्रितत्वादिभिर्विकल्प्य दूषयति—**नित्यस्ये-** [650b]**त्यादिना ।** अनाश्रितस्य ह्यनाश्रयत्वादिविकल्पोपेतस्य नित्यत्वमेव नानित्यत्वमित्यतस्तत्र नित्यस्येति नोक्तम् ।

अनेकाश्रयत्वे इति । अनेकाश्रितत्वे इत्यर्थः ।

तस्य नाशे इति । एकस्याश्रयभूतस्यानित्यत्वे ।

नित्यत्वे इति । सादृश्यस्य ।

नित्यैकेति । अथ नित्यैकाश्रितं तद्यदि स्वरूपेणैव सत्, तदा विशेषः स्यात् । विशेष एव हि नित्यैकद्रव्यवृत्तिः स्वरूपेणैव संश्च ।

अथानित्यमाश्रितमनेकाश्रितत्वादिभिर्विकल्प्य दूषयति—**अनित्यस्येत्यादिना** ।

गुणत्वप्रसङ्गादिति । संयोगादिगुणा एव ह्यनित्या अनेकाश्रिता निर्गुणाश्चेति तत्त्वप्रसङ्गः ।

एकाश्रयत्वे इति । अथानित्यमेकाश्रितम्, तद्यदि संयोगविभागयोरनपेक्षकारणं तदा कर्म स्यात् । अथ सापेक्षकारणं तदा गुणः स्यात् । गुणो हि कर्मापेक्ष्यैव संयोगविभागयोः कारणम् ।

गुणेषु चेति । यदा हि सादृश्यमनित्यमेकाश्रितं चाभ्युपेयते तदास्यैकं तत्समवायिकारणं वाच्यम् । तच्च द्रव्यमेव स्यात्, गुणानां कर्मणां च समवायित्वाभावात् । तथा च तेषु सादृश्यस्यानाश्रितत्वात् सदृशव्यवहारो न स्यादित्यर्थः ।

कारणत्रयेति । यदा हि सादृश्यमनित्यमेकाश्रितं चाभ्युपेयते, तदास्यैकेन तेन समवायिकारणेन भाव्यम् । तच्च समवायिकारणं तदा स्यात् यद्यसमवायिकारणं निमित्तकारणं च किञ्चित् संभवेद् यदैते न संभवतस्तदा समवायिकारणस्याप्यसंभव इति कारणत्रयविचारानुपपत्तिः ।

सा चेति । साधर्म्यप्रसिद्धिः ।

कर्मधारयसमाश्रयत्वेनेति । प्रसिद्धसाधर्म्यादित्येतत् कर्मधारयस्य समासस्याश्रयो यत इत्यर्थः ।

वाक्यादिति । पूर्वं वाक्यात् पश्चात् प्रत्यक्षाच्चेत्यर्थः ॥

टीयाम् । **प्रज्ञापनीयस्य गवयशब्दवाच्यतयेति** । गवयशब्दवाच्योऽयमिति प्रज्ञापनीयस्य ।

उने ॥ **तथापीति** । प्रज्ञातेनेत्यादिना प्रज्ञापनमुपमानमित्यन्तेन **भाष्य**व्याख्योद्दीपनेऽपि ।

टीयाम् ॥ **अतिदेशवाक्येत्यादि** । एवमादीनि सर्वाण्यपि गोसादृश्यस्य विशेषणानि ।

तेनेति। गोसादृश्येन।

उने। **तेनेति**। सादृश्येन।

तज्ज्ञानमेवेति। साधर्म्यज्ञानमेव। प्रसिद्धसाधर्म्यात् साध्यसाधनं साधर्म्यज्ञानं तदुपमानमिति तज्ज्ञानस्य करणत्वाश्रयणे हि व्यधिकरणत्वेऽपि करणसाधनमपि साध्यसाधन-पदं सार्थकमेव स्यादिति भावः।

अवान्तरेति। साधर्म्यस्य हि तज्ज्ञानमवान्तरव्यापारः स्यादिति युक्तमस्य करणत्वम्। साधर्म्यज्ञानस्य तु न कश्चिदवान्तरव्यापारः। अतोऽस्य न करणत्वं युक्तम्।

असमीचीनेऽपीति। उपमानाभासेऽपीति।

तथाभावेति। करणत्वे।

तदपीति। असमीचीनमपि। ज्ञायमानस्य हि सादृश्यस्य करणत्वाभ्युपगमे ज्ञानं गौणं सादृश्यं च मुख्यमुक्तं स्यात्।

सादृश्यं चासमीचीनं न स्यादिति। तेनोपमानाभासो व्यवच्छिद्यते, सादृश्यज्ञानस्य तु करणत्वाभ्युपगमे ज्ञानं मुख्यम्। तच्चासमीचीनमपि ज्ञानमेवेति। तेनोपमानाभासो न व्यवच्छिद्येतेत्यर्थः।

तन्निवृत्तिरिति। असमीचीननिवृत्तिः।

वृत्तैरिति। पठितैः।

सापीति। अनुवृत्तिरपि पदान्तरवृत्तिरेवेति। वस्तुतः पदान्तरपाठ एव।

तथापीति। साध्यसाधनपदस्य भावपरत्वसिद्धावपि[65Ia]**भाष्ये** प्रज्ञान-मिति वक्तुं युक्तम्, तस्यैव प्रसिद्धिपदार्थत्वात्। तत् किमर्थं प्रज्ञापनमुक्तमित्यर्थः।

टीकास्थस्य इतीत्यस्य व्याख्या—एतदर्थमिति।

करणव्यापारो हि फलं प्रत्यव्यवहित इत्युक्तम्—**अव्यवधानेनेति**।

फलोपरक्तेति। ज्ञानोपरक्ता।

प्रातिस्विकीति। असाधारणा।

तस्येति। प्रमाणस्य।

अन्यत्रेति। कारकान्तरे।

दर्शित इति। प्रज्ञापनशब्दमुपन्यस्यता **भाष्यकारेण।**

लक्ष्यपदमिति। उपमानपदम्।

लक्ष्यव्यवस्थापकं लक्षणम्।

अगतिर्वेति। प्रकारान्तरेण तु लक्ष्यावगतौ किं तद्व्यवस्थापकेन लक्ष्यपदेनेति निरर्थकं स्यादित्यर्थः।

न तूपस्थापकमेवेति। न तूपलक्षणमपि न भवतीत्यर्थः।

इयमिति। प्रथमा।

अशोकवनिकेति। यथा अशोकवनिकागृहपश्चाद्भागवर्तित्वेन न प्रथमं बुद्धावारोहति, तथा प्रथमापि न प्रथमं बुद्धावारूढेति नात्र प्रथमेति न वाच्यमित्यर्थः।

तदपीति। साध्यसाधनपदम्।

टीयाम्॥ संज्ञितया गवयप्रतिपत्तिमिति। गवयसंज्ञोऽयमित्येवं गवयज्ञानम्।

आक्षिप्तेति। आक्षिप्तः प्रयोज्यस्य पुरुषस्य व्यापारः संज्ञासंज्ञिसंबन्धज्ञानरूपो येन तद्भावात्॥

उने॥ किमायातं वार्त्तिकविरोधस्येति। वार्त्तिकविरोधो न परिहृत इत्यर्थः।

शब्दार्थौ वेति। सादृश्यम्।

गुणकर्मादिवदिति। गुणकर्मादीनामिव।

तस्येति। प्रमाणसमाहारस्य।

वाक्यप्रत्यक्षयोर्भिन्नकालत्वादिति। वाक्यकाले प्रत्यक्षं नास्ति, प्रत्यक्षकाले वाक्यं नास्तीत्यर्थः।

नन्विन्द्रियसंबद्धे गवये वाक्यतदर्थस्मृतौ सत्यां प्रमाणसमाहारो भविष्यतीत्याशङ्क्य सादृश्यावेदनेन भवत्येवायमसौ गवयशब्दवाच्य इति मतिरित्याह—**वाक्यतदर्थयोरिति।**

उपनीतावपीति। अधिगमेऽपि।

फलसमाहारमाशङ्क्यापाकरोति—**फलेति।** वाक्यफलं तदर्थज्ञानं प्रत्यक्षफलं च सादृश्यज्ञानम्। तत्समाहारमुपमानमित्यतो यदि वाक्ये प्रत्यक्षे चोपमानान्तर्भाव इष्यते, तदा

प्रत्यक्षफलं प्रायशो लिङ्गपरामर्शोऽनुमितिरूपप्रतिपत्तिं कुर्वन्ननुमानमिष्यते। श्रोत्रजानुभव-प्रसूतवाक्यप्रतिपत्तिस्तु वाक्यार्थप्रतिपत्तौ कर्तव्यायां शब्दः प्रमाणमिष्यते। तदुभयमपि प्रत्यक्षं स्यादित्यर्थः।

ननु यदि तत्फलत्वेन तदन्तर्भावो न भवति तर्हि विकल्पस्याप्यालोचनफलस्य प्रत्यक्षान्तर्भावो न स्यात्। भवति चेत् तदा सादृश्यसाक्षात्कारोऽपि प्रत्यक्षेऽन्तर्भवतु। अथ क्वचिदन्तर्भावो न सर्वत्रेति नियामकाभावात् अमुं विशेषं न विद्म इत्याशयवान् पृच्छति—**तत्किमिति**।

यत्र व्यापारिण इन्द्रियसन्निकर्षादेरवस्थितिः, तत्र तत्फलस्यावान्तरव्यापारता। यत्र पुनर्व्यापारिण एवानवस्थितिः, तत्र तत्प्रमाणबहिर्भूतत्वम्, यथेन्द्रियव्यापारोपरतौ लिङ्ग-शब्दानुसन्धानबलेनानुमितिवाक्यार्थप्रमित्युत्पादे न प्रत्यक्षप्रमाणान्तर्भूतत्वम्। सोऽयं विशेष इत्याह—**तत्तदिति**।

इममेव विशेषमुपादायाशङ्क्य पूर्वोक्तयुक्त्या परिहरति—**अस्ति तर्हीति**।

तस्मिन्निति। सादृश्यज्ञाने।

तस्येति। चक्षुषः।

टीयाम् ॥ **तादृशत्वे** इति। तादृक्स्वरूपत्वे।

अन्यपरादिति। निन्दापरात्।

अन्यस्येति। उष्ट्रस्य।

[65rb] **उने** ॥ **पूर्वे** इति। प्रत्यक्षानुमानशाब्दप्रमाणत्रयवादिनः, शाब्दे चोपमान-मन्तर्भावयन्तो **जरद्वैशेषिकाः**।

प्रयोगमात्रोपयोगिनेति। वाक्ये प्रयुक्तत्वादेव सङ्केतग्रहोपयोगिना।

प्रतिसंबन्धिन इति। गवयत्वस्य।

शब्दाद्वेति। यथा गौस्तथेति वाक्यादेव।

उपलक्षणाद्वेति। सादृश्यात्।

आधुनिका इति। प्रत्यक्षानुमानप्रमाणद्वयवादिनोऽनुमाने च शाब्दमुपमानं चान्तर्भावयन्तो **नूतनवैशेषिकाः**।

पूर्ववदेवेति । शब्दाद् वोपलक्षणाद् वा ।

अवाचकेति । अविदितसङ्केतया अवाचकं यद्गवयपदं तत्प्रयोगस्य यथा गौस्तथेति वाक्यानङ्गतयेति ।

ननु गवयपदं वाक्यानङ्गतया समयपरिच्छेदकं मा भूद्, गवयपदरहितं तु यथा गौस्तथेति वाक्यमेव समयपरिच्छेदकं भविष्यतीत्याह—**तद्विरहिणश्चेति** । गवयपद-विरहिणो वाक्यस्य ।

एतेनैवेति । समयपरिच्छेदसाधकेन प्रयोगानुमानेनैव ।

परिप्लव इति । यदुच्छेदाय **जरन्नैयायिकैः** सादृश्यसाक्षात्कारो वाक्यार्थस्मरण-सहकृत उपमानमिष्यते ।

ननु यदि संबन्धिनोऽनवगमात् संबन्धो नावगतः, तर्हि नितरां संबन्धपरिच्छेदा-योपमानमभ्युपेयमायातीति मा कदाचित् **नैयायिको**ऽवादीदित्याह—**न चैष** इति । निमित्तावगमः ।

मनोधर्मादीति । मनोधर्मादयो हि जातिनिमित्ताः शब्दाः । यदा चानुमाना-दिनैतद्ग्रहेऽपि जातिर्निमित्तं न गृह्यते तदैषां जातिवाचकशब्दत्वं न स्यात् तथा वाचकत्वमेव स्यात् । मनोधर्मादिजात्यादीनां नित्यपरोक्षत्वात् तस्माद् यथा मनोधर्मादिग्रहणेनैव तज्जातयो गृह्यन्ते, तथा सादृश्यविशिष्टपिण्डग्रहेणैव निमित्तं गृहीतमिति पराशयः ।

निमित्तोपलक्षणरहिते इति । निमित्तोपलक्षणाभ्यां रहिते शब्दे ।

अन्तर्भूतोपलक्षणे इति । अन्तर्भूतमुपलक्षणं पाकादिक्रिया यत्र तस्मिन् ।

तटस्थोपलक्षणे इति । तटस्थमनन्तर्भूतमनुपलक्षणं शब्दादिर्यस्य तत्र ।

विशेषवन्निमित्त इति । विशेषवद्दुःखासंभेदादिविशेषान्वितं निमित्तं सुखा-दिरूपं यस्य तत्र ।

निमित्तसङ्कोचनिकयेति । सुखादिसङ्कोचनिकया ।

विदितवृत्तान्ततयेति । येन गवयशब्दस्य गवयत्ववाचकत्वलक्षणो वृत्तान्तो विदितः स इत्यर्थः ।

अनन्तरमेव वक्ष्यतीति । **न च यथेत्यादिना** ।

इत्युक्तमिति । सादृश्यविशिष्टपिण्डोपक्षेपे निमित्तस्याप्युपक्षेपादित्यनेन ।

टीयाम् ॥ अनवगतसंबन्धमिति । गवयत्वेन सहागृहीतसङ्केतम् । **एतदिति ।** गवयत्वम् ।

तत इति । गवयपदात् ।

तदवगमात् गवयत्वावगमात् ।

परस्पराश्रयेति । गवयशब्दाद् गवयत्वावगमे सङ्केतवेदनम् । सङ्केतवेदने च गवयपदाद् गवयत्वावगम इति ।

उपलक्ष्यते इति । गवयत्वमिति योगः ।

उने ॥ न च यथेत्यादिना । न च गोसादृश्येनेत्यादिना च यट्टीकाकृता पराभिप्रायद्वयमाशङ्कितम्, तदेव संकलय्य स्पष्टयति— **एतावदेवेत्यादिना ।**

तस्येति । सादृश्यस्य ।

भिन्नेति । [652a] भिन्नप्रधानसामान्या या व्यक्तिः, तस्यां यद्गुणावयवकर्मसामान्यानां बाहुल्यं तद्रूपत्वात् ।

तस्येति । जातिभेदस्य ।

प्रसिद्धेति । यो जातिभेदः सदृशादिशब्दैः प्रत्याय्यते स किं प्रसिद्धोऽप्रसिद्धो वेति संशयः ।

तत्रेति । प्रसिद्धाप्रसिद्धयोः ।

महिषत्वादिकमिति । प्रसिद्धं हि महिषत्वादि । यद्यपि शृङ्गलाङ्गुलादिभिर्गोसदृशे महिषादौ वर्तमानं गोशब्देन न निरसितुं शक्यम्, तथापि तत् ज्ञातत्वेनाजिज्ञासिततयैव सादृश्योपस्थापनस्यानुचितो विषय इत्यत एव निरस्तमित्यर्थः ।

अन्यथेति । अनुचितविषयतया महिषत्वादिकं यदि न निरस्येत ।

अप्रतीकारादिति । महिषादेरपि गवयशब्दवाच्यत्वप्रतीतौ कः प्रतीकारः ?

चतुर्धेति । क्वचिदुपमानस्यैव केवलस्य जातिमत्त्वे औपम्यम्, यथा दर्पण इव चन्द्रः । क्वचिदुपमेयस्यैव जातिमत्त्वे औपम्यम्, यथा चन्द्र इव मुखम् । चन्द्रस्यैकत्वात्

जातेरभावः। क्वचिद् द्वयोरपि जातिमत्त्वे सत्यपि भिन्नजातित्वे औपम्यम्, यथा मुखमिवारविन्दम्। क्वचिद् द्वयोरपि एकजातित्वे सति औपम्यम्, यथा अदोऽरविन्दमिवेदमरविन्दम्। एवं चतुर्धा सादृश्यगतिः। पञ्चमः प्रकारो नास्ति।

तदिति। सामान्यम्।

क्वचिदित्यादि। यथा धूमो वह्न्यविनाभूतः क्वचिद्गृहीतो गिरौ धूमे गृह्यमाणे स्मर्यते, तथा सादृश्यं सामान्याविनाभूतं क्वचिद् गृहीतम्। इह गवये सादृश्ये गृह्यमाणे स्मर्यते तावत् तस्मादत्र सामान्यमन्तर्भाव्यैव सादृश्यं गृह्यते इति पराशयः।

न त्विह तदवगतमिति। न हि गवये गवयत्वाविनाभूतं सादृश्यं गृहीतं येन स्मर्यते।

तद्वानेवेति। सादृश्यवान्।

उपलक्षणं विहायेति। तटस्थमेव सादृश्यं न शब्देन वाच्यमित्यर्थः।

जातिविशेषवानेवेति। न तु सादृश्यवान्।

अनियतकोटीति। पञ्चकोटिकोटित्रयावलम्बी सन्देह एव **जरन्नैयायिकै**-रुपप्लुतः संबन्धपरिच्छेद इत्युच्यते इति। अनेन कः परिप्लवार्थ इत्यादि यद् **वैशेषिके**णोक्तं तत् समाहितम्।

एतेनेति। गवयत्वे गृहीते एव संबन्धो गृह्यते इत्यस्यार्थस्य **टीकाकृता** अर्थतो भणनेन।

समानजातीयत्वानुमानादिति। मनस्त्वादिसामान्यानुमानात्।

सामान्यं वा न तस्य प्रवृत्तिनिमित्तमिति। यदि सामान्यानवगतावपि समयग्रहोऽभ्युपेयते।

यद्यपीति। यदि यथा गौस्तथा गवय इति वाक्यादेव गवयत्वमवगतमभ्युपगम्यते, तथापि यावदिदं गवयत्वं गवयशब्दवाच्यमित्येवं सङ्केतो न गृह्यते तावत् तत्र प्रयुज्यमानत्वादिति हेतुरसिद्ध एव। यतः सङ्केतमगृहीत्वा असति वृत्त्यन्तरे गवयत्वविषयोऽयं गवयशब्दप्रयोग इति ज्ञातुमशक्यत्वात्। अथ प्रागेव प्रमाणान्तरात् संज्ञासंज्ञिसंबन्धावगमोऽभ्युपेयते, तदा प्रयुज्यमानत्वादित्यनुमानेन किं कार्यं संबन्धपरिच्छेदस्य प्रमाणान्तरादेव सिद्धत्वात्।

अत एवेति । यत एव गवयत्वावगमेऽपि संबन्धानपगमे हेतुरसिद्धः, प्रमाणान्तरात्तु संबन्धापगमे निरर्थकमनुमानम् । अत एव यदि कश्चित् प्रत्यक्षेऽपि गवये[652b] तत्र प्रयुज्यमानत्वात् इत्यनुमानमभ्युपेयात् तदापि निरर्थकमेव संबन्धानवगमेन हेतोरसिद्धत्वात् ।

संबन्ध्यवगमे इति । यदि गवयत्वमवगतमभ्युपगम्यते तदेत्यर्थः ।

ननु यथा गौर्गवयस्तथेति वाक्यं तदा संबन्धं बोधयेद् यदि गवयपदमस्य वाक्यस्याङ्गं स्यात् । न चेदमङ्गमकृतसङ्केतत्वेनावाचकत्वादित्याह—**अवाचकस्यापीति** ।

उपयोक्ष्यते इति । संबन्धबोधने ।

उपमानपक्ष इवेति । यदा अतिदेशवाक्यमुपमानेऽन्तर्भवति, तदा यथा गवयपदसमभिव्याहृतवाक्यमेव संबन्धं बोधयति । अवाचकस्यापि च समभिव्याहार उपयुज्यते । अतिदेशवाक्यसहकृतस्यैव सादृश्यज्ञानस्य संज्ञासंज्ञिसंबन्धपरिच्छेदकत्वात् ।

तन्निरासार्थमिति । गवयपदसमभिव्याहृतवाक्यमेव संबन्धं बोधयिष्यतीत्यस्य निरासार्थम् ।

अत एवेति । यत एव वाच्यवाचकसंबन्धावसायो नास्ति ।

व्याप्तिपरतापीति । यो गोसदृशः स गवयशब्दवाच्य इत्येवम् ।

संबन्धिनोऽनवगमादिति । गवयशब्दवाच्यत्वस्य कुत्राप्यग्रहात् ।

न च व्यतिरेके तात्पर्यमिति । यः पुनर्न गवयशब्दवाच्यः, स न गोसदृशो यथा घट इत्येवमपि न व्याप्तिपरतेत्यर्थः ।

सङ्केतयितुरिति । न हि घटो गोसादृश्याभावात् न गवयशब्दवाच्यः, किं तु सङ्केतयितुरभिप्रायाभावादित्यर्थः ।

सत्प्रतिपक्षत्वाच्चेति । यो गवयशब्दवाच्यो न भवति, स गोसदृशो यथा गवान्तरमित्येवम् ।

यद्यपीत्यादि । गवये प्रत्यक्षेऽपि किं गवयत्वजातिमान् पिण्डो वाच्य उत गोसादृश्यवानिति विनिगमनायामेकतरस्य निश्चये यद्यपि हेतुर्नास्ति गवयत्वसादृश्ययोर्द्वयोरपि प्रत्यक्षत्वात् तथाप्युपमानं सफलमेव यतो गवयत्वं वाच्यमस्तु सादृश्यं वा परं संबन्धोऽधुनैवावधार्य इत्यर्थः ।

टीयाम् ॥ **सादृश्यविशिष्टपिण्डाभिधाने** इति । यदि सादृश्यविशिष्टः पिण्डो गवयशब्दवाच्योऽभ्युपेयते तदेत्यर्थः ।

शब्दादिति । गवयशब्दात् ।

तत्रेति । सादृश्ये ।

कल्पनीयमिति । आश्रयणीयम् ।

विशेषे इति । अश्वादिव्यवच्छिन्ने । गवयस्वरूपे ।

गवयपदमवस्थापयितुमर्हतीति । यदि हि सादृश्यमात्रं निमित्तीकृत्य गवयपदं प्रवर्तते तदा सर्वस्य वाचकं स्यात्, सर्वस्यापि येन तेन सह सादृश्यादित्यर्थः ।

कल्पनागौरवमिति । गोसादृश्याभिधानपक्षे गोत्वं सादृश्यं च गवयपदवाच्यं कल्प्यमिति गौरवम् । गवयत्वाभिधानपक्षे तु केवलगवयत्वसामान्यमेवेति लाघवम् । शेषमुभयत्रापि समम् ।

करभसंज्ञाप्रतीतिफलमिति । करभसंज्ञाप्रतीतिः फलं यस्य तत् ।

उने ॥ **उपलक्षकपदेति** । साधर्म्यपदम् ।

जरन्मीमांसकमिति । **जरन्मीमांसका** हि गोसादृश्यस्य गवयस्थस्य ज्ञानमुपमानफलमाहुः ।

शाबरं मतमिति । **शबरस्वामी** तु गवयस्थो गोसादृश्यसाक्षात्कार उपमानं प्रमाणं गोष्ठं सादृश्यज्ञानं च फलमाचष्टे ।

प्रायोवाद इति । अदोऽरविन्दमिवेदमरविन्दमित्यादिषु एकजातावपि सादृश्यस्य दर्शनात् ।

टीयाम् ॥ **तत् किमिदानीमिति** । अहो परं गोसादृश्यं गवयस्थं प्रत्यक्षमेव गोष्ठमप्रत्यक्षमित्येवमेकस्यापि सादृश्यस्य [653a] प्रत्यक्षत्वाप्रत्यक्षत्वे वदन् व्यक्तिभेदाद् भेदमङ्गीकुरुषे तथा चेत्यर्थः ।

उने ॥ **तथापीति** । सादृश्यस्यैकत्वेन गवयस्थे सादृश्ये गृहीते गोगतस्यापि सादृश्यमात्रस्य ग्रहणं यद्यपीत्यर्थः ।

व्यक्त्यवच्छिन्नस्येति । सादृश्यस्य ।

न गोव्यक्त्यवच्छेदोऽवगत इति। गोव्यक्तेरेव विशेषणभूताया अनवगमाद् विशेषणे चानवगते विशेष्यानवगतिः॥

टीयाम्॥ तदेवेदमितीति। यत् कालाक्ष्यां गोव्यक्तौ गृहीतं गोत्वम्, तदेवेदं स्वस्तिमत्यां गोव्यक्तौ गृह्यमाणम्।

एतदेव तदिति। यत् स्वस्तिमत्यां गृह्यमाणमास्ते एतदेव तत् कालाक्ष्यां गृहीतम्।

उने॥ अकृतेति। अकृतसमया या संज्ञा तया समानाधिकरणं यद् वाक्यं यथा गौस्तथा गवय इत्यादि। तस्य योऽर्थस्तदुपमानम्।

विषयिते [ति]। संज्ञासंज्ञिसंबन्धो हि विषयः स्वरूपं च परिच्छित्तिरूपं शाब्दादिप्रमाया अपि स्त इति तद्वैलक्षण्ये उपमानप्रमाया असिद्धे॥

॥ उपमानं सम्पूर्णम्॥

उने॥ तत्प्रमाण्यमिति। शब्दप्रामाण्यम्।

विवक्षितस्यार्थस्येति। शब्दो न प्रमाणमिति शब्दप्रमाण्यनिषेधस्य।

भेदस्त्विति। प्रमाणान्तरेभ्यः।

लेशतश्चेह भेदस्य निरूपणप्रकारमेवाह—**व्यावर्तकेति।**

तथेति। व्यावर्तको धर्मः।

तदेवेति। लक्षणमेव।

यद्यपि शब्दे प्रामाण्यविप्रतिपत्तिस्तावन्न केनापि शक्या कर्तुम्, भेदविप्रतिपत्तिस्तु परीक्षापर्वणि निराकरिष्यते, तथापि लक्षणविप्रतिपत्तावनिराकृतायां कथमिव शब्दलक्षणं वचनीयं स्यादित्याह—**तत्रेत्यादि।** तत्र शब्दलक्षणे यः कश्चिद् विप्रतिपद्यते तं प्रति पुनः परीक्षावतारोऽस्ति। आप्तोपदेशः शब्द इति किमाप्तानामेव संवादित्वं प्रतिपाद्यते इत्यादिकया शब्दलक्षणपरीक्षयैव शब्दलक्षणविप्रतिपत्तिर्निराकार्येत्यर्थ इति मनसि कृत्य। सिद्धवत्सिद्धमिव। न त्वनुमानस्येवास्य प्रामाण्यं व्यवस्थाप्य संगति**भाष्यम्—अथ शब्द** इत्येतदुपमानानन्तरमित्यादिना व्याख्याय लक्षणमवतारयतीति—**एके** इति **भूषणकाराः।**

स्मरणमिति । संस्कारः ।

पञ्चमेन कर्तृकर्मणी निरस्येते इति । साधनपदाभावे हि यतः समयबलेन सम्यक्परोक्षानुभवः स शब्द इत्युच्यमाने कर्तृकर्मणोरपि शब्दत्वं प्रसज्येतेत्यर्थः ।

अपरे त्विति । जयन्तप्रभृतयः ।

प्राच्यानामिति । भूषणकाराणाम् ।

अप्रसङ्ग एव तस्या इति । प्रमाणाधिकारेण प्रमाणस्यैव शब्दत्वाभ्युपगमात् ।

ननु यदि चेष्टायाः शब्दे एव प्रवेशस्तत् कथं शब्दे एव शब्दव्यवहारो न चेष्टायामित्याह—**शब्द एव त्विति ।**

तेऽपीति । भूषणकाराः ।

न च स्मृतीति । शब्दस्मृतिं फलं जनयन्ती चेष्टा शब्दे एव प्रमाणमिति न वाच्यमित्यर्थः ।

स्मृतिरिति । शब्दस्मृतिः ।

अस्या इति । अर्थे प्रमाणं भवन्त्याश्चेष्टायाः ।

यदि चेष्टेति । व्यापारो हि व्यापार्यविनाभूतो दृष्टः । तद् यदि शब्दस्मृति-व्यापारः सन्नर्थगमकः, तदा चेष्टोपधाने सत्येवार्थगमकः स्यात् । यदा तु चेष्टोपधानं विना-प्यवगतः शब्दोऽर्थं गमयति, तदा कथं शब्दस्मृतिश्चेष्टावान्तरव्यापार इति वक्तुं शक्य-मित्यर्थः ।

एवं सतीति । शब्द एव तु चेष्टोत्पादित[653b]स्मरणसमारूढः प्रमाणमर्थे इत्यभ्युपगमे सति ।

तत इति । चेष्टातः ।

अगृहीतसमयत्वादिति । न ह्येडमूकेनायं हस्तद्वयारभ्यश्चेष्टाविशेषो घट-शब्दवाच्य इत्येवं सङ्केतो गृहीतोऽस्ति, येनासौ तं चेष्टाविशेषं गृहीत्वा घटशब्दं स्मरेत् स्मृतश्च शब्द एडमूकस्यार्थे प्रमाणं भवेदिति भावः ।

सिद्धान्ती प्राह—**अत एवेति** । अत एव समयग्रहाभावादेव तमेडमूकं प्रति समयबलेन प्रवर्तमानायाश्चेष्टाया यथा शब्दकुण्ठत्वं तथार्थेऽपि कुण्ठत्वमेव । यथैडमूकस्य

समयाग्रहाच्चेष्टा न शब्दस्मृतौ हेतुस्तथा समयाग्रहादेवार्थावगमेऽपि न हेतुरतो नैतावतापि चेष्टार्थे प्रमाणमित्यर्थः।

एवं तर्ह्येडमूकस्यार्थे कथं व्यवहार इत्याह—**व्यवहारस्त्विति**। यदा ह्येडमूकः कम्बुग्रीवादिमदभिप्राये सति चेष्टाविशेषं पश्यति तदभावे च न पश्यति, तदासौ घटार्थाभिप्रायाविनाभूतं चेष्टाविशेषं गृहीत्वा अयं नरः कम्बुग्रीवादिमद्वस्त्वभिप्रायवान् चेष्टाविशेषवत्त्वात् प्राक्तननरवदित्यनुमानादर्थव्यवहारं करोतीत्यर्थः।

कृतसमयापीति। ऊर्ध्वत्वविशिष्टा तर्जन्यङ्गुली दशसंख्यावाचिकेत्येवं कृतसङ्केतापि चेष्टैवं किं न स्यात् यथा अकृतसङ्केता चेष्टानुमानं प्रमाणमिष्यते, एवं कृतसङ्केतापि किमित्यनुमानं प्रमाणं नेष्यते ? किमितीयमप्रमाणमिष्यते इत्यर्थः।

उत्तरम्। **अविनाभावाभावादिति**। यथा सङ्केतादूर्ध्वा तर्जनी दशसङ्ख्यावाचिका तथा सङ्केताद् विंशतिसङ्ख्यादिवाचिकापि स्यात् पुरुषेच्छामात्राधीनत्वात् समयस्येत्यूर्ध्वतर्जनीचेष्टाविशेषस्य दशसङ्ख्या सहाविनाभावाभाव इत्यर्थः।

एतावता तावत् पदार्थास्मारकत्वात् चेष्टा अप्रमाणमित्युक्तम्, अथ पदार्थान् स्मारयन्त्यप्यप्रमाणमित्याह—**स्मारयतु वेति**।

सेति। चेष्टा।

शङ्खध्वनिवदिति। यथा शङ्खध्वनिर्वादकस्य रणाभिप्रायं स्मारयन् रणे प्रवर्तयति, न तु किञ्चिदनुमापयति येन प्रमाणं स्यादेवं चेष्टापि॥

कारकेष्वित्यादि। कारकेषु मध्ये प्रातिपदिकार्थमात्रं ज्ञापयति क्रियासु च मध्ये वर्तमानत्वमात्रं ज्ञापयतीत्यर्थः।

पदैकदेशविभक्तिविशेषवदिति। पदैकदेशो यो विभक्तिविशेषः प्रथमादिः, तस्माद्।

यथा विषयविशेषे शब्दान् नियमयन्तीति। यथा भोजनप्रस्तावे सैन्धवमानयेत्युक्ते लवणनियमः।

कथं तर्हीत्यादि। यदि चेष्टा कारकेषु प्रातिपदिकार्थमात्रज्ञापकत्वात् क्रियासु च वर्तमानमात्रज्ञापकत्वात् न पदार्थानां विशेषणविशेष्यभावं ज्ञापयति तदा कथं ततश्चेष्टातो विशेषणविशेष्यभावेनानयनादिव्यवहाराः ?

एतच्चेति । चेष्टाया अप्रामाण्यम् ।

ऐतिह्याद्यन्तर्भावयतेति । ऐतिह्यं शब्दे, अर्थापत्तिमनुमाने अन्तर्भावयता ।

अपभ्रंशेति । गावीगोणीप्रभृतयोऽपभ्रंशाः ।

ध्वनीति । काकुध्वनिः ।

पदैकदेशानिति । कृष्णे तृतीया दशमी च रात्रावित्यादिपदानामेकदेशान् [1]कृतृरेत्यादीन् ।

सांव्यवहारिकानपीति । व्यवहारप्रवर्तकानपि ।

वाक्यज्ञानस्य हि शब्दप्रमाणत्वेऽभ्युपगम्यमाने वाक्यस्य यदभीष्टं प्रमाणत्वं [654a] तन्न स्यादित्यन्यथा व्याख्याति—**ज्ञायमानं तदित्यर्थ** इति ।

उत्तरत्र तदर्थज्ञाने । यथाश्रुतं वाक्यार्थज्ञानं शब्द इत्यर्थः ।

ननु वाक्यार्थज्ञानस्य कथं शब्दत्वमित्याह—**किं त्विति ।**

तत्रापीति । वाक्यार्थज्ञानेऽपि ।

अयं न्याय इति । असाधारणत्वलक्षणः । यदसाधारणं तत् सन्निहिततरं सन्निहिततमं चेति सर्वत्र चायं विवेक इत्यर्थः ।

हानादिबुद्धिः परामर्शलक्षणेति । परत्र घटोऽस्तीति वाक्यार्थो हेय उपादेयो वा तज्जातीयत्वात् । यदेवं तदेवं यथा प्राक्तनः परत्र घटोऽस्तीति वाक्यार्थः । तथा चायमित्येवं या परामर्शलक्षणा हानादिबुद्धिर्हीयते अनयेत्यादिव्युत्पत्त्याश्रयणात् सा वाक्यार्थज्ञानप्रामाण्ये फलम् । [2]न तु तस्माद्धेय उपादेयो वेति निगमनरूपा फलम् । सा हि परामर्शलक्षणस्य अनुमानस्य फलम् ।

एतदेवाह—**इतरस्या अनुमानफलत्वादिति ।**

अनेनेति । वाक्यार्थेनोपदेशपदेन ।

चेष्टादयोऽपि निरस्ता भवन्तीति । वाक्यार्थेनोपदेशपदेन यथा निराकाङ्क्षादयो निरस्ता वाक्यानङ्गत्वात् तथा……चेष्टादयोऽपीत्यर्थः ।

1 J °त्तिरेत्या° 2 J ननु

स्वार्थद्वारकं चेत्यादि । वाक्यं ह्याकाङ्क्षादिमत् । आकाङ्क्षादिकं च स्वार्थद्वारकं पदानां स्वार्थपूर्वकम् । पदानां स्वार्थश्च आकाङ्क्षादौ कारणं सङ्केतग्रहे गृह्यते । ततः सङ्केतग्रहे एकैकस्य पदस्य प्रतिसन्धाने पदार्थस्मरणे पदार्थानां योग्यताद्यनुसन्धाने प्रकरणादिके सत्येव स्यादिति वाक्यार्थेनोपदेशपदेन संगतिग्रहात् युक्तं भवतीत्यर्थः ।

तदनेनेति । पदार्थस्मरणाद्यनन्तरव्यापारेण वाक्यार्थेनोपदेशपदेनैव सामान्यलक्षणलाभ इति सामान्यं दृष्टादृष्टार्थोभयभेदव्यापकं यल्लक्षणं वाक्यजप्रमासाधकतमः शब्द इत्येतत् तस्य लाभः तत्र वाक्येत्यनेन आकाङ्क्षादिविरहिणां पदानां व्युदासः । जेत्यनेन वाक्यविषयश्रोत्रप्रत्यक्षस्य । प्रमेत्यनेन पदार्थस्मरणस्यानाप्तवचसां च । साधकेत्यनेन फलस्य । तम इत्यनेनासावरत्र इति प्रत्यक्षस्य व्युदासः ।

अयमिति । वाक्यज्ञानं तदर्थज्ञानं वा ।

यथाश्रुते इति । विधिपरे ।

टीयाम् । नियोज्यप्रयोजने इति । नियोज्यस्य प्रयोजनं ययोस्ते तथा ।

ते हीति । आज्ञाध्येषणे ।

नियोक्तृप्रयोजने इति । नियोक्तुः प्रयोजनं ययोस्ते तथा ।

उने ।। यद्यपि लक्षणयेत्यादि । उ[प]देशपदेन विध्यर्थेनापि लक्षणया परप्रयोजनवद्वचनमात्राभिधायकेन यथा परप्रयोजनवद्वचनमात्रं संगृह्यते तथा लक्षणयाज्ञाध्येषणे अपि ग्रहीतुं शक्येते । परस्थाने प्रयोक्तृपदं प्रक्षिप्य परप्रयोजनवदित्यत्र यथा परपदे उपन्यस्ते परप्रयोजनवद्वचनमात्रं लभ्यते, तथा परस्थाने प्रयोक्तृपदे न्यस्ते आज्ञाध्येषणे अपि लब्धुं शक्ये इत्यर्थः ।

तदसंग्रहे इति । आज्ञाध्येषणासंग्रहे ।

स्वर्गापवर्गोपायविषयस्येति । स्वर्गापवर्गयोरुपायोऽग्निहोत्रहवनात्मज्ञानलक्षणो विषयो यस्य तस्य ।

शब्दविशेषस्येति । अग्निहोत्रं जुहुयात् स्वर्गकामः । आत्मा [वा]रे ज्ञातव्य इत्यादेः ।

ननु यदि शब्दविशेषस्य लक्षणारम्भोऽयं तत् कथमुपदिश्यतेऽनेनेत्युपदेश इत्यादिना सामान्यलक्षणतया व्याख्यदित्याह—**सामान्येति ।**

यद्येवं लक्षणां विनैव सामान्यलक्षणाभिधायक[654b]माप्तवाक्यं शब्द इत्येव **सूत्रं** किमिति न सूत्रितमित्याह—**लाक्षणिकेति** ।

उभयलक्षणलाभ इति । लाक्षणिकस्योपदेशपदस्य प्रयोगः सामान्यविशेषलक्षणयोर्लाभाय **सूत्रकृता** चक्रे इत्यर्थः ।

अर्थगतमिति । यागादिगतं स्वर्गादि ।

तदपेक्षयेति । साधारणप्रयोजनापेक्षया ।

क्वचिदित्यादाविति । आदिपदात् कुतश्चिद् वेत्यत्र ।

प्रमाणं प्रमेति । प्रमाणग्रहणेऽनित्यबुद्धेर्ग्रहणं न स्यात्, [1]यतोऽनित्यायाः प्रमायाः पुनः साधकतमं प्रमाणमिति प्रमाणलक्षणम् ।

नित्यानित्यव्याप्तिमिति । नित्या प्रमेश्वरस्य । इतरेषां त्वनित्या, तयोर्व्याप्तिम् ।

विवृतादीनि । विवृतादीनि करणानि ।

कार्यविशेषेणेति । वेदप्रणयनलक्षणेन कर्त्रानुविहितौ भावाभावौ यस्य शरीरस्य तद्भावेनोपकरणम् । वेदप्रणयनं शरीरे सति स्यात्, तदभावे न स्यादिति कार्यविशेषं प्रति शरीरमुपकरणमवश्यापेक्ष्यमित्यर्थः ।

तदुपग्रहस्येति । शरीरेणोपग्रहस्य ।

तदिति । शरीरम् ।

तस्येति । ईश्वरस्य ।

भोगाभावादिति । यदि हीश्वरस्य भोगो भवेत्, तदा भोगायतनतया शरीरमिष्येत । न चास्य भोगोऽस्ति ।

कर्तृत्वनित्यत्वादिति । ज्ञानेच्छाप्रयत्नशालित्वं कर्तृत्वम् । तच्चेदीश्वरस्यानित्यं भवेत्, तदा तत् शरीरं विना न निर्वहतीति शरीरमिष्येत । कर्तृत्वं त्वस्य नित्यम् ।

---

1 J reads मनसो वहि·····················अनुभवत्वमारोपितं स्मृति॰ between य and तो. The passage is to be found in its proper place hereafter.

कार्यस्येत्यादि । यदि हि कार्यस्य कर्त्रा सह सोपाधिः संबन्धो भवेत्, तदा शरीरमुपाधिर्भवत् व्यापकतयेष्येत । न च कार्यस्य कर्त्रा सह सोपाधिः संबन्धः ।

ननु भवतु कार्यस्य कर्त्रा सह निरुपाधिः संबन्धः, परं यः कर्ता स शरीरीति कर्त्रापि सह शरीरस्य निरुपाधिः संबन्धो भविष्यति । ततश्च शरीरं व्यापकतया एष्टव्यमेवे-त्याह–**शरीरव्यभिचाराच्चेति** । स्वशरीरचालने शरीरं विनापि कर्तृत्वस्य भावात्, यः कर्ता स शरीरीति व्याप्त्यभावाच्चेत्यर्थः ॥

टीयाम्। यथोक्तरूपसम्पदिति। यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त[ता]दिः।

उने ॥ तत्त्वावधारणे इति । आप्तत्वनिश्चये ।

व्यापकानुपलब्धेरिति । निषेध्यस्याप्तत्वव्यवहारस्य [655a] व्यापको य आप्तत्वनिश्चयस्तस्यानुपलब्धेः ।

यथाश्रुतस्येति । आप्तिं दोषक्षयं विदुरित्यस्याप्तिलक्षणस्य ।

विशेषणान्तरप्रक्षेपे त्विति । आप्तिर्विप्रतारणादिकतिपयदोषक्षय इत्येवम् ।

टीयाम् ॥ यावतीत्यादि । सामान्यादौ सामान्यविशेषवत्त्वादिहेतुर्नास्तीति तस्मादन्यः पक्षीकार्य इत्यर्थः ।

उने ॥ प्रयोगान्तरोपादानमिति। सामान्यविशेषवत्त्वादेः प्रयोगान्तरस्योपादानम् ।

प्रत्यक्षत्वं कुतः सेत्स्यतीति । परप्रयोगेष्वेव प्रयोगान्तरस्यापि सत्प्रतिपक्ष-तया स्वर्गादीनां प्रत्यक्षत्वासाधकत्वात् ।

प्रत्यक्षमिति । ज्ञानम् ।

तत्सामग्रीति । प्रत्यक्षसामग्री ।

नियतविषयत्वादिति । अव्यवहितोद्भूतरूपमहदनेकद्रव्यादि हि चक्षुरादे-र्विषयः ।

मनसो बहिरस्वातन्त्र्यादिति । मनसो बहिःस्वातन्त्र्येऽन्धबधिराद्यभाव-प्रसङ्गात् ।

तस्मादापाततस्तावत् सत्प्रतिपक्षा एवैते इति । यदि हि योगिप्रत्यक्षं न स्वर्गादिविषयं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदिति परानुमानं स्यात्, तदा योगजे प्रत्यक्षे सिद्धे धर्मिग्राहकप्रमाणविरुद्धम् । असिद्धे तु आश्रयासिद्धो हेतुरिति सामान्यविशेषवत्त्वादयो हेतवो न सत्प्रतिपक्षा भवेयुः । यदा तु स्वर्गादयो न प्रत्यक्षज्ञानगोचरास्तत्सामग्रीरहितत्वादिति परानुमानं स्यात्, तदाऽस्यानुमानस्यापाततो निर्दूषणत्वात् सामान्यविशेषवत्त्वादयः सत्प्रतिपक्षा एवेत्यर्थः ।

तत्रेति । स्वप्ने ।

अबाधनादिति । यथा शुक्तौ रजतारोपेणेदं रजतमितिबाधकं भवति, तथा स्वप्ने नायमनुभव इति बाधकाभावात् ।

स्मृतित्वानुल्लेखादिति । यथा च शुक्तौ रजतारोपे शुक्तिरेवायमिति शुक्त्युल्लेखः स्यात् तथा स्वप्ने स्मृतिरेवायमिति स्मृतित्वानुल्लेखात् ।

अनुपलब्धस्येत्यादि । यदि स्वप्नेऽनुभवत्वमारोपितं स्मृतिरेव वास्तवी तदात्र स्वशिरश्छेदादेरवभासो न स्यात्, तस्य कदाचिदप्यननुभूतत्वात् । अनुभूतस्यैव च स्मरणम् । अस्ति च स्वशिरश्छेदादेरवभासः स्वप्ने । तस्मादपि न स्मृतिः स्वप्ने इत्यर्थः ।

असाविति । स्वप्नेऽसन्निहितदेशकालार्थसाक्षात्कारः ।

अथ स्मृतिविपर्यासपदं विकल्प्य परिहरति—**यदि स्मृतीति** । यदि स्मर्यमाणस्य विषयस्य यदनुभूयमानतया ग्रहणं स स्मृतिविपर्यास इति तात्पर्यार्थः ।

अथ स्मृतावेवेति । अथार्थस्मृतेरेव यदनुभवत्वेन ग्रहणं स स्मृतिविपर्यास इति भावार्थः ।

प्रागेव निरस्त इति । न चारोपितमित्यादिना ।

न च संभवत्यपीति । स्मृतावेवायमनुभवत्वविपर्यासः ।

न हीत्यादिः । यदि हि स्मरणमेवानुभवत्वेन स्वप्ने गृह्यत इत्यभ्युपेयते, तदा तदाकारेण स्मरणरूपव्यवसायस्य विषयीभूतोऽर्थ इदमाकारेण ज्ञानावच्छेदकः सन्नर्थोऽनुव्यवसीयते इति प्राप्नुयात्, न चैतद् भवति । न हि रक्ताकारेण व्यवसितोऽर्थो नीलमहं जानामीत्येवं नीलाकारेण ज्ञानविशेषकः सन् मानसप्रत्यक्षेण गृह्यते यथाव्यवसायमेवानुव्यवसायस्य

भावात् । तस्माद् यदि स्वप्ने स्मृतिरेवानुभवत्वेन [655b] गृह्यते तदा स घट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्तं घटमनुभवामीत्येवं तदाकारविशिष्टस्यैव घटज्ञानस्य ग्रहणं भवेत् । न त्विमं घटमनुभवामीत्येवमिदमाकारविशिष्टस्य घटज्ञानस्य ।

एतदेवाह—**तथा चेति** ।

तच्चेति । सत्यत्वम् ।

तथात्वप्रसङ्गादिति । यदि कस्यचित् स्वप्नानुभवस्य निर्हेतुकं सत्यत्वमिष्यते, तदा सर्वस्वप्नज्ञानानामपि सत्यत्वं प्रसज्येत, निर्हेतुकत्वस्य तत्रापि विद्यमानत्वात् ।

अत्रेति । कस्यचित् स्वप्नानुभवस्य सत्यत्वे ।

स च कर्मजवद् योगजोऽपीति । यथा धर्मो जागादिकर्मणो जायते, तथा योगाभ्यासादपि ।

योगविधेरिति । योगकरणात् ।

धर्माजनकभावनेति । कामातुरस्य सर्वत्र स्त्रीभावना ।

तस्मादिति । यतो योगजधर्मोऽपि प्रत्यक्षसामग्रीत्वेनोक्तनीत्या स्थापितः, तदनुगृहीतं च मनः स्वर्गादिविषयेऽस्त्येव प्रमाजनकं तस्मादित्यर्थः ।

परमसर्वज्ञसिद्धाविति । कार्यत्वादिहेतुभिरीश्वरस्य सिद्धौ ॥

तद्भावेऽपीति । अवान्तरसर्वज्ञसद्भावे ।

परम्पराप्रतिबन्धोऽनुमानस्येति । न लिङ्गविकल्पं विना लिङ्गिविकल्पो न लिङ्गविकल्पो लिङ्गानुभवं विना । न लिङ्गानुभवो लिङ्गं विना । नाविनाभूतं लिङ्गं विना लिङ्गिनमिति स्वलक्षणाप्रतिभास्यपि पारम्पर्येण लिङ्गिस्वलक्षणप्रतिबन्धात्, तत्राविसंवादकोऽनुमानविकल्प इति ।

टीयाम् । अर्थाभिप्रायेणेति । अर्थज्ञान इत्याप्तग्रहणेनेत्यादि इति हेतोराप्तग्रहणेन तेषामुपदेष्टृणामविसंवादित्वमाप्तत्वविनिश्चय इत्यर्थः ।

अहो **नैयायिक,** त्वया फलत्वेन यद्युच्येत विसंवादित्वमपि फलत्वेन किमर्थमुच्येतेत्याह—**ततश्चाप्तत्वनिश्चयाद्य** उपदेशस्तस्मादर्थविनिश्चयो वाक्यार्थविनिश्चयः फलं भवत्वित्येतदर्थम् ।

उने ॥ अर्थसाक्षात्कारः प्रत्यक्षमितिवच्च योजनेति । अर्थस्य साक्षात्कारः प्रत्यक्षमिति **बौद्धसूत्र**वदाप्तोपदेशः शब्द इत्यस्मिन् **सूत्रे** योजना कार्या । अयं भावः, यथा **बौद्धा**नामर्थे साक्षात्कारिणीं प्रमां जनयन्नर्थस्य साक्षात्कारः प्रत्यक्षं प्रमाणं भवति, एवमाप्तोपदेशोऽपि ।

तदिदमुक्तम्—**तेनायमर्थ** इति ।

तत्सहाय इति । आप्तत्वनिश्चयसहायः ।

टीयाम् ॥ आप्तवादाविसंवादसामान्यादिति । आप्तवादस्य यदविसंवादसामान्यमविसंवादित्वेनार्थवत्त्वेन व्याप्तिस्तस्मात् । आप्तवादोऽविसंवादित्वेन यतो व्याप्तस्तत आप्तवादस्याविसंवादित्वेऽनुमानतेत्यर्थः ।

उने ॥ अत्रापीति । कर्मसाधनत्वपक्षेऽपि ।

उपदर्शितार्थप्राप्तिनिश्चयस्तद्द्वारार्थतथात्वनिश्चयो वा शब्दस्य फलमिति उक्तं तात्पर्यार्थद्वयमपि **सूत्रोक्त**त्वेन स्पष्टयति—**उपदिश्यमानं** इति ।

तथात्वेन निश्चित इति [1]**वेति** । उपदिश्यमानोऽर्थः प्राप्तः । प्राप्त्या तथात्वेन निश्चितो यस्मादिति [2]वेति संपूर्णवाक्यं ज्ञेयम् ।

नन्वर्थप्राप्त्येत्यादि । परस्यायमाशयोऽयथार्थस्य तथाभाव इति **वार्त्तिकस्य** हि तात्पर्यमुपदर्शितार्थप्राप्तिनिश्चयोऽर्थप्राप्तिनिश्चयेन अर्थतथात्वनिश्चयो वा शब्दस्य फलमित्येत**दुक्तं भवती**त्यादिकया **अर्थस्य तथाभाव** इत्यन्तया **टीकया** व्याख्यातम् । एवं च यदार्थप्राप्त्या प्रवृत्तिसामर्थ्यापरनाम्न्या अर्थतथात्वं निश्चीयते, तदा अनया [656a] लिङ्गभूतयैव निश्चीयते । तत् कथमाह **वार्त्तिककारः—सोऽपि प्रत्यक्षादिति ?** अत्र च प्रत्यक्षेणेति यदुक्तं तदर्थानुवादात् ॥

टीयाम् । आप्त्या हीत्यादि । प्राप्त्यैव हि लिङ्गेनार्थस्य तथात्वं निश्चीयते, परं प्राप्तिरपि ज्ञातैवार्थतथात्वनिश्चयायार्हति ।

प्राप्तिज्ञानं च प्रायेण प्रत्यक्षादिति । प्राप्तिज्ञानाभिप्रायेण **वार्त्तिककृता** प्रत्यक्षादित्युक्तमित्यर्थः ।

---

1 J S चेति 2 S चेति

यद्येवं तर्हि सोऽपि प्रत्यक्षादिति कथं **वार्त्तिककृतो**क्तमित्यत आह**ोदयनः** **प्राप्तिनिश्चयेऽपीत्यादि** ॥ इदमुक्तं स्यात् यद्यप्यर्थप्राप्तिरूपलिङ्गेनैवार्थतथात्वं निश्चीयते तथाप्यर्थप्राप्तिलिङ्गं प्रायेण प्रत्यक्षम् । ततश्चार्थतथात्वनिश्चयस्य मूलभूतं प्रत्यक्षमस्तीति अर्थतथात्वनिश्चयेऽपि **वार्त्तिककृता** प्रत्यक्षेणेत्युक्तम् ।

यदा चार्थतथात्वनिश्चयः प्रत्यक्षादित्युक्तम्, तदा प्राप्तिनिश्चयः प्रत्यक्षादिति प्रागेवोक्तम् । प्राप्तिनिश्चयप्रत्यक्षत्वं मूलत्वादर्थतथात्वनिश्चय[1]प्रत्यक्षत्वस्य । एवं च न केवलमर्थतथात्वनिश्चये शब्दस्य व्यापारो नास्ति प्राप्तिनिश्चयेऽपीति दर्शितं भवति ।

अत्र चोभयोरपीति । यथा भावसाधनपक्षे आप्तत्वनिश्चयः शब्दफलम्, तद्द्वारा वाक्यार्थनिश्चयो वेति । यथा च कर्मसाधनपक्षेऽर्थप्राप्तिनिश्चयस्तद्द्वारा अर्थतथात्वनिश्चयो वा शब्दस्य फलमिति **बौद्धेन** शङ्कितम्, तथा भावपक्षे आप्तोक्तत्वनिश्चयेन कर्मपक्षे वार्थप्राप्त्यपरनाम्ना प्रवृत्तिसामर्थ्येन शब्दस्य प्रामाण्यनिश्चयः ।

फलमिति । शङ्कितुमुचितमपि न शङ्कितं **बौद्धेन** यतः कीदृशेन शब्दप्रामाण्यनिश्चये सत्येव हि अर्थनिश्चयः तत्तथात्वनिश्चयौ भवतस्ततश्च तयोः शङ्कनेनैव तदन्तर्भूतः शब्दस्य प्रामाण्यनिश्चयः ।

फलत्वेन शङ्कित इति मन्यमानेन । इति हेतोः ।

तमिममिति । अनन्तरोक्तफलचतुष्टयविषयमित्यर्थपरं तमिममित्येतत् **टीका**यामित्यर्थः ।

अभ्युपगमस्येति । अपि त्विन्द्रियसंबद्धेत्यादिनाभ्युपेतस्य पक्षस्य । यथा तु पूर्वपक्षे व्याख्यातं तथात्रापि द्रष्टव्यमिति नाव्याप्तत्वं निश्चय आगमार्थतया प्रतिपाद्यते, नापि प्राप्तिनिश्चय इत्येतदपि ज्ञेयमित्यर्थः ।

यद्येवमिति । यदि शब्दादेवार्थप्रतिपत्तिः ।

मनसेव घटस्येति । यथा घटस्य स्वातन्त्र्येण मनसा न ग्रहणम्, ज्ञानविशेषकस्य तु सतो ग्रहणमिष्यते इत्यर्थः ।

तदिति । भूतार्थोपदेशकत्वमेव ।

तथा चेति । भूतार्थोपदेशकत्वाभावे ।

---

1 J inserts °शब्दफलं तद्द्वारा वाक्यार्थनिश्चयो वेति यथा चक° between निश्चय° and प्रत्यक्ष°

तथा चेति । यदाप्तोक्तत्वेन किं निश्चीयते तदा ।

ज्ञातादुष्टत्वैरिति इन्द्रियैः कृत्वा । ज्ञाताप्तत्वेन तूपदेष्ट्रेति ज्ञातमाप्तत्वं यस्य तेनोपदेष्ट्रा कृत्वा ।

आप्तोक्तत्वस्य प्रागेवासिद्धेरिति । आप्तोक्तत्वमनैकान्तिकं न स्यात् परं तत् प्रथममेव न सिद्धम् ।

साध्यमपीति । अर्थवत्त्वम् ।

न तावत् तादात्म्यतत्प्राप्ती इत्यादि । तत्प्राप्ती संयोगः समवायो वात्र चानेन लिङ्गेनार्थवत्त्वं तदा साध्यं स्याद् यदि **बौद्ध**मते वचनमर्थात्मकमर्थादुत्पन्नं वा स्यात् **नैयायिक**मते अर्थसंयुक्तमर्थसमवेतं वा स्यात्, न चैतेष्वेकोऽपि वचनस्यार्थेन संबन्धः संभवतीति भावः ।

[656b] **परम्परयाप्यर्थादनुत्पत्तेरिति ।** अतीतानागतार्थानामसत्त्वात् ।

अर्थज्ञापकत्वमेवेति । [1]नार्थात्मकत्वं नार्थोत्पन्नत्वं नार्थसंयोगित्वं नार्थसमवेतत्वं वेत्यर्थः ।

तदेवेति । अर्थज्ञापकत्वमेव ।

अभ्युपगमे वेति । शब्दानां स्वातन्त्र्येणार्थज्ञापकत्वस्य ।

विवादविनिवृत्तेरिति । **नैयायिका**नां **बौद्धा**नां चायमेव विवादो यदुत **नैयायिकाः** स्वातन्त्र्येणैव शब्दा अर्थज्ञापका इत्याहुः, बौद्धास्तु शब्दा विवक्षावगमादिपरम्परयार्थज्ञापका इत्याहुः । तद् यदि **बौद्धा** अपि शब्दानां स्वातन्त्र्येणार्थज्ञापकत्वमभ्युपयन्ति, तदा विवादो निवृत्तः ।

ननु लिङ्गस्य स्वात्मा तावत् लिङ्गिसत्कज्ञानजनकः स्याद् यथा धूमलिङ्गस्य स्वात्मा वह्निलिङ्गिसंबन्धिज्ञानजनकः, ततश्च वचनेन लिङ्गेनार्थज्ञापकत्वरूपं शब्दानामर्थवत्त्वं नानुमीयताम्, तस्य स्वातन्त्र्येणास्माभिरनभ्युपगमात् । परं वचनस्य लिङ्गस्य सतो यत् स्वकीयात्मनो लैङ्गिकज्ञानजनकत्वं लिङ्गिरूपार्थसत्कज्ञानजनकत्वमस्ति, तदेव वचनलिङ्गेनानुमीयताम् । तस्य लिङ्गरूपवचनस्वात्मगतस्य लिङ्गिरूपार्थज्ञापकत्वस्य लिङ्गाधीनत्वेनास्वातन्त्र्यादिति पराशयमाशङ्कयाह—**न चेति ।**

---

1 J °त्मकं त्वर्थो°

तस्येति । लैङ्गिकज्ञानजनकत्वस्य ।

लिङ्गान्तरविषयत्वादिति । यथा हि धूमेन लिङ्गेन वह्निरेवानुमीयते, अयं धूमो वह्निज्ञानजनक इति त्वव्यभिचारित्वादिना लिङ्गान्तरेण तथा अत्रापीति ।

भूताभूतेति । सत्यासत्ये ।

प्रकारेति । प्रकारा घटपटादयः ।

व्यवहारेत्यादि । अर्थविशेषस्यानुभवो [1]व्यवहारश्च ताभ्यां व्यवस्थापिताप्यर्थविशेषसिद्धिर्नानुरोधितानुगृहीता स्यात् यदि वाक्यं ज्ञानमात्रमनुमापयेत् ।

व्युत्पत्तीति सङ्केतः ।

ननु ज्ञानविशेषादेवार्थविशेषः सेत्स्यतीति । ननु आप्तवाक्यं कार्यं सत् वक्तृज्ञानविशेषानुमानद्वारेणार्थविशेषानुमानमेव भविष्यतीत्यर्थः ।

तस्य चेति । ज्ञानस्य ।

कश्चिदित्यादि । अर्थेनाहितो य आकारस्तदादिरूपो विशेषो ज्ञानस्य यदि भवेत् तदासौ ज्ञानविशेषोऽर्थविशेषमनुमापयेत् ज्ञानस्य चाकारो विशेषोऽर्थाहितस्तदा स्याद्यद्यर्थं विना न भवेत् । यदा त्वतीतानागतादिगोचरज्ञानस्य साकारत्वमप्यस्ति बौद्धमतेऽर्थादनुत्पत्तिश्चातीतानागतार्थानामसत्त्वात्, तदा कथमिव ज्ञानस्याकारो विशेषोऽर्थाहितो भवेदित्यर्थः ।

अर्थ एवेति । नार्थाकारः ।

स इति । अर्थः ।

किमपरं तेन साधनीयमिति । ज्ञानसिद्धावेवार्थस्य सिद्धत्वात् तेन ज्ञानेन लिङ्गेन न किञ्चित् साध्यम् ।

स्यादेतदित्यादि । यदि ह्याप्तवाक्यं कार्यं सद् वक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमाश्रीयते तदेदं प्रागुक्तं दूषणं स्यात् । यदा त्वाप्तवाक्येन कार्येण वक्तृज्ञानं तदन्तर्भूत एवार्थोऽप्यवच्छेदकतया युगपत् साधयिष्यते, तदा न किञ्चिद्दूषणं भविष्यतीति भावः ।

---

1 J °श्चस्ताभ्यां

ननु वाक्येनार्थविशेषोल्लेखि ज्ञानं तदा साध्यते, यदि वाक्यं ज्ञानोल्लेखेनार्थविशेषाव्यभिचारि स्यात् । न चेदं तदव्यभिचारि भविष्यतीत्याशङ्कयाह––**यद्यपीति** । पदविभागादिविशेषरहितं सामान्येन वचनमर्थविशेषोल्लेखिज्ञानपूर्वकतां यद्यपि व्यभिचरति, तथापि यो वचनविशेषः पदकदम्बकरूपो यत्पदार्थजातं [657a] स्मारयति स स्मारितार्थज्ञानपूर्वक इत्यस्य व्यभिचारः ।

एवं चेति । यदि ह्याप्तवाक्यं कार्यं सद् वक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमेवेत्यभ्युपगम्यते, तदैव सङ्केतप्रयासवैयर्थ्यं प्रसज्यते । यदा त्वाप्तवाक्यादर्थविशेषोल्लेखिज्ञानसिद्धिरभ्युपेयते, तदा सङ्केतग्रहोऽपि सफल इति भावः ।

व्यभिचारादिति । गौरित्यादिर्हि पदकदम्बकविशेषः पदार्थजातं स्मारयति । न च तत्संसर्गज्ञानपूर्वक इत्यस्ति व्यभिचारः ।

विशेषेणेत्यादि । विशेषणविशेष्यभावेनावस्थितौ सत्यां यः पदकदम्बक इत्येतत् तत् संसर्गज्ञानपूर्वकतां न व्यभिचरतीत्यर्थः ।

तस्येति । अर्थतो विशेषणविशेष्यभावस्य ।

विशेषणादिति । यः पदकदम्बकविशेष इत्येतस्य ।

स्वरूपतोऽर्थतश्च तस्याभावेऽपीति । देवदत्त दण्डेन गामभ्याजेति । पदकदम्बकस्य न तावत् स्वरूपेणाविनाभावो देवदत्तादिशब्दस्य दण्डादिशब्दमन्तरेणापि भावात्, नाप्यर्थतोऽस्याविनाभावो देवदत्ताद्यर्थस्य दण्डाद्यर्थमन्तरेणापि भावादथ चास्माद् वाक्यादर्थप्रतिपत्तिरस्ति ।

भावेऽपीति । अर्थद्वारेण धूमवह्न्यादिशब्दानामविनाभावे सत्यपि धूमो वह्निरित्यत्र वाक्यार्थाप्रतीतेः ।

वाक्यार्थविशेषप्रतिपादकमिति । वाक्यार्थप्रतिपादनेन विना अपर्यवसितमित्यस्यार्थोऽयम् ।

तत्स्मारितार्थेति । तेन पदकदम्बकेन स्मारिता येऽर्थाः ।

अतिप्रसङ्गादिति । रासभोऽपि वह्निं गमयेत्, तस्यापि वह्निना सह कस्यापि संबन्धस्य सत्त्वात् ।

अत्रोक्तमिति । अत्र प्रस्तावे **बौद्धे**न स्वग्रन्थे उक्तम् ।

रूपकार्यत्वादिति । **बौद्ध**मते हि पुञ्जात् पुञ्जोत्पत्तिरिति चक्षुरपि रूपकार्यम् ।

रसादीनपि गमयेदिति । **बौद्ध**मते रसादिभिरपि चक्षुषः कृतत्वात् ।

ज्ञानसमसमय इत्यादि । चाक्षुषे ज्ञाने योऽर्थः प्रकाशते स ज्ञानसमकालोत्पन्नः, तदासौ ज्ञानवच्चक्षुषा जन्य एव । अथ ज्ञानसमनन्तरकालोत्पन्नोऽर्थः, तदासावर्थश्चक्षुश्च ज्ञानोत्पादके समकालभाविनी इत्युभयरूपादप्यर्थात् चक्षुषो जन्म न घटते इत्यर्थः ।

अस्येति । चक्षुषः ।

रूपमेवेति । न रसादीन् ।

अज्ञातमेवेति । अविनाभूतत्वेनाज्ञातमेव सच्चक्षुः कर्तृ ।

प्रकाशयतीति । एतद्व्यवस्थाप्यते इति योगः ।

तस्येति । रूपोपलब्धिलक्षणकार्यस्य ।

प्रतिबन्ध इति । कार्यकारणभावाद् वा स्वभावाद् वा अविनाभावः ।

व्यापकानुपलब्धिरिति । निषेध्यं प्रामाण्यं तस्य व्यापकः प्रतिबन्धः, तस्यानुपलब्धिः ।

अनैकान्तिकीकृतेति । रूपेण सह प्रतिबन्धाभावेऽपि चक्षुषो रूपप्रकाशकत्वेन प्रामाण्याभ्युपगमात् ।

तर्हीति । यदि प्रमाणव्यवहारहेतुरविनाभावः शब्देनास्ति तदा ।

तद्बलेनैवेति । यथार्थानुभवजननबलेनैव ।

तदनुगुण इति । यथार्थानुभवजननानुकूलः ।

यत इति । स्वभावभेदात् ।

अयमिति । वक्ता ।

असाविति । वक्ता ।

प्रतिपादक इति । ज्ञापक आप्त इत्यर्थः ।

एते इति । शब्दाः ।

अविश्वस्तानिति । येषां विश्वासो नास्ति तान् प्रति ।

टीयाम् ॥ **अदृष्टपूर्वमित्यादि** । नवतरं वाक्यार्थं बोधयन्ति सन्ति संगतिग्रहणमपीमानि पदानि अमुकस्य वाक्यार्थस्य वाचकानीत्येवं वाक्यार्थविषयं सङ्केतग्रहणमपि ।

नापेक्ष्यंते इति । [657b] हेतोरनुमानाद् दूरे एव स्युः ।

वार्त्तिककृता हि प्रत्यक्षानुमानविषयतायामेव व्यवतिष्ठते इत्येवं दृष्टादृष्टार्थत्वादित्येतद्**भाष्य**मतेन व्याचक्षाणेन यः प्रत्यक्षस्य विषयः स एव विषयो यस्येति प्रत्यक्षविषयतया दृष्टार्थः शब्दो व्याख्यातः । तथा योऽनुमानस्य विषयः स एव विषयो यस्येत्यनुमानविषयतया अदृष्टार्थः शब्दो व्याख्यातः । तत्र दृष्टार्थस्य प्रत्यक्षविषयतां स्पष्टत्वादव्याख्यायादृष्टार्थस्यानुमानविषयतां व्याख्याति **टीकाकारः आप्तप्रणीतत्वेत्यादि** । आप्तप्रणीतत्वेन लिङ्गेनानुमितं प्रामाण्यं यस्य स यः शब्दोऽग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिस्तस्यैवैकस्य या विषयता स्वर्गयागादिसंबन्धादीनामर्थानाम्, सानुमानविषयताग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादेः शब्दस्याप्तप्रणीतत्वानुमानेनैव व्यवस्थापितप्रमाण्यत्वात् ।

एवमपीत्यादि । दृष्टार्थोऽदृष्टार्थश्च प्रवक्ता । अतः शब्दो द्विविध इति **किं** केन संगतमित्यसिद्धतापरिहारार्थं **वार्त्तिककृत्** दृष्टार्थप्रवक्तृकत्वादित्याहेत्यर्थः ।

भाष्ये । **किमर्थमिदमुच्यते** इति । शब्दस्य द्वैविध्यं किमित्युच्यते ।

उत्तरम्—**स न मन्येतेति** । यथा दृष्टार्थ आप्तोपदेशः प्रमाणमर्थस्य दर्शनात्, तथा अदृष्टार्थोऽपि प्रमाणमर्थस्यानुमानादिति। **नास्तिकं** संबोधयितुं द्वैविध्यमुक्तमित्यर्थः ॥

उने । **स्वच्छा इत्यादि** । स्वच्छा आगन्तुकदोषरहिताः स्वभावशुचयो निसर्गतो निर्दोषाः **टीका**गिरः पारदविप्रुषश्च । गुर्व्यो गिरो गभीरा, विप्रुषो भारवत्यः । गिरो दुर्बन्धा दुःखेन संबन्धयितुं शक्या दुर्धराः दुःखेन धर्तुं शक्याः । दुःखेन विस्मरणादक्षीणा इत्यर्थः । दुराग्रहा विषमार्थत्वेन बह्वर्थत्वेन च दुःखेन सामस्त्यतो ग्रहीतुं शक्या दुःखेन तात्पर्यतः कथनीयाः । पारदविप्रुषोऽपि द्रवरूपत्वेन दुःखेन बध्यन्ते, अतिगुरुकत्वेन दुःखेन ध्रियन्ते, चलस्वभावत्वेन दुःखेन गृह्यन्ते, अभावुकद्रव्यत्वेन दुःखेन भाव्यन्ते द्रव्यान्तरेण मिश्रीक्रियन्ते च ॥

॥ इति प्रमाणप्रकरणं सम्पूर्णम् ॥

॥ प्रमेयलक्षणप्रकरणम् ॥

[१.१.९-२२]

टीयाम् ॥ **तच्चेति** । प्रमेयम् ।

स्वप्रमाणविशेषेति । प्रमेयसंबन्धी प्रमाणविशेषः ।

उने ॥ **तर्हीति** । यदि प्रमेयं परीक्षितस्वप्रमाणविशेषाधीनप्रतिपत्ति तदा ।

टीयाम् ॥ **अस्येति** । प्रमेयस्य ।

अवान्तरेत्यादि । अवान्तरमपरं यत् प्रमाणसामान्यं तद् यत्प्रत्यक्षादि तस्य लक्षणम् ।

तस्येति । आत्मादिविषयप्रमाणस्य ॥

उने ॥ **प्रागेवेति** । प्रमाणभणनावसरे ।

अभिधीयमानसंगतीत्यादि । अभिधीयमानसंगतिर्मुमुक्षुणा प्रतिपित्सिततत्व-लक्षणा । यदि हि मुमुक्षुणा प्रतिपित्सिततत्वात प्रमेयं पञ्चदशसु प्रथममभिधीयते इत्युच्यते, तदा संशयादयोऽप्रतिपित्सिता इत्युक्तमेवाप्रतिपित्सिततत्वं चैषामनुपयोगादेवेत्यनुपयोगोऽप्येषा-मुक्त एव स्यात् । अनुपयोगे चैषामनभिधानमेव प्राप्तम् । अनभिधाने चैषां कुतः पूर्वापर-भावस्पर्द्धा, यस्यां सत्यां प्रतिपित्सिततत्त्वेन विशेषेण संशयादिभ्यः प्रमेयस्य प्राथम्यं स्यादित्यतः संशयादीनामभिधानहेतुं प्रमेयात् पश्चादभिधाने [658a] हेतुगर्भमुपयोगमाहेत्यर्थः ।

एतस्मात् विशेषादिति । प्रमाणाधीनप्रतिपत्तिकत्वात् संशयादिभिः परीक्षा-परिकरणद्वारेण परिकरणीयत्वाच्चेत्यर्थः ।

समुदायार्थ इति । इह प्रमेयमित्यादेः पश्चाल्लक्षणमित्यन्तस्य समुदायस्यार्थः ॥

टीयाम् । **तद्विभागोद्देशसूत्रमिति** । तस्य प्रमेयस्य विभागोद्देशसूत्रम्-आत्म-शरीरेत्यादिकम् ॥

उने ॥ **विभागवदिति** । यथा विभागं विना विशेषलक्षणं नावतरति तथा सामान्य-लक्षणं विनापीत्यतः किं तदर्थंजातमिति **भाष्यकारीय**ः प्रश्नः किं लक्षणमित्यस्मिन्नप्यर्थे ज्ञेय इत्यर्थः । इदं च प्रश्नद्वयं **भाष्यकृता** विवक्षितं तदा स्यात् यदि तत्रोत्तरद्वयं **भाष्ये** स्यादिति **भाष्य**गतोत्तरद्वयमाह—**तत्रेति** ।

द्वितिये इति । कतिविधमित्यस्मिन् प्रश्ने ।

प्रथमे इति । किंलक्षणमित्यस्मिन् प्रश्ने ।

तुशब्दव्याख्यानेनेति । आत्मशरीरेत्यादि**सूत्र**स्य तु शब्दस्य **भाष्यी**येण व्याख्यानेन अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानाच्च संसार इत्येतदुपदिष्टं विशेषेणेत्यनेन । अनेन हि व्याख्यानेन यस्य तत्त्वज्ञानादपवर्गो मिथ्याज्ञानाच्च संसारस्तत् प्रमेयमिति **प्रमेयस्य** सामान्यलक्षणमुक्तम् ।

तदत्रेति । यस्माद् **भाष्ये** प्रश्नार्थद्वयमस्ति, तस्मादत्र प्रश्नार्थद्वयमध्ये ।

दर्शित इति । **टीकाकृता** ।

गृहीत्वेति । प्रमेयविशेषावधारणार्थस्तु भवेदित्यनेन ।

विभागनिष्ठः प्रश्नः कृत इति । कतमत् तत् प्रमेयमित्येवम् ।

विवक्षितविशेषेति । प्रमेयविशेषः ।

एवं चेति । यदा **सूत्रात्** प्रमेयविशेषो न लब्धस्तदा ।

असत्यश्चेति । आत्मादि**सूत्रे**ण प्रमेयमात्रविभागस्याकृतत्वात् ।

प्रकृतेति । प्रकृते निःश्रेयसे ।

तत्त्वपदेन संबन्ध इति । न तु तत्त्वज्ञानपदेन ।

येषां तत्त्वज्ञानादपवर्गोऽतत्त्वज्ञानात् संसारस्त एतावन्त एवेत्येतावदेव लक्षणद्वय-मतिव्यापकं प्रमेयमात्रस्यापि नदीवालुकादेस्तत्त्वज्ञानातत्त्वज्ञानाभ्यां पारम्पर्येणापवर्गसंसारभा-वादित्यत आह—**साक्षादिति च पूरणमिति** ।

ननु साक्षादिति लक्षणमेवेदं न स्यात् विवक्षितप्रमेयस्यापि तत्त्वातत्त्वज्ञानाभ्यां साक्षादपवर्गसंसारयोरभावादित्याह—**अपवर्ग** इति ।

नन्वपवर्गो दुःखाभाव एव, तत् कथमुच्यतेऽपवर्गो मिथ्याज्ञाननिवृत्तिरित्याह— **तदादित्वादिति**। मिथ्याज्ञाननिवृत्तिर्हि आदिकारणमपवर्गस्येति कार्ये कारणोपचारात् मिथ्याज्ञाननिवृत्तिरत्रापवर्ग उच्यते इत्यर्थः।

तदेकदेशत्वादिति। संसारैकदेशत्वात् रागद्वेषयोः।

टीयाम्। **प्रथमसूत्रेति**। प्रमाणप्रमेयेत्यादिकस्यादिसूत्रस्य।

उक्तमर्थमिति। येषां तत्त्वातत्त्वज्ञानाभ्यां साक्षादपवर्गसंसारौ भवतस्त एतावन्त एवेत्येवं भणितमर्थम्।

वार्त्तिकस्थयोरात्माद्येवेत्यादिकयोर्बोद्धव्यमेवैतदित्यन्तयोरन्ययोगायोगव्यवच्छेदसमाधानवाक्ययोरेव, द्वयोर्यः सङ्कलितोऽर्थो **वार्त्तिककृतोक्तो नास्य प्रमेयत्वमित्यादिना,** तत्र नास्य प्रमेयत्वं विधीयते इति वाक्यं **टीकाकारो** व्याख्याति— **नास्य पुरुषमात्रमिति**।

अनू[658b]**द्यत इतीति**। **वार्त्तिके** मुमुक्षुणा बोद्धव्यमेवैतदिति, विधीयते इति वक्तव्ये प्राप्ते यदनूद्यत इत्युक्तं तदुदितस्यानु पश्चाद् वदनमनुवाद इत्यनुवादस्य प्रमाणान्तरमूलत्वेन विधानमपीदं प्रमाणान्तरमूलमिति विधानस्य दार्ढ्यं दर्शयितुमित्यर्थः।

अनेन रूपेणेति। सर्वद्रष्टृत्वादिना।

भाष्ये॥ **ससुखसाधनस्येति**। सह सुखसाधनैरिन्द्रियबुद्ध्यादिभिर्वर्तते यत् तस्य जन्मनो विशेषणमिदम्॥

टीयाम्॥ **आत्मादिभ्यो भेदेन प्रत्यात्ममुपलभ्यत्वादेवेति**। अन्यत आत्मादिपदात् सुखस्योपलब्धिस्तदा वक्तुं शक्येत यद्यात्माद्यभेदेन सुखं प्रत्यात्ममुपलभ्येत। न चैतदस्ति॥

उने॥

अयमिति। अयं विकल्पः।

अशाब्दत्वादिति। यो हि शाब्दो विकल्पः सोऽवस्तुकोऽपि सन्दिग्धवस्तुकोऽपि वा दृश्यते, यथा शशविषाणविकल्पो, यथा वानवधृतासत्वपुरुषवचनश्रवणे घटादि-

विकल्पः । तद् यद्यहमिति विकल्पोऽपि शाब्दः स्यात्, तदा अवस्तुकः सन्दिग्धवस्तुको वा संभाव्येत न चायं शाब्दो मानसत्वात्, तस्मान्नायमवस्तुकः सन्दिग्धवस्तुको वेत्यर्थः ।

ननु दुष्टेन्द्रियजो विकल्पोऽशाब्दोऽप्यवस्तुकः सन्दिग्धवस्तुको वा दृश्यते, तस्मादशाब्दत्वेऽप्यहंविकल्पकस्यावस्तुकत्वं सन्दिग्धवस्तुकत्वं वा भविष्यतीत्याह—**अप्रतिक्षेपाच्चेति** । यो हि अवस्तुकः सन्दिग्धवस्तुको वा विकल्पः स बाधितो दृष्टः । यथा शशविषाणविकल्पः स्थाणुर्वा पुरुषो वेति विकल्पो वा, न चायमहंविकल्पः कदाचिदपि बाधितः । तस्मान्नावस्तुकः सन्दिग्धवस्तुको वेति ।

अननुसंहितलिङ्गस्यापीति । नरस्य ।

स्वप्रत्ययादिति । अहमिति प्रत्ययात् ।

एवमिति । अवस्तुकोऽयं विकल्प इत्येवम् ।

तत्रेति । नीलादिषु विकल्पेषु ।

इहापि समानमिति । अहं विकल्पेऽपि कादाचित्कत्वेन वस्तुकल्पनं प्राप्नोतीत्यर्थः ।

अर्थक्रियेत्यादि । नीलादिषु अर्थक्रियायाः सत्त्वेन नीलादिविकल्पानां प्रामाण्यसिद्धेः तत्र नीलादिविकल्पेषु वस्तुस्थितिः सवस्तुकत्वमित्यपि न युक्तम् ।

वासनामादायेति । यथा कामिनीपादाहतस्य सुखोत्पत्तिनिश्चयो वासनामात्रेण ।

अत एवेति । वासनामादायोपप्लावयितुं शक्यत्वादेव प्रमाणान्तरप्रवृत्तेस्तत्र प्रामाण्यसिद्धेर्वस्तुस्थितिरित्यपि परिहृतमित्यर्थः ।

कारणमिति । अहंविकल्पस्य ।

चरमं कल्पमिति । प्रत्यक्षतदाभासे वेति लक्षणम् ।

अयमिति । अहमिति विकल्पः ।

अस्येति । अहंविकल्पस्य ।

पारम्पर्यात् सवस्तुतेति । भ्रान्तेरवश्यमभ्रान्तिपूर्वकत्वात् ।

निर्मूलत्वप्रसङ्गादिति । बुद्धिविकल्पेऽपि बाह्यप्रत्यक्षनिवृत्तेः ।

ननु यदीति । यद्यपि द्रागेव प्रमाणयितुं न शक्यते, तथापि विचारक्रमेण प्रमाणयितुं शक्यते एवेति **आचार्य**स्यैवोक्तिरियमित्यर्थः ।

निरुपाधीति । अविशिष्टः ।

अतिप्रसङ्गादिति । अन्यसंबन्धिशरीरादावपि प्राप्तेः ।

अनन्यत्वमित्यादि । सर्वभावानां चेतनाचेतनानां स्वत्वं किमुच्यते ? यदनन्यरूपत्वं, तच्चानन्यरूपत्वं ज्ञानस्य प्रकाशरूपत्वम् । तच्च यदा बाह्यविषयम्, तदा ग्राह्याद् ग्रहीतुरनन्यत्वाभावादयं घट इति प्रत्ययः स्यात्, न त्वहमिति । यदा तु स एवानु[659a]-भावकः स एवानुभाव्यः, तदा प्रत्येतुः प्रत्येतव्यादनन्यत्वाद् अहं घटं जानामीति प्रत्ययः स्यात् । तस्मात् ज्ञानस्य यदनन्यद् रूपं तदेवाहंप्रत्ययस्य विषयो न तु व्यतिरिक्तः कश्चिदात्मा । अतस्तत्रात्मव्यतिरेकेण कः स्वार्थ इति यदुक्तम्, तन्न किञ्चिदिति भावार्थः ॥

अत एवेति । यत एव प्रत्येतुः प्रत्येतव्यादनन्यत्वमहंप्रत्ययविषयः ।

एवं तर्हीति । यदि प्रत्येतुः प्रत्येतव्यादनन्यत्वमहंप्रत्ययविषयः ।

तत इति । शरीरात् सकाशात् ।

प्रत्येतुरन्यत्वादिति । न हि शरीरेणैव शरीरमनुभूयते ।

बुद्धौ मुख्य इति । बुद्धौ विषये मुख्याहंप्रत्ययः ।

अहं छिनद्मीतिवदिति । यथाहं छिनद्मीति छिदिक्रियायाः सकाशात् कर्तुर्भिन्नस्यानुभवः, तथाहं जानामीति ज्ञानक्रियायाः सकाशात् कर्तुर्भिन्नस्यैवानुभवात् ।

नीलादीत्यादि । यथा नीलादिप्रत्येतव्याकारः प्रतीतेरेवात्मा तथा[पि] भिन्नत्वेनाभासते, तथाहं जानामीत्यत्र प्रतिपन्नाकारोऽपि अहमितिप्रत्ययः प्रतीतेरेवायमात्माभिन्नत्वेनावभासते । तस्मादत्राभेद एव पारमार्थिकः, भेदस्त्वारोपित एव ।

समानयोगक्षेमत्वे इति । यथा ज्ञानस्वरूपभूतकादाचित्कनीलाद्याकारबलात् नीलादिरर्थो ज्ञानादतिरिक्तः सिध्यति, एवं प्रतिपन्नाकारबलात् प्रतिपत्तापि तदतिरिक्तः सेध्दुमर्हति । न चेदेवं नीलादिरपि न सिध्येदिति समानयोगक्षेमार्थः ।

अस्तु स्वोपादानमात्रमिति । मा भूदनन्यरूपा बुद्धिर्विषयोऽहंप्रत्ययस्य, समनन्तरप्रत्ययो विषयो भवतु ।

तत्प्रतिभासने इति । समनन्तरप्रत्ययप्रतिभासने ।

तदूगतेति । समनन्तरप्रत्ययगतः ।

स इति । बुद्धिसन्तान आलयज्ञानाख्यः ।

संतन्यमानज्ञानरूप इति । क्षणिकज्ञानरूप इत्यर्थः ।

वार्त्तिके ॥ इच्छाद्यनुपलभ्यमानमिति । आत्मनः क्वचिदप्यसिद्धत्वेनेच्छाद्यात्मना सह कदाचिदप्यनुपलभ्यमानम् ।

एते इच्छादयः ।

स्मृत्या सहैकविषया इति । यस्यैव ज्ञानस्य विषयः स्मृतिः, तस्यैवैकस्य ज्ञानस्य गोचरा एकेनानुव्यवसायेन गृह्यमाणा इत्यर्थः ।

तस्मादेककर्तृकत्वं प्रतिपादयन्तीति । यद्यपीच्छादय आत्मना सह कदाचिदप्यनुपलभ्यमानत्वात् आत्मानं न गमयन्ति, तथापि स्मृत्या सहैकज्ञानेन गृह्यमाणाः सन्त एकेन कर्त्रा सहोपलभ्यन्ते इत्येककर्तृकत्वं गमयन्त्येव तावदित्यर्थः ।

इत्युक्तमिति । न यवबीजमतत्पूर्वकत्वादित्यत्र ।

अयथार्थोऽयमुपालम्भ इति । यदि कार्यकारणभावे प्रतिसन्धानमित्युच्येत, तदा कार्यकारणभावात् प्रतिसन्धानं ब्रुवन्न नानात्वं बाधत इत्युपालम्भो युक्तः स्यात् । यदा त्वकार्यकारणभावे प्रतिसन्धानं न दृष्टमित्युच्यते, तदा न कोऽप्युपालम्भ इत्यर्थः ।

न विवादकारणमतिरिच्यत इति । नानात्वे प्रतिसन्धानाभावं प्रति नानात्वबाधनेनाकार्यकारणभावो नाभ्यधिक उक्तः स्यादित्यर्थः ।

न विवादकारणमतिरेचितं भवतीति । नानात्वे प्रतिसन्धानाभावं प्रति अकार्यकारणभावबाधनेन नानात्वं नाभ्यधिकीकृतं स्यादित्यर्थः ।[1]

न विवादकारणमतिरेचितं भवतीति । नानात्वे प्रतिसन्धानाभावं प्रति अकार्यकारणभावबा[659b]धनेन नानात्वं नाभ्यधिकीकृतं स्यादित्यर्थः ।

तुल्यमिति ब्रुवतेति । तुल्यमित्यस्यायमर्थो यथा सति नानात्वेऽकार्यकारणभावात् न दृष्टं प्रतिसन्धानमिति ब्रुवता मया नानात्वात् न दृष्टं प्रतिसन्धानमिति न परिहृतं स्यात्, तथा त्वयापि नानात्वेऽदर्शनादिति ब्रुवता अकार्यकारणभावान्न प्रतिसन्धानं

---

1. न विवादकारणमतिरिच्यन्त इति । नानात्वे प्रतिसन्धानाभावं प्रति नामात्व (?) बाधनेनाकार्यकारणभावो नाभ्यधिक उक्तः स्यादित्यर्थः added in J.

दृष्टमिति न परिहृतं स्यादिति । एवं चाहोपरत्वया नानात्वान्न दृष्टं प्रतिसन्धानमित्यभ्युपगतं भवति । यथा त्वं चौरः पुरुषत्वादिति केनाप्युक्ते, यद्यहं पुरुषत्वाच्चौरः, तदा त्वमपि चौर इति प्रतिवक्त्रा स्वस्य चौरत्वमभ्युपगतं भवति । एतेनाकार्यकारणभावस्य सन्दिग्धव्यतिरेकितैव समर्थिता ।

नेति । सन्दिग्धव्यतिरेकितेति योगः ।

न मयेत्यादि । यदि हि मया कार्यकारणभावेन प्रतिसन्धानं साध्येत, तदा सन्दिग्धव्यतिरेकोद्भावनं घटेत । न च मया कार्यकारणभावात् प्रतिसन्धानं साध्यते, किं तु कार्यकारणभावादपि प्रतिसन्धानं संभवतीति प्रतिसन्धानस्य हेतोरन्यथासिद्धार्थतोच्यते इति ।

नेति । अन्यथासिद्धार्थतादोषो नाभिधेय इत्यर्थः ॥

उने ॥

एतेनेति । अनुव्यवसायसिद्धस्य प्रत्यभिज्ञानविशेषापरनाम्नः प्रतिसन्धानविशेषस्य भणनेन ।

तत्त्वतः प्रत्यभिज्ञानमसिद्धमिति । यत ऐक्यसाधकं प्रतिसन्धानं तत् चेत् तात्त्विकं प्रत्यभिज्ञानमिष्यते तदा असिद्धम् । न हि तात्त्विकं प्रत्यभिज्ञानमस्ति सर्वभावानां क्षणिकात्यन्तविलक्षणत्वात् ।

अभिमानतो विरुद्धमिति । यदि त्वतात्त्विकं प्रत्यभिज्ञानं प्रतिसन्धानमिष्यते तदा विरुद्धम्, आभिमानिकस्य हि प्रत्यभिज्ञानस्य लूनपुनर्जातकेशादिषु भिन्नेष्वेव सिद्धेः ।

अविशिष्टमिति । यदि पुनर्न तात्त्विकं न चाभिमानिकम्, किं तु सामान्येन प्रत्यभिज्ञानं प्रतिसन्धानमिष्यते तदा नैकान्तिकम्, लूनपुनर्जातकदलीकाण्डादिषु भेदेऽपि प्रत्यभिज्ञानात् ।

विरोध एवेति । बीजाङ्कुरादिषु भेदे सत्येव कार्यकारणविशेषयोरेकसन्ताननियमस्य दर्शनात् ।

विरोध एवेतीति । इत्येतत् **बौद्धा**शङ्कितम् ।

परेणेति । **बौद्धेन**

उपाधितया विपक्षव्यावृत्तिसन्देहमिति । कार्यकारणभावात् प्रतिसन्धानं न कर्त्रैक्यादित्येवं प्रतिसन्धानं प्रति कार्यकारणभावस्य या कारणत्वेनोपाधिता तया विपक्षात् कर्तृनानात्वाद्या व्यावृत्तिः प्रतिसन्धानस्य, तस्याः सन्देहं कर्तृनानात्वेऽपि प्रतिसन्धानं भविष्यतीत्येवं रूपम् ।

अथ वेत्यादि । यद् वा **बौद्ध**स्यायमभिप्रायो यदुत प्रतिसन्धानं क्षणभङ्गसाधनेनैव बाधितमतो यदिदं प्रतिसन्धानमुपलभ्यते, तस्य व्यवस्थास्माकं मते कार्यकारणभावादेवेत्येतत् प्रतिपादयितुं बौद्धेन कार्यकारणभाव उपन्यस्तः ॥

टीयाम् ॥ अगृहीतभेदानामिति । सादृश्येन ।

सभागेष्विति । सदृशेषु ।

उने ॥ तन्निवृत्तावपीति । कार्यकारणभावनिवृत्तावपि ।

इदमिति । प्रतिसन्धानम् ।

तन्निबन्धनमिति । प्रतिसन्धानकारणम् ।

भेदग्रहे तस्यापि व्यभिचारादिति । यदा ह्यामलकान्तरस्य भेदो गृह्यते तदा सादृश्ये सत्यपि प्रतिसन्धानाभावाद् व्यभिचारः, भेदाग्रहे सादृश्यमात्रमेव प्रतिसन्धाननिबन्धनमित्ययं च [660a] पक्षोऽग्रे ज्ञानानां भेदाग्रहस्य निराकरणेनैव निराकरिष्यते इति मन्यमाने**नोदयने**न नेहाशङ्क्य निराकृतः ।

तदग्रहपक्षस्तु वाच्य इतीति । कार्यकारणानां भेदाग्रहः प्रतिसन्धाननिमित्तमिति पक्षस्तु वाच्यो न च भेदाग्रहात् प्रतिसन्धानमित्यादिना अग्रे शङ्कनीयत्वेन वक्तव्य इति हेतोः ।

तमिति । भेदाग्रहपक्षम् ।

प्रतिसन्धानमिति । प्रत्यभिज्ञानविशेषम् ।

टीयाम् ॥ कर्तरीति । कर्तृविषयं न कर्मणीति । यत्तु तदेवेदमामलकमित्येवं कर्मविषयं पूर्वापरप्रत्यययोः स्मृत्या सहैकविषयत्वं तन्न कार्यकारणभावनिबन्धनमिष्यते । अतो नामलकादिकर्मणा व्यभिचार इत्यर्थः ।

उने ॥ **एष** इति । कार्यकारणभावः ।

एवंभूत इति । प्रतिसन्धेयबुद्धिसंबन्धी ।

तत्प्रतिसन्धानादेवेति । तेषां पूर्वापरप्रत्ययानां प्रतिसन्धानादेककर्तृकतया संकलनादेव ।

प्रतिसन्धातुः सर्वज्ञस्यैकत्वं सिद्धमिति । सर्वज्ञप्रतिसन्धानस्यामिथ्यारूपत्वादन्यथा असर्वज्ञत्वापत्तेः ।

ननु सिध्यत्वेकः प्रतिसन्धाता परमसौ ज्ञानान्येव भविष्यतीत्यत आह—**ज्ञानानामिति** । ज्ञानान्यनेकानि कथमेकः प्रतिसन्धाता स्यादित्यर्थः ।

ननु बोधरूपतया सर्वैरप्यभेद एव प्रतीयते, तत् कथमुच्यते ज्ञानानां भेदस्य सर्वैरेव प्रतीतिरित्यत आह—**धियामिति** । धियां नीलमिदमित्यादि प्रतीयमानानां ज्ञानानां तदैवाप्रतीयमानत्वेनास्थैर्यं सर्वैरपि प्रतीयते । ततो ज्ञानानां भेद एव स्यादित्यर्थः ।

ननु प्रतिसन्धातापि क्षणिको भविष्यति, तथा च पुनरपि ज्ञानानामेव प्रतिसन्धातृत्वमायातमित्यत आह—**प्रतिसन्धातुरिति** । प्रतिसन्धातृत्वं स्वस्यैकत्वं व्यवस्थापयति, क्षणिकत्वं त्वनेकत्वम् । ततः प्रतिसन्धातृत्वक्षणिकत्वयोश्छायातपयोरिव परस्परविरोधः । अतो यथा च्छाया आतपत्वेन सर्वज्ञेनापि गृह्यते, तथा प्रतिसन्धाता क्षणिकत्वेनेत्यर्थः ।

न तर्हीत्यादि । सर्वज्ञज्ञानानां कार्यकारणभावेऽपि प्रतिसन्धानानभ्युपगमात् ।

टीयाम् ॥ **सैवेति** प्रतिसन्धानरूपैव ।

उने ॥ **स्वनिबन्धनानुवृत्ताविति** । कार्यकारणसद्भावे ।

सत्त्वदृष्टेरिति । प्रतिसन्धानरूपाया आत्मदृष्टेः ।

तस्येति । सर्वज्ञस्य ।

यदीत्यादि । यदि पारलौकिकेऽर्थे दीक्षादानादौ विषये **बौद्धादन्ये** वक्तारो विप्रलम्भका एवेति निश्चयस्तदा ।

संभावनयापीति । यदि पारलौकिकेऽर्थे विप्रलम्भका एव वक्तार इति संभावना तदापीत्यर्थः । पारलौकिकेऽर्थे प्रेक्षावन्तो न प्रवर्तेरन् यतोऽतोऽवश्यं सर्वज्ञ उपदेष्टा

स्वीकर्तव्यो **बौद्धैः** । ईश्वरादीनां वक्तृणां विप्रलम्भकत्वं निश्चित्य संभाव्य वा पारलौकिकानुष्ठानेषु प्रेक्षावतां प्रवृत्त्यन्यथानुपपत्तेरविप्रलम्भकवक्ता **बुद्धो**ऽभ्युपगन्तव्य इति भावार्थः ।

उभयथापीति । यदि सर्वज्ञज्ञानानां कार्यकारणभावो यदि च सर्वज्ञ उपदेष्टा अभ्युपेयते, उभयथाप्येकः प्रतिसन्धाता सिध्यतीत्यर्थः ।

ततश्चेति । असतोऽपि प्रतिसन्धानस्य कार्यबलात् सर्वज्ञेनाहरणे सति ।

दोषावकाश इति । दोषा आत्मनि सति परसंज्ञेत्यादयः ।

स्वरसेति । स्वभावसिद्धस्य प्रतिसन्धानस्य दोषकारणत्वात् ।

[66ob] **सोऽयमिति** । भेदाग्रहः ।

कार्यकारणभावे सत्येव द्रष्टव्य इति । कार्यकारणभावस्यैव प्रतिसन्धान निबन्धनत्वेन परेण व्यवस्थापयितुमुपक्रान्तत्वात् ।

ननु भेदाग्रहपक्षमभ्युपयता हि परेण गृहीतभेदेषु सर्वज्ञज्ञानेषु प्रतिसन्धानाभावः समर्थितस्तथा च कथं सर्वज्ञस्योपदेशकत्वं घटते इत्याह—उपदेशस्त्विति ॥

विरोधेति । वैरम् ॥

टीयाम् । भेदाग्रहः किं प्रवृत्तिज्ञानानामेव मिथः, आलयविज्ञानाद् वेति विकल्पद्वयं क्रमेण दूषयति—**प्रवृत्तीति** ।

उने । **स्फटिकवदिति** । यथा स्फटिके विषयानुरञ्जनापरिहारेण भेदाग्रहः, एवं बुद्धिष्वपि ।

स्फटिकवदिति । यथा स्फटिक उपाधिपरिहारेण प्रत्येतुमशक्यः ।

तथाभावे इति । उपाधिपरिहारेण बुद्धीनां प्रत्येतुमशक्यत्वे ।

बुद्धिमात्रेणेति । बुद्धित्वमात्रेण ।

तत इति । अङ्गारात् ।

निमित्तव्यावृत्ताविति । भेदाग्रहनिवृत्तौ ।

भवद्वेति । प्रतिसन्धानम् ।

निमित्तान्तरमिति । एकं कञ्चित् प्रतिसन्धातारम् ।

स हीति । उपदेशः ।

सा चेति । विवक्षा ।

तदेवेति । सङ्केतितशब्दस्मरणाद्येव ।

तदन्तःपातीति । घटोऽयं पटोऽयमित्यादिषु प्रवृत्तिज्ञानेष्वन्तःपाती कादाचित्को योऽहंप्रत्ययो घटमहं जानामि शब्दमहं शृणोमीत्यादिकस्तद्रूपो वा ।

सत्यपि वेत्यादि । भवतु वा सन्तानद्वयं स्वतन्त्रम् । परं तस्य स्वतन्त्रत्वादेव मिथ उपादानोपादेयभावाभावात् तेन प्रत्याकलितार्थानां परस्परमनुसन्धानबन्धो न स्यात् । तथा च घटमहं जानामीति न स्यात् ।

तथात्वे वेति । मिथ उपादानोपादेयत्वाभावेऽपि परस्परप्रत्याकलितार्थानुसन्धानबन्धाभ्युपगमे वा ।

अस्तु वा परस्परमुपादानोपादेयभावः सन्तानयोः तथापि किमुभयोरुभयोपादानत्वम्? यद् वालयज्ञानमात्रमेवोभयमुपादत्ते, प्रवृत्तिज्ञानं तु न किञ्चिदुपादत्ते, यद् वा ताभ्यामन्यदेव किञ्चिदुपादत्ते इति त्रयः पक्षाः ।

तत्राद्यं निराकरोति—**उभयोर्वेति** ।

एकमप्यनेकाश्रितमिति । यदा ह्यालयज्ञानप्रवृत्तिज्ञानाभ्यां मिलिताभ्यामालयज्ञानमुपादीयते जन्यते तदा तदेकमनेकाश्रितमनेकाधारं जातम् । एवं प्रवृत्तिज्ञानमपि ।

किमपराद्धमवयविसंयोगादिभिरिति । यदनेकाश्रितत्वेनैते **बौद्धै**र्दूष्यन्ते ।

द्वितीयं निराकरोति—**न चेति** ।

न यायादिति । प्रवृत्तिविज्ञानमिति शेषः ।

उपादानत्वव्याप्तत्वान्निमित्ततायाः इति । यदुपादानं नास्ति, तन्निमित्तमपि नास्तीति ॥

तृतीयं निरस्यति—**एवं चेति** ।

ज्ञानान्तरं कर्म ।

अस्य हीति । प्रवृत्तिसन्तानान्तःपातिकादाचित्कानेकाहंप्रत्ययरूपस्यालयसन्तानस्य ।

स्वरूपोऽपीति । विषयविवक्षापरिहारेण बोधमात्रतोऽप्यालयज्ञानस्य यो भेदाग्रहः स किं पूर्वाहमिति प्रत्ययमात्राद् घटमहं जानामीत्यादौ पूर्वमनुव्यवसाये जाते योऽहंविषयोऽप्यनुव्यवसायस्तस्मात् केवलादाहोस्विद् घटोऽयमित्येवमादिभ्यः प्रवृत्तिविज्ञानेभ्योऽपि ।

अहमित्यादि । मयाहमिति ज्ञातम्, अहमिति ज्ञायते, अहमिति ज्ञास्यते इत्येवं पूर्वापराहंप्रत्ययस्वरूपाणामपि तावदतीतवर्तमानानागतत्वेनानुव्यवसायोऽस्ति । स चैषां भेदं विना नोपपद्यते । अतः पूर्वाहमिति प्रत्ययमात्रादालयज्ञानस्य [661a] स्वरूपतो भेदाग्रहोऽसिद्ध इत्यर्थः ।

अथ भेदाग्रहमभ्युपगम्यान्यथा दूषयति—**कथंचिदिति** । भवतु वा पूर्वापराहमिति प्रत्ययस्वरूपाणां कथञ्चिदहमिति प्रत्ययत्वमात्रेण भेदाग्रहस्तथापि[1] तदर्थस्याहमिति प्रत्ययार्थस्य प्रतिसन्धानमुचितं न प्रवृत्तिज्ञानानामर्थस्य बाह्यवस्तुनः, प्रवृत्तिविज्ञानेभ्य आलयज्ञानस्य भेदाग्रहाभावात् । तथा च योऽहं यं घटमद्राक्षं स एवाहं तमेव घटं स्पृशामीत्यत्राहमर्थस्यैव प्रतिसन्धानं स्यात्, न तु घटोऽयमिति प्रवृत्तिज्ञानविषयस्य घटस्य ज्ञानावच्छेदकस्य सतस्तमेव घटं स्पृशामीत्येवं प्रतिसन्धानमिति भावः ।

नन्वालयज्ञानस्य प्रवृत्तिज्ञानेभ्योऽपि भेदाग्रहे प्रवृत्तिज्ञानार्थप्रतिसन्धानं भविष्यतीत्याह—**न चेति** ।

उक्तमेवेति । प्रवृत्तिविज्ञानानामित्यादिना प्रवृत्तिविज्ञानानां भेदभणनगत्या[2] प्रवृत्तिविज्ञानेभ्य आलयविज्ञानस्यापि भेद उक्त एवेत्यर्थः ।

नापि [3]विषयत इति । पूर्वापराहंप्रत्ययानामालयप्रत्ययसंज्ञानां विषयभेदाग्रहणद्वारेण यो भेदाग्रहः सोऽपि न वाच्य इत्यर्थः ।

स्वाकार इति । आलयविज्ञानस्यैव स्वकीयाकारः ।

प्राग्दूषणेनैव गतत्वादिति । आद्यविकल्पदूषणेनैव दूषितत्वात् ।

अनेनेति । आलयज्ञानेन ।

तस्य चेति । स्वात्मनः स्वरूपस्य ।

निश्चित इति । अहमित्यज्ञासिषमित्यादिना ।

---

1 S °यापि 2 S °त्याग° 3 S विषय इति

प्रागेव प्रसाधनादिति । न चायमवस्तुकः सन्दिग्धवस्तुको वेत्यादिना ।

प्रकृतोपयोगीति । प्रतिसन्धानोपयोगी ।

स हीति । अवस्तुसंबन्धी ।

अलीकस्येत्यादि । अलीकस्याज्ञायमानो भेदोऽस्तीति वक्तुं तदैव शक्यं यदि तदनलीकं स्यात्, वास्तवधर्मस्य वस्त्वविनाभावित्वात् । अतोऽलीकस्य बलादनलीकत्वं प्रसज्यते ।

पारमार्थिकत्वस्येत्यादि । अलीकस्य भेदोऽविद्यमान एव न गृह्यते इत्युच्यमाने हि अलीकस्य वास्तवो भेदोऽङ्गीकृतः स्यादित्यर्थः ।

नन्वलीकस्य वास्तवमभेदमङ्गीकुर्म एवेत्येतदाशङ्क्य निराचष्टे—**न चेति ।** नानाविकल्पोल्लिखितं पूर्वापराहमिति विकल्पोल्लिखितं यदलीकं विषयस्तत्परमार्थत एवैकं वास्तव एवास्याभेदोऽङ्गीक्रियते इत्यर्थ इति न वाच्यम् ।

अनात्मकत्वादिति । अलीकमनात्मकं निःस्वभावम्। तत् कथमिदं परमार्थत एकं स्यादित्यर्थः ।

तथात्वे वेति । अलीकस्य वस्तुत एकत्वे ।

भेदाग्रहस्येति । अनुसन्धानार्थं स्वीक्रियमाणस्य ।

तत्रेति । अलीके ।

भेदारोप इति । भेदस्यारोपरूपो ग्रहः ।

तदग्रह इति । भेदाग्रहः ।

न चेत्यादि । न केवलं भेदारोपे विरोधाद् भेदाग्रहस्य नावकाशो यावता भेदारोपेऽभेदारोपस्यापि प्रतिसन्धानस्यापि नावकाशो विरोधादेव । यदि भेदारोपः कथमभेदारोपः । अभेदारोप एव च प्रतिसन्धानं **बौद्धनये ।**

आत्माश्रयप्रसङ्गादिति । आरोपितासत्त्वो भेदो न गृह्यते इत्यत्र हि पक्षे भेदस्य योऽसत्त्वारोपः स भेदाग्रहे सत्येव स्यात् न भेदाग्रहं विना । अत आरोपितासत्त्वस्य भेदस्याग्रहो भेदाग्रहमपेक्षते इत्यात्माश्रयत्वप्रसङ्गः ।

पारमार्थिकभेदप्रसङ्गाच्चेति । यदा ह्यलीकसंबन्धिनो भेदस्यासत्त्व-[66rb]मारोपितमित्युच्यते, तदा भेदः पारमार्थिक एव प्रसज्यते । तथा च भूयोऽप्यनलीकत्वप्रसङ्गः ।

इहेति । अलीके विषये ।

अभेदानुसन्धानमिति । अलीकविषयाणां पूर्वापराहंप्रत्ययानाम् ।

अन्यविषयभेदाग्रहे इति । अन्यो विषयो यस्य स यो भेदाग्रहः तत्रान्यत्र भेदाग्रहे इत्यर्थः ।

अतिप्रसङ्गादिति । स्तम्भलगुडयोरपि प्रतिसन्धानं स्यात्, तत्रापि घटपटयोः शशनरविषाणयोर्वा भेदो वास्तवोऽवास्तवो वा तयोरग्रहणात् ।

चतुष्कोटी स हि विद्यमान एवेत्यादि पक्षचतुष्टयम् ।

तत्रेति । त्रैलोक्ये ।

स्थिरवस्तुगोचरत्वमिति । स्थिरवस्तु गोचरो यस्यास्तद्भावः ।

सत्त्वबुद्धेरिति । अहमित्यात्मदृष्टेः ।

निर्निमित्तत्वे इति । यदि निर्निमित्तं प्रतिसन्धानं स्यात् तदा नियतं न भवेत् ।

तच्चेति । निमित्तवत्त्वम् अनेककर्तृत्वे नास्तीति कार्यकारणभावस्य निमित्तस्याघटमानत्वेनैवोक्तत्वात् ।

व्यापकानुपलब्ध्येति । प्रतिषेध्यस्य प्रतिसन्धानस्य व्यापकं यन्निमित्तवत्त्वं तस्यानुपलब्ध्या विपक्षादनेककर्तृकत्वान्निवर्तमानं प्रतिसन्धानम् ।

प्रतिबन्धसिद्धिरिति । अनेककर्तृकत्वप्रतिसन्धानव्यतिरेकयोः ।

तदेतदिति । बुद्धीनां कार्यकारणभावो न प्रतिसन्धाननिबन्धनमिति यदुक्तम्, तत् सर्वं बुद्धीनामुपादानकारणोपादेयकार्यभावमङ्गीकृत्योक्तम् । परमार्थस्तु तत्रैव बुद्धीनामुपादानोपादेयभावे एव विवादो बुद्धीनामुपादानोपादेयरूपकार्यकारणभाव [1]एव न घटते इत्यर्थः ।

---

1 S एव घटते

क बुद्धीनामुपादानोपादेयभावः स्यादिति। य एव कल्पेत नाद्यतनानां प्रत्ययानामेकः कर्ता इष्यते तस्यैवोपादानकारणत्वात्।

स चेदिति। यदि व्यवहितकालानामपि प्रत्ययानामनुक्रमोत्पत्त्योपादानोपादेयभाव इष्यते तदा क तेषामेककर्तृकता, यत एकोपादानतैवैककर्तृकता। अत्र च पक्षे प्रत्ययानामुपादानानामनेकत्वेनानेककर्तृत्वमेव स्यादित्यर्थः।

ननु बुद्धीनामेककर्तृत्वाङ्गीकारे ह्युपादानोपादेयभावो विरुध्यते, यदा त्वासामुपादानोपादेयभाव एवाभ्युपेयते तदा को विरोध इति पराभिप्रायेण बुद्धीनामुपादानोपादेयभावमाशङ्क्य निरस्यति—**न चैकेति**।

एकजातीयत्वे सतीति। अनेन विजातीयस्यार्थादेर्व्युदासः।

तथाभावप्रसङ्गादिति। उपादानोपादेयभावप्राप्तेः।

समस्तोपाधिरहितानां बुद्धीनां भेदाग्रहः सोपाधीनां वेति[1] विकल्पद्वयं क्रमेण दूषयति—**समस्तेति**।

समस्तोपाधिपरिहारेणेति। बुद्धित्वमात्रेण।

प्रकृतेऽपि भावादिति। यथा शिष्याचार्यबुद्ध्योः शिष्याचार्यसंबन्धित्वेन सोपाधिभेदग्रहस्तथाभिमतोपादानोपादेयभावयोरपि बुद्ध्योः पूर्वापरत्वेन नीलपीतादिसंबन्धित्वेन वा भेदग्रहोऽस्त्येवेत्यतस्तयोरप्युपादानोपादेयभावो न स्यादित्यर्थः।

शरीरभेदाग्रहे सतीत्यपि न युक्तमित्याह—**शरीरेति**।

जन्मान्तरेण व्यभिचारादिति। जन्मान्तरीयशरीरस्य भेदग्रहेऽपि बुद्धीनामुपादानोपादेयभावात्।

ननु भेदग्रहो ह्युभयनिष्ठो जन्मान्तरीयं च शरीरं नोपलभ्यते। [662a] अतस्तेन भेदाग्रह एवेति व्यभिचार इत्याह—**अनुपलब्धेति**। यदि जन्मान्तरीयशरीरस्यानुपलभ्यत्वेन भेदाग्रहादव्यभिचारोऽभ्युपेयते, तर्हि येन बालेन पिता नोपलब्धस्तत्पितुः शरीरस्याप्यनुपलभ्यत्वेन भेदाग्रहात् पितृबुद्ध्या बालबुद्धेरुपादानोपादेयभावः प्रसज्येत।

अतथाभावप्रसङ्गाच्चेति। अनुपादानोपादेयभावप्राप्तेः।

---

1 J चेति

एकाधारतानियम इतीति । एकाधारतानियमे तदुत्पत्तिरेवोपादानोपादेय-भावः ।

तस्येति । एकाधारतानियमस्य ।

विषमसमयानां क्षणानामभावादिति । यदि हि बुद्धिक्षणा एकस्मिन् समये स्युः, तदा तेष्वेकस्य कस्याप्याधारता वक्तुं शक्येत । [1]यदा तु ज्ञानक्षणाः क्षणिकत्वेन विषमसमयाः, तदा कथं तेषां वास्तव एकाधारतानियमः स्यात् ।

अस्ति हीत्यादि । **बौद्धे** नये हि घटस्य भूप्रदेशादेश्चाभिमानिकस्यैकाधा-रतानियमस्य सत्त्वाद् गन्धरसादीनां शरीरज्ञानयोश्चाप्युपादानोपादेयभावः प्रसज्येतेति भावः ।

एतेन चेति । उक्तरूपोपादानोपादेयभावनिराकरणेन ।

अभ्रान्तेत्यादि । ततावेकस्मिन् सन्ताने हेतुफलस्य हेतोः कार्यस्य च योऽभ्रान्तः समतया एकमित्यवसायः स उपादानोपादेयभावः ।

एतेन हि लक्षणेन सदृशयोरेव हेतुफलयोः संग्रहो विसदृशयोः संग्रहार्थं तु लक्ष-णान्तरमाह—**प्रकृतीति ।** सन्ताने ये प्रकृतिविकृती ते चोपादानोपादेयभावः ।

प्रथमं लक्षणं तावत् सन्तानस्य वास्तवस्य क्षणिकपक्षे विषमसमयानां क्षणानाम-भावात् काल्पनिकस्य त्वतिप्रसङ्गकत्वादित्यनेन प्रागुक्तन्यायेनैव निरस्तम्, द्वितीयलक्षणनिरा-सप्रसङ्गेन निरसिष्यते चेति द्वितीयलक्षणस्य निरासप्रकारमाह—**काष्ठस्य त्विति ।**

सभागेष्विति । सदृशेषु ।

तथा दर्शनादिति । पार्थिवोपादानकत्वदर्शनात् ।

तदपीति । तथा दर्शनम् ।

तेषामिति । परस्परप्रत्यासन्नानां नीलपरमाणूनाम् ।

समतेति । नीलत्वेन मिथस्तुल्यता ।

आभिमानिकैकत्वावसायश्चेति । इदं नीलं वस्त्वित्येवम् ।

---

1 S यथा

पारमार्थिकस्त्वति । पारमार्थिकस्तु एकत्वावसायोऽभिमतोपादानोपादेय-भावेषु सभागक्षणेष्वपि नास्ति क्षणिकत्वात् ।

अनेकवृत्तेरित्यादि । रूपपरमाणू रूपपरमाणूपादानो रसपरमाणूपादानश्च तदैव स्यात् यद्येकमनेकवृत्त्यभ्युपगम्यते । यदि च रूपपरमाणुरसपरमाणू सप्रतिघौ मूर्त्तत्वात् स्वदेशे परोत्पत्तिप्रतिबन्धकौ समानदेशौ स्यातां न चैतदस्तीति भावः ।

भ्रान्तसंमतैकावसाय इति । समं मतं संमतं सदृशमतिभ्रान्तेन संमतेन य एकावसायः स उपादानोपादेयभावः ।

तत्रापि तुल्यत्वादिति । परस्परप्रत्यासन्नेषु नीलपरमाणुष्वपि लौकिकानां त एवामी नीलपरमाणव इत्येवं भ्रान्तसंमतिरस्ति । अतस्तेष्वप्युपादानोपादेयभावः स्यात् ।

प्रकृतेऽपीति । उपादानोपादेयतयेष्टेषु सभागक्षणेष्वपि ।

स चेति । सामान्येन कार्यकारणभावो नोपाधिः, प्रतिसन्धाने शिष्याचार्यबुद्ध्योरपि प्रतिसन्धानप्राप्तेः ।

प्रत्यवेक्षते इति । प्रतिसन्धत्ते ।

नान्यदिति । ज्ञानम् ।

नापरानिति । प्रत्ययान् ।

तत्रेति । [663a] शिष्यज्ञाने ।

तेषामिति । उपाध्यायचित्तानाम् ।

नैवमिति । नावेक्षणम् ।

कारणत्वेति । उपाध्यायचित्तानां कारणत्वस्य ज्ञानत्वस्य चाविशिष्टत्वेऽपि ।

एतदेवेति । अनभिसंस्कारत्वम् ।

किंभूतस्येति । कारणस्य ।

कुत्रेति । कार्ये ।

एवं हीति । यत्र यथा कार्यं दृश्यते तत्र तथा कल्प्यत इत्यभ्युपगमे हि ज्ञापके कारणे धूमादौ जनके च तृणादौ कार्यदर्शनात् प्रागिदमस्य ज्ञापने शक्तमिदं चास्य जनने शक्तमित्येवं तत्सामर्थ्यानवगमेनानाश्वासात् निर्व्यापारं जगत् स्यात् ।

एवमिति । यत्र यथा कार्यं दृश्यत इत्यादि ।

अनेनेति । प्रतिसन्धानहेतुना ।

एतदिति । क्षणभङ्गसाधनम् ।

तस्येति । क्षणभङ्गसाधनस्य ।

अस्येति । प्रतिसन्धानहेतोः ।

उपसंहारेति । तस्मात् स्मृत्या सहेत्यादेरुपसंहारस्य ।

दण्डघटवदिति । यथा दण्डघटौ वैसादृश्यात् न कश्चित् प्रतिसन्धानस्यापीत्यादि ।

तेनापि योगिचित्तस्य प्रतिसन्धानं स्यादिति वक्तव्ये सति तस्यापि योगिचित्तेन प्रतिसन्धानं स्यादिति षष्ठी कर्तृतृतीयाविभक्त्योर्यो विपर्ययः स कुत इत्याह—**हेत्विति** । यथा योगिचित्तमालम्बनत्वेन [1]सार्वज्ञ्यस्य चेतसो हेतुः, एवं तस्यापि सार्वज्ञ्यं चेतोहेतुरित्येवं हेतुविपर्ययोऽपि संभवति यतः ।

सोऽपीति । संस्कारः ।

तत्कालस्थायीति । स्मृतिकालं यावत् स्थाता ।

संतन्यमानो वेति । क्षणे क्षणे नवनवीभवन् ।

तदुत्तरेति । अनुभवोत्तरम् ।

तद्विशेषो वेति । बुद्धिधाराविशेषः ।

तैरिति । बौद्धैः ।

तथा नीलादीत्यादि । नीलादीनामर्थानां योऽनुभवसन्तानो नीलोऽयं पटोऽयं जलमिदमित्येवमादिरनुभवप्रवाहः, स यथा नीलोऽयमिति नीलानुभवेन प्रवर्त्यमानोऽस्ति, तथा पीतोऽयमिति पीतानुभवेन प्रवर्त्यताम्, परं नीलानुभवप्रभवत्वेन पीतानुभवत्वेन वा अस्यानुभवप्रवाहस्यानुभवत्वलक्षणं स्वरूपं न किञ्चिद् विशिष्यते । एवं च यदा नीलानुभवप्रभवत्वमस्य नीलानुभवप्रभवत्वात् न विशिष्यते तदा नीलेऽननुभूतेऽपि स्मरणं भवेत्, अननुभूते न भवति चेत्—अनुभूतेऽपि न स्यादित्यर्थः ।

---

1 J °ज्ञस्य

वैजात्यं त्वित्यादि । वैजात्यं पुनर्विशेषो भवत्येव । परं यत्रानुभवसन्ताने नीलानुभवो नास्ति ततो वैजात्यं विशेषो नीलानुभवसन्तानस्य तदा स्यात्, यदि आमलक्या-दिदृष्टान्तानुसारेण ज्ञानं नीलविषयोपरागात् चिद्रूपतां परिहृत्य नीलाकारतामादायानुवर्तमानं कालान्तरेऽपि नीलाकारतामुन्मीलयेत् । यदा तु ज्ञानं विषयोपरागं परिहृत्य चिद्रूपतामात्र-मुपादायानुवर्तते तदा जवाकुसुमाद्युपधानात् तद्रूपतां परिहृत्य धवलिमानमुपादायैव संतन्वानस्य स्फटिकस्यैवास्य न वैजात्यं विशेष इति भावः ।

तथात्वे वेति । यत्रास्फुटा तस्यापि विषयत्वे ।

तस्मादतीन्द्रियः संस्कारः परिशिष्यते इति । तदुत्त[रो]त्तरबुद्धि-धारारूपो वेति विकल्पस्य निराकरिष्यमाणत्वात् ॥

टीयाम् ॥ अशक्यं वारयितुमितीति । इत्येतत् **नैयायिकोक्तं** कर्णग्रहणक-वाक्यविवरणव्याजेनेति । शक्तिविशिष्टश्चित्तोत्पादो वासनेति वाक्यस्य व्याख्यानच्छलेन ।

[663a]**षष्ठं च विकल्पज्ञानमिति ।** अवस्त्वेकविषयत्वादिदमेकमेव[1] यतः ।

पूर्वशक्तिविशिष्टमिति वार्त्तिकपदं व्याख्याति—**अहङ्कारेति ।**

शक्तीत्यस्य कोऽर्थः ? स्मृतिशक्तिः । सा च कीदृशी ? अहङ्कारास्पदम् ।

सा चेति । स्मृतिशक्तिः । प्रवृत्तिविज्ञानसहकालभाविन आलयज्ञानविशेषात् यत्स्मृतिशक्तिविशिष्टमालयज्ञानमुत्पद्यते तदेव संस्कार उच्यते, नत्वन्यः स्थिरो नाम कश्चिदिति समुदायार्थः ।

उने ॥ ननु पृथक् संस्कारसन्तानो मा भूत् परमालय एवासौ भविष्यतीत्याह—**आलय-स्येति ।**

ततोऽप्यधिकत्वे इति । यदि त्वालयादप्यतिरिक्तः संस्कारसन्तान इष्यते, तदा तत्रैव संस्कारसन्ताने एव स्मृतिः, आदिपदात् प्रतिसन्धानं च फलं प्रसज्येते, न प्रवृत्तिज्ञानसन्ताने ।

एतदपि कुत इत्याह—**तस्मादिति ।** अतिरिक्तसंस्कारसन्तानात् ।

फलानवकाशादिति । स्मृत्यादिफलानवकाशात् ।

---

1 J indistinct

असावपि कुत इत्याह—**अन्यत्रेति** । संस्कारसन्ताने ।

अतिप्रसङ्गादिति । देवदत्तसंस्कारेण यज्ञदत्तस्य स्मृतिः स्यात् ।

स इति । संस्कारः ।

प्रतिरोधकमिति । अनुभवसंस्कारस्मृत्यादीनामाधारैकत्वस्य ।

अतिरिक्तस्येति । उत्तरबुद्धिभ्यः ।

आश्रयासिद्धत्वादिति । आलयस्यातिरिक्तसंस्कारसन्तानस्य च निरस्तत्वात् ।

विशेषेति । यदि तु अनुभवप्रभवत्वमात्रं वा, अननुभवितृसन्तानवैजात्यं वा तदुत्तरबुद्धिधाराविशेषः संस्कारोऽभ्युपेयते । सस्वरूपेणैवासिद्ध इत्युक्तमेव ।

अविशिष्टेति । यदि तूत्तरबुद्धिधारामात्रमेव संस्कारोऽभ्युपेयते तदासावविशिष्टत्वादेव न स्मृत्यादिफलमाधत्ते इति विरुद्धः । अनेनैव तदुत्तरबुद्धिधारारूपो विकल्पोऽपास्तः ।

टीयाम् । **तच्चेति** । पारतन्त्र्यम् ।

उने ॥ **अनित्यस्येत्यादि** । इच्छादयः परतन्त्रा अनित्यत्वाद् रूपादिवदित्येवं पारतन्त्र्यं साधयित्वा, ते चेच्छादयः परतन्त्रा भवन्तो न सामान्यं न विशेषा न समवायोऽनित्यत्वादेव इत्येवं सामान्यादीन् व्यावर्तयता सता यतोऽनित्यत्वेन हेतुनेच्छादीनां गुणत्वं साध्यते, अतः सामान्यविशेषसमवायेभ्यो व्यावर्तकत्वमनित्यत्वस्य गुणत्वसिद्धावुपयुक्तत्वादुक्तं **टीकाकृते**त्यर्थः ।

अत एवेति । यत एवानित्यत्वस्यैव गुणत्वसिद्धावुपयुक्तं ज्ञापितं **टीकाकृता**, अत एव गुणत्वेन स्वातन्त्र्यं पारतन्त्र्येण च गुणत्वमित्येवं नेतरेतराश्रयत्वशङ्का ।

तेनेति । अनित्यत्वेन ।

यदर्थमिति । पारतन्त्र्यार्थम् ।

तदिति । पारतन्त्र्यम् ।

तत्साधकेनैवेति । गुणत्वसाधकेनानित्यत्वेनैव ।

वैयर्थ्यमिति । गुणत्वस्य ।

अस्येति । गुणत्वस्य ।

तदपीति । गुणत्वम् ।

पूर्वमुक्तमिति । सामान्यतोदृष्टानुमानावसरे ।

गर्भशेष इति । गर्भे वाक्यमध्ये पूर्वमुक्तमित्यनन्तरं शेषः ।

तदिति । अनित्यत्वम् ।

अनुमानकालाभाव इति । अनुमानकालस्याभावो गुणत्वस्यानित्यत्वेनैव पारतन्त्र्यस्य साधितत्वात् ।

सोऽपीति । अनुमानकालाभावोऽपि ।

एकहेत्वित्यादि । एकहेतुसिद्धेऽप्यर्थे यस्य हेत्वन्तरजिज्ञासा स्यात्, तं प्रति गुणत्वहेतोः संभवात् । तथेच्छादिष्वनित्यत्वं येन नानुसंहितं न गृहीतम् [663b] केवलं तल्लक्षणयोगेन गुणत्वलक्षणयोगेन गुणत्वमेव व्याहृतम्, तं प्रति च गुणत्वहेतोः संभवात् ।

गुणत्वलक्षणयोगमेवाह—**दृश्यते हीति** ।

सामान्यवतामिति । सामान्यविशेषवताम् । एतेन सामान्यविशेषसमवायत्वव्यवच्छेदः ।

अचलात्मकानामिति । कर्मणः ।

गुणान्तरायोग इति । द्रव्यस्य च व्यवच्छेदः ।

अत्रेति । गुणत्वलक्षणयोगेऽपि । यस्तु गुणत्वे विप्रतिपद्यते तं प्रत्यनित्यत्वाद्युपन्यस्यते । एतेन सामस्त्येन पारतन्त्र्ये साध्ये गुणत्वहेतोरपि वस्तुतः सार्थकत्वमित्युक्तम् ।

टीयाम् । सिद्धेन पारतन्त्र्येणेति । अनित्यत्वेन पारतन्त्र्यं साधयित्वा अनित्यत्वेनैव गुणत्वमपि साधयतीति संबन्धः ।

उने ॥ उत्तरप्रबन्धोपयोगमिति । न द्रव्यं कर्म वेत्यादि **वार्त्तिक**ग्रन्थोपयोगम् ।

टीयाम् । न चैतदित्यादि । एतद्गुणत्वम् ।

अनित्यत्वेनेच्छादीनां पारतन्त्र्यमात्रं साधितेति । सामान्यविशेषसमवाया एव व्यवच्छिद्यन्ते । न तु द्रव्यकर्मणी, तयोरप्यनित्ययोः सतोः पारतन्त्र्यात् ।

ततश्च साधितपारतन्त्र्यमात्रेणानित्यत्वेनैषां गुणत्वं न सिध्यतीत्यतो यद्यपीत्यादि वक्ष्यमाणतर्कसहायेनानित्यत्वेनैव यत् सिद्धं व्यापकद्रव्यपारतन्त्र्यम् । तेन बाधकप्रमाणेनेच्छादीन् द्रव्यकर्मभ्यां व्यावर्तयति । यथा अनित्यत्वेन पारतन्त्र्यमात्रं साधयित्वेच्छादीनां सामान्यविशेषसमवाया व्यावर्त्यन्ते, तथा [1]अनित्यत्वेनैव वक्ष्यमाणतर्कसहायेनेच्छादीनां व्यापकद्रव्यपारतन्त्र्यं साधयित्वा द्रव्यकर्मणी व्यावर्त्येते । तथा चानित्यत्वेनैव परिशेषादेषां गुणत्वमपि साध्यते इति तात्पर्यार्थः ।

उने ॥ विशेषितेनेति । व्यापकविशेषितेन ।

अस्येति । इच्छाद्याश्रयस्य द्रव्यस्य ।

द्वितीयस्येति । असमव्याप्तिकस्यासाधनस्य[2] ।

प्रथमनिवृत्ताविति । समव्याप्तिकनिवृत्तौ ।

निवर्तते इति । साध्यम् ।

तथा हीति । समव्याप्तिकस्य साधनस्य निवृत्त्या द्रव्यस्य सावयवत्वाभावदर्शने ।

क्वचिदित्यादि । अवयवेष्वारम्भकेषु सत्सु तावदवयवकार्यं द्रव्यं सावयवं व्यवस्थापयितुं शक्यम् । अवयवाश्च तस्यैव द्रव्यस्यारम्भकाः कल्पयितुं शक्याः ।

यत् क्वचिदुपलभ्यमानस्पर्शवत् । अत्र क्वचिदुपलभ्यमानस्पर्शवत्त्वमवयवानां द्रव्यारम्भकत्वेन व्याप्तम् । अवयवानां द्रव्यारम्भकत्वं च क्वचिदुपलभ्यमानस्पर्शवत्त्वेन व्याप्तम् । अवयवानां द्रव्यारम्भकत्वं च द्रव्यसावयवत्वेन व्याप्तम् । द्रव्यसावयवत्वं चावयवानां द्रव्यारम्भकत्वेनेति । यदा चेच्छाद्याश्रये द्रव्ये क्वचिदुपलभ्यमानस्पर्शवत्ता नास्ति, तदा तद्व्याप्तो नावयवानां द्रव्यारम्भसंभवः । तदभावे च तद्व्याप्तं न सावयवत्वमपीत्यर्थः ।

व्यापकमित्यर्थ इति । न तावदा....त्ये तस्य सकलस्य व्यापकमित्ययमर्थ इति भावः ।

तथा सत्येवेति । व्यापकत्वे सत्येव । इच्छादीनामनित्यत्वेन द्रव्याश्रितानां सार्वत्रिकत्वं तदैव घटते यद्येतदाश्रयो द्रव्यं व्यापकं स्यादिति भावः ।

नन्विच्छाद्याश्रयद्रव्यस्य शरीरादिना संयोग इच्छादीनां कारणम् । स च कर्मज इतीच्छादयस्तत्र तत्रोपलभ्यमानाः स्वाश्रयद्रव्यस्य तत्र तत्र गतिमेव ज्ञापयन्तीति [664a]

---

1 S तथा नि 2 S °स्यसाध°

कुतस्तस्य व्यापकत्वमित्याशङ्क्याह--**तदुपपादयति क्वचिदितीति** ।

क्वचिदन्यतरेत्यादिना **सिद्धमस्य व्यापकत्व**मित्यन्तेन इच्छाद्याश्रयस्य व्यापकत्वं समर्थयते **टीकाकृ**दित्यर्थः ।

क्वचिदित्यादेः **प्रमाणाभावा**दित्यन्तस्य टीकाखण्डस्यान्यतरदित्यादिना संयोगादेरित्यन्तेन **उदयन**व्याख्यानेनान्वितस्यायं तात्पर्यार्थः । तत्र तत्रेच्छादयो हि स्वाश्रयस्य तदैव तत्र तत्र गतिं ज्ञापयन्ति यदि गतिमन्तरेण तस्य तत्र तत्र शरीरादिसंयोगो न स्यात् । यदा त्वस्य द्रव्यस्य तत्र तत्र शरीरादिना संयोगः क्वचिदुत्पन्नशरीरादेर्देशान्तरादौ शरीरस्वान्तादेः कर्मणा गत्या क्वचिच्च भवान्तरे स्वभावतः कोऽर्थः कार्यद्रव्योत्पत्तेरारभ्य शरीरोत्पत्तिकाल एव यस्तत्कारणानां शरीरादिकारणानां परमाण्वादिनां संयोग आत्मना संबन्धस्तदादेरुपपद्यते, तदा तस्याच्छाद्याश्रयस्य द्रव्यस्य गतिकल्पनायां प्रमाणाभावः, इच्छाद्याश्रयस्य शरीरादिना तत्र तत्र संयोगस्य गतिकल्पनायां प्रमाणस्यान्यथासिद्धत्वादिति ।

ननु शरीरादिकर्मणा स्वभावतो वा तत्र तत्रेच्छाद्याश्रयस्य शरीरादिना संयोग इति कुतो यावतास्य गतिरेव किं न स्यादित्येतदाशङ्कते **उदयनः— अथ गतेरेवेति** ।

तं तमिति । देशम् ।

आप्नोतीति । इच्छाद्याश्रयो द्रव्यम् ।

तयेति । मूर्त्या ।

तदभावश्चेति । मूर्त्यभावः ।

द्रव्याश्रितत्वमिति । इच्छादीनाम् ।

अतोऽमूर्तत्वादिति । इच्छादीनां परमाण्वाश्रितत्वं सावयवत्वनिषेधाद् व्यापकाश्रितत्वं सिद्धं व्यापकं चामूर्तम् ।

एकमपीति । इच्छाद्याश्रयस्य द्रव्यस्य सावयवत्वगतिमत्त्वनिषेधकप्रमाणयोर्मध्ये एकतरमपि ।

अनित्यत्वे सत्येकेन्द्रियग्राह्यजातिमत्त्वादिति[1] ।

जातिमत्त्वादिति सामान्यविशेषसमवायानां व्यवच्छेदः ।

इन्द्रियग्राह्येति । वाय्वाकाशादेर्व्यवच्छेदः ।

---

1 जातिमत्त्वादिति Twice in J.

एकेति । पृथिव्यप्तेजःकर्मणां व्यवच्छेदः । एतानि हि चक्षुःस्पर्शनेन्द्रियद्वय-ग्राह्याणि ।

अनित्यत्वे सतीति । आत्मनो व्यवच्छेदः । स हि मन एकेन्द्रियग्राह्य-जातिमानपि नित्यः ।

टीयाम् ॥ **तदुत्पत्ताविति** । इच्छाद्युत्पत्तौ ।

नाकर्तुर्मनस इति । गुणा इति योगः ॥

॥ इत्यात्मलक्षणं संपूर्णम् ॥

उने ॥ **तस्यापीति** । दुःखस्य ।

तद्धेत्विति । दुःखहेतुः ।

तेषामपीति । इन्द्रियादीनाम् ।

तथाभावादिति । दुःखहेतुरूपताभावात् ।

अंशतोऽर्थादेरिति । चन्दनविलेपनादेरादिपदात् प्रवृत्तेः ।

परम्परया तु शरीराश्रितत्वं बुद्धेरिति । साक्षादात्माश्रितत्वात् ।

दोषाणामिति । रागादीनाम् ।

अर्थांशस्य चेति । सुखदुःखादेः ।

व्यभिचारदर्शिन इति । व्यभिचारनिश्चयवतो **भाष्यकृतः** ।

कथं चेष्टाश्रय इति प्रश्न इति । व्यभिचारसन्देहे एव संभवी कथं चेष्टा-श्रय इत्यनेन प्रकारेण प्रश्नः ।

तस्यैवेति । कायस्यैव ।

इतरेतराश्रयेति । कायव्यापारे सिद्धे शरीरलक्षणं सिध्यति, शरीरलक्षणे सिद्धे च कायव्यापारः सिध्यतीतीतरेतराश्रयाः ।

प्रयुक्त इतीति । **वार्त्तिके** प्रयुक्तस्येति यत्पदं तत्प्रयत्नस्य चेष्टाकारणक-त्वज्ञापनपरं यतोऽस्तीत्यर्थः ।

निरुक्तिरिति । अर्थकथनम् ।

व्यभिचारो[664b]दाहरणं—**दारुयन्त्रादीति ।** दारुयन्त्रादिर्हि हिताहित-प्राप्तिपरिहारफलायाश्चेष्टाया आश्रयो न तु शरीरम् ।

प्राणाख्यो वायुरिति । प्राणाख्ये हि वायौ प्रयत्नवदात्मसंयोगासमवायि-कारणान्त्यावयविक्रियारूपा चेष्टास्ति, न तु शरीरत्वम् ।

निरस्ता इति । अत एव कारणद्वारनिरुक्तौ व्यभिचारोदाहरणानि न भवन्तीत्यर्थः ।

दारुयन्त्रादित्याहेति । आदिपदेन प्राणाख्यं वायुमाहेत्यर्थः ।

परलक्षणाभिप्रायेणेति । न त्ववच्छिन्नपरिमाणं मूर्तिरिति स्वलक्षणाभि-प्रायेण ।

तत्रेति । शरीरक्रियायाम् ।

न ततोऽन्यतरदिति । तच्छरीरं ततः शरीरात् नान्यतरदेकस्मिन्नन्यत्वा-भावात् ।

अतो नासिद्धं विशेषणमितीति । शरीरस्य मनसा प्रयोगेऽपि यतः परलक्षणाभिप्रायेण मूर्तेरभ्युपगमे स्पर्शवता अप्रयोगोऽस्ति, यतश्च शरीरेण शरीरस्य प्रयोगेऽपि अन्तरग्रहणे शरीरान्तरेणाप्रयोगोऽस्त्यतो मूर्तान्तराप्रयोगे सतीति विशेषणं नासिद्धम् ।

आगामिवार्त्तिकेति । सामान्यशब्दानामपि विशेषवृत्तित्वं सामर्थ्यादित्यादि-भावि**वार्त्तिक**स्य ।

अपि चेत्यादि । भवतु वा कथमपि पाषाणमण्डूकादिशरीरस्याव्याप्तिपरिहारः । परं मृतशरीरस्याव्याप्तिपरिहारार्थं तद्व्यापारयोग्यतैवानुसरणीया । अथ नानुस्रियते तदा मृत-शरीरं शरीरत्वेनैव नोदाहरणीयमित्यर्थः ।

विशेषानुपादानात् सर्वेन्द्रियाभिप्रायमेतदिति । विशेषाभणनाद् यस्यानुग्रहेण सर्वाण्यपीन्द्रियाण्यनुगृह्यन्ते उपघातेन चोपहन्यन्ते इत्यभिप्रायमिन्द्रियाश्रय इत्येतत् ज्ञेयम् । तथा च न गोलकादिना व्यभिचारः । तदाह—**न हीति ।**

टीयाम् । तदवृत्तित्वेनानुपपत्त्येति । शरीरावृत्तित्वेन या इन्द्रियाणामाश्रयार्थानु-पपत्तिरुक्ता सा अर्थानामप्यस्त्यतोऽर्थानामपि । अन्यादृश आश्रयार्थो व्याख्येय इति भावः ॥

उने ॥ अव्याप्त्येति । व्याप्ती विहायेति शेष इति । स्वरूपेण गन्धादीनामाश्रयः शरीरमिति लक्षणं क्रियमाणं तैजसादिशरीरेणाव्याप्तिं घटादिनातिव्याप्तिं च विना न स्यादिति तात्पर्यम् ।

कार्योपहितं रूपमिति । सुखाद्युपलब्धिरूपकार्यविशेषितं स्वरूपम् ।

तदेवेति । स्वरूपमेव ।

प्रयोजनमित्यादि । तदधिकारेण सुखाद्युपलब्धिमुद्दिश्य तत्र गन्धादिषु लोकानां यतः प्रवृत्तिरतो गन्धादीनां सुखाद्युपलब्धिहेतुत्वं प्रयोजनं प्रवर्तकमित्यर्थः ।

टीयाम् ॥ तदर्थमाश्रयन्त इत्यर्थ इति । गन्धादीनां स्वस्मिन् लोकप्रवर्तकं यत् सुखाद्युपलब्धिसाधनत्वं तन्न शरीरं विनेति तदर्थं यच्छरीराश्रयणमयमेवाश्रयार्थ इति भावः ।

उने ॥ तदवच्छेदेनेति । इन्द्रियावच्छेदेन ।

तत्रेति । आत्मनि ।

बहिरपि भोगप्रसङ्गादिति । चक्षूरश्मीनां बहिः सं[भ]वित्वेन इन्द्रियावच्छेदेनात्मनो बहिः सत्त्वात् ।

आश्रयशब्दावृत्तिभेदेति । चेष्टाश्रय इन्द्रियाश्रयोऽर्थाश्रय इत्येवमावृत्त्याश्रयशब्दस्य भेदोऽनेकत्वम् ।

अनुपपत्तिवर्णनमिति । प्रमाणबाधाख्यसामर्थ्योपवर्णनम् ।

संपातायातमिति । सामर्थ्यभणनप्रसङ्गमात्रेणागतम् ॥

वार्त्तिके । सामर्थ्यं च लोकतस्तदधिगतिरिति । लोकतो या तदधिगतिर्विशेषाधिगतिर्लोके [665a] न सामान्यविषयः प्रयोग इत्यर्थः । तदपि सामर्थ्यमित्यर्थः ।

टीयाम् ॥ अपरमप्याहेति । आदिग्रहणसंगृहीतं द्वितीयमपि सामर्थ्यशब्दार्थमाहेत्यर्थः ।

उने ॥ संगृहीतयोरिति । लोके प्रयोगप्रमाणासंभवयोः ।

यस्यापीति । घटादेः ।

प्रमाणेनेति । आगमादिना ।

अत्र हीति । समवायाभिप्राये ।

षष्ठीतत्पुरुषो बहुव्रीहिर्वेति । इन्द्रियाणामाश्रयः समवाये कारणम् । इन्द्रियाण्याश्रयाः समवायिकारणानि यस्येति वेत्येवम् ।

उभयमिति । समासद्वयम् ।

उपलक्षणं चैतदिति । इन्द्रियाणां शरीरे इत्येतत् ।

प्रथमे पक्षे इति । इन्द्रियाणां शरीरे समवाय इति तत्पुरुषे पक्षे ।

समानदेशत्वप्रसङ्गादिति । प्रसङ्गश्च शरीरैकसमवायिकारणाभ्युपगतेः ।

एकस्य द्रव्यस्येति । शरीरं ह्येकं द्रव्यम् ।

पृथिव्या इति । शरीरं हि पार्थिवम् ।

अबादिद्रव्येति । रसनादीनि हीन्द्रियाणि आप्यादिद्रव्याणि ।

द्वितीयपक्षे त्विति । शरीरस्येन्द्रियेषु समवाय इति बहुव्रीहिपक्षे ।

द्रव्यानारम्भकत्वादिति । स्पर्शवत एव द्रव्यारम्भकत्वात् ।

इन्द्रियविशेषं गृह्णातीति । इन्द्रियविशेषद्वारेण शङ्कत इत्यर्थः ।

श्लिष्टमिति । घ्राणस्य पार्थिवत्वेन हेतुना घ्राणस्य शरीरे समवायो न विरुद्धः, शरीरस्य वा घ्राणे इत्येवं श्लिष्टार्थम् ।

अत्र वेति । घ्राणस्य शरीरे शरीरस्य वा घ्राणे समवाय इति वदन्ति **परे** ।

प्रथमेऽपीति । शरीरावयवान्तरेण घ्राणस्य समवायो वेत्यस्मिन् ।

तस्येति । शरीरावयवस्य ।

अनुयोगद्वयमभिप्रेत्येति । घ्राणस्य वा शरीरावयवे समवायः, तस्य वा घ्राणे इत्येतद्विकल्पद्वयाभिप्रायेण घ्राणस्य वा शरीरावयवे समवाय इति विकल्पो न संभवत्येवेति वक्ष्यमाणत्वात् परमार्थतः शरीरावयवस्य वा घ्राणे समवाय इत्यस्यैकस्यैव शरीरे घ्राणस्य समवायो घ्राणे वा शरीरस्य समवाय इति साधनार्थं पराभ्युपगत विकल्पस्य बलेनेत्यर्थः ।

अहीति । घ्राणस्य वा शरीरे समवायः शरीरस्य वा घ्राणे इत्येतद् विकल्पद्वयं यत् श्लिष्टेन वाक्येन परेणोक्तं तत् श्लिष्टेनैव वाक्येन **टीकाकृत्** परिहरतीत्यर्थः ।

शरीरेत्यादि । यत् हि घ्राणं शरीरावयवस्य मुखस्य समवायिकारणमभ्युपेयते, तस्य कथं शरीरे समवायः स्यात् ।

न हीति । घ्राणं हि शरीरावयवसमवायिकारणं सत् स्वकार्यस्य शरीरावयवस्य मुखस्य कार्ये शरीरे न समवैति कार्यस्यैव कारणे समवायात् ।

षष्ठीतत्पुरुषपक्षे इति । घ्राणस्य शरीरे समवाय इति पक्षे ।

बहुव्रीहिपक्षेऽपीति । शरीरस्य घ्राणे समवाय इत्यत्र पक्षे ।

शरीरासमवायादिति हि टीकापदं श्लिष्टमित्यतो द्वितीयप्रकारेण व्याख्याति— **शरीरस्यासमवायादिति** । यद्धि घ्राणं शरीरावयवस्य समवायिकारणमभ्युपगम्यते तत्र कथं शरीरस्य समवायः स्यात् ?

न हीति । शरीरं हि कार्यं सत् स्वकारणस्यावयवस्य मुखस्य कारणे घ्राणे न समवैति, स्वकारणे एव कार्यस्य समवायात् ।

ननु यदि शरीरावयवस्य घ्राणे समवायोऽभ्युपेयते तदैव घ्राणस्य शरीरे शरीरस्य वा घ्राणे [665b] समवायो विरुध्यते । यदा तु घ्राणस्य शरीरावयवे समवाय इत्यभ्युपेयते तदा हि न विरोत्स्यत इत्याह—**घ्राणस्येति** ।

मूर्तयोरेकाश्रयत्वानुपपत्तेरिति । घ्राणस्य शरीरावयवे समवायस्तदा स्याद् यद्येकत्रैव शरीरावयवेषु घ्राणं शरीरं च मूर्ते समवेयाताम् । न चैतदुपपद्यते ।

अत्र टीकैव स्फुटेति । प्रपञ्चितमर्थं सकलमपि टीकापि स्फुटं वदतीत्यर्थः ।

टीयाम् । यदि नासिकाग्रमेव घ्राणमिति । यदि नासिकाग्राद् व्यतिरिक्तमन्यत् न किञ्चित घ्राणमिति पक्षः, तदेदं प्रागुक्तं समाधानमिति भावः ।

उने ॥ तत्रेति । शरीरावयवे ।

आरम्भकतयेति । यदिदमतीन्द्रियं घ्राणं शरीरावयवे संयुक्तं तच्छरीरारम्भकं सदनारम्भकं सद् वा ।

टीयाम् ॥ न तत्समवेतमिति । पराभ्युपेते घ्राणे शरीरस्य समवायो न स्यात् ।

उने ॥ तामिति । व्याप्तिम् ।

उपोद्बलयितुमिति । समर्थयितुम् ।

अप्रत्यक्षत्वप्रसङ्ग उक्त इति । यथा प्रत्यक्षाप्रत्यक्षवृत्तेर्वायुवनस्पतिसंयोगस्याप्रत्यक्षत्वं तथा प्रत्यक्षशरीरावयवाप्रत्यक्षघ्राणवृत्तेर्देहस्याप्रत्यक्षत्वस्य प्रसङ्ग इत्येवं **टीकाकृतोक्तो** हि विपर्ययफलोऽप्रत्यक्षत्वप्रसङ्ग उक्तामेव व्याप्तिं समर्थयते ।

अनारम्भे त्विति । यदि तु शरीरावयवसंयुक्तं घ्राणं शरीरानारम्भकमिष्यते ।

तत्रेति । घ्राणे ।

उपेक्षितवानिति । टीकाकारः ।

एतेनेति । शरीरावयवसंयुक्तेऽतीन्द्रिये घ्राणे शरीरसमवायनिराकरणेन ।

एतदिति । शरीरावयवसंयुक्तमतीन्द्रियं घ्राणम् ।

एकद्रव्यस्येति । घ्राणस्य शरीरसमवेतत्वाभ्युपगमे हि शरीररूपमेकं द्रव्यमस्य समवायिकारणमभ्युपेतं स्यात्, न चैकद्रव्यं द्रव्यं स्यात् । यदुक्तम्, अद्रव्यं वा द्रव्यमनेकद्रव्यं वा । एकद्रव्यं द्रव्यमेव न भवतीति ।

अल्पपरिमाणस्येति । आरम्भकेण हि यदारभ्यते तत् स्वतो महदेवेत्यतोऽल्पपरिमाणस्य घ्राणस्य महता शरीरेणारम्भाभावात् ।

ननु घ्राणं शरीरव्यापकत्वेन महद्भविष्यति, अतो नोक्तो दोष इत्याशङ्क्याह— **शरीरेति ॥**

टीयाम् ॥ अपि चेत्यादि । अथ चेष्टेन्द्रियार्थानां सर्वेषामपि यत्र समवायः तच्छरीरमित्यभ्युपेयते, तदेन्द्रियाणां समवायिकारणानि ये परमाणवस्तेषु चेष्टाया गतेः समवायिकारणत्वेनेन्द्रियाणां च रूपाद्यर्थानां च समवायोऽस्तीत्येषां शरीरत्वं प्रसज्येत ॥

उने ॥ एवं दूषणमिति । इन्द्रियसमवायिकारणेषु परमाणुषु शरीरत्वप्रसङ्गलक्षणम् ।

वायवीयशरीराव्याप्तिरिति । वायवीये हि शरीरे नेन्द्रियविषयसमवायो वायोरिन्द्रियाविषयत्वात् । अतोऽत्र शरीरत्वं न प्रसज्येतेत्यतिव्याप्तिः ।

योगिन इति। अथ मा भूदन्येन्द्रियविषयो वायुः, योगीन्द्रियविषयस्त्वस्ति। ततस्तदपेक्षया वायवीयेऽपि शरीरे इन्द्रियविषयसमवाय इति नाव्याप्तिरित्यर्थः।

तेषामपीति। इन्द्रियपरमाणूनाम्।

तथाभावादिति। योगीन्द्रियविषयसमवायभावात्।

तदेतत्सर्वमित्यादि। अथ समवायाभिप्रायमाश्रयत्वमित्यादि सर्वं यत् तथापि न समवाय इत्यादिप्रकारेण चर्चितं तच्चेष्टेन्द्रियार्थाश्रयशरीर[666a]मिति शब्दगतिमवधीर्य।

यदि द्वन्द्वेत्यादि। इन्द्रियाश्रयेत्यत्र यदा बहुव्रीहि[:] परेणाभ्युपेयते, तदा यदि चेष्टा चेन्द्रियाणि चार्थाश्चाश्रया यस्येत्येवं द्वन्द्वानन्तरं बहुव्रीहिस्तदाश्रय इत्यत्र पुल्लिङ्गसंगतिर्न स्यात् तथा चेष्टार्थानामाश्रय इन्द्रियाश्रयः शरीरमित्यस्य पराभ्युपेतस्यार्थस्य संगतिर्न स्यात्। अथानयोरसंगत्योः परिहारायेन्द्रियाण्याश्रयो यस्येति प्रथमत एव बहुव्रीहिरभ्युपेयते, तदेन्द्रियाश्रयं चेष्टार्थाश्रय इत्येवं पदभेद एव स्यात्, न तु यथोक्तमैकपद्यम्। तस्मात् लक्षणपदविचारणयैवेदं समस्तशरीरलक्षणं न घटते इति भावः।

॥ इति शरीरलक्षणं सम्पूर्णम् ॥

उने ॥ केनचिदुपाधिनेत्यादि। प्रवृत्तिदोषजनितोऽर्थः फलम्। शरीरादयश्च धार्मिक्यादिप्रवृत्तिजनिताः। अत एतदुपाधिविशिष्टाः शरीरादय एव फलमित्यर्थः।

स्वाभाविकरूपेति। स्वाभाविकं च रूपं शरीरादीनां चेष्टेन्द्रियार्थाश्रयत्वादि।

औपाधिकरूपेति। औपाधिकं च रूपं शरीरादीनां धार्मिकादिप्रवृत्तिजनितत्वरूपं फलत्वम्।

तेभ्य इति। शरीरादिभ्यः।

तथाभावादिति। शरीराश्रितत्वभावात्।

एभ्य इति। इन्द्रियेभ्यः।

तेषामिति। अर्थादीनाम्।

एवंरूपत्वे इति । साक्षाच्छरीराश्रितत्वे ।

[1]ननु बाह्येन्द्रियवैधर्म्यज्ञापनार्थत्वं मनस इन्द्रियानन्तरं पाठेऽपि स्यात्, तत् कस्मात् बुद्ध्यनन्तरं पाठ इत्याशङ्क्याह—**बुद्धीति** । युगपज्ज्ञानानुत्पत्तिर्हि मनसो लिङ्गम् ।

उभयेत्यादि । शरीरसंयुक्तमेव व्यापकत्वेनेत्यवधारणे त्वगिन्द्रियवर्जितशेषेन्द्रियाणामिन्द्रियत्वं न प्राप्नोतीति भागासिद्धत्वम्, शरीरेणैव संयुक्तमित्यवधारणे त्वसिद्धत्वं, न हीन्द्रियाणि शरीरेणैव केवलेन संयुक्तानि साक्षात्प्रतीतिसाधनानि, अपि तु पदार्थेनापि संयुक्तानि सन्ति ।

टीयाम् । **शरीरसंयुक्तमिति** । अनेन लोकादिव्यवच्छेदः । एतद्धि न शरीरसंयुक्तं सत् साक्षात्प्रतीतिजनकं किं त्विन्द्रियार्थसंयुक्तं सत् ।

संस्कारकम् अञ्जनादि ।

दोषः पित्तादि ॥

उने ॥ [2]नन्विन्द्रियलक्षणे संस्कारकपदेन तावदञ्जनादिव्यवच्छेदः स्यात् ? सर्पस्थस्य तु मणेर्हस्तस्थस्य प्रदीपादेश्च केन व्यवच्छेद इत्याह—**सर्पेति** ।

सर्वेषामिति । घ्राणादीनाम् ।

टीयाम् ॥ **पारम्पर्येण** **वेत्यादि** । सुखदुःखसाक्षात्कारो हि भोगः तत्र साक्षान्मन एव साधनम्, घ्राणादयस्तु मनोद्वारेणेति ।

उने ॥ **सोऽपीति** । विभागोऽपि ।

विभागवचनं चात्र कथं सिद्धमित्याह—**तदेतदेवं लक्षणकमिति** । यच्छरीरसंयुक्तमित्यादि लक्षणं यस्योक्तं तत् ।

चेतीति । एतत् ।

अन्यत्रेति । **सूत्रे** ।

नयतेति । मनसो भिन्नं लक्षणसूत्रं कुर्वतेत्यर्थः ।

---

1 S नतु   2 J नन्वत्वेन्द्रि

टीयाम्। तेषामिति। घ्राणादीन्द्रियाणाम्।

कथयतीति। वार्त्तिककारः।

उने ॥ स्वोक्ते **टीकाकृतः** संमतिं दर्शयति—**तदेतदिति।**

तत्र इति। आत्मादिप्रमेयोद्देशसूत्रे इन्द्रियसामान्योद्देशात्।

विभागसूत्रत्वेऽपि लक्षणसूत्रं किं न स्यादिति। इदमेकमेवोद्देशविशेषसूत्रं लक्षणसूत्रं च किं न स्यात्?

अनयोरिति। उद्देशविशेषलक्षणयोः।

परार्थानुमाने विरोधमिति। हेतु[666b]प्रतिपादकं वचनं परार्थानुमानं तच्चात्र घ्राणेत्यादि [१.१.१२] **सूत्र**मेव। तेन हि घ्राणादीनां व्यतिरेकिहेतुरूपता प्रतिपाद्यते। तद् यद्यनेन सूत्रेण घ्राणत्वादीनां परं प्रत्युपदेशः, तदा ज्ञातानामेव। विधिविषयतयानुवादो ह्युद्देशः। स च ज्ञातस्यैव स्यात्। यदि तु लक्षणं तदा अज्ञातानामेव। लक्षणं हि परस्य ज्ञाप्यते, ज्ञापनं चाज्ञातस्यैव स्यात्। ज्ञाताज्ञातत्वे चैकस्य घ्राणादेर्युगपद्विरुध्येते इत्यर्थः।

स्वार्थानुमानेऽपीति। साध्याविनाभावि ज्ञायमानं लिङ्गं स्वार्थानुमानम्। तच्चात्र घ्राणेत्यादि सूत्रेण प्रतिपादितं घ्राणत्वाद्येव। न हीतरव्यवच्छेदकेन धर्मेण घ्राणत्वादीनां समानासमानजातीयव्यवच्छेदः साध्यते। तद् यद्यत्र घ्राणत्वादि लक्ष्यं तदा अज्ञातमेव। लक्ष्यं हि साध्यं ज्ञाप्यं तच्चाज्ञातमेव। अथ लक्षणं तदा ज्ञातं सिद्धस्यैव लक्षणत्वात्। ततश्च स्वार्थानुमानेऽपि लक्ष्यलक्षणत्वे एकस्य घ्राणादेर्युगपद्विरुध्यते इति तात्पर्यार्थः।

टीयाम्। तदेकार्थसमवायीति। तेन स्वस्वविषयोपलब्धिसाधनत्वेन सह एकस्मिन्नर्थे समवायि।

उने। तथापीति। भवत्विन्द्रियाणां स्वस्वविषयोपलब्धिसाधनत्वमेव लक्षणम्, घ्राणत्वादि तु लक्ष्यम्। परं घ्राणादिपदेभ्य एव कथं विवक्षितस्य लक्ष्यलक्षणोभयस्य लाभः?

तर्हि योग एवास्त्विति। यदि घ्राणादिशब्दानामवयवार्थं निमित्तीकृत्य **प्रवृत्तिस्तर्हि एषां योग एव** व्युत्पत्तिरेव प्रवृत्तिनिमित्तमस्तु, मा **रूढिरित्यर्थः।**

टीयाम् ॥ **अवयवार्थान्वितं घ्राणत्वाद्येव घ्राणादिशब्दप्रवृत्तिनिमित्तमिति** । एतेन घ्राणादिशब्दा रूढयौगिका इत्युक्तम् ।

इन्द्रियाणीत्यनेनेति । सामान्यपरेण लक्ष्यनिर्देशेन ।

तदेव त्विति । घ्राणादिपदमेव ।

उने ॥ **ननु केवलेनेति** । यदि यद् गन्धाद्युपलब्धिसाधनं तद् घ्राणादीत्युच्यते तदेन्द्रियसन्निकर्षेणातिव्याप्तिः, अथ घ्राणत्वादौ सति यद् गन्धाद्युपलब्धिसाधनं तद् घ्राणादीत्युच्यते तदेतरेतराश्रयता ।

तावदुपलक्षणपरमिति । एतेन यच्छरीरसंयुक्तं सद् गन्धाद्युपलब्धिसाधनं तद् घ्राणादीति लक्षणमुक्तं स्यात्, तथा चेन्द्रियसन्निकर्षेण न व्यभिचारः, संयोगस्य संयोगान्तराभावेनास्य शरीरसंयोगाभावात् ।

समुचितमिति । प्रकृतिप्रत्ययादिसमुच्चयरूपम् ।

वृद्धिक्षयवद्‌द्रव्येति । [1]वृद्धिक्षयवद्‌द्रव्यं शरीरतर्वादि ।

लक्षणेति । त्वक्स्थानमिन्द्रियं त्वक् ।

बीजं चेति । तद्वदुपचारः स्थानादिति ।

एवमपीति । लक्षणायां सत्यामपि ।

लक्ष्यलक्षणेति । घ्राणत्वादि लक्ष्यं जिघ्रत्यनेनेत्यादि निरुक्तिर्लक्षणं तयोर्व्यवस्था ।

न हि सिध्यतीति । त्वचो निरुक्तेरभावात् ।

टीयाम् ॥ **निर्वचनग्रहणेनेति** । भाष्ये समाख्यानिर्वचनसामर्थ्यादित्यत्र निर्वचनशब्देन प्रकृतिप्रत्ययादिसमुच्चयरूपपदभञ्जनं नोच्यते । किं तु यन्निमित्तमालम्ब्य पदं प्रवृत्तं तदुच्यते ।

संगृहीतं भवतीति । निर्वचनग्रहणेन ।

ननु त्वक्पदस्य प्रवृत्तिनिमित्तमपि न किञ्चिद् भविष्यति, तत् कथं तत्संग्रह इत्याह—

---

1 S °क्षयं च द्रव्°

तस्यापीति । त्वक्पदस्यापीति ।

त्वक्स्थानं यस्य तस्मिन् त्वक्स्थाने ।

उपचार इति । उपचारेण प्रवर्तनम् । त्वक्पद[667a]स्यापि ह्युपचारेण स्पर्शोपलब्धिसाधनमिन्द्रियं प्रवृत्तिनिमित्तमस्तीत्यर्थः ।

उने ॥ कार्यत्वादित्यर्थं इति । तेनास्तिसमवैतीत्यादिभिर्नानैकान्तिकता ।

तत्रेति । घ्राणे ।

ननु घ्राणे गन्धस्य समवायो मा भूत् समवेतसमवायस्तु भविष्यतीत्याह—**मृगमदेति ।**

ननु मा भूतां घ्राणे गन्धस्यैतौ संबन्धौ विशेषणसंबन्धस्तु भविष्यतीत्याह—**स्वातन्त्र्येणेति ।**

टीयाम् ॥ बाह्यपार्थिववदिति । यथा मृगमदगन्धव्यञ्जकाः कुक्कुटोच्चारादयः पार्थिवा इत्यर्थः । न चातपेनानेकान्तः । न ह्यातपो गन्धव्यञ्जकोऽपि तु जलाभिभूतो गन्धो द्रव्याणां नोपलभ्यते । केवलं जलमातपोऽपनयति, न तु द्रव्यस्य गन्धं व्यनक्तीति नानेकान्तः ।

एवं रसनादिष्वपि योज्यमिति । रसनेन्द्रियमाप्यं गन्धादिमध्ये नियमेन रसव्यञ्जकत्वात् दन्तान्तरस्यन्दमानोदबिन्दुवत् । न खलु शुष्यदास्यो मोदकादिरसमनुभवति । चक्षुस्तैजसं गन्धादिमध्ये नियमेन रूपव्यञ्जकत्वात्, दीपवत् । त्वगिन्द्रियं वायवीयं गन्धादिमध्ये नियमेन स्पर्शव्यञ्जकत्वात्, स्वेदोदबिन्दुशीतस्पर्शव्यञ्जकव्यजनवातवत् ।

नियमग्रहणं मनोनिवृत्त्यै । गन्धादिष्विति चावधारणसिद्ध्यै । अन्यथा घ्राणादीनां गन्धत्वादिव्यञ्जकत्वेनावधारणं न स्यात् ।

उने ॥ तथापीति । यद्यपि भूतेभ्य इति पदं यज्जातीयं यदीन्द्रियं तज्जातीयस्य तेनैव गुणविशेषो गृह्यते इत्येवंविधनियमार्थं तथापि कोऽस्य परमार्थः ?

विशेषसिद्धिरेवेति । नानाभूतकारणकत्वसिद्धिरेव ।

शेषमिति । अहङ्कारैककारणकत्वम् ।

एकः पाक्य इति । परमाणुः ।

सर्वसाधारण इति सर्वेषां रूपादीनां साधारणः ।

उत्तरत्रापीति । एकोऽग्निसंयोग एकं चौष्ण्यमित्यत्र ॥

टीयाम् ॥ **रूपत्वादिसामान्यमेवेति** । पूर्वेषां रूपादीनाम् ।

तादवस्थ्येनेति । सर्वदैकावस्थत्वेनेति ।

॥ इन्द्रियलक्षणं सम्पूर्णम् ॥

उने ॥ **विभागस्यापीति** पृथिव्यादिगुणा इत्यस्य ।

श्लिष्टमिति । लक्षणपरतया विभागपरतयापि वाव्यवस्थापितम् । विभागस्य हि स एव विषयो यो लक्षणाभिधेयः ।

तदर्था इति । लक्षणे। न च यदिन्द्रियविषयत्वेन भाव्यमानानां निःश्रेयससाधकत्वं या च मिथ्याज्ञानविषयीकृतानां संसारनिमित्तता सोऽर्थानां स्वरूपविशेष एव वस्तुतोऽभिधीयते इत्यतः **टीकाकृता येषामिन्द्रिये**त्यादिना अर्थानां निःश्रेयससाधकत्वं संसारनिमित्तता च विभागविषयतया व्याख्याते ते प्रकटयति—**येषामुक्तलक्षणयोग** इति । **तदर्था** इति लक्षणसिद्धस्वरूपविशेषयोगः ।

उद्दिष्टस्यैव तावल्लक्षणम्, उद्देशश्च सिद्धस्यैव स्यादिन्द्रियविषयत्वमात्रेण भाव्यमानानां चार्थानां निःश्रेयससाधकत्वमद्यापि न सिद्धमिति तत्परिहृत्य यन्मिथ्याज्ञानविषयीकृतानां संसारहेतुत्वं सिद्धं तदेव लक्षणं विषयतया आह—**येषां मिथ्येति** ।

निमित्तानुव्यञ्जनसंज्ञेति । कामिन्या इदं दन्तौष्ठमित्येवं प्रवृत्तिनिमित्तविषया वासना निमित्तसंज्ञा दन्तकुन्दकलिकेत्येवमारोपविषया वासना अनुव्यञ्जनसंज्ञा ।

आद्ये पदे इति । गन्धरसरूपस्पर्शशब्दा इति, पृथिव्यादिगुणा इति [च] द्वे पदे ।

टीयाम् ॥ **उद्देशक्रमेति** । आत्मशरीरेन्द्रियार्थे[667b]त्येवंरूप उद्देशक्रमः ।

उने ॥ आगामिवार्त्तिकस्येति । पृथिव्यादिगुणा इत्येतस्मिन् पदेऽनेकः समासः संभवतीत्यस्य ।

टीयाम् ॥ वाय्वादय इति । आदिपदादाकाशादयः ।

उने । लक्षणविभागयोर्व्याघात इति । तदर्था इति लक्षणम्, पृथिव्या[दि]गुणा इति विभागः । आदिग्रहणेन वाय्वादिसंग्रहे तदर्था इति लक्षणेन पृथिव्यादिगुणा इति विभागस्य व्याघातो वाय्वादीनामतदर्थत्वात् । विभागेन च लक्षणस्य व्याघातो विभक्तानां वाय्वादीनां लक्षणेनाव्याप्तत्वात् । द्रव्ये दन्तेति । रूपे श्यामेति । गन्धे सुखामोद इति । रसे अहो इति । स्पर्शे प्रेयसीति । संख्यायां बह्विति । परिमाणे पीनेति । पृथक्त्वे मृतेति । संयोगे दिव्येति । विभागे हसतीति । परत्वापरत्वे ममेति । कर्मणि नृत्यमिति । **सत्प्रत्ययासत्प्रत्यय** इति । विशिष्टप्रयत्नजा विशिष्टप्रयत्नजः । जातौ गम्येति । विशेषं वक्रेति । **एकैकविषयं वेति ।** स्वविषययो रूपस्पर्शयोर्मध्येऽन्यतन्तरैक-विषयमित्यर्थः ।

समुदायेति । रूपस्पर्शसमुदायः ।

न च रूपमिति । दर्शनस्पर्शनाभ्यामेकार्थानुसन्धानं रूपैकविषयं तदा वक्तुं शक्येत, यदि रूपं दर्शनस्पर्शनग्राह्यं स्यात् । न चैतदस्ति ।

ननु रूपं द्वीन्द्रियग्राह्यमेव, परं यदा चक्षुषा गृह्यते तदा रूपत्वेन प्रथते । यदा तु स्पर्शनेन गृह्यते तदा स्पर्शत्वेनेत्यप्ययुक्तमित्याह—**न चेति ।**

अनात्मकत्वप्रसङ्गादिति । [1]अन्यथा ह्येकं वस्तु तदेव प्रथते यद्यस्य स्वभावः कोऽपि न स्यात् । रूपाद्यन्यतरस्वभावे तु स एवास्य स्वभावः प्रथेतेति भावः ॥

भेदाभेदव्यवस्थानुपपत्तेश्चेति । रूपं स्पर्शाद् भिन्नं स्वरूपादभिन्नमिति व्यवस्था तदा स्याद् यदि रूपं स्पर्शतया न प्रथेत । यदा तु रूपमेव स्पर्शतया प्रथते तदा कोऽस्य स्पर्शाद् भेदः कश्च स्वरूपादभेद इत्यर्थः ।

स हीति । रूपस्पर्शयोः समुदायः ।

तयोरिति । रूपस्पर्शयोः ।

---

1 अन्यथा repeated in J

नाप्यधिकरणीत्यादि । अधिकरणीभूतं यद् भूतलादि तदाधारो ययोस्तद्भावेनापि रूपस्पर्शयोर्न तत्संभवः समुदायसंभवः ।

तयोरिति । भूतलघटयोः ।

तदधिकरणा इति भूतलाधिकरणाः ।

चेतसीति ज्ञाने ।

अयं व्यापार इति । रूपस्पर्शयोर्भूतलाधिकरणत्वग्रहणलक्षणः ।

तयापीति । त्वचापि ।

भूतलघटस्पर्शयोरेवेति । न तु भूतलघटरूपयोः ।

ननु भूतलं घटश्च रूपस्पर्शादिसमुदायरूपौ । ततस्तयोस्तथारूपयोरेव चक्षुषा त्वचा वा आधाराधेयभावानुभवः । ततः प्रागुक्तं न किञ्चिदित्याशङ्क्य निराचष्टे—**न चेति ।**

एकाधारतयेति । घटादेराधेयस्य स्पर्शादिसमुदायत्वेनानुभवस्तदा स्यात्, यदि स्पर्शादयो भूतलाद्येकाधारतया अनुभूयन्ते, एकाधिकरणतयैव स्पर्शादीनां समुदायत्वाभ्युपगतेः । भूतलादिरेकोऽयमाधार इत्यभ्युपगमश्च तदा स्यात्, यद्यस्य स्पर्शादिसमुदायत्वेनानुभवः स्यादित्येवं समुदाय एकाधारतामपेक्षते, एकधारता च समुदायमित्यन्योन्याश्रयता ।

अत एवेति । वक्ष्यमाणात् हेतोरेव ।

तयोरिति । रूपस्पर्शयोः ।

अत्रेति । रूपस्पर्शयोः ।

रूपादीति । यदा हि रूपाद्यतिरिक्तमुदकं नाम [668a] न किञ्चिदभ्युपेयते, तदा कथमेवं स्यात्, यदुत रूपं स्पर्शश्चैकमेवोदकमाहरत इत्येककार्यतया तयोः समुदाय इति ।

ननु रूपादय एवोदकं भवन्तु, ते त्वेकैकशो रूपस्पर्शाभ्यामाहार्या भविष्यन्ति । ततश्चैकोदाहरणक्रियेत्याद्युपपत्स्यत एवेत्याशङ्क्याह—**एकैकस्येति ।**

अत एवेति । एककार्यतानिषेधादेव ।

तृतीये त्विति । तदतिरिक्तवस्तुविषयं चेत्यस्मिन् ।

स हीति । वस्त्वननुरोधी आकारो विषयः ।

द्विचन्द्रादिवदिति । द्विचन्द्रादाववस्तुनि विसंवादाद् वा ।

स्थैर्यवदिति । स्थैर्य इव वस्तुनि बाधकाद् वा ।

आद्ये इति । विज्ञानमेवास्ति, न बाह्यं वस्तु । अतो यदि वस्त्वननुरोधी ज्ञानाकारो विषयोऽभ्युपेयते, तर्हि रूपादयः किमित्यभ्युपेयन्ते इत्यर्थः ।

प्राप्तेरिति । वस्तुनः ।

न द्वितीयोऽपीति । न वस्तुनि विसंवादोऽपि ।

ते इति । प्राप्तिरर्थक्रियास्थितिश्च, ते द्वे अपि रूपादीनामेव । न रूपाद्यतिरिक्तस्य वस्तुनः ।

तेषामिति । रूपादीनाम् ।

तस्यैवेति । वस्तुन एव ।

स इति । वस्तुनि बाधकः ।

क्षणिकमिति । क्रमयौगपद्यविरोधो ह्यक्षणिकस्यैव स्यात् । अतस्तद् द्रव्यं क्षणिकं तावदस्तु ।

परमाण्विति । अवयविन एव रक्तारक्तादिविरोधोऽतस्तद् द्रव्यं परमाणुरूपं न निषेद्धुं शक्यमित्यर्थः ।

असंबद्धमिति । अत्यन्तभिन्नै रूपादिभिर्द्रव्यस्य संबन्धाघटनं बाधकं तदा स्यात् , यदि द्रव्यं संबद्धमभ्युपेयते । अतो रूपादिभिरसंबद्धं द्रव्यं तावदस्तु ।

कथमिति । यद्यसंबद्धं स्यात्, कथं रूपादिमत् प्रतीयेत ?

तैरिति । रूपादिभिः ।

तथोत्पादादिति । असंबद्धस्यापि संबद्धस्येवोत्पादात् ।

भवतामेवेति । यथा युष्माकं **बौद्धा**नां मते चेतनया असंबद्धस्यापि संबद्धस्येवोत्पादात् शरीरं चेतनावत् ।

तावन्मात्रेणेति । वस्तुमात्रेण ।

तुल्यमिति । वस्तुनोऽपि प्रतीयमानत्वात् तदप्यस्त्वित्यर्थः ।

एतेनैवेति । वस्त्वननुरोध्याकारविषयतानिरासेनैव ।

अभेदसाधनानीति । रूपादीनां रूपादिभ्यस्तथासन्निविष्टेभ्य इत्यादीनि **वार्त्तिको**क्तानि ।

बाधकमिति । वस्तुनि ।

अनाकलितसमय इतीति । घटादिप्रत्ययो ह्यवस्तुविषय एवेति **बौद्ध**-समयः ॥

दीयाम् ॥ ननु यदि रूपरसस्पर्शादिपरमाणुसमूह एव तेन तेनाकारेण उत्पन्नो घटः, तदा कथमीदृशस्यास्य घटस्यैकेनापि रूपादिना व्यपदेशो यथा नीलरूपो घट इत्याशङ्क्याह— **अनुरञ्जनेति** ।

उने ॥ **अतद्रूपस्येति** । यथानीलरूपस्य धवलस्य नीलद्रव्यसम्पर्कात् स्वरूपस्य धवलत्वलक्षणस्य संक्रमे नीलद्रव्यान्तःप्रवेशे धवलव्यपदेशत्यागेन नीलव्यपदेशः स्यात्, तथा केवलरूपादिस्वभावरहितस्यापि रूपरसादिपरमाणुसमूहस्वरूपस्य घटादिद्रव्यस्य केवलरूपादिस्वभावसम्पर्कात् स्वरूपस्य रूपरसादिपरमाणुसमूहत्वलक्षणस्य संक्रमे केवलरूपादिस्वभावगमन[1]द्रव्यव्यपदेशत्यागेन रूपादिव्यपदेशः स्याद् यथा नीलरूपो घट इति समुदायार्थः ।

अत्रेति । प्रकृते दार्ष्टान्तिके ।

दूषयतीति । रूपादिमात्रे चेत्यादिना **वार्त्तिककारः** ।

टीयाम् । न तावद् रूपादीत्यादिना त्रैलोक्यविलक्षणोत्पादो वेति विकल्पस्य दूषणं दर्शितम् । तस्माद् रूपादीत्यादिना [668b] तूत्पादमात्रं वेत्यस्य ।

उने ॥ **उत्थापयतीति** । संस्थानेत्यादिना **वार्त्तिककृत्** ।

विचारविरोध इति । एकानेकविचारासहत्वलक्षणः ।

सोऽपीति । स्थिरावयवी ।

1 अन्तःप्रवेशः in margin in J

तथा चानादिता नोपाधिरिति । यदि हि तैमिरिककेशप्रत्यय आदिमत्त्वात् सम्यक्प्रत्ययपूर्वक इति सिद्धं स्यात्, तदा घटादिप्रत्ययोऽनादित्वात् न सम्यक्प्रत्ययपूर्वक इत्येवं घटादिप्रत्ययस्य सम्यक्प्रत्ययपूर्वकत्वाभावेऽनादितोपाधिर्भवेत । यदा तु तैमिरिककेश-प्रत्ययस्याप्यनादित्वे एव सम्यक्प्रत्ययपूर्वकत्वम्, तदा कथं घटादिप्रत्ययस्य सम्यग्ज्ञानपूर्वकत्वा-भावेऽनादितोपाधिः ?

तस्यामिति । अनादितायाम् ।

विपर्यय इति । सम्यक्प्रत्ययपूर्वकत्वाभावे ।

विभ्रम इति । मिथ्याप्रत्ययः ।

अनन्यथेति । अनन्यथासिद्धयोरन्वयव्यतिरेकयोरनुविधानेन सिद्धः कारणभावो यस्य सम्यक्प्रत्ययस्य तस्य परिहारे ।

आभिमानिकमिति । अवास्तवम् ।

पाक्षिकं [1]**वेति ।** सन्दिग्धं वैकल्पिकम् ।

[2]**तत्त्वाभिमानसंभव** इति । मिथ्याप्रत्ययस्य प्रामाण्याभिमानसंभवः ।

विसदृशेति । यदि मिथ्याप्रत्ययस्य प्रमाणाद्विसदृशोऽर्थो गोचरः, तदास्य प्रमाणेन सह भेदाग्रहाभावादेव न प्रामाण्याभिमानसंभवः । यदि तु मिथ्याप्रत्ययस्य प्रमाणेन सह सदृशोऽर्थो गोचरस्तदास्य सत्यप्रत्ययानुकारः सिद्ध एवेत्यर्थ आहेत्याह—**तं प्रतीति ।**

किं निबन्धना **बौद्धस्**येर्ष्येति जिज्ञासुं प्रति बुबोधयिषु**र्वार्त्तिककारो** मिथ्या-प्रत्यया इत्याद्याह इति ।

अमुमेवार्थमाह **टीकाकारः** तं प्रतीत्यनेनेत्यर्थः ।

द्रव्यमात्रोपलक्षणपरमिति । तेन परमाणोरपि ।

यत्तदोर्व्यत्यासेनेति । यदग्रहे यस्याग्रहस्तत् तस्मादनर्थान्तरमित्येवम् ।

वार्त्तिके ॥ पृथिव्यादय इति । आदिपदादबादयः ।

तेषामिति । घटादिभावमापन्नानां पृथिव्यादीनां संबन्धिन्याम् ।

---

1 S चेति 2 S तत्त्वा°

अबादीनामिति । घटादिभावमापन्नानामेव ।

उने ॥ दहनायोगोलकमुदाहरणमिति । दहनायोगोलके हि अयोगोलकव्यावृत्तौ अगृह्यमाणायां दहनव्यक्तेरग्रहणम् । अथ च दहनव्यक्तिरर्थान्तरभूता ।

वार्त्तिकोक्तं त्विति । उदाहरणं ह्युभयवादिसिद्धं स्यात् । ये घटादीत्यादि **वार्त्तिको**क्तं तु न **नैयायिका**नां सिद्धम् । न ह्येतैर्घटादिभावमापन्नाः पृथिव्यादय इत्यभ्युपेयते घटादेः पार्थिवत्वेनैवाभ्युपगमात् । अतोऽनन्तरमेव वक्ष्यमाणस्य **बौद्ध**मतव्या-घातस्य स्फोरणायैव ज्ञेयमिदम् ।

ननु बाह्यविषय एव तावन्नास्ति, तत् कथं विषयाग्रहे बुद्धिजातीयाग्रह इत्युच्यतेऽत आह—**बाह्येति ।** अत्र तावद् गुणगुणिवादः प्रारब्धोऽस्ति गुणेभ्यो रूपादिभ्यो गुणी घटोऽनर्थान्तरमित्यस्यैव विचार्यमाणत्वात् । स च गुणिगुणवादारम्भो बाह्ये स्थिते सत्येव घटते इत्यर्थः ।

वार्त्तिके ॥ अथ न चत्वारीति । यदि हि घटादिभावमापन्नाः । पृथिव्यादयः केचि-दभ्युपगम्यन्ते, तदेदं प्रागुक्तं दूषणं स्यात् । यदा तु रूपादिव्यतिरिक्ताः पृथिव्यादय एव न केचिदित्यभ्युपगमस्तदा को नाम दोष इति पराशयः । उत्तरम्—**तथापीति ।**

रूपं घटादिः ।

किमुच्यते चत्वारि महाभूतानि चत्वारः पृथिव्यादय इति वचनं व्याहन्यते ।

नन्वत्रापि वचने चत्वारि महाभूतानीत्यनेन न रूपादिव्यतिरिक्ताः पृथिव्यादय उच्यन्ते, [669a] तत् को व्याघात इत्येतदेवाशङ्कते—**अथ ब्रूषे** इति ।

उत्तरयति—**तथापीति ।**

अस्य वाक्यस्येति । रूपं चत्वारीत्यादेः ।

अस्य वाक्यस्यैवमर्थेऽपि को दोष इत्याशङ्क्याह—**तथा चेति ।**

अष्टद्रव्यकोऽणुरिति । रूपरसगन्धस्पर्शपृथिव्यप्तेजोवायुरूपाणि अष्टौ द्रव्याणि समुदितानि परमाणुः । एकं सन्धित्सतोऽन्यत् प्रच्यवते इत्यर्थः ।

उने । अनन्तर इति । अशब्दात्मकः ।

कवडीकाराहारेति । कवलीकाराहारः कावलिकाहारः ॥

वार्त्तिके ॥ ननु वास्तवानि चत्वारि महाभूतानि रूपत्वेन नाभ्युपेयन्ते । सांवृतानि तु रूपत्वेनाभ्युपेयन्ते एव । ततश्च सांवृतमहाभूतचतुष्टयापेक्षयैव कामेऽष्टद्रव्यकोऽणुरिति न व्याघात इत्येतदाशङ्कते——**अथेति** ।

पृथिव्यादीनां संघातमात्रे इति । सांवृते पृथिव्यादिचतुष्टये इत्यर्थः ।

रूपादीति । आदिपदादणुः ।

उत्तरम्——**तथापीति** ।

पृथिव्यादीनामित्यादि । यद् रूपं परेणाभ्युपेयते तन्न तावत् पृथिव्यादीनां चतुष्टयादन्यत् पृथिव्यादयश्च रूपरससंघातादन्ये न केचिद् वस्तुभूताः । एवं च यदा न पृथिव्यादयो वस्तुतः सन्ति, तदा तत्संघातरूपं रूपमपि वस्तुतो नास्तीति भावः ॥

टीयाम् ॥ **उभयेऽपीति** । रूपं पृथिव्यादयश्च ।

ननूक्तमेव संघातोऽपि सांवृतो भविष्यतीत्यत आह——**न चेति** ।

उने ॥ **उद्भावनेति** । ये दूषणोद्भावनप्रकाराः सन्ति, तेषां यथा संकलनं स्यादित्येतदर्थं पूर्वोक्तैकदेशं व्याघातदोषलक्षणं स्मारयित्वेति संबन्धः ।

अत्रेति । दूषणोद्भावनप्रकारेषु ।

आनुशासनिकमिति । सर्वत्र चेत्यादि भवितव्यमित्यन्तेन **वार्त्तिके**न यत्र यत्र वचनभेदः, तत्र तत्रार्थभेद इति व्याप्तिं दर्शयता य एकत्वानेकत्वयोर्वचनभेदयोर्विरोध उद्भावितः स आनुशासनिकं शब्दशास्त्रप्रसिद्धं वचनभेदमभ्युपेत्य ये शब्दानुशासनप्रसिद्धे एकत्वानेकत्वे तयोरत्र विरोध उक्त इत्यर्थः । तेन पारिभाषिकेण द्रव्यगुणकर्माण्यर्थ इत्यादिना न व्यभिचारशङ्का ।

प्रकृते इति । चत्वार आश्रमाश्चातुराश्रम्यमित्यादौ ।

अभ्युपगमवाद इति । समानार्थानां प्रकृतीनामिति यदुक्तं तदभ्युपगमवादेनेत्यर्थः ।

एवं नेयमिति । जलावयवगतबहुत्वसंख्याया जलगतरूपादिबहुत्वसंख्याया वा वाचकतया ।

अयमिति । अपशब्दः ।

अनुशासनादिति । शब्दानुशासनात् ।

एषैवेति । तत्संबद्धगतामित्यादि**टीको**क्तैव ।

भवत इति । अहो **नैयायिक** तव ।

स चेति । समाहारः ।

वस्तुतस्तु पीतशङ्खविभ्रमे इति असिद्धोऽप्ययं हेतुरिति योगः ।

अयमपीति । क्षणिकोत्पत्तिवाद्यपि ।

तथेति पीतस्यैव ॥

टीयाम् ॥ **असाविति** पाकजोत्पत्तिः ।

उने ॥ **न चैतद्वैधर्म्यमात्रमिति** । तोयविरहे काठिन्येऽपि यत्क्षीरबुद्धिव्यपदेशयोस्तादवस्थ्यं यच्च यूषबुद्धिव्यपदेशयोरतादवस्थ्यं तत्क्षीरयूषयोर्वैधर्म्यमात्रमेव । न त्वेते अनयोर्द्रव्यत्वस्याद्रव्यत्वस्य वा साधके इति न वाच्यमित्यर्थः ।

उपष्टम्भकस्येत्यादि । यदि यूषे द्रव्यत्वेनेष्यमाणे जलमुपष्टम्भकमिष्यते, तदा यथा हेम्नि तैजसद्रव्ये पार्थिवो भागो यथा च पार्थिवद्रव्ये तैले दुग्धे घृते च पाथसीयो भागः सर्वदा अपृथक्त्वे नैवावतिष्ठते तथात्राप्यपृथक्त्वेनैवावतिष्ठेत । न चैतदस्ति । [669b] तस्मात् नोपष्टम्भकम् । नापि दुग्धे प्रक्षिप्तजलवद् यूषे जलं संयोगिमात्रम् । यथा दुग्धस्यातिक्काथेन संयोगिनो जलस्य शोषणादसंयोगेऽपि दुग्धत्वं न निवर्तते, तथा जलासंयोगे यूषत्वानिवृत्त्यभावादित्यर्थः ।

उपलभ्यस्य समस्तैरुपलभ्यैर्व्यपदेश इत्येतद् **वार्त्तिकं** संक्षिप्ताक्षरैर्गृहीत्वा व्याख्याति—**तैर्व्यपदेश** इति ।

विशेषणैरिति । रूपादिभिः ।

व्यवच्छेद्यस्येति । चन्दनादेः ।

स चेति । विशेषणैर्व्यवच्छेद्यस्य व्यवच्छेदः ।

अत्रेति । अनुमाने ।

स हीति । आनुभविको व्यवच्छेदः ।

शब्दो व्यपदेशतयेति । व्यवच्छेदकतया शब्दो व्यपदेश इत्यर्थः ।

उपात्त इति । **वार्त्तिककृता ।**

अगभीरमिति । सुखबोध्यम् ।

टीयाम् । **पर** इति । **बौद्धः ।**

उने ॥ हेतुस्वरूपेति । तदग्रहे इत्यादि ।

प्रतिज्ञेति चन्दनरूपाद्यव्यतिरिक्तमित्यादि ।

टीयाम् ॥ प्रधानस्य रूपादय इतीति । प्रधानस्य संबन्धिनो रूपादय इत्येवं प्रधानस्यापि उपलभ्यैः समस्तै रूपादिभिर्व्यपदिश्यमानत्वमस्ति ।

रूपादीनामिति । रूपादीनां सत्कं मूलकारणं प्रधानमित्येवम् । उपलभ्यानां रूपादीनामपि प्रधानेन व्यपदिश्यमानत्वमस्ति । तन्निवृत्त्यर्थम्—**उपलभ्यैरिति ।**

तथापीत्यादि । रूपादिष्वेकतरस्योपलभ्यस्येति तैरुपलभ्यैर्व्यपदिश्यमानत्वं **बौद्ध** उपपादयेदिति तन्निवृत्त्यर्थम्—**समस्तैरिति ।**

रूपावगमेति । यदा हि चन्दनस्य प्रत्यक्षस्य रूपेण प्रत्यक्षेण व्यपदेशस्तदा ये रसादयोऽनुमेया अप्रत्यक्षाः, तैश्चन्दनस्य व्यवच्छेदो नास्त्येवेति ज्ञापयितुमिति भावार्थः ।

अस्येति । प्रत्यक्षस्य ।

प्रत्यक्षेणेति वचनस्य ।

अनुमान इति । स्वयमुपलभ्यस्योपलभ्यैः समस्तैर्व्यपदिश्यमानत्वादित्यत्र ।

उने ॥ नन्वेकान्ततो व्यपदेशव्यावर्तनस्यापि किं प्रयोजनमित्याह—**प्रयोगान्तरसूचनादिति ।** हेतोः प्रयोगान्तरं सूचयितुमित्यर्थः ।

प्रयोगान्तरमेवाह—[1]**तथा हीति ।**

1 S न तथा

वैलक्षण्यस्येत्यादि । कुम्भप्रत्ययनिमित्तान्यनिमित्त एकानेकप्रत्ययः कुम्भ-प्रत्ययवैलक्षण्यादित्यत्र यदि कुम्भप्रत्ययवैलक्षण्यादित्यस्य कुम्भप्रत्ययव्यक्तेर्विलक्षणप्रत्यय-व्यक्तित्वादित्यर्थः, तदा अनैकान्तिकोऽयम् । यत एकस्मिन्नेव घटे ये धारावाहिकप्रत्ययाः, घटान्तरेषु च ये घटप्रत्ययाः, तेषामपि कुम्भप्रत्ययव्यक्तेर्विलक्षणव्यक्तितास्ति । न च कुम्भ-प्रत्ययनिमित्तान्यनिमित्तता । यदि च कुम्भप्रत्ययजातेर्विलक्षणप्रत्ययजातित्वादित्यर्थः, तदा सर्वज्ञानानामेकजातीयत्वासिद्धोऽयं हेतुः । यदि च कुम्भविषयप्रत्ययाद् विलक्षणविषय-प्रत्ययत्वादित्यर्थः, तदाप्यसिद्धो विलक्षणस्य विषयस्याद्यापि साध्यत्वात् । यदि तु कुम्भ-कारप्रत्ययाद्विलक्षणविषयाकारप्रत्ययत्वादित्यर्थः, तदाप्यसिद्धः, आकारवैलक्षण्यस्य **नैयायिकैः** अनभ्युपगतेः ॥

टीयाम् ॥ **तद्विशिष्टेति** । घटादिभ्यो विशिष्टस्य ।

उने ॥ **अत्र चेति** । तत्प्रत्ययेत्यादि**वार्त्तिक**प्रयोगान्तरे ।

हेतुतयेति । व्याप्तिरपि हि अनुमानस्य हेतुरित्यतो व्याप्तिस्थितिमाश्रित्य तद्वि-शिष्टप्रत्ययस्येति षष्ठ्यन्तो हेतुरुक्तो निमित्तान्तराकाङ्क्षित्वादित्येवं पञ्चम्यन्तश्च साध्य उक्तः ।

उक्तनिमित्तमिति । घटप्रत्ययस्य विषयनिमित्तप्रत्ययात् ।

तस्येति । घटान्तर[670a]जायमानघटप्रत्ययस्य ।

तथाभूतस्यापीति । उक्तनिमित्तमन्तरेणापि जायमानस्यापि ।

तस्येति । घटनिर्विकल्पस्य ।

तन्निमित्तनिरपेक्षस्यापीति । घटनिमित्तनिरपेक्षस्यापि । घटनिर्विकल्पकं हि न घटत्वं निमित्तमपेक्षते, नापि निमित्तान्तरं निर्विकल्पकत्वादेव ।

तेनैव व्यभिचार इति । घटनिर्विकल्पकेन, एतस्य हि घटमन्तरेण जायमान-स्यापि निमित्तान्तरानपेक्षणात् ।

टीयाम् । **प्रत्ययग्रहणं कर्तव्यमिति** । घटादिविषयनिमित्तेत्यनन्तरम् ।

तदेकार्थसमवेतमहत्त्वोपचारादिति । यस्मिन्नेव गजादावर्थे समवेता बहुत्वसंख्या, तस्मिन्नेव समवेतं यन्महत्त्वम्, तस्य यो बहुत्वसंख्यायामुपचारस्तस्मात् ॥

वार्त्तिके । अत एव च व्यपदेशादिति । एकानेकेति व्यपदेशाच्च ।

असति दर्शनादिति । असत्यप्यर्थे व्यपदेशस्य दर्शनात् ।

यथा गर्तश्छिद्रमितीति । न हि गर्तश्छिद्रव्यपदेशयोः कोऽप्यर्थोऽस्तीति पराशयः ।

एतेन च्छिद्रं व्याख्यातमिति । गर्तशब्दार्थकथनेनैव च्छिद्रशब्दार्थोऽपि व्याख्यात इत्यर्थः ।

एकस्मिन्नपि दर्शनादिति । एकस्मिन्नप्यर्थे व्यपदेशभेदस्य दर्शनात् ।

यथा खदिरस्य स्थाणुरिति । न हि खदिरार्थात् स्थाण्वर्थो भिन्नः कश्चित्, येन स्थाणुव्यपदेशोऽर्थान्तरे स्यात् ।

टीयाम् । तस्य क्षेपायोगादिति । असमवायिकारणस्योत्पन्नस्य कालविलम्बा-योगात् । तद् यद्यवस्थितसंयोगानां स्थाणूत्पत्तौ कारणत्वमिष्यते, तदा यत्रैव वृक्षोत्पत्तिकाले एते उत्पन्नाः, तदैव स्थाणुमुत्पादयेरन्, न तु कालान्तरभाविनं तरुविनाशमपेक्षेरन्नित्यर्थः ॥

उने ॥ तत्रेति स्थाणौ ।

तद्गुणेति । खदिरगुणः ।

तद्व्यवहार इति । खदिरत्वजातेर्व्यवहारः ।

तदवयवेति । खदिरावयवः ।

सर्पेणेत्यादि । न ह्येकमारम्भकं स्यादिति सर्पेणान्त्यावयविनैकेन न सर्पकुण्डल-मारभ्यते, सर्पावयविनोऽवयवैश्च सर्पावयविरूपकार्यावष्टब्धत्वेनैव नारभ्यते । अत इदं संस्था-नमेव ।

शरीरलक्षणेति । चेष्टेन्द्रियार्थाश्रयत्वम् ।

तत्रेति । प्रतिमायाम् ।

तदेकार्थसमवेतसंस्थाने इति । यत्रावयवेषु समवेतं शरीरं तत्रैव यत् समवेतं संस्थानं तत्रौपचारिक उपचारेण वर्तमानः शरीरशब्द इह प्रतिमास्थे संस्थाने प्रयुज्यते । कुतः ? तत्सादृश्यात् शरीरैकार्थसमवेतसंस्थानेन सह सादृश्यात् प्रतिमासंस्थानस्य ।

जातिसङ्करप्रसङ्गादिति । यदि ह्यङ्गुरीयकं भिन्नं द्रव्यमभ्युपेयेत तदा सुवर्णाङ्गुरीयके स्वर्णत्वाङ्गुरीयकत्वयोर्जात्योः सङ्करः प्रसज्येत । ननु परापरभावेन स्वर्णत्वाङ्गुरीयत्वजात्योः सङ्करो दोषाय न भविष्यतीत्याशङ्क्याह—**रजतादेरपीति** । स्वर्णत्वजातेरङ्गुरीयत्वमपरजातिर्न स्यादित्यर्थः ।

बुद्धिशरीराभ्यामेवानैकान्तिकमिति । बुद्धिशरीरयोर्हि देशविवेकेनाग्रहणमस्ति । न चैते अव्यतिरिक्ते इत्यनेनानैकान्तिकत्वं स्यात् । यदा तु व्यतिरेकेणाग्रहणमतादात्म्येनाग्रहणमित्यभिधेयम्, तदा बुद्धिशरीरयोरसिद्धमेव कुतस्ताभ्यामनैकान्तिकतेत्यर्थः ।

टीयाम् ॥ **प्रतिज्ञार्थस्यासत्त्वेनेति** । यदा हि रूपादिव्यतिरिक्तं द्रव्यं नास्ति ग्राह्याभावे सति व्यतिरेकेणाग्रहणादिति हेतुः, तदा ग्राह्याभावे सतीति हेत्वर्थेन द्रव्यं नास्ति । कोऽर्थो ग्राह्यं [670b] नास्तीति प्रतिज्ञार्थ एवाक्षिप्यते । स च साध्यत्वेनासन्नसिद्धः, ततः प्रतिज्ञार्थविशिष्टो हेतुरसिद्धः ।

व्यतिरेकप्रतिषेध इति । व्यतिरिक्तद्रव्यनिषेधः ॥

॥ इत्यर्थलक्षणं पूर्णम् ॥

उने ॥ ननु यदि बुद्धिहेतूनां लक्षणस्यानन्तरं हेतुमती बुद्धिर्लक्षणीया तर्हि मनोऽपि बुद्धेर्हेतुरिति मनोलक्षणस्याप्यनन्तरं बुद्धिर्लक्षणीया प्राप्नो[ती]त्याशङ्क्याह—**कारणत्वेऽपीति** ।

उक्तमिति । बुद्धिक्रमानुमेयत्वम् ।

टीयाम् । **पुरुषभेदस्येति** । कस्यचित् पुरुषस्य वाचकः ।

उने ॥ **स्वाभिधेयद्वारेणेति** । सङ्केतितस्य शब्दस्य यः स्वाभिधेयोऽर्थः, तं मुख्यीकृत्येत्यर्थः ।

एतेषामित्यादि । एतेन बुद्ध्यादिशब्दा एकस्मिन्नेव बुद्धित्वविशिष्टेऽर्थे व्यवहृता बुद्धित्वेनैव च वस्तुतो बुद्धिरितरेभ्यो व्यवच्छिद्यते इत्युक्तम् । तथा च सर्वजनीनेनापीत्यादि निरस्तम् ।

तेनेति । वस्तुतो बुद्धेर्बुद्धित्वाभिसंबन्ध एव लक्षणमिति भणनेन ।

गृहीतसमयैरित्यादि । यदि बुद्ध्यादिभिः पर्यायशब्दैर्योऽभिधीयतेऽर्थः सा बुद्धिरित्येवं बुद्धिरितरव्यावृत्त्या साध्यते, तदा पर्यायशब्दैर्गृहीतसङ्केतैः सद्भिर्बुद्धिः समानासमानजातीयेभ्यो व्यावर्त्याऽव्यावृत्तत्वेन गृहीतायां च बुद्धावस्यार्थस्यैते बुद्ध्यादिशब्दा वाचका इत्येवं सङ्केतो ग्राह्य इत्यन्योन्याश्रयत्वम् । यदि तु बुद्ध्यादिभिः पर्यायशब्दैर्योऽभिधीयतेऽर्थः सा बुद्धिर्व्यवहर्तव्येति व्यवहारः साध्यते, तदापि बुद्धिर्व्यवहर्तव्येति कोऽर्थः ? बुद्ध्यादिशब्दवाच्यत्वेन व्यवहर्तव्येत्येवं समयग्रहरूपस्यैव व्यवहारस्य साध्यत्वात् समयग्रहः समयग्रहमेवापेक्षते इत्यात्माश्रयतेति ॥

परमतमपाकर्तुमितीति । परमतं निराकर्तुमनेकशब्दोच्चारणमित्येतद् **भाष्यकार** एवाचेतनस्य करणस्येत्यादिना आहेतीदं स्पष्टमेव ।

व्याख्यात इति । **वार्त्तिककृता ।**

शेषेणेति । बुद्धिवृत्तेर्निराकरणमित्यनेन ।

अनेकार्थत्वेति । बुद्ध्यादिशब्दानां यदनेकार्थत्वम्, तस्य यः प्रतिषेधः, तस्याक्षेपकत्वम् । एतेन **वार्त्तिककृता** व्याख्यातो बुद्धिवृत्तेर्निराकरणमित्ययमर्थः सामर्थ्यपदस्यास्ति परमनेकार्थप्रतिषेधाक्षेपकत्वरूपार्थद्वारेणेत्युक्तम् । तथा चोपपत्तिसामर्थ्यादन्यार्थप्रकाशनम् । कोऽर्थः ? बुद्धिवृत्तेर्निराकरणसूचनमिति **भाष्यमु**पपन्नं स्यात् ।

यदुपपत्तिसाध्यमिति । यया युक्त्या साध्यम् ।

का पुनरुपपत्तिरत्रेतीति । पर्यायशब्दैर्बुद्धिलक्षणं सूत्रयता **सूत्रकृता** तावत् **साङ्ख्य**मतनिराकरणं सूचितम् । परमिदं कया युक्त्या घटते इत्यर्थः ।

इन्द्रियमनोऽहङ्कारबुद्धीनामसाधारणं व्यापारमाह—**निर्विकल्पकेति ।**

अधिकाराभिमानव्यापार इति । अहमत्राधिकृत इत्येवमधिकाराभिमानो व्यापारो यस्य स तथा ।

बुद्धिवृत्तेर्ज्ञानत्वमात्मवृत्तेरुपलब्धित्वं भावयितुमाह—**तत्र बुद्धिरिति ।**

दर्पणमुखयोरेव बुद्धिचेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः । नीलादिपदार्थेन्द्रियसन्निकर्षात् तत्स्वभावस्य बुद्धितत्त्वस्य नीलाकारपरिणतिभेदोत्पादः पारमार्थिको विषयोपरागो विषयोपरागपुरुषोपरागाभ्यां कर्तव्यविषयस्य प्रतिभासात् तदधीनः करोमीत्यध्यवसायो व्यापारावेश इति त्रितयं दर्शयितुं मिलितमुदाहरण[67 1a]माह—**भवति हीति ।**

तत्रेति । तेष्वंशेषु ।

एवंरूपव्यापारलक्षणेति । उभयायत्तव्यापारावेशस्वरूपा ।

विषयोपराग लक्षणमिति । विषयेन्द्रियसन्निकर्षे सति बुद्धेर्विषयाकारः परिणतिविशेषोऽयं घट इत्यादिस्तत्स्वरूपम् ।

तेन सहेति । तेन ज्ञानेन सह यः पुरुषोपरागस्य संबन्धश्चेतनोऽहमिमं पश्यामीत्येवमाकारः । सोपलब्धिरित्यर्थः ।

टीयाम् ।। **चैतन्यमार्त्तण्डमण्डलच्छायापत्त्येति** । यथा रवेः सुषमणाख्यकिरणापत्त्येन्दुबिम्बं प्रकाशते तथा चैतन्यच्छायापत्त्या बुद्धिरपीत्यर्थः ।

अन्यदिति । उपलब्धेः ।

भ्रान्तिरिति । बुद्धेरात्मच्छायापत्तिः ।

सा चेति । भ्रान्तिः ।

उने ।। **चित्तवृत्तीति** । बुद्धिवृत्तिः ।
[1]तास्त्विति । चित्तवृत्तयः ।

न हि तत्र दर्पणस्य शरीरस्य वा भ्रम इति । दर्पणे हि चैत्रस्य प्रतिबिम्बितस्यासंसर्गाग्रहे चैत्रस्यैवायं भ्रमो भवति यदुताहं दर्पणेन संसृष्ट इति न दर्पणस्य तथा गौरोऽहं स्थूलोऽहमित्येवं यः शरीरेण सह तादात्म्यभ्रमः सोऽपि शरीरिण एव न तु शरीरस्य ।

नोभयमपि प्रागुक्तयुक्तेरेवेति । प्रथमपक्षासंभवस्तावद् बुद्धेरचैतन्याद् द्वितीयपक्षासंभवस्तु आत्मनोऽवृत्तिकत्वादित्यर्थः ।

उभयथापीति । यदि बुद्धेरात्मच्छायापत्तिः पारमार्थिकी यदि भ्रान्तिरुभयथापि बुद्धेः सहजं चैतन्यमागतं तयोरुभयोरप्यसंभवित्वेनोक्तत्वादित्यर्थः ।

टीयाम् ।। **तन्न स्यादित्यर्थ** इति । बुद्ध्यात्मोभयचेतनगतत्वेन प्रत्ययव्यवस्थाया हेतोरनैकान्तिकत्वात् ।

---

1 J तास्विति

वार्त्तिके ॥ **अद्धेति** । सत्यम् ।

न बुद्धिरिति । जानीते इति संबन्धः ॥

॥ इति बुद्धेर्लक्षणं पूर्णम् ॥

भाष्ये । **आगमेति** । आगमो वाक्यजं पदार्थज्ञानम् ।

उने । यस्मादित्यादि **वार्त्तिक**मित्यादि । यस्मादित्यादि प्रयोजयितव्यमित्यन्तं **वार्त्तिकं** वाक्यभेदेन । यस्मादिन्द्रियेत्यादिकेन वाक्येन **सूत्रकारो**क्तहेतूपपादक**भाष्यस्य** युगपच्चेत्यादेर्व्याख्यापरं कथं पुनः स्मृत्यादय इत्यादिकेन स्वोक्तहेतूपपादक**भाष्यस्या**निन्द्रियेत्यादेर्व्याख्यापरमित्येतदेवाह **टीकाकार** इत्यर्थः । एतेन यस्मादित्यादि **वार्त्तिकं** हि युगपच्चेत्यादि **भाष्य**मेव व्याचष्टे। तस्मादनिन्द्रियेत्यादि **भाष्यं** व्याचष्टे **वार्त्तिककार** इति **टीकाकृतो**क्तमयुक्तमिति न वाच्यमित्युक्तम् ।

टीयाम् ॥ **अत उक्तं निमित्तान्तरमितीति** । आलोको हि चक्षुरादिसामग्र्यन्तःपातित्वेन गृहीतत्वान्निमित्तमेवेति निमित्तान्तरेण तद्व्यवच्छेदः ॥

उने ॥ **निमित्तान्तरमित्यनेनैवेति** । आकाशस्य निमित्तत्वमपि नास्ति, कुतस्त्यं निमित्तान्तरत्वमित्यनेनैवाकाशोऽपि व्यवच्छिद्यते ।

इन्द्रियं प्रधानीकृत्येति । ऐन्द्रियके ज्ञाने हि इन्द्रियमसाधारणकारणत्वान्मुख्यमित्यतोऽस्यात्मा सहकार्युच्यते । **मीमांसकः** प्रत्यवतिष्ठते—**न न्विति** ।

सर्वदा स्पर्शेत्यादि । द्रव्यत्वमात्रं परमाण्वादिभिरनेकान्तं स्पर्शरहितत्वं च गुणादिभिरित्युभयोपादानम् ।

तथापि प्रथमक्षणवर्तिघटादिभिरनैकान्त इत्याह—**सर्वदेति** ।

आत्मादिर्दृष्टान्तो ज्ञेयः । द्वितीयेऽपि प्रयोगे पूर्ववद्विशेषेण प्रयोजनं व्याख्येयम् । सर्वदेति चानुषञ्जनीयम् । दिक्कालौ दृष्टान्तः । तृतीयेऽनारम्भकं च तद्द्रव्यं चेत्यनारम्भकद्रव्यम् । तथा चासिद्धिर्मनसः स्वसमवेतमूर्तामूर्त[671b]द्रव्यसंयोगविभागारम्भकत्वादेव, नानवबोधात् द्रव्यानारम्भकत्वादिति विवक्षितत्वात् ।

एवमपि **घटेनानेकान्तो** न हि घटोऽपि स्वसमवेतद्रव्यमारभते इति तदर्थं **नित्यत्व** इति ।

आत्मादिर्दृष्टान्तः । चतुर्थे त्वात्मैव दृष्टान्तः, स्पष्टत्वाच्च दृष्टान्तस्यानभिधानं ग्रन्थे। विवादे तु दृष्टान्तोऽवश्यं वाच्योऽन्यथा न्यूनत्वं न्यवयववादिनां भवेत् ।

आदिशब्देन निरवयवेन्द्रियत्वात् श्रोत्रवत् । भूतेतरद्रव्यत्वादात्मवदिति द्रष्टव्यम् ।

तान्येतानि साधनानि द्रव्यत्वासिद्धौ स्वरूपासिद्धत्वेन तत्सिद्धौ च धर्मिग्राहक-प्रमाणबाधितत्वेन निराचष्टे—**नेति** ।

स्वरूपासिद्धिं व्युत्पादयति—**तथा हीति** ।

अद्रव्यस्यापीति । अद्रव्यमपि हि लिङ्गज्ञानं वाक्यज्ञानं चानुमितौ वाक्यार्थ-प्रतीतौ च करणमुपलभ्यते लोके इत्यर्थः ॥

स्वरूपासिद्धिपरिहाराभिप्रायेण प्रकारान्तरेण मनः सिद्धमित्येतदाशङ्कते—**अथा-सामेवेति** ।

आसां सुखाद्युपलब्धीनाम् । सुखाद्युपलब्धिरिन्द्रियजन्या अनीश्वरसाक्षात्कारि-प्रतीतित्वात् रूपादिप्रतीतिवत् । तथा चेन्द्रियत्वेन चक्षुरादिवद्द्रव्यत्वसिद्धिरित्याशयः ।

अनया युक्त्या मन इन्द्रियमनुमीयते परं तस्येन्द्रियत्वं सोपाधेरेव भवतीत्याश-यवानाह—**तथापीति** ।

तावन्मात्रे इति । शरीरावयवावच्छिन्ने मनःप्रदेशे सुखाद्युपलम्भः ।

तदवच्छेदेनेति । शरीरावच्छेदेन ।

शरीरमात्रे उपाधौ सत्यपि बहिर्नियतदेशसंसृष्टस्रगादिनियमादेव पादे मे सुख-मित्यादिर्नियम उपपत्स्यते इत्याशङ्क्याह—**समवायीति** । यत्रासमवायिकारणं तत्रैव विभुकार्यैर्भाव्यम् । मनसश्च शरीरावच्छेदेनेन्द्रियत्वात् सकले शरीरे आत्ममनःसंयोगोऽसम-वायिकारणमस्त्यतो मनःकार्यस्य सुखाद्युपलब्धेः सर्वशरीरमेव देश इत्यव्याप्यवृत्तित्वप्रतीति-र्विरुद्धा स्यादित्यर्थः ।

नियमानुपपत्तिश्चेति । सर्वेषां चरणादीनामुपाधित्वे कुतो विशेषनियत-देशसुखाद्युत्पत्तिरित्यर्थः । यद् वा यदा शरीरावयवावच्छिन्नं तदापि शरीरावच्छिन्नं किमिति न भवतीत्यनियमः ।

धर्मिग्राहकप्रमाणबाध इति । धर्मिणो मनसो ग्राहकं यत्प्रमाणमनीश्वर-साक्षात्कारिप्रतीतित्वरूपं तेनैवाव्यापकेन्द्रियसाधकेन मनोऽव्यापकत्वसाधनानि बाध्यन्ते इत्यर्थः ।

ज्ञानक्रमेणेति । युगपज्ज्ञानानुत्पत्त्या इन्द्रियाणां सहकारि मनोऽनुमीयते ।

प्रागुक्तदोष इति । धर्मिग्राहकप्रमाणबाधः ।

यदि मनो व्यापकं स्यात् तदा ज्ञानक्रम एव न स्यादिति । धर्मिणः सहकारिणो मनसो ग्राहकेण प्रमाणेन ज्ञानक्रमेणैव नितरां मनोऽव्यापकत्वसाधनानि बाध्यन्ते इत्यर्थः ।

नन्वदृष्टमाहात्म्यादेवोक्तदोषानवकाश इति यदि, तदा तत एव ज्ञानक्रमो भविष्यतीति मनःसद्भावे न किञ्चित् प्रमाणमस्तीति आशयेन दूषणान्तरमाह—**यदि त्विति** ।

ननु नात्रादृष्टमाहात्म्यमुपवर्ण्यते येनाश्रयासिद्धिः स्यात्, किं तु मनोऽसिद्धौ युगपद्विज्ञानकारणसद्भावे ज्ञानयौगपद्यप्रसङ्गं पुरस्कृत्य ज्ञानक्रमिकत्वप्रमाणबलेन मनःसिद्धौ करणधर्मत्वेन कार्यक्रम इति मन्वानः शङ्कते—**अथेति** ।

यत्रादृष्टस्येति । यत्र कारणानि दृश्यानि तत्र चेददृष्टेन कारण[672a] कलाप उपहृत एतावतैवादृष्टोपयोगे कारणपूर्णतायां कार्यं निष्पद्यत एवेत्यर्थः ।

अन्यथेति । यदि दृष्टकारणोपहारेऽपि अदृष्टमपेक्ष्यते इत्युच्येत ।

दृष्टानुपहारेणेति । दृष्टकारणानुपनयेन ।

तद्वैगुण्यादिति । अदृष्टवैकल्यात् ।

तच्चेति । अपेक्षणीयं मनः ।

करणधर्मत्वेनेति । यद्यपि मनः सर्वेन्द्रियव्यापकत्वाद् युगपज्ज्ञानोत्पादकं प्राप्नोति, तदाप्यस्य करणत्वात् क्रमकारित्वं घटते करणस्य धर्मो हि क्रियाक्रमः ।

ननु मनस्यकल्पितेऽपि प्रतिपत्तृनियमाच्चक्षुरादिकरण[1]नियमाद् वा क्रियाक्रमो भविष्यतीत्याशङ्क्य परिहरति—**अकल्पिते त्विति** । एकस्य करणस्यैष क्रमो यदेक-क्रियाजनकत्वम्, न तु प्रतिपत्तुर्नापि बहूनां करणानाम्, यत एकेनैव कर्त्रा युगपद्व्यापार्य-

1 S °कारण°

माणैर्बहुभिरपि करणैरनेकाः क्रिया निष्पाद्यन्ते, यथा युगपत् माणवकः पादाभ्यां गच्छति, मुखेन पठति, चक्षुषा पन्थानं वीक्षते, हस्तेन वहति चाचार्यस्य कमण्डलुमित्यर्थः।

नन्वेकदा मा भूवन् बहूनि ज्ञानानि, रूपादिबह्वर्थविषयमेकज्ञानं तु भवन्न केनापि वार्यते इत्याह—**न न्विति**।

आशयमविद्वान् पर आह—**भवत्येवेति**।

सूरिः स्वाशयमुद्घाटयति—**एकेन्द्रियेति**।

प्रतीतिबाधितमप्येकं ज्ञानं स्वपक्षरागेण पुरस्करोति—**तेष्वपि भवत्येवेति**। शष्कुल्यास्वादनकाले।

प्रतीतिबाधमुत्पादयति—**नेति**। एकत्रासक्तचित्तस्य विषयान्तरे ज्ञानं न भवतीति सर्वजनीनम्। तेन दृष्टान्तेन शष्कुलीभक्षणकालेऽपि ज्ञानक्रमोऽनुमीयते। तथा च प्रयोगः, विवादाध्यासितं रूपादिज्ञानं क्रमवत् एकयोगिपुरुषाधिकरणरूपादिज्ञानत्वात् व्यासक्तस्य क्रमोत्पन्नरूपादिज्ञानवत्।

ननु न व्यासङ्गे उक्तविशेषणरूपादिज्ञानत्वप्रयुक्तं क्रमवत्त्वं, किं तु बुभुत्सितरूपादिज्ञानत्वप्रयुक्तमिति मन्वानः शङ्कते—**बुभुत्सेति**।

क्रियाक्रम इति। ज्ञानक्रमः।

अबुभुत्सितानामपि रूपादीनां कदाचित् क्रमेणोपलम्भसंदर्शनाद् विधूतोपाधिभावमुक्तसाधनमित्याशयेन परिहरति—**नैवमिति**।

न ह्येष इति। इन्द्रियादिसामग्र्यधीनं हि ज्ञानं, न तु बुभुत्साधीनम्। ततश्च यत्रेन्द्रियादिसामग्री स्यात्, तत्राबुभुत्सितेऽपि ज्ञानं स्यादेवेत्यर्थः।

अपि त्विति। किं तु बुभुत्साया अयमेव महिमा यत् तत्र बुभुत्सिते पटुप्रत्ययाधायकत्वम्।

तत् किं बुभुत्सा युगपज्ज्ञानोत्पत्तौ सर्वथा नोपयुज्यते इत्यत आह—**तस्माद् बुभुत्सापीति**।

न ह्येतत् प्रतिपाद्यते यदुत सर्वथा बुभुत्सा अयुगपज्ज्ञानोत्पत्तौ नोपयुज्यते किं तु यथोक्तरीत्या बुभुत्साप्युपयुज्यते। न तु सत्तामात्रेणेत्यर्थः।

गन्धादीति । गन्धादिविषयप्राधान्येन **वार्त्तिके** उक्तं गन्धादिक्रियान्यत्वं द्रव्यकर्मादिज्ञानेन व्यभिचरति तद्धि गन्धादिक्रियाभ्योऽन्यच्च चक्षुराद्यतिरिक्तकरणप्रयोजक-मित्यतश्चक्षुरादिकरणप्राधान्येन व्याख्यातीत्यर्थः ।

यदि हीन्द्रियजन्मान इत्यस्य यथाश्रुत एवार्थः स्यात्, तदा स्मृत्यादीनामिन्द्रियं सन्मनो जनकमभ्युपेतं स्यात् । तथा च यदिन्द्रियजन्यं ज्ञानं तत् साक्षात्कारीति व्याप्तेः स्मृत्यादीनां साक्षात्कारीत्वं प्रसज्येतेत्यत आह—**न न्विति ।**

तथात्वे इति । मनसेन्द्रियेण सता [672b] जन्यत्वे ।

टीयाम् । न संस्कारादिषु करणत्वप्रसङ्ग इति । तेषां शरीरसंयुक्तद्रव्यरूप-करणत्वाभावात् ।

सिद्धान्तेऽपीति । स्वपक्षेऽपि ।

यद्येवं स्यादिति । यदि संबद्धमपि सत् करणमनेकां क्रियां शक्नोति कर्तुं तदा ।

क्षेपयोगे वेति । यदि समर्थस्यापि कालविलम्बस्तदासौ सामर्थ्ये सत्यपि यथा प्रथमं धारावाहिज्ञानं न जनितवान्, तथा कालान्तरेऽपि न जनयेत् । तदाप्यस्य सामर्थ्य-स्याविशिष्टत्वात् ॥

॥ इति मनोलक्षणं पूर्णम् ॥

उने । प्रेत्यभावादुत्कर्षे सतीति । प्रेत्यभावो हि प्रवृत्त्या जन्यते इति तस्मा-दुत्कृष्टत्वं प्रवृत्तेः ।

विकल्पसमुच्चयाभ्यामिति । प्रत्येकं वागाद्यारम्भाणां प्रवृत्तिसामान्य-लक्षणत्वे त्रीणि सामान्यलक्षणानि स्युः । ततश्च वागारम्भः प्रवृत्तिरित्यस्मिन् सामान्यलक्षणे बुद्धिशरीरारम्भयोः प्रवृत्तित्वेनासंग्रहादतिव्याप्तिः ।

एवमन्यत्रापीति । विकल्पेऽव्याप्तिः, समुच्चये तु वाग्बुद्धिशरीरैर्मिलितैर्य आरम्भः, तस्यैव प्रवृत्तित्वं स्यात् , नैकैकेन । तथा च सत्यव्याप्तिः ।

इदमिति । प्रवृत्त इत्येतत् ।

तदिति सामान्यलक्षणम् ।

आरम्भः प्रवृत्तिरिति । एतत्प्रवृत्तिसामान्यलक्षणमित्यर्थः ।

आरम्भलक्षणमाह—**जन्महेत्विति** ।

आत्मविशेषगुणेति । धर्माधर्मौ ।

एवमिति । प्रयत्नस्य प्रवृत्तित्वे दयाद्यव्याप्तिरिति दयादीनामिच्छादिविशेषाणामप्रयत्नत्वात् ।

तत्रापीत्यादि । यथा दानादिनिमित्तो जन्महेतुस्थिरात्मविशेषगुणार्थं शरीरविषय आत्मनः प्रयत्नोऽस्तीति दानादिः प्रवृत्तिरुच्यते, तथा तत्रापि दयादिनिमित्तोऽपि जन्महेतुस्थिरात्मविशेषगुणार्थं मनोविषय आत्मनः प्रयत्नोऽस्तीति दयादिरपि प्रवृत्तिरुच्यते इति नाव्याप्तिरित्यर्थः ।

आत्मनः प्रयत्नाभावे केवलस्यैव दयादेः प्रवृत्तित्वाभ्युपगमे दोषमुद्भावयन् दयादौ प्रयत्नस्य विद्यमानत्वमेव समर्थयते—**यदि त्विति** । प्रवर्तनालक्षणा दोषाः [१.१.१८] इत्यनेन हि इच्छाज्ञानद्वेषाणां प्रवर्तमानं प्रति प्रयोजकत्वं वक्ष्यते । तदेषां प्रवर्तमानमात्मानं प्रति प्रयोजकत्वं तदा स्यात्, यद्ययमात्मा प्रवर्तमानः प्रयतमानः स्यात् । यदा त्वयतमानस्यैवात्मन इच्छामात्रं ज्ञानमात्रं द्वेषमात्रं वा प्रवृत्तिरित्यभ्युपेयते, [1]तदा कथं नामोच्छेदादयः प्रवर्तमानं प्रति योजकाः स्युः ? तथा च प्रवर्तनालक्षणा दोषाः इति यदुक्तं तद्व्याहन्यते । तस्मात् आत्मनः प्रयत्ने सत्येवेच्छादीनां प्रवृत्तित्वम् । इच्छादिविशेषश्च दयादिः । तस्मात् तस्याप्यात्मनः प्रयत्ने सत्येव प्रवृत्तित्वमिति सिद्धम् ।

दयाद्यसंग्रह इति । यथाश्रुतविशेषलक्षणोदाहरणे हि बुद्ध्यारम्भो बुद्धिविषयप्रयत्नः प्रवृत्तिरित्यादृतं स्यात् । तथा च दयाद्यसंग्रहो, न हि दयादिबुद्धिविषयप्रयत्न इत्यर्थः ।

तथापीति । दयादिसंग्रहार्थं मनोऽभिप्रायेण बुद्धिपदस्य व्याख्यानेऽपि ।

विशिष्टदेवताद्यनुचिन्तनाद्यसंग्रह इति । मन आरम्भ इति हि मनोविषयप्रयत्न इत्यनन्तरमेव व्याख्यास्यतो देवताद्यनुचिन्तने च देवतैकार्थविषयैकप्रत्ययसन्ततिरूपे न मनोविषय आत्मनः प्रयत्नः । मनःसन्निकर्षे एकस्मिन्नेव सति उत्तरोत्तरज्ञानसन्तान-

---

1 S तथा

स्यात्मप्रयत्नजन्यत्वेन प्रयत्नस्य ज्ञानविषयत्वात् । तथा [673a] साध्वसाधुदर्शनादौ चक्षुरादिविषय एव प्रयत्न इति तदसंग्रहः ।

ज्ञानहेतुरित्यत्र ज्ञातुमिति भ्रमः । तं निरस्यति—**ज्ञातुं ज्ञापयितुं वेति।** एवमग्रेऽपि ।

वाग्गोचरोऽपि प्रयत्नः संगृहीत इति । ज्ञापनार्थत्वलक्षणस्य ज्ञानहेतुत्वस्यात्रापि भावात् ।

स्तेयहिंसादाविति । क्रियमाणे कार्यमाणे च ।

अज्ञानादिगोचरोऽपि प्रयत्नः संगृहीत इति । ज्ञानार्थत्वरूपस्य ज्ञापनार्थत्वरूपस्य च ज्ञानहेतुत्वस्याभावेऽपि करणार्थत्वरूपस्य कारणार्थत्वरूपस्य च क्रियाहेतुत्वस्य सद्भावात् । अज्ञानादीत्यत्रादिपदादज्ञापनम् ।

तदर्थमित्यादि । वागर्थं हि प्रयत्नो ज्ञानं जनयन् ज्ञापकहेतुर्वाग्विषयो यस्य स ज्ञापकहेतुविषयो वाग्गोचरो भवति । तदेवमन्यस्यापि यस्य निमित्तं प्रयत्नो ज्ञानं जनयन् ज्ञापकहेतुविषयो यद्गोचरो भवति स वागित्यनेनोपलक्ष्यते इत्येवं **टीकाकारो** ज्ञापकहेतुं चक्षुरादिषु ज्ञापकहेतुष्वनेकेष्वपि सत्सु इतरपरिहारेण तदेकदेशेन वाचापरसमवेतज्ञानहेतुनोपलक्षितवान्, तेन ज्ञानहेतुः स एवोच्यते यः स्वसमवेतज्ञानहेतुः, न तु परसमवेतज्ञानहेतुरिति भ्रममपि निरस्तवानित्यर्थः ।

टीयाम् ॥ सूचितं भवतीति । मनसा देवताद्यनुचिन्तनस्य देवता विषयस्पष्टस्पष्टतरज्ञानजनकत्वेन चक्षुरादिभिः साध्वाद्यालोकनस्य च चक्षुरादीनां साध्वादिभिः संयोजनस्य साध्वादिज्ञानजनकत्वेन ज्ञापकहेतुत्वसद्भावात् ।

उने ॥ एवं मनोनिमित्तमिति । मनोनिमित्तं विषयतया यस्याः सा तथेति पूर्णं वाक्यम् ॥

॥ इति प्रवृत्तिलक्षणं पूर्णम् ॥

उने ॥ प्रेत्यभावादुत्कर्षे सतीति । प्रेत्यभावो हि दोषैर्जन्यते इति दोषाणामुत्कर्षः ।

टीयाम् ॥ **प्रयोज्यव्यापारेति** । अत्र प्रयोज्यव्यापारः प्रवृत्तिः । प्रयोजकव्यापारः प्रवर्तना ।

उने ॥ **उक्तरूपप्रयत्न** इति । जन्महेतुस्थिरात्मविशेषगुणजनकः प्रयत्नः ।

आनन्तर्यादिति । मोहाद् रागद्वेषौ । ताभ्यां च प्रवृत्तिरिति रागद्वेषाभ्यां सहानन्तर्यं प्रवृत्तेः ।

ननु मिथ्याज्ञानं प्रवर्तनाख्यौ द्वेषौ जनयित्वा क्षणिकत्वाद्विनष्टमेव । तत् कथं मोहैकार्थसमवायस्तयोरित्याशङ्क्याह—**मोहसंस्कारेति** ।

मोहान्तरेण वेति । मोहो हि यथा रागद्वेषौ जनयति तथा मोहान्तरमपि । ततस्तेन सह वैकार्थसमवायः ।

ननु समवायो व्यापारस्तावन्न घटते, समवायिन एव च रागद्वेषमोहाः अत्र व्यापार इष्यन्ते । सा च मोहैकार्थसमवाय इति वदंश्च **टीकाकारः** समवायमेव व्यापारं वक्ति । तत्कथमिदमित्याशङ्क्याह--**अत्र चेति**[1] ।

अदूरविप्रकर्षेण संबन्धसंबन्धिनोरिति । साधनगोचररागादिरेव प्रवर्तनापरनामा व्यापारः । स च रागादिः संबन्धी । मोहैकार्थसमवायश्च संबन्धः । ततः संबन्धसंबन्धिनैक्यान्मोहैकार्थसमवायस्य व्यापारत्वमुक्तमिति भावः ।

फलगोचराविति । सुखगोचरौ दुःखगोचरौ वा ।

तत्साधनविषयाविति । सुखसाधनगोचरौ दुःखसाधनगोचरौ वा ।

तदेकार्थसमवायिन इति । फलविषयरागाद्येकार्थसमवायिनः ।

ननु यदि फलविषयाणां रागादीनां साधनविषया रागादयो व्यापारः, तदैतान् प्रति हेतुत्वं न प्रवृत्तिं तथा चैषां कथं दोषत्वमित्याशङ्क्याह—**व्यापारोऽपीति** । साधनविषय[673b]रागादिरूपः ।

कार्येति । प्रवृत्तिः ।

रागादय इति । फलविषयाः ।

---

1 S वेति

टीयाम्। स्वपरात्मनोरिति। प्रवर्तना स्वात्मनि प्रत्यक्षेण वेदनीया। परात्मनि त्वनुमानेनेति संबन्धः ॥

॥ [इति] दोषलक्षणं पूर्णम् ॥

भाष्ये। तत्रेति क्वचित् प्राणभृन्निकाय एव।

अन्यत्रेति। देवनिकायादौ।

उने ॥ अभ्यासं वदन्नेवेति। पुनः शब्दः।

द्वितीयसूत्र इति। दुःखजन्मेत्यादौ।

इह तु पुनरुत्पत्तिरिति। पुनर्ग्रहणस्य संसारानादित्वज्ञापनार्थत्वेनोक्तत्वात्।

तेषामिति। दुःखादीनाम्।

तुल्यप्रवृत्तिनिमित्तत्वादिति। दुःखादीनां कार्यकारणभाव इत्यस्य पुनरुत्पत्तिरित्यस्य च।

स एवेति। कार्यकारणभाव एव।

तत्रेति। द्वितीयसूत्रे।

उक्तरूपेति। पूर्वोत्पन्नशरीराद्युपसंप्राप्तिरित्येवंरूपा।

तदीयेति। संसारिसंबन्धि।

अपरदेहादिप्राप्तिसंभवादिति। अयं चात्मनो व्यापकत्वात्।

नेयमिति। यदि ह्युक्तरूपा पुनरुत्पत्तिर्भोगेनाविशेषिता संसारोऽभ्युपेयते, तदासौ मुक्तस्यापि संभवतीति आत्मनोऽशक्यनिवृत्तिः स्यात्। यदा तु भोगेन विशेषितोऽयं संसारोऽभ्युपेयते तदासौ मुक्तस्य न संभवतीति आत्मनः शक्यनिवृत्तिरित्यर्थः।

॥ [इति] प्रेत्यभावलक्षणं पूर्णम् ॥

भाष्ये ॥ सुखविपाकमिति । एतेन प्रवृत्तेर्दोषाणां च सुखसंवेदनलक्षणं फलं जनयतां सुखविपाकं कर्म धर्मोऽवान्तरव्यापारो दुःखसंवेदनं जनयतां च दुःखविपाकं कर्माधर्म इत्युक्तम् ।

सर्वत्रेति । देहादिषु ।

त्यक्तमिति । त्यक्तजातीयम् ।

उने ॥ पदद्वयमिति दोष इति अर्थ इति च ।

कर्मेति धर्माधर्मौ ।

व्यापारद्वारमिति । धर्माधर्मयोर्व्यापाररूपं द्वारं धर्माधर्माववान्तरव्यापाररूपतया स्फुटयित्वेत्यर्थः ।

अत इति । यतो धर्माधर्मयोरवान्तरव्यापारत्वम्, अतो **वार्त्तिके** धर्माधर्मपूर्वकत्वादिति श्रवणेन **सूत्रे** प्रवृत्तिशब्दो लक्षणया धर्माधर्मवाचक इति भ्रमो न कार्यः ।

दोषाणां यथा प्रवृत्तिं प्रति हेतुत्वं तथा प्रवृत्तिकार्ये सुखदुःखे फले अपि प्रतीतिं दर्शयितुं हि सूत्रे दोषग्रहणम् । तत्रैषां धर्माधर्मजननद्वारेण फले प्रतिहेतुत्वं दर्शितं **टीकाकृता ।** प्रवृत्तिं प्रति तु किमिति न केनापि प्रकारेणोक्तमित्याशङ्कयाह—**स्वरूपतस्त्विति ।**

वक्ष्यतीति । ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः [३.२.३४] इति **सूत्रेण ।**

तत् किमिति । यदि दोषाः सुखदुःखहेतवः ।

निर्दोषस्येति । योगिनः ।

दोषान्तरजनको हि तादृश इति । एतेन दोषान्तरजनकोपभोगो दोषाद् विना न जायत इति ब्रूम इत्युक्तम् ।

॥ इति फललक्षणं पूर्णम् ॥

उने ॥ संगतिरुक्तेति । शरीरलक्षणावसरे ।

गौणदुःखावाप्तिः स्यादिति । शरीरादीनां बाधनास्वरूपत्वाभावात् ।

आवृत्तौ वाक्यभेद इति । यदि मुख्यदुःखसंग्रहार्थं लक्षणपदं स्वरूपवचनं व्याख्यायते गौणदुःखसंग्रहादिनिवृत्त्यानुषङ्गवचनं तदा वाक्यभेदः स्यादित्यर्थः ।

टीयाम् ॥ **तेनेति** । यतो बाधनाबुद्धिसंबद्धं दुःखमिति दुःखलक्षणं जातं तेन हेतुना ॥

उने ॥ **एवं चासिद्धिस्तां परिहरतीति** । [1]बाधनाबुद्ध्यनुषङ्गस्य लक्षणत्वे वाक्यभेदः परिहृतः । परमसौ शरीरादिष्वसिद्ध इत्यसिद्धिरवशिष्यते तां परिहरतीत्यर्थः ।

विधेयदुःखोपाधीति । विधेयं यद् दुःखं शरीरादिना तदेवोपाधिः [674a] सुखे त्वविनाभूतं यद्दुःखं तदुपाधिरिति स्वयं ज्ञेयम् ।

एवमिति । दुःखबुद्धिविषयः ।

दुःखमिति । वस्तुतो दुःखलक्षणे ।

तद्विषयत्वमिति । दुःखबुद्धिविषयत्वम् ।

तथात्वे चेति । दुःखबुद्धिविषयत्वे च सति ।

बाधनालक्षणत्वादिति । बाधनाबुद्ध्यनुषक्तत्वात् ।

वशितयेति **टीका** पदस्य व्याख्या वशीति ॥

ननु वैराग्यं रागाभाव एव, तत् कथमाह **टीकाकार** उपेक्षाबुद्धिर्वैराग्यमित्याशङ्कयाह—**यद्यपीति** ।

तस्येति । रागाभावस्य ।

स चेति । आत्यन्तिको रागाभावः ।

कारणयोग्यतानिवृत्त्येति । अविद्यासंस्कारनिवृत्त्या ।

सैव दर्शितेति । उपेक्षाबुद्धिरित्यनेन करणयोग्यतानिवृत्तिरेव वैराग्यत्वेन दर्शिता । वैराग्यशब्देन यथात्यन्तिकरागाभावो लभ्यते इत्येतदर्थं कारणमेव कार्यतया दर्शितमित्यर्थः ।

---

1. J. बाधना

अथोपेक्षाबुद्धिर्भावरूपा कारणोपेता निवृत्तिरभावरूपा कथमुच्यते इत्यत आह— **उपनतेष्वित्यादि** । एतेनाविद्यासंस्कारनिवृत्तिगर्भतयोपेक्षाबुद्धिः कारणयोग्यता निवृत्तिरुच्यत इत्युक्तम् ।

टीयाम् ॥ **अनुषङ्गः संबन्ध** इति । एतेनानुबद्धमनुषक्तमविनिर्भागेन वर्तमानमित्येते **भाष्यो**क्ताः सर्वेऽपि संबद्धार्था इत्युक्तम् ॥

उने ॥ **दुःखाभावसुखवादिन** इति । दुःखाभावरूपं यत् सुखं तद्वादिनः ।

न चान्धकारवदिति । ननु यथा प्रतियोगिनीनां प्रभाणामुत्कृष्टत्वे तदभावस्वरूपस्यान्धकारस्योत्कृष्टत्वं स्यात्, तथा प्रतियोगिनो दुःखस्योत्कृष्टत्वेन तदभावस्योत्कृष्टत्वं भविष्यति । तथा च दर्शादीनामधिकाधिकोत्कर्षफलत्वं यदुक्तं तत् तदा स्यात् यदि भावरूपं फलं सुखं धर्मस्य स्यादिति **टीको**क्तमयुक्तमिति न वाच्यमित्यर्थः ।

प्रागभावादेरसाध्यत्वादिति । प्रागभावेतरेतराभावात्यन्ताभावा अकार्यत्वेनासाध्या यतः ।

तस्येति । प्रध्वंसस्य ।

कालेनानवच्छेद एवेति । सनातनत्वेनेयत्ताया अभावात् । एतेन [1]कालोत्कर्षस्तावद्दुःखाभावस्य न संभवतीत्युक्तम् ।

ननु यथा यावत्प्रभाजातीया न भवन्ति तावत् तदभावरूपोऽन्धकार इत्येवमन्धकारस्यावधिनियमः, तथा यावद् दुःखजातीयं न स्यात् तावद् दुःखाभाव इत्यवधिनियमेन कालेनानवच्छेदो न भविष्यतीत्याशङ्कते—**न चेति** ।

उत्तरं **न हीति** । यथान्धकारानन्तरं प्रभा अवश्यं भवति तथा यदि ब्रह्मलोकोपभोगानन्तरमवश्यं दुःखं भवेत् तदा स्याद् दुःखाभावस्य तज्जातीयावधिसद्भावनियमो, न च ब्रह्मलोकोपभोगानन्तरमवश्यं दुःखं स्यात् कदाचित् सुखस्यैव भावादित्यर्थः ।

अथ धर्मफलत्वेनाभ्युपगम्यमानस्य दुःखाभावस्य स्वरूपतोऽप्युत्कर्षासंभवमाह—**यथेति** । यथा सुभोजनेन कुभोजनेन वा क्षुदभावः स्वरूपतोऽविशिष्ट एव स्यात् तथा

---

1 °त्कर्षाः J

दुःखाभावरूपधर्मफलत्वेनाभ्युपगम्यमानयोरैन्द्रब्राह्मपदयोरपि स्वरूपतो विशेषो न स्यात् । अस्ति च विशेषः । तस्मान्न दुःखाभावः फलं धर्मस्येत्यर्थः ।

लब्धवृत्तेरिति । प्राप्तोदयात् ।

मनुष्यदेहपातानन्तरमेवेति । स्वर्गमनुभवतीति योगः ।

सोऽयमिति । मनुष्यदेहपातानन्तरमपि स्वर्गानुभवलक्षणोऽनियमः ।

वार्त्तिके ॥ प्रतिपक्षाभावे शक्त्यभावादिति । सर्वथा सुखाभावे हि दुःखविषया[674b]सक्तिस्तावन्न कस्यापि । तथा च दुःखभावनोपदेशो व्यर्थ इत्यर्थः ।

॥ इति दुःखलक्षणं पूर्णम् ॥

उने ॥ स एवेति । कर्मोपग्रह एव ।

आध्यात्मिकत्वादिति । आत्मसंबद्धत्वात् ।

तत्प्रध्वंसोऽपीति । शरीरादिप्रध्वंसः ।

तद्विशिष्ट इति । आत्मसंबद्धशरीरादिप्रध्वंसविशिष्टः ।

न व्यभिचार इति । आकाशादिगतदुःखात्यन्ताभावस्यात्मसंबद्धशरीरादिध्वंसविशिष्टत्वाभावात् ।

टीयाम् ॥ नामरूपप्रपञ्चात्मनेति अभिधानाभिधेयप्रपञ्चतया ।

अजरमितीति । अपरिणामि ॥

उने ॥ उभयथापि न कूटस्थनित्यतेति । धर्मधर्मिणोरभेदे हि धर्मपरिणामे तदभिन्नस्य धर्मिणोऽपि परिणामात् । भेदाभेदपक्षेऽप्यभेदांशस्य सत्त्वेन धर्मपरिणामे धर्मिणः परिणामादेवेत्यर्थः ।

स्वात्मीभूतेति । स्वात्मीभूता ब्रह्मणोऽभिन्नात्मका उपजनापाया उत्पत्तिविनाशस्वरूपा ये धर्मा घटादयस्तद्वत्त्वा ब्रह्मणः ।

यथा घटादय इति । एतेन सावयवत्वानुमानाभिप्रायेणायं दृष्टान्त इति शङ्का निरस्ता ।

ननु ब्रह्मणः कूटस्थनित्यत्वं नाभ्युपेमो यद्धर्मधर्मिणोरभेदे भेदाभेदे च न घटते। किं तर्हि? नित्यं च घटादिभावेन परिणमते चेत्येवं परिणामि नित्यमेवाभ्युपेमः। तत्र प्राच्यो दोष इत्याशङ्क्य निराचष्टे--**न चेति**।

अनेकान्तेति। ब्रह्म नित्यं घटादिभावेन परिणमते चेत्यभ्युपगमे हि तदेकमेव नित्यमनित्यं चाभ्युपगतं स्यात्। अयं चानेकान्तवादो विरोधेनैव बाधित इत्यर्थः।

ननु नित्यं ब्रह्मासद्घटादिभावेन परिणामीति नेष्यते येनास्यानित्यत्वमपि प्रसज्येत। किं तर्हि? स्वात्मनि सत एव घटादेराविर्भावरूपेणैव ब्रह्मणः परिणाम इष्यते इति नोक्तो दोष इत्याशङ्क्याह—**सत्कार्येति**।

एकान्तभिन्न एवेति। ब्रह्मणः सकाशात्।

अयं प्रपञ्च इति। नामरूपादिः।

इत्यत्रेति। **सूत्रे**।

उपादानचिन्तायाः करिष्यमाणत्वादिति। भिन्न एवायं ब्रह्मधर्मः प्रपञ्चोऽस्त्विति वदता **परेण** ब्रह्मोपादानत्वं जगत इष्यते। तन्निराकरिष्यते इत्यर्थः।

ननु ब्रह्मोपादानं जगदिति कोऽर्थः? नित्योपादानमिति। इष्यते स्वात्मोपादानम्। ततोऽस्य निराकरणं न संभविष्यतीत्याशङ्क्याह—**तत्कार्यतेति**।

नित्यकार्यं जगदित्येतावन्मात्रे साध्ये सिद्धसाधनत्वं कुत इत्याह **परमाणूनामिति**।

टीयाम्॥ **एतदुपपादयिष्यतेऽग्रे** इति चित्तं मुच्यते इत्यन्ये, इत्यादिना।

भाष्ये॥ **तेषामिति**। मते।

उने॥ **शब्देनाश्रीयमाणमिति**। कारणान्तराणि ताल्वादीनि परित्यज्येति ज्ञेयम्।

मीमांसानये इति। **प्राभाकर**मते।

इत्युत्थाप्य दूषयतीत्याहेति। इत्येवं परानुमानमुद्भाव्य दूषयति **वार्त्तिककृत्** इत्येतदाह **टीकाकारः**।

तत्संवेदने इति। सुखसंवेदने।

शुद्धबुद्धस्वभावमिति । उपाधिरहितज्ञानस्वरूपं स्वत एव संवेदनस्वरूपमित्यर्थोऽत एव स्वत एव प्रमाणान्तरमन्तरेणैव सिद्धम् ।

ननु सुखतत्संवेदनाभिन्ने ब्रह्मणि स्वसंविदिते प्रत्यक्षप्रमाणप्रश्नस्त्ववकाशं लभत एवेत्याशङ्कयाह—**सर्वेषामिति** ।

विषयसुखसंवेदने इति । विषयरूपं सुखं तच्च संवेदनं च ।

उक्तोपपत्तिं स्मारयित्वेति । उपपादितो[675a]हीत्यादिना ।

अपरामिति । गुणगुणिनोर्भेद उपपत्तिम् ।

टीयाम् ॥ **विज्ञानव्यक्तिभ्य** इति सुखव्यक्तिभ्य इत्यपि ज्ञेयम् ।

उने ॥ **नन्वित्यादि** । यथा जपातापिच्छादिसन्निधानात् स्फटिकस्यारुणिमनीलिमादिः काल्पनिको न भेदहेतुर्भवति, तथा सुखस्यापि संवेदनस्यापि च विषयोपधानादुदयव्ययौ काल्पनिकौ सन्तौ न भेदहेतू भवतः । तथा च वस्तुतोऽनुदयव्ययधर्माभ्यामत एवैकस्वभावाभ्यां सुखसंवेदनाभ्यामभिन्नस्वभावोऽनुदयव्ययधर्मा आत्मैव तत्तद्विषयोपधानान्नानेवोदयव्ययधर्मेव भवतीत्याशङ्कार्थः ।

यदा हि स्फटिकः स एवायं स्फटिक इत्येवं शुक्लभास्वरत्वस्वरूपेण स्वरूपेण पूर्वापरकालयोरेकतया तापिच्छादिसन्निधानापादितनीलादिव्यावृत्तात्मा प्रतिभासते, तदा नासौ नीलाद्यात्मनारोप्यते । न हि स्वरूपेण गृहीता शुक्तिका रजतत्वेनारोप्यते कदाचित् । आत्माप्ययं स्वरूपेण पूर्वापरकालैकतया विषयसन्निधानापादितोदयव्ययव्यावृत्तात्मा प्रतिभासते । तत्रोदयव्ययात्मनारोपस्यासंभव एवेति परिहारार्थः ॥

ननु यदात्मनि स्वरूपेण पूर्वापरकालैकतयोदयव्ययव्यावृत्तात्मनि प्रतिभासमाने तदात्मभूतं संवेदनमपि तथैव प्रतिभासते, तदोदयव्ययारोप आत्मनीव ज्ञानेऽपि मा संभूत् । परं यदा संवेदनमात्मस्वभावमपि अनाद्यविद्यावशात् अनात्मतया स्फुरति, तदात्मनि उदयव्ययव्यावृत्तात्मतया प्रतिसन्धीयमानेऽपि तत्तद्विषयोपरागेण ज्ञाने उदयव्ययारोपः संभवत्येवेत्याह—**स्यादेतदिति** ।

भिन्नमिवेति । उदयव्ययैरनेकमिव ।

तरङ्गभेदादिवेति । भिन्नमिति स्फुरतीति संबन्धः ।

स एवेति । संवेदनमात्मस्वभावमप्यनाद्यविद्यावशादनात्मतया स्फुरदित्यनेन हि परेण स एवात्मैव तस्मिन्नेवात्मन्येव भ्रान्त इत्युक्तं स्यात् । आत्मन्येकतयेत्यादिना चाभ्रान्त इति ।

तदानीमेव । युगपदेव ।

तच्च न संभवत्येव । ततश्चायमसंभवः । अविद्याया अयमेव महिमा यद् दुर्घटमपि घटयतीत्येवं पादप्रसारणतुल्येनोत्तरेणोत्तरयितव्यं परेण तच्च तदा स्याद् यदि भेदज्ञानस्य बाधकं किञ्चित् स्यादित्यर्थः ॥

सुव्यक्त एव भ्रम इति । बाधकस्य सद्भावात् ।

द्वितीयमिति । तदतिरिक्तो वेत्यमुम् ।

न त्वात्मनीति । यदि ह्यात्मनि नित्यचैतन्यमित्युच्येत, तदेव स्वाभाविकमात्मनि चैतन्यं नानुभूयते इति दूषणं स्यात् । यदा त्वात्मैव नित्यचैतन्यस्वभाव इत्युच्यते, तदा नेदं दूषणमात्मानुभवेनैव नित्यचैतन्यानुभवादिति पराशयः ।

अस्त्येव स्मरणमिति । सुखस्वापविशिष्टस्यात्मनः ।

घटमहमित्यादि । यस्य हि घटस्य यदवस्थाविशिष्टस्य स्मरणं स्याद् घटमहमज्ञासिषमित्यत्र ज्ञानविषयत्वावस्थाविशिष्टस्य । यथा तस्य तदवस्थाविशिष्टतोल्लेखगर्भमपि स्मरणं स्याद् यथा तदज्ञासिषम् ।

तत् किं घटमहं जानामीति । इदं हि घटस्य ज्ञानावस्थाविशिष्टतोल्लेखगर्भं स्मरणम् । तद् यदि सुखेनाहमस्वाप्समित्यात्मनः सुखस्वापावस्थाविशिष्टस्य स्मरणं स्यात्, तदा सुखेनाहं स्वपिमीत्येतदज्ञासिषमित्येवं [675b] सुखस्वापावस्थाविशिष्टतोल्लेखगर्भमपि स्मरणं कदाचिद् भवेन्न च भवति, तस्मात् ज्ञायते नेदं स्मरणमित्यर्थः ।

सुप्तोऽहं नेत्यादि ॥ सुप्तो हि न तावत् ज्ञानाभावमनुभवति । अनुभवे हि सुप्तस्य ज्ञानाभाव एव न स्यात् । तथा च यथा सुप्तोऽहं न किञ्चिदज्ञासिषमिति न ज्ञानाभावस्य स्मरणं, किं त्वनुमानं तथा दुःखाभावस्येत्यर्थः ।

अनुमानं त्वेवम्—यस्मिन् प्रतियोगिनि स्मर्यमाणे स्मृत्यर्हमपि सत्यामपि सुस्मूर्षायां यन्न स्मर्यते तत् तत्र तदानीं नासीत् । यथा केवलभूतले स्मर्यमाणे घटोऽस्मर्यमाणः । न स्मर्यते च तस्यामवस्थायामात्मनि । स्मर्यमाणेऽपि स्मृत्यर्हमपि सत्यामपि सुस्मूर्षायां दुःखं तस्मात् तदपि आत्मनि तस्यामवस्थायां नासीत् ।

अनुभूयमानः स्मर्यमाणो वेति । कदाचिदनुभूयमानः स्मरणापेक्षः प्रत्यभिज्ञायमानः कदाचिच्च स्मर्यमाणोऽनुभवापेक्षः प्रत्यभिज्ञायमान इत्यर्थः ॥

नन्वात्मा न केवलो धर्मी, किं तु सुषुप्तावस्थाविशिष्टः । सा च नानुभूता, अत एव न स्मृता । तत् कथमियं तस्यामित्येवं तच्छब्देन परामृश्यते इत्याह—**तथापीति** ।

पूर्वापरेति । य एवाहं पूर्वमजागरं स एवाहमधुना जागर्मीत्येवं पूर्वापरजागराद्यवस्थयोरेकत्वेन प्रतिसन्धानेन मध्यस्थायाः सुषुप्तावस्थाया अपि सामान्येनोपढौकनात् ।

ज्ञानाभावविशिष्टोऽनुमीयते इति । अनुमानं प्रागुक्तमेवोपनयनिगमनेत्येवं कार्ये न स्मर्यते च तस्यामवस्थायां घटे स्मर्यमाणेऽपि स्मृत्यर्हमपि सत्यामपि सुस्मूर्षायां ज्ञानम् । तस्मात् तदपि घटे तस्यामवस्थायां नासीदिति ।

आत्मनीति । आत्मस्थितम् ।

भिन्नेनैवेति । आत्मनः सुखाच्च ।

येनेति । सुखातिरिक्तस्य कस्याप्यपेक्षणेन ।

तत्रापीति ॥ संसारावस्थायाम् ।

यदि हि संसारावस्थायां वैषयिकसुखज्ञाने कर्तव्ये आत्ममनःसंयोगः सुखातिरिक्तं किमपि नापेक्षते, तदा तत्रापि विषयमात्रापेक्षायां मनसैव रूपाद्युपलब्धिप्रसङ्गो दुर्निवारोऽतो वैषयिकसुखज्ञाने कर्तव्ये सुखातिरिक्तं किञ्चिदात्ममनःसंयोगोऽपेक्षते यद्रूपाद्युपलब्धौ कर्तव्यायां नास्तीत्येवं **नैयायिकेन** वाच्यम् । अथैवं नोच्यते किं तर्हि बहिर्मनः सापेक्षम्, नन्वन्तरतो न संसारावस्थायां विषयमात्रापेक्षायां मनसैव रूपाद्युपलब्धिप्रसङ्ग इत्युच्यते । तर्हीदं वाच्यं मुक्तावस्थायामप्यस्तीति पराशयः ।

आपादितेति । मोक्षार्थः प्रयासो व्यर्थः स्यादिति **वार्त्तिके**नापादितं प्रसञ्जितं यत् प्रयासस्य कष्टानुष्ठानस्य वैयर्थ्यं तत्र विषये परिहारं परस्य संबन्धिनम् ॥

सिद्धान्तेति । न चायं सुखं जिहासतीत्यादि सिद्धान्तरूपं **वार्त्तिकं** संगतीकर्तुम् ।

स एवेति । प्रवर्तमान एव ।

शक्येति । शक्यस्य शक्तिविषयस्य साधने प्रवर्तयितव्यम् ।

शक्यमिति । शक्तिविषयः ।

नित्यस्य शक्यत्वाभावमेव भावयति—**तद्धीति**। तन्नित्यं सुखम्।

न निवर्त्यमिति। घटवन्न कार्यम्।

नापि विकार्यमिति। काष्ठादिभस्मवत्।

न हीति। यथा वह्नेरयस्पिण्डेन[676a] जलस्य सक्तुपिण्डेन च सम्बन्धलक्षणा प्राप्तिस्तथा न तस्य नित्यसुखस्यात्मना अप्रतिसंक्रमान्निरवयवत्वेनामिश्रणात्॥

प्रागेवेति। यदि योगाभ्यासादेर्मोक्षप्रवृत्तेः प्राक् सुखात्मनोस्तादात्म्यं सिद्धं तदा न शक्यम्, असिद्धस्यैव शक्तिविषयत्वात्। अथासिद्धं तथाप्यशक्यम्। यदि हि प्रथममेव तादात्म्यं नास्ति, तदा किं तत् पश्चात् कर्तुं शक्यते इत्यर्थः॥

नापि ज्ञानेति। आत्मनो यन्नित्यसुखज्ञानं सैव प्राप्तिरित्यपि न वाच्यम्। यदि हि तज्ज्ञानं नित्यं मुक्तसंसारस्थयोरविशेषप्रसङ्गः, अथानित्यम्, तर्हि कारणं वाच्यमित्येवं **वार्त्तिके** एव ज्ञानस्य निरस्तत्वात्।

नापीति। यत् सुखस्यात्मगोचरत्वं सैव प्राप्तिरित्यपि न वाच्यम्, अनतिरेकात्। न हि विषयत्वं नित्यसुखादतिरिक्तं किञ्चिदस्ति यद्योगाभ्यासादिशक्तिविषयः स्यात्।

तथात्वे वेति। अतिरेके वा विषयत्वस्योत्पन्नत्वेन विनाशे आत्मना सुखस्य पुनः संबन्धाभावात्।

ननु विषयत्वमुत्पन्नोऽप्यप्रध्वंसी भावविशेषो भविष्यतीत्याशङ्क्याह—**षडिति**।

एनामेव भावयति—**भावत्वे** इति। यदि तद्विषयत्वं भावरूपं तदा षट्पदार्थेष्वेवान्तर्भूतमथाभावरूपं तदास्य प्रतियोगिना भाव्यम्। न चासौ घटते।

तदिति। नित्यं सुखम्।

अत्राहुरिति। बौद्धाः।

ननु ससाधनमिति। दुःखसाधनानि हि न नियतं दुःखसाधनानि। देशं कालं पुरुषं वाधिकृत्य तेषां दुःखसाधनत्वव्यभिचारात्। तस्मान्न तावद् दुःखसाधनानि पारमार्थिकानि। ततस्तत्साध्यं दुःखमपि न पारमार्थिकम्। दुःखासत्त्वे च को नाम दुःखाभावः? तस्मात् तदप्यशक्यं प्रयोजनमाश्रित्य कथं प्रवृत्तिः? अथाविद्यादर्शितं यद् दुःखं तस्याभावं प्रयोजनमाश्रित्य प्रवृत्तिस्तर्हि सुखेऽपि तुल्या सुखस्याप्यविद्यादर्शितत्वभावादित्याशङ्कार्थः।

तदिदं पूर्वोक्तमिति । यथा हि शास्त्रे प्रवर्तमान इत्यादिकम् ।

शक्यौ भोगेन क्षेतुमितीति । यदि नित्यसुखवदेवंविधदुःखाभावोऽपि न शक्यो मा भूद् धर्माधर्मौ तु शक्यौ क्षेतुमित्यर्थगर्भम् ।

अविद्यानिवृत्तिमात्रे इति । [1]न त्वविद्योपदर्शितेऽपि सुखे इति भावः ।

उपपन्नानवद्यवादिन इति । उपपन्नश्चासावनवद्यवादी च तस्य ।

नारमते इत्यस्य व्याख्या **नोपादत्ते** इति ।

अन्यथेति । यद्युपादानत्वाभावेऽपि निमित्तं स्यात्, तदा यथाबुद्धि सन्तानस्यानुपादानस्य किंचित् प्रतिनिमित्ततां प्राप्य निवृत्तौ बुद्धिसन्ताननिवृत्तिरनेनैव न्यायेन रूपादेः सर्वसन्तानस्यापि निवृत्तिः स्यात् । तस्माद् यन्नोपादत्ते तन्निमित्तमपि न स्यादित्ययमनारम्भे इति **टीका**या अभिप्राय इत्यर्थः ।

एवमस्त्विति । उपादानत्वाभावे निमित्तत्वमपि मा भूदित्यर्थः ॥

टीकयेति । तस्यासामर्थ्येनासत्त्वमित्यनया ।

लाभहान्योरधिकवादिनाविति । **मीमांसकबौद्धौ** ॥

नैयायिकमुक्त्यपेक्षया हि **मीमांसक**मुक्तौ सुखलाभस्याधिक्यम् । **बौद्ध**मुक्तौ तु आत्मरूपस्य चित्तस्याप्यभावप्राप्तौ हानेराधिक्यम् ।

सांख्यादय इति । आदिपदा**दद्वैतवादिनः** ॥

नैवमिति । न लाभहान्योरधिकवादिनः ।

प्रकारे इति । कूटस्थनित्यस्यात्मनो दुःखस्यैवानभ्युपगमेनापवर्गस्य दुःखाभावस्वरूपत्वे एव ॥

॥ इत्यपवर्ग [676b] लक्षणपूर्त्तौ प्रमेयप्रकरणं पूर्णम् ॥

---

1 नन्व MS

॥ न्यायपूर्वाङ्गलक्षणप्रकरणम् ॥

[१.१.२३–५]

उने ॥ प्रकरणान्तरेभ्य इति । तर्कादिभ्यः ।

तत्रापीति । संशयादिप्रकरणेऽपि ।

अत एवेति । उद्देशलक्षणयोरेकवाक्यत्वाभिसन्धेरेव ।

विषयतः स्वरूपतश्चेति । विषयप्राधान्येन स्वरूपप्राधान्येन चेत्यर्थः ।

केचित् हि स्थाणुः पुरुषनिषेधः, पुरुषः स्थाणुनिषेधश्चेति विरोधिचतुरर्थावमर्शः संशय इति वदन्ति । तन्मतमपास्यति—**विरोधीति** ।

द्रव्यादेरिति । आदिपदात् स्थाणुत्वपुरुषत्वादेः ।

प्राधान्येन चेत् द्वयस्यैवेति । यदि चामी चत्वारोऽर्था मुख्या इति चतुरर्थावमर्श इति परसंख्या न मुच्यते, तदा स्थाणुपुरुषद्वयावमर्श एव वाच्य इत्यर्थः ।

अयमिति । स्थाणुर्वा पुरुषो वेत्यवमर्शः ।

अर्थानुरोधादिति । लक्ष्यस्यापेक्षितत्वादित्यर्थः ।

विवक्षितमर्थमिति । विशिष्टं संशयम् ।

तत्सहितमेवेति । संशयपदसहितम् ।

परस्परनिषेधेति । परस्परनिषेधवानुभयविधिस्तत्प्रधान एवमुत्तरत्रापि समासः । स्थाणुर्वा पुरुषो वेत्यत्र हि विमर्शे स्थाणुः पुरुषनिषेधवान् पुरुषश्च स्थाणुनिषेधवान् । द्वावपि मुख्यतया प्रतिभासेते ।

विभागजत्वेन शब्दो द्रव्यकर्मभ्यां व्यावर्तमानः किं गुणः गुणकर्मभ्यां व्यावर्तमानः किं द्रव्यम् , द्रव्यगुणाभ्यां व्यावर्तमानः किं कर्म इत्यत्र च विमर्शे मुखे निषेधः प्रतिभासते, पर्यवसाने च विधिः ।

नित्य इति **एके, नेत्यपरे**। तदयं शब्दो नित्यो वा स्यादनित्यो वा, नित्यो वा न स्यादनित्यो वेत्यत्र च विमर्शे मिथो विरहरूपयोर्नित्यत्वानित्यत्वयोः कदाचिद् विधिर्मुख्यतया भासते कदाचिच्च निषेध इति भावः।

विशिष्ट इति लक्ष्यपदम्।

लक्ष्यपदार्थ इति। विशिष्टः संशयो लक्ष्यपदमिति **टीका**यां हि यथाश्रुतायां विशिष्ट इत्यपि लक्ष्यपदमित्यवबुध्यते। न चैतदस्ति। तस्माल्लक्ष्यपदमिति **कोऽर्थः**? लक्ष्यपदार्थ इति भावः।

टीयाम् ॥ **विकल्पयाक्षिपतीति**। यदेकमनेकाधिकरणं तत् साधारणशब्दवाच्यमित्याशयवान् परः।

प्रश्नार्थ इति। कस्मादित्यस्य प्रश्नस्यार्थः।

समाधत्ते इति। सदृशः परिमाणादिगुणादिरेवात्र साधारणधर्मशब्दवाच्य इत्यभिप्रायवान् **आचार्यः**।

उने ॥ **गुणगतमिति**। सदृशपरिमाणगुणस्थम्।

यत इति। अवान्तरसामान्यविशेषात्।

तमेवेति। अवान्तरसामान्यविशेषं सादृश्यमेव।

व्यक्तिकारणमुखेनेति। व्यक्तेः परिमाणस्य यानि कारणानि संख्यादीनि तद्द्वारेण।

टीयाम् ॥ **प्रचयेति**। प्रशिथिलावयवः संयोगभेदः प्रचयः।

उने ॥ **सामान्यमात्रेति**। मात्रशब्देन सादृश्यं व्यावर्त्तितम्।

इत्यादाविति। आदिपदादनेकधर्मोपपत्तेरिति संग्रहः।

पूर्वपक्षयित्वेति। कस्मात् पुनरेवमेव नोच्यते इत्यादिना।

टीयाम् ॥ **तत्परश्चेति**। सत्तापरश्चात्र प्रयुक्तः।

पदान्तरेति । विशेषापेक्ष इति पदान्तरम् ।

ननु यदि विशेषापेक्ष इति पदान्तरसमभिव्याहारादुपलब्धिर्लभ्यते अत्र तर्हि किमिति **वार्त्तिके यदुक्तं भवति सदृशस्य धर्मस्योपलब्धिः तदुक्तं भवति समानधर्मोपपत्तिरिति** उपपत्त्युपलब्ध्योरभेद उक्त इत्याशङ्क्याह— **विषयविषयिणोरिति सूत्रे** ।

जिघृक्षेति । जिज्ञासा इच्छाविशेष उच्यते । कुतः? **वाक्यसामर्थ्यात्** । संशये हि[677a]विशेषस्य जिज्ञासैव स्यादिति जिज्ञासयैव वाक्यसंगतेरित्यर्थः ॥

उने ॥ **तत्पर** इति । विशेषोपलब्धिनिषेधपरः ।

सा चेति लक्षणा मुख्ये श्रोतोरूपायां गङ्गायां बाधकाद् गोकुलावस्थानासंभवात् विवक्षिते तटे गङ्गायाः संबन्धात् । अवाचकोपादाने तटावाचकस्य गङ्गाशब्दस्योपादाने प्रयोजनाच्च गोकुलपावित्र्यप्रकटनलक्षणात् प्रवर्तते ।

टीयाम् ॥ **न च सा संशयस्य हेतुरिति** । लक्षणावसरे ह्यत्र संशयस्याव्यभिचारि-कारणेषु वाच्येषु जिज्ञासाया अकारणत्वेनानुपयुक्तत्वात् जिज्ञासालक्षणे मुख्येऽर्थेऽनुपयोग एव बाधकमिति भावः ।

उने ॥ **प्रयोजनेत्यादि** । दृष्टान्तपूर्वकसंबन्धाख्याने आख्यातुर्हेतुगर्भविशेषणमाह-- **लौकिकलक्षणत्वं सूचयन्निति** । लौकिकीयं लक्षणेति ज्ञापयितुमित्यर्थः ।

एतदपि किमर्थमित्याह—**प्रयोजनानुयोगपरिहाराय** । लौकिक्यां हि लक्षणायां प्रयोजनं न भवत्यतोऽस्यामपि लक्षणायां यथा प्रयोजनप्रश्नो न स्यादिति भावः ।

अगृह्यमाणेति । अगृह्यमाणयोर्विशेषयोः स्मरणं च बुभुत्सा च तयोः ।

एकविषयतयेति । एको विषयो विशेषलक्षणो ययोस्तद्भावेन ।

ननु लोकोत्तरस्यास्य **सूत्रकृतो** लोकस्येव निष्प्रयोजनैव लक्षणा वक्तुं न युज्यते इत्यत आह—**सौकर्येति** ।

यदि हि स्ववाचकेन शब्देन स्मर्यमाणस्याग्रहणमत्रोच्येत तदा तन्मात्रमेव वक्तुं शक्येत । विवक्षितसंशयकर्तृकया जिज्ञासया तु लक्ष्यमाणे स्मर्यमाणस्याग्रहणे ग्रहणं तावद्

वक्तुं शक्यते संशयेन जिज्ञासा सुकरेत्येतदपि वक्तुं शक्यते एवेत्यनेन लक्षणेऽयं प्रयोजनवत्यपीत्यर्थः ।

एतदेव भावयति—**विशेषमिति** । विशेषमपेक्षते जिज्ञासति विशेषे जिज्ञासां करोतीत्येवं सौकर्यविशेषात् जिज्ञासां प्रति कर्तृत्वविवक्षया विशेषापेक्षः संशय उक्तः **सूत्रकृता** इत्यर्थः ।

फलद्वारकमपीति । न केवलं विमर्शः संशय इति विषयद्वारकं स्वरूपद्वारकं च संशयसामान्यलक्षणं यावता विशेषापेक्षपदोपन्यासात् जिज्ञासाजनकः संशय इति फलद्वारकमपीत्यर्थः ।

द्वितीये इति । समाधाने ।

टीयाम् ॥ **स्वतन्त्रमिति** । अधिकरणानधीनम् ।

उने ॥ **व्यवच्छेदस्येति** । व्यावर्तनस्य ।

टीयाम् ॥ प्रतिसंबन्ध्यपेक्षाया उल्लेखमाह—**केनेतीति** ।

परस्परविरोधिनाविति । संशयस्य हि न सजातीयौ स्थाणू पुरुषौ वा विषयः । किं तर्हि ? मिथो विरुद्धौ स्थाणुपुरुषौ ।

ताविति प्रतिसंबन्धिनौ ॥

उने ॥ **उत्तरपदस्येति** । उपलब्ध्यनुपलब्ध्यव्यवस्थात इत्यस्य ।

तस्यैवेति । समानधर्मस्यैव ।

तद्भावरूपत्वादिति । व्यवच्छेदहेतुत्वेन साधकबाधकप्रमाणभावस्वरूपत्वात् ।

स चेदिति । साधकबाधकप्रमाणभावो यदि समानो धर्मः ।

ननु उपलब्ध्यादिपदं समानधर्मादितरस्यैव साधकबाधकत्वं प्रतिक्षेप्स्यति, ननु समानधर्मस्येत्यतो नोक्तो दोष इत्याशङ्क्याह— **न चेति** ।

इति विशेषलक्षणमिति । इत्येवं धर्मस्य विशेषस्य ज्ञापकम् ।

टीयाम् ॥ **अत्रैवेति** । उपलभ्यमाने समानधर्मे एव ।

वक्रकोटरादेरुपलब्धिरिति । [677b] शिरःपाण्यादेरनुपलब्धिः का ? वक्रकोटरादेरुपलब्धिर्विरुद्धोपलब्धिरूपेत्यर्थः ।

उने ॥ तस्मिन्निति । उपलब्ध्यादिपदे ।

पूर्वं हीति । सोऽयं साधारण इत्यादौ ।

करणाकरणयोरिति । समानधर्मोपपत्त्यादेः समस्तस्य संशयलक्षणत्वेन करणेऽकरणे च ।

न अननुभूतेत्यादि । एतेन सप्तमो रसः किमस्ति नास्ति वेति चान्यथा-ख्यातिरेवेत्युक्तम् ।

पट्वभ्यासादरप्रत्ययाभावादिति । नावाद्यारूढस्य हि वेगेन प्रेक्ष्यमानस्य न पट्वभ्यासादरप्रत्ययः स्यात् ।

तथाविधेति । पट्वभ्यासादरः ।

तदुब्दोध्योऽपीति । पट्वाभ्यासादरप्रत्ययोद्बोध्योऽपि ।

टीयाम् ॥ लक्षितमिति । विशेषमन्यतरस्य नोपलभे इत्येषा बुद्धिरपेक्षेत्येवं विशेषा-नुपलम्भोल्लेखिनीं बुद्धिमपेक्षां वदता **भाष्यकृता** ।

रूपादाविति । पाकजे ।

समानतयैवेति । अनेकोऽपि धर्मः संयोगजत्वादिर्यथा शब्दे तथा द्रव्यादाव-प्यस्ति । अतः समानतैव ।

निर्भक्तस्येति । पृथक्कृतस्य शब्दस्य निर्गुणत्वं गुणकर्मणोः साधारणम् ।

उने ॥ अतः इति । यतोऽनेकस्य धर्मोऽनेकश्च धर्मः । समानधर्मोपपत्तेरित्यनेनैव चरितार्थोऽत इत्यर्थो मुख्येऽनेकस्य धर्मोऽनेकश्च धर्म इत्यस्मिन् बाधकम्; अनेकधर्मोपपत्ते-रित्यस्य नैरर्थक्यं दृष्ट्वा ।

जघन्यां वृत्तिमिति । लक्षणाम् ।

टीयाम् ॥ समासगतेनेति । अनेकधर्म इत्येवंरूपसमासपदस्थेन ।

समानेति । समानजातीयाद् गुणादसमानजातीयाद् द्रव्यात् कर्मणश्च ।

एष इति । विभागजत्वलक्षणोऽसाधारणो धर्मः ।

स्वाश्रयमिति । शब्दम् ।

उने ॥ समानासमानजातीयेत्यादेरुत्तररूप**वार्तिक**स्य तात्पर्यमाह—**अवध्यवधिमद्भावः** संबन्ध इति । द्रव्यादयो ह्यवधयो विभागजत्वधर्मवस्त्ववधिमान् ।

टीयाम् ॥ **अनेकापादानेति** । अनेकेभ्योऽपादानेभ्यो द्रव्यगुणकर्मभ्यः सकाशात् शब्दस्य व्यावृत्तिहेतुत्वाद् विभागजत्वलक्षणो धर्म एकोऽपि लक्षणया अनेक उच्यते ।

उने ॥ **यद्येवमलग्नकमिति** । विशेषाध्याहारे हि तस्मादिति पञ्चम्यन्तं **भाष्यम्** । तस्मादनेकस्माद् विशेषो धर्म इत्येवं लगेत् । तस्येति षष्ठ्यन्तं त्वलग्नकमित्यर्थः ।

टीयाम् ॥ **संबन्धसामान्येति** । सतोऽप्यपादानस्याविवक्षया संबन्धमात्रस्य विवक्षया **तस्येति** षष्ठीत्यर्थः ।

निवर्त्त्येति । शब्दान्निवर्त्तस्य द्रव्यादेरनेकस्य निवर्तकत्वात् विभागजत्वधर्मो लक्षणया अनेक इत्युच्यत इत्यर्थः ।

उने ॥ **तद्विपरीतेभ्य** इति । समानासमानजातीयेभ्यो गुणादिभ्यः ।

त एवेति । समानासमानजातीयाः ।

तेनेति । विभागजत्वादिना ।

इत्यभिसन्धिरिति । **वार्त्तिककृतः** ।

अत इति । उक्ताभिसन्धेः ।

भवतीति, बीजान्तरमितीति । उभयत्रापीतिशब्दौ हेत्वर्थौ ।

व्याख्यातमिति वार्त्तिककृता ।

इत्यर्थ इति । बीजान्तरमाहेत्यादिकाया व्याख्यातमित्यन्तायाः **टीकायाः** । एतेन वस्तुतोऽयमप्यवध्यवधिमद्भाव एव संबन्ध इत्युक्तम् ।

एवं सतीति । यदि हि असाधारणो धर्मो निवर्तकतया अनेकस्य संबद्धस्तदा अनेकसंबद्धत्वादनेक इति किं लक्षणया अनेकशब्देनासाधारणो धर्म [673a] उच्यते, यावता

अनेकशब्दो मुख्ये द्रव्यादावेवास्तु ? एतदेव भावयति—**तथा हीति** ।

अनेकधर्म इति । संयोगजत्वादिः ।

उपसंहृत्येति । एवं लक्षणाबीजद्वयेत्यादिना ।

उत्थाप्येति । प्रकारान्तरेणेत्यनेन ।

टीयाम् ॥ ननु **सूत्रे** एकपदं नास्ति, तत्कुतो **वार्त्तिककृद्** एकानेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्म इति व्याख्यातीत्याशङ्क्याह—**एकं चानेकं चेति** ।

उने ॥ **तेनेत्यादि** विशेष्यवचन एकजातीयभिन्नजातीयविशेष्यवस्तुवाचकोऽयमनेकशब्दो विशेषणे धर्मे विभागजत्वादौ प्रयुक्तो **वार्त्तिककृता** ।

ननु विशेष्यवाचकः कथं विशेषणवाचकत्वेन प्रयुज्यते इत्यत आह—**विशेषण-विशेष्ययोरभेदमुपचर्य** विशेष्यमभिन्नजातीयं विभागजः शब्दो भिन्नजातीयं च द्रव्यादि विभागजत्वादिरूपविशेषणभावेनोपचर्य ।

ननु कः संबन्धोऽनयोर्येनाभेदोपचार इत्याह—**विशिष्टबुद्धिहेतुत्वेन** । यथा हि विभागजत्वं विशेषणं विभागजशब्देषु अभिन्ना अमी इत्येवं द्रव्यादिषु च भिन्ना अमी इत्येवं च विशिष्टबुद्धिहेतुः, तथा विभागजशब्दा द्रव्यादयश्च विशेष्या अपि । एतानपि विना विशिष्टबुद्धेरभावादिति भावः ।

शब्दान्तरेभ्य इति । अविभागजेभ्यः ।

संशयमिति । शब्दः किं द्रव्यं गुणः कर्म वेत्येवंरूपम् ।

यद्यप्यसाधारणेत्यादि । असाधारण एव धर्मो वक्तुमिष्टः । तस्यैवात्र संशयहेतुत्वादिति भावः । तथाप्येतत् सूचयितुमनेकव्यक्तिनिष्ठता दर्शिता । अनेकाश्च ता व्यक्तयश्च विभागजशब्दरूपाः । तन्निष्ठता तदाधारता एकप्रत्ययहेतोर्विभागजत्वादेरेव दर्शिता एकप्रत्ययहेतुरित्यनेन **टीकाकृता** ।

किमेतत् ? तदाह—**असाधारणत्वाद् विभागजत्वादेः** । संशयविषयी-कृतेषु द्वित्रादिषु विभागजशब्देषु संशयो भवन् तज्जातीयतायामेव सर्वेष्वेव विभागजशब्दे-ष्विति भावः पर्यवस्यति । [1]न तु तद्व्यक्तितायां संशयविषयीकृतेषु द्वित्रादिष्विति भावः ।

---

1 ननु MS

कुत इत्याह—**तज्जातीया अपि** हि संशयविषयीकृतेभ्योऽन्येऽपीत्यर्थः ।

शब्दा विधर्माणो विभागजत्वरूपविरुद्धधर्मवन्तो दृश्यन्ते, न तु त एव संशयविषयीकृता एवेति । अयमभिसन्धिः, यद्यपि संशयोत्पत्तिकाले द्वित्रादिष्वेव शब्देषु विभागजत्वम्, तथापि न तेष्वेव संशयहेतुः, किं तु सर्वेष्वेव विभागजशब्देषु । यतो न संशयविषयीकृता एव विभागजत्वेन द्रव्यादिभ्यो विधर्माणोऽपि तु सर्वे एव विभागजाः शब्दाः । यदि चैकप्रत्ययहेतुरिति नोच्येत तदैतन्न ज्ञायेत इति भावः ।

अतश्चैकशब्दवाच्यानां विभागजशब्दानामनेकशब्दवाच्यानां च द्रव्यगुणकर्मणां बहुत्वादिदमेकमिदमनेकमित्येकवचनं **वार्त्तिके** विरुद्धमिति समर्थयति—**जात्येति ।**

अतएव पूर्वमस्माभिरुक्तम्—**एकमेकजातीयमनेकमनेकजातीयमिति ।**

टीयाम् ॥ **तत्प्रत्ययहेतुरुपचारेणानेक** इति । एतेन लक्षणानुरोधव्याख्यायां विभागजत्वादिरेवानेकशब्दवाच्य उदाहरणानुरोधव्याख्यायां तु सदादिर्विभागजत्वादिश्चेत्युक्तम् ।

उने ॥ उदाहरणेत्यादि इति शङ्कां निवारयति, किमर्थमित्याह—**उदाहरणपरतां व्याख्यानस्य स्फुटयितुम्** । उदाहरणावसरे यथा । सामान्यविशेष[678b]समवायपरिहारेण द्रव्यत्वादिकोटित्रयविषयः संशयो दर्शितः स्यादित्येतदर्थं सामान्यविशेषसमवायेभ्य इत्यादि **वार्त्तिककृतो**क्तमर्थपरं द्रव्यत्वादि कोटीत्यादि वदता हि **टीकाकृता** असाधारणावसरे साधारणमपि सदादि किमित्युपन्यस्तमिति शङ्का निरस्यते । तथा च सदादिरित्यादिव्याख्यानस्योदाहरणपरता स्पष्टिता भवतीति ।

एतेनोदाहरणानुरोधेन व्याचष्टे **सदादिरितीति** यदुक्तं तन्न स्वकपोलकल्पितमिति दर्शितम् ।

निमित्तेतरतयापीति । सामान्यादयो हि निमित्ततयैव कारणम्, द्रव्यादयश्च निमित्ततया तदितरतयापीत्यादिः ।

टीयाम् ॥ **यदिति ।** ऊर्ध्वत्वम् ।

येनेति । स्थाणुना पुरुषेण च ।

तदिति । ऊर्ध्वत्वम् ।

क्वचिदिति । पुरोवर्त्तिनि स्थाणौ ।

तदिति । पूर्वदृष्टं स्थाणुम् ।

तद्विरुद्धेनापीति । स्थाणुविरुद्धेन पुरुषेणापि ।

उने ॥ **सिद्धान्तप्रसंगेनेति** । परिहारप्रस्तावेन ।

निषेधमुपक्रम्येति । एतेनायं संशयो निषेधमुखेन प्रवर्तमानत्वान्निषेधप्रधान उच्यते इति दर्शितम् ।

नोद्यमेवेदमिति । ननु विभागजो विभागो विद्यते गुणश्चेत्येतत् ।

स्वतन्त्रमिति । स्वारब्धद्रव्यावष्टब्धतारहितम् ।

अवयवमिति । दललक्षणम् ।

अनपेक्षतयेति । संयोगविभागयोरनपेक्षकारणं कर्मेति[1] वचनात् ।

अपेक्षायां चेति । यदि सापेक्षत्वेन स्वोत्पत्त्यनन्तरं कर्म द्वितीयं विभागं न करोति, तदाद्यमपि स्वोत्पत्त्यनन्तरं न कुर्यात्, सापेक्षत्वादेव ।

ननु यथा अनपेक्षतया अविलम्बकारित्वेन निश्चितमपि कर्मोत्तरसंयोगे कर्तव्ये विलम्बते, तथोत्तरे विभागेऽपि कर्तव्ये विलम्बिष्यते इत्याशङ्क्याह—**उत्तरेति** ।

यद्येवम्, अनपेक्षकारणं कर्मेति न संगच्छते इत्यत आह—**आगन्तुकेति** कर्मोत्पन्नं सत् संयोगविभागयोः कर्तव्ययोरागन्तुकं भावं न कञ्चनापेक्षते । एतावता नैरपेक्ष्यमभावस्यानागन्तुकभावस्यापि च स्वाश्रयद्रव्यस्यापेक्षा अस्याप्यस्तीति भावः ।

उभयमिति । क्रमयौगपद्यपक्षद्वयस्यापि निराकरणम् ।

आद्ये विभागे हीति । संयोगविभागयोरनपेक्षकारणं कर्म । तथा चाद्ये विभागे कर्तव्ये यतः कर्म निरपेक्षमतोऽसौ विभागः प्राप्तकरणकालः ततस्तदैवामुं करोति । द्वितीये तु विभागे कर्तव्ये प्रथमविभागानन्तरकाल एव यतः कर्म निरपेक्षम्, अतो द्वितीयं विभागं तदैव प्राप्तकरणकालं करोति । अतो निरपेक्षत्वात् कर्म प्रथमविभागकाले एव द्वितीयमपि विभागं कुर्यात् । यद् वा आद्यमपि द्वितीयविभागकाले कुर्यादित्येवं यः क्रमपक्षे कालातिपात उक्तः, स न वाच्यः, उक्तयुक्त्यापि कालक्रमस्य घटनादित्यर्थः ।

भग्नेति । विकसत्कमलदलेषु अवयवविभागस्यावयवाकाशविभागस्य च युगपद-भ्युपगमात् ।

---

1 V.S.I. i. 16.

अत इति । यतः क्रमयौगपद्यविकल्पाभ्यां कर्मणो विभागद्वयजनकत्वनिराकरणं न घटतेऽतः ।

अस्येति । विभागजविभागो न वंशदलकर्मज इत्यस्य ।

टीयाम् ॥ **द्रव्यारम्भकेति** । द्रव्यारम्भकस्य संयोगस्याप्रतिद्वन्द्वी यो विभागः, तस्य जनकत्वेन ।

विकसत्कमलकुड्मलदलेषु अवयवक्रियाया द्रव्यारम्भकसंयोगाविरोधिविभागजनकत्वमेव स्थापयति—**न हीति** ।

तादृशीति । तदवयवा[व]रुद्धनभोभागविभागजनिका ।

कार्यैकार्थेति । [679a] कार्येण तदवरुद्धाकाशविभागेन सहैकस्मिन्नर्थे वंशदले समवेतः ॥

उने ॥ **उक्त्या व्याप्तेरिति** । या अवयवक्रिया तदवयवावरुद्धनभोभागविभागजनिका, सा द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकत्वेन दृष्टा, यथा विकसत्कमलकुड्मलदलेष्वेवंरूपायाः ।

न चैवमिति । न च चलत्येवावयवे सर्वद्रव्यनाशो भवति ।

विपर्ययोऽपि सिद्ध इति । यदारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं तन्नानारम्भकसंयोगविरोधिविभागजनकमित्येवं विपर्ययप्राप्तिरपि सिद्धा । ततश्च वेणुदलकर्म द्रव्यारम्भकसंयोगप्रतिद्वन्द्विवेणुदलविभागमेव जनयति, न तु द्रव्यानारम्भकसंयोगप्रतिद्वन्द्विवेणुदलाकाशविभागमपि । एवं च सिद्धो विभागजो वंशदलादाकाशविभागः । पद्मदलक्रियायास्तु विभागद्वयजनकत्वं युक्तं यतस्तद्द्वयमपि द्रव्यानारम्भकसंयोगप्रतिद्वन्द्व्येवेति विभागजविभागवादिनोऽभिसन्धिः ।

इति तत्राहेति । इत्यतोऽस्यां प्रकारान्तरेण **वैशेषिकेण** साधितायां व्याप्तौ विषये परिहारमाहेत्यर्थः ॥

टीयाम् ॥ **स्वहेतुवैलक्षण्यजन्मन** इति । यतः स्वहेतुवैलक्षण्यात् जन्म यस्य तस्य कार्यस्य ।

उने ।। **क्रियावैलक्षण्यादित्यादि टीका वैशेषिकेण** प्रकारान्तरेण व्यवस्थापिताया व्याप्तेः परिहाररूपिणीत्यवगन्तुं दुःशकमित्यत आह—**अयमर्थ** इति ।

नियमानुपपत्तिरिति । एको हि विभागो द्रव्यारम्भकसंयोगविरोधी, अन्यस्तु न तथेत्येवंविधनियमस्याघटनात् ।

तदनुरोधादिति । विभागवैलक्षण्यानुरोधात् ।

तदेतस्येति । एतस्य कर्मण एतद्वैलक्षण्यं न नियन्तुं शक्यते इति संबन्धः ।

एकत्रेति । वेणुदलादौ ।

अन्यत्रेति । पद्मपत्रादौ ।

विभागजनकतयेति । विभागयोर्जनकतया ।

उत्सर्ग इति । सामान्यतो विधिः ।

तस्मिन् सत्येवेति । औत्सर्गिकेऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वे विद्यमाने एव । कर्मणो वैशिष्ट्यात् प्राप्तं वंशदलाद्यवयवविभागजनकत्वं सामान्यतः प्राप्तं वंशदलाद्यवयवावरुद्धाकाशविभागजनकत्वं च युगपद्धविष्यत्यरुद्धत्वादित्यर्थः ।

यथेत्यादि । अनारम्भको द्रव्यानारम्भक उत्तरः । आद्योऽपि विभागापेक्षयोत्तर-कालभावी यः संयोगस्तज्जनकत्वे औत्सर्गिके सत्येव कोऽर्थोऽनारम्भकोत्तरसंयोगं जनयेदेव कर्म । यथा कुतोऽपि विशेषाद् द्व्यणुकादौ द्रव्यारम्भकोत्तरसंयोगमपि जनयति ।

अन्यथेत्यादि । यदि कर्मण आरम्भकानारम्भकसंयोगप्रतिद्वन्द्विविभागद्वय-जनकत्वं नाभ्युपेयते, तदा अनयैव दिशा यथा वंशदलाद्यवयवविभागकारणका वंशदलावय-वावरुद्धाकाशविभागाः कल्प्यन्ते, तथा तत्रापि संयोगेऽपि कारणमात्रसंयोगपूर्वकाः । कारणमात्राणि वंशादेः कारणान्येव वंशदलादीनि । तत्संयोगकारणकाः कारणाकारणसंयोगाः कारणानि वंशदलादीनि, अकारणान्याकाशादीनि तेषां संयोगाः कल्प्याः स्युः । न चैवं **वैशेषिकै**रपि संयोगाः कल्प्यन्ते ।

ननु संयोगक्रमे प्रमाणं नास्ति, अतः संयोगा नैवं कल्प्यन्ते इत्यत आह—**यथा**[679b]**चेति** ।

इहापीति । विभागक्रमेऽपि ।

एका त्विति । वंशदलादौ क्रिया ।

वर्त्तिनमित्यत्र वर्त्तिनं चेत्यत्र च जनयतीति संबध्यते ।

वरमेवमस्त्विति । वरमेवंप्रकारेण वैलक्ष्यण्यमस्तु । यत् पद्मदलादौ क्रिया द्रव्यानारम्भकपत्रावयवविभागं पत्रावयवाकाशविभागं च युगपत् जनयति । वंशदलादौ क्रिया तु आरम्भकदलावयवविभागं दलाकाशविभागं च युगपत् जनयतीति । एवं हि विभागस्य कारणत्वकल्पनागौरवं न स्यादिति भावः ।

इतिमात्रव्यक्तीकरणफल इति । न तु सर्वस्यापि विभागस्य विभागजत्व निराकरणेन शब्दे विभागजत्वस्य संशयकारणत्वदर्शनफलः ।

कारणाकारणविभागपूर्वकस्त्विति । कारणं हस्तस्याङ्गुली अकारणं तरुः । तयोर्यो विभागस्तत्कारणकः कार्याकार्यविभागो हस्ततरुविभागः ।

कार्यैकार्थेति । यत्रैव हस्ततरुविभागः कार्यः तरौ कारणमपि तदङ्गुलीविभाग-स्तत्रैवेत्यर्थः ।

कार्यकारणेति । कार्यस्य हस्ततरुविभागस्य कारणं हस्तः सोऽप्यङ्गुर्याम् । अङ्गुरीतरुविभागोऽप्यङ्गुर्याम् ।

अत्र हि शब्दस्य न निमित्तमात्रसजातीयासमवायिजन्यत्वं साध्यमिष्टमित्याह—**असाधारणीभूतेति** ।

असाधारणान्निमित्तात् जन्म शब्दस्याद्यस्यैव, न तु द्वितीयादेः शब्दनिमित्तकस्येत्यत आह—**आद्यशब्दत्वादिति हेत्वर्थ** इति ।

ननु शब्दासमवायिकारणस्य वंशदलाद्यवयवाकाशविभागस्य विभागजत्वे प्रमाणाभाव उक्त एव, तत् कथमाह **टीकाकृत्** विभागजविभागासमवायिकारणत्वं शब्दस्येत्याशङ्क्याह—**यद्यपीति** ।

अभ्युपेत्येति । **वैशेषिक**मतेनाभ्युपगम्येत्यर्थः ।

एवमपीति । विभागजत्वस्य कारणमात्र विभागजविभागासमवायिकारणत्वाभि-धेयत्वभणनेनासाधारण्ये समर्थितेऽपि ।

अदोष एवेति । संशयहेत्वसाधारणतादोषेणादुष्ट एव ।

स हीति । विभागः ।

द्रव्यानारम्भकेति । पद्मपत्राद्यवयवः ।

अकारणमिति । द्रव्यस्य ।

आरम्भकेति । वंशादिदलः ।

आद्यस्येति । कर्मणः ।

तस्मिन्निति । आद्ये कर्मणि ।

तदुत्तरस्यापीति । आद्यकर्मोत्तरस्यापि कर्मणः ।

तन्निवृत्तिरिति । पूर्वकर्मनिवृत्तिः ।

तस्मादिति । पूर्वकर्मणोरविभागजत्वनिश्चयात् ।

गुणत्वे प्रमाणमेवेति । शब्दो गुणो विभागजत्वादङ्गुल्याकाशविभागजहस्ताकाशविभागवत् ।

ननु शब्दस्य यद् विभागजत्वं तत्कारणमात्रविभागापेक्षत्वम्, हस्ताकाशविभागस्य तु यद्विभागजत्वं तत्कारणाकारणविभागजत्वम् । अतः शब्दस्य विभागजत्वमसाधारणमेवेत्याशङ्क्याह—**न वेति ।**

तदेवावान्तरविशेषमिति । विभागजत्वस्यावान्तरविशेषम् ।

धूमोऽप्यगमकः स्यादिति । गिरिस्थधूमस्यापि हि अवान्तरविशेषमादाय सर्वतोऽप्यसाधारणत्वात् ।

तुल्यजातीयेष्वित्यादीति । अत्र विसर्गः संभाव्यते ।

विवक्षितविपरीतेति । विवक्षितं व्यतिरेकमुखेन संशयजनकत्वम् । तद्विपरीतमन्वयमुखेन संशयजनकत्वम् ।

युक्तिरिति । **वार्त्तिकोक्ता ।**

पूर्वैवेति । **भाष्यकृता** हि विशेषस्योभयथादृष्टत्वादित्यनेनान्वयमुखेन संशयजनकत्वं समानधर्मयुक्तिरसाधारणस्यापि भणिता । [680a] तद्गौरवाद् **वार्त्तिकृता**पीत्यर्थः ।

समानपदपर्यालोचनयाप्यनेकपदसाधारणे वर्तते इति **टीका**यामुक्तम् । यथा चैतत् तथा स्पष्टयति **समानो हीति** ।

उक्तं भवतीति । अनेकशब्देन ।

सपक्षविपक्षाभ्यामिति । धर्माभ्यामिति द्रष्टव्यम् ।

अभिधेयाविनाभूतत्वादिति । अभिधेयोऽनेकशब्देन वाच्यो यः पक्षगः सपक्षविपक्षधर्माभ्यां विजातीयो धर्मः, तेनाविनाभूत इत्यसाधारणो धर्मो लक्षणाविषयोऽभिधेया-विनाभावप्रतीतिर्लक्षणोच्यते इति मतान्तरलक्षणाया विषयः ।

टीयाम् ॥ **श्रुत्यर्थाभ्यामिति** । श्रुत्योपात्तस्य समानधर्मस्यार्थेनोपात्तस्यासमानस्येति यथासंख्यं योज्यम् ।

उने ॥ नन्वसमानः संशयकारणं न भविष्यति, अतः समानशब्देनोपस्थापितो न वाच्यो भविष्यतीत्याशङ्कयाह—**संशयेति** ।

तस्येति । असमानस्य ।

प्रमाणसिद्ध इति । अन्वयव्यतिरेकानुविधानसिद्धे ।

तस्मिन्निति । असमाने ।

अयमेवार्थ इति । असमानधर्म एव ।

एतेनेति । अनेकधर्मेति वचोभङ्ग्या असमानधर्मदर्शनेन ।

वार्त्तिके ॥ **भवितुमीति** । लब्धुम् ।

अयमपीति । प्राणादिमत्त्वादित्ययमपि ।

अन्वयिन इति । विशेषस्याभिधेयत्वे साध्ये प्रमेयत्वादेः केवलान्वयिनः ।

विधीयमानव्यभिचार इति । विधीयमानस्योर्ध्वत्वादेर्व्यभिचारः सपक्षेऽपि संभवः ।

प्रतिषिध्यमानव्यभिचार इति । प्रतिषिध्यमानस्य विभागजत्वादेर्व्यभि-चारो विपक्षादपि निवृत्तिः ॥

टीयाम् ।। **न चायं प्रयोगे युक्त** इति **वार्त्तिक** इति वाक्यं विशिनष्टि—**न चायं प्रतीति** ।

वार्त्तिके ।। **संभवान्न विरुद्धाविति** । उत्तरमिदम् ।

टीयाम् ।। विरुद्धार्थ इति **वार्त्तिक**पदं व्याख्याति—**विरुद्धेति** ।

वार्त्तिके ।। **उपेत्य चेति**[1] । अभ्युपगम्य ।।

टीयाम् ।। **अव्यभिचारीति** । कृतकत्वादिहेतुजनितत्वात् ।

विशेषदर्शनादिति । अनित्यत्वादिदर्शनात् ।

न च यदेत्यादि । निवर्तकात् संशयस्योत्पत्तावनिवृत्तिरेव स्यादित्यनन्तरमुक्तम् । अधुना तु यदा संशयस्य निवर्तकं विशेषदर्शनमस्ति, तदा संशयस्योत्पादकं विशेषादर्शनमप्यस्तीति नेत्याह । विशेषदर्शने संशयस्योत्पत्तिरेव न घटते इत्येतदाहेत्यर्थः ।।

उने ।। **प्रत्यभिज्ञानमिति** । गकारादौ विषये यत्प्रत्यभिज्ञानं तन्न तावद् गकारादिव्यक्तिविषयमिति **द्वितीयाध्याये** व्युत्पादनीयम् । इदमुक्तं स्याद् यदा हि गकारादिप्रत्यभिज्ञानं व्युत्पाद्यं, तदा नेदं गकारादिव्यक्तिविषयमित्येवं निश्चयरूपेणैवानेन भाव्यम् । यावत् तु न व्युत्पाद्यते, तावदपीदं सन्दिग्धमेवेति । तदाह—**यदाप्यस्तीति** । व्युत्पादनादर्वाक् प्रत्यभिज्ञानम् ।

अस्येति । प्रत्यभिज्ञानस्य ।

ननु यदा सैवेयं गकारव्यक्तिरिति व्यक्तिविषयं प्रत्यभिज्ञानं तदा असन्दिग्धमेव भविष्यतीत्याशङ्क्याह—**यदापि व्यक्तिरिति** विषयः ।

टीयाम् ।। **विदितसंगतेरिति** विदितसङ्केतस्य ।।

दर्शनस्येति । शब्दप्रयोगस्य ।

उने ।। **जातिमात्रपदार्थवादीति** । जातिरेव पदार्थो न व्यक्तिरिति वादी ।

---

1 वेति S

स्वसिद्धान्तदाढर्येनेति । जात्युपहिता व्यक्तिः पदार्थः इति स्वसिद्धान्तस्यात्यन्तप्रमाणोपपन्नतया ।

परोऽपीति । जातिमात्रपदार्थवाद्यपि ।

एवमिति । गवादिव्यक्तय इव गोत्वाद्यु[680b]पधाना इत्येवम् ।

अन्यथेत्यादि । यो हि जातिरेव पदार्थ इति मन्यते, तेन यद्यपि व्यक्तयः पदानामभिधेयत्वेन नेष्यन्ते, तथापि जात्यविनाभूतत्वेन प्रतीता इमा इति लक्षणीयत्वेनाभ्युपेयन्त एव अन्यथा गवादिशब्देभ्यो गवादिव्यक्तयः कथमपि न प्रतीयेरन् । तदियं लक्षणा कथं स्याद् यदि व्यक्तिभिः सह अभिधेयस्य जातेरविनाभावप्रतीतिर्न स्यात् ? व्यक्तिभिः सह जातेरविनाभावप्रतीतिश्च कथं स्यात्, यदि जातिरेव पदार्थः ? तस्मात् जातिमात्रपदार्थवादिनोऽपि जातिर्व्यक्तिश्च पदार्थं इति सिद्धमित्यर्थः ।

तथाभावेति । अनित्यत्वे ।

निश्चितत्वेनेति । अनित्यत्वस्य ।

व्याप्तिनिश्चय इति । घटादावेव ।

न करोतीति । कृतकत्वम् ।

व्याप्तिमिति । कृतकत्वानित्यत्वव्याप्तिम् ।

विरोधे इति । प्रतिपक्षसाधनस्य व्याप्तिमदूषयतोऽपि सतः साध्यसिद्ध्या विरोधे ।

अदुष्टादपीति । प्रसिद्धानुमानादपि न साध्यसिद्धिः प्रतिपक्षसाधनस्य व्याप्तिमदूषयतोऽपि विरोधकस्य सर्वत्र सुलभत्वात् ।

व्याप्तिदोषे त्विति । प्रतिपक्षसाधनं चेद् व्याप्तिं दूषयति तदा ।

सन्दिग्धतत्त्वमिति । सन्दिग्धानित्यत्वम् ।

सन्दिग्धासमर्थविशेषणमिति । किं ज्ञायते यदि दैवात् शब्दोऽपि परमार्थतोऽनित्य एव स्यात्, तदा शब्दादन्यत्वे सतीति विशेषणमसमर्थमापद्यते इत्येवमसमर्थविशेषणत्वसन्देहानिवृत्तेः ।

टीयाम् ॥ स एवेति । परिहर्त्तैव ।

पाञ्चरूप्येति । पञ्चमेनापि रूपेणासत्प्रतिपक्षत्वेनोपपन्नयोः सतोर्हेत्वोरेकत्रासंभव एवेति तावदुक्तम्, असत्प्रतिपक्षत्वरूपरहितयोस्तु सत्प्रतिपक्षयोः सतोः संभवः स्यात् यद्यङ्गी-क्रियत इत्यर्थः ।

उने ॥ एकैकस्येति । कृतकत्वमेकमेव नान्वयतो नित्यकोटिमुपस्थापयति; नित्येष्वगत-त्वात् । नापि व्यतिरेकतोऽनित्येभ्योऽव्यावृत्तत्वात् । श्रावणत्वमप्येकमेव नान्वयतोऽनित्यकोटि-मुपस्थापयति । अनित्येष्वगतत्वात् । नापि व्यतिरेकतो नित्यात् शब्दत्वादव्यावृत्तत्वात् ।

टीकाकृता हि सिद्धमपि श्रावणत्वमित्यनेनानुनासिकत्वादिधर्माणां श्रावणत्वं सिद्धमुक्तम्, तद्यथा सिद्धं तथाह—**अनुनासिकेति** ।

व्यक्तीति । उकारादिवर्णस्थानुनासिकत्वादिधर्मव्यक्तिः ।

तथा चेति । व्यक्तेर्जातेश्चैकेन्द्रियज्ञानगोचरत्वे ।

सेति । अनुनासिकत्वादिधर्मव्यक्तिः ।

अन्याश्रयेति । शब्दाश्रया ।

विप्रतिपत्तिरिति । अनुनासिकत्वादयो धर्मा आकाशाश्रया इति **मीमांस-का**नां शब्दाश्रया इति तु **नैयायिका**नामभ्युपगतेः ।

पक्षेणैवेति । यदा हि अनुनासिकत्वादयो धर्माः शब्दाश्रयाः, तदैते शब्दान्तर्भू-तत्वात् पक्षः ।

अवर्णात्मकत्वेनापीति । अव्यक्तशब्देन ।

तद्धर्मशालिनेति । अनुनासिकत्वादिधर्मशालिना ।

तस्यापीति । अवर्णात्मकशब्दस्यापि ।

तद्दर्शन इति **मीमांसक**मते ।

विरोधमुखेनाप्युद्भावनादिति । यदि । हि **मीमांसके**नानुसिकत्वादयो धर्माः शब्दाश्रया अभ्युपेयन्ते, तदा स्वसिद्धान्तविरोधः । अत आकाशाश्रया अभ्युपेयाः । तथा च श्रावणत्वं हेतुरनैकान्तिकस्तन्मते इत्येवं सिद्धान्तविरोधद्वारेणाप्यनैकान्तिकोऽय-मित्युद्भावनात् ।

नैयायिकमतेऽपि श्रावणत्वहेतोर्दुष्टतामाह—**वस्तुन** इति । यदापि वस्तुवृत्त्या अनुनासिकत्वादयः शब्दधर्मा [68ra] अभ्युपेयन्ते तदापि श्रावणत्वहेतोर्धर्मिग्राहकप्रमाण-बाधात् । तथा हि, आकारादौ हि शब्दे तावत् सानुनासिकत्वं निरनुनासिकत्वं च सहासंभविनौ धर्माविष्येते । तदेतच्छब्दस्यानित्यत्वे एव स्यात्, न नित्यत्वे एकस्मिन् युगपद्विरुद्ध-धर्माध्यासासंभवात् । तस्मात् येनैव प्रत्यक्षेणानुनासिकत्वाननुनासिकत्वादयो धर्मा गृहीताः, तेनैव धर्म्यपि शब्दोऽनित्य एव गृहीतः । तथा च धर्मिग्राहकेण प्रत्यक्षेणैव नित्यत्वासाधकं श्रावणत्वं बाधितम् ।

अप्रयोजकश्चेति । न हि शब्दत्वे श्रावणत्वात् नित्यं किं त्वकार्यत्वेन सोपाधिरित्यर्थः ।

विप्रतिपत्तेः संशय इत्यादिना संशयो भवतीत्यन्तेन हि **वार्त्तिकेन** विप्रतिपत्ति-लक्षणकस्य संशयस्य व्याख्यानम्, न तु विप्रतिपत्तिमात्रस्येति ।

टीकास्थमस्येति पदं व्याचष्टे **अस्य लक्ष्यीभूतस्य संशयस्येति** ।

नन्वस्य संशयस्य **वार्त्तिककृतै**वं व्याख्यानं कुत इत्याह—**परस्परेति** । एवं स्वरूपोऽयं संशय इत्थंव्याख्यानेनैव प्रतिपादयितुं शक्यते यत इत्यर्थः ।

उपेक्षितमिति । **वार्त्तिकटीकाकारा**भ्याम् ॥

टीयाम् ॥ **विशेषमपीति** । ज्ञातृस्थत्वलक्षणम् ।

असाधारणवत्त्वमित्यादि । यथा गन्धवत्वात् पृथिवीत्वादि यथा पृथिव्या-दिषु गन्धवत्त्वादि सजातीयेभ्यो विजातीयेभ्यश्च विशेषो दृश्यते तथा शब्देऽपि विभागजत्वं सजातीयेभ्यो विजातीयेभ्यश्च विशेषो दृश्यते । अतः शब्दे संशय इत्यर्थपरं वदता हि **भाष्यकृता** असाधारणवत्त्वमसाधारणधर्मसंबन्धः शब्दे संशयहेतुत्वेनोक्तम् । तच्च साधारणमेव । न हि पृथिव्यादिष्वसाधारणधर्मासाधारण्येऽपि असाधारणधर्मसंबन्धोऽसाधा-रणः ।

तद्वृत्तेति । असाधारणधर्मसंबन्धः ।

सेति । तद्वृत्ता ।

वार्त्तिककारेणेति । विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति वदता ।

उने ॥ अनभ्यासेति । अनभ्यासदशापन्नेऽर्थे उपलब्धे इयमुपलब्धिः सत्या असत्या वेति यः सन्देहः स यदि उपलब्ध्यव्यवस्थात इति लक्षणस्य लक्ष्यतयेष्टः, तदा समानधर्मोपपत्तेरिति पदेनैव गतो बुद्धिसामान्यरूपसाधर्म्यादेवास्य संशयस्योत्पत्तेरित्यर्थः ॥

तद्द्वारक इति । बुद्धिसत्यासत्यद्वारकः ।

इह विवक्षित इति । उपलब्ध्यव्यवस्थात इतिलक्षणे लक्ष्यतया ।

सोऽपीति । अर्थे सन्देहः ।

स्वरूपत इति । धर्मिमात्रतः ।

तदेककारणकोटिव्युदासेनेति । तस्यायमुपलभ्यमानार्थ एतद्देशकालो वा अनेतद्देशकालो वा इत्येवं रूपस्य देशकालतोऽर्थे सन्देहस्य या एककारणकोटिरनेतद्देशकालो वेत्येवंरूपा तस्या व्युदासात् ।

उपप्लवेति । एतद्देशकालवर्त्त्ययममुकः पदार्थ इति ज्ञानं भ्रान्तमभ्रान्तं वेत्येवमुपप्लवसन्देहे तु आध्यात्मिको ज्ञानविषय एवायं संशयो न त्वर्थविषयः । स च बुद्धिसामान्योपलब्धेः प्रथमपदेनैव गत इत्यर्थः ।

प्रकृते इति । **भाष्योक्ते** ।

धर्मिणमिति देशकालादिविशेषम् ।

संशयः स्यादिति । पिशाचोऽस्ति न वेत्येवम् ।

नात्यन्तानुपलब्धकोट्युल्लेखीति । अत्यन्तानुपलब्धस्य पिशाचादेर्ये कोटी सत्त्वासत्त्वरूपे तयोरुल्लेखी तावन्न स्यात् पिशाचादेरत्यन्तानुपलब्धत्वेन तयोः सत्त्वासत्त्वकोट्योः स्मरणाभावात् ।

[68ıb] **उपलब्धकोट्युल्लेखीति ।** उपलब्धस्यानुमानादिना गृहीतस्य परमाण्वादेर्ये कोटी सत्त्वासत्त्वे तदुल्लेखी ।

इह चेदिति । इहास्ति नास्ति वेत्येवं संशयो यदीत्यर्थः ।

तर्हि देशे इति । इह पिशाचोऽस्ति न वेति कोऽर्थः? अयं देशकालादिः पिशाचवान् न वेत्येवं देशादिविशेषं धर्मिणमुपादाय संशयो घटते ।

उपलब्धः सन्निति । देशकालादिविशेषो धर्मी ।

विप्रतिपत्तितो वेति । यथा मृत्पिण्डे घटोऽस्तीत्येके, नास्तीत्यपरे । तदत्र मृत्पिण्डे घटोऽस्ति नास्ति वेत्यत्रोपलब्धो मृत्पिण्डो विप्रतिपत्तेर्विशेषौ सत्त्वासत्त्वे स्मारयति ।

टीयाम् ॥ अनुपलब्धपूर्वविशेषमित्यस्य व्याख्यानम्—**अनुपलब्धेति** ।

वार्त्तिके ॥ **विशेषापेक्ष** इति । सामान्यवचनमित्यादि । उत्तरमेतत् ।

टीयाम् ॥ यदा तद्गता विशेषा इत्यादेः सुष्मूर्षतः इत्यन्तस्य **वार्त्तिक**स्य व्याख्यानम्—**उपलब्धेति** ।

ननु साधर्म्यमित्यनेन भावाभिधायिना समानानेकधर्मपदवद् बहुव्रीहिपरेण धर्मी मोच्यताम्, वैशेषिकलक्षणस्थसामान्यपदेनैव तु वक्ष्यते इत्याशङ्काह—**सामान्येति** । सामान्यश्चासावर्थश्च सामान्यार्थः ।

तद्गतोऽश्रवणादिति । साधर्म्यदर्शनादिति **सूत्रे** ॥

अन्वयमात्रव्यभिचारोऽभिमत इति । यदि तु व्यतिरेकव्यभिचारोऽभिमतः, तदा न वक्तव्यमित्यर्थः ।

शमादेरिति । शमो वैराग्यम् । आदिपदात् रागः ।

तन्मात्रेणेति । समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरेतावन्मात्रेण ।

सामान्यलक्षणमिति । यस्मिन् स्थिते इदं विशेषलक्षणं तत् सामान्यलक्षणं शास्त्रान्तरस्थम् ।

कारणविशेषणत्वेनेति । कारणानि विशेषणानि जनकत्वेन यस्य तद्भावेन ॥

॥ इति संशयलक्षणं पूर्णम् ॥

उने ॥ **तत्साधनीभूतन्यायमिति** । तस्य प्रयोजनस्य साधनीभूतो यो न्यायस्तम् । न्यायेन ह्यपवर्गरूपं प्रयोजनं साध्यते ।

अस्येति । प्रयोजनस्य ।

इहेति । लक्षणे । न विवृतमिति प्राप्तव्यम्, हातव्यमिति तु **भाष्यं** पर्यायमात्रपरमिति भावः ।

एवं सतीति । यदि ससाधनौ सुखदुःखावाप्तिपरिहारावत्रार्थशब्दार्थः, तदा उत्तर**भाष्य**विरोध इति तदाप्तिहानोपायमनुतिष्ठतीति **भाष्यं** विरुध्यते ।

अर्थस्येति ससाधनसुखाप्तिदुःखहानवाचकस्यानन्तरस्य ।

प्रकृतसङ्गतेरिति । तदाप्तिहानोपायमित्यस्य **भाष्यस्य** संगतेः ।

इदं हि **भाष्यं** तस्यार्थस्य सुखाप्तेर्दुःखहानस्य ये आप्तिहाने इत्येवं न संगच्छते । अत आह—**न चेतीति** । न चेत्यादिना अनुतिष्ठतीत्यन्तेन हि **टीका**शकलेन तदाप्तिहानोपायमनुतिष्ठतीत्येतद् **भाष्यं** यदुपायानुष्ठानं सुखाप्तिदुःखहान्युपायविषया प्रवृत्तिस्तदेव तदाप्तिहानानुष्ठानं सुखदुःखाप्तिहानविषया प्रवृत्तिः सुखाप्तिदुःखहान्योः स्वरूपेण प्रवृत्त्ययोग्यत्वादित्यर्थपरं दर्शयता **भाष्ये** तच्छब्दः सुखदुःखार्थो दर्शितः । तथा च न केवलं विरोधः परिहृतः स्वोक्तोर्थार्थश्च संवादितः ॥

अध्याहरन्तीति । गोचरावित्यस्याग्रे ॥

टीयाम् ॥ **तदुपाया** इति । सुखाप्त्युपाया यागादयो दुःखहानोपायस्तत्त्वनिर्णयादयः ।

असन्तीति । साध्यत्वात् न विद्यन्ते ।

इच्छादीति । आदिपदादात्मप्रयत्नादि ।

तत्रैवेति । सुखदुःखप्राप्तिपरिहारयोरेव ।

[682a] **अन्यनिश्चय** इति । सुखदुःखप्राप्तिपरिहारनिश्चयः ।

अन्यत्रेति । सुखदुःखोपाययोः ।

संप्रतिपत्तिरिति । एकाधिकरणता ।

ईदृशमिति । प्रमाणोपपन्नम् ॥

उने ॥ **तथा चेति** । यदा प्रमाणस्य प्रमाणोपपन्नता, न चानवस्था [सा ?]धयिष्यते तदा ।

अस्येति । प्रयोजनस्य ।

प्रयुक्ताविति । प्रवृत्तौ ।

सतोऽसतो वेत्यादि । एषु च विकल्पेषु सर्वेष्वपि द्वितीयाः प्रमाणोपपन्नाः । तथा हि यदि प्रयोजनं सत् तदा न प्रवृत्तौ साधनं सत्त्वादेव । असदपि न स्वज्ञानद्वारेण प्रवृत्तौ साधनम् , किं तु व्यापारान्तरेण स्वसाधनज्ञानेन तथा नेदं स्वात्मनि प्रवृत्तौ साधनम् , अयोग्यत्वात् किं तु स्वसाधने, तथा नेदं स्वरूपेण सर्वेषां व्यापकम् । न हि प्रमाणादयोऽन्ये च सुखादिवत् प्रयोजनस्वरूपाः कर्मविद्याद्वारेण तेषामपि व्यापकं यागादि कर्मद्वारेण यागाङ्गादयोऽपि हि प्रयोजनम् । तत्त्वनिर्णयद्वारा च प्रमाणादयोऽपीति ।

न ब्रूम इत्यादि अङ्गीकरोतीत्यन्तं **टीका**वाक्यं यावन्न समाप्यते प्रयोजनवानिति पदभणनेन न परिपूर्णीभवति । न ब्रूमः प्रयोजनं न्यायस्याङ्गम्, प्रयोजनगता तु चिन्ता न्यायाङ्गं भवतीत्येतावन्मात्रे एवोक्ते इत्यर्थः । परेणकृतामित्येवं—विधां शङ्कामपनेतुमाह **टीकाकार** इति संबन्धः ।

शङ्कामेवाह—**नन्विति** । यदा हि न्यायात् निर्णय एव स्यात् नानिर्णयो निर्णय एव च न्यायस्य प्रयोजनं नान्यत्, तदा प्रयोजनविचारणास्वरूपं प्रयोजनलक्षण**सूत्रं** विनापि न्यायो निर्णयप्रयोजन इत्यवगन्तुं शक्यमेव । तत् किं यमर्थमधिकृत्येत्यादिना प्रयोजनेन विचारितेनेत्यर्थः ॥

टीयाम् ॥ **यहते** इति । यत्प्रयोजनमृते पुरुषं भुक्त्वा अन्यार्थं स्रगादिवत् सुखाद्यर्थं भवत् यन्न केवलपुरुषार्थमित्यर्थः ॥

उने ॥ **न च निर्णय एवमिति** । निःश्रेयसार्थं पुरुषेणापेक्षितत्वात् न निर्णयोऽनन्यार्थतया पुरुषेणापेक्षितः ।

वाक्यशेषमाहेति । तदेवं निर्णयस्य मुख्यप्रयोजनत्वे निषिद्धे यत् सिद्धं तद्वक्तुं वाक्यशेषं प्रागनुक्तं वाक्यांशमाहेत्यर्थः ।

गौणप्रयोजननिर्णयकारणतयेति । गौणं प्रयोजनं यो निर्णयः स करणं यस्य तद्भावेन ।

तत्त्वनिर्णयोऽनेन क्रियते इति । यत् तत्त्वनिर्णयार्थं न्याय उपादीयते तदपि मुख्यं प्रयोजनं निःश्रेयसमस्यास्तीति कृत्वा । अतो निःश्रेयसविषयमनुसन्धानं

न्यायोऽङ्गतया अपेक्षते एव। निर्णयरूपप्रयोजनगता चिन्ता विचाररूपा न्यायाङ्गं भवतीति तद्विचारस्वरूपमिदं प्रयोजनलक्षण**सूत्रं** कृतमित्या**चार्या**भिप्रायं मन्यमानेन न्यायस्य प्रयोजनं निर्णय एवेति स्वाभिप्रायवता च परेण नन्वित्यादिना शङ्कितम्। न्यायस्य हि निर्णयो गौणमेव प्रयोजनम्, मुख्यं त्वपवर्गः। तद्गतां चिन्तां मुख्यप्रयोजनविषयमनुसन्धानं न्यायाङ्गीकरोतीत्यतः प्रयोजनलक्षणमभिहितमित्यभिप्रायवता **आचार्ये**ण समाहितमिति समुदायार्थः।

तदिति। प्रयोजनाभिसन्धानम्।

नन्वङ्गं सन्निहितमेव स्यात् प्रयोजनाभिसन्धानस्य च स्वयं निष्फलस्य फलावता न्यायेन किं सान्निध्यं येनाङ्गं स्यादित्यत आह—**निष्फलस्येति**।

तत्सन्निधेरिति। न्यायेन सह नैकट्यात्।

यागानङ्गस्यापीति। असिद्धत्वात्।

तदपीति। अन्यव्याख्यानमपि। उत्तरत्र[682b]प्रयोजनमेव हि इत्यादावेवमेव प्राक्तनव्याख्यानवत् नेयं न्यायस्य प्रयोजनाङ्गम्। किं तु मुख्यं प्रधानमुद्देश्यं प्रयोजनगता चिन्ता तु न्यायाङ्गं स्यादिति अन्यव्याख्यानार्थः॥

॥ इति प्रयोजनलक्षणं पूर्णम्॥

उने॥ **एतत्साध्यसमर्थमिति**। एतस्मिन् विवक्षिते साध्ये अनित्यत्वादौ समर्थं साधनं कृतकत्वादि।

एतदिति। साध्यम्।

तत्सूचकं सूत्रमिति। सामान्यलक्षणसूचकं विशेषलक्षणाभिधायकं लौकिके-त्यादि **सूत्रम्**।[1]

तथैवेति। सामान्यलक्षणसूचकतयैव॥

---

1 I. i. 25

टीयाम् ॥ **साध्यसाधर्म्यात् तद्धर्मभावित्वेनेति ।** साध्येन पक्षेण साधर्म्यात् कृतकत्वादेः प्रयोजकाद् यस्तद्धर्मभावी तस्य पक्षस्य धर्मोऽनित्यत्वादिः । स चासौ भावश्च विधीयमानत्वात् । सोऽस्यास्तीति तद्धर्मभावी तद्भावेन ।

तथा च नातिव्याप्तिरिति । अर्थशब्दस्यैवं विशिष्टार्थत्वाभावे कृतकत्वादिना अनित्यत्वादौ साध्ये साध्यविकलादेरपि आकाशादेर्दृष्टान्तस्य दृष्टान्तता स्यात्, सत्त्वादिना आकाशादावपि बुद्धिसाम्यसद्भावात् ॥

उने ॥ **विशेषे** इति । विशेषलक्षणे ।

॥ इति दृष्टान्तलक्षणपूर्तौ न्यायपूर्वाङ्गलक्षणं समाप्तम् ॥

॥ न्यायाश्रयसिद्धान्तलक्षणप्रकरणम् ॥

[१.१.२६–३१]

उने ॥ परिकलितसामर्थ्यमिति गृहीताविनाभावम् ।

व्यतिक्रमेऽपीति । स्वसिद्धान्तातिक्रमेऽपि ॥

टीयाम् ॥ संबन्धग्रहणेति । व्याप्तिग्रहः सङ्केतग्रहश्च ।

वार्त्तिके ॥ प्रत्यक्षेऽपि प्रसङ्ग इति । यद्यनुमानागमयोराश्रयो दृष्टान्तः, तर्हि प्रत्यक्षस्यापि दृष्टान्तत्वं प्रसज्येत ।

परिहरति—**अर्थ** इति । न ह्यनुमानागमयोराश्रयमात्रं दृष्टान्तः, किं त्वर्थ इति प्रत्यक्षाद् भेदोऽस्येत्यर्थः ।

ननु यद्यर्थो दृष्टान्तः, स कथमनुमानागमयोराश्रय इत्यत आह—**अधिगत** इति ।

न ह्यर्थमात्रं दृष्टान्तः कथ्यते, किं तर्ह्यधिगतः तत्र च व्याप्तिः सङ्केतश्च गृह्यते इति । तदाश्रयोऽनुमानागमयोराश्रय इत्यर्थः ॥

उने ॥ सिद्धान्त इति । प्रतितन्त्रसिद्धान्तः स्यात् ।

यथेति । नियोगो व्यापारेणैव वाक्यार्थ इत्यभ्युपगमः । सदृशतन्त्राणां **भट्टा**नामसिद्धोऽपि यथा **प्रभाकर**स्य प्रतितन्त्रसिद्धान्तः । यथा चोपमानं[1] प्रमाणं **वैशेषिका**णामसिद्धमपि नैयायिकस्य प्रतितन्त्रसिद्धान्तः ।

तथापीत्यादि । ननु तरुवृक्षशब्दौ समानार्थावित्यत्रानेकसंबन्धापेक्षा, अतः समानशब्द एकपर्यायः । प्रकृते त्वनेकसंबन्धो न भविष्यतीत्यर्थः ।

एतदिति । समानतन्त्रसिद्ध इति पदम् ।

---

1 J चोप°

व्यतिरेकमेव भावयति-**एकत्रेति** ।

इममर्थमिति । व्यतिरेकप्रधानत्वरूपम् ।

अन्यथेति । समानतन्त्रसिद्धपदस्य व्यतिरेकपरत्वानिश्चये भ्रमः स्यादिति । तथा च सर्वतन्त्रसिद्धान्तोऽपि प्रतितन्त्रसिद्धान्तः प्रसज्येत ॥

वार्त्तिके ॥ नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इत्येतावन्मात्रस्यैव प्रतितन्त्रसिद्धान्तलक्षण-व्याख्यायामुपयुक्तत्वे सामान्यविशेषतद्वतामित्यनेन सामान्यं **सांख्या**नामेव विशेषो **बौद्धा**-नामेव । [1]सामान्यविशेषौ तु नैयायिकानामेवेत्येतान्यपि प्रतितन्त्रसिद्धान्तोदाहरणानि दर्शितानि ।

उने ॥ **फलतो न कश्चिद् विशेष** इति । यद्यपि द्वितीयपक्षे सकर्तृकत्वादिः प्रक्रियमाण एवाधिकरणसिद्धान्तः, तथाप्यसावपि सर्वज्ञत्वादिविशेषानुषक्तसिद्धिरेवाधिकरण-सिद्धान्त इति वस्तुतोऽत्रापि आभिप्रायिकस्य[683a]सर्वज्ञत्वादेर्विशेषस्याधिकरणसिद्धान्त-तेति व्याख्याद्वयेऽपि फलतो न कश्चिद् भेद इत्यर्थः ॥

श्लिष्टं भाष्यं व्याचष्टे इति । **भूषण**प्रवृत्तिवत् श्लिष्टं **सूत्रं** द्विधा अव्याख्यायैव ।

प्रथमपक्षे इति । यस्यार्थस्येत्यादौ ।

द्वितीये तु सुगममिति । यस्य सकर्तृकत्वादेरित्यादिपक्षे तु साध्यस्य हेतोर्वेत्येतद् यथाश्रुतमेवेत्यर्थः ।

एकं व्याख्यानमिति । यस्य सकर्तृकत्वादेरित्येवंरूपम् ।

कण्ठत एवेति । स्पष्टमेव ।

अस्येति । अधिकरणसिद्धान्तत्वेनाभिमतस्य सकर्तृकत्वादेः पक्षस्य प्रतिसन्धाना-देर्हेतोर्वा ।

अनेन रूपेणेति । सर्वज्ञत्वादिसाध्यविशेषानुषक्तसिद्ध्या इन्द्रियनानात्वादि-हेतुविशेषानुषक्तसिद्ध्या वा ।

---

1 J °विशेषयंतो.

तत इति । प्रतितन्त्रसिद्धान्तात् ।

अपर्यवस्यदिति । सर्वज्ञत्वादिविशेषमन्तरेण निष्ठामयात् । न व्याख्यात-विषयसप्तम्युदाहरणमिदमिति, अपि तु निमित्तसप्तम्याः । यतः कर्तृमत्त्वं प्रतीतमप्यपर्यवस्यत् सर्वज्ञत्वाद्याक्षिपति, ततः कर्तृमत्त्वसिद्धिः निमित्तीकरोति सर्वज्ञत्वादिसिद्धिमिति **परा**शय इत्यत आह–**अत्रेतीति** । अत्र सर्वज्ञत्वाद्युपेतमेव कर्तृमत्त्वं सिध्यति । न तु केवलमिति विषयसप्तम्या एवोदाहरणमि**त्याचार्यस्य** हृदयम् ।

परमाण्वादीति । परमाण्वादीनामदृष्टान्तानां धर्माधर्मपर्यन्तानां ये अभिज्ञत्वा-नाभिज्ञत्वे तयोः सन्देहे ।

तत्प्रयोक्तृत्वेति । परमाण्वाद्यदृष्टान्तव्यापारयितृत्वम् ।

तच्चेत्यादि । तच्च कर्तृत्वं न सिध्येदेवेति संबन्धः ।

कदेत्याह—**ज्ञानमिति** । यदि ज्ञानं सर्वविषयं न सिध्येत् ।

क्व इति । द्व्यणुकाद्यादृष्टपर्यन्तं सर्वं सकर्तृमित्येवं पक्षे क्रियमाणे । एतेनैतदेकदेशे पक्षे क्रियमाणे ज्ञानसर्वविषयत्वसिद्धिं विनापि सकर्तृकत्वं सिध्येदेवेत्युक्तम् ।

तत्कारणेति । क्षित्यादिकारणे ।

केवलव्यतिरेकिप्रध्वंस इति । इच्छादयः परतन्त्रा गुणत्वादित्यनन्तरं विधीयमानस्य इच्छादयो द्रव्याष्टकातिरिक्तद्रव्याश्रिता द्रव्याष्टकानाश्रितत्वे सति परतन्त्रत्वादि-त्यस्य केवलव्यतिरेकिणः प्रध्वंस आद्येनैवाधिकरणसिद्धान्तबलादाभिप्रायिकस्यात्मनः सिद्धेः ।

तद्विषयत्वादिति । केवलव्यतिरेकिविषयत्वात् ।

उक्तमिति । पूर्ववदित्यादिसूत्रे शेषवदुदाहरणे । तथा हि सर्वज्ञत्वमन्तरेण प्रतिज्ञार्थानुपपत्तौ तदभिप्रायव्याप्तमाभिप्रायिकत्वाच्च पक्षधर्मतागोचरः ॥ इच्छादयः परतन्त्रा गुणत्वादित्यत्र पुनरात्मा नाभिप्रायव्याप्तः ।

न हीच्छादीनां क्षित्यादिपारतन्त्र्यमसंभावितम्, अपि तु मानसप्रत्यक्षवेद्यत्वादि-भिर्बाधितम्, धूमगतनीलत्वेनेव धूमस्यापालालत्वम् । तस्मादुभयथापि संभवादात्मा नैवाभि-प्रायव्याप्तः । तदव्याप्तत्वाच्च न पक्षधर्मता तमङ्कमारोपयितुमर्हत्यपि तु इच्छादिसंबद्धपरमात्र-मादायैव निवर्तते । तदुत्तरकालं क्षित्यादौ बाधिते तदन्यसिद्धौ विधायकप्रमाणाभावात् निषेधमुखेन व्यतिरेकी प्रवर्तते इति ।

प्रथमव्याख्यानमिति। एकव्याख्यानम्।

द्वितीये इति। यस्यार्थस्य सर्वज्ञत्वादेरित्यादौ॥

वार्त्तिकमिति। वाक्यार्थस्य सकर्तृकत्वादेः साध्यस्य प्रतिसन्धानादेर्हेतोर्वा सिद्धौ तदनुषङ्गी योऽर्थः सर्वज्ञत्वादिरिन्द्रिय[683b]नानात्वादिर्वासोऽधिकरणसिद्धान्त इत्येवं साध्यानुषङ्गिणः सर्वज्ञत्वादिसाध्यविशेषादेरेवाधिकरणसिद्धान्ततत्त्वप्रतिपादनपरं वाक्यार्थेत्यादिकम्।

टीयाम्॥ सूत्रितस्येति। यत् सूत्रितं तस्य प्रायेण परीक्षा स्यादिति परीक्षितः सूत्रित उच्यते। अपरीक्षितश्चासूत्रित इति।

असूत्रिताभ्युपगमादिति। असूत्रितस्याभ्युपगमात्॥

उने॥ सर्वेन्द्रियविलोपः प्रसज्यते इति। सुखादिज्ञानसाधनस्यापि मनसः परिहारे रूपादिज्ञानविशेषसाधनानामपि चक्षुरादीनां परिहारापत्त्या।

इदं चेत्यादि। इदं चापरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमित्येतत् **सूत्रकारस्य** स्वाभिमतोन्नयनप्रकाराविष्करणं स्वाभिमतस्य मनइन्द्रियत्वादेर्य उन्नयनप्रकारोऽसूत्रितमपि यद्यभ्युपगतं स्यात्, तदैव तद्विशेषपरीक्षणं स्यात्। मनइन्द्रियत्वादिपरीक्षणात् ज्ञायते असूत्रितमपि मनइन्द्रियत्वाभ्युपगतं **सूत्रकृता** इत्येवमूहनाविशेषः तदाविष्करणं तत्प्रकटनपरं शिष्यहिततया। यथा मदीयाभिप्रायं शिष्या एवमुन्नयन्तीत्येवं शिष्यहितार्थं, न त्वभ्युपगमसिद्धान्तलक्षणमिदमित्यर्थ इति हेतोर्लक्षणार्थमाहेति संबन्धः॥

कुतस्तमाह—**अत** इति। विशेषपरीक्षणोन्नीतादसूत्रिताभ्युपगमादित्यर्थः।

टीयाम्॥ अस्येति सूत्रितस्य।

उने॥ उक्तार्थेति। उक्तोऽर्थः परीक्षादिः।

तल्लक्षणयोगे इति। सिद्धान्तलक्षणयोगे।

तदेवेति। सिद्धान्तलक्षणासत्त्वमेव।

टीयाम्॥ अयुक्तत्वादिति **वार्त्तिक**स्य व्याख्या **अङ्गं प्रतीति।**

पक्ष इतीत्यादि। एत**द्वार्त्तिक**योजना त्वेवम्। पक्ष इति च पदं कीदृशम्? यद् वस्तुनः स्वार्थस्योपादीयतेऽनेनेत्युपादानं स्वार्थप्रतिपादकमित्यर्थः।

कथं ? कर्मतया व्यज्यमानतया ।

उभयथापीति । यदि न्याय्यस्य साधनं न्यायोऽभ्युपेयते यदि वा न्यायाश्रयो धर्मी अभ्युपेयते ।

वार्त्तिके ॥ **न्यायो नास्तीति** । सर्वतन्त्रसिद्धान्ताभावप्रतिपादकः ।

नास्ति चेति । सर्वतन्त्रसिद्धान्तः ।

॥ इति सिद्धान्तलक्षणपूर्त्तौ न्यायाश्रयप्रकरणं पूर्णम् ॥

उने ॥ **करणमिति** । साधनम् ।

उपनेयमिति । निवेशनीयम् ।

तत्प्रकरणमिति । सिद्धान्तप्रकरणम् ।

सिद्धवदिति । सिद्धसंगतिकमिव ।

टीयाम् ॥ **विषयगतेति** । यत्र विषये निर्णयो भावी तत्र संशयः स्यात् इत्येवं विषयतः प्रत्यासत्तिर्न तु संशयानन्तरं निर्णय इत्येवं स्वरूपतः अनया वाचोभङ्ग्या दर्शयति—**प्रमातुः प्रमाणानि** इति । एतेन प्रमाणसहकृतस्य प्रमातुः स्वरूपेण प्रमेये शक्ततेत्यर्थो **भाष्यस्य** दर्शितः ।

हेत्वभावोपवर्णनमिति । कृतकत्वाभावोपवर्णनम् ।

न चायमितीति । न चायं कृतक इत्येवं हेत्वभावोपवर्णने ।

वार्त्तिके ॥ **वाक्यस्याङ्गभूता** इति । एतदेव स्पष्टयति—**इतरेतरेति** ।

उने ॥ **स चेति** । विप्रतिपत्तिजः संशयोऽनुविधेयस्य सभापतेः स्थेयानां सभ्यानां च स्यात् ।

तज्ज्ञानेति । विचार्यवस्तुज्ञानम् ।

सार्वहेतुक इति । समानानेकधर्मविप्रतिपत्तिजः ।

प्रतीतिजयाविति । वादे तत्त्वनिश्चयो, जल्पवितण्डयोर्जयः ।

अन्यत्रेति । विचारमात्रे ।

अन्यत्र स्वगतेति । विचारमात्रे विचारकयोः [684a] स्वगता **जिज्ञासा** ।

सर्वत्रेति । कथासु विचारमात्रे च ।

संशयव्युदासं त्विति । सम्यगनित्यः शब्द इत्येवमेकपक्षपरिग्रहो यः स संशयव्युदास इति **केचिदि**च्छन्ति सम्यक्पदाभिधानेन ह्यत्रेतरकोटिव्यवच्छिन्नैकैव कोटिरवच्छिद्यते इत्यभिप्रायेण । स चैकपक्षपरिग्रहरूपः संशयव्युदास आदौ वादात् पूर्वं विप्रतिपत्त्या एकपक्षपरिग्रहरूपिण्या सिद्धः पश्चात् वादकाले च प्रतिज्ञयैवेत्यर्थः ।

तेनेति । तर्केण ।

तथाभूतामिति । द्विकोटिस्पर्शिनीम् ।

ताविति । संशयन्यायौ ।

एकस्यां कोटाविति । नित्यत्वादौ ।

प्रमाणबाधितं कश्चिदर्थमिति । कृतकत्वादिकम् ।

एतामिति । प्रमाणाभ्यनुज्ञाम् ।

प्रबलेच्छेति । उभयेच्छा ।

तद्द्वारेणेति । प्रबलेच्छाव्युदासद्वारेण ।

टीयाम् । **स्वप्रतिपादका एवेति** । स्वोऽत्र साधयिता ।

निश्चितत्वाच्चेतीति । कर्तर्यत्र क्तः ।

येनेति । स्वज्ञानद्वारा प्रकरणस्योत्थापकत्वेन जिज्ञासादयो ह्युत्पन्नाः सन्तः सत्तामात्रेण प्रकरणस्योत्थापका न पुनर्ज्ञाता । तथा च ज्ञापकानपेक्षितत्वाच्छब्दाप्रतिपाद्याः सन्तः प्रकरणेऽप्यङ्गं स्युः । एवं च वाक्यावयवतैषां दूरापास्ता ।

प्रतिज्ञादयस्तु ज्ञाताः सन्तः स्वार्थान् प्रतिपादयन्ति तथा च स्वज्ञानजनकापेक्षितत्वात् । शब्दप्रतिपाद्याः सन्तो वाक्याङ्गं स्युरित्यर्थः ।

सर्वथैवेति । प्रकरणाङ्गत्वेनापि ।

उने ॥ अस्येति । उत्पत्त्यङ्गपञ्चकस्य ।

ज्ञापकचिन्तेति । वाचकचिन्ता ।

टीयाम् ॥ स च वचनं चेति । परिग्रहश्च तद्वचनं च ।

तदाक्षिप्य **वार्त्तिककारः** समाधत्ते—**सिद्धत्वादितीति ।** एतेन युक्तं प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्य इत्येतदन्तं **वार्त्तिकं** संगृहीतम् । तत्र च इतरेतरनियामकत्वेन नियमः स साध्य इत्येतद् व्याख्याति–**अग्निमानेवेति ।**

स चेति । अयोगव्यवच्छेदः ।

संसर्ग इति । पदार्थान्वयः ।

अवधारणमिति । अन्ययोगव्यवच्छेदम् ।

वार्त्तिके ॥ एष पन्थाः स्रुघ्नं गच्छतीति । न ह्यत्र एष एव पन्था नान्यः, एष पन्था एव न नरादिः स्रुघ्नमेव न ग्रामादिमित्येवं कस्याप्यन्ययोगव्यवच्छेदविषयता दृश्यते ।

अवधारणस्यापीति । अन्ययोगव्यवच्छेदस्यापि ।

टीयाम् ॥ स्वाभिप्रायमिति । सिद्धप्रतिपक्षः साध्यशब्दस्यार्थ इत्येनम् ।

असाध्यनिर्देश इति । साध्यं हि किमुच्यतेऽसाध्यनिवृत्तिः । कोऽर्थः ? सिद्धनिवृत्तिस्ततश्च साध्यनिर्देश इति कोऽर्थः ? सिद्धनिर्देशाभावो न पुनः प्रज्ञापनीयोऽर्थः । एवं च साध्यौ हेतुदृष्टान्तनिर्देशावपि न सिद्धनिर्देशाविति तयोरपि प्रतिज्ञात्वं प्रसज्यते इति पराशयः ।

भवेदेतदिति । साध्यशब्दादसिद्धनिवृत्तिः सिद्धनिवृत्तिरित्यर्थो गम्यते इत्यर्थः ।

न कृतकत्वादि सिद्धमिति । एकतरपक्षे साध्यत्वात् ।

नाप्यनुपपद्यमानसाधनमिति । अन्यतरपक्षे सिद्धत्वात् ।

पराङ्गत्वेनेति । अनित्यत्वसाधनार्थत्वेन ।

एतदुक्तमिति । असाध्यं च द्वेधेत्यादि ।

क्वचित् । संसर्गः क्वचिद् व्यवच्छेद इति । शब्दार्थ इति योगः ।

प्रमाणतन्त्र इति । प्रमाणमूलः ।

वार्त्तिके । सामर्थ्यादिति प्रतिज्ञाभणनप्रस्तावात् ।

सर्वेऽर्थाः सिद्धा अपीति । सम्यग्हेत्वादयोऽपि ।

ननु धर्मस्याधुना साध्यत्वात् धर्मित्वमेव कुत इत्यत आह—**प्रसिद्धधर्मविशिष्ट** इति ॥

टीयाम् ॥ **तथेति** । प्रधानम् ।

तदर्थमिति । सिसाधयिषितधर्मविशिष्टधर्मिप्रत्यायनार्थम् ।

उने ॥ **प्रयोज्यभेद** इति । प्रज्ञापनीयधर्मविशिष्टो धर्मी ।

[684b] **प्रस्तावश्चेति** । प्रतिज्ञाद्यवयवाधिकारः ।

वार्त्तिके ॥ **सूत्रकारवचनादिति** । [1]कारणतो विकारादित्येतस्मादेव **सूत्रकारवचनात्** ।

उने ॥ ननु शब्द एकस्वरूप एव, याचेयं शब्दस्याल्पमहत्त्वप्रतीतिः सा भ्रान्तिरेव भविष्यतीत्यत आह—**यथा चेति** ।

असति वृत्त्यन्तरे इति । लाक्षणिकगङ्गादिशब्दैर्व्यभिचारनिरासार्थम् । गङ्गादिशब्दो हि प्रयोज्यवृद्धं प्रति गङ्गातीरादिप्रत्ययजनकश्चास्ति, न च गङ्गातीरादिवाचकः ॥

तत्प्रत्ययेति । शशिप्रत्ययः ।

अयमिति । चन्द्रशब्दः ।

स्वप्रत्ययेनेति । चन्द्रशब्दप्रत्ययेन ।

तद्गोचरेति । शशिरूपार्थविषयम् ।

---

1 V.S. II. ii. 34.

टीयाम् ॥ **हेतोरिति** । लिङ्गस्य ।

बौद्धमते हि त्रयोऽवयवा इति तेषां दोषानाह—**प्रतिज्ञादोष** इति ।

उने ॥ लिङ्गवचनस्य हि दोषोऽसिद्धत्वादिरर्थस्यैव संभवेत्, न तु वचनस्येत्यत आह—**असिद्धत्वाद्यर्थत्वमिति** । असिद्धत्वादिरर्थो यस्य हेतोः सद्भावः ।

उत्तरत्रेति । साध्यविकलत्वादिरित्यत्र ।

वार्त्तिके ॥ वचनदोषाश्च पक्षे उपचर्यंत इतीति । अत्रापि न प्रमाणमस्तीति योगः ।

टीयाम् ॥ **तद्गतत्वेनेति** । प्रतिज्ञागतत्वेन ।

तत्रेति । प्रतिज्ञायाम् ।

तात्पर्यमिति । तत्परत्वम् ।

अस्येति । वचनस्य ।

सर्व एवासौ वचनार्थ इति । वाच्यो लक्ष्यश्च । एवं चात्मपारार्थ्यस्यापि लक्ष्यरूपत्वात् वचनार्थत्वमेव ततस्तत्संग्रहायेष्टग्रहणं न कार्यमित्यर्थः ।

ननु वाच्यलक्ष्यव्यतिरिक्तस्य आभिप्रायिकार्थस्य संग्रहार्थमिष्टग्रहणं भविष्यतीत्याशङ्क्याह—**अस्त्विति** ।

कथमसौ वादीति । यत एव वचनार्थोऽत एव वाद्यभिप्रायव्याप्तोऽयमित्येवं ज्ञातुं न कथमपि शक्योऽभिप्रायस्य वचनलिङ्गत्वात् । एतेन वाच्यलक्ष्यातिरिक्तस्याभिप्रायिकार्थस्य संग्रहार्थमिष्टग्रहणं न स्यादेव वाच्यलक्ष्यरूपस्य वचनार्थत्वेनैव सिद्धत्वादिष्टग्रहणं न कार्यमित्युक्तम् ।

उने ॥ **ननु तथापीति** । भवत्वभिप्रायविषयो वाच्यो लक्ष्यश्च । परमिष्टग्रहणं विनयो वाच्यः शब्दानित्यत्वादिः । तस्यैव पक्षत्वं भवेत् मुख्यत्वात् । यस्तु परार्थाश्चक्षुरादय इत्यादावात्मपारार्थ्यादिर्लक्ष्यः तस्य गौणत्वात् पक्षत्वं न भवेत् । अतो वाच्यवत् लक्ष्योऽपि यथा पक्षः स्यादित्येवमर्थमिष्टग्रहणं भविष्यतीति भावः ।

विधाद्वयमिति । पक्षस्य वाच्यत्वं लक्ष्यत्वं च ।

न त्वेतदस्तीति । विधाद्वयम् । शब्दानित्यत्वादेरपि पक्षस्य अनित्यः शब्द इति प्रतिज्ञारूपस्य वाक्यस्यार्थत्वेन लक्ष्यत्वादेव । पदार्थ एव हि वाच्यः स्यात् न तु वाच्यार्थ इति भावः ।

एतच्चेति । पदान्तरार्थान्वितं स्वार्थं पदान्यभिदधतीति मते हि स्वार्थवद्वाक्यार्थोऽपि पदैर्वाच्य एवेति । तन्मतनिराकरणेन न क्वचिदपि पक्षः प्रतिज्ञावाच्य इत्येतत् ज्ञेयम् ।

वार्त्तिके ॥ अनिष्टं साधयतीति । अनिष्टां प्रतिज्ञां प्रयुङ्क्ते ।

अनिष्टनिवृत्तिरिति । यद्भयात् अनिष्टां प्रतिज्ञां प्रयुङ्क्ते ततो यदनिष्टं तन्निवृत्तिः ।

अनेकार्थसन्निपाते इति । अनेकार्थानां साध्यसाधनदूष्यदूषणलक्षणानां सन्निपाते ।

विचारणयोः संशयार्थत्वं दर्शयति—**तद्यथेति ।**

साधनदूषणप्रयोगरूपेति । साधनानां दूषणानां च यः प्रयोगः, तत्स्वरूपता तथान्यतरस्याधिकरणस्यानित्यत्वादेः साध्यस्य यो निर्णयस्तत्पर्यन्तता । किं च यदि संशये इष्टोऽर्थः पक्ष इत्युच्यते तदा वादे साध्यत्वेनेप्सितस्य पक्षत्वं [685a] न स्यादित्याह—**न चेति ।**

एतेनेति । इष्टग्रहणनिराकरणेन ।

टीयाम् ॥ वृथाक्षरचतुष्टयमिति । साध्यः पक्ष एतावदेवोचितमित्यर्थः ।

वार्त्तिके । परस्येति । नैयायिकस्य ।

अक्षराधिक्येति । तन्निर्देश इत्येतावत्येव सिद्धे साध्यनिर्देश इत्यक्षराधि[कं] वाक्यम् ।

वादविधानटीकायामिति । **वादविधान**स्य **बौद्ध**ग्रन्थभेदस्य टीकायाम् ।

साधयतीति । शब्दस्येति । साध्येत्यत्र प्रयोजकव्यापारे अनन्त[र]स्य साधिधातोर्यः प्रयोगस्तस्येत्यर्थः ।

टीयाम् ॥ **न पुनरिति** । यो वादिनो नियोक्ता प्रयोजकः प्रतिवादी स साधयिता । यश्च वादी स एषितेति न पुनरुक्तं भवति तुमुना । एककर्तृकेष्वेव तुमुनो विधिः ।

प्रयोजके इति । प्रतिवादिनि ।

स्वयंग्रहणेनाप्यप्रतिकार इति । एषितृत्ववत् स्वयंग्रहणस्यापि प्रयोजके सञ्चारयितुं शक्यत्वादित्यर्थः ।

सेद्धुरिति । सिध्यतः ।

तस्यापीति । वादिनः ।

भक्त्येति । गौण्या वृत्त्या ।

उने ॥ **अशक्यत्वासदाचारत्वे** इति । प्रामाणिकं प्रत्यशक्यत्वे । अज्ञं प्रत्यसदाचारत्वम् ।

ननु शास्त्रानपेक्षाभ्युपगमेषु सिद्धान्तसामान्यलक्षणं नास्तीत्युक्तमेव, तथा चैते दृश्यमाना अप्यसिद्धान्ता एवेत्याशङ्क्याह—**न चेति** ।

कथाधिकरणेति । एतेन व्युत्पत्त्या यथा तन्त्रशब्दस्य प्रमाणमर्थ उक्तः, तथा कथाया अप्यर्थो घटत एवेत्युक्तम् ।

यथाभाष्यमेव न्याय इति । यथैव **भाष्यकृता** अभ्युपगमसिद्धान्ते व्याख्यातः तथैव युक्तमित्यर्थः ।

एतेनेति । यस्तावच्छास्त्राविरुद्ध इत्यादिना यच्छास्त्राविरुद्धस्य व्युत्पादनं स शास्त्रोक्तप्रमाणानुषङ्गिणोऽर्थस्याभ्युपगम इत्यर्थपरेण उक्तार्थानुषङ्गिणोऽर्थस्याभ्युपगमोऽभ्युपगमसिद्धान्त इति लक्षणो वार्त्तिककारीयोऽभ्युपगमसिद्धान्तो युक्त इति दर्शितं **टीकाकृता** । तथा च योऽयं शास्त्रानपेक्षोऽभ्युपगमोऽभ्युपगमसिद्धान्ततया अभ्युपगम्यते सतीर्थ्यै**र्भाष्यकारादि**भिः स एतेषु चतुर्षु सिद्धान्तेषु नान्तर्भवतीत्यतस्तेषामयं पञ्चमः सिद्धान्तः प्रसज्यते इति दर्शितमित्यर्थः ॥

परानिति । ये तु चत्वार एव सिद्धान्ता इति नाभ्युपयन्ति तानित्यर्थः ।

परावृत्त्येति । **प्रत्युतनिग्रहे** इति । अपसिद्धान्तोद्भाविनः प्रतिवादिनः ।

तद्व्युत्पादनेति । तस्य सिद्धान्तातिक्रान्तस्याभ्युपगमसिद्धान्तोऽयम् , ममेत्य-भ्युपगतस्य यो व्युत्पादनप्रयासः समर्थनाप्रयासस्तस्याप्यभावात् ।

एवमस्त्विति । मा भूदपसिद्धान्तो निग्रहस्थानमित्यर्थः ।

तद्विरुद्धेति । प्रमाणीकृतशास्त्रविरुद्धः ।

विरोधस्य दुर्वारत्वमेवाह—**शास्त्रेति ।**

तदसमानार्थस्येति । प्रमाणीकृतशास्त्रासमानार्थस्य ।

तथाप्यपसिद्धान्तो न भविष्यतीत्यत आह—**तदन्विति ।** शास्त्रानुगामिनोऽर्थस्य ।

[न्यायाश्रयसिद्धान्तलक्षणप्रकरणं संपूर्णम् ॥]

———

॥ न्यायलक्षणप्रकरणम् ॥

[१.१.३२-९]

उने ॥ अन्यथेति । प्रतिज्ञावयवं विनैव ।

आद्य इति । यदि प्रतिज्ञार्थः कथासु सर्वथा नोपयुज्यते, तदास्तां प्रतिज्ञार्थो वादिनो या अनित्यत्वादिविषया विप्रतिपत्तिः तामपि प्रतिवादी न पर्यालोचयेत् ।

तामिति । विप्रतिपत्तिम् ।

न संप्रतीतिरिति । नार्थविनिर्णयो वादे, न च विजयो जल्पवितण्डयोः ।

विवादाद्वेति । नैयायिकोऽहं शब्दस्यानित्यत्वं प्रतिपादये, **मीमांसक**-स्त्वयं नित्यत्वमित्ययमावयोर्विवाद इत्येवमादेर्विरुद्धवादात् ।

अवयवान्तराद्वेति । [685b] हेत्वादेः ।

विवादो द्विधा, व्यवहितोऽव्यवहितश्च । तत्राव्यवहितं तत्स्वरूपकथनद्वारेणाह—**अवयवान्तरेति ।** अवयवान्तरैर्हेत्वादिभिः सह या एकवाक्यता तामापन्नाद् वा ?

न तावदाद्य इति । व्यवहिताद् विवादात् प्रतिज्ञार्थो लब्ध इत्ययम् ।

एकवाक्यत्वानापत्तेरिति । वाक्यस्यावयवान्तरैः सह ।

आपत्तौ वेति । यदि व्यवहितोऽपि विवादोऽवयवान्तरैः सहैकवाक्यतामासादयेत् तदा ।

आन्तरालिकेति । अर्थान्तराख्यनिग्रहस्थानेन वादी परेण निगृह्येत ।

पर्यनुयोज्योपेक्षणमिति । निग्रहस्थानम् ।

द्वितीये इति । अवान्तरैकवाक्यतापन्नाद् विवादात् प्रतिज्ञार्थो लब्ध इत्यस्मिन् ।

स हीति । योऽवयवान्तरादाक्षेपेण प्रतिज्ञार्थस्य लाभः सः । यदा बोधयितव्याः परे प्रतिज्ञार्थमपेक्षन्ते तदा वा अन्यदा वेत्यर्थः ।

प्रथममिति । अपेक्षाकाले वेत्येवं पक्षम् ।

तथा हीतीति । अनेन हि **टीका**शकलेनापेक्षाकाले प्रतिज्ञार्थस्यावयवान्तरादाक्षेपो नास्त्येतदेव वस्तुत उक्तम् ।

तन्निर्णयहेतुमिति । अनित्यत्वादेर्विवादविषयस्य निर्णयहेतुम् ।

तदनिरूपणे इति । निर्णयानिरूपणे ।

तत्साधनस्येति । निर्णयसाधनस्य ।

तथात्वेनेति । निर्णयसाधनत्वेन ।

तस्यैवेति । निर्णयस्यैव ।

अपेक्षितमिति । समिदाहरणादि ।

अन्यथापीति । भणनं विनापि ।

तदनभिधाने इति । अपेक्षिताभणने ।

तदनादरेत्त्विति । यथाकालं यदपेक्षिताभिधानं तां चेद् वाक्यस्य सामग्रीं नाद्रियते **बौद्धः** तदा ।

प्रतिपाद्येति । प्रतिपाद्यः प्रतिवाद्यादिः ।

तत्रेति । उदाहरणे ।

तथेति । क्रमनियमादरः ।

तत्कालेति । अपेक्षाकाले ।

परस्पराश्रयप्रसङ्ग इति । **टीको**क्तः । **मन्त्रायुर्वेदवच्च तत्प्रामाण्यम्**[1] इति एवंरूप**अक्षपादीयसूत्र**प्रभृतिके इत्यत आह—**न चेतीति**। **अक्षपादो** हि प्रमाणीकृतो विद्यते । अतस्तद्वचसि संबन्धाय प्रतीक्षासंभवात् प्रतिज्ञामनभिधायापि उदाहरणाद्युपादानमस्तु । वादी तु न केनापि प्रमाणीकृतः । ततस्तद्वचनसंबन्धप्रतीक्षाया असंभवान्न प्रतिज्ञामनभिधायैव हेत्वाद्युपादानं तस्योचितमिति भावः ।

तस्यामिति । अर्थक्रियायाम् ।

ताविति । प्रतिज्ञाहेतू ।

---

1 cf. Ns II. i. 68

तदिति । मानं तु द्विविधमित्यादि ।

तत्रेति । शास्त्रे ।

द्वितीये त्विति । यदि तु शास्त्रे प्रतिज्ञादेः किंचित् प्रयोजनमस्तीत्युच्यते, तदा अवश्यमर्थाधिगतिरेव, शब्दोच्चारणस्यैतावन्मात्रप्रयोजनत्वात् ॥

अथार्थाक्षिप्तस्य प्रतिज्ञाद्यर्थस्य विवरणमेव प्रयोजनं शास्त्रे प्रतिज्ञाद्युपादानस्य भविष्यतीत्याशङ्क्याह—**प्रथमेति ।** न हि यत् प्रथममेवोपक्रम्यते तद्विवरणं न स्यात् ।

टीयाम् ॥ तस्येति । वचनरूपस्य हेतोर्लक्ष्यस्य ।

पारार्थ्यापन्नमिति । साध्यरूपस्य परस्याङ्गतामापन्नम् ।

तस्येति । कृतकत्वादिकस्यार्थस्य ।

विषयीति । विषयः कृतकत्वादिकोऽर्थः तस्य विषयि ।

उने ॥ ननु साधकशब्दस्य वचने वाचकवृत्तौ घटमानायां किं लाक्षणिकवृत्त्याश्रयणेनेत्याह—**नन्वलमिति ।**

तदेतदिति । विरोधातिव्याप्तिलक्षणम् ।

अर्थान्तराविवक्षायामिति । साधनस्य वचनलक्षणादर्थादन्यस्यार्थस्याविवक्षायाम् ।

यदा त्वर्थान्तरं [686a] विवक्ष्यते साधनपदस्य तदा दूषणान्तरं स्यादित्याह—**यदि त्विति ।**

अश्रुतेति । लिङ्गं ह्यत्राश्रुतमेव । उदाहरणसाधर्म्यसंहितं साध्यसाधननिश्चायकवचनमिति यदि हेतोः सामान्यलक्षणं तदा अव्यापकम्, उदाहरणसाधर्म्याभावेन व्यतिरेकिणोऽसंग्रहात् ।

नन्वनेन **सूत्रे**णान्वय्यन्वयव्यतिरेकिणोः संग्रहः । वक्ष्यमाणेन तथा वैधर्म्यात् [१.१.३५] इत्यनेन तु व्यतिरेकिणः संग्रहो भविष्यति । तत्राह—**अलाभो वेति ।** एवं ह्येतदपि **सूत्रं** विशेषलक्षणपरमेवाभूद् वक्ष्यमाणं चेति भावः ।

एवं च व्याख्याने इति । साधनशब्दस्य वचनार्थत्वव्याख्याने ।

साधनत्वविशिष्टार्थेति । साधनत्वविशिष्टोऽर्थो धूमादि साधनम् ।

तथाभूतमिति । साधनत्वविशिष्टार्थम् ।

किंभूतमिति । साधनम् ।

तावन्मात्रेति । प्रातिपदिकार्थमात्रम् ।

भवतु तावदेतदिति । साध्यव्याप्तं साधनं भवत्वित्यर्थः ।

सा चेति । अपेक्षा ।

वचनलक्षणायामिति । साध्यसाधनपदस्य लक्षणया साध्यनिश्चायकवचनपरत्वे इत्यर्थः ।

ज्ञानेऽर्थे वेति । लिङ्गज्ञाने लिङ्गे वा ।

इत्यादाविति । इत्यादि स्वरूपे ।

एतस्यापीति । साध्यसाधनमित्यादेर्वचनस्यापि ।

तथाभूतार्थेति । साधनत्वविशिष्टवस्तु ।

टीयाम् । **इदं चेति** । सामान्यलक्षणम् ।

प्रकरणादिति । श्रौतविशेषलक्षणप्रस्तावात् ।

अन्वयपक्षधर्मत्वे इति । केवलान्वयिनः ।

अन्वयव्यतिरेकपक्षधर्मत्वानीति । अन्वयव्यतिरेकिणः ।

तद्विपरीतस्येति । बाधितस्य सत्प्रतिपक्षस्य ।

ननूदाहरणं दृष्टान्तवचनम्, तत्र तथाभूतो धर्मो धूमादिः संभवत्येव न । तत् कथमुक्तं तथाभूत एवोदाहरणेऽपीत्यत आह—**उदाह्रियत इतीति** ।

सा हीति । समानता हि । तच्चा ऐक्यमतोऽन्यत्वविरोधिनी ।

तानेवेति । तत्तुल्यानित्यर्थः ।

तेषामपीति । विरुद्धासाधारणानैकान्तिकलिङ्गानामपि ।

यथास्वं साधारणत्वादिति । शब्दो नित्यः कृतकत्वाद् घटवदित्यादौ विरुद्धगामिनः कृतकत्वादेर्विपक्षेण शब्दो नित्यः श्रावणत्वादित्यादावसाधारणस्य पक्षस्थानां

सर्वशब्दानां मिथ एव । शब्दो नित्यः प्रमेयत्वादित्यादौ व्यभिचारिणः सपक्षेण विपक्षेण च साध्यधर्मिणि समानत्वादित्यर्थः ॥

उने । येनेहेति । साधर्म्यं प्रागेव हेतुलक्षणत्वेन विहितमिति हेतुनेह **सूत्रे** सविशेषणतयोदाहरणविशेषणान्वितस्य साधर्म्यस्य विशेषणमात्रोपसंक्रान्तः केवलोदाहरणसंक्रान्तो विधिः स्यात् ।

अत्रेति । **सूत्रे** ।

तावन्मात्रगोचर इति । साधर्म्यमात्रविषयः ।

ननु परस्परस्वतन्त्रयोरुदाहरणसाधर्म्ययोर्द्वयोरपि विधिरत्र भविष्यति, ततोऽपि विशिष्टविधानं न घटिष्यते इत्याशङ्क्याह—**परस्परेति** । यदि ह्यत्रोदाहरणसाधर्म्यपदे परस्परस्वातन्त्रं मिथो विशेषणविशेष्यभावरहितं यदुभयमुदाहरणसाधर्म्यरूपं तदर्थे स्यातां तदा वाक्यद्वयं स्यान्न चैतदस्तीत्यर्थः ।

लोहितोष्णीषवदिति । यथा लोहितोष्णीषा ऋत्विजः संचरन्ति इत्युक्ते लोहितोष्णीषविशिष्टानां विधिः ।

न लोहितोष्णीषवदिति । यथा अलोहितोष्णीषाणामर्थसिद्धो निषेधः ।

अभ्युपगम्यापीति । यद् वोदाहरणसाधर्म्यादिति विशिष्टविधानं मा भूदित्येवम् ।

[686b] न चेदिति प्रकृतसिद्धिः ।

अविशिष्टविधानेनेति । साधर्म्यमात्रविधानेन ।

तदुदाहरणेति । साध्यैकदेशासिद्धा ।

वार्त्तिके । न पुनः साध्यस्यैवेति । यदि हि साध्यस्यैवेत्यनेनावधारणेनोदाहरणं व्यवच्छिद्यते तदोदाहरणेनैव साधर्म्यमिति विरुध्येत । अथ विपक्षे व्यवच्छिद्यते साधारणानैकान्तिकपरिहारार्थं तदा तस्योदाहरणेनैव साधर्म्यमित्यवधारणेनैव व्यवच्छिन्नत्वात् नैरर्थक्यमेवास्यावधारणस्य स्यादिति भावः ।

अस्येति । हेतोः ।

साध्यव्यापकत्वमिति। साध्यस्योदाहरणेन साधर्म्यमेव, न पुनः कुत्रापि प्रदेशेऽसाधर्म्यमपीति नियमेन ज्ञापितम्।

उदाहरणे च संभव इति। उदाहरणेनैव साध्यस्य साधर्म्यं न पुनरनुदाहरणेनापीति नियमेन ज्ञापितः॥

टीयाम्॥ भदन्तो दूषयांबभूवेति।

साधनं यदि साधर्म्यं न वाक्यांशो न पञ्चमी।
वाक्यं चेत् तद्विशेष्यं स्यात्साधनत्वादसंभवः॥
न तत्रापि द्विधादोषात् प्रकृतत्वेऽन्यसंभवः।
स्वलक्षणेन बाधा चेन्न विकल्पादिसंभवात्॥
तस्मात् षष्ठ्यस्तु तत्रापि विशेषणमनर्थकम्॥

इति सार्धेनार्याद्वयेन **दिङ्नागो** दूषयामास। तदेवाह—**साधनं यदीति**। साधनं यदि किमुच्यते साधर्म्यं साधर्म्यलक्षणोऽर्थः, तदेदं वाक्यस्यावयवो न स्यात्।

दूषणान्तरमाह—**न पञ्चमीति**।

सामान्यविशेषभावेनेति। साध्यसाधनं सामान्यं तद्विशेषः साधर्म्यं तयोर्भावेन।

साधनसामान्याधिकरण्येति। साध्यसाधनं किम्? उदाहरणसाधर्म्यमित्येवम्।

आचार्यमाशङ्कते—**वाक्यं चेदिति**। साधनं न साधर्म्यार्थरूपम्। किं तर्हि वचनरूपमिति यदि।

भदन्त आह—**तद्विशेष्यं स्यादिति**। तत्साध्यसाधनं वचनादिना विशेष्यं प्राप्नोति।

आचार्य आह—**न विशेष्यमिति**।

भदन्त आह—**न तत्रापीति**। तत्रापि साधनत्वेऽपि।

आचार्यमाशङ्क्य निरस्यति **भदन्तः प्रकृतत्वेऽन्यसंभव** इति।

आचार्यमाशङ्क्य निराचष्टे–**स्वलक्षणेति**। उपनयस्यात्मीयलक्षणेन।

विकल्पादीति। पक्षे उपनयस्य हेतुत्वं स्यात्। आदिपदादतिव्याप्तिः, उपनयस्यापि हेतुत्वप्रसञ्जनात्।

तस्मादिति। साध्यसाधनस्योदाहरणसाधर्म्यसंबन्धिवचनत्वाङ्गीकरणात्। साध्यसाधनस्य वचनत्वाङ्गीकारे उदाहरणसाधर्म्यस्येति षष्ठीप्राप्तिरूपं दूषणमुक्तम्।

अथ दूषणान्तरमाह—**तत्रापीति**। न केवलं साधनसाधर्म्ययोरत्यन्ताभेदे विशेषणमनर्थकं यावता तत्रापि साधनस्य वचनत्वाङ्गीकारेऽपि उदाहरणसाधर्म्येति विशेषणमनर्थकं वचनस्याप्रकारवत्त्वेन व्यभिचार्यव्यभिचारित्वाभावाद् विशेषणयोगाभावात्।

साधर्म्यस्य हेतुरितीति। उदाहरणसाधर्म्यस्य साध्यसाधनं हेतुरित्येतावन्मात्रं वक्तव्यमित्यर्थः।

साधनं सामान्यमुच्यते इति। साध्यसाधनमर्थो हेतुः। किं पुनः साध्यसाधनम्? उदाहरणसाधर्म्यमित्येवं यदि सामान्यविशेषभावेनोच्यते इत्यर्थः।

तस्येति। सामान्यस्य।

कल्पनामात्रत्वादिति। अवस्तुत्वात्।

ननु सामान्येन कल्पितेनापि सह विशेषस्य भेदे पञ्चम्या उपपत्तौ कथमस्या अपदेशोऽनर्थक इत्यत आह—**भेदस्येति**।

तदेतदिति। दूषणम्॥

वार्त्तिके॥ तत्र त्विति। हेतुलक्षणे।

[687a] **तेनैवेति**। अस्मत्कृतहेतुलक्षणव्याख्यानेनैव॥

व्याचक्षाणेनेति। मया।

टीयाम्॥ हेतुपदे इति। हेतुरूपे वचने।

यथाहुरिति। शब्दमूर्त्तत्ववादिनः॥

वार्त्तिके॥ विपक्षाद् विशेष इति। शशविषाणादेर्व्यावृत्तिः।

अर्थान्तरवाचकत्वं कुत इति । अर्थान्तरस्यैवानभ्युपगतत्वात् ॥

उने ॥ विशेषतो ज्ञात्वेति हेत्वाभासात् ।

तेषामिति । हेत्वाभासानाम् ।

लक्षणमिति । उदाहरणसाधर्म्यादित्यादि ॥

टीयाम् ॥ तद्योगो वेति । विनाशयोगः ।

स्वाभिप्रायेणेति । स्वतो विनाशो वेत्याद्युक्ताभिप्रायवान् **परः** ।

अपरान्तेति वक्तव्ये इति । अनित्यत्वलक्षणेऽपरान्तेत्यस्यैवोपयुक्तत्वात् ।

उभयग्रहणेन पूर्वान्तनिवेशनमित्यादि पूर्वान्तविच्छिन्नवस्तुसत्तासंबन्धः । सत्ता वा तद्विशेषणोत्पत्तिरित्युत्पत्तिलक्षणमुभयग्रहणेन पूर्वान्तनिवेशनं कुर्वता **वार्त्तिककृता** यदनित्यत्वलक्षणे ज्ञापितं तदुत्पत्तिमत्त्वस्यानित्यत्वेन सहात्यन्तिकीं प्रत्यासत्तिं दर्शयितुम् ।

नन्वेषापि किमिति दर्श्यते इत्यत आह—**यतोऽविनाभावोपयोगिनीमवच्छेदकत्वमिति** । परिच्छेदकत्वपर्यायोऽयम् ।

तद्विधयोरिति । अपरान्तपरिच्छिन्नयोः ।

उने ॥ तथापीति । यद्यप्यपरान्तोपलक्षितवस्तुसत्तासंबन्धः सत्ता वा अपरान्तोपलक्षिता अनित्यत्वमित्यनित्यत्वलक्षणमुक्तं तथापीत्यर्थः ।

जात्यादेरिति । आदिपदादुपाध्यादेर्ग्रहः ।

व्याप्त्यादीति । आदिपदात् दृष्टान्तसाध्यविकलत्वाभावादिः ।

ननु प्रध्वंसोपलक्षिता या सत्ता तथाविधो यः सत्तासंबन्धो वा तयोः पिठरे शब्दे चाभिन्नत्वाद् व्याप्त्यादिसिद्धिर्भविष्यतीत्याशङ्क्याह—**उपलक्ष्येति** । उपलक्ष्येत्यनेनापरान्तोपलक्ष्या सत्ता तथाविधः सत्तासंबन्धो वोच्यते ।

तत्सिद्धाविति । व्याप्त्यादिसिद्धौ ।

एकव्यवहारेति । अभावरूपे ।

तद्विशेषस्येति । अभावविशेषस्य ।

पूर्वेत्यादि । पूर्वो योऽभावः तत्प्रतियोगितया सर्वप्रध्वंसेषु तथा अपरः पश्चाद्भावी योऽभावः तत्प्रतियोगितया सर्वप्रागभावेषु । तथेतरे येऽभावाः तत्प्रतियोगितया सर्वेतराभावेषु । तथा आश्रयान्तरे गवादेराश्रयादन्यस्मिन् आश्रये शशादौ योऽभावः, कोऽर्थः शशाद्याधारतोपलक्षितः शृङ्गादिः तत्प्रतियोगितया सर्वात्यन्ताभावेषु एकः प्रध्वंसादिव्यवहार इत्यर्थः ।

टीयाम् ॥ तदापीति । उत्पन्नकालेऽपि ।

उक्ताभिप्रायवानिति । न तावदुत्पन्नस्योत्पत्तिरित्याद्यभिप्रायवान् ।

तच्चेति । उपलक्षकत्वम् ।

भिन्नकालस्येति । प्रागभावस्य ।

पूर्वान्तेति । पूर्वान्तः प्रागभावः ।

तद्विशेषेणेति । प्रागभावविशेषेण ।

ईदृश इति । प्रागभावोपलक्षितः सन् ।

स्वरूपमुक्तमिति । अत्यन्तमभावप्रतिषेध इत्यनेन ।

ननु यद्यसद्विशेषणस्य सतः सत्ता तत्संबन्धो वेत्येतावदेवोत्पत्तेर्लक्षणमत्यन्ताभाव-प्रतिषेध इति तु स्वरूपोपलक्षणम् । तर्हि कथमस्योत्पत्त्या सह सामानाधिकरण्यम् । न हि जटाभिः सह तापसस्य सामानाधिकरण्यं स्यात् । तत्राह—**उपलक्ष्येति ।** उपलक्ष्यो-त्पत्तिरुपलक्षणमत्यन्ताभावप्रतिषेधः ॥

उने ॥ भावनेति । भाव्यनिष्ठो भावकव्यापारो भावना ।

कारकैरिति । मृच्चक्रचीवरादिभिः ।

तथेति । कारकत्वेन कारकाणामेवेति । कारकाणि मृच्चक्रचीवरादीन्येव कार्य-शब्दैर्घटादिभिर्व्यपदिश्यन्ते इत्यर्थः ।

उभयथापीति । कारकोपचारे कार्यशब्दोपचारे वा ।

टीयाम् ॥ यदा विषाणित्वेन साध्यते इति । सकलकेसरादिमन्तः पदार्था अश्वा विषाणित्वादित्येवम् ।

तस्येति । [687b] विषाणित्वस्य ।

अस्ति पक्षवैधर्म्यमिति । न हि केसरादिमत्पदार्थेषु पक्षीकृतेषु कुत्रापि विषाणित्वमस्ति ।

तथापीति । यद्यपि तथाग्रहणेनोदाहरणं संगृह्य पक्षवैधर्म्यो हेतुत्वेन निरस्तः, तथापीत्यर्थः ।

तस्येति । प्राणादिमत्त्वस्य ।

उदाहरणेति । घटादिना विपक्षेण ।

सोऽपीति । शवशरीरेण पक्षैकदेशेन वैधर्म्यवानपि ।

प्राणादिमत्त्वादिरेवेतीति । उदाहरणेन वैधर्म्यमित्येतयोरन्तरस्थम् ।

न चैतावतेति । उदाहरणेनैव विपक्षेणैव वैधर्म्यम्, न तु सपक्षेण इत्यवधारणेन सपक्षे हेतोः सत्त्वप्रसङ्गो न चेत्यर्थः ।

ननु तर्ह्यस्यावधारणस्य निष्फलत्वेनाघटमानत्वमेवेत्याशङ्क्याह––**अवधारणस्य चेति** । उपपत्तेरित्यनेन योगः ॥

उने ॥ पाक्षिकं तु प्रसक्तमेवेति । यत्रान्वयव्यतिरेकिणि सपक्षे सत्त्वं संभवति, तत्र प्रसक्तमेवेत्यर्थः ।

केवलव्यतिरेकिलाभेऽपीति । वैधर्म्यहेतुत्वेन ।

तदवस्थैव प्रसक्तिरिति । वैधर्म्यहेतुत्वस्य ॥

टीयाम् ॥ संग्रहः स्यादिति । उत्पत्तिधर्मकत्वं हि विपक्षादेव नित्यत्वाद् व्यावृत्तम् । पक्षे तु शब्देऽस्त्येव । तथा अमूर्तत्वं यद्यपि विपक्षैकदेशान्नित्यात् परमाण्वादेर्व्यावृत्तं न त्वाकाशादेः, तथापि तावद्विपक्षादेव व्यावृत्तं पक्षे शब्दे त्वस्त्येवेत्यत उदाहरणेनैव वैधर्म्यमित्यवधारणेन पक्षव्याप्तिपरेणानयोर्वैधर्म्यहेतुत्वे संग्रहः स्यादिति भावः ॥

उने ॥ सपक्षाभावप्रदर्शनौदासीन्यमिति । सपक्षाभावः प्रदर्श्यतां मा वेत्यौदासीन्यम् ।

इत्यसङ्कीर्णं द्रष्टव्यमिति । अनित्यः शब्दोऽमूर्त्तत्वात्, यथा कर्मेत्यत्र न सपक्षाभावो मांसादिमयत्वादित्यत्र त्वस्ति तथा मृतशरीरघटयोर्भावाभावाभ्यां मांसादिमयत्वं विपक्षैकदेशव्यापीत्यत इदमसंकीर्णं सपक्षाभावात्। साधर्म्यहेतुलक्षणस्योदाहरणेनैवेत्यवधारणेन व्यावर्तनीयतया मिश्र[?]मुदाहरणं दृश्यममूर्त्तत्वादित्यस्य साधर्म्यहेतुलक्षणेनैव व्यावर्त्त्यत्वा-दित्यर्थः ।

एतद्द्वयमिति । अन्वयव्यतिरेकिणं विपक्षैकदेशवृत्तिं च ।

पूर्वावधारणेनेति । उदाहरणेनैवेत्यनेन ।

उभयोरिति । अन्वयव्यतिरेकिणो विपक्षैकदेशवृत्तेश्च ।

असाधारणः प्रसज्यते इति । वैधर्म्यहेतुत्वेन, असाधारणस्य पक्षेतरवैधर्म्य-रूपत्वात् ।

स चेति । असाधारणः ।

विपक्षोदाहरणेनेत्यादि । उदाहरणेनेत्येतद्विपक्षेत्यनेन कृत्वा विशेषयता **टीकाकृता** वैधर्म्यहेतौ सपक्षो नास्तीति दर्शितम् । तथा च सति सपक्षे सति विपक्षे पक्षमात्रवृत्तिरसाधारणो निरस्तः ।

सपक्षाभावप्रदर्शनमेव स्फुटयति—**यदि हीति** ।

अन्वयो विवक्षित इति । तथा च वैधर्म्यादित्यत्र ।

पूर्वलक्षणेनैवेति । साधर्म्यहेतुलक्षणेनैव ।

व्यतिरेकश्चेद्विवक्षित इति । सति सपक्षे सपक्षाद् विपक्षाच्च व्यतिरेको यदि विवक्षितः, तदा **टीकायां** विपक्षेणेति व्यर्थम् ।

तथापीति । वैधर्म्यविधितयोपात्तेन विपक्षपदेन वैधर्म्यहेतौ सपक्षो नास्तीति ज्ञाप्यतां **टीकाकृता** परम् ।

टीयाम् ॥ **निगदेनेति** । तदक्षरेण ।

उने ॥ **अवधारितकार्यस्वभाव** इति । अवधारितं कार्यं प्राणादि यस्य सोऽवधारित-कार्यः, स एव स्वभावो यस्य स तथा ।

अतिप्रसङ्गादिति वक्ष्यतीति । सर्वात्मकत्वप्रसङ्ग इति चेदित्यादि **वार्त्तिकेन ।**

तथाभूतश्चेति । अवधारितकार्यस्वभावः। प्राणादिकार्यं प्रयत्नस्यैवावधारित-मित्यर्थः ।

तस्मिंश्चेति । प्रयत्ने च ।

सपक्षान्वयस्यापि संभवादिति । जीवच्छरीरं प्रयत्नवत्प्राणादिमत्त्वा-न्मच्छरीर[68Sa]वदित्येवम् ।

तथापीति । यद्यपि लक्षणया प्राणादिनेच्छाद्युच्यते, तथापि ।

किमित्यवाचकं प्रयोक्ष्यामहे इति । वाचकमेव इच्छादिमत्त्वादित्येतत्प्र-योक्ष्यामहे इत्यर्थः ।

आहेति । यन्निरात्मकमिति **वार्त्तिक**वाक्यं व्याख्यातवान् **टीकाकारः ।**

परशरीरे इत्यादि । यदा हि सर्वं जीवच्छरीरं न निरात्मकमिच्छादिमत्त्वादित्येवं साध्यते तदा परशरीरमपि पक्षप्रविष्टं तत्रेच्छादयश्च नित्यपरोक्षाः ततश्च यदा परः परशरीरा-व्यापकत्वादिच्छादिमत्त्वादित्येवं हेतुः पक्षैकदेशासिद्ध इत्यसिद्धिमुद्भावयेत्, तदा परशरीर-मिच्छादिमत्प्राणादिमत्त्वान्मच्छरीरवदित्येवं प्राणादिना कार्येणेच्छादेः कारणस्य सिद्ध्यर्थं तथा यदा जीवच्छरीरं न निरात्मकमिच्छादिमत्त्वात्, यत्पुनर्निरात्मकं तन्नेच्छादिमत् यथा घट इत्येवं घटादिर्व्यतिरेकदृष्टान्तो दीयते तदा यदि परो ब्रूयाद् घटादौ नैरात्म्यमस्तीच्छादिमत्त्वाभावस्तु न भविष्यतीत्यतो नायं व्यतिरेकदृष्टान्त इति तदा घटादिर्नेच्छादिमान् प्राणादिमत्त्वात् । यत् पुनरिच्छादिमत् तत् प्राणादिमद् यथा मच्छरीरमित्येवं प्राणादेः कार्यस्य सर्वदाप्यभावेनेच्छा-दिहेतोः कारणस्य घटादौ व्यतिरेकसिद्ध्यर्थम् । तथोक्तं प्राणादिना स्वकारणं प्रयत्नेच्छा-दिलक्षणयोक्तम्, न तु वाचकमेव प्रयत्नेच्छाद्युक्तमिति भावः ।

तद्वत्त्वमिति । इच्छादिसमवायिकारणवत्त्वम् ।

तावन्मात्रस्येति । इच्छादिसमवायिकारणवन्मात्रस्य ।

अन्वयेनैव सिद्धेरिति । जीवच्छरीरमित्यादि समवायिकारणवत् इच्छादिरूप-कार्यवत्त्वात् । यद् यत् कार्यवत् तत्तत् समवायिकारणवत् यथा घटकार्यवान् प्रदेशः तत्कारण-पृथिव्यादिमानित्येवम् ।

तत्कारणमात्रमिति । इच्छादिकारणमात्रम् ।

अनेनेति । द्रव्याष्टकासमवेतेच्छादिकार्यवत्त्वादित्यनेन व्यतिरेकहेतुना ।

टीयाम् ॥ तद्विवेकस्येति । ताभ्यां केवलान्वयि[केवल]व्यतिरेकिभ्यां सकाशाद् विवेकः पृथक्त्वं यस्य तस्य । अन्वयव्यतिरेकिण इत्यर्थः ।

तन्त्रान्तरसिद्धेनेति । सांख्यमतप्रसिद्धेन ।

तन्त्रान्तरप्रसिद्धतामिति । अन्वयी व्यतिरेकी अन्वयव्यतिरेकी च ।

एते त्रयो हेतवो दर्शनान्तरेऽपि प्रसिद्धा इति दर्शयति—**वीत** इति । अन्वयी अन्वयव्यतिरेकी च ।

तस्येति । साध्यस्य ।

उने ॥ तदभावादिति । संशयाभावात् ।

वार्त्तिके ॥ व्यावृत्तिरशक्येति । घटे ॥

उने ॥ प्रकृतव्यतिरेकिगतिरिति । प्रकृतव्यतिरेकिण इच्छादिमत्त्वस्य गतिः ।

तानिति । इच्छादीन् ।

तेऽपीति । इच्छादयोऽपि ।

किं चात इति । यदीच्छादयोऽप्यनित्याः, ततः किम् ?

हेतोरिति । तदनाश्रितत्वे सति कार्यत्वादित्यस्य ।

विशेषणासिद्धिमिति । तदनाश्रितत्वे सतीत्यस्य विशेषणस्यासिद्धिम् ।

शरीरेन्द्रियेति । व्यतिरेक्यनुमानमिदम् । तेन शरीरादिषु अन्यतमस्मिन् ये समवयन्ति न ते न मानसैकप्रत्यक्षा यथा शरीरादिसमवेता रूपादीन्द्रियत्वादिमनस्त्वादयः । रूपादि हि बाह्येन्द्रियग्राह्यम् । अपि इन्द्रियत्वादिमनस्त्वादिनी त्वनुमेये ।

निश्चोद्य इति । अनुमानलक्षणे महाप्रबन्धेन द्रढितत्वात् चोदनानर्हः ।

एष इति । कार्यत्वलक्षणः ।

तदीयेति । तस्येच्छादिमत्त्वस्य यः साध्यो जीवच्छरीरे नैरात्म्याभावः [688b] तस्य पक्षविशेषणस्याप्रसिद्धतां तथा संशयानुपपत्तिं साध्यस्य सर्वथानुपलब्धचरत्वेन प्राप्ता-मित्यर्थः ।

साधारणन्यायेनेति । उभयोरपि व्यतिरेकगत्योस्तुल्ययैव रीत्या ।

एतच्चेति । अप्रसिद्धविशेषणत्वादिनिराकरणम् ।

तत्रैवेति । अनुमानलक्षणे एव ।

अर्थगतिं परिशोध्येति । दूषणोद्धारेण हेतोः ।

वार्त्तिकं योजयित्वेति । यदि च डित्थादयोऽपीत्यादिना ॥

टीयाम् ॥ **तादृश** इति । इच्छादीनां समवायिकारणम् ।

नैरात्म्यवादिन इति । **बौद्धा नास्तिकाश्च** ।

तदिति । बुद्धिरूपं भूतपरिणामभेदरूपं चेच्छादिकारणम् ॥

उने ॥ **किं खण्डितमिति** । किं रूपं विनाशितम् ?

अयमिति । केवलव्यतिरेकी ।

तस्मिन् संभवत्येवेति । अन्वयिनः संभवमात्रे एवेत्यर्थः ।

तेनैव विपर्ययस्यापि वक्तुं सुकरत्वादिति । केवलव्यतिरेकिणैवान्व-यिनः किञ्चित् खण्डितमित्येवम् ।

सिद्धिमार्ग इति । साध्यसिद्ध्युपायः ।

तस्येति । सिद्धिमार्गस्य ।

अपरिवर्त एवेति । अन्वयो हि अभ्रमणरूप ऋजुः, व्यतिरेकस्तु परिभ्रमण-रूपो वक्र इति भावः ।

नन्वन्वयिनः कारणमात्रस्य सिद्धिर्भवतु पक्षधर्मताबलेन कारणविशेषस्य सिद्धिर्भ-विष्यति, तत्राह—**उक्तमिति** ।

अत्रेति । शास्त्रे ।

तद्गोचर इति। पक्षधर्मतागोचरः।

तेषामिति। इच्छादीनाम्।

तद्वत्तेति। समवायिकारणवत्ता।

यथेत्यादि। यथा तेषां द्व्यणुकादीनां कार्याणां परिदृष्टं परिज्ञातं सामर्थ्यं येषां तानि परिदृष्टसामर्थ्यानि यानि कारकाणि परमाण्वादीनि तेषां प्रयोक्तृलक्षणो व्यापारयितृ-स्वरूपो यः कर्ता तत्पूर्वं शब्दोपात्तं प्रत्येतुं न शक्यते तथा विरुध्यते इति संबन्धः। किं कृत्वा? द्व्यणुकादिकारणज्ञानं द्व्यणुकादीनां यानि कारणानि परमाण्वादीनि तेषां ज्ञानं कस्यचिदप्रतीत्येति संबन्धः। व्यतिरेकिदृष्टान्तोऽयम्।

अन्वयिन एव सिध्यतीति। शरीरेन्द्रियाणीत्यादिना वक्ष्यमाणात्।

तदभावे इति। तदतिरिक्ताश्रितत्वसिध्यभावे।

अनयोरिति। आश्रितत्वं द्रव्याष्टकाश्रितत्वनिषेधसाधकयोरनुमानयोः।

स चार्थ इति। विषयविशेषव्यवस्थापनेनाश्रितत्वद्रव्याष्टकाश्रितत्वनिषेधसाधका-नुमानयोरविरोधापादनलक्षणः।

ननु इच्छादि पृथ्वीतराश्रितम्, तदनाश्रितत्वे सति आश्रितत्वात् स्नेहवत्। एवमिच्छादि जलादीतराश्रितं तदनाश्रितत्वे सत्याश्रितत्वाद् गन्धवत्। एवं तेज आदीतरा-श्रितत्वं साध्यं यावद् द्रव्याष्टकेतराश्रितत्वसिद्धिः। ततश्चास्त्येवेवं सोऽर्थोऽन्वयः, तत्राह—**वक्रोक्तीति।**

विशेषणेति। द्रव्याष्टकानाश्रितत्वे सतीत्यस्य विशेषणस्य विपर्ययेण प्रयोग इति।

प्रसङ्गो हि विपर्ययफल इति। यदि हि पृथिव्यादिसमवायिकारणा भवेयुरि-त्यस्य विपर्ययेण पृथिव्यादिष्विच्छादीनामभावरूपेण नैरात्म्यवादिनामपि शरीरेन्द्रियरूपेष्वेव पृथिव्यादिषु इच्छादिसमवायिकारणत्वं संगतमिति तेष्वेवेच्छादिसमवायिकारणत्वनिषेधार्थमनु-मानयति—**शरीरेति।** अत्र चेच्छादयो न दिक्कालमनःसमवेता विशेषगुणत्वाद् रूपादि-वदित्यप्यनुमानं ज्ञेयम्।

युक्तमेतदिति। यदष्टद्रव्यातिरिक्तेच्छादिसमवायिकारणवत्ता[689a] शरीरस्य सिध्यतीति।

निरात्मकमितीति । प्रतिज्ञेति संबन्धः ।

टीयाम् ॥ **व्यापिकामिति** । द्रव्याष्टकातिरिक्तकारणाभावस्य ।

उने ॥ **तदसमवेतेति** । द्रव्याष्टकासमवेतम् ।

तथाभूतेति । इच्छादिसमवायिकारणभूतम् ।

परिणतिभेदेति । कायाकारपरिणतिः ।

अस्येति । इच्छादिमत्त्वादेः व्यतिरेकिणः ।

उपेयमिति । साध्यम् ।

अस्येति । व्यतिरेकिणः ।

उपायमिति । साधकम् ।

ननु यदि वस्तुनः साध्यधर्मवानेव धर्मी सपक्षः, तर्हि पक्षोऽपि सपक्षतया किमिति न व्यवह्रियते तस्यापि साध्यधर्मवद्धर्मित्वात्, तत्राह— **स चेति** । स च साध्यधर्मवान् धर्मी परं केवलं साध्यधर्मवत्तया ज्ञातः संस्तथा सपक्षतया व्यवह्रियते सपक्षलक्षणज्ञैः पक्षोऽपि सपक्षतया व्यवह्रियते इत्यर्थः ।

तदन्वित इति । सपक्षान्वितः ।

नन्वेवं यदि तर्हि व्यतिरेकी हेतुः किमित्यन्वयव्यतिरेकित्वेन न व्यवह्रियते **तत्राहाज्ञैस्त्विति** । सपक्षलक्षणमजानानैस्तु व्यतिरेकी अन्वयव्यतिरेकितया न व्यवह्रियते इति हेतोरेतद्व्यतिरेकिसाधनमन्यदन्वयव्यतिरेकिणो भिन्नम् । वस्तुतस्तु व्यतिरेकिसाधनमप्यन्वयव्यतिरेकिसाधनमेवेत्येतदाशङ्कते इत्यर्थः ।

चिन्त्यते इति । विचार्यते ।

अस्येति । इच्छादिमत्त्वादेः ।

सपक्षव्यतिरेकाप्रतिषेध इति । सपक्षाद् व्यतिरेक इत्यर्थः ।

तत्प्रतिषेध इति । सपक्षव्यतिरेकप्रतिषेधः ।

तत्प्रतिषेधेऽपीति । सपक्षव्यतिरेकप्रतिषेधेऽपि ।

तावन्मात्रमेवेति । व्यतिरेकनिषेधमात्रमेव ।

तद्ग्रन्थमिति । परोक्तं श्लोकम् ।

टीयाम् ॥ सत्स्विति । भावरूपेषु यन्नैरात्म्यमभावरूपं तेनापि सपक्षाभावो व्यपदेष्टुं न शक्य:, तुच्छत्वात् । यस्तु नैरात्म्यनिषेधो भावरूप:, तेनास्य व्यपदेशे का वार्तेत्यर्थः ।

उने ॥ विपक्षे हि सतीति । घटादौ ।

सत एव कस्यचिदिति । इच्छादिमत्त्वादेः ।

प्रतीत इत्यस्यायमर्थः प्रमाणेन प्रत्यक्षादिना प्रतीत इतीति ।

व्यतिरेकस्येति । इच्छादिमत्त्वादेः सतो व्यावृत्तेः ।

पक्षेऽपि सत्येवेति । जीवच्छरीरादौ ।

प्रमाणेनेति । प्रत्यक्षादिना ।

इति युक्तेति इति कारणात् पक्षे विधिसिद्धिरिच्छादिमत्त्वादिसिद्धिर्युक्ता । कीदृशी ? निषेधलक्षणा इच्छादिमत्त्वादिव्यतिरेकनिषेधरूपा । ततश्च नैरात्म्यनिषेधलक्षणा विधिसिद्धिरात्मसिद्धिरपि युक्तेति भावः ।

तन्निषेधा इति । अन्वयव्यतिरेकनिषेधाः ।

तथापीति । यद्यपि अवस्तुनि पारमार्थिकविधिनिषेधाभ्युपगमेन सपक्षाव्यतिरेकी चेदित्यादि निराकृतं तथापि एतदवस्तुभूतसपक्षविषयविधिनिषेधप्रतिषेधवचनं स्ववचनेनावस्तुनि पारमार्थिकविधिनिषेधौ न स्त इत्यनेनैवावस्तुविषयविधिनिषेधप्रतिषेधप्रतिपादनपरेण यो विरोधस्तेन प्रतिहतम् ।

टीयाम् ॥ तमिति । सूत्रार्थम् ।

वार्त्तिके ॥ तथा वैधर्म्यादिति । सूत्रपाठोऽयम् । अस्य च **सूत्र**स्यार्थः प्रथमो वैधर्म्यमुदाहरणेनैवेत्ययम् । द्वितीयस्तु वैधर्म्यमेवोदाहरणेनेति । तत्र न पुनरिदं वैधर्म्यमेवे-त्यनेन द्वितीयः सूत्रार्थो निराकृतः अर्थात् प्रथमः संगृहीतः । तेन च पक्षैकदेशवृत्तिरपोदित इति भावः ।

उने ॥ एतावत्येवेति । वैधर्म्यमेवो[689b]दाहरणेनेत्येतस्मिन्नेव ॥

टीयाम् ॥ **यस्य कस्यचिदिति** । पक्षस्थस्य सपक्षस्थस्य विपक्षस्थस्य वा ।

इष्टपरित्याग इति । सपक्षादिसाधर्म्यनिराकरणे हि सपक्षादिसाधर्म्यवतः कृतकत्वादेर्हेतोरिष्टस्यापि परित्यागः स्यात् ।

वार्त्तिके ॥ **विपक्षाद् विशेष इत्येतावतीति** । विपक्षाद् विशेषो हेतुरित्येतावतीत्यर्थः ।

सपक्षैकदेशवृत्तिरिति । प्रयत्नानन्तरीयकत्वादि. ।

तत्तुल्येति । सपक्षः ।

टीयाम् ॥ **विपक्षवृत्तेरिति** । अयं पाठः पुस्तकेषु दृश्यते परं सपक्षवृत्तेरिति युक्तः ।

एवं सत्यपीति । यो विशेष एव स हेतुरिति स्थिते विपक्षादेवेति नियमेऽपि ।

तेन चाश्रुतेनार्थेनेति । सपक्षैकदेशवृत्तिहेतुरूपेण ।

वार्त्तिके ॥ **अभिप्रेतग्रन्थहानिर्वेति** । सपक्षे सिद्ध इत्यादिग्रन्थोऽकरणीयो वा स्यादित्यर्थः ।

उने ॥ **तन्मते** इति । **वैभाषिक**मते ।

क्षणेति । क्षणलक्षणः सदृशसन्ततिलक्षणश्च यौ निरोध्यौ विनाश्यौ तयोर्भेदेन ।

अप्रतीति । प्रतिक्षणं यो वस्तुनः सदृशक्षणोत्पादरूपो विनाशः सा अप्रतिसंख्या । यस्तु लगुडादिना घटादेः कपालादिविसदृशक्षणोत्पादरूपो विनाशः सा प्रतिसंख्योच्यते ॥

टीयाम् ॥ **अनित्यत्वहेताविति** । अनित्यत्वस्य हेतौ कृतकत्वादौ ।

उने ॥ **तत्रेत्यादिनेतीति** । तत्र यः सन्नित्यादिना ।

प्रपञ्चमिति । सपक्षवर्गविपक्षवर्गलक्षणम् ।

अत्रेतीति । अत्र **दिग्नागे**नेत्यादि ।

टीयाम् ॥ **पक्षधर्मः सपक्षे सन् विपक्षे सदित्यादि** । पक्षधर्म इति सर्वत्र ध्रुवम् । ततः सपक्षे सन् विपक्षे च सन् तथा सपक्षे सन् विपक्षे चासन्, तथा सपक्षे सन् विपक्षे च द्वेधेति सपक्षे सन्नित्येतस्य ध्रुवस्य विपक्षे सन्नित्यादिना सह त्रयो भङ्गाः । एवं सपक्षेऽसन्नित्येतस्य ध्रुवस्य, सपक्षे द्विधेत्येतस्य च ध्रुवस्य विपक्षे सन्नित्यादिना सह त्रयस्त्रयो भङ्गा भाव्याः ।

एते सर्वेऽपि भङ्गा मीलिता नव स्युः । तदेतेषु हेतुतदाभासविवेकः स्थापनातो ज्ञेयः । सा चेयम्—

नित्य	प्रमेयत्व	खं	कुम्भः	साधारणानैकान्तिकः
अनित्य	कृतकत्व	घटः	खं	सम्यक्
प्रयत्नोत्थ	अनित्यत्व	बुद्धिः	तडित्खे	सप[क्ष]व्या[पि] विपक्षैक[देश] वृत्ति
नित्य	कृतकत्व	खं	घटः	विरुद्धः
नित्य	श्रावणत्व	खं	कुम्भ	असाधारणानैकान्तिकः
नित्य	प्रयत्नजत्व	खं	तडिद्घटौ	[सपक्षावृत्ति] विपक्षैकदेशवृत्तिः [विरुद्धः]
अप्रयत्नज	अनित्यत्व	तडित्खे	कुम्भः	सपक्षैक[देश]वृत्तिर्विपक्षव्यापी [अनै०]
अनित्य	प्रयत्नजत्व	तडिद्घटौ	खं	सपक्षैकदेशवृत्तिः सम्यक्
नित्य	अस्पर्शत्व	परमाणुखे	घटबुद्धी	उभयपक्षैकदेशवृत्तिः ॥
↑	↑	↑	↑	
साध्यानि	साधनानि	सपक्ष	विपक्ष	

न पुनः पक्षधर्म एवेत्यर्थ इति । न पुनरनेन पक्षधर्मो हेतुरिति लभ्यत इति **वार्त्तिक**स्य व्याख्या ।

अवधारणमिति । न पुनः पक्षधर्म एवोपलभ्यते इति **आचार्ये**णाभिप्रायी कृतमवधारणम् ।

वार्त्तिके ॥ **द्वेधा चेति** सर्वथा न वक्तव्यमित्येतद् व्याचष्टे—**इदं तावदिति** इदं तावत् सन् सजातीये इति न वक्तव्यम् । कुतः ? गम्यमानत्वादनन्तरोक्तयुक्त्या सजातीये

सत्त्वस्य गम्यमानत्वात् । अथ स्पष्टावबोधार्थं सत्सजातीये इत्युच्यते तदापि सच्छब्देनैव व्याप्त्यव्याप्त्योः सामान्येनाभिधानात् द्विधा चेति न वाच्यमेव । तदिदमाह—**टीकाकारः सजातीय** [690a] **इत्यस्योपादानेऽनुपादाने चेत्यर्थ** इति ।

तेनेति । तव मते न हेतुः ।

एकमवधारणार्थबाधितमेवेति । पक्षधर्म एवेत्येतत् ।

एकमिति । असंस्तदत्यये इत्येतत् ।

यद्येवं सन् सजातीये इत्यादि । पक्षस्य धर्म एवेत्यत्र व्याप्त्यर्थेनावधारणेन सजातीयसंभवस्योक्तत्वात् । सन् सजातीये इति द्विधा चेत्युभयं न कार्यमेव । अथ सुखावबोधाय सजातीये द्विधेति क्रियते, तदा द्विधा चेत्यस्यान्यपदद्वैधानिवृत्तिपरत्वात् सजातीये द्वेधा चेति वचनादेव सजातीये संभवो गम्यते इति सन् सजातीये इति सर्वथा न कार्यमेवेत्यर्थः ।

टीयाम् ।। **तथापीति** । यदि पक्षस्य धर्म एवेति नावधार्यते तदेत्यर्थः ।

यदि च तदत्यये एवेतीति । तदत्ययेऽसन्नेवेत्यर्थः ।।

वार्त्तिके ।। **तादृगविनाभावीत्येतस्माद् वचनादिति** । तादृशा सपक्षेण विना विपक्षे न भवतीति निरुक्तिप्रधानात् अनित्यत्वे कारणमिति हेतुः ।

व्यभिचारीति । अनित्ये इव नित्येऽपि भवेत् ।

युष्माकं घटत्वं नित्यमितीति । एतद्व्यभिचारनिवृत्त्यर्थं विशेषणमिति बौद्धाशयः ।

एतदिति । प्रयत्नानन्तरोपलभ्यमानत्वम् ।।

टीयाम् ।। **अनैकान्तिकत्वं तदवस्थमेवेत्यर्थ** इति । अनित्यवन्नित्यस्यापि प्रयत्नानन्तरमेवोपलभ्यमानत्वात् ।

आश्रितेति । आश्रितानाश्रितौ यौ भावाभावौ । भावो ह्याश्रितोऽभावस्तु तुच्छत्वात् न किमप्याश्रितः । तद्रूपौ यौ धर्मौ यस्य स्तः, तत्तद्वत् ।। ३५ ।।

टीयाम् ॥ असाविति । हेतुः ।

उने ॥ उपनयन्तीति । कृतकश्चायमित्येवमुपसंहरन्ति ।

टीयाम् ॥ अनेनेति सूत्रेण ॥

अस्येति । सूत्रस्य ।

उने ॥ उभयत्र दोषः इति । अप्रकृतोपादानप्रकृतहानलक्षणः ।

व्यवच्छेद्येति । समानजातीयाः प्रतिज्ञादयोऽसमानजातीयाश्च प्रमाणादयो ये व्यवच्छेद्या दर्शिताः, तैः सूचितं यदुदाहरणसामान्यलक्षणं तदाश्रित्य, न तूदाहरणविशेषलक्षणमिति भावः ।

तच्चेति । सामान्यलक्षणम् ।

लक्ष्यमुदाहरणविशेषमेवाह—**उदाहरणमिति ।**

तद्विषयमिति । दृष्टान्तविषयम् ॥

टीयाम् ॥ सव्यभिचारो व्यवच्छिन्नो भवतीति । साधर्म्यत्वेन ।

उने ॥ वाक्यशेषभूतेनापीति । अध्याहृतेनापीत्यर्थः ॥

अनेनेति । यस्मादित्यादि **वार्त्तिकेन ।**

भवितव्यमितीति । अन्यथा किं कुतश्चित् साध्येत्याशङ्का न लगेदिति भावः ।

तदिति । यस्मादित्यादिकम् ।

ननु यैर्यस्मादित्यादि **वार्त्तिकं** न मन्यते, तेषां मते किं कुतश्चित् साध्येत्याशङ्का कुत इत्याशङ्क्याह—**इयं चेति ।**

आगामिवार्त्तिकमिति । न भवतीत्यादिकमुत्तरं रूपम् ॥

साध्येनैवेत्यवधारणाक्षेपिकेति । साध्येनैव साधर्म्यात् तद्धर्मभावीत्यत्र वाक्ये साध्येनैवेति यदवधार्यते तत्किं कुतश्चित् साध्यसाधर्म्यात् तद्धर्मभावी न भवति? अयमर्थः, साध्येनैव साधर्म्यादित्यवधारणं तदैव स्यात्, यदि साध्येनासाध्येनापि यत् साधर्म्यं तस्मात् तद्धर्मभावी न भवतीत्येवं साध्येनैवेत्यवधारणाक्षेपिका ।

हेतुलक्षणरीतिमित्यादि । अत्रापि साध्येनैवेत्यादि वदता **वार्त्तिककृता** यथोदाहरणसाधर्म्यादित्यत्रावधारणद्वयं, तथात्रापि **सूत्रे** ज्ञेयमित्यतिदेशः कृतः, तेन च हेतुलक्षणे इवोदाहरणलक्षणेऽपि अवधारणसमर्थनं [690b] दर्शितम् । समर्थने च को नामाक्षेपावसर इत्यतः परैर्यद्बुद्धं तन्मन्दप्रयोजनमित्यर्थः ।

मा भूच्चेति । तद्धर्मभाविग्रहणमनर्थकमित्येवं तद्धर्मभावि ग्रहणानर्थक्यस्य येयं शङ्काशेषस्थितिरप्रयोजकनिषेधसमर्थनार्थास्ति सावधारणसमर्थनेऽप्यवधारणसमर्थनार्थापि मा भूदित्यर्थः ॥

तथापीति । यद्यप्येवं तद्धर्मभावित्वग्रहणं समर्थितं तथापि शङ्कानुरूपं नोत्तरमवधारणद्वययोगिनः साध्यसाधर्म्यसद्भावे सति तदसमर्थनात् ।

तस्येति । साधर्म्यस्य ।

प्रयोजकतायां तु दर्शितायामिति । दर्शितत्वं चास्यास्तद्धर्मभावीत्यनेन ।

तथाभूतस्येति । प्रयोजकस्य ।

अयोगव्यवच्छेदे इति । साध्येन साधर्म्यमेवेत्यस्मिन्नेवावधारणे इत्यर्थः ।

प्रकृतसिद्धिरिति । निर्दोषसाधर्म्योदाहरणसिद्धिः ।

एवं च सतीति । यदा हि तद्धर्मभाविग्रहणेन प्रयोजकतायां दर्शितायामयोगव्यवच्छेदे एव केवले प्रकृतं सिध्यति, तदा साध्येनैव साधर्म्यमिति प्रथममवधारणं यद्यपि मन्दप्रयोजनं तथापि नित्यः शब्दोऽमूर्तत्वात् कर्मवदित्यादेर्व्यवच्छेदं प्रथमावधारणेन सुखसाध्यं तद्धर्मभाविग्रहणोपदर्शितप्रयोजकत्वसूक्ष्मेक्षिकया । कः कष्टसाध्यं करिष्यतीति विमृश्यैतद् दर्शितमित्यर्थः ।

ननु यदि तद्धर्मभावित्वेनाप्रयोजको व्यवच्छेद्यस्तर्हि स एव किं नोदाहृत इत्याशङ्क्याह—**अप्रयोजके त्विति ।**

एवं सतीति । अवधारणद्वयाव्यवच्छेद्याप्रयोजकव्यवच्छेदार्थं तद्धर्मभाविग्रहणे ॥

टीयाम् ॥ अनुवृत्तेनेति । [1]दृष्टान्त उदाहरणमित्यनेन ।

1 N.S. I.I. 36

उने ॥ साध्याभावप्रयुक्तः साधनाभावो यत्र दर्श्यते, तद्दृष्टान्तवचनं विपक्षोदाहरणमिष्टं साध्यवैधर्म्याददतद्धर्मभावी दृष्टान्त उदाहरणमिति लक्षणे तु साधनाभावप्रयुक्तः साध्याभावो यत्र दर्श्यते तद्विपक्षोदाहरणं प्राप्तम् , तच्चायुक्तमित्यत आह—**यद्यपीति** ।

आर्जवानुरोधादिति । **भाष्यकृद्वार्त्तिककृतो**र्यदार्जवं तदनुरोधात् ।

यथाश्रुति व्याचष्टे इति । यथा **भाष्ये वार्त्तिके** च साध्यवैधर्म्याददतद्धर्मभावीत्येतत् श्रूयते, तथैव व्याख्याति । साध्यवैधर्म्याददतद्धर्मभावीत्येतदेव यथाश्रुतं व्यतिरेकोदाहरणोचितसाध्याभावप्रयुक्तसाधनाभावपरतया व्याख्यातीत्यर्थः ।

यथा विभज्येति । साध्यवैधर्म्याददतद्धर्मभावीति पदयोर्यथा विभागेनार्थ उक्तः, तथा तं सङ्कलितमाहेत्यर्थः ।

निरपेक्षेति । निरपेक्षत्वेन वृत्तिर्विकल्पः सापेक्षत्वेन वृत्तिः समुच्चय इति योगः ।

न चैवमत्रेति । अत्रेत्युदाहरणविचारव्यतिकरे साधर्म्यवैधर्म्योदाहरणेन विकल्पेन समुच्चयेन चैकविषये इत्यर्थः ।

सामान्यत इति । अन्वयप्रतिपत्तिः ।

तेनेति । सामान्यान्वयेन ।

उक्तमिति । अनुमानलक्षणे ।

तदभिधानमिति । व्यतिरेकाभिधानम् ।

नियम इति । व्यतिरेकस्य । नियतो व्यतिरेक इत्यर्थः ।

तत्रेति । पक्षे ।

हेतूपसंहारेणेति । कृतकश्चायमित्येवंरूपेण ।

अविशेषविधित्वादिति । विशेषस्य विधिर्विशेषविधिः । न तथा अविशेषविधिः, तत्त्वात् ।

न चाभिधेयेति । विशेषोऽभिधेयः[691a] प्रमेयत्वादित्यत्र केवलान्वयिनि ।

अत एवेति । यत एव यत्र सपक्षतद्भितरौ स्तस्तत्र विशेषविधौ शेषनिषेधो गम्यते । अत एवान्वयेत्यादिनिरूपणमित्यन्तमित्येकः संबन्धः । तथा यत एव केवलान्वयिनि न कोटिद्वयसंभवोऽतएव केवलेत्यादिव्यवच्छेदेनेत्यन्तमिति द्वितीयः संबन्धः ।

अन्ययोगेति । अनित्य एव कृतकः । अनित्यः कृतक एव कृतकत्वायोगवान् नेति भाव इत्यन्ययोगोऽयोगयोर्द्वयोरपि व्यवच्छेदः समव्याप्तिके, विषमव्याप्तिके तु वह्निमानेव धूमवानित्ययोगव्यवच्छेद एव ।

अत्यन्तायोगव्यवच्छेदेनेति । अभिधेयत्वेन प्रमेयत्वं व्याप्यत एवेत्येवम् ।

नैवकारार्थनोद्यावकाश इति । अभिधेय एव प्रमेय इत्येवकारस्य योऽर्थोऽन्ययोगव्यवच्छेदरूपस्तत्र यत् नोद्यं प्रश्नः, तस्यावकाशो नास्ति ।

अधिकपुनरुक्तेति । अधिकं च पुनरुक्तं च दोषौ तयोर्भयात् ।

विकल्पस्त्विति । अन्वयव्यतिरेकिणि अन्वयो वा व्यतिरेको वा स्यादित्येवंरूपः ।

न हि केवलेत्यादि । यथा केवलव्यतिरेकिणि अन्वयाद् व्यतिरेको विशेषो विशिष्टः साधकत्वेन प्रधानं तथान्वयव्यतिरेकिण्यपि नान्वयाद् व्यतिरेको विशेषः साधकत्वेन प्रधानं किं त्वार्थ एव अर्थाक्षिप्त एव स व्यतिरेकः । तथा चान्वयव्यतिरेकिणि अन्वयस्यैव साधकत्वेन प्राधान्ये यः कृतकः सोऽनित्य इत्येवमन्वयं प्रतीत्य तन्निषेधो व्यतिरेको योऽनित्यो न स्यात् स कृतकोऽपि न स्यादित्येवंरूपः प्रत्येतव्यः । उपलभ्य च तन्निषेधं न चायं न कृतक इत्येवं व्यतिरेकनिषेधं स एवान्वयः प्रत्येतव्य इति संबन्धः ।

सोऽयमिति । यत् प्रतीतेः प्राथम्यं निष्ठा च सोऽयमन्वयः प्राक् व्यतिरेकात् प्रथममेव शब्दोऽनित्यः कृतकत्वात् यः कृतकः सोऽनित्यो यथा घटः, कृतकश्चायमित्येवं यदि पक्ष एव प्रतिपन्नः, तदा पश्चात्कृतेन व्यतिरेकेण किमधिकं साधितं स्यात् पक्षे साध्यस्यान्वयस्य प्रागेव सिद्धत्वात् ?

सपक्षे चेदिति । अथ सपक्षेऽन्वयः प्रतिपन्नो न पक्षे इति, पक्षेऽन्वयप्रतिपत्त्यर्थं व्यतिरेको भविष्यति तत्राह—**स एवेति ।** सपक्षे गृहीतोऽन्वय एव । एतेन यदि उपनयादनन्तरमर्वाग् वा यत्र कुत्रापि व्यतिरेकः क्रियते तत्राप्यनेन न किञ्चित् साध्यमित्युक्तम् ।

अयमिति । सपक्षान्वयः ।

तथैवेति । न चायमकृतक इत्येवं कृकाटिकाभङ्गेनैव ।

तमिति । अन्वयम् ।

तदेवेति । व्यतिरेकाभिधानम् ।

अनुक्ताविति । अन्वयस्य ।

टीयाम् ॥ तद्धर्मकारित्वमर्थ इति । तद्धर्मं भावयति उत्पादयति करोतीत्येवंशीलः इति व्युत्पत्तेः ।

वार्त्तिके ॥ एवंवादिन इति । अन्यापोहः शब्दार्थ इति वादिनः ।

टीयाम् ॥ यथा च विशिष्ट इति **वार्त्तिकं** व्याचष्टे—**यथा च स एवेति ॥**

उने ॥ नियतपौर्वापर्येति । नियतपौर्वापर्ये प्रतिपत्ती ययोः क्रमेण व्याप्तिपक्षधर्मतयोस्तद्भावेन ।

विषयिणोरपीति । विषयौ व्याप्तिपक्षधर्मते ययोस्तयोः ।

ननु विषयभूतयोर्व्याप्तिपक्षधर्मतयोर्नियमेन पौर्वापर्येण प्रतिपत्तिरित्यतो विषयिणोरप्युदाहरणोपनययोः पौर्वापर्यनियम इत्ययमुदाहरणवचनस्य चेत्यादिकायाः **टीकायाः** तात्पर्यार्थः । स च कथम् ? न ह्यवश्यं ज्ञानक्रमेण तद्वचनक्रम इत्याह—**ननु नेति ।**

[691b] **तद्वचनेति ।** तेषां ज्ञातार्थानां वचनं तद्वचनम् ।

तदनुत्पादकत्वादिति । पक्षधर्मताप्रत्ययाजनकत्वात् ।

अपरस्याभावादिति । यथा स्वार्थानुमाने व्याप्तिस्मरणस्य पक्षधर्मतावगमं कुर्वत इन्द्रियादिः सहायः, तथा परार्थानुमानेऽस्योपनयवचनादन्यः सहायो नास्ति[1] यतः ।

टीयाम् ॥ एतदेवेति । वश इति पदम् । भावमिति वश्यतालक्षणम् ।

वशः सामर्थ्यमिति । उदाहरणस्य वशः सामर्थ्यं शक्तिः का, ययोपनय उदाहरणवश्य इत्युच्यते ? तत्राह—**वश्येनेत्यादि ॥**

उने ॥ उपनयसामान्यलक्षणं **टीकायां** न्यूनमित्यतः पूरयति—**साध्यस्येति ।** उदाहरणापेक्ष उपसंहारः साध्यस्य हेतुमत्तया उपनय इति सामान्यलक्षणमित्यर्थः ।

---

1 पक्षधर्मतावगमं जनयतः ।

उदाहरणातिदेशेनैवेति। यथोदाहरणे वाशब्दः समुच्चयार्थो व्यवस्थित-विभाषार्थो वा तथात्रापीत्यर्थः।

प्रतिसन्धानं प्रत्यनियम इति द्व्यादिभिरेवावयवैः प्रतिसन्धानमुत्पद्यते इत्येवं प्रतिसन्धानोत्पत्तिं प्रति नियमो नास्ति।

संस्कारेति। यस्य हि संस्कारः पटुतमस्तस्यासौ द्वाभ्यामप्यवयवाभ्यामुद्बोध्यते। येषां तु संस्कारः पटुतरादिः तेषां त्र्यादिभिरवयवैरित्येवमुद्बोधकावयवद्व्यादेरनियतत्वात्।

तेनेत्यादि। संस्कारतारतम्येनोद्बोधकस्यानियमात् प्रतिसन्धानं प्रत्यनियमो यतः, तेन कारणेन तस्य संस्कारोद्बोधकस्यावयवद्व्यादेर्दुरुन्नेयत्वादेकस्य द्वावेवावयवावुद्बोधकौ, अन्येषां च त्र्यादय एवावयवा उद्बोधका इत्येवं दुर्ज्ञेयत्वात् तथा। यथा कृष्णपक्षतृतीया-वाच्यादिशब्दैकदेशानां [1]कृतृरादीनामगृहीतसङ्केतं प्रति कृष्णपक्षे तृतीयायां रात्रौ भद्रेत्याद्यनु-सन्धानस्याहेतुत्वम्, तथा वाक्यावयवानामपि न्यूनानामव्युत्पन्नं प्रति प्रतिसन्धानाहेतुत्वाद् यथा स्वयमर्थः प्रतीतः तथा परः प्रतिपाद्य इति संबन्धः।

टीयाम्॥ अतिप्रसङ्ग इति यदि हि लिङ्गपरामर्शपूर्वकोऽनुमेयार्थप्रत्यय इत्यर्थः परा-मर्शज्ञानहेतोरुपनयवचनस्य सप्रयोजनत्वेनावयवेष्वभिधानं तदा दधि[2]लक्षणादिपूर्वकमनुमेय-ज्ञानमिति लक्षणादेरपि सप्रयोजनत्वेनावयवेष्वभिधानं स्यादित्यतिप्रसङ्गः।

उने॥ स्वबोधसंक्रान्तिरिति। स्वबोधस्य परस्मिन् संक्रमणम्।

स चार्थ इति। कम्बुग्रीवादिमदादिः।

स्वशब्देनेति। घटादिना।

एतावदत्र स्यादिति। परेणोपनयनिराकरणे एतावद्वक्तव्यं स्यादित्यर्थः।

तदाक्षेपत इति। तेन हेतुना वचनेन य आक्षेपस्तस्मात्।

आद्यो व्युत्पन्नेति। व्युत्पन्नोऽपि अनियतप्रतिपत्तिसाधनत्वात् स्वप्रतिपत्त्यनु-सारेण बोधयितव्य इति वदता हि **टीकाकृता** उपनयार्थमप्यसौ बोधयितव्य इत्युक्तम्। तथा च व्युत्पन्नः स्वयं चोहेतेति प्रथमपक्षो दूषित इत्यर्थः।

---

1 द्रः टीका, ५।२। 2 S °भक्ष

आचार्यः परमतमाशङ्कते—**अथैवमिति** ।

उत्पन्नतयेति । सिद्धतया ।

उपपादनीयतयेति । साधनीयतया ।

प्रथम इति । सिद्धतया तत्परः शब्दः ।

तन्नान्तरीयकमिति । स्वार्थाविनाभाविनम् ।

यथा जितमित्यादि । यदा हि जितं नकुलेनेति सिद्धम्, तदा नकुलेन जयः सर्पस्यैवेति जितं नकुलेनेत्यनेन स्वार्थमवबोधयता [692a] स्वार्थाविनाभूतसर्पपराजय आक्षिप्यते ।

द्वितीयस्त्विति । साध्यतया तत्परः शब्दः ।

यथा स एवेति । यदा हि जितं नकुलेनेति नकुलेन जय एव न सिद्धः किं त्वद्यापि साध्यः, तदा यद्यपि जितं नकुलेनेत्यतत्स्वार्थं प्रतिपादयति तथापि न स्वार्थाविनाभूतं सर्पपराजयमाक्षिपति, तत्स्वार्थस्यैवाद्यापि साध्यत्वात् ।

तथात्वे वेति । साध्यतयापि तत्परः शब्दश्चेदर्थान्तरमाक्षिपेत्, तदा प्रतिज्ञैव सर्वमाक्षिपेत्, तस्या अपि साध्यतया तत्परशब्दत्वात् ।

ताद्रूप्यस्येति । साधनरूपतायाः ।

आचार्य आह—**नन्विति** । **एतदिति** । इत्थमुदाहरणसार्थकत्वसमर्थनम् ।

एतेनेति । उपनयस्य सार्थकत्वव्याख्यानेन निगमनमपि सार्थकमुक्तमित्यर्थः ।

टीयाम् ॥ **तद्विधस्येति** । अव्यासस्य तुल्य इति साधनत्वभ्रमेण प्रयोगः ।

उने ॥ **तदुपसंहार** इति । हेतूपसंहारः ।

तदुपसंहारोऽपीति । साध्योपसंहारोऽपि निगमनम् ।

न हीति । न हि अन्विताद् धूमवत्त्वादेर्व्यतिरेकोऽवह्निमत्त्वादिनिषेधः साक्षात् सिध्यति, किं तु वह्निमत्त्वादिरन्वय एवाव्यतिरिक्तात् प्राणादिमत्त्वादेः साक्षादन्वयः । सात्मकत्वादिः सिध्यति किं तु नैरात्म्याभावादिर्व्यतिरेक एव ।

लिङ्गस्येति । यदि हि धूमवत्त्वादेर्लिङ्गाद् वह्निमत्त्वादिः सिध्यतीति कोऽर्थोऽवह्निमत्त्वादिनिवृत्तिरित्येवमन्यापोहविषयं लिङ्गमभ्युपेयेत तदान्वितादपि व्यतिरेकः साक्षात् सिध्येत् । न चैतदभ्युपगम्यते इत्यर्थः ।

सूत्रकृतेतीति । इत्येतदाशङ्क्येह निगमनलक्षणावतारे **भाष्यं** द्विविधस्येति वर्तत इति संबन्धः ।

ननु प्रतिज्ञाया द्वैविध्येनादौ भणनीयत्वात् प्रतिज्ञालक्षणे एव किमितीदं नाशङ्कितं तत्राह— **प्रतिज्ञेति ।**

यद्येवं तर्हि किमर्थमिहाशङ्कितं तत्राह-- **ग्रन्थलघिम्ने इति ।** यदा हीदं प्रतिज्ञालक्षणे शङ्क्यते निगमनलक्षणेऽत्र च शङ्क्यते, तदा ग्रन्थगौरवं स्यात् तन्निवृत्त्यर्थम् ।

ननु यदीदं प्रतिज्ञालक्षणे शङ्कितं तदा किमत्र शङ्कितेनेत्यतो न ग्रन्थगौरवमित्याशङ्क्याह-- **सुखप्रतिपत्तये चेति ।** हेत्वादीनां द्वैविध्ये उक्ते तद्दृष्टान्तेनात्रेयमाशङ्का सुखेन प्रतिपद्यते इति तदर्थः ।

हेत्वादीनामिति । हेतूदाहरणोपनयानामवयवानाम् ।

येषामिति । साधर्म्यवैधर्म्येण द्विविधानामपि ।

यदिति । साधर्म्यवैधर्म्येण द्विविधम् ।

संबन्धीति । सर्वावयवानामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शनरूपत्वान्निगमनस्या संबद्धं निगमनम् । तस्योभयरूपस्यापि निगमनस्य समानम् । कोऽर्थः ? एकं हेत्वपदेशादित्यादिलक्षणम् ।

न हीति । यदि हि विधौ वह्निमत्त्वे प्रतिज्ञाते तस्मान्नावह्निमानित्येवं निषेधोपसंहारे तथा नेदं निरात्मकमिति निषेधे प्रतिज्ञाते तस्मात् सात्मकमिति विध्युपसंहारे प्रतिज्ञायाः पुनर्वचनमिति लक्षणं गच्छेत् , तदा तत्प्रतिज्ञायाः पुनर्वचनमिति लक्षणं निगमनत्वेनानभीष्टेऽपि गमनेनातिव्यापकत्वात् **सूत्रकृता** नियम्येत । यदा तु विधिनिषेधयोः प्रतिज्ञाने तयोरेवोपसंहारे इदं लक्षणं लगति तदापि व्याप्त्यभावेन किमर्थं नियम्येतेति भावः ।

तयोरिति । [692b] व्यतिरिक्तान्वितयोः ।

तदसाध्यत्वादिति । अन्वयिव्यतिरेकिहेत्वसाध्यत्वात् ।

अयमर्थ इति । प्रतिज्ञानिगमनयोर्द्वैविध्यलक्षणः ।

टीयाम् ॥ तस्मादिति । हेत्वपदेशादिति । तस्मादित्येवं प्रकारेण न तु कृतकत्वादित्येवं यः हेत्वपदेशस्तस्मात् ।

तस्मादित्युल्लेखस्य हेत्वपदेशस्यार्थमाह—**तद्धेतुकमिति ।** अनित्यत्वाद्यविनाभूतकृतकत्वादिहेतुकम् ।

उने ॥ तथैव किं न स्यादिति । कृतकत्वादित्येवंरूपहेत्वपदेशः किं न स्यात् ?

अनुपसंहारत्वप्रसङ्गोऽपि कुत इत्याह—**तथा चेति ।** कृतकत्वादित्यादिके एव हि हेत्वपदेशे पूर्वोक्तानां रूपाणां पक्षधर्मतादीना यदनुसन्धानं तस्य तावदलाभः । तदलाभे च रूपत्रयानुसन्धाने सत्येवाबाधितविषयत्वासत्प्रतिपक्षत्वरूपयोरन्विष्यमाणत्वाद् विपरीतप्रसङ्गनिवारणस्याप्यलाभः । तथा च निगमनस्यानर्थक्यमिति भावः ।

प्रतिज्ञाभिधानमपीति । तस्मात् तथेत्येव ।

आद्ये तस्मात् स इत्यर्थः स्यादिति । स्वरूपवचनत्वात् तथाशब्देन साध्यधर्मिणः शब्दादेः स्वरूपे उच्यमाने तस्मात् स शब्द इत्यर्थः स्यात् न तु शब्दोऽनित्य इति । अनित्यत्वादयो हि न शब्दस्य स्वरूपं किं तु प्रकारा एव ।

लक्षणायोगादिति । प्रतिज्ञायाः पुनर्वचनमिति लक्षणायोगात् ।

अर्थायोगाच्चेति । न हि कृतकत्वाच्छब्दत्वं सिध्यतीति अर्थायोगः ॥

तस्मादनित्यः शब्द इति निगमनं हि स्वगतानित्यत्वविशिष्टशब्दभणनरूपम् । न चेदं तथाशब्देन तादृशार्थेन वक्तुं शक्यं स्वगतानित्यत्वेनैव तादृशत्वाभावात् । तदिदमाह—**तथापीति ।** अन्यसादृश्ये त्विति ।

यदि तु तस्मात् तथेति । कोऽर्थः ? शब्दोऽनित्यत्वेन घटसदृशः तदा प्रतिज्ञायाः पुनर्वचनमिति लक्षणयोगः ।

यथोक्त इति । अनित्यः शब्द इत्येवं यथा प्रतिज्ञाकाले उक्तः ।

गम्यमानत्वादिति । यदि तु तस्मात् तथेत्युक्ते गम्यत एव यथोक्त इति, अतः अपेक्षाया अभावात् नास्य वचनम् । तथा च नानुपसंहारत्वमित्युच्यते, तदा प्रतिज्ञायाः पुनर्वचनमिति लक्षणं न घटते ।

प्रतिपादनेति । अथ तस्मात् तथेत्यनेन परप्रतिपादनमेव क्रियते, न त्विदं वस्तुतः साधनाङ्गमपि, अतः प्रतिज्ञायाः पुनर्वचनमिति लक्षणायोगेऽपि न किञ्चित् [1]क्षीणमिति पराशयः ।

आरम्भेति । यद्यपि प्रतिज्ञायां निगमने चानित्यः शब्द इति वचनस्य रूपाविशेषस्तथाप्यनयोर्या साध्यसिद्धनिर्देशता सा आरम्भोपसंहारतयैव । प्रतिज्ञायां साध्यनिर्देश आरम्भरूपत्वात् निगमने तु सिद्धनिर्देश उपसंहाररूपत्वात् । यथा पटस्यारम्भकाले उपसंहारकाले च यद्यपि पटारम्भकास्तन्तव एवैते इति वचनाविशेषः, तथाप्येषामारम्भोपसंहारतयैव साध्यसिद्धनिर्देशता । पटारम्भकालतन्तुषु साध्यनिर्देश आरम्भरूपत्वात् पटोपसंहारकालतन्तुषु च सिद्धनिर्देश उपसंहाररूपत्वादित्यर्थः ।

अत एवेति । यावता प्रतिज्ञानिगमनयोः साध्यसिद्धनिर्देशरूपत्वेन भेद एतावता न पौनरुक्त्यम् । यावता चानयो रूपाविशेषणाभेदः तावता पुनर्वचनमिति न विरुध्यते इति भावः ।

भाष्ये ॥ शब्दविषयेति । शब्दस्याप्तोपदेशस्य यो [693a] विषयः स विषयो यस्या इत्यर्थः ।

प्रत्यक्षानुमानाभ्यां प्रतिसन्धानादिति । इदं च प्रतिज्ञायामप्यस्त्यतः प्रतिज्ञायाः शब्दविषयतायां साध्यायां हेतुः ।

टीयाम् ॥ त्रीणि रूपाणीति । अन्वयव्यतिरेकिणि ।

द्वे वेति । केवलान्वयिकेवलव्यतिरेकिणोः ।

ननु त्रिभी रूपैर्द्वाभ्यां वा हेतोरविनाभावः समाप्यत एव तच्चतुर्भिरवयवैरबाधितविषयत्वासत्प्रतिपक्षत्वे चेन्नोक्ते मोच्येतामित्याशङ्क्याह—**पञ्चसु वेति** ।

प्रतिज्ञात एवेति । अत्र पञ्चम्यास्तसिति तस् ।

उने ॥ तथैवेति । सिद्धतया निर्देशेनैव ।

तत इति निगमनात् ।

---

1 J क्षूण

ननु साध्यनिर्देशरूपादपि निगमनात् पाञ्चरूप्यप्रतीतिर्भविष्यति, तत् किं सिद्धतयानिर्देशो निगमनमित्युच्यते? तत्राह—**न हीति ।**

रूपान्तरसंपदमिति । अबाधितविषयत्वादिरूपाम् ।

आक्षेप्तुमपीति । आस्तां वक्तुमित्यप्यर्थः ।

वार्त्तिके ॥ संबन्धसाध्येति । संबन्धो व्याप्तिः साध्यो ययोस्ते संबन्धसाध्ये सपक्षे सत्त्वं विपक्षे चासत्त्वमेव ।

टीयाम् ॥ यथातथाभावयोरभावादिति । अभावश्च कृतकत्वसामान्यस्यैक्यात् इति ।

॥ न्यायस्वरूपप्रकरणं संपूर्णम् ॥

॥ न्यायोत्तराङ्गलक्षणप्रकरणम् ॥

[१.१.४०–१]

उने ॥ फलस्येति । निर्णयरूपस्य ।

तर्क इति । इतिकर्तव्यतारूपः ।

उभयकोटीति । उभयकोट्योः समो यः संशयः, तत्प्रभवा या समा जिज्ञासा, ताम् ।

अविज्ञाततत्त्व इति पदस्य प्रयोजनमाह—**स चेति ।**

कारणोपपत्तित इत्यस्य प्रयोजनमाह—**कारणेति ।**

तस्याश्चेति । तस्याश्च कारणोपपत्तेस्तत्स्वरूपं प्रमाणाभ्युनुज्ञालक्षणमुक्तं यत् तस्यास्तर्कव्यापारभूताया एव स्यादित्यतो नातिप्रसङ्गः । संशयादिर्न तर्कः । यदि कारणोपपत्तेस्तर्कव्यापारभूताया यत् स्वरूपं प्रमाणाभ्यनुज्ञालक्षणं तन्नोक्तं स्यात्, तदा अविज्ञाततत्त्वेऽर्थे कारणोपपत्तित इत्यादिलक्षणं संशयादावपि यातीति सोऽपि तर्कः प्रसज्येतेति भावः ।

एवंव्यापार इति । प्रमाणाभ्यनुज्ञाव्यापारः ।

तथैव टीकाकृतोक्तमिति । प्रसङ्गापरनाम्नेत्यादिना ।

स चेति । प्रसङ्गः ।

आहार्यहेतोरिति । यद्येवं वह्निमान् न स्यादित्येवं वह्न्यभावादेः कल्पितकारणात् ।

तदर्थतयापीति । कारणस्याहार्यहेतोरुपपत्तिः संभवः सा तथा तत इत्येतदर्थतया ।

आहार्यलिङ्गोत्थाप्य इति । **उदयन**कृत**लक्षणमाला**याम् आहार्यलिङ्गारोप इति पाठः । अयमेव च संगत आहार्यलिङ्गस्य कृत्रिमलिङ्गस्य वह्न्यभावादेरारोपः ।

प्रमाणाभ्यनुज्ञेति । भवेदिदमित्थमिति प्रत्ययः ।

अफलमिति । स्वकीयेन फलेनाफलं किं तु फलवत्फलेनैव फलवदित्यर्थः ।

अनिष्टप्रसङ्ग इति । धूमाभावप्रसञ्जनादिः ।

स चेति । तर्कः ।

प्रमाणबाधितार्थेति । प्रमाणेन प्रत्यक्षादिना बाधितो योऽर्थो धूमवत्त्वाभावादिस्तस्य प्रसङ्गः ।

एते हीति । आत्माश्रयप्रसङ्गादयः ।

अन्यतरमिति । यत्र भवन्ति ततो विपरीतमर्थम् ।

एतत्सर्वमिति । तर्कस्य विषयकारणादि ।

वाक्यलाघवे इति । अनिष्टप्रसङ्गस्तर्क इत्यादिरूपे ।

अत एवेति । वाक्यलाघवमनादृत्य तर्कसत्कविषयकारणव्यापारादिप्रतिपादनादेव ।

सङ्कुलानीव वचांसीति यदुक्तं तद् दर्शयति—**तथा हीति ।**

व्यापारव्यापारिणोरिति । प्रमाणाभ्यनुज्ञातर्कयोः ।

भेदं व्युत्पाद्येति । अनिष्टापत्त्या तर्केण कर्त्र्या विपर्ययाशङ्का अपनीयते इत्यनेन हि तर्कस्य विपर्ययाशङ्कापनयः प्रमाणाभ्यनुज्ञापरनामा व्यापारो भिन्न एव दर्शितः ।

अभेदं विवक्षन्नाहेत्यादि । तया [693b] प्रमाणस्योपपत्त्या इतिकर्तव्यतया प्रमाणविषयमनुजानत्या विशोधिते विषये इत्यनेन हि विषयाभ्यनुज्ञया विषयशोधनं तर्ककार्यं प्रमाणोपपत्तावितिकर्तव्यतायां दर्शयता तया सह तर्कस्य भेदो विवक्षितः ।

तर्ककारणे इति । कारणोपपत्तिशब्देनात्र प्रमाणाभ्यनुज्ञा तर्ककारणं चाहार्यलिङ्गारोपश्चोच्यते । तत्र तर्ककारणे कारणोपपत्तिपदं संचार्य कारणोपपत्तिपदं तर्ककारणाभिधेयं विवक्षित्वेत्यर्थस्तत्कार्यभूततर्काभेदं तस्य तर्ककारणस्याहार्यलिङ्गारोपस्य यः कार्यभूतस्तर्कस्तेन सहाभेदं विवक्षन्नाह ।

न चोपपत्तिरेवास्तु निश्चयहेतुरित्यनेन हि तर्के एव वर्तमानं निश्चयहेतुत्वं कारणोपपत्तौ दर्शयता टीकाकृता तर्केण कार्येण सहास्याः कारणभूताया अभेदो विवक्षितः ।

टीयाम् ॥ उपपत्तेरिति । तर्कस्य ।

आश्रयासिद्धतयेति । यस्मिन्नाश्रितत्वेन स्वकृतफलभोगासम्भवेनानिष्टप्रसङ्ग-केन हेतुनोपपन्नस्तर्कः संसारापवर्गानुपपत्तिप्रसङ्गनरूपो युक्तनिश्चयसाधनं भविष्यति तदात्मो-त्पत्तिमत्त्वमेव नास्तीत्यर्थः । उपलक्षणं चैतदारोपरूपत्वात्तर्कस्य स्वरूपासिद्धतापि ज्ञेया । अपि तु प्रमाणमेवेति तत्त्वनिश्चयसाधनमिति योगः ।

संशय इति । अविज्ञाततत्त्व इत्यनेन किं ज्ञातोच्यते किं वा ज्ञेय इति रूपः ।

तन्निराकरणायेति । संशयनिराकरणाय ।

एवं रूपत्वमिति । प्रमाणाभ्यनुज्ञारूपत्वम् । प्रमाणविषयाभ्यनुज्ञेत्यर्थ इति । तर्कस्य स्वरूपमनिष्टप्रसङ्ग एव । प्रमाणाभ्यनुज्ञालक्षणव्यापारोऽपि यत्स्वरूपमुक्तं तद्व्यापारव्यापारि-णोरभेदविवक्षयेति ज्ञेयम् ।

वार्त्तिके ॥ अनुमानं युक्त्यपेक्षं तर्क इति तर्कः किमुच्यते युक्त्यपेक्षमनुमानमेव, युक्त्यपेक्षानुमानाद् व्यतिरिक्तस्तर्कः कोऽपि नास्तीत्यर्थः ।

टीयाम् ॥ ईदृशस्येति । प्रत्यक्षागमैकविषयस्य ।

व्यतिरेकिलिङ्गमिति । आत्मनोऽनुत्पत्तिमत्त्वे साध्ये ।

युक्तं व्यतिरेकिणीति । व्यतिरेक्यनुमाने युक्तं लिङ्गलिङ्गिसंबन्धस्मरणमिति संबन्धः ।

आत्मनि धर्मिणि साधनधर्म उत्पत्तिरस्तीति । संसारापवर्गानुपपत्ति-रूपस्य प्रसङ्गस्य यः साधनरूपो धर्मोऽनुत्पत्तिमत्त्वाभावोऽनुत्पत्तिमत्त्वाभावेन हि संसारापवर्गानु-पपत्तिः साध्यते । यथा व्यतिरेके वह्न्यभावेन धूमाभाव इति स आत्मनि धर्मिणि नन्वस्तीति सम्बन्धः । एतेनानुत्पत्तिमत्त्वाभावः संसारापवर्गानुपपत्तिप्रसङ्गलक्षणं व्यापारं कुर्वाण आत्म-धर्मिणोऽनुत्पत्तिमत्त्वे व्यतिरेकिलिङ्गमित्येतन्निराकृतम् । एतन्निराकरणेनैव च संसारापवर्गानु-पपत्तिरूपप्रसङ्ग एव प्रमाणाभ्यनुज्ञाव्यापारं कुर्वाण आत्मनोऽनुत्पत्तिमत्त्वे व्यतिरेकिलिङ्गमित्य-प्यपास्तम्, संसारापवर्गानुपपत्तेरप्यात्मन्यसत्त्वेन तुल्ययोगक्षेमत्वादिति भावः ॥

॥ इति तर्कलक्षणं पूर्णम् ॥

टीयाम् ॥ परीक्षाप्रयोजनस्येति । परीक्षायाः प्रयोजनं यस्तस्य निर्णयस्य ।

उने ॥ यदिह साधनोपालम्भेत्यादि । साधनोपालम्भशब्दौ वाद**सूत्र**स्थावपीदं सूत्रस्थाविव यदिह सूत्रे विवृणोति यच्च पक्षप्रतिपक्षशब्दाविह सूत्रे प्राक्पठितत्वेन विवरीतुमुचितावपि वादसूत्रे विवरिष्यति तत्रैव पठिताविव तेन साधनोपालम्भशब्दयोः पक्षप्रतिपक्षशब्दाभ्यां सहार्थसन्निधिरिव शब्दसन्निधिरपि दार्शितस्तेन च ज्ञायते केवलार्थ[694a]सन्निध्यपेक्षया शब्दार्थद्वयसन्निकर्षात्सुप्रतिपदभावेत्र खलु सुखेन लक्षणीयप्रतिपत्तिरित्यभिप्रायेण **भाष्यकृत**स्तद्गत लक्षणैव वादगतसाधनोपालम्भलक्षणैवाभिमतेत्येतद्धृदि निधाय **टीकाकृता** तदनुरोधेन **भाष्यकारा**नुरोधेनोक्तमित्यर्थः ।

टीयाम् ॥ **न प्रतिपक्षाश्रित इति** । प्रतिपक्षसाधनाश्रितत्वेन ।

व्यतिषक्तावितीति । एकविषयतया निर्णयेन सह ।

अनुबन्धेन प्रवर्त्तमानावितीति । अनुगमनेन प्रवृत्तिश्च साधनोपालम्भयोस्तदा स्याद्यद्येकतमस्य निवृत्तिरन्यतरस्यावस्थानं स्यान्नोभयोरपि प्रवर्त्तमानयोर्निवर्त्तमानयोर्वा तथा चैकतरनिर्णयावसानत्वमुक्तमनेन विशेषणेन ।

वादभ्रान्त्येति । कथायां यो निर्णयस्तस्येदं लक्षणमिति भ्रान्त्या ।

संशयविषये निर्णय इति । अनेन **सूत्रे**ण लक्षणीये ।

तयोर्निश्चितयोरेव प्रवृत्तेरिति । तिसृष्वपि कथासु वादिप्रतिवादिनौ स्वस्वपक्षे निश्चितावेव प्रवर्तेते ।

उने ॥ **शङ्काया इति** । शङ्काया नेदमित्यादेः पूर्वपक्षस्यैव शङ्कितत्वादशङ्कनीयशङ्कनेनायुक्तत्वात् तथा शङ्केवेयं न स्यादिति भावः ।

सम्भवेऽपि तयोरिति । परीक्षायां वादिप्रतिवादिनोः सम्भवेऽपि ।

विषयेति । नित्यत्वानित्यत्वरूपविषयमात्राख्यानेन पर्यवसानात्तयोः ।

स्थेयस्यैवेति । सभ्यस्य ।

पूर्वपक्षेति । पूर्वपक्षोत्तरपक्षौ प्रत्याकलितं युक्तायुक्तविचार एवमेतदिति निष्कर्षश्चेत्येवं रूपश्चतुष्पादव्यवहारः परीक्षायां कथास्वपि प्रवर्तते इति तात्पर्यतः कथाभ्यः परीक्षाया न कश्चिद्विशेषः ।

व्यापारकलापस्येति । पूर्वपक्षादेः ।

विचारेपीति । परीक्षायामपि ।

टीयाम् ॥ विमर्शं कृत्वेति श्रवणान्मा कश्चित्संशयमुपादेयं बुद्धे(?)त्यत आहा**नुपादेयोपीति** ।

उने ॥ **मीमांसाया इति** वेदविचारस्य ।

टीयाम् ॥ **आगमेनेति** । स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यादिना ।

उने ॥ शास्त्रमेवेति वेदग्रन्थ एव ।

तत्रेति—मीमांसायाम् ।

तन्निर्णयस्येति । शास्त्रनिर्णयस्य ।

तदर्थेति । शास्त्रार्थशास्त्रार्थस्येति । ज्योतिष्टोमादिसाध्यस्य स्वर्गादेः ।

वादात्पूर्वं सन्दिग्धावपीति । एतेन वादस्य संशयव्युदासः फलमिति **भाष्यकृद्व**क्ष्यतीत्येतदप्युपपादितं तत्संशयस्य वादेन व्युदास्यत्वात् ।

टीयाम् ॥ **शेषमिति** । पक्षप्रतिपक्षशब्दयोर्लक्षणया साधनोपालम्भवाचकत्वम् । हेतुत्वं पारंपर्येणापीत्यर्थ इति । **भाष्यकृता** दर्शितामपि तृतीयामवधीर्य प्रतिपक्षाच्चेत्यनेन पक्षप्रतिपक्षाभ्यामित्यत्र हेतुपञ्चमीं दर्शयता **वार्त्तिककृता** साधनदूषणयोर्हेतुत्वं दर्शितम् । तच्च पारम्पर्येणापि स्यादिति प्रतिपक्षलक्षितस्य दूषणस्य साक्षात्साधनविषयत्वेपि परम्परया प्रतिपक्षविषयत्वान्निर्णयं प्रतिहेतुत्वमिति भावार्थः ।

अव्यापकं लक्षणमिति [1]विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय एवेत्युक्ते पक्षप्रतिपक्षजावधारणस्य निर्णयत्वेन नियमनादिन्द्रियसन्निकर्षादिजावधारणस्य तु निर्णयत्वेनानवधारणाद् अव्यापकं लक्षणमित्यर्थः ।

प्रथमं कल्पमिति । विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णय इत्येवम् । वादे शास्त्रे च विमर्शवर्जमिति वाक्यं पक्षेत्यादिना विवृण्वन् **वार्त्तिककृ**द्यत्पक्षप्रतिपक्षाभ्यामेव वादे इति वदति तेन ज्ञायते पक्षप्रतिपक्षाभ्यामेव वादे निर्णयो न तु विमर्शः । शास्त्रे तु

1 N.S. I. i.

निर्णय एव न विमर्शो नापि पक्षप्रतिपक्षावित्यर्थो **वार्त्तिककृता** विवक्षितोऽन्यथा [694b] न शास्त्रे वादे वा विमर्शोऽस्तीत्येतावतैव वादे शास्त्रे च विमर्शवर्जमित्यस्य विवरणं स्यादेव तदिदमाह—**पक्षप्रतिपक्षाभ्यामेवेति** ।

येनेति । पक्षादिना ।

यदिति । साधनादि ।

तदवच्छेदकतयेति । साधनाद्यवच्छेदकतया ।

तदपीति । पक्षादि ।

उने ॥ **कक्षेति** । अभ्युपगमः ।

तदुद्धारेति । दूषणोद्धारः ।

टीयाम् ॥ **उभयत्र कल्पे इति** । किं प्रथमे द्वितीये तृतीये इत्यत्राथवा तृतीय इत्यत्र च ।

वार्त्तिके ॥ **तन्निवृत्त्येति** । दूषणाभासनिवृत्त्या ।

टीयाम् ॥ **न च फले इति** । प्रमितिरूपं हि फलं निर्णयः । स च तावत्प्रमाकरणं प्रमासाधकतममेव न भवति फलत्वेनैव हेतुना, यदा चात्र प्रमाणत्वं प्रमाकरणत्वं सामान्यमेव निवृत्तं, तदा तद्विशेषः प्रमाणत्वविशेषोऽनुमानत्वं निवृत्तमेवेत्यर्थः ।

निर्णयत्वेनेति । निर्णयस्वरूपत्वेन स्यात् ।

तत्र चेति । प्रतिपत्त्यनुबन्धिभूते विषये ।

॥ इति न्यायोत्तराङ्गप्रकरणं पूर्णम् ॥

मातर्भारति नन्दलक्ष्मितिलकोपाध्यायवक्त्रांबुजा-
वासे वत्सलता सुधोर्मिभिरमुं संप्लाव्य मां बालकम् ।
या दत्त्वाशु सुखादिकामनुपमां श्रीन्यायतर्कादिमा-
ध्यायाद्याह्निकदुर्लभार्थनिचयं संप्रीणयामासिथ ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्च-प्रस्थानन्यायमहातर्कविषमपदव्याख्यायां प्रथमस्याध्यायस्याद्यमाह्निकं सम्पूर्णम् ॥

॥ प्रथमाध्याये द्वितीयाह्निकम् ॥

॥ कथालक्षणप्रकरणम् ॥

[१.२.१–३]

उने ॥ स चेत्यादि । परार्थः किल न्यायः प्रवर्तितः सन् परविप्रतिपत्तौ विवेक्तुमुचितः । परं पृच्छोपक्रमप्रतियोगिनि पृच्छोपक्रमाय प्रतियोगी द्वितीयो यत्र तस्मिंस्त-थाऽत एवैकवक्तृके विचारे परार्थोऽपि न्यायो विविच्य प्रवर्त्तनीयः । विचारे हि प्रष्टैव द्वितीयो न तु विप्रतिपन्नतया प्रतिपक्षोत्थापकोऽत एवैक एव वक्ता । तथा च परस्य विप्र-तिपत्तेरभावान्निवर्त्तनीयायाः शिष्यपृच्छायाः कारणस्य च सन्देहस्य विविक्तेनैव न्यायेनापनेतुं शक्यत्वाद्विचारे न्यायो विविच्य प्रवर्त्तनीयः इत्यर्थः ।

तत्रेति विचारे न्यायस्य सिद्धिपरत्वं पक्षसिद्धिपरता । पक्षसिद्धिर्मुख्या प्रतिपक्ष-दूषणं तु गौणमित्यर्थः ।

दूषणोपक्रमेति । दूषणोपक्रमाय प्रतियोगी द्वितीयो यत्र तस्मिन् ।

क्रियाव्यतिहारे इति । एकः साधनं ब्रूतेऽन्यस्तद्दूषणं स्वपक्षसाधनं च ब्रूते । अथाद्यस्तद्दूषणमित्येवं साधनदूषणसमाधानरूपवचनक्रियाविनिमये ।

प्रवर्त्त्य विवेचनीय इति । कथायां हि दूषणोद्भावक एव द्वितीयो न चाप्र-वर्त्तिते न्याये परदूषणाशङ्का । तदभावे च दूषणनिवृत्तिरपि नेत्यतः कथायां न्यायः प्रवर्त्त्य विवेचनीयः ।

तत्र चेति । कथायां न्यायस्योपालम्भपरत्वं प्रतिपक्षनिरासपरता परोद्भावित-दूषणनिरासार्थत्वेन प्रतिपक्षनिरासो मुख्यः । पक्षस्थापना तु गौणीत्यर्थः ।

प्रवर्त्तनीयेति । प्रवर्त्तनीयो विवेचनीयः सिद्धिपरश्च यः साङ्गो न्यायस्तस्य लक्षणम् ।

प्रवर्त्तन विवेचन इति । प्रवर्त्तने यद्विवेचनं तस्मिन् निमित्तसप्तमी । न्याये प्रवर्त्तिते यद्विवेचनं तदर्थमित्यर्थो ये उपालम्भपराः पदार्था हेत्वाभासादयस्तेषां लक्षणमिति हेतोरिदानीं तस्य द्वितीयाह्निकस्यारम्भः ॥

प्रवर्त्यविवेचनीयद्वारेणेति । कथायां हि न्यायः स्वरूपेण प्रवर्त्यो हेत्वाभासादि दोषोद्धारेण विवेचनीयश्च । ततस्तद्द्वारेण कथान्यायस्य प्रवृत्तिभेदः । न्यायस्य प्रवर्त्तनविवेचनरूपप्रवृत्तिस्वरूपा कथयेत् इत्यर्थः ।

साक्षादिति । कथात्वेन ।

नोद्दिष्टेति । प्रथमसूत्रे ।

[695a] **तदुपसंग्रहेणैवेति ।** कथात्वेनैकार्थप्रतिबद्धीकृत्वेत्यर्थः ।

असङ्गतिमेव दर्शयति—**अन्यथेति ।** यदि कथारूपत्वेनैकार्थप्रतिबद्धता वादादीनां न स्यात्तदा वादादिलक्षणस्य प्रकरणत्वाभावेन पूर्वप्रकरणेष्वपरप्रकरणेषु चाप्रवेशाद् द्वयोरप्याह्निकयोरप्रवेशे शास्त्रबहिर्भावः प्रसज्येतेत्यर्थः ।

परिहरति—**विवक्षितफल इति ।** विवक्षितफलैकत्वानुरोधेन सामान्यस्योद्देशं दर्शयति—**तद्यथेति ।**

चतुर्ष्विति । प्रत्यक्षादिषु चतुर्षु प्रमैवैकं फलं विवक्षितमतः प्रत्यक्षादीनि प्रमाणत्वेन सामान्येनोद्दिष्टानि ।

सैवेति । आत्मादिषु द्वादशसु विषयेष्वपि प्रमैवैकं फलं विवक्षितमित्यात्मादयोऽपि विषयाः प्रमेयत्वेन सामान्येनोद्दिष्टा इति भावार्थः ।

हानमेवेति । हानमेवैकं फलं विवक्षितमित्यत आत्मशरीरेत्यादौ प्रमेयोद्देशसूत्रे सुखं दुःखत्वेनोद्दिष्टं, न तु दुःखाद्भिन्नम् ।

विवक्षितफलानेकत्वानुरोधेन विशेषस्योद्देशं दर्शयति—**इहेति ।** वादजल्पवितण्डासु ।

जल्पवद्वादस्यापि परामर्शादिति । यथा स इति तच्छब्देन जल्पस्य परामर्शस्तथा वादस्यापीत्यर्थः ।

ननु स वादः प्रतिपक्षस्थापनाहीनो वितण्डेति चतुर्थकथालक्षणं तदोचितं यदि लक्ष्यमस्य स्यादित्याशङ्क्याह—**पुरुषेति ।**

सानातनिरिति । आचार्यभेदः ।

प्रथमसाधननिवृत्तावेवेति । प्रतिवाद्युद्भावितदूषणेन प्रथमस्य वादिनः साधननिवृत्तिमात्रे ।

तस्येति । तत्त्वनिर्णयस्य ।

ननु द्वितीयवादिना साधनं नोपन्यस्तमिति यदि न तत्त्वनिर्णयस्तर्हि येन प्रथमवादिना साधनमुपन्यस्तं तस्य तत्त्वनिर्णयो भविष्यतीत्याशङ्क्याह—**नापीति** ।

प्रतिपक्षेति । प्रथमो वादी प्रतिपक्षसाधनं द्वितीयवादिसाधनमनिरूप्यैवादूषयित्वेत्यर्थः तावतैव स्वसाधनसमर्थनमात्रेण कृतार्थं मन्यते, द्वितीयवादी तु प्रतिपक्षसाधनं पूर्वपक्षापेक्षया स्वपक्ष एवास्य प्रतिपक्षस्तत्साधनमनिरूप्यैवानुपन्यस्तेत्यर्थस्तावतैव प्रथमवादिसाधनदूषणमात्रेण कृतार्थं मन्यते विजिगीषुवितण्डावज्जल्पवितण्डायामिव ।

एवं चेति । तत्त्वबुभुत्साया अभावे ।

अप्रतिभाद्यनुद्भावनमिति । वादे विधेयम् ।

स चेति । नियोगः ।

कथात्रयपर्यवसितमिति । वादेन ह्यनुत्पन्नस्तत्त्वनिर्णय उत्पाद्यते । उत्पन्नश्च जल्पवितण्डाभ्यां पाल्यते । ततश्च नियोग इति ।

एतावतापीति । कथाविशेषस्यैष नियमस्तिस्र एवेत्यभ्युपगमेनापि ।

युद्धवदिति । जल्पे वितण्डायां च ।

आलिङ्गनवचेति । वादे । प्रीतिपूर्वकत्वाद्वादस्य ।

एतेनेति । नानाप्रवक्तृकेति विशेषणेन ।

महावाक्यमिति । न तु वाक्यमात्रम् । नाना प्रवक्तारो हि महावाक्ये एव स्युः ।

ननु नानाप्रवक्तृका वाक्यसंदब्धिर्महावाक्यं तदा स्याद् यद्यसौ साकांक्षैकप्रयोजनवतीव स्यादित्यत आह—**मिथ इति** ।

विजयाद्येकेति । जल्पवितण्डयोर्विजय एकं प्रयोजनं, वादे निर्णयः ।

स चेति । प्रकर्षः ।

टीयाम् ॥ **एतदप्यर्थादुक्तं भवतीति** । तिस्रः कथा भवन्तीति कथाविशेषनियमं वदता **वार्त्तिककृता** । न हि सामान्यलक्षणाभिधानमन्तरेण [695b] विशेषलक्षणावसर इति कृत्वा ।

उने ॥ **वसतीति ।** नाना प्रवक्तृके विचारे वसतीति ।

वार्त्तिकमिति । वस्तुनः सामान्येनेत्यादिकम् ।

श्रुतिव्यवच्छेद्यतयेति । सूत्रोक्तेनार्थेन साक्षाद्व्यवच्छेद्यतया ।

प्रमाणमूलाभिमतैरिति । प्रमाणमूला भवन्तु, मा भवन्तु परं प्रमाणमूला इति गृहीतैरित्यर्थः ।

तर्कस्येतिकर्तव्यतारूपस्येत्यादेस्तात्पर्यव्याख्या ।

साधने चेति । यदा स्वपक्षः साध्यते, तदा प्रमाणापेक्षेण तर्केण साध्यते । यदा तु प्रतिपक्ष उपालभ्यते तदा प्रमाणनिरपेक्षेणापि तर्केणोपालभ्यते प्रतितर्कप्रतिहतस्य प्रतिकूलतर्केणापहस्तितस्य प्रतिपक्षसाधनस्यासाधनत्वात् । यथा पार्थिवपरमाणवोऽनित्या गन्धवत्त्वाद् घटवदित्युक्ते यदि पार्थिवपरमाणवोऽनित्याः स्युस्तदैते परमाणव एव न स्युरिति प्रतिकूलतर्केण प्रमाणनिरपेक्षेणापि प्रतिपक्षो दूष्यते ।

टीयाम् ॥ तर्कस्येतीति । अवयवानां हि प्रतिज्ञाहेतूदाहरणोपनयानां मूलानि प्रमाणानि शब्दानुमानप्रत्यक्षोपमानानि । तानि च समस्तान्यपि स्वभावप्रतिबद्धलिङ्गरूपैकार्थप्रतिबद्धानि तर्कश्च स्वभावप्रतिबद्धलिङ्गस्यावान्तरव्यापारभावेनानुग्राहको भवन् वस्तुतस्तेषामेवावान्तर-व्यापारभावेनानुग्राहक इत्यतः प्रमाणमूला अवयवास्तर्कमूला अपि भवन्ति ।

तथा च तर्कस्यापीति । यथाऽवयवद्वारेण प्रमाणानां साधनोपालम्भहेतुभावः सिद्धस्तथा तर्कस्यापीति भावः ।

उने ॥ आगामिनमिति । अथैतौ साधनोपालम्भशब्दौ भावसाधनाविति । **वार्त्तिके ।** अस्य च वार्त्तिकस्य पृच्छापरत्वेन भावसाधनत्वस्वीकारोऽर्थो न मुख्यत्वेनेत्यत आह— **इवेति ।**

तद्गताक्षेपस्त्विति । तद्गताक्षेपो भावसाधनसाधनोपालम्भगतप्रश्न उद्देश-**सूत्रे** एव समर्थितप्राय इति सम्बन्धः । कथम् ? प्रमाणतर्कशब्देन कृतकत्वादि यद्ययम-नित्यो न स्यात्कृतकोऽपि न स्यादित्यादिश्च स्ववाचकः शब्दो लक्ष्यते यथा साधनोपालम्भ-शब्देन । तथा चोद्देश**सूत्रे** एव साधनोपालम्भग्रहणस्य शब्दविषयत्वादविरोध इत्यर्थ इति टीकावाक्यम् । यद्वा प्रमाणतर्काभ्यां स्ववाचकः शब्दोऽवान्तरव्यापारीक्रियते । अथवा प्रमाणतर्काभ्यां शब्दप्रतिपादिताभ्याम् । प्रकारत्रयेऽपि प्रमाणतर्काभ्यां स्वप्रतिपादके वचने

लभ्येते। तथा च प्रमाणतर्काभ्यां वचनरूपतापन्नाभ्यां सिद्ध्युपालम्भौ क्रियेते। अतो न कश्चिद् विरोधः।

तद्द्वारा चेति। प्रकृते वादविचारे ये कर्मकरणे कर्मपक्षः प्रतिपक्षो वा करणं साधनं तयोरपि तद्द्वारा प्रमारूपैकफलद्वारेण कर्म्मैव विषयः।

ननु करणस्य विषयः कर्मेति युक्तं विषयविषयिणोर्भेदात् कर्मैव कर्मविषय इति तु विरुध्यते। न ह्येकमेव विषयिविषयश्च स्यादित्यत आह—**इयांस्त्विति।** इयांस्तु भेदः कर्मत्वकर्मविषयत्वयोर्यच्छब्दादेरनित्यत्वं धर्मो जिज्ञासिततया कर्मत्वदशायां वर्तते जिज्ञासितत्वापेक्षया कर्मरूपो भवतीत्यर्थः। स एव च वस्तुतया विषयत्वदशायां वर्तते। पारमार्थिकरूपापेक्षया कर्मसम्बन्धिप्रमालक्षणप्रधानव्यापारविषयत्वेन कर्मविषयो भवतीत्यर्थः।

[696a] **यथाश्रुतवार्त्तिकेति।** तथा च **वार्त्तिकम्,** उपालभ्यमानस्यानुपालभ्यमानस्य च वस्तुनस्तथाभावादिति।

टीयाम्॥ तादृशत्वमिति। अनित्यत्वम्।

अतादृशत्वमिति। नित्यत्वम्।

वार्त्तिके॥ सोऽयमिति उपालम्भः।

प्रमाणैस्तर्केण चेत्यादि। एतेन प्रमाणैस्तर्केण च साधनं च साधनोपालम्भश्च यत्रेत्येवं प्रमाणतर्कसाधनोपालम्भशब्दस्य समासो दर्शितः।

टीयाम्॥ अस्येति। च्छलादिभिः प्रत्यवस्थानस्य।

उने॥ रागत इति। इच्छावशात् सर्वपञ्चनखभक्षणप्राप्ताविव।

पञ्च पञ्चनखा भक्ष्या इति। ते चामी शशकः शल्लकी गोधा कूर्म्मः खड्गी च पञ्चम इति।

तदेतदतिकुशलतयाऽविरोधयन्नाहेति। भाष्यकारेण सर्वनिग्रहस्थानप्रतिषेधे सिद्धान्ताविरुद्ध इत्यादि विशेषविधिरुक्तः। **वार्त्तिककार**स्तु सर्वनिग्रहस्थानप्राप्तौ परिसंख्यार्थमुत्तरपदारम्भ इति व्याख्यातवान्। इत्थं च विरोधस्तं च **टीका-**

कृदसत्युपालम्भग्रहणे इत्यभिप्राय इति वदन् परिहरति । यत उपालम्भग्रहणाभावे **भाष्य-कृता** सर्वनिग्रहस्थानप्रतिषेध उक्तः। अन्यथा तु तस्यापि सर्वनिग्रहस्थानप्राप्तिः सम्मतैवेत्यर्थः।

तथापीति । भाष्यवार्त्तिकयोरविरोधेऽपि ।

अत्रेति । वादे ।

अयमिति । भेदः ।

कथावसानिकमिति । कथाविच्छेदकम् ।

तदभावादिति । अशक्तिसंगूहनाभावात् ।

तेषामिति । हान्यादीनाम् ।

अपर्यवसाययतामपीति । अविच्छिन्दतामपि ।

टीयाम् ॥ तत्प्रयोजनेति । अधिकप्रयोजने ।

उने ॥ तत्सामग्रीति । तत्त्वप्रतिपत्तिसामग्री ।

प्रथम इति । विपरीतप्रतिपत्तिलक्षणस्तत्त्वप्रतिपत्तेः साक्षाद्व्याघातः ।

द्वितीय इति । पारम्पर्यव्याघातः ।

स चेति । आकाङ्क्षितसमभिव्याहारः ।

एतदर्थमिति । तत्त्वप्रतिपत्त्यर्थम् ।

अभिप्रायं नियमयत इति । प्रामाणिकधिया साधनोपालम्भो वादिप्रति-वादिभ्यां प्रयोक्तव्यो नाप्रामाणिकधियेत्येवमभिप्रायं नियमयता हि **सूत्रकृता** तयोस्तत्त्व प्रतिपत्त्यर्थितां दर्शयता यावत्यनुद्भाविते तत्त्वप्रतिपत्तिव्याघातस्तावदुद्भाव्यमिति दर्शितम् । तथा च विरोधाद्युद्भावनं सम्मतम् ।

सूत्रादेवेति । प्रमाणतर्कसाधनोपालम्भ इत्यस्मात् ।

न्यूनादिचतुष्टयमिति । न्यूनाधिकापसिद्धान्तहेत्वाभासरूपम् ।

तथापीति । प्रमाणतर्कग्रहणस्य प्रागुक्तं प्रयोजनमस्तु परमित्यर्थः ।

अस्मिन् पक्षे इति । साधनोपालम्भव्यतिषङ्गपक्षे ।

अस्येति । प्रमाणतर्कग्रहणस्य ।

प्रथमं हेतुमिति । विकल्पानुपपत्तेरित्येनम् ।

द्वितीयविकल्पे पूर्वोत्तरपक्षौ व्याचष्टे—**पूर्व इति** ।

वार्त्तिके ॥ साधनीयः साध्यः स्यादिति । स्वशब्दस्यार्थो यः साधनीयः स साध्यः स्यात्ततश्च साधनीयः स्वपक्ष इति कुत एतत् ? साधनीयार्थश्चेति विशेषणेन साधनीयार्थत्वेनाभिन्नार्थः पक्षः कथं विशेष्यते इत्यर्थः ।

अभिन्नार्थत्वमेव स्पष्टयति—**लक्षणं चैतदिति** ।

साधनीयशब्देनापीति । साधनीयार्थस्वशब्देनापीत्यर्थः ।

टीयाम् ॥ इदं विशेषणपदमिति । स्वेत्येतत् ।

विशेष्यमिति । पक्षम् ।

विशेष्यशब्द इत्यादि । यथा गौर्दुह्यतामित्यत्र गोशब्दः ।

ननु दूषणीयः पक्षः परपक्ष इत्येतदपि न बुध्यामहे । एतावदेव वक्तुमुचितं पक्षदूषणस्यैवायुक्तत्वेन प्रतिपाद[696b]यिष्यमाणत्वात् । तस्मात्साधनीयः पक्षः स्वपक्ष इति किमर्थमुक्तमित्याशङ्क्याह—**विरुद्धेति** ।

युक्तस्यापीति । साधनीयः पक्षः स्वपक्ष इत्यस्यापि ।

वार्त्तिके । ननु परपक्षासिद्ध्यर्थं वचनं वाद इति क्रियमाणे स्वपक्षसिद्धिमात्रप्रयोजनसाधनस्य न वादाङ्गतेत्याशङ्क्याह—**उभयोश्चेति** । साधनस्यापि हि परपक्षविपरीतं साधयतः पारम्पर्येण परपक्षासिद्ध्यर्थतेति तस्यापि परपक्षासिद्ध्यर्थतेत्यनेन संग्रह इत्यर्थः ।

परिभाषेति । सामयिकी संज्ञा । रूढिरिति लोकप्रसिद्धिः ।

द्विवचनं त्विति । स्वपरयोरित्यत्र ।

छत्रदण्डिनाविति । छत्रं दण्डश्चास्य स्तश्छत्रदण्डिनौ ।

टीयाम् ॥ स्वार्थो विशेषणं नावधार्यत इति । यथेष्टविनियोगयोग्यता लक्षणस्य स्वार्थस्य पक्षेऽभावात् ।

अन्यस्मादपि न भिद्यते इति । यथेष्टविनियोगयोग्यतालक्षणः स्वार्थः पक्षेऽविद्यमानत्वादेव तावन्न पक्षाद्भिद्यतेऽन्यस्मादपि न भिद्यते कस्यापि कस्याप्यपेक्षया पक्षे तस्मिन् सर्वत्रापि विद्यमानत्वादेव ।

प्रस्मृत्येति । विस्मृत्य ।

वार्त्तिके ॥ **स्वार्थ** इति स्वीकरणम् ।

टीयाम् ॥ **एतस्येति** स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इत्यस्य ।

वार्त्तिके ॥ **वादविधानमिति** । वादसम्बन्धिलक्षण**सूत्रम्** ।

व्यक्ताविति । ज्ञप्तौ ।

उत्तरमिति । पाठापेक्षया ।

तदेवाह—अधिकरणेति ।

पक्षस्येति । सामान्यनिर्देशात् स्वपक्षस्य परपक्षस्य च ।

नायमिति । षष्ठ्यर्थः ।

पक्ष इति । स्वपक्षः परपक्षश्च ।

टीयाम् ॥ **अन्यासिद्धिरिति** । प्रमाणोपपत्तिरूपा ।

वार्त्तिके ॥ ते किं तावत्सिद्धे पक्षे इति यः पक्षः सिद्धः प्रमाणोपपन्नस्तद्विषयत्वेन । किं ते सिद्ध्यसिद्धी पक्षविषये उच्येते इत्यर्थः । अत्र च यद्यपि ते किं तावत्सिद्धे पक्षे इति विकल्पेऽसिद्धिरपि[1] संगृह्यते तथापि सिद्धिरेव संग्राह्यत्वेन ज्ञेया, सिद्धपक्षविषयाया असिद्धेरसंभवात् । अत एवैतद्विकल्पदूषणे आह—**यदि तावत्सिद्धेनाधिकरणप्रत्ययेन सिद्धिरिति ।**

तत्प्रत्यायनमिति । अधिकरणप्रत्यायनं तदिति ।

तदिति । अधिकरणप्रत्यायनम् ।

---

1 S असिद्धेर°

टीयाम् ॥ **तस्या** इति । तथा तयोः सकाशात् ।

दूषणान्तरम् — **आहेति** ।

पक्षस्येति । षष्ठ्यर्थं सिद्धिद्वारेण दूषितमप्यदूषितमभ्युपेत्यासिद्धिद्वारेणान्यथा दूषयन्नाहेत्यर्थः ।

प्रमाणासम्भवेनापि त्विवतीति । न केवलं प्रयोजनेनोपचारः प्रमाणासम्भवेनापि चोपचार इत्यपि त्वित्यस्यार्थः ।

न दूषणेति । यदि हि दूषणविषयत्वमसिद्धेरुच्यते [1]तदेदं स्थापनया संबध्यते । न पक्षेणेति मुख्यार्थलंघनं स्यात् । यदा तु [2]प्रतिज्ञातार्थाज्ञानमसिद्धिरित्युच्यते, तदा तन्मुख्ययैव वृत्त्या पक्षविषयमिति न स्थापनायां पक्षस्योपचार इति पराभिप्रायः ।

वार्त्तिके ॥ **तदिति** । प्रतिज्ञातार्थाज्ञानम् ।

सिद्धिवत्प्रसङ्ग इति । अधिकरणप्रत्यायनलक्षणासिद्धिरधिकरणे वर्तमाना कथं पक्षस्य स्यादित्येवं यथा सिद्धौ प्रसङ्गस्तथाऽसिद्धावपीत्यर्थः ।

टीयाम् ॥ **आचार्य** आह । **न तु पक्षस्येति** यदि द्रष्टृस्थे एव सिद्ध्यसिद्धी तदा पक्षस्य न स्यातामित्यर्थः ।

तद्विषयत्वादिति । पक्षविषयत्वात् ।

तत्कारणत्वमिति । ज्ञानकारणत्वम् ।

प्रकाशाजननादिति । न हि ज्ञानादतिरिक्तोऽर्थ[७97a]प्रकाशो नाम पदार्थो जायते ।

ननु प्रमाणयोगायोगौ प्रमेयस्य स्यातां प्रमातुः कुतः इत्यत आह—**साधनेति** ।

वार्त्तिके ॥ **ब्राह्मणार्थमिति** । ब्राह्मणानुद्दिश्येत्यर्थः ।

एवं चेति । अर्थशब्दस्योद्देशार्थतायां स्वपक्षसिद्धिमुद्दिश्य साधनरूपं साधनाभासरूपं वा परपक्षासिद्धिमुद्दिश्य दूषणरूपं दूषणाभासरूपं वा वचनं वाद इत्येवं चतुर्विधवाक्यसंग्रहः पराभिप्रेत इति भावः ।

---

1 S तदेवं । 2 J °र्थाज्ञापनम् ।

विशेषितमिति । विशेषणोक्तमित्यर्थः । केन विशेषणेनोक्तमित्याह— **एव-मिति** । कथं विशेषितमित्याह-- **येनेति** ।

टीयाम् ॥ **वचनेति** । सिद्ध्यसिद्ध्यर्थमिति हि वचनस्य विशेषणं बौद्धेनाभ्युपगतं तथा चेत्यर्थः ।

वार्त्तिके ॥ **नैयायिकहेतुप्रतिषेधे इति** । सा उदाहरणसाधर्म्यात्साध्यसाधनं हेतुरिति हेतुलक्षणदूषणे ।

न विशेष्यं वचनमित्यभ्युपगतमिति । साधर्म्यस्य व्यभिचार्यव्यभि-चारित्वाद् विशेषणयोगो न तद्वचनस्याप्रकारवत्त्वादित्यनेन ।

टीयाम् ॥ **अवाचकेति** । औपचारिक ।

स्वस्य पक्षस्येति वाक्यं व्याचष्टे— स्वस्यात्मीयस्य पक्षस्येति ।

न हि पक्षेत्यादि **वार्त्तिकं** विवृणोति—**न हीति** ।

पक्षव्यतिरेकेणेति । पक्षाद्भेदेन ।

अन्यद्वेति । साधनयो रूपम् ।

पुरुषाधारतयेति । **नैयायिक**मते आत्माधारतया, अनाधारतया वेति । **बौद्ध**मते पक्षस्य तु तावदिति सिद्धिशब्दाभिधेयं ज्ञानमन्यद् वा पक्षस्य संबन्धि पुनर्भवेत् ।

वाके ॥ **तदप्रसक्ताविति** । सप्तम्यर्थाप्रसक्तौ ।

विशेषणानर्थक्यमिति । स्वस्य पक्षस्येत्येवं षष्ठ्यर्थेन वृत्तौ विशेषणमनर्थ-कमित्यर्थः ।

टीयाम् ॥ **युक्तायुक्तत्वाभ्यामिति** । सकाशात् ।

न हि करणं कर्म भवतीत्यर्थ इति । साधनदूषणैरिति करणं तच्च युक्ता-युक्तत्वरूपं ते इति कर्म । तदपि युक्तायुक्तत्वरूपम् । तथा च तदेव करणं तदेव च कर्म प्राप्नोति । न चेदं स्यादिति भावः ।

वाके ॥ सूत्रमुद्धार्यमिति । साधनदूषणपदे मुक्त्वा ते इति सूत्रमुद्धरणीयं कार्यमित्यर्थः ।

टीयाम् ॥ उत्पलैरित्युक्तमिति । अन्यथा तूत्पलं नीलैरिति वक्तुमुचितं, नीलशब्दस्य विशेषणत्वात् ।

निरूपणं चेति । साध्यस्यानिर्णयार्थेनेतीति । इति हेतोः ।

वाके ॥ युक्तायुक्तत्वस्येति । युक्तमिति तथात्वातथात्वलक्षणयुक्तत्वाभ्युपगमे युक्तायुक्तत्वस्य कर्मणोऽधिकरणप्रत्यायनमिति युक्तम् । न तु युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति ।

न चेति । न हीत्यर्थः ।

प्राश्निकेति । प्राश्निकप्रत्यायने कृते प्रतिवादिप्रत्यायनं कृतं भविष्यतीत्यधिकरणप्रत्यायनं सिद्ध्यसिद्धी इत्येतत्सन्देहविपर्ययप्रतिषेधार्थः शास्त्रस्यारम्भ इत्यस्य न निरपेक्षं प्रतिवादिनो विपर्ययस्य निषेध्यत्वादिति परस्याशयः ।

टीयाम् ॥ आध्यात्मिकशक्तिसंपन्न इति । पदपदार्थज्ञाता ।

ननु न प्रतिपद्यते इत्यस्यायमर्थो नानुजानीते ततो भिन्नार्थत्वात् प्रतिपद्यमान इत्यनेनास्य व्याघातो न भविष्यतीत्याशङ्क्याह—**न चेनि ।**

उने ॥ अनुविधेयेति । अनुविधेयः सभापतिः । स्थेयाः प्राश्निकास्तद्रूपा ये सभ्यपुरुषास्तद्वती ।

वादस्थानेति । वादस्थलम् ।

कारणग्रहणेति । कारणेन शब्दानित्यत्ववादस्थले अहं निपुणः । [697b] प्रतिवादी त्वनिपुणः । तथा जल्पे अहमनल्पाभ्यासो न तु वादादावित्यादि बुद्ध्या यो ग्रहः शब्दानित्यत्वमेव जल्पे एवाहं स्थापयिष्ये इत्येवंरूपस्तेन ।

एवं कर्तुमशक्तौ । वादस्थानव्यवस्थापनादि कर्तुमशक्तौ ।

उक्तकर्मणीति । वादस्थानव्यवस्थापनादीनि ।

टीयाम् ॥ चोदयतीति बौद्धः ।

आशयस्थितमिति बौद्धस्य ।

अर्थमिति । वादाज्जल्पवितण्डयोरभेदलक्षणम् ।

स्वाभिप्रायं दर्शयतीति । वादस्य जल्पवितण्डाभ्याममेद इत्येवंरूपं स्वाभिप्रायं **बौद्धः** प्रकटयति । यावदाकांक्ष्यते तावता पूरयित्वा तद्वाद इति **वार्त्तिकं** व्याख्यातुं गृह्णाति ।

यदीति । अत्र सन्तीत्यनन्तरं तदेति ज्ञेयम् ।

कस्य च तयोर्वादस्येति । कश्च तयोर्वादिप्रतिवादिनोर्वादो यस्य परीक्षेत्यर्थः ।

॥ इति वादलक्षणं पूर्णम् ॥

उने ॥ अयमिति । वक्ष्यमाणः । उच्यमानग्राह्यनिग्रहादीनग्रे स्वयमेव कथयिष्यति ।

तद्वचनार्थमिति । वादिवचनार्थम् ।

स्थापनामिति । पञ्चावयवं वाक्यम् ।

दूषितपक्ष इति । दूषितपरपक्षः ।

तस्मिन्निति । प्रतिवादिनि ।

अनुक्तोच्यमानग्राह्येति । अनुक्तग्राह्योच्यमानग्राह्य ।

तद्वचनमिति । प्रतिवादिवचनम् ।

स्थापनांशमिति । प्रतिज्ञादिकम् ।

तद्वाणेति । तस्य मूर्छितस्य बाणवारणं च तस्मिन् मूर्छिते प्रहरणानुष्ठानं च तद्वत् ।

अनुक्तग्राह्यमिति । अनुक्ते उत्तरे ग्राह्यम् ।

अप्रतिभादीत्यादिपदादज्ञानादिग्रहः ।

उच्यमानग्राह्यमिति । उक्त्यपरिसमाप्तावेव ग्राह्यम् ।

अप्राप्तकालादित्यादिपदात् निरर्थकादिग्रहः ।

आभासेति । हेत्वाभासेभ्यो बहिर्भूतमुक्तग्राह्यमुक्तौ परिपूर्णायां ग्राह्यम् । प्रतिज्ञाविरोधादीत्यादिपदादपसिद्धान्तादिग्रहः ।

एष्वसत्स्विति । अनुक्तग्राह्यादयो यदि न लभ्यन्ते तदैव हेत्वाभासादयश्चिन्त्यन्ते ।

ततः पुनरिति । आद्यवादिना साधने उक्ते द्वितीयेन दूषिते ततः पुनराद्यवादिनि प्रतिदूषयितुं प्रवृत्ते हेत्वाभासबहिर्भूतोक्तग्राह्यस्य प्रतिज्ञाहानिप्रतिज्ञान्तरादेश्चिन्ता । इदमुक्तं स्यात् । प्रतिज्ञाहान्यादि तृतीयकक्षादौ पतति । चतुर्थकक्षादावुद्भाव्यते इति ।

तद्भङ्गेनेति । **भाष्य**भङ्गेन ।

टीयाम् ॥ **तदर्थे** इति । **सूत्र**पदार्थे ।

तस्येति । **सूत्र**पदार्थस्य ।

उने ॥ **यद्यप्यपरोधेति** । यद्यपि आत्मीयाशक्तिगोपनाय प्रतिज्ञाहान्यादीनां केषाञ्चिन्निग्रहस्थानानामपि प्रयोज्यता संभवति, तथापि न सर्वेषाम् । किं च प्रतिज्ञाहान्यादिभिरपि तदैव प्रत्यवस्थेयं यदि छलादिभिः प्रत्यवस्थातुं न शक्यते परेण, निग्रहोद्भावने महानपराधः प्रयोक्तुश्छलोद्भावने स्वल्प इति कृत्वा । तस्मादुद्भाव्यतयैव न प्रयोज्यतया अमीषां निग्रहाणां सर्वेषामवतारः ।

तथा चेति । उद्भाव्यतयैवावतारे ।

टीयाम् ॥ **तेषामिति** । छलादीनाम् ।

तत्त्वमिति । परसाधनविघातासामर्थ्यस्वरूपम् ।

उने ॥ **किमधिकमभिहितमिति** । **वार्त्तिककृता** ।

तेनापि इति । न केवलं **भाष्यकृता वार्त्तिककृतापि** ।

तदपीति । **भाष्यम्** ।

एवमेवेति । वार्त्तिकरीत्या ।

प्रयोजनतयेति शेष इति । एतेन छलादिव्युत्पादनं प्रयोजनमुद्दिश्य शास्त्रकाराणां [698a] प्रवृत्तिर्नानुचितेति **टीकार्थः** संपन्नः ।

टीयाम् ॥ ननु यदि तत्त्वसंरक्षणार्थत्वात् शास्त्रकाराणां छलादिव्युत्पादनं नानुचितं तर्हि दृढमुष्ट्याद्यभिधानमपि प्राप्नोति ।

दृढमुष्ट्यादिनामभिघातेऽपि तत्त्वसंरक्षणादित्यत आह—**न चेति** ।

॥ इति जल्पलक्षणं संपूर्णम् ॥

उने ॥ **पुरुषशक्तेरप्यनिरूपणादिति** । वितण्डायाः पुरुषशक्तिनिरूपणफलत्वेन तत्त्वस्य निरूपणं तावन्नास्त्येव । एकसाधनतायां तु पुरुषशक्तेरपि निरूपणं न स्याद् द्वितीयसाधने हि पुरुषशक्तिर्निरूप्यते इत्यर्थः ।

तथात्वे वेति । एकसाधनतायामपि पुरुषशक्तेर्निरूपणे ।

प्रयासबहुलेनेति । प्रतिपक्षस्थापनाप्रयासप्रचुरेण । वितण्डायाः प्रतिपक्षस्थापनाहीनत्वासांगत्ये हेत्वन्तरमाह—**अन्तत** इति ।

पुरुषशक्तीति । यद्यपि जल्पे वितण्डायां च पुरुषशक्तिनिरूपणमविशिष्टं तथापि जल्पे प्रत्यपेक्षास्वपक्षरक्षा पराघातश्च परपक्षनिरासस्तद्विषयोभयशक्तिनिरूपणात् ।

दशरथेति । यथा रामेन्द्रजितो रात्र्यवस्कन्दे रामस्य स्वपक्षरक्षा शक्तिः, इन्द्रजितश्च पराघातनैपुणं निरूपितम्, एवं काकोलूकयुद्धेऽपि योज्यम् ।

इति न किञ्चिदेतदिति । इति हेतोरेतदेकसाधनतायां पुरुषशक्तेरप्यनिरूपणादिति न किञ्चित ।

द्वितीयं हेतुं दूषयति—**द्वितीयेति** । शब्दोऽनित्यः कृतकत्वाद् घटवदित्येवंवादिना साधने उपन्यस्ते अयं हेतुः शब्दो नित्यः श्रावणत्वात् शब्दवदित्यनेन सत्प्रतिपक्ष इत्येवं दूषणतया द्वितीयसाधनप्रवेशो न निषिध्यते । किं तु स्वपक्षस्थापनात्वेन निषिध्यते ।

न चायं नियम इति । द्वितीयसाधनप्रवेशेनावश्यंभाव्यमिति नियमो नास्ति ॥

टीयाम् ॥ **तत्स्थापनेति** । परपक्षस्थापना ।

तेनास्य पक्षोऽस्ति नास्ति च पक्षे स्थापनेति । पक्षस्य च सत्त्वात् प्रतिपक्षहीन इति विशेषणमसंभवद्बाधितं प्रतिपक्षस्थापनाहीन इति तु संभवति, तस्या अभावादिति भावः ।

तस्मादिति । यस्मान्मात्रशब्दप्रयोगाद् वैतण्डिकस्य पक्षो नास्ति तस्मात् ।

चतुर्वर्गेति । दूष्या यथार्थावबोधप्रतिपादयितृप्रतिपत्तृलक्षणा ।

उने ॥ **एवमस्त्विति** । वितण्डा वितण्डेत्येतदेवास्तु ।

मात्रग्रहणादिति । वितण्डामात्रं वितण्डेत्येवंकरणात् ।

तन्निवृत्तिरिति । अतिव्यापकत्वनिवृत्तिः ।

तेनेति । मात्रग्रहणेन साधनानिवृत्तिमेव भावयति । तत्र जल्पे स्वपक्षस्थापनपरपक्षदूषणसमुदायरूपे ।

॥ इति वितण्डालक्षणपूर्त्तौ कथाप्रकरणं पूर्णम् ॥

॥ हेत्वाभासलक्षणप्रकरणम् ॥

[१.२.४-९]

उने ॥ सदुत्तरेति सदुत्तराणि हेत्वाभासाः ।

असदुत्तराणि छलादीनि ।

टीयाम् ॥ अर्थाक्षिप्तेति अर्थाक्षिप्तं सामान्यलक्षणं यत्र तत् ।

वाके ॥ सामान्यविशेषवत्त्वे सतीति । शब्दत्वव्यवच्छेदायेदम् ।

टीयाम् ॥ अत एवाह घटादिवदितीति । आकाशादिसपक्षसंग्राहकमादिशब्दमाहेत्यर्थः ।

वाके ॥ अगौरयमिति । अयं सास्नाककुदादिमान् पदार्थोऽगौः ।

सिद्धान्तभेदाश्रयणेनैकान्तवादिन इत्येतच्चतुर्दशं हेत्वाभासं यावदनुवर्त्यम् ।

सिद्धान्तभेदाश्रयणेनेति । एतदपि चतुर्दशं साध्यैकदेशवृत्तिं यावदनुवर्त्यम् ।

टीयाम् ॥ तत्पुरःसर[698b]**मुदाहरणं रूपादिवदितीति ।** अमूर्तत्वं यत्रास्ति तद्वेदनाद्यादिपदेन संगृहीतमित्यर्थः ॥

नित्ये शब्दत्वे न वर्तते इति । एतेनाश्रावणत्वस्य विपक्षैकदेशवृत्तित्वं दर्शितम् ।

वाके ॥ सिद्धान्तभेदाश्रयणेनेति । एतत्पञ्चदशं साध्यवृत्तिं यावत् ज्ञेयम् ।

विद्यमानसाध्यधर्मा इति पक्षे व्याप्त्यव्याप्तिभ्यां विद्यमानाश्च ते साध्यधर्माश्चेति समासः ।

टीयाम् ॥ उभयान्यतरसन्दिग्धतया चेति । उभयस्य मध्ये योऽन्यतरो वादी प्रतिवादी वा तस्य सन्दिग्धतया ।

उने ॥ सवेति । व्यापकाव्यापकभेदेन द्विषोडशी । एवमग्रेऽपि ज्ञेयम् ।

असामर्थ्यं वादिनः प्रतिवादिनश्चोभयस्यापि संमतं नैकतरस्येत्यत आह—असिद्धिसन्देहयोर्वादिप्रतिवादिसंबन्धादि ।

अन्यतरासिद्धयेति । अन्यतरासिद्धयोपलक्षिता ।

द्विषोडश्या अन्यतरासिद्धेति विशेषणस्य ध्रौव्ये इत्यर्थः । अन्यतरसामान्यमात्रं चात्र विवक्षितम् । न तु वादिप्रतिवादिविशेषः । अन्यथा वाद्यसिद्धप्रतिवाद्यसिद्धतया द्विषोडश्याश्चतुःषष्टिसंख्याया व्यधिकरणविशेषणव्यधिकरणविशेष्यव्यधिकरणसन्दिग्धविशेषणव्यधिकरणसन्दिग्धविशेष्यव्यधिकरणासमर्थविशेषणव्यधिकरणासमर्थविशेष्यभेदेनाष्टाविंशकशतत्रये द्वानवतं शतमित्युक्तं संख्याया अतिक्रमो भवेत् ।

टीयाम् ॥ उभयान्यतरपक्षाप्रसिद्धयेति । उभयत्र वादिप्रतिवादिद्वयस्यान्यतरस्य चैकतरमात्रस्य या पक्षाप्रसिद्धिस्तया । अन्यतरमात्रमत्र विवक्षितम्, न तु वादिप्रतिवादिविशेष इति । अन्यथा अत्रापि द्विषोडश्या उभयाप्रसिद्धाश्रयविशेष्यवाद्यप्रसिद्धाश्रयविशेषणविशेष्यप्रतिवाद्यप्रसिद्धाश्रयविशेषणविशेष्यभेदेन चतुःषष्टित्रये अष्टाविंशकं शतमित्युक्तसंख्याया अतिक्रमो भवेदिति भावः ।

उने ॥ आश्रयासिद्धविशेषणेति । आश्रयासिद्धेति विशेषणं यस्याः सा तथा ।

द्विषोडश्या असिद्धाश्रयेति । विशेषणध्रौव्ये इत्यर्थः । अत्राप्यसिद्धाश्रयत्वमात्रं विवक्षितम्, न तु विशेषः ।

अपरमिति । द्वानवतं शतम् ।

टीयाम् ॥ अग्निमान् प्रदेशो धूमवत्त्वादिति । अत्र हि धूमवत्त्वस्य धूमेन विशेष्यस्य संबन्धस्याश्रयो देश उभयासिद्धः ।

अन्यतरासिद्धाश्रयोदाहरणमिति । अन्यतरासिद्धाश्रयविशेष्योदाहरणमित्यर्थः ।

अस्ति चात्मेति । अत्रापीच्छागुणत्वस्येच्छादिगुणैर्विशेष्यस्य संबन्धस्याश्रय आत्मा अन्यतरस्य **बौद्धस्यासिद्धः ।**

असमर्थाव्यापकासिद्धविशेषणानामुदाहरणमिति । व्यक्त्यपेक्षयात्र बहुवचनम् , द्वितीयद्वानवतशतमध्यवर्तिनोऽव्यापकव्यधिकरणासमर्थविशेषणस्येदमुदाहरणमित्यर्थो व्यधिकरणतया असिद्धस्य व्याख्यानात् ।

असमर्थाश्चेति । असमर्थादीनां विशेषणैः सामानाधिकरण्येऽपि असमर्थाश्च ते इत्येवं विग्रहः स्वविशेषणैः सह अभिन्नान् हेतून् विवक्षित्वा । तस्मादसमर्थानि च तानि व्यधिकरणतया असिद्धानि च तानि विशेषणानि येषामित्येवं कर्मधारयगर्भो बहुव्रीहिः ।

वैभवेन त्वसिद्धतावर्जमिति । असिद्धतोदाहरणानि बाहुल्येन दृश्यन्ते इत्यतो व्यापकासिद्धविशेषणविशेष्या न व्यापकासिद्धविशेषण[699a]विशेष्यांश्चानुदाहृत्येत्यर्थः ।

अव्यापकासमर्थविशेष्याणामिति । प्रथमद्वानवतशतवर्तिनाम् ।

केवलव्यधिकरणविशेष्याणामिति । द्वितीयद्वानवतशतवर्तिनाम् । व्यधिकरणसमर्थविशेष्यव्यधिकरणसन्दिग्धविशेष्या अपि व्यधिकरणविशेष्या भवन्ति, अतस्तद्व्यवच्छेदाय केवलेति ।

समुदायेति । रूपादयः समुदायिनः चन्दनं समुदाय इत्येवं रूपादीनामर्थानां समुदायसमुदाय्यसंभवे चन्दनस्य रूपादय इत्येवं व्यपदिश्यमानत्वात् । दर्शयितुमिति ।

दर्शयिष्यामीति । व्यधिकरणविशेष्यमिति द्वितीयद्वानवतशतस्थम् ।

सन्दिग्धविशेषणमिति । प्रथमद्वानवतशतस्थमुदाहरति । एकेनैवोदाहरणेनेत्यर्थः । एतेनोक्तानां भेदानामेवं मीलनमपि ज्ञापितम् ।

तन्त्रेणेति । एकोक्त्या एकप्रयत्नेन ।

उने ॥ सन्दिग्धेति । द्विषोडश्याः सन्दिग्धेत्यस्य विशेषणस्य ध्रौव्ये ।

अपरमिति । द्वानवतं शतम् । अग्रेऽप्यपरशब्दस्यायमेवार्थः ।

इयमेवेति । द्विषोडशी सन्दिग्धैव ।

इयमेवेति । अन्यथासिद्धा द्विषोडशी ।

वाके ॥ हेत्वाभासवार्त्तिके इति । **वार्त्तिककार**कृते शास्त्रे ।

उपेत्येति । अभ्युपगम्य तु ।

तस्येति । विरुद्धाव्यभिचारिणः ।

उने ॥ ननु पञ्चमस्य हेत्वाभासस्य कालात्ययापदिष्टस्य स्वरूपं **वार्त्तिके** न किञ्चिदुक्तम्, तत् कुत इत्याशङ्क्याह—**कालात्ययेति** ।

अत्र चेति । एतेषु पञ्चसु हेत्वाभासेषु ।

कालाभावादिति । अनुमानकालो हि संशये सति । विपरीतप्रमाणावच्छिन्ने तु संशयो नास्त्येवेत्यतः कालातीतस्य प्रयोगकाल एव नास्ति यत इत्यर्थः ।

देशवत्त्वेत्यादि । देशवत्त्वं पक्षधर्मतावस्था असत्प्रतिपक्षत्वेनावस्थितिरविरोधोऽबाधितविषयत्वं सामर्थ्यं व्याप्तिः । एतानि च कथं विचार्यन्ते, यदा हेतुः स्वयमेव नास्ति ?

अवस्थाभावादिति । सत्प्रतिपक्षत्वेनावस्थानाभावात् ।

यस्त्वेवमिति । विरुद्धः ।

विच्छेदेति । साधनस्य साध्येन वियोगमात्रसिद्धौ ।

तदितरेति । तस्मादसत्प्रतिपक्षत्वादितराणि द्वितीयस्यापि सत्प्रतिपक्षत्वेनासत्प्रतिपक्षत्वं रूपं मुक्त्वा यान्यन्यानीत्यर्थः । समस्तानि चत्वारि रूपाणि तैः संपन्नम् ।

अन्यदिति । अनुमानम् ।

असिद्धाश्रयोऽपीति । यत् क्रमयौगपद्यरहितं तदसद् यथा वाजिविषाणम् । क्रमयौगपद्यरहितं चाक्षणिकमित्यत्र क्रमयौगपद्यराहित्यं हेतुर्बौद्धमते हेत्वाश्रयस्याक्षणिकस्याभावात् असिद्धाश्रयोऽपि तैर्हेतुत्वेन प्रतिपन्नस्तन्मतनिरासावष्टम्भेन ।

बाधकस्येति । वह्न्यनौष्ण्यादिसाधककृतकत्वाद्यनुमानबाधकस्य वह्न्यौष्ण्यादिग्राहिणः प्रत्यक्षादेरौष्ण्याद्यविनाभूतत्वेन ॥

टीयाम् ॥ **न हेतुरैकान्तिक** इति । ऐकान्तिकशब्देन हेतुर्नोच्यते ।

तदन्यत्वेनेति । न ऐकान्तिकोऽनैकान्तिकः । कोऽर्थः ? हेतोरन्य इत्येवं **हेतोरन्यत्वेन** ।

उने ॥ व्यतिरेकपक्षे उभयपक्षगामीत्यघटमानकमित्यत आह—**उभयेति** ॥

साधारणेति । विपक्षगामी साधारणः सति सपक्षे विपक्षे च पक्षमात्रवृत्तिरसाधारणोऽसति सपक्षे विपक्षे च पक्षमात्रवृत्तिरनुपसंहार्यः ।

बोधाभासेति । हेतुरैकान्तिको हेत्वाभास अनैकान्तिक इत्येवंरूपो बोधाभासः ।

नन्वन्यत्रेति । सर्वोऽयं पदार्थभेदात् तद्द्वयेऽवतिष्ठते, अन्यत्र प्रमेयादित्य-
[699b] त्रान्यत्रप्रमेयादित्यस्यायमर्थः । प्रमेयोऽन्तद्वये नावतिष्ठते । तच्चासङ्गतम्, यतः प्रमेयस्यापि साध्यस्तद्विपर्ययश्चान्तद्वयमस्त्येव । अथान्यत्र प्रमेयादित्यस्यायमर्थोऽन्वयतो व्यतिरेकतो वा प्रमेयः । तत्रान्तद्वये न नियतो न नियततया अवतिष्ठते, तथापि न प्रमेय एव । एवंभूतोऽन्तद्वयेऽनियतः । किं तर्हि ? सर्वेऽप्यनैकान्तिकाः अन्तद्वयेऽनियता एव । तस्मादन्यत्र प्रमेयादित्येवं प्रमेयस्यैव वर्जनमयुक्तं विशेषाभावात् । अथानैकान्तिकानां प्रमेयस्य चान्तद्वयेऽनैयत्येनाविशेषेऽपि यदन्यत्र प्रमेयादित्यनेन प्रमेयस्यैवान्तद्वये नैयत्यवर्जनं तदुदाहरणार्थम् । प्रमेयवत् सर्वेऽनैकान्तिकाः अन्तद्वये नियततया नावतिष्ठन्त इति । तदप्ययुक्तम् । कुत इत्याह—**नित्यश्चेति** । यद्यन्यत्र प्रमेयादित्येतदनैकान्तिकोदाहरणमात्रपरम्, तदा ह्यनेन प्रमेयवत् सर्वोऽप्यनैकान्तिकोऽन्तद्वये नियततया नावतिष्ठते इत्ययमर्थः प्रतिपाद्यः । स चार्थो नित्यश्चानित्यश्च व्यापकश्चाव्यापकश्च प्रमेय इत्येवं संग्राह्यकोटावनैकान्तिकरूपेण प्रमेयस्योपदर्शने [1]मुखेन प्रतिपाद्यत एव । तथाहि य एवार्थः प्रमेयवत्सर्वोऽप्यनैकान्तिकोऽन्तद्वये नियततया नावतिष्ठते इति स एवार्थः । सर्वोऽयं सव्यभिचारः पदार्थभेदोऽन्तद्वयेऽवतिष्ठते । कथम्? नित्यश्चानित्यश्च व्याप्यश्चाव्यापकश्च प्रमेय इति । न चानैकान्तिकस्वरूपेण संग्राह्यकोटौ प्रमेयो दर्शितः । तस्मादुदाहरणमात्रार्थत्वेऽप्यन्यत्र प्रमेयादित्यसंगतमेवेत्यर्थः ।

वाके ॥ अन्तद्वयमेवाह—**नित्यश्चेत्यादि** । अयमर्थः । कश्चित् पदार्थो नित्यः कश्चिदनित्यः । एवं कश्चिद् व्यापकः कश्चिदव्यापकः ।

अन्यत्र प्रमेयादिति । प्रमेयमन्तद्वयमध्यवर्ति न भवति, अप्रमेयरूपस्य द्वितीयस्यान्तस्याभावात् । अतोऽनैकान्तिकस्य हेतोः प्रमेयत्वादिः साध्यो धर्मो न भवति हेतुतयोपात्तस्त्वन्तद्वये अवतिष्ठमानोऽयमपि अनैकान्तिकः स्यादेवेति ।

---

1 S सुखेन

अमुमेवार्थमाह **उदयनः तदयं वार्तिकार्थ** इति । सर्वोऽयमित्यादेः सोऽनै-कान्तिक इत्यन्तस्य **वार्त्तिक**स्यार्थः ।

विषयविवेचनमेव स्पष्टयति—**व्यतिरेकिण्येवेति** । नित्यत्वादौ ।

अव्यतिरेकिणीति । प्रमेयत्वादौ ॥

टीयाम् ॥ **कस्यचिद् वस्तुन** इति । ब्राह्मणोऽयं न भवतीयुक्ते ब्राह्मणाभावविशिष्टं क्षत्रियादिवस्त्वेव प्रतीयत इति भावः ।

ननु यदि वैधर्म्ये बुद्ध्यादिभिर्व्यभिचारः, तर्हि **भाष्यकृता** किमिति नोक्तः ? तत्राह—**साधर्म्येणापीति** ।

एभिरेवेति । बुद्ध्यादिभिः ।

इहैवेति । वैधर्म्ये ।

तथापीति । नित्यत्वेनास्पर्शत्वे साध्येऽपि ।

इत्यर्थ इति । स्पर्शनाधारस्येत्यादेः तत्र प्रयुज्यते इत्यन्तस्य **वार्तिक**स्य ।

श्रोत्रियपदवदिति । यथा श्रोत्रियपदस्य छन्दोऽधीते इति वाक्यार्थे प्रयोगः । अथवा,

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया चापि विप्रत्वं श्रोत्रियस्त्रिभिरेव तु ॥

[मनुसं°......मार्कण्डेय पु°......पाद्मोत्तरखण्डे ११६ अ°]

टीयाम् ॥ **इति न हेत्वाभास** इति । इति हेतोः चेतनो न हेत्वाभासः । हेत्वाभासाश्चात्र प्रकृताः ।

न चेति । चोऽभ्युच्चये । किं चेत्यर्थः ।

उने ॥ **एतस्मिन्निति** । उक्तलक्षणे विरुद्धे ।

तयोरिति । विरोधापसिद्धान्तयोः ।

अयं[1]वेति । विरुद्धो वा निरवकाशः । विरोधो [700a] हि भवन् स्ववचनेन वा, अभ्युपगतदर्शनेन वा । यद्याद्यस्तदा विरोधोऽथान्यस्तर्हि अपसिद्धान्तः । ततो नास्या-वकाशः ॥

विशेषविरोधोऽपीति । महाभूतचतुष्टयं बुद्धिमत्कर्तृकं कार्यत्वात् घटवदित्यत्र कार्यत्वादिति हेतुर्दृष्टान्तानुसारेण शरीरिकर्तृत्वं विशेषं साधयन्नशरीरी सर्वज्ञ ईश्वरः कर्तेत्यादि-सिद्धान्तं व्याहन्तीत्युक्तलक्षणोपपत्तेर्विशेषविरोधोऽपि विरुद्धः स्यादित्यर्थः ।

प्रकृतहानमिति । पक्षविरुद्धहानम् । अभ्युपेत्येत्यनेनेति **सूत्र**पदेन ।

तथाभूतेनेति । आभिप्रायिकेण विशेषेण ।

असिद्धिदशायामिति । यदा साध्यं सकर्तृकत्वं न सिद्धं तदाभिप्रायिकस्य सर्वज्ञत्वादेर्विशेषस्यानुपलम्भ एव, यदा च सिद्धं तदाभिप्रायिकविशेषाविनाभूतसिद्धित्वा-द्विशेषस्य सहोपलम्भः तथा च विशेषेण विरोधस्यानवसर एव ।

एवंभूतस्येति । असिद्धिदशायामनुपलब्धस्य ।

प्रकृतेति । सकर्तृकत्वम् ।

तत्सिद्धेरिति । आभिप्रायिकविशेषसिद्धेः ।

विशेष इति । शरीरत्वादिः ।

नाभिप्रायगोचरेऽपीति । अनुपपादुको विशेषः ।

तदापीति । स्वार्थानुमानकालेऽपि ।

अनुपलब्धचर इति । अभिप्रायीकृतो विशेषः ।

आकाङ्क्षेति । आकाङ्क्षादिसंपत्तौ सत्यां यथा पराभिप्रायेण पदार्थाः । स्वमते तु पदानि अपूर्वार्थप्रतिपादनविषयोऽपह्नोतुं न शक्यन्ते । अपूर्वं वाक्यार्थं प्रतिपादयन्ती-त्यर्थः । तथा व्याप्तिपक्षधर्मतयोर्माहात्म्यमप्यनुपलब्धचरमर्थं प्रतिपादयतीति वाक्यार्थः ।

ययोरिति । नित्यत्वकृतकत्वयोः ।

परस्परधर्मिपरिहारेणेति । नित्यत्वं कृतकं धर्मिणं परिहरति कृतकत्वं च नित्यं धर्मिणमिति ।

---

1 S चे

ननु विरोधे यदा हेतुर्नास्ति तदा असिद्धो भवतु । यदा च साध्यं नास्ति तदा कालात्ययापदिष्टोऽस्तु । यदा तु तुल्यबलयोर्विरोधात् किमत्र हेतुर्नास्ति किं वा साध्यमित्येवमेकतरस्यानिश्चयस्तत्र विरुद्धस्यावकाश इत्याशङ्क्याह—**अन्यतरेति ।**

अयमेवेति । हेतुरेव ।

तद्बाधने इति । हेतुबाधने ।

दैवतस्तत्प्रतीकारे इति । यदि कथमपि प्रतिवादी प्रतिवाद्युद्भावितमसिद्धत्वदूषणं स्वप्रयुक्तविरुद्धहेतोरुद्धरेत् तदा प्रतिवादिनो निरनुयोज्यानुयोगापत्तिः, तथा विरुद्धत्वादयमसिद्ध इत्येवं विरोधद्वारेणैवासिद्धिरपि व्यवस्थाप्या । तथा च विरोधोद्भावनमावश्यकमिति ।

ननु यदीत्थमभ्युपगतेन बाध्यते इत्येतदपि **वार्त्तिकं** सुगमं तर्हि किमिति **टीकाकारः** स्वरूपेण हेतुत्वेन चेत्यर्थ इत्येवं व्याख्याति । तत्राह—**उत्तरवार्त्तिकेति ।** उत्तरं च **वार्त्तिकं** हेतुस्वरूपबाधकरूपेणेत्येतत् ।

टीयाम् । तं विरुणद्धीत्यादि भाष्यमिति । विरोधस्य द्विष्ठत्वात् पक्षं हेतुर्बाधते, पक्षेण वा हेतुर्बाध्यते इत्यर्थपरम् ।

हेतुत्वबाधादिति । हेतुत्वस्य कर्मणो बाधात् ।

ईदृशेति । हेतुत्वबाधरूपेण ।

भूतसूक्ष्मेति । द्व्यणुकानि ।

धर्मलक्षणावस्थापरिणाम इति । धर्मलक्षणावस्थापरिणामभेदात् त्रिधा वस्तूनां परिणामः । तथा हि सुवर्णं धर्मि तस्य धर्मपरिणामो वर्धमानरुचकादिः । धर्मस्य तु लक्षणपरिणामोऽनागतत्वादिः । यदा वर्धमानभङ्गे रुचकाद्युत्पद्यते तदा वर्धमानस्य वर्तमानतालक्षणनिवृत्तौ[700b]अतीतलक्षणता आपद्यते । रुचकादिस्त्वनागतलक्षणनिवृत्तौ वर्तमानतापत्तिर्वर्तमानतापन्नस्य तु रुचकादेर्नवपुराणादिरवस्थापरिणाम इति **स्वायम्भुवाः सांख्य**विशेषाः ॥

उने ॥ अत्रोदाहरणभाष्यमित्यादीति । अत्रादिपदेनोक्तमित्यर्थ इत्यन्ताया **टीकायाः** संग्रहः । तत्र चोक्तमित्यर्थ इत्यन्तरितेरर्थस्य च मध्ये **भाष्यस्येति** शेषः तदेतेनात्रोदाहरण**भाष्य**मित्यादि उक्तमित्यन्तं **भाष्य**स्यार्थ इत्युक्तं स्यात् ॥

टीयाम् ॥ **विरोधस्य द्व्याश्रयत्वादिति** । सिद्धान्तेन हेतुर्व्याहन्यते इत्यर्थपरं सिद्धान्तेन विरुध्यते इत्येतदभिधाय यद् **भाष्य**कृता तमेव व्याहन्तीत्यनेन सिद्धान्तं व्याहन्तीत्युक्तं तद्विरोधस्य द्व्याश्रयत्वमाश्रित्येत्यर्थः ।

ब्रुवाण इति । अयं हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन सिद्धान्तेन विरुध्यते इति वाक्येन **भाष्यकारः** ।

अत्र चार्थे इति । द्वितीय व्याख्याने ।

भाष्यं सुगममिति । सोऽयं विकारो व्यक्तेरपैतीत्यस्याः प्रतिज्ञाया व्यक्तेरपेतोऽपि विकारोऽस्तीत्यस्मिन्नर्थे स्वसिद्धान्तेन इत्यस्य स्वपक्षेणेत्यस्मिंश्चार्थे **भाष्य**काराभिप्रेते प्रकटिते सति ।

उने ॥ **एतस्येति** । विरुद्धस्य ।

विरोधवैभवेन चेति । विरोधबाहुल्येन ।

एकार्थेति । एकस्यार्थस्य यौ भावाभावौ तद्विषयतया ।

स चेति । विरुद्धो हेत्वाभासः ।

स्वभावेति । त्रिष्वेषु भेदेषु साध्यस्येति ज्ञेयम् । अग्रेतनयोस्तु द्वयोर्निषेद्धव्येति ।

तद्वत्तयेति । वह्निमत्तया ।

टीयाम् ॥ **हेतोरपीति** । यदा हि हेतुरन्यतरासिद्धः, तदा प्रतिज्ञयान्यतरासिद्धया तुल्यबलत्वम्, तदभिप्रायेण **वार्त्तिककृतोक्तं—यदा प्रतिज्ञया विरोध** इति । न पुनः प्रतिज्ञया हेतुविरोधस्यापि विरुद्धहेत्वाभासत्वं प्रतिपादयितुम् । तेन यदा प्रतिज्ञेत्यादेर्विरुद्धो हेतुरित्यन्तस्य **वार्त्तिक**स्यायमर्थः । यत्र प्रतिज्ञाहेत्वोः समबलत्वं तत्र प्रतिज्ञया हेतुबाधविवक्षायां प्रतिज्ञाविरोधो निग्रहस्थानम् । हेतुना प्रतिज्ञाबाधविवक्षायां तु विरुद्धो हेत्वाभासः । यत्र तु हेतुरुभयसिद्धत्वादिना बलिष्ठस्तत्र विरुद्ध एव हेत्वाभास इति । अत एव **वार्त्तिककृत्** तथैवोदाहरति ।

प्रतिज्ञाहेत्वोर्विरोधोदाहरणं **गुणेति** ।
हेतुविरोधोदाहरणम्—**नित्य** इति ॥

उने ॥ **तत्तयेति** । हेत्वाभासतया ।

अथेतरफलव्यवच्छेदेन जिज्ञासां फलं दर्शयन् प्रकरणसममितरेभ्यो हेतु[हे]त्वाभासेभ्यो व्यवच्छिन्नं दर्शयति—**तथा हीति** ।

पक्षे इति । समबलेन बाधकेन सह प्रवृत्तिर्यस्य तस्मात् सत्प्रतिपक्षात् न पक्षे साध्यतत्त्वनिर्णयः । एतेन हेतुतो व्यवच्छेदोऽस्य ।

तत इति । सत्प्रतिपक्षात् ।

अनुसन्धानेनापीति । प्रतिपक्षानुमानस्यानुस्मरणेनापि ।

अगृह्यमाणेति । अधिकबलेन हि प्रमाणेन व्याप्तिबाधः । सत्प्रतिपक्षस्तु यावद्विशेषो न गृह्यते तावत् समबलः ।

नाप्यज्ञानमेवेति । नापि सत्प्रतिपक्षात् साध्यस्य ज्ञानाभाव एव ।

नापि विपरीतज्ञानमिति । नापि सत्प्रतिपक्षात् साध्यस्य विपर्ययज्ञानम् ।

तेनेति । साध्यविपर्ययेण ।

अरूपद्रव्यत्वेति । वायुरप्रत्यक्षोऽरूपद्रव्यत्वादाकाशवत् । वायुः प्रत्यक्ष उपलभ्यमानस्पर्शाधिष्ठानत्वात् घटवदित्यत्रोभावपि हेतू सिद्धौ ॥

[701a] **श्रावणत्वेति** । शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कृतकत्वात् घटवत् । अत्र श्रावणत्वं शब्दस्य सिद्धं, कृतकत्वं तु **मीमांसक**स्यासिद्धम् ।

तदनुरोधेनेति । मध्यमानुरोधेन ।

टीयाम् ॥ **सेति** । जिज्ञासा ।

तत्त्वानुपलब्ध्येति । नित्यधर्मानुपलब्ध्या अनित्यधर्मानुपलब्ध्या च ।

उने ॥ **जिज्ञासामात्रोपयोगीति** । सत्प्रतिपक्षेण जिज्ञासामात्रस्य कार्यत्वात् ।

संशयानुवृत्तिनिवृत्त्योरिति । सत्योः ।

पूर्वेति । पूर्वसमयः । प्रथमसंकेतोऽभ्यासः ।

दुष्प्रत्ययः । आगन्तुकदोषादन्यथा ज्ञानम् । जातु प्रयोज्यबुद्धिर्वैरमेकान्तपराजयात् सन्देह इति बुद्ध्या अप्रयोज्येऽपि प्रयोज्यज्ञानम् ।

साधनेति । साधनाभासोत्तराभासप्रयोगे ।

एकैकपक्षनियततयेति । नित्यधर्मानुपलब्धिरनित्यत्वपक्षे एव, अनित्यधर्मानुपलब्धिश्च नित्यपक्षे एवेत्येवम् ।

कृतं तर्हि यस्मादितीति । घ्राणादीनामिव व्युत्पत्तिरेवास्य लक्षणं भविष्यतीत्यर्थः ।

तस्येति । सव्यभिचारस्य ।

अस्येति । प्रकरणसमस्य ।

तच्च संमुग्धपक्षेति । पक्षप्रतिपक्षौ प्रकरणमिति व्याख्याने हि प्रकरणप्रवृत्तिहेतुरिति कोऽर्थः ? पक्षप्रतिपक्षप्रवृत्तिहेतुः । ईदृशश्च सव्यभिचारोऽपि स्यात् । अतः प्रकरणप्रवृत्तिहेतुत्वम् । संमुग्धम् ।

वाके । प्रकरणमित्यहेतुरिति । प्रकरणजिज्ञासा स्यादित्यतो[ऽ]हेतुः ।

उने ॥ यस्यैवं विशेषग्रह इति । न हि नित्यधर्मोपलब्ध्या कदापि शब्दे न भाव्यमिति प्रमाणमस्तीति ये विशेषं गृह्णन्ति ।

अयमिति । नित्यधर्मानुपलब्धिरूपो हेतुः ॥

प्रतिबलेन प्रतिबन्धमुपन्यस्यतीति । नित्यः शब्दोऽनित्यधर्मानुपलब्धेराकाशवदित्येवम् ।

तमिति । प्रतिवादिनम् ।

अयमिति । नित्यधर्मानुपलब्धिलक्षणो हेतुः ।

तथा सतीति । यद्याभासतां न यायात् तदा ।

एवं चेति । यदि नित्यधर्मानुपलब्धिरनित्यत्वं साधयेत् तदा ।

तत इति । नित्यधर्मानुपलब्धेः ।

द्वितीयापीति । अनित्यधर्मानुपलब्धिरपि ।

नन्वाभासमपि साधकं भविष्यति । तत्राह—**न चेति** ।

सत्प्रतिपक्षत्वमपीति । आसतामनेके दोषाः, एकं सत्प्रतिपक्षत्वमपि ।

संभूय प्रतिज्ञायामिति । यथासंभवं दोषा वाच्या इति वाद्यादिभिः संभूय प्रतिज्ञाने ।

अभिमतेति । पराभिमतं चानुपलब्धेः प्रकरणसमत्वेनाभ्युपगतायाः संशयकारणत्वम् ।

तमिति । समूहस्य संशयकारणत्वाङ्गीकारात् प्राप्तमभिमतभ्रंशम् ।

उपेक्ष्येति । अनुद्भाव्य ।

टीयाम् ॥ आजानत इति । स्वभावतः ।

उने ॥ उभयधर्मानुपलब्धेरुभयपक्षसाधारणत्वं नित्यानित्यरूपसपक्षविपक्षवृत्तित्वं न घटते उभयत्राप्यभावात् । अत उभयपक्षेत्यादिफक्किकां द्विधा व्याचष्टे--**एकस्मिन्निति ।** तत्रैकस्मिन् पक्षे व्याख्याने उभयपदं विहाय योजना कार्या । तेन पक्षसाधारणी पक्षमात्रवृत्तिरित्यर्थः ।

अपरस्मिन् ॥ द्वितीये तु व्याख्याने पृथिवीद्वारेतिपदमध्याहृत्य । कोऽर्थः ? उभयपक्षसाधारणी नित्यानित्यपक्षद्वयव्यावृत्तोभयधर्मानुपलब्धिरित्यर्थः ॥

टीयाम् । उभयविशेषानुपलब्धेरभिधानाशक्यत्वादिति **वार्त्तिक**मन्तः पूरयति — **प्रकरणसमत्वेनेति ।**

उने ॥ अपि तु तत्त्वेति । अपि तु तत्त्वानुपलब्धिरेवे[701b]त्यत**ष्टीका**शकलादनन्तरमस्मदुक्तेत्यादेः शेष इत्यर्थः ।

आहेत्याहेति । आह **वार्त्तिककृ**दित्येतदाह **टीकाकारः ।**

धर्मयोरिति । कृतकत्वश्रावणत्वादिकयोः ।

अन्यस्येति । श्रावणत्वादिरूपस्यैकतरस्य धर्मस्य ।

सापीति । अनुपलब्धिः ।

त्यज्येति । प्रकरणसमत्वेन ।

उभयानुभयात्मकत्वप्रसङ्गादिति । उभयात्मकं वा वस्तु स्याद् विरुद्धत्वेनान्योन्यस्य प्रतिबन्धेऽनुभयात्मकं वा स्यात् ।

अथ नोभयोः सिद्धत्वं किं त्वेकस्य, तत्राह—**एकस्यापीति** ।

उभयोरपीति । यदा हि शब्दे नित्यधर्मानुपलब्धिरनित्यधर्मानुपलब्धिश्च वस्तुतोऽसिद्धे तदा नित्यधर्मानुपलब्ध्यसिद्धेरनित्यत्वप्रसक्तिरनित्यधर्मानुपलब्ध्यसिद्धेश्च नित्यत्वप्रसक्तिरित्युभयात्मकत्वप्रसङ्गः अनुभयात्मकत्वप्रसङ्गस्तु स्पष्ट एव ॥

टीयाम् ॥ **अन्यथेति** यद्यसिद्धः साध्यसम इत्युच्येत ।

अत्यन्तासिद्ध एवेति । य उभयासिद्धः शब्दानित्यत्वे साध्ये चाक्षुषत्वादिः कदापि न सिध्यति स एव ।

तस्य कदाचित् सिद्धेरिति अन्यतरासिद्धो ह्येकतरस्य प्रमाणेन सिद्ध इति कदाचित् सिध्येत् ।

सोऽपि संगृहीत इति । अन्यतरासिद्धस्यापि साध्यत्वेन साध्याविशिष्टत्वात् अन्यतरासिद्ध एव स्यादिति साध्यसमः ।

नेतरे इति । स्वरूपाश्रयादिद्वारेणोभयासिद्धाः ।

असिद्धत्वेनेति । अत्यन्तासिद्धत्वेन । अत उक्तं **सूत्रकृतासाध्यत्वादितीति** । साध्यत्वादित्युक्ते हि साध्यत्वात् साधर्म्यात् साध्याविशिष्टो न त्वन्यतरासिद्धत्वात् साध्यधर्मादित्युक्तं स्यात् । तथा चान्यतरासिद्ध एव साध्यसम इति व्युदस्तमिति भावः ।

यदि हीत्यादि । एतेन साध्यत्वादित्यस्यासिद्धत्वादित्यर्थो वस्तुतो दर्शितः ।

नन्वेवंलक्षणे साध्यत्वात् साध्याविशिष्टः पक्षोऽपि साध्यसमः प्रसज्यते इत्याशङ्क्याह—**नापीति** ।

तद्विशेषस्येति । हेत्वाभासविशेषस्य साध्यसमस्य ।

उने ॥ नन्वसिद्धः साध्यसम इति लक्षणेऽन्यतरासिद्धस्याव्याप्तिरित्युक्तमेवेत्याशङ्क्यासिद्ध इत्यस्यान्यतरासिद्धस्यापि संग्राहकमर्थमाह—**असिद्ध इतीति** । असिद्ध इत्यस्यापि अर्थ इति संबन्धः । कोऽर्थः? पक्षधर्मतया न निश्चित इति ।

यथा चास्मिन्नर्थेऽन्यतरासिद्धस्यापि संग्रहस्तथाह—**परामर्शेति** ।

निरुपाधिसंबन्धस्येति । हेतोः ।

संबन्धिद्वयेति । लिङ्गलिङ्गिनौ ।

आश्रयासिद्ध इति । आश्रयासिद्धिस्तूभयस्यान्यतरस्य वा स्यादिति द्विधायम् । एवं स्वरूपासिद्धोऽपि ।

एतेनेति । असिद्धः साध्यसम इति लक्षणाङ्गीकारेण ।

गृहीता भवन्तीति । पक्षानिश्चयस्यात्रापि विद्यमानत्वात् ।

एतदिति । व्योमपद्मं सुगन्धि पद्मत्वादित्यादि ।

तदिति । अनित्यत्वम् ।

कदाचिदुपलम्भलक्षणेनापीति । मा भूत्प्रध्वंसाभावोपलक्षिता सत्तेत्यनित्यत्वलक्षणमित्यप्यर्थः ।

साध्यसिद्धेरिति । छायायाः सामान्यादिभ्यो भेदसिद्धेः ।

साध्यसिद्धिमेव भावयति—**तेषामिति** । तेषां सामान्यादीनां व्यञ्जकवैचित्र्येऽपि नानाप्रकारचक्षुरादिव्यञ्जकेषु सत्स्वपि यावद्व्यक्तेर्गोपिण्डादेराश्रयस्य नित्यद्रव्यस्य संबन्धिनोश्च तंतुपटाद्योर्नोपलम्भः, तावदनुपलम्भ एव । अथ चक्षुरादिव्यञ्जकसामग्र्यां व्यक्त्याद्युपलम्भमन्तरेणापि सामान्यादीनामुपलम्भो[702a]ऽभ्युपेयते, तदा तत्रानुपपत्तिः सामान्यादित्वानुपपत्तिः । सामान्यादीनां हि सामान्यादित्वमिदमेव यद् व्यक्त्यादिनिरूपणाधीननिरूपणत्वम्, तच्चेन्नास्ति, सामान्यादयः सामान्यादित्वमेव जह्युः । तथा सदोपलम्भप्रसङ्गश्च सामान्यादीनां नित्यत्वेन चाभ्युपगमात् । तदेतेन यदि छाया सामान्याद्यन्तर्भूता भवेत्, तदा व्यक्त्याद्युपलम्भमन्तरेणोपलभ्यमाना सदोपलभ्येत । कदाचिच्चोपलभ्यते । तस्मात् न सामान्याद्यन्तर्भूतेरयुक्तं स्यात् ।

ननु च्छाया सामान्यादिरूपिणी व्यक्त्याद्युपलम्भमन्तरेणोपलभ्यमानापि यत् सदा नोपलभ्यते तत्तेजसा अभिभूतत्वादिति शङ्कते—**तेजसेति** ।

न तथेति । न सदोपलम्भश्छायायाः । सामान्यादिरूपायाश्छायायास्तेजसाभिभव आश्रयानभिभवे वाभ्युपेयते, आश्रयाभिभवे वा ? आद्यं निराचष्टे—**आश्रयेति** । आश्रयाणां व्यक्त्यादीनामभिभवमन्तरेण तेषां सामान्यादीनामभिभवात् । तद्यदि आश्रयानभिभवे छायायास्तेजसाभिभवस्तदा सामान्यादिरूपत्वमेवास्या न स्यादित्यर्थः ॥ द्वितीयं निरस्यति—**तदभिभवे त्विति** । यद्याश्रयाभिभवे तेजसा च्छायाया अभिभवोऽभ्युपेयते, तदा भवत्ये-

वास्याः सामान्यादिरूपता। परं तेषामाश्रयाणामुपलम्भे तदुपलम्भश्छायोपलम्भः प्रसज्यते। सामान्यादयो हि व्यक्त्याद्याश्रयाभिभवेऽभिभवन्त आश्रयोपलम्भ एवोपलभ्यन्ते। तद् यदि च्छायापि सामान्यादिरूपा आश्रयाभिभवे तेजसाभिभूयमाना अभ्युपेयते तदास्या अप्याश्रयोपलम्भे एवोपलम्भः स्यात्। आश्रयाभिभवे हि तदेवाभिभूयते यस्याश्रयोपलम्भ एवोपलम्भः स्यात्। न चैतदस्ति छायायाः। तस्मान्न तेजसाभिभव इति भावः।

अत एवेति। तेजसा च्छायया अभिभवाभावादेव न तेजसोऽभावस्य च्छायाव्यञ्जकत्वं **वैशेषिका**भिमतम्। यदि हि तेजसा च्छायाभिभवो भवेत्, तदा तेजसोऽभावेन च्छाया व्यज्येत। तेजसा च्छायाभिभवस्तु निरस्त इत्यर्थः।

तत्तायामिति। कर्मतायाम्।

चलनव्यवहारस्येति। चलतीति प्रत्ययादेः।

अनाकस्मिकत्वादिति। सनिमित्तत्वात्।

एवंभूतेति। स्वाश्रयं प्राग्देशाद्विभज्य देशान्तरं प्रापयति इत्येवंरूपे कर्मणि सति चलनव्यवहारो भवति। अन्यथा तु नेत्यर्थ।

तस्येति। आश्रयस्य।

विप्रयोजनेति। प्राग्देशात्।

संप्रयोजने इति। देशान्तरे प्रापणम्।

उभयथापीति। यदि च्छाया द्रव्यसमवेता, यदि वासमवेता।

तत्र द्वितीयपक्षे गुणत्वव्याघातं दर्शयति—**सामान्येति**। यद्यसावसमवेता च्छाया सामान्यवती, तदास्याः स्वतन्त्राया द्रव्यत्वमेवापद्यते, न गुणत्वम्।

अथ निःसामान्या, तदापि न गुणत्वमित्याह—**निःसामान्यस्येति**।

प्रथमपक्षे गुणत्वव्याघातं दर्शयति—**गुणेति**।

सामान्यविशेषसमवायेषु तावन्न किञ्चित् समवेतम्। गुणकर्मस्वपि न गुणाः समवयन्ति। निर्गुणा गुणाः, क्रिया च [1]इति वचनात्। ततश्चाद्रव्यसमवेता। कोऽर्थः? गुणकर्मसमवेता च्छायेति। यद्यभ्युपगमः, तदा तत्समवाये गुणकर्मसु समवाये छायायाः सामान्यरूपतापत्तिः।

1 द्रः पदार्थधर्मसंग्रहे गुणपदार्थप्रारम्भः।

ननु गुणरूपता कुतो न स्यादित्याह—**गुणस्येति।** गुणरूपायाः सत्याश्छायाया तत्र गुणकर्मसु समवायविरोधेन।

एषोऽपि कुत इत्याह—**गुणकर्मणां**[702b]**निर्गुणतयेति।**

तेषामिति। मनोदिक्कालानाम्।

तथा चेति। छायायाः सामान्यगुणत्वे।

आश्रयसहोपलम्भनियमे इति। सामान्यगुणानाम्।

तदप्रत्यक्षतायामिति। मनःप्रभृतीनामाश्रयाणामप्रत्यक्षतायाम्।

इदंतासामानाधिकरण्येनेति। इदं छायेत्यादिरूपेण।

इदं ज्ञानमित्येवमात्मगुणस्य यदिदंतासामानाधिकरण्यं तदौपचारिकमेवेत्यभिप्रायेणाह—**तदात्मेति।**

तदिति। इदंतासामानाधिकरण्यम्।

आत्मगुणादिति। बुद्ध्यादेः।

तामिति। बाह्यकरणप्रकरणप्रत्यक्षताम्।

चाक्षुषता हीति। चाक्षुषा गुणा रूपिष्वेव द्रव्येषु समवेताः। रूपित्वं च गगनपवनयोर्नास्ति, रूपत्वाभावाद् व्याप्यश्चाक्षुषगुणत्वं संबन्धोऽप्यत्र नास्तीति भावः।

तद्गुणत्वं हीति। यो गुणी यस्य गुणस्य प्रतीतावविरोधी स एव तस्य गुण इति व्याप्तिः।

अन्यथेति। यदि प्रतीतिप्रतिपन्थिनोऽपि गुणिनो गुणः स्यात्।

नित्यानुपलम्भप्रसङ्गमेव भावयति—**सतीति।** यदि सति विरोधिनि गुणिनि गुणस्य समवायः, तदोपलम्भविरोधो गुणिना प्रतिहतत्वात्। अथासति समवायः, तदा असत्त्वमेव गुणस्य गुणिनोऽसत्त्वात्।

तच्चेति। तदविरोधित्वम्।

अत इति। तेजसः।

तद्गुणत्वमिति। छायागुणत्वम्।

एतद्रूपस्येति । तेजोरूपस्य ।

न चेन्द्रिति । यथेन्द्रनीलप्रभारूपं शुक्लभास्वरमपि *आश्रयोपाधिवशादतथाभूतमशुक्लभास्वरम्[1] । एवं छायातेजसो रूपं शुक्ल[2]भास्वरमप्यशुक्लभास्वरमित्यपि न युक्तम् ।

शैलेति । या शैलस्य या च भूतलस्य या च स्फटिकस्य या च पद्मरागादीनां छायास्तासां नानावर्णशैलाद्याश्रयरूपोपाधेरननुकरणात् ।

इदमिति । छायालक्षणम् ।

तस्येति । तेजसः ।

तथैव सामर्थ्याकलनादिति । संयोगादौ गुणान्तरे रूपमन्तर्भाव्यैवोपलब्धिसामर्थ्याकलनात् ।

तच्चेति । रूपम् ।

अतादृश इति । अनुपलभ्यशैत्यद्रवत्वादेर्द्रव्यस्य ।

अतथाभूतस्येति । अनुपलभ्यगन्धादेर्द्रव्यस्य ।

अत इति । छायातः ।

एतेनेति । अतैजसद्रव्यरूपग्रहणे बाह्यालोकव्यापारस्यैव चक्षुषः सामर्थ्यभणनेन ।

पार्थिवं रूपमारोपितं तम इतीति । **वैशेषिका**भिमतम् ।

तथारोपासामर्थ्यमेव स्थापयति—**तदेव हीति ।** रूपम् ।

पित्तपीतिमवदिति । यथा पित्तस्य पीतिमा धर्म्यन्तरे श्वेते शङ्खादौ आरोप्यते ।

तत्रैवेति । रूपे ।

नेदीयसीति । यथा नेदीयसि चक्षुषो निकटतरेऽणीयस्यपि अत्यल्पेऽपि महत्त्वमारोप्यते ।

तत्प्रथनमिति । रूपप्रथनम् ।

तस्यैवेति । रूपस्यैव ।

---

* आश्रयोपाधिः इन्द्रनीललक्षणः ।

1 J °भासुर° 2 J °भासुर°

नन्वस्तु आलोकापेक्षस्य चक्षुषो रूपग्रहणे सामर्थ्यं परमारोप्ये आरोपविषये च रूपे प्रथमाने एव छायेति भ्रान्तिर्भविष्यति। ततश्चक्षुष एव नापेक्षा किं पुनरालोकस्येत्याशङ्क्याह—**न चारोप्येति**।

नन्वस्त्वारोप्यस्यारोपविषयस्य वा रूपस्य प्रथने एव भ्रान्तिः परमुभयोरन्यतरस्मिन्नारोप्ये आरोपविषये वा ज्ञानं भ्रान्तिहेतुश्चक्षुर्व्यापारं विनैव भविष्यतीत्यतो नालोकापेक्षेत्याशङ्क्याह—**न चोभयेरिति**।

ननु छायेयमित्यचाक्षुष एव प्रत्ययः, ततः कुतस्त्यालोकापेक्षेत्यत आह—**न चायमिति**।

तदन्वयेति। तस्य चक्षुषः।

तदेतेन सर्वेण बाह्यालोकसहकारिविरहे चक्षुषस्तथारोपेऽपि असामर्थ्यादिति समर्थितम्। न चालोकापेक्षं चक्षुस्तमो गृह्णाति। तस्मात् न [703a] पार्थिवं रूपमारोपितं तम इति सिद्धम्।

दशमद्रव्यत्वेनाभ्युपगम्यमानं रूपवच्छायालक्षणं द्रव्यमद्रव्यं वा स्यात् अनेकद्रव्यं वा? तत्राद्यं पक्षं **टीकाकारेण** निरस्तं स्पष्टयति—**नेदमद्रव्यमिति**। न विद्यते द्रव्यं समवायिकारणं यस्य तदद्रव्यम्।

तच्चेति। इन्द्रियम्।

तच्चेति। नियतविषयसामर्थ्यम्।

विपक्षादिति। अद्रव्यद्रव्यात्।

द्वितीयं कल्पं **टीकाकृता** निराकृतमुद्दीपयति—**अस्पर्शत्वादित्यादि**।

सा चेति। अनारभ्यता।

स्पर्शरहितत्वमिति। अस्पर्शताम्।

तद्विपरीते इति। यदनेकद्रव्यं न भवति तत्र।

एतेनेति। छायाया द्रव्यत्वनिराकरणेन।

परिहृतेति। दत्तपरिहारा स्थापितेत्यर्थः।

छायाया अनारभ्यत्वसाधनार्थं छायापरमाणवो द्रव्यानारम्भका अस्पर्शत्वात् मनोवदित्यनुमाने क्रियमाणे न हि मनोऽस्पर्शत्वाद् द्रव्यानारम्भकम्, किं तु वैयर्थ्यादित्येवं वैयर्थ्यमुपाधिः केनचिदुद्भावितः—**तदुपन्यस्येति** ।

यत्तूक्तमिति । न पुनरस्पर्शत्वमिति प्रयोजकमिति शेषः ।

वैयर्थ्यस्योपाधित्वं निराकरोति—**तत्किमिति** ।

सर्वेति । सर्वोत्पत्तिमतां प्रयोजनस्य ।

अनारम्भकत्वाद्वा वैयर्थ्यमिति । द्वितीयविकल्पस्तु परेणानभ्युपगत एवेति न निरस्तः ।

प्रत्यक्षबाध इति । तमसो द्रव्यत्वनिषेधसाधकानुमानानाम् ।

यदि तम एवापह्नूयेतेति । न हि तमोऽपह्नूयते, किं तु तस्य द्रव्यत्वम् ।

एवमेतदिति । द्रव्यत्वे प्रत्यक्षमजागरूकम् ।

अस्येति । तमसः ।

तत्रेति । वस्तुतोऽनीले ।

ननु यदि तमो वस्तुतो न नीलं तर्हि कथमत्र सर्वस्यापि नीलमिति व्यवहार इत्यत आह—**शुक्लेति** ।

ननु यदि शुक्लभास्वरस्य विरोधिता नीलस्येव तमस्यप्यस्तीत्येतावता तमसि नीलमिति व्यवहारस्तर्हि रक्तादिव्यवहारोऽपि प्राप्नोति शुक्लभास्वरविरोधितया रक्तादिनापि [1]सा स्यादित्याह—**एवं तर्हीति** ।

सोऽपीति । भाऽभावः ।

प्रतियोगीति । भा ।

विधिमुखेनेति । तम इत्येवम् ।

उत्तरयति—यद्ग्रहे हीति । यैव यस्य भावस्य ग्रहणे कारणसामग्री सैव तस्याभावग्रहणेऽपि ।

---

1 S साम्या

एकं निषेध्यं मुक्त्वेति । एवमभावग्रहे यन्निषेध्येतरकारणसामग्रीसाकल्यमुक्तं तत तदा स्याद् यदि यस्य रूपिणो ग्रहे यदालोकाद्यपेक्षते चक्षुः, तस्याभावग्रहेऽपि तदपेक्षेतेत्यर्थः ।

तदपेक्षेति । आलोकापेक्षा ।

न चैतदस्तीति । न चालोके आलोकापेक्षणमस्ति । तस्मादालोकाभावेनालोकापेक्षेत्यर्थः ।

यदालोकाभाव आलोकमपेक्षिष्यते तद् दूरे स्थितम् । प्रत्युतानयोर्विरोध इत्याह— **प्रत्युतेति ।**

तस्मिन्निति । आलोके ।

प्रतियोगिस्मरणप्रकारमाह—**दिवा चेति ।**

तद्ग्रहणमिति । छायाग्रहणम् ।

योगिन इति । समाधिसंपन्नाः ।

न तिमिरालोकिन इति । समाधिलीनत्वादेव ।

दृष्टमिति । त्वगुपलब्धम् ।

प्रलयेति । यथाक्रमं जगन्निवृत्तिप्रच्युतिगतिनिवृत्तिवाचकेषु ।

टीयाम् ॥ औपाधिकसंबन्ध इति । औपाधिकः संबन्धो यस्य स तथा ।

उने ॥ तच्चेति । देशान्तरप्राप्तित्वम् ।

इहेति । छायायाम् ।

ननु यथा स्वातन्त्र्येण देशान्तरं प्राप्नुवत्यपि प्रभारत्नविशेषाननुविधत्ते, एवं छायापि स्वातन्त्र्येण देशान्तरं प्राप्नुवत्यपि बाधकानुविधानं विधास्यत्येव । तत्राह — **प्रभातुल्यत्वे** इति । यदि छाया प्रभातुल्या स्यात्, तदा यथा [703b] रत्नविशेषाणां प्रभा दिवसे न स्यात् तथैषां छायापि न स्यात्, अन्यथा प्रभातुल्यत्वं न स्यादित्यर्थः ।

अथ मन्यसे तेषां प्रभा छाययैव हन्यते ततस्तेषां छाया दिवसे भवत्येव, प्रभा तु न भवति । तत्राह—**छाययैवेति ।** यदि छायया दिवसे तेषां प्रभा हन्यते तदा रात्रौ सूचीभेद्येन तमसा सुतरां हन्येत । ततस्तेषां रात्रावालोको न स्यादित्यर्थः ।

अथैवं वदसि न छायया तेषां प्रभा दिवसे हन्यते, किं त्वालोकान्तरेणादित्यतेजसा, ततो निशि तेषामालोको भविष्यति तत्राह — **आलोकान्तरेणैवेति** । यद्यादित्यतेजसा प्रतिहतत्वात् दिवसे रत्नप्रभा न भवति, तर्हि प्रभातुल्यतया छायापि तेषां दिवसे न स्यात् । न चैवमस्ति । तस्मात् स्वातन्त्र्येण देशान्तरप्राप्तौ छायाया वारकानुविधाननियमो न स्यादित्यर्थः ।

तत्रापीति । सव्यभिचारादौ ।

तत्रेति । सव्यभिचारादौ ।

तयोरिति । स्वरूपाश्रययोः ।

तद्द्वारैवेति । व्यभिचारादिद्वारा ।

तेनेति । व्यभिचारादिना ।

उपाधिरेवोद्भाव्येतेति । न तु कदाचिदपि व्यभिचारादिः ।

न चैतदस्तीति । न च तेन दूषयितुं न शक्यते इत्यर्थः ।

निवर्त इति । वादी ।

तस्येति । उपाधेः ।

एवं रूपविशेषेति । अप्रयोजकत्वरूपो विशेषः ।

टीयाम् ॥ **तद्विशेषणायोगिन** इति । सव्यभिचारत्वादिविशेषणायोगिनः ।

उने ॥ **तत्रैवेति** । साध्यसमे एव ।

तस्येति । अन्यथासिद्धस्य ।

सन्दिग्ध इति । सन्दिग्धासिद्धः ।

विशेषणद्वारेति । सतीत्येवंरूपविशेषणमुखेन ॥

उने ॥ **सर्वमसमञ्जसमिति** । पूर्वमिह चोक्तं कालात्ययापदिष्टस्वरूपं परस्परमत्यन्तविसदृशत्वेनासंबद्धम् ।

स्थानान्तरीयभाष्याद्युपन्यासेनेति । यथाहुः नानुपलब्धे इत्यादिना संशयोद्देश**भाष्य**स्योपन्यासः, तथा चोदाहृतं यत्प्रत्यक्षेत्यादिना तु प्रयोजनोद्देश**भाष्य**-स्यैतद्विवरणरूपस्य **वार्त्तिक**स्य चोपन्यासः ।

प्रतिषेध्येति । प्रतिषेध्यौ धर्मौ गुणत्वश्रावणत्वे तयोर्ग्राहके प्रमाणे यथाक्रमं स्पर्शनप्रत्यक्षमन्वयव्यतिरेकानुविधानं चानुमानं ताभ्यां बाधस्तथा विधेयो धर्मः शौचं तद्ग्राहकं प्रमाणं शौचाशौचव्यवस्थाप्रतिपादक आगमस्तेन बाधो येनैवागमेन पदार्थानां शौचमशौचं च व्यवस्थाप्यते, तेनैव नरशिरः कपालानामशौचं वदता शौचं बाध्यते इत्यर्थः ।

अनुमानेनेति । अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं तारतम्यत्वात् महत्परिमाणवदित्यनेन ।

आगमेनेति । मेरुः स्वर्णमय इत्यनेन ।

पृथिवीतो विपरीतस्पर्शत्वादिति । पाकजानुष्णाशीतः स्पर्शः पृथिव्याः । जलस्य तु शीतः स्पर्शः । वायोश्चापाकजानुष्णाशीतः स्पर्श इति । अतो विपरीतः स्पर्शः पृथ्वीतः ।

प्रत्यक्षेणेति । येनैव स्पर्शनप्रत्यक्षेण जलानिलयोः पृथिवीतो विपरीतस्पर्शत्वं गृहीतं तेनैवानयोरौष्ण्यं बाध्यते ।

अनुमानेनेति । युगपज्ज्ञानानुत्पत्त्या ।

कर्मेति । कर्तव्यम् ।

आगमेनेति । राज्ञा स्वर्गार्थिना सोतव्यो राजसूयो याग इत्यागमेन ।

एकविधोपमानबाधेनेति । नैष पिण्डो गवयशब्दवाच्यो गोपिण्डसादृश्याद् गोपिण्डान्तरवदित्यनेन ।

टीयाम् ॥ न्यायाभासः स इत्यत्रेति भाष्ये ।

उने ॥ सोऽपीति । अविनाभावभङ्गः ।

अस्येति । बाधस्य ।

अवश्या[704a]भ्युपगन्तव्य इति । बाधः ।

नाभ्युपगच्छेदिति । नाभ्युपगन्तुमर्हति ।

ऐहिकमिति । इहत्यम् ।

टीयाम् ॥ **नित्यत्वं चात्रेति** । तेन नित्यः शब्द इति कोऽर्थोऽवतिष्ठते । न पुनः [1]सदकारणवानित्यर्थः ।

एवमिति । साध्यसमत्वेन ।

तेनेति । **भदन्तेन** ।

अस्येति । वादिनः ।

निराकरोतीति । **भदन्तं** प्रति परिहरन्त**मेकदेशिनं** सिद्धान्ती ।

बाके ॥ **न समीकृताभिधानमिति** । **सूत्रार्थ** इति संबन्धः ॥

॥ इति हेत्वाभासलक्षणप्रकरणं पूर्णम् ॥

---

1 S °कारणत्वा°

॥ छलप्रकरणम् ॥

[१.२.१०–१७]

उने ॥ सदुत्तरसमाधानयोरिति। सदुत्तरं सद्दूषणं सत्समाधानं दूषणोद्धारः [च] तयोः।

तयोरिति। वादिप्रतिवादिनोर्मध्ये।

तदाभासमिति। उत्तराभासं समाधानाभासं वा।

तत्रापीति। तदाभासेऽपि।

तदेवेति। छलमेव।

तस्यापीति। छलस्यापि।

इहेति। छले।

तत्रेति। जातौ।

यद्येवमिति। यदि विभागो विशेषलक्षणं तदा विभागश्चेत्युपक्रम्य किमिति तत्त्रिविधमित्येतद्विभाग**सूत्र**मेव पठति न विशेषलक्षणमित्यर्थः।

उक्तिपूर्वकत्वादिति। वचनवृत्तिविपर्यासेन हि वाक्छलं तात्पर्यस्य परमार्थापरनाम्नो विपर्यासेन च सामान्यच्छलमुपचारवृत्तिविपर्यासेन चोपचारच्छलं वचनपूर्वकं च तात्पर्यं तात्पर्यानुसन्धानपूर्वकश्चोपचार इत्यतो वाक्छलसामान्यच्छलोपचारच्छलानामुद्देशक्रमनियम इत्यर्थः।

तदनुरोधादिति। उद्देशक्रमानुरोधात्।

एतदिति। वचननिमित्तकत्वम्।

नवकम्बल इत्यादीति। अनेन हि साधारणवाग्निमित्तकता वाक्छलस्यान्यच्छलेभ्यो भेदिकेति **टीकाकृतो**क्तम्।

उत्तरदशायामिति। वाद्युक्तसाधनं प्रति दूषणावस्थायाम्।

भूभृदिति। राजा पर्वतश्च।

वीर्यशालीति । महाप्राणः ।

नखप्रसूनेति । एकत्र नखा एव प्रसूनानि नखप्रसूनानि । अन्यत्र खप्रसूनानि गगनकुसुमानि ।

अजागर्भवतीति । एकत्र जागृधातोर्ह्यस्तन्याः परस्मैपदप्रथमैकवचने भवती अजागः । अन्यत्राजा छागी गर्भवती ।

उभयपदसंचारेणेति । धर्मिधर्मपदसंचारेण ।

गजोऽयमिति । अयं गण्डशैलाकारः कृष्णः पिण्डः ।

विरोधोद्भावनेनेति । दन्तित्वादित्यर्थस्य विषाणित्वादित्यस्य शृङ्गित्वादित्यर्थ-कल्पनया ।

अनैकान्तिकत्वोद्भावनेनेति । तीव्रस्वभावत्वादित्यर्थस्य तेजोमयत्वादित्यस्य तैजसत्वादित्यर्थकल्पनया चन्द्रादिभिरनैकान्तिकत्वोद्भावनम् ।

साधनविकलत्वेनेति । विवक्षितवस्त्रार्थस्याम्बरस्याकाशार्थत्वकल्पनया साधन-विकलत्वमाकाशस्य निरवयवत्वात् ।

साध्यविकलत्वेनेति । विवक्षितसूर्यार्थस्य पतङ्गस्य शलभार्थस्य कल्पनया साध्यविकलत्वम्, शलभस्य सुप्रापत्वात् ।

पशुरेष इति । एष गवयपिण्डः ।

उभयविकलत्वेनेति । विवक्षितबलीवर्दार्थस्य गोर्वाग‌र्थताकल्पनयोभयविक-लत्वं वाचोऽविषाणित्वादपशुत्वाच्च ।

प्रत्युत्तरदशायामिति । प्रतिवादिप्रयुक्तसाधनं प्रति दूषणावस्थायाम् ।

प्रतिपक्षसाधने इति । प्रतिवाद्यपेक्षया वादी प्रतिपक्षः । तस्य साधने ।

अन्यत्रेति । दूषणोद्धारे ।

साध्यविपर्ययेति । साध्यस्यानित्यत्वस्य विपर्ययो नित्यत्वम् । तेन व्याप्तोऽयं हेतुरित्येवं विवक्षितार्थस्य साध्यविपर्ययव्याप्तोऽयमि[1]त्यस्य साध्यविपर्ययः साध्याभावमात्रम् । तेन व्याप्तो हेतुः । कोऽर्थः ? साध्यं [704b] न भवतीत्यर्थकल्पनया दूषणोद्धारकारी

1 S °त्यस्यासा°

प्राह—साध्यविपर्ययव्याप्तं हेतोर्गुण एव न दूषणम्, अन्यथा यदि साध्यविपर्ययव्याप्तत्वं गुणो न भवेत्, तदा हेतुः साध्य एव प्रसज्येतेत्यर्थः।

अम्बरेणेति। अनित्यः शब्दः प्रमेयत्वाद् घटवदिति साधनेऽम्बरेणानैकान्तिकमिति परेण दूषिते विवक्षिताकाशार्थस्याम्बरस्य। वस्त्रार्थत्वकल्पनया दूषणोद्धारकारिण इयमुक्तिः।

नायं पक्षीति। पक्षः साध्यधर्मविशिष्टो धर्मी विद्यते यस्य स पक्षी। नायं हेतुरित्येवं विवक्षितार्थस्य नायं पक्षीत्यस्य नायं पतत्रीत्यर्थकल्पनया दूषणोद्धर्तुरियमुक्तिः।

नोत्तरसूत्रपरं वेति। संगतिद्वारेण।

भाष्ये। सामान्यशब्दस्येत्यादि स्ववाक्यमेव विवृणोति—**नवः कम्बल** इति।

भवतेति। प्रतिवादिना।

विजानीम इति। वयं प्रतिवादिनः।

किं विजानीम इत्याह—**अयमर्थो भवताभिहित** इति। यत् त्वयास्मान् प्रत्यभिहितमयमर्थो भवताभिहित इत्येतत्।

टीयाम्॥ तत्रेति। अभिधानाभिधेयनियमे।

प्रकरणादिसहकारीति। प्रकरणादिः सहकारी यस्य सः, तथा सन् शब्दः।

एष इति। प्रतिपादयिता।

अयमिति। नवकम्बलशब्दः।

निर्णेनेक्तीति। प्रक्षालयति।

वाके॥ नायं नवकम्बल इतीति। नायं नवसंख्यकम्बल इत्येवम्।

उने॥ तात्पर्यसंक्रान्तिरिति। तात्पर्यस्य संभवादिपरत्वस्य परमार्थस्य संक्रान्तिरसंभवादिपरत्वेन संचारः।

नचेति। सामान्यच्छलम्।

संभवेति। संभवादिपरतया विवक्षितस्यासंभवादिपरत्वकल्पनया संभवादिविषयम्।

हेतुत्वेनेति । हेतुत्वादिपरतया विवक्षितस्यार्थस्याहेतुत्वादिपरत्वकल्पनया हेतुत्वादिविषयम् ।

उदाहरणानि षडप्यनन्तरं स्वयमेव स्पष्टयति—**तदेतत्सर्वमिति ।** तथा हि, आद्योदाहरणे ब्राह्मणत्वं विवक्षितं संभवद्विद्याचरणसंपदमाप्नोति । अविवक्षिते व्रात्येऽपि भावादत्येति च । अत एवोभयस्य विवक्षिताविवक्षितयोः समानं च । तथा द्वितीये कृतकत्वं विधेयतया विवक्षितामनित्यतामाप्नोति विधेयतया अविवक्षिते शब्देऽपि भावादत्येति चोभयं समानं च । तथा तृतीये भोजनं विशेष्यतया विवक्षितान् द्विजातीयानाप्नोति । विशेष्यतया अविवक्षिते शतेऽपि भावादत्येति च । उभयसमानं च । चतुर्थे ब्राह्मणत्वं हेतुविषयत्वेन विवक्षितं ब्राह्मणाज्जातमाप्नोति, हेतुविषयत्वेनाविवक्षिते संभवद्ब्राह्मणजन्मन्यपि भावादत्येति च । उभयसमानं च । तथा पञ्चमे अनित्यत्वमुद्देश्यतया विवक्षितामनित्यतामाप्नोति । उद्देश्यतया अविवक्षिते कार्येऽपि भावादत्येति च उभयसमानं च । तथा षष्ठे भुक्तिर्विशेषणतया विवक्षितं शतमाप्नोति विशेषणतया अविवक्षितेषु द्विजेष्वपि भावादत्येति च । उभयसमानं च ।

एतन्निमित्तकमिति । अतिसामान्यनिमित्तकम् ।

ननु यद्येवं सामान्यनिष्ठं सामान्यच्छलं तर्हि किमिति विशेषनिष्ठं व्याख्यातीत्यत आह—**भाष्येति ।**

टीयाम् ॥ संभवत इति । विद्याचरणसंपदेति योगः ॥

उने ॥ स्फुटमेवेति । संभवपरत्वे विवक्षिते ब्राह्मणत्वस्य हेतुत्वमारोप्य यद् दूषणं तत्रेत्यर्थः ।

अनित्यत्वस्य विधिपरत्वे विवक्षितेऽनुवाद्यत्वपरत्वमारोप्य दूषयति—[705a]-**अनित्य** इति ।

विशेष्यपरत्वे विवक्षिते विशेषणपरत्वं कल्पयित्वा द्विजातय इत्येतद् व्याहन्ति—**शतं द्विजातय** इति । अत्र हि शतस्य विशेष्यत्वे शतं भोजिता इति कोऽर्थः ? शतसंख्यावच्छिन्ना अपि भोजिताः सनकादयस्तर्हि न द्विजातयः । ततश्च द्विजातय इति विशेषणेन न किञ्चित् साध्यमिति छलवादिनोऽभिप्रायः ।

ब्राह्मणत्वस्य हेतुत्वपरत्वे विवक्षिते संभवपरत्वं कल्पयित्वा दूषयति—**ब्राह्मणादिति ।**

अनित्यत्वस्योद्देश्यपरत्वे विवक्षिते साध्यपरत्वमारोप्य दूषयति— **अनित्यमिति ।**

शतस्य विशेषणपरत्वे विवक्षिते विशेष्यपरत्वमध्यारोप्य दूषयति—**द्विजशत-मिति ।**

भाष्ये ॥ संपद्धेतुरिति । विद्याचरणसंपदो हेतुः श्रवणाभ्यासादि ।

यथा हेत्विति । श्रवणाभ्यासादेः कारणस्यानतिक्रमेण ।

फलनिर्वृत्तिरिति । विद्याचरणसंपद्रूपस्य फलस्य निष्पत्तिः ।

उने ॥ प्रतिज्ञामाश्रित्य त्रयमिति । धर्मविषयं धर्मिविषयमुभयविषयं च ॥

हेतुमाश्रित्य त्रयमिति । भाक्तवृत्त्या गङ्गासमीपदेशत्वेन विवक्षितस्य गङ्गात्वस्य स्रोतोरूपगङ्गार्थसद्भावेनासिद्धत्वविरुद्धत्वानैकान्तिकत्वोद्भावनपरं यतो भूमेः स्रोतोरूपगङ्गात्वमसिद्धं तथा गङ्गायाः स्रोतोरूपायाः सुखवसतिहेतुत्वाभावाद् विरुद्धम् । तथा घनकाशादिवनमन्तरेणापि स्रोतोरूपगङ्गात्वस्य भावादनैकान्तिकत्वं च ।

ध्वनिहेतव इति । अव्यक्तध्वनिहेतवः ।

क्रोशन्तीति । व्यक्तं शब्दं कुर्वन्ति ।

दृष्टान्तमाश्रित्य त्रयमिति । भाक्तवृत्त्या मञ्चस्थपुरुषत्वेन विवक्षितस्य मञ्चत्वस्य काष्ठमयाङ्गसंघातत्वरूपार्थसद्भावेन साध्यविकलत्वसाधनविकलत्वोभयविकलत्वोद्भावन-परम् ।

अशरीरित्वादि हेतुरिति । भूभूधरादेर्नेश्वरः कर्तेति साध्ये ।

इत्युक्ते इति । **नैयायिके**नेत्थमुक्ते **मीमांसक**श्छलकः प्राह—**नैव-मिति ।**

हेत्वाश्रयस्येति । हेतोर्वचनरूपत्वादाश्रयो गगनम् ।

भूमिं रचयित्वेति । शब्दस्य धर्म इत्यादिना तदेतदाह **भाष्यकार** इत्यन्तेन ।

यथाश्रुतभाष्यमुपेक्ष्येति । यथार्थप्रयोग इत्यस्य धर्मविकल्प इत्यत्र धर्मे-त्यस्य वा व्याख्यानात् ।

नेह स्फुटमिति । यद्यपि **वार्त्तिक**मते त्वर्थसद्भावस्यैव प्रतिषेध इत्यत**ट्टीको**क्तमिहोपचारच्छललक्षण**वार्त्तिके** न स्फुटम् ।

परीक्षावार्त्तिकमिति । न **तदर्थान्तरभावादिति** परीक्षासूत्रस्य **वार्त्तिकम्** ।

टीयाम् ॥ **सिद्धतया दृष्टान्तलाभायेति** । यथा प्रधानप्रयोगो लोकसिद्ध इत्येवम् ।

उने ॥ **पूर्वेति** । अन्तर्भावलक्षणा ।

अध्यायानन्तर्भूतस्येति । परीक्षालक्षणार्थस्य ।

उत्तरेति । आनन्तर्यलक्षणा ।

षोढेति । प्रसङ्गोपोद्धातावसरहेतुत्वनिर्वाहकत्वैककार्यत्वनिबन्धनतया ।

स्मारकाभावेनेति । परीक्षायाः ।

तयेति । परीक्षया ।

प्रकृतसिद्धेरिति । छललक्षणस्य सिद्धत्वेन ।

उपोद्धातेति । चिन्तां प्रकृतसिद्ध्यर्थमुपोद्धातं प्रचक्षते ।

उत्तरप्रबन्धमिति । जातिनिग्रहस्थानलक्षणरूपम् ।

उत्तरत्वेति । अग्रे ।

प्रकृतोपयोगीति । छललक्षणोपयोगि ।

तन्निबन्धनाया इति । एककार्यत्वनिबन्धनायाः ।

उपोद्बलित इति । प्रकटितः ।

टीयाम् ॥ **तदर्थमिति** । [705b] परीक्षार्थम् ।

योग्यायायिति । अभ्यासायेति संबन्धः ।

उने ॥ संशये सति परीक्षा स्यादिति संशयमाह—**पृथगिति** । वाक्छलोपचारच्छलयोः पृथक्सूत्रणात् किं त्रिधा छलम्, साधर्म्यसहिताया विशेषानुपलब्धेश्च द्विधा वेति संशयः ।

परीक्षायाः प्रयोजनमाह—**परीक्षितमिति** ।

टीयाम् ॥ **स्थान्यर्थ** इति । स्थानानि मञ्चाः सन्ति एषां स्थानिनः पुरुषाः । तेऽर्था यस्य स तथा ।

स्थानार्थ इति । स्थानानि मञ्चा अर्था यस्य स तथा ।

इत्यर्थ इति । तस्यार्थेत्यादेः कल्पनात इत्यन्तस्य **भाष्यस्य** ॥

उने ॥ **अविषदमिति** । अविस्पष्टम् ।

उभयत्रापीति । वाक्छले उपचारच्छले च ।

पूर्वपक्षे दर्शितत्वादिति । यथा हि वाक्छले इत्यादिना ।

सर्वसाधारण इति । सर्वच्छलसमानः ।

अन्यथेति । यथाकथञ्चिदर्थसद्भावप्रतिषेधमन्तरेण ।

टीयाम् ॥ **पर** इति । प्रस्तुतादन्यः ।

न विधेयस्य वस्तुनः कम्बलस्य सद्भावः प्रतिषिध्यत इति । कुतोऽस्य नवकम्बला इत्यनेन ।

वाके ॥ विरोधमेवाह—**द्वित्वमभ्यनुज्ञातं निवर्तते** इति ।

तदिति । किञ्चित् साधर्म्यम् ।

॥ इति छलप्रकरणं संपूर्णम् ॥

॥ पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् ॥

[१.२.१८–२०]

उने ॥ प्रतिज्ञाहान्यादेरिति । एतेनाप्रतिभादिव्यवच्छेदः ।

तथाभावादिति । असदुत्तरतया छलप्रकरण एवान्तर्भावप्रसङ्गात् ।

तामिति । असदुत्तरत्वरूपाम् ।

अर्थदूषणत्वेति । जातयो निग्रहस्थानानि चार्थदूषणानि ।

तत्रेति । उत्तरप्रकरणे ।

तस्मादिति । प्रतिज्ञाहान्यादेः ।

टीयाम् ॥ सम्यग्दूषणस्येति । हेत्वाभासस्य ।

उने ॥ तथैवेति । प्रतिज्ञाहान्यादावित्यपि द्रष्टव्यम् ।

तथापीति । साधर्म्यवैधर्म्यग्रहणे सत्यपि ।

तस्यापीति । सम्यग्दूषणस्य ।

टीयाम् ॥ अपि तु प्रयोजकादिति । यत्प्रयोजकं साधर्म्यं वैधर्म्यं वा तस्मात् । तथा हि नित्यत्वे साध्ये कृतकत्वमनित्यत्वप्रयोजकं सद् विरुद्धाख्यं सम्यग्दूषणं भवति ।

उने ॥ अवतारं प्रतिषेधतेति । कथायाम् ।

टीयाम् ॥ प्रयुक्ते हेतौ यः प्रसङ्गो जायते सा जातिरिति **भाष्यं** पूरणेन विशिनष्टि— **प्रयुक्ते** इति ।

उने ॥ भाष्ये जातीति । जातिपदस्य यत्प्रयोजनं व्युत्पत्तिनिमित्तं तस्य यद् व्युत्पादनं तस्य प्रयोजनम् । **भाष्ये** येन प्रयोजनेन जातिपदस्य व्युत्पत्तिनिमित्तं जायमानोऽर्थ इत्येवं व्युत्पादितं तद् दर्शयतीत्यर्थः ।

टीयाम् ॥ **अस्येति** वेदप्रामाण्यविदः । भवेदित्यत्र संभवतीत्यत्र च इतिशब्दौ हेत्वर्थौ ।

वाके । **प्रथमपक्षाप्रयोगं दर्शयतीति** । प्रथममेव जातिर्न प्रयोज्येति ज्ञापयति ।

एतदेव भावयति—**स्थापनायामिति** ।

एतदेव व्याचष्टे **टीकाकारो यथा पक्षे** इति ।

उने ॥ **अस्येति** । निग्रहस्थानस्य ।

अपराद्ध इति । अपराधवान् ।

अन्यत्रेति । अपराधमात्रोद्भावनादन्यत्र निग्रहे । कथायां तावदपराधमात्रोद्भावनमेव मुख्यो निग्रहः । यदा तु वादिनोरभिलाषः, तदा अन्योऽपि स्वशिष्यीकरणादिर्निग्रहः स्यादित्यर्थः ।

तस्येति । अतत्त्वज्ञानस्य ।

तदुन्नयनेति । तस्यातत्त्वज्ञानस्य यदुन्नयनं तस्य ये उपायाः [706a] तेषामुपलक्षणतया ।

व्याख्यातमिति । **भाष्यकारा**दिभिः ।

नन्वतत्त्वज्ञानोन्नयनोपायोपलक्षणतया **सूत्र**व्याख्यानम् अस्य **सूत्रस्य भाष्या**दिषु न दृश्यते, तत् कुतो ज्ञेयम् ? अत आह—**एतच्चेति** ।

प्रतिज्ञेति । प्रतिज्ञाहानिरित्यादि निग्रहस्थानानीत्यन्ते निग्रहस्थानविभाग**सूत्रे** प्रतिज्ञाहान्यादिभिर्यत्सामानाधिकरण्येन प्रयुक्तं निग्रहस्थानं, एवं तस्यैवात्रस्थस्य या पदार्थपर्यालोचना प्रतिज्ञाहान्यादिस्वरूपाभिधेयचिन्तनं तया । एनामनन्तरं स्वयमेव स्पष्टयिष्यति ।

निग्रहस्थानम् । प्रतिज्ञाहान्यादि ।

स्वरूपेणेति । स्वरूपेणाशक्योद्भावनमतत्त्वज्ञानमिति प्रतिपादकं यद् **वार्त्तिकं** पञ्चमाध्यायप्रान्तवर्त्ति तस्य दर्शनात् ।

भाष्येऽप्यनन्तरमेव स्फुटीभविष्यतीति । अग्रेतन**सूत्रे** अननुभाषणमज्ञानमप्रतिभाविक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानं शेषस्तु विप्रतिपत्तिरित्यनेन ।

इत्यर्थ इति । विप्रतिपद्यमान इत्यस्य **टीका**शकलस्य विप्रतिपद्यमानः पराजयं प्राप्तो, निग्रहस्थानं खलु पराजयप्राप्तिरिति **भाष्य**ग्रहणरूपस्य ।

यद्यपीति । यद्यप्यधिके अधिकहेत्वादिप्रयोगे निरर्थकत्वेन विप्रतिपत्त्यप्रतिपत्ती संभवतोऽन्यथा निग्रहस्थानलक्षणाभावेनास्य निग्रहस्थानत्वमेव नोपपद्येत । परतन्त्राधिके विप्रतिपत्तिवस्तुगोचरत्वेन वैपरीत्यावबुद्धार्थविषयत्वेन न विप्रतिपत्त्यप्रतिपत्ती भवतः । अधिकोऽपि हि हेत्वादिः सम्यगेवेत्यतोऽत्र हेत्वाभासादितया न विप्रतिपत्त्यप्रतिपत्ती स्यातामित्यर्थ इति हेतोः तस्याधिक्यस्य योऽनिग्रहस्थानत्वभ्रम एतद्विषयविप्रतिपत्त्यप्रतिपत्त्यभावेन नेदं निग्रहस्थानमिति भ्रान्तिः तन्निवारणार्थमसमासकरणमित्यर्थो विप्रतिपत्त्यादि**टीका**खण्डस्येति भावः ।

आगामिपक्षापेक्षयेति । विप्रतिषेधहेतुं चेत्यपेक्षया ।

टीयाम् ॥ **दूष्यं**[1]वेति । यद् वादी दूष्यं स्वस्य निराकार्यं परोक्तं प्रतिपक्षप्रयुक्तं साधनं न प्रतिपद्यते, स्वपक्षस्थापकमिदं परेण साधनं प्रयुक्तमिति न जानाति, अथवा यद् वादी परोक्तं विप्रतिषेधहेतुं स्वसाधननिराकारकं हेतुं न प्रतिपद्यते मत्साधननिराकारकोऽयं हेतुः परेण प्रयुक्त इति न जानाति, सेयं परार्थोत्तराप्रतिपत्तिः परार्थं परकीयमित्यर्थो यदुत्तरं तस्याप्रतिपत्तिः ।

ननूत्तरं परस्य विप्रतिषेधहेतुरेव न साधनम्, ततश्च या परोक्तस्य विप्रतिषेधहेतोर्वादिना अप्रतिपत्तिः, सैव परार्थोत्तराप्रतिपत्तिः प्राप्नोति । तत् कथं परोक्तसाधनस्य वा अप्रतिपत्तिः परार्थोत्तराप्रतिपत्तिरित्युच्यते इत्याशङ्क्याह—**उत्तरग्रहणमिति** ।

तत्प्रतिषेधकमिति । परकीयसाधनप्रतिषेधहेतुनिराकारकम् ॥

उने ॥ **तात्पर्यान्तरेणेति** । प्रथमं **सूत्रं** तन्त्रप्रतिज्ञापरत्वेनावष्टब्धम् । द्वितीयं तु संसारपरत्वेन संसारनिवृत्तिपरत्वेन च ।

त्रिविधशास्त्रप्रवृत्तीति । उद्देशलक्षणपरीक्षारूपा शास्त्रस्य त्रिविधा प्रवृत्तिः ।

औपोद्घातिक्या संगत्येति । उद्देशसूत्रेण हि प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्युक्तम्, तद्घटना[706b]निमित्तं द्वितीयं **सूत्रं** दुःखजन्मेत्यादि इत्येवमौपोद्घातिकी संगतिः ।

1 S चेति

प्रयोजनपरतयेति । अपवर्गलक्षणप्रयोजननिष्ठतया ।

तथा चेति । यदा च कर्मणि क्तः तदा तन्त्रप्रतिज्ञा, तन्निवृत्तिश्च कीर्तिता । संसार उद्देशश्च कीर्तितः । लक्षणं च कीर्तितमिति यथायोगमभिसंबन्धः ।

अनभ्यासेति । अतिसुश्लिष्टत्वेनैकवारं कर्णकोटरपाते पाठमात्रेण ज्ञेयादित्यर्थः । तथा **मन्दै**र्बहिर्मुखधीभिः **सुखग्राह्यात्** । एतदपि कुत इत्याह—यतः **प्रथमतो** मुखतः **कुसुमसुकुमारात्** । **त्रसतीति ।** **वाचस्पति**वचोविन्यासस्यातिगम्भीरार्थतया अन्यथाव्याख्यानाशङ्कया । **मुहुरिव** मुहुर्वारं वारं बिभेतीव । **अद्यापीति ।** एवं तात्पर्यव्याख्यानेऽपि । अत एव **मनः** कीदृशम् ? **निर्वृतं** सुखितम् **अपि** ॥

॥ इति पुरुषाशक्तिलिङ्गप्रकरणं संपूर्णम् ॥

यैः पीयूषमयैर्नितान्तगहनेऽपि न्यायतर्कादिमा-
ध्याये किञ्चिदपश्यतोऽपि हि ममाविर्भाव्य संदर्शितः ।
सर्वः सूक्ष्मतमोऽपि चार्थनिचयः प्रद्योतनाः केऽपि ते
श्रीलक्ष्मीतिलकाभिषेकतिलकाः शश्वत् प्रसीदन्तु मे ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां प्रथमोऽध्यायः समर्थितः ॥

॥ द्वितीयाध्याये प्रथमाह्निकम् ॥

॥ संशयपरीक्षाप्रकरणम् ॥

[२.१.१-८]

वाचस्पतेरित्यादिवृत्तान्यन्यकर्तृकाण्येव संभाव्यते ।

तत्र च **वैदर्भगर्भाश्रये**त्यादि । विदर्भाणामयं वैदर्भो न्यायः ।

सुश्लिष्टासमस्तपदप्रचुरा वैदर्भी रीतिः । तस्य यो गर्भो रहस्यम्, तस्याश्रया आस्फारा उद्भटाः स्फूर्जन्तो नानाभङ्गिभिरुच्छलन्तोऽनेके तर्कविशदा ये व्याहारा वचनविन्यासाः तैः संरम्भिणी साटोपा ।

सद्वाणीति । सद्वाणीभर एव मन्दराचलः । तेन चलन् क्षुभ्यन् निर्मथ्यमानान्तरो विगाह्यमानमध्यो यो न्यायाम्भोनिधिः । तस्माद् यः पारिजात इव पारिजातो यथावस्थितपदार्थनिर्णयः स एव तिलको यस्याः सा तथा ।

शिष्टं स्पष्टम् ॥[1]

उने ॥ **अपक्षपातिने** इति । पिनाकिपक्षे रागद्वेषरहिताय । प्रमाणपक्षे च कश्चिदर्थः प्रकाश्यः कश्चिन्नेति पक्षपातरहिताय । शिष्टं स्पष्टम् ।

संशोध्यदर्शितरसा इति । टीकागिरां पक्षे सम्यग्विचार्य दर्शिततात्पर्यार्था । मरुकूपपक्षे च कूपानामतिगभीरत्वेन पातालगामिजलत्वात् प्रयत्नेन सम्यग् गवेषयित्वा दर्शितजलाः । **प्रथम एवेति** । अध्याये । **श्रीवत्सेति** । **श्रीवत्सः उदयनशिष्यः** ।

अतिवृत्तमिति । समर्थितम् ।

तत्रापीति । द्वितीयाध्यायेऽपि ।

धर्मा इति । प्रत्यक्षादीनाम् ।

एतच्चेति । अथेदानीं परीक्षा वर्तिष्यते इत्यादि ।

---

1 J अर्हं ॥ श्रीशान्तिनाथाय नमः ॥

उचितप्रदर्शनपरेणेति । अत ऊर्ध्वं प्रमाणादिपरीक्षोचितेत्येवमुचितप्रदर्शन-परेण । नन्वत ऊर्ध्वं प्रमाणादिपरीक्षात्राध्याये इत्येवमध्यायार्थपरेण ।

अत एवाह—**सूचितमिति ।**

उचितातिक्रमशङ्कामिति । यद्यत ऊर्ध्वं प्रमाणादिपरीक्षोचिता तर्हि किमिति तदतिक्रमेण संशयपरीक्षेत्येवंरूपाम् ?

सा चेत्यादिभाष्यमिति । शङ्कानिराकरणरूपम् । ननु यदि सा चं विमृश्येत्यादि**भाष्ये**णैवोचितातिक्रमशङ्का निराकरणीया न त्वत ऊर्ध्वं प्रमाणपरीक्षे[707a]-त्यनेनोचितप्रदर्शनपरेण ।

तर्हि किमिति । टीकाकारेणात ऊर्ध्वं प्रमाणादिपरीक्षेत्यादि**भाष्य**निरा-करणीयां शङ्कामाहेत्याह—**ननु सा चेत्यादिभाष्यनिराकरणीयां शङ्कामाहेति।** इत्याशङ्क्याह—उचितप्रदर्शनमप्युचितातिक्रमशङ्कां करोति । अत ऊर्ध्वं प्रमाणादिपरीक्षोचिते-त्येवमुचितप्रदर्शने तर्हि किमिति तदतिक्रमेण संशयः परीक्ष्यते इत्यस्या उचितातिक्रमशङ्काया उत्थानात् ।

अत ऊर्ध्वमित्याद्येवेति । अत ऊर्ध्वमित्येवादौ कृत्वा ।

ननु सा चेति । एतदित्यर्थः ।

अन्यथाध्यायार्थप्राधान्ये इति । यदि चात ऊर्ध्वं प्रमाणादिपरीक्षेति **भाष्य**मुचितदर्शनपरं सदुचितातिक्रमशङ्काङ्गं न भवेत् , तदेदमध्यायप्रधानं भवेत् तथा चेत्यर्थः ।

एतदिति । आदिपदम् । युक्तमित्यादिनेति परीक्षित इत्यन्तेन वाक्येन ।

टीयाम् ॥ स्थानवतामिति । क्रमवतां परीक्षावचनं स्यादिति हेतोः प्रमाणमेव परीक्ष्यते इति युक्तमित्येतद् यदुच्यते तत् किमत्र द्वितीयाध्याये आदौ प्रमाणं न परीक्षित-मिति प्रश्ने सिद्धान्त्याह—**न परीक्षितमिति ।**

तर्हि किं परीक्षितमित्याह—**किं त्विति ।** इत्याहेति एतदेवाह **वार्त्तिक-कृत् ॥**

किमर्थं क्रमभेद इति **वार्त्तिक**मादौ सोऽयमित्यनेनान्ते कृत इत्यनेन च पूरयति-- **सोऽयमिति ।**

भाष्यार्थमिति । सा च विमृश्येत्यादि **भाष्यार्थम्** ।

अर्थक्रमेणेति । अर्थात् कारणत्वलक्षणाद् वस्तुस्वरूपादागतो यः क्रमस्तेन ।

उने ॥ **अर्थ एवेति** । अर्थात् प्राधान्यलक्षणाद् वस्तुस्वरूपादागत एव ।

चतुर्वर्गद्वयेति । हेयहानोपायाधिगन्तव्यरूपं प्रमाणप्रमेयप्रमितिप्रमातृरूपं च चतुर्वर्गद्वयम् ।

तत्क्रम एवेति । परीक्षाक्रम एव संशयादिक्रम एवेत्यर्थः ।

इतर इति । प्रमाणाद्युद्देशक्रमः ।

अनिवक्षितार्थत्वेनेति । अविवक्षितश्चासावर्थश्च तद्भावेन ।

तत्प्रयोजनस्येति । प्रमाणाद्युद्देशक्रमप्रयोजनस्य प्राधान्यप्रदर्शनरूपस्य ।

प्राक्क्रमेणैवेति । प्रमाणाद्युद्देशक्रमेणैव ।

ननु भवतु परीक्षाप्रस्तावे संशयादिक्रम एवार्थः प्रमाणाद्युद्देशक्रमस्तु शाब्द एव, तथापि किमित्यत आह— **अर्थेनेति** ।

विधानानर्थक्यादिति । पुरुषार्थो हि यवागूपाकः स्वयमेव सिद्ध इति पुरुषार्थत्वे यवागूं पचतीति विधिरनर्थक एव स्यात् । अप्राप्ते हि शास्त्रमर्थवदिति न्यायात् ।

प्रथमे इति । यदि हि संशयपरीक्षा प्रमाणादिपरीक्षाया अङ्गं भवेत् , तदा संशयपरीक्षायाः प्राथम्यं युक्तम् । यदा तु संशयस्वरूपं परीक्षाङ्गत्वेनाभ्युपेयते तदा संशय-परीक्षाप्राथम्यं कुत इत्यर्थः ।

विचारे इति । परीक्षायाम् ।

संशयपरीक्षापि हीति । यदि हि प्रमाणादिपरीक्षायाः परीक्षितः संशयोऽङ्ग-मित्यतः संशयपरीक्षायाः प्राथम्यमित्यभ्युपेयते, तदा प्रमाणादिपरीक्षेव संशयपरीक्षापि हि संशयपूर्विका भवन्ती परीक्षितसंशयपूर्वकत्वेनाभ्युपगमात् संशयपरीक्षामपेक्षेत, सापि च संशय-परीक्षा संशयपूर्विका भवन्ती संशयपरीक्षामपेक्षेतेत्येवमनवस्था स्यादित्यर्थः ।

चतुर्थे त्विति । यदि च प्रमाणादिपरीक्षायाः स्वरूपतः परीक्षणासंभवात् प्रमाणादिलक्षणपरीक्षाया इत्यर्थः परीक्षितं संशयलक्षणमङ्गमित्यतः संशयपरीक्षायाः [707b]

प्राथम्यमित्यभ्युपेयते, तदा संशयलक्षणपरीक्षापि संशयलक्षणपरीक्षापूर्विकेत्यात्माश्रयो दोषः स्यादिति भावः ।

ननु संशयपरीक्षापीति । यदा हि संशयपरीक्षायाः संशय एव पूर्वो नास्ति, तदास्य परीक्षितत्वं दूरापास्तमित्यतो नानवस्थेत्यर्थः ।

अविशेषादिति । प्रमाणादिपरीक्षासंशयपरीक्षयोः परीक्षात्वेनाविशेषात् ।

परीक्षास्वरूपेति । संशयपूर्वकत्वं हि परीक्षायाः स्वरूपम् ।

न ब्रूम इत्यादि । द्वितीयतृतीयचतुर्थविकल्पानामनभ्युपगमादेव न तेषु उद्भाविता दोषास्तावदस्माकं प्रथमविकल्पे अभ्युपगम्यमानेऽपि तत्रोक्तो दोषस्तदा स्यात् यदि सर्वा परीक्षा संशयस्वरूपपूर्विकेत्यतः संशयपरीक्षायाः प्राथम्यं प्राप्तमित्यभ्युपेयेत । न चैतदभ्युपेयते । किं तु सर्वा परीक्षा संशयस्वरूपपूर्विकेति ज्ञापनाय संशयपरीक्षाप्राथम्यमिति नाद्यविकल्पोक्तोऽपि दोष इत्यर्थः ।

आद्यविकल्पोक्तदोषमेवान्यथा निराकरोति—**यद्वेति ।**

आक्षेप इति । कथमयं घटते इत्येवं निराकरणम् ।

न चासावाक्षेपः स्वरूपत एव संभवतीति । सर्वभावानां स्वरूपस्य नियोगपर्यनुयोगानर्हत्वात् ।

इत्येतदर्थं क्रमभेद इति । न तु सर्वा परीक्षा संशयस्वरूपपूर्विकेत्यतः संशयपरीक्षायाः प्राथम्ये प्राप्ते, संशयलक्षणं चात्र परीक्ष्यते । न संशय इति नानवस्थापीत्यस्य **टीका**वाक्यस्य योजना त्वेवम्——संशयलक्षणपूर्विका, परीक्षितसंशयपूर्विका वा, परीक्षितसंशयलक्षणपूर्विका वा परीक्षेति नाभ्युपगम्यते । किं तर्हि ? संशयस्वरूपपूर्विकायां सर्वस्यां प्रमाणादिपरीक्षायां संशयस्य प्रथमोपनिपातित्वादनुपपत्तिद्वारेण प्रथमं संशयलक्षणमत्र परीक्ष्यते इत्यभ्युपगम्यते इति हेतोर्नानवस्थापि । उपलक्षणत्वात् न प्रथमद्वितीयचतुर्थविकल्पोद्भावितदोषा अपि ।

ननु स्वरूपेण संशयोऽत्र परीक्ष्यते इति किं नाभ्युपगम्यते इत्याशङ्क्याह—**न संशय** इति । संशयस्य स्वरूपतः परीक्षानर्हत्वात् तदिदमाह**उदयनः** लक्षणानुपपत्तिद्वारेणैव चेह परीक्षापदार्थो लक्ष्यस्य स्वरूपतो विचारानर्हत्वादिति ।

एतेनैवेति । प्रमाणादिस्वरूपपूर्वकत्वाङ्गीकारेणैव ।

तत्रापि हीति । सर्वा हि तावत् परीक्षा प्रमाणप्रमेयप्रयोजनदृष्टान्तसिद्धान्ताव-यवादिपूर्वा, प्रमाणाद्यभावे परीक्षाया अभावात् । एषा च परीक्षा यदि परीक्षितप्रमाणादिपूर्वा, तदा प्रमाणपरीक्षापि परीक्षितप्रमाणपूर्वा, आत्मादिप्रमेयपरीक्षापि परीक्षितात्मादिप्रमेयपूर्वा, एवमग्रेऽपि इत्येवमनवस्थावकाशः ।

अयमेव समाधिरिति । न हि परीक्षितप्रमाणादिपूर्वा परीक्षेत्यभ्युपगम्यते, किं तु सर्वा परीक्षा प्रमाणादिस्वरूपपूर्वेत्ययमनवस्थापरिहारः ।

सत्ता व्यवस्थितेति । प्रमाणाधीनसिद्धित्वाद्धेतोः प्रमाणस्य पूर्वभावो युज्यते यदि विचारे संशयसिद्धिरपेक्ष्येत, न चैतदस्ति । अज्ञातस्यापि संशयस्य विचारे उपयुज्य-मानत्वादित्यर्थः स्फुटं चैतदवयव**सूत्रे टीका**याम् ।

तद्विमर्षपूर्वेति । शास्त्रकृद्विमर्षपूर्वा ।

कथेतीति । जल्पवितण्डे हि पारम्पर्येणैव निर्णयावसाने इत्यनयोः[708a]निर्णया-वसानत्वस्याविवक्षितत्वेन विचारस्यापि निर्णयावसानस्यात्राविवक्षया वादशास्त्रयोरित्युक्तम् , न तु कथाशास्त्रयोरिति भावः ।

स चेति । विचारः ।

तस्यैवेति । शिष्यस्यैव ।

न चेदेवमिति । यदि विचारविधौ संशयविधानं न भवेत् ।

टीयाम् ॥ शिष्टयोरिति । शास्त्रेणेत्यनेन संबध्यते ।

उने ॥ व्युत्पन्नस्येति । वादे व्युत्पन्नत्वं शास्त्रेण क्षुण्णमतित्वं साधनसामर्थ्यासामर्थ्य-योरप्यसन्दिग्धत्वमित्यर्थः । शास्त्रे व्युत्पन्नत्वं तु शास्त्रे च शिष्टत्वमित्यादिना स्वयमेव वक्ष्यति ।

निर्णयो नास्त्येवेति । वादेन ।

स हीति । व्युत्पन्नः ।

प्रागेवेति । वादात् ।

स्थेमेति । स्थिरता ।

अभ्युपेतशास्त्रप्रमाणत्वमात्रमिति । न तु शास्त्रार्थवेत्तृत्वम् ।

अतीन्द्रियार्थशास्त्रेति । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ।

समीचीनमिति । समीचीनमसमीचीनं वेत्युल्लेखेन संशयः । कुतः ? समानधर्मात् ।

एनमेवाह—लक्षणत्वेनाभिधीयमानत्वादिति ।

तद्व्यवस्थाया इति । संशयव्यवस्थायाः ।

तद्धेतुकेति । संशयहेतुकम् ।

संशयहेतुकविचारप्रवृत्तेः प्रयोजनत्वमेव भावयति—**तदभावे चेति** । विचारप्रवृत्त्यभावे । चो हेतौ । यतो विचारप्रवृत्तौ सत्यां निर्णयः स्यादिति निर्णयं प्रयोजनं कुर्वाणा विचारप्रवृत्तिः प्रयोजनमिति भावः ।

वाके ॥ साधनस्य सामर्थ्येति । साधनस्य सामर्थ्यासामर्थ्ये शिष्यान् परिज्ञापयितुम् ।

टीयाम् ॥ संशेत इतीति । संशेत इत्येतत् संशयस्य निरुक्तं कर्तृ ।

नावधारयति । नावधारणरूपं भवतीत्यतो निरुक्तेनानवधारणात्मकेन प्रत्ययोऽवधारणात्मको व्याहन्यते इत्यर्थो निरुक्तव्याघात इति **वार्त्तिकस्य** ।

वाके ॥ भाष्योक्तातिरिक्तप्रकारान्तरैश्चोदयति—**अधिगतेति** । समानधर्मेऽधिगतेऽनधिगते धर्मिणि संशयोऽयं प्रतिपाद्यते इति भ्रान्तस्य चोद्यमिदम् ।

यथा कृतकत्वाच्छब्दे इति । न हि कृतकत्वात् समानधर्मात् शब्दे नित्यत्वानित्यत्वविषयः संशयः स्यात् ।

टीयाम् ॥ संशयलक्षणेति । संशयलक्षणोक्तसर्वकारणपरं, न तु समानधर्माध्यवसायैकपरम् ।

वाके ॥ यथा विरुद्धेति । एतेन स्वाभिमताद् विरुद्धाव्यभिचारिणो **बौद्धेन** संशयो दर्शितः ।

तत्त्वानुपलब्धेश्चेति । एतेन नैयायिकाभिमतादपि प्रकरणसमात् संशयो दर्शितः ।

भाष्ये ॥ अन्यतरधर्मेति । यद्यप्यन्यतरधर्माध्यवसायः प्राक् सन्देहहेतुर्नोक्तः, तथापि भ्रान्तस्यारोपितनोद्यमिदम् ॥

वाके ॥ एतेनेति । समानानेकधर्माध्यवसायादिति **सूत्र**व्याख्यानेन ।

प्रत्युक्तमिति । व्याख्यातमित्यर्थः ।

भाष्ये ॥ द्वयोः प्रत्यनीकधर्मविषयेति । द्वयोर्वादिप्रतिवादिनोर्मिथः प्रत्यनीकौ यौ धर्मौ नित्यत्वानित्यत्वे तद्विषया । एतौ वादिनौ विरुद्धौ धर्मौ प्रतिपद्येते इत्यर्थविषयासंप्रतिपत्तिरिवेत्यर्थः ।

टीयाम् ॥ स्वरूपविरोधादिति । संप्रतिपत्तिस्वरूपेण विरोधात् ।

भाष्ये ॥ न संशय इति । इदं संबध्यते इत्यर्थः ।

यदि तावदियमित्यादि । अव्यवस्था । स्वात्मनि अव्यवस्था चेत्—सैव नास्तीति न संशयहेतुः । व्यवस्थिता चेत् ? सा तर्हि व्यवस्थैव । [708b] न ततः संशय इत्यर्थः । यद्यप्यव्यवस्था पूर्वं न पृथक्संशयहेतुरुक्ता, तथापि भ्रान्तस्यारोपितं चोद्यमिदं ॥

भाष्ये ॥ नायमिति । न कदाचिदयं संशय्यमानो धर्मी अतद्धर्मा, किं तु सदैव ।

ऊदूर्ध्व [?] इति । अत्यन्तं सर्वदा संशयः स्यादित्यर्थः ।

टीयाम् ॥ पदान्तरेणेति । विशेषापेक्ष इत्यनेन ।

भाष्ये ॥ कस्मादेवं नोच्यते इति । समानधर्माध्यवसायः संशयहेतुरिति कस्मात् नोच्यते ?

विशेषस्यापेक्षेत्यादि । विशेषापेक्ष इत्युक्ते हि विशेषानुपलम्भो गम्यते । समानधर्मापेक्षाया अभावश्च । समानधर्मापेक्षाया अभावश्च तदा स्यात् यदि समानो धर्मः प्रत्यक्षः स्यादिति वाक्यार्थः ।

कथमिति। प्रश्ने।

अनुजानाति चेति। लोकः।

वाक्यस्येति। धूमेनाग्निरनुमीयते इत्यस्य।

न चैतदिति। विशेषाकाङ्क्षणम्।

धर्मधर्मिग्रहणमात्रेणेति। सामान्यधर्मविशिष्टधर्मिग्रहणेन।

टीयाम्। सदृशार्थो हीति। यदि हि समानधर्मः सामान्यरूपो धर्मो व्याख्यातो भवेत् तदासावेकवृत्तित्वे सति न स्यात्, अनेकवृत्तित्वात् सामान्यस्य। यदा तु समानशब्दस्य सदृशो धर्मस्तदासावेकवृत्तित्वेऽपि स्यादिति भावः॥

यदप्येतत्सारूप्याभावादिति ग्रहणक**वार्त्तिक**माकाङ्क्षणीयेन पूरयति—**यदप्येतदिति**।

भाष्यकारेण यत्सारूप्यमुक्तमिति। यस्योत्पादात् यदुत्पद्यते इत्यादिना उत्पत्तिलक्षणं सादृश्यम्।

अतिव्यापकमिति। घटादीन् प्रत्यकारणानामपि तन्त्वादीनामुत्पत्तिमत्त्वात्।

अव्यापकं चेति। अनुत्पत्तिमतामाकाशादीनामपि शब्दादीन् प्रति कारणत्वात्।

उने॥ न कार्येति। ये कार्यकारणे ते सर्वे सरूपे इत्येवं न सादृश्यं व्यापकम्।

तथाभावादिति। कार्यकारणभावात्।

नापीति। यत्र सारूप्यं तत्र कारणकार्यभाव इत्येवं सारूप्यं ज्ञापकमपि न।

अतथाभूतयोरपीति। अकार्यकारणभूतयोरपि।

अनयोरिति। कार्यकारणयोः।

अर्थाभासेति। अर्थाभासोऽसंगतोऽर्थः।

टीयाम्॥ अपि तु कार्यकारणधर्मनिर्देश इति **वार्त्तिक**व्याख्यापरम्—**अपि तु कार्येति**। कार्यकारणधर्मावन्वयव्यतिरेकौ तत्परः।

वाके ॥ विवक्षिततज्जातीयान्यवृत्तिरिति । विवक्षिततज्जातीयवृत्तित्वे सत्यन्य-जातीयवृत्तिः ।

विप्रतिषिद्धमिति । संशयलक्षणे निराकृतम् ।

टीयाम् ॥ हेत्वाभासान्तरत्वमिति । सत्प्रतिपक्षत्वम् । ततश्चैकैकस्यान्वयतो व्यतिरेकतो वोभयकोट्यनुपनायकतया न संशयहेतुत्वं नापि निश्चयहेतुत्वमसत्प्रतिपक्षत्वरूप-वैकल्पादिति भावार्थः ।

वाके ॥ अनेनैवेति । समानानेकधर्माध्यवसायपरिहारेणैव ।

भाष्ये । वेदितव्य इति । परिहारः ।

न चास्येति । विप्रतिपत्तिशब्दार्थस्य ।

वाके ॥ तथा भावादिति । विप्रतिपत्तित्वात् ।

भाष्ये ॥ अनयेति । शब्दान्तरकल्पनया ।

इति प्रतिषिध्यते इति । इत्याकारः प्रतिषेधो न क्रियते इत्यर्थः । एतेन संशयहेतोरर्थस्याभ्यनुज्ञानं दर्शितम् ।

अथाव्यवस्थाभ्यनुज्ञानं दर्शयति—**यावता चेति ।**

वाके ॥ अव्यवस्था नास्तीति । यद्यव्यवस्था नास्ति तर्हि कथमव्यवस्थात्मनि व्यवस्थितेति व्याहतम् ।

[709a] **यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग** इति **सूत्रम्**[1] । यत्र शास्त्रे कथायां वा संशयः, तत्रैवमुत्तरस्य लक्षणानन्तरभावित्वेन लक्षणाक्षेपस्य लक्षणसूत्रपर्या-लोचनया न सूत्रार्थापरिज्ञानादित्युत्तरप्रसङ्गः कर्तव्यः ।

टीयाम् ॥ यथोद्दिष्टेति भाष्ये इति । यथोक्ताध्यवसायादेवेति **सूत्र**संबन्धिनि ।

॥ इति संशयपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 II. i.7.

॥ प्रमाणसामान्यपरीक्षाप्रकरणम् ॥

[२.१.८–२०]

उने ॥ **परावृत्त्येति** । पश्चाद् व्याघुट्य ।

सूत्रमिति । न **भाष्यम्** ।

एतद्विवरणानन्तरमिति । **प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति** सूत्रस्य[1] विवरणानन्तरम् ।

ननु प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्यस्य **भाष्यत्वे** एव **इत्यस्य सामान्यवचनस्यार्थविभाग** इत्येवं **भाष्योपक्रमः पूर्वं हीत्यादिसूत्रा**[2]न्तरमवतारयितुं भविष्यति । को दोष इत्यत आह—**न हीति** । यदि हि प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्येतदाक्षेप**भाष्यं** भवेत् न चाक्षेप**सूत्रम्** , तदा (?) इत्यस्य सामान्यवचनस्यार्थविभागः **सूत्र**मिति न लगेदित्यर्थः ।

हेतोरिति । त्रैकाल्यासिद्धेरित्यस्य ।

उत्तरसूत्रावतारे इति । पूर्वं हीत्यादि**सूत्रा**वतारे ।

एवं चेति । प्रत्यक्षादीनामित्यादेः[3] **सूत्र**त्वे ।

ननु यदीदं **सूत्रं** भवेत् तदा **वार्त्तिककृत् सूत्र**मित्युत्कीर्तयेत् । न चैतदस्ति । तस्मात् नेदं **सूत्र**मित्याशङ्क्याह—**नन्विति** ।

तद्भावादिति । **सूत्र**त्वोत्कीर्तनभावात् ।

तदिति । सूचनीयार्थाविष्करणम्, **सूत्र**त्वसंदेहव्युदासो वा प्रयोजनम् ।

अन्तरेति । अथ प्रमाणपरीक्षेत्यस्य प्रत्यक्षादीनामित्यादेः सूत्रस्य [4]चान्तराले ।

आदिशब्दस्येति । एतेन अथ प्रमाणपरीक्षेत्यवतार**भाष्य**मित्यर्थः ।

सन्दिग्धेऽपीति । आस्तां तावदसन्दिग्ध इत्यप्यर्थः ।

विवेचनवदिति । विवेचने इव ।

---

1 II. i.8 2 II. i.9 3 II. i.8 4 J वान्त

तस्येति । प्रयोजनस्य ।

अविवादसिद्धे इति । प्रयोजने ।

अयं चार्थ इति । प्रयोजनस्य परीक्षा नास्तितालक्षणः ।

प्रयोजनादिषु प्रावादुकानां विप्रतिपत्तिर्नास्तीत्यतस्तल्लक्षणस्य सुखावगाह्यतया यद्यपि प्रयोजनादयोऽतिदेशेनैव परीक्षिताः स्युः तथापि तल्लक्षणस्यातिव्याप्त्यादिदोषा विचारणीया इति पृथक् परीक्षा गवेष्यते इत्याशङ्क्याह—**अव्याप्तीति** ।

अतिदेशेन परीक्षितत्वमेव स्पष्टयति—**यत्रेति** ।

अमुं चार्थमिति । यत्र क्वचिदित्यादिवाक्योक्तम् ।

अस्य सूत्रस्येति । यत्र संशय इत्यादेः ।

उत्सर्गस्येति । उद्देशक्रमस्य ।

एतच्चेति । अतिदेशेन प्रयोजनादीनामपि परीक्षितत्वप्रतिपादनपरं **यत्र संशय** इत्यादिसूत्र[1]व्याख्यानं पञ्चमाध्याये भविष्यतीति व्यवहितत्वेनात्राजानतष्टीकाकृतः ।

चतुर्थान्ते इति । चतुर्थाध्यायान्ते ।

यद्येवमिति । यदि सामान्यलक्षणपरीक्षा ।

उत्तरं ग्रन्थमवतारयति—**न परीक्षेतीति** । सदसतोरित्याद्युत्तररूपग्रन्थावतारणपरं न परीक्षेत्यादि**टीका**वाक्यमित्यर्थः ।

अयमर्थ इति । सदसतोरित्यादेरुत्तररूपस्य **वार्त्तिक**ग्रन्थस्य ।

तदिति । उपलब्धिसाधनत्वम् ।

सन्देहहेतुं समानधर्मं दर्शयति—**प्रमेयं हीति** । प्रमेयं वस्तु हि इन्द्रियलिङ्गादिषु संभवि दृष्टम्, असंभवि च । यथा चक्षुरिन्द्रिये तैजसत्वादिः प्रमेयो धर्मः संभवति, न संभवति च वायवीयत्वादिः । एव[709b]मन्यत्रापि ज्ञेयम् । उपलब्धिसाधनत्वमपि प्रमेयम् । तस्मादिन्द्रियादि संभवि वा स्यात्, असंभवि वेति संदेहः ।

अत इति । यदि हि किं प्रमाणानि सन्ति उत न सन्तीति यथाश्रुत**वार्त्तिका**नुसारेणैव संदेहोऽभ्युपेयेत तत्तदाश्रयासिद्ध्यादिदोषः । तथा हि यदि प्रमाणानि धर्मित्वेनाभ्यु-

---

1 II, i. 7

पगतानि नोपलब्धानि तदा तावन्न सत्यासत्यरूपोभयकोट्युल्लेखी संशयो धर्मिणोऽनुपलब्धत्वेन धर्मस्मृतेरभावात् । अथोपलब्धानि, तदापि नोभयकोट्युल्लेखी संशयः । न ह्युपलब्धे घटे घटोऽस्ति न वेति संशयः स्यादित्याश्रयासिद्धिः स्वरूपासिद्धिर्वा दोषः स्यात् । अत इन्द्रियादिधर्मिविषयः संशयोऽत्राभ्युपेयते । तथा चाश्रयासिद्ध्यादिदोषाभाव इति परमार्थः ।

अस्येति । प्रमाणसामान्यलक्षणविचारस्य ।

प्रकृतेति । प्रकृतं निःश्रेयसम् ।

प्रमेयेति । आत्मादि ।

यथाभिप्रायो वर्णित इति । सर्वप्राणभृत्सिद्धेर्न प्रमाणसामान्यं परीक्षणीयमित्येवं रूपेण येन प्रकारेण **वार्त्तिका**भिप्रायो वर्णितः, तेन **प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे**रित्ययं[1] पूर्वपक्ष एव नावतरति ।

तस्येति । इन्द्रियादेः ।

सूत्रविरोध इति । **पूर्वं हि प्रमाणसिद्धाविति सूत्रं**[2] **नेन्द्रियार्थसन्निकर्षापेक्षं ज्ञानमुत्पद्यते इति सूत्रार्थव्याघातो दोष** इति **वार्त्तिकोक्तः सूत्रस्येन्द्रियार्थे**त्यादेः[3] व्याघातः ।

तद्विशेषस्येति । प्रमाणविशेषस्य ।

पूर्वापरविरोध इति । पूर्वं हि प्रत्यक्षसूत्रे इन्द्रियादिप्रमाणमुक्तम्, इदानीं तु गन्धादिज्ञानं प्रमाणमुच्यते इति पूर्वापरविरोधः ।

तदेतत्सर्वमिति । पूर्वं हीत्यादिना प्रपञ्चितार्थं त्रैकाल्यासिद्धेरित्येतत् ।

तर्केति । यदि प्रमाणानि न भवेयुः, तदार्थोपलब्धिर्न भवेदित्यस्य प्रमाणसत्ताव्यवस्थापकस्य तर्कस्य या अपरिशुद्धिः दूषणं तन्मात्रोपवर्णनम् ।

उपलब्धिहेतोरित्यादेरिति । पुरोवर्तिसमाधिग्रन्थस्य ।

व्याघातेति । प्रमाणं चेन्नास्ति कथम्, नास्ति चेत् प्रमाणं कथमिति प्रतिज्ञापदयोर्व्याघातः । एवं प्रमाणमप्रमाणं चेति प्रतिज्ञान्तरेऽपि ।

अत्र व्यवहारेति । प्रामाण्यनिषेधे हि साध्ये साध्याविशिष्टो हेतुः स्यात्, अप्रामाण्येनार्थाप्रतिपादकत्वस्याविशिष्टत्वात् ।

---

1 II. i. 8 2 II. i. 9 3 I. i. 4

भाष्ये ॥ एतावांश्चेति । पूर्वः पश्चात् सह वा कालः ।

टीयाम् ॥ अनुमानमिति । कालत्रयेऽप्यर्थप्रतिपादकत्वादित्येतत् ।

एतेषामिति । प्रत्यक्षादीनाम् ।

अर्थसाधनेति । अर्थसाधनं यः सामान्यविशेषः प्रत्यक्षत्वादिः तदभिधायीति ।

वाके ॥ भावस्येति । त्वतलादिप्रत्ययवाच्यस्य शब्दप्रवृत्तिनिमित्तस्य ।

ननु नैव प्रमाणानि सन्तीत्येतदपि तावद् वाच्यं नेत्याह—**एतदपि व्याहत-मिति ।**

प्रतिपादयसि चेति । प्रमाणानि नैव सन्तीत्येतदेव ।

यद्येवं तर्हि प्रमाणान्तरमभ्यनुज्ञास्यते इत्याशङ्कयाह—**यदपीति ।**

यच्चेति । प्रमाणान्तरम् ।

धर्मप्रतिषेध एवेति । न धर्मिप्रतिषेधः ।

राजेति । यथा राजपुरुषप्रतिषेधे राजानुज्ञायते ।

व्याघातमेव स्पष्टयति—**अर्थान्तरेति ।**

धर्मोऽभ्युपेय इति । व्यतिरिक्त इति शेषः ।

इत्यनिवृत्तो व्याघात इति । प्रत्यक्षादीनां प्रमाणानां प्रामाण्यव्यतिरिक्त नान्यत् किञ्चित् स्वरूपमिति [710a] प्रामाण्यमप्रामाण्यं च व्याहतम् ।

उने ॥ भावादन्यो न कश्चिदिति । स च भावोऽथ भावस्यास्वतन्त्रत्वादित्यादिना पूर्वमेव **वार्त्तिके** दर्शितः । ततः किमतिदेशेनेति भावः ।

भावविशेषमिति । प्रामाण्यरूपम् ।

वाके ॥ त्रिकालविषयत्वादितीति । एतेन त्रयः काला विषयत्वेन यस्य तत् त्रिकालमिति व्युत्पत्तिस्त्रिकालस्य दर्शिता ।

न प्रमाणधर्म इति । किं तु त्रैकाल्यस्यैव धर्मः ।

अथायमर्थ इति । त्रैकाल्यासिद्धेरित्यस्य ।

भाष्ये ॥ समाख्याहेतोस्त्रैकाल्ययोगात् तथाभूता समाख्येति स्ववाक्यमेव विवृणोति—**यत् पुनरिदमिति ।**

उत्तरयति—**प्रमाणमिति ।**

प्रमाणप्रतिषेध इति । प्रमाणप्रतिषेधरूपम् ।

वाके ॥ प्रतिषेधार्थापरिज्ञानं दर्शयति—**न च प्रतिषेधस्येति ।**

प्रमाणलक्षणप्राप्त इति । प्रमाणलक्षणं प्राप्तः प्रमाणमित्यर्थः ।

भाष्ये ॥ **किं चात** इति । यदि प्रमाणप्रतिषेधरूपं प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्येवमादि वाक्यं प्रमाणं ततः किमित्यर्थः ।

वाके ॥ पृच्छति—**कथमितीति ।** स्ववचनव्याघातः कथमित्यर्थः ।

उत्तरयति—**यत् खल्विति ।**

सामर्थ्येति । उपलब्धिसाधनत्वलक्षणा शक्तिः सामर्थ्यम् ।

टीकायाम् ॥ **नञोरिति ।** अप्रामाण्यमसिद्धेरिति पदद्वयस्थयोः ।

वाके ॥ **अन्यत** इति । अप्रमाणतः ।

तत्प्रमाणमिति संज्ञाभेदमात्रमिति । तदन्यत्प्रतिपत्तिकृत्त्वात् प्रमाणम् । ततश्च यदन्यदित्युच्यते संज्ञाभेद एव ।

तत् केन ज्ञातमिति । अत्रापि यदि प्रमाणत इत्यादि प्राग्वत् ज्ञेयम् ।

कथं [कस्य] प्रतिपाद्यतेति । प्रमाणानामभावादेव ।

भाष्ये ॥ उदाहरणोपादाने हेतुमाह—**हेत्वर्थस्य साधकत्वमिति ।**

अस्य सिद्धान्त इति । बौद्धस्य पक्षः ।

स चेत्यादिनार्थं साधयन्तीति । साध्येऽर्थसाधने एव गतत्वात् त्रैकाल्यासिद्धेरिति हेतुर्विरुद्ध इत्यर्थः ।

तदेवं यद्युदाहरणमुपादीयते इति पक्षं दूषयित्वा यदि नोपादीयते इति पक्षं दूषयति—**अथ नोपादीयते** इति ॥

उने ॥ साधनोपक्रमेति । साधनेन कालत्रयेऽप्यर्थाप्रतिपादकत्वात् इत्येवं विवक्षितार्थेन त्रैकाल्यासिद्धेरित्यनेनोपक्रमो यस्याः सा या कथा तत्पक्षे ।

दूषणेति । यदापि त्रैकाल्यासिद्धेरित्येतन्न साधनं किं तर्हि प्रामाण्यव्यवस्थापक-तर्कदूषणमिति पक्षः, तदापि ।

एषैव रीतिरिति । प्रागुक्तासिद्धत्वाद्युद्भावनरूपा ।

इयमिति । त्रैकाल्यासिद्धिः ।

टीयाम् ॥ न तु तदतिरिक्तार्थं इति । संप्रतिपत्त्यतिरिक्तार्थः ।

इदमेव स्ववाक्यं व्याख्याति—**न व्याघातेति ।**

संप्रतितन**भाष्य**पुस्तकेषु अर्थासंभवादिति पाठो दृश्यते । **टीकाकार**स्तु क्वचिद-र्थाभावादिति पाठं पश्यन्नाह—**कस्मात् , अर्थाभावादिति ।**

उने ॥ अशक्यश्चेतीति । स्ववाक्यावयवाश्रितानां प्रमाणानां प्रामाण्ये हि अभ्युपगम्य-माने यः सर्वप्रमाणव्याघात उद्भवति स न हि सर्वप्रमाणविप्रतिषेध इति भणितेन निवर्तयितुं शक्यः ।

टीयाम् ॥ किमुक्तं भवतीति **वार्त्तिकं** व्याचष्टे—**तेन त्विति ।**

उने ॥ अतः सूत्रं पठतीत्यविरोध इति । इति **भाष्यकृता** व्याख्यातमिति । शेषे हि **सूत्रं** पठति **भाष्यकार** [710b] इति भवति । शेषाभावे तु **सूत्रकार**स्योप-क्रान्तत्वात् **सूत्रकारः** सूत्रं पठतीति विरुद्धं स्यादिति भावः ।

भाष्ये ॥ इतःसमुत्थानमिति । इतः **सूत्रात्**[1] समुत्थानं यस्य तदितःसमुत्थानम् । समस्तमिदम् ।

---

1 II. i. 15

टीयाम् ॥ कस्मात् पुनस्तत्रैवेदं **सूत्रं** नोक्तमिति **वार्त्तिकं** पूरयति—**पाठक्रममति लङ्घ्येति** ।

उने ॥ **असंगतार्थमिति** । **शब्दादातोद्यसिद्धिवदिति** [1]**सूत्रो**क्तार्थाननुसारित्वात् ।

वीणानिमित्तत्वं शब्दस्यावधारणीयमिति । वीणाशब्दः प्रतिपद्यते इति **वार्त्तिक**स्य वीणानिमित्तः शब्दः प्रतिपद्यते इत्यर्थात् ।

अत्रेति । **वार्त्तिके** ।

तदविनाभूतेति । एतेन वीणादिनिमित्त[क]त्वमिति **वार्त्तिक**स्य वीणाद्यविनाभूतत्वमित्यर्थ उक्तः ।

वाके ॥ **अग्निं धूमविशेषणं प्रतिपद्यते** इति । अयं धूमविशेषो वह्निमान् धूमविशेषवत्त्वादित्येवम् ।

टीयाम् ॥ **अस्तीति वर्तमानेति** । यदि हि कारणेन वह्निना विशिष्टो धूमोऽनुमीयते, तदा धूमदर्शनकाले वह्निरस्तीति नानुमीयते । न हि नदीपूरे दृश्यमाने परत्र दृष्टिरस्तीति शक्यमनुमानमित्यर्थः ।

भाष्ये ॥ **कस्मात् पुनरिहेति** । उपलब्धिहेतोरिति **भाष्यं** कस्मात् पुनरिह नोच्यते ! कस्मात् पूर्वोक्तं पूर्वोक्तमेव सत् **त्रैकाल्याप्रतिषेधश्चे**त्यादि [2]**सूत्रेण** अत्रस्थेनोपपाद्यते इत्यर्थः ।

उत्तरं—**सर्वथेति** ।

टीयाम् ॥ **धारेति** । जलधारा ।

उने ॥ **अनियममुक्त्वेति** । एकस्मिन्नेव काले ।

कालभेदेनेति । प्रमातुरभेदे ।

---

1 II i. 15 2 II. i. 15

ननु यत एवेति । प्रमाणं प्रमेयमिति संज्ञासमावेशदर्शनेन यः प्रमाणप्रमेयभावस्यानियमोऽस्यावास्तवत्वे हेतुर्नोदितः । स यदि निमित्तवशतया निवर्त्येत तदा निमित्तवशतयेति समाधिरुपपद्येत । न चानियमो निमित्तवशतया निवर्तेत । तत् किमनयोक्तयेति पराभिप्राये सत्याहेत्यर्थः ।

प्रमातृभेदेनेति । यदैकः प्रमाता इन्द्रियादिना किञ्चिद् वस्तु प्रमिणोति । अन्यस्तु प्रमाता तदैव तस्यैवेन्द्रियादि प्रमिणोति तदेत्यर्थः ।

तद्वादिभिरिति । क्षणभङ्गपरिणामवादिभिः ।

तदिति । एकस्यैव प्रमाणत्वं प्रमेयत्वं च ।

तैरिति । क्षणभङ्गपरिणामवादिभिः ।

तदनभ्युपगमादिति । तथोत्पादतथापरिणामयोरनङ्गीकृतेः ।

पारमार्थिकनिमित्तसमावेशेति । समावेशोऽत्र संबन्धः । एतेनेदमुक्तं स्यात् । प्रमाणं प्रमेयमिति संज्ञासमावेशदर्शनेन प्रमाणप्रमेयभावोऽनियत इति यत्परेणोच्यते तदस्माभिरप्युपेयत एव । प्रमाणप्रमेयभावस्यानियमेन तु यदपारमार्थिकत्वमुच्यते तन्न मृष्यामहे । यतो यस्य संज्ञासमावेशस्य दर्शनात् प्रमाणप्रमेयभावानियमः प्रमाणप्रमेयावास्तवत्वे हेतुः परेणोच्यते, स यद्यपारमार्थिकप्रमाणत्वप्रमेयत्वनिमित्तसमावेशानियमप्रयुक्तः स्यात् , तदा स्यात् प्रमाणप्रमेयभावस्यावास्तवत्वम् । यदा त्वसौ पारमार्थिकनिमित्तसमावेशानियमप्रयुक्तः, तदा प्रमाणप्रमेयाभावः पारमार्थिक एवेत्यस्यैवार्थस्य भणनाय निमित्तवशादित्युक्तम् । अतो न हि निमित्तवशतया अनियमो निवर्तते इत्येतत्परेणासमीक्ष्य नोदितमिति ।

एतदिति । एकस्मिन्नेव [71.1a] कदाचित् पारमार्थिकं प्रमाणत्वं कदाचित् प्रमेयत्वमित्येवं पारमार्थिकनिमित्तसमावेशानियमभणनम् ।

वाके ॥ समाहारगुरुत्वस्येति । समाहारः कार्यकारणद्रव्यसमुच्चयः । तस्य गुरुत्वम्, न तु निष्कृष्य कार्यस्य कारणस्य वेत्यर्थः ।

उने ॥ इत्यतो व्याचष्टे इति । **सूत्रम् ।**

सोऽयमिति । किं तु यथा प्रमाणं तथा प्रमेया चेत्ययम् ।

सप्तमीसमर्थादिति । विषयसप्तम्या संगतार्थात् प्रामाण्यशब्दात् ।

टीयाम् ॥ **तेनेति** । आत्मना ।

तद्गतेति । आत्मगतसुखादिगुणानुमाने ।

कारकाणामिति । मध्ये ।

उने ॥ **आदिवाक्ये** इति । प्रमाणप्रमेयेत्यादौ ।

वैयाकरणस्य नयमिति । **नैयायिक**मते तु ज्ञानेच्छाप्रयत्नशालित्वं कर्तृत्वम् । तच्च वृक्षादिष्वचेतनेषु नैव संभवति । अतस्तेषु न मुख्यतः कर्तृत्वम् ।

एतदिति । स्वातन्त्र्यम् ॥

टीयाम् ॥ कारकान्तरापेक्षस्य हि सापेक्षत्वेन स्वातन्त्र्यं दुर्घटम् । परं प्रयोजकतया कथञ्चित् स्वातन्त्र्यं विवक्ष्यते—**निषेध्येति** । निषेध्यात्र गतिः ।

तदुपाधिरिति । गत्युपाधिकः ।

उने ॥ **तदभिधायक** इति । अस्तिशब्दाभिधायकः ।

तत्रेति । स्वरूपे ।

अयमिति । वृक्षः ।

टीयाम् ॥ **तत्रेति** । सत्तासमवाये ।

वाके ॥ **प्रतिनिर्दिष्ट** इति । प्रश्नानन्तरमुत्तरे इत्यर्थः ।

टीयाम् ॥ गेहसंबन्धानुभवक्रियेति **वार्त्तिकं** व्याख्याति—**गेहसंबन्धेति** । संबन्धो हि गुणः । तत्प्राप्तिः समवायः स्यादित्यत उक्तम्—**समवाय** इति ।

तद्विषयेति । समवायविषया ।

तेनेति । प्रयत्नेन ।

स इति । देवदत्तः ।

उने ॥ तस्येति । घटस्य ।

स इति । प्रयत्नः ।

उपचारेति । उपचारे कर्तृत्वोपचारे बीजमेतदनपेक्षत्वम् । मुख्यो हि कर्ता ज्ञानेच्छाप्रयत्नशालीतरकारकाप्रयोज्यतया कारकान्तरानपेक्षः स्यात् । वृक्षादीनामप्युक्तेषु स्थितिपक्षेषु कारकान्तरानपेक्षत्वम् अस्तीत्यनेन बीजेनौपचारिकं कर्तृत्वं ज्ञेयमिति भावः ।

वदतेति । **टीकाकृता** ।

उपचारबीजान्तरेणेति । इतरकारकप्रयोजकत्वलक्षणेन ।

असाविति । वृक्षोऽवयवी । प्रासादः स्तम्भैर्ध्रियते इत्युदाहरणं **वार्त्तिके** । अतो वृक्षस्य स्थाने प्रासादस्येति युक्तम् ।

तस्यां स्थिताविति । विषयसप्तमीयम् ।

टीयाम् ॥ अनेकयुगपत्कालप्रत्ययेत्येतत् **वार्त्तिकं** व्याख्याति—**अनेके** इति ।

वाके ॥ न हि कदाचिदाद्ये इति । किं तु द्वितीये एव दर्शने स एवायं वृक्षस्तिष्ठतीति प्रत्ययो भवति । तथा चैकस्य वृक्षस्यायुगपत्कालानेकप्रत्ययविषयत्वम् । इयमेव च स्थितिरित्या**चार्य**स्याशयः ।

उने ॥ विरुद्धधर्मेति । प्रदीपादिषु प्रत्यभिज्ञानस्य यदिदं मिथ्यात्वं तन्न प्रत्यभिज्ञानत्वप्रयुक्तम् । किं तर्हि ? प्रत्यभिज्ञानविषयाणां प्रदीपादीनां योऽयं विरुद्धधर्माध्यासः प्रदीपस्य परिणामभेदेन चक्रभ्रमणस्य च वेगमन्दमन्दतरत्वादिभेदेन भेदलक्षणः । तत्प्रयुक्तम् ।

टीयाम् ॥ तदिति । बाधकं प्रमाणं परिमाणनानात्वादि ।

वाके ॥ रूपरसगन्धेति । क्रमभाविनो रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः प्रतिसन्धीयमानत्वात् । ये प्रतिसन्धीयन्ते त एकानेकनिमित्ता, यथा एकनर्तकीभ्रूविक्षेपवर्तियुगपदनेकविटप्रत्ययाः । मम रूपज्ञानं ह्यस्तने [711b] वृत्तम्, अद्यापि ममैव रसज्ञानमित्येवं प्रतिसन्धीयन्ते च रूपादिप्रत्ययाः । तस्मादेकानेकनिमित्ता इति प्रमाणम् ।

कार्यस्याधारवत्त्वेनेति । कारणं कार्यकालमनुभवति आधारत्वात् । यः आधारः स आधेयकालमनुभवति, यथा क्षीरस्य कुण्डम् । आधारश्च कारणम् । तस्मात् कार्यकालमनुभवति इति च प्रमाणम् ।

कार्यमनाधारमस्तीति । उत्पद्यते इत्यर्थः । एवं च यत् कैश्चिदुक्तं कार्यमनाधारमस्तीति न दृष्टान्तोऽस्ति इत्ययुक्तम् । विनष्टे समवायिकारणे क्षणमेकं कार्यस्यानाधारस्य दृष्टत्वादिति, तत् प्रत्युक्तं वेदितव्यम् ।

योऽनुपपद्यमानेति । अहो [1]आश्चर्यम् ! दृष्टान्ताभावादिति ब्रुवाणो हि भवान् योऽनुपपद्यदृष्टान्तः पक्षः सोऽसाधीयानिति ब्रूते । इति ब्रुवाणश्च स्वपक्षं बाधते, तस्यैवानुपपद्यमानदृष्टान्तत्वात् ।

टीयाम् ।। नन्वयमनुभवः शक्योऽपवदितुं क्षणभङ्गसाधनैरित्यत आह—**क्षणभङ्गेति** ।

अभ्युपगमविरोधे वेति **वार्त्तिकम्** आकाङ्क्षणीयेन पूरयति—**यदि हीति** ।

कारकाधिकारिकत्वादिति । कारकाधिकारो विद्यते यस्यां सा कारकाधिकारिका, तद्भावात् ।

देवदत्तसमवेतया हीति । अनयैव नीत्या देवदत्तः तण्डुलान् पचतीत्यादावपि उक्तलक्षणं कर्मत्वं भावनीयम् । तथा हि देवदत्तसमवेतया स्थाल्यां तण्डुलप्रक्षेपादिकया क्रिया तण्डुलविषयो विक्लेदो जन्यते ।

उने ।। **एतच्चेति** । अनात्मसमवेतक्रियाजनितफलशालित्वस्वरूपं क्रियाविषयत्वम् ।

ननूक्तस्वरूपं क्रियाविषयत्वमतीतानागतयोरप्यस्ति । ततश्च ते अकारके अपि कर्मणी प्राप्नुत इत्याशङ्कयाह—**सत्येवेति** ।

पूर्वभावनियमे इति । क्रियायाः सकाशात् पदार्थस्य पूर्वभावनियमे ।

अकर्मणोरपीति । एतेनातीतानागतयोः कर्मत्वव्यवहार औपचारिक एव, न मुख्य इत्युक्तम् ।

संस्कार्यं कर्म नास्तीति । निर्वर्त्त्यं कर्म निरुपचितं नास्तीति भावार्थः ।।

टीयाम् ।। **आत्मधर्मस्येति** । सुखादेः । एतेन यदा सुखित्वादिविशेषण आत्मा गृह्यते, तदास्य कर्मत्वमित्युक्तम् ।।

---

1 J आचार्य

उने ॥ तस्येति । आत्मनः ।

ननु निमित्तयोरेव समावेशो विरुद्धत्वात् न भविष्यति, तत् कुतः संज्ञासमावेश इत्यत आह—**करणेति ।**

अत इति । यस्मात् अस्मदुक्तप्रकारेणात्मनोऽपि कर्मत्वम्, अतः ।

ननु **टीको**क्तमन्त्रलक्षणप्रकारेण कथमिदं **भाष्यं** संगच्छते इत्यत आह—**विषयमात्रत्वं त्विति । टीका**भिप्रायेण प्रमेये इति **भाष्ये** प्रमाविषयः प्रमेयमिति व्याख्येयमित्यर्थः ।

निरुपाधिरिति । सुखाद्युपाधिरहितः ।

समाहितस्येति । योगिनः ।

वाके । आनन्तर्येति । करणे हि व्याप्रियमाणेऽनन्तरमेव क्रियोपलभ्यते । तद्येयं क्रियायामानन्तर्यप्रतिपत्तिः करणस्य तदिदमस्य साधकत्वमित्यर्थः ।

ज्ञापयतीति । स्वार्थेनन्तश्चौरादिकोऽयं ज्ञाधातुः । ततो जानातीत्यर्थः । तदिदमाह–**प्रतिपद्यते** इति ।

उने । ददातिकर्मणेति । ददातेः कर्मणा ।

प्रयोजनानुरोधाद् वेति । अजां नयति ग्राममित्यादौ संप्रदानसंज्ञा मा भूदित्येवंरूपस्य प्रयोजन[712a]स्यानुरोधात् ।

तथाविवक्षाया अभावादिति । प्रयोजनानुरोधेनान्वर्थत्वस्याविवक्षितत्वात् ।

ननु यदि प्रयोजनानुरोधेनान्वर्थत्वं न विवक्षितं तर्हि अजां नयति ग्राममित्यत्र किमिति न संप्रदानसंज्ञेत्याशङ्क्याह—**अजां नयतीति ।** न त्वजैर्ग्राममभिप्रैतीति । तथा च [1]कर्मणा यमभिप्रैतीत्यनेनैवात्र संप्रदानत्वं व्यावर्त्यमित्यर्थः ।

तथात्वे वेति । ग्रामस्याभिप्रयाणविवक्षायां वा ।

गौणार्थस्येति । [2]किञ्चित्कालार्पणार्थस्य ।

---

1 Pan.   2 J °कला°

विशेषेण ददातिकर्मणोऽनुपादानादिति । सूत्रकारेण हि **सूत्रे** कर्मणेति सामान्येन कर्मोपात्तं न तु ददातिकर्मणेति विशेषेणेत्यर्थः ।

ननु **सूत्रकृता**नुपात्तोऽपि ददातिसंबन्धेन कर्मणो विशेषो **वृत्तिकृता**[1] उपात्त इति तद्वचनानुरोधादन्वर्थत्वं भविष्यतीत्याशङ्क्याह—**तस्मादिति । सूत्रकारेण** विशेषेण ददातिकर्मणोऽनुपादानादेव ।

प्रायोदर्शनमात्रेणेति । प्रायो ददातिकर्मणाभिप्रेयमाणः संप्रदानं दृश्यते इत्येतावन्मात्रेण ।

विवक्षितमिति । सूत्रकारेण ।

संप्रपूर्वार्थानुगम इति । संप्रपूर्वस्य दानस्य **योऽर्थो** भक्तिश्रद्धोपपन्नकर्तृकत्व-लक्षणः, तस्यानुगमः ।

प्रतिदानेऽपीति । भक्तिश्रद्धारहिते सन्तोषमात्रेण दानेऽपि ।

अत्रेति । वृक्षे ।

गुरुत्वेति[2] । गुरुत्वप्रतिबन्धे कारणमित्येतदधिकरणलक्षणमव्यापकमित्येवं योजना ।

विशदयतीति । स्पष्टयति ।

उत्पत्तये (इ)ति । यथा कार्यद्रव्येण कार्यैर्गुणैः कर्मणा च कारणद्रव्यम् ।

स्थितये [इति] । यथा वयोभिर्वृक्षः ।

ज्ञप्तये इति । यथा सामान्येन व्यक्तिः, यथा च नित्यगुणैर्द्रव्यम् ।

टीयाम् ॥ न क्रियेति **भाष्यं** व्याख्यातुं पूरयित्वा गृह्णाति— **न क्रियामात्र-मितीति ।**

क्रियासाधनमिति क्रियाविशेषयुक्तमिति च **भाष्यं** पूरयित्वा व्याख्याति— **यत्प्रधानेति ।**

भाष्ये । उपपत्तिन इति । अनन्तरोक्तयुक्तितः ।

लक्षणत इति । लक्षणशास्त्रात् **व्याकरणात्** ।

---

1 काशिका 2 J गुरुत्वेति repeated

वाके ॥ **शास्त्रमिति** । **शब्दशास्त्रम्** ।

शास्त्रमेव दर्शयति—**कारके** इति ।

इदमिति । कारकस्य क्रियानिवर्तकत्वम् ।

आराद् दूरादुपकारकत्वमिति । कर्त्रादि ।

आसन्नोपकारकमिति । करणम् ।

तदुक्तं पुरस्तादिति । यदा तु विशेषो विवक्ष्यते इत्यादिना ।

शक्तेस्त्रैकाल्यावस्थानादिति । यथा गगनादिनित्यद्रव्यं सर्वदा वर्तमानतया वर्तमानमेव कालं व्यनक्ति, एवं शक्तिरपि त्रिकालावस्थायिनी वर्तमाना व्यपदेशनिमित्तत्वेन स्वीकृता पचति पाचक इति व्यपदेशं प्रवर्तयेत्, न तु पक्ष्यत्यपाक्षीदिति चेत्यर्थः ।

टीयाम् ॥ **इत्यत आहेति** । बुद्ध्यादिगुणसंग्रहाय ॥

वाके ॥ उत्तरम्—**सामर्थ्यमिति** ।

टीयाम् ॥ **तेन शक्तीति** । शक्तिर्बलमुपायपरिज्ञानं च ॥

वाके ॥ **प्रमेयमुपलब्धिविषयत्वादिति** । वृत्तानुत्कीर्तनेन पूर्वविचारोपजीवनेनायमुत्तरो विचार इति दर्शयति **वार्त्तिककारः** । तथा हि स्थिते प्रमाणानां प्रमेयत्वे किं प्रमाणान्तरं ग्राह्यत्वमस्ति वेति विचारो भवति नान्यथेति ।

भाष्ये । **प्रत्यक्षेणेति** । [712b] करणविभक्तिनिर्देशेनानेनोपलब्धिसाधनत्वं संवेदनसिद्धं दर्शितम् ॥

टीयाम् ॥ अथैकव्यक्तिर्व्यक्त्यन्तरेणेति विकल्पमुपन्यस्य दूषयति—**प्रत्यक्षादिभिरिति** ।

पूर्वमिति । धूमादि ।

दृष्टार्थेष्विति । हरीतक्यादिषु ।

तस्येति । हरीतकीं भक्षयेदारोग्यकाम इत्यागमप्रामाण्यस्य ।

अदृष्टार्थेष्विति । स्वर्गादिषु ।

तस्येति । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यागमप्रामाण्यस्य ।

भावाभावयोर्दर्शनस्य तथाभावादिति **भाष्यं** पूरयति—**प्रदीपेति** ।

तथाभावादिति । तथाभावादभावाच्च ।

भाष्ये ॥ **दर्शनहेतुरिति** । प्रदीपः ।

प्रतिपद्यते इति । दर्शनहेतुः प्रदीपः ।

अर्था इति । धूमादयः ।

दृश्यदर्शनव्यवस्थां लभते इति । दृश्यो दर्शनं वोच्यते इत्यर्थः ।

आशयस्थस्येति । जलाशयस्थस्योदकस्य ।

उने ॥ **एतल्लक्षणेति** । अनात्मसमवेत्या[?]दियत् कर्मलक्षणं तदभिप्रायेण ।

भाष्ये ॥ **तेनैव मनसा तस्यैव चानुमानमिति** । युगपज्ज्ञानानुत्पत्त्यापि हि गृह्यमाणं मनो मनसैव गृह्यते ।

वाके ॥ **निमित्तभेद** इति । सुखादिविशिष्टो ज्ञेयो जातज्ञानस्तु ज्ञातेति निमित्तभेद इत्यर्थः ।

उने ॥ **भाष्यान्तरमिति** । यथा च स्थाल्यादीत्यादिकम् ।

तामनर्थभेदमिति । यथा च स्थाल्यादीत्यादि **भाष्या**न्तरोक्तम् ।

ननु यथायं प्रसङ्ग इत्यादिकमादिमं **भाष्य**मुल्लङ्घ्य यथा च स्थाल्यादिकं **भाष्या**न्तरं किमर्थं प्रथमं **वार्त्तिककृता** व्याख्यातं तत्राह— **अर्थभेदमिति** ।

टीयाम् ॥ **अयमेव दृष्टान्तो नायमिति** । प्रदीपप्रकाश एव दृष्टान्तो न स्थाल्यादिरूपदृष्टान्त इति ।

वाके ॥ **उभयथेति** । **भाष्यो**क्तप्रकारद्वयेन ।

उने ॥ **यद्यपि साध्यमिति** । यद्यपि केवलसजातीयान्तरानपेक्षत्वं साध्यं विकल्पनीयमित्येवं साध्यं विकल्पयितुं युज्यते किमत्यन्तसजातीयमित्यादिना अग्रे साध्यस्यैव

विकल्प्यमानत्वात् परं यत् प्रकाशकत्वं विकल्पनीयमित्येवं हेतुरेव विकल्पितः स दीपज्ञानयोः सादृश्यं परस्याभिप्रेतं प्रकाशकत्वेनैव, न त्वालोकत्वादिनेत्येतत् प्रकटयितुम् । अत्र हि प्रकाशकत्वमित्यस्योक्तावयमर्थो विभावितः स्यात् ।

अत एवेति । यत एव प्रकाशकत्वेनैव परस्य दीपज्ञानयोः साजात्यमभिप्रेतं न त्वालोकत्वादिना, अत एवाग्रे भविष्यति परं प्रति भणितिः । तद् यथा—**अथ कथञ्चि- दिति ।** अनेन हि आलोकस्य पराभिमतं दृष्टान्तत्वं दर्शयता नालोको दीपज्ञानयोः समानो धर्म इति दर्शितम् ।

विरोध इति । प्रकाशकत्वस्य विकल्पनीयत्वमुक्त्वा सजातीयान्तरानपेक्षत्वस्य साध्यस्यैव विकल्पनलक्षणः ।

टीयाम् ॥ आलोकस्येति । प्रदीपप्रकाशस्य ।

विरुद्धश्च हेतुरिति । कथञ्चित् सजातीयानपेक्षत्वे साध्ये प्रकाशकत्वादित्यस्य हेतोः साध्यविरुद्धेन कथञ्चित् सजातीयापेक्षत्वेनैव व्याप्तत्वात् ।

ननु [1]यदि विषयज्ञानं स्वज्ञानं प्रति ज्ञानान्तरमपेक्षते तदैतदत्यन्तसजातीयापेक्षम् । यच्चात्यन्तसजातीयापेक्षं तन्न कथञ्चित्सजातीयापेक्षम् । ततश्चात्यन्तसजातीयापेक्षलक्षणे कथञ्चित् सजातीया[713a]नपेक्षे सपक्षेऽपि प्रकाशकत्वादित्यस्य हेतोर्दर्शनात् कथं साध्य- विरुद्धेन कथञ्चित् सजातीयापेक्षत्वेनैव व्याप्तिरित्यत आह—**विषयज्ञानमपीति ।** विषयज्ञानस्य हि ग्राह्यस्य तथाभूतमेव विषयज्ञानमत्यन्तसजातीयं स्यात् । न तु ज्ञानविषयं ज्ञानं विषयभेदेनात्यन्तभेदप्रतीतेरित्यर्थः ।

दोषान्तरमिति । विरुद्धत्वलक्षणम् ।

॥ इति प्रमाणसामान्यपरीक्षाप्रकरणं संपूर्णम् ॥

— — — —

1 J यदा

॥ प्रत्यक्षपरीक्षाप्रकरणम् ॥

[२.१.२१–३३]

उने ॥ अत्रेति । प्रत्यक्षलक्षणपरीक्षायाम् ।

वाक्यार्थत्वेति । वाक्यार्थो यथार्थोऽयथार्थश्च दृष्टः । इन्द्रियार्थेत्यादि प्रत्यक्षलक्षणमपि वाक्यार्थः । तदिदं यथार्थमन्यथा वेति सन्देहः ।

तत्र तत्रेति । यत्र यत्र प्रत्यक्षेणात्मादि प्रमेयं परीक्षिप्यते ।

समानमिति । प्रमाणपरीक्षाप्रयोजनेन ।

प्रकृते इति । प्रत्यक्षलक्षणे ।

सूत्रवदिति । अनुपपन्ने इत्यर्थः ।

अनुक्तोपालम्भ इति । न हि कारणावधारणार्थं **सूत्रं** वयमुक्तवन्तः ।

सूत्रे इति । इन्द्रियार्थेत्यादौ ।

ज्ञानमिति । अस्य व्याख्या प्रत्यक्षज्ञानम् ।

नन्विन्द्रियार्थसन्निकर्षे कारणे सत्यपि घटादिविषयं प्रत्यक्षज्ञानं तदैव [1]जायते यदि मनसः प्रत्यक्षं स्यात्, इत्यत आह––प्रत्यक्षं जात**मिति शेष इति** ।

टीयाम् ॥ लक्ष्यते इति । एतेन लक्ष्यते ज्ञायतेऽस्मिन्निति व्युत्पत्तिर्दर्शिता ।

उने ॥ वार्त्तिकार्थमिति । कारणपक्षे इत्यादेर्विशेषितमेतदित्यन्तस्य **वार्त्तिक**स्यार्थम् ।

टीयाम् ॥ अव्यापकत्वादिति । इन्द्रियमनःसंयोगाभावेऽपि सुखादिप्रत्यक्षस्य सद्भावात् ।

उने ॥ तदुपपादकतयेति । पूर्वपक्षस्योपपादकतया ।

---

1 MSS ज्ञायते

भाष्यकृता व्याख्यातत्वादिति । असमग्रवचनादित्येतत्प्रसङ्गागतस्य मनःसन्निकर्षादेः कारणस्य प्रतिपादनपरेण नासंयुक्ते द्रव्ये इत्यादिना **भाष्येण ।**

ननु नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति [1]**सूत्र**स्यात्ममनसोः सन्निकर्षाभावेनोत्पद्यते प्रत्यक्षमित्यर्थतोऽभिधानमात्ममनःसन्निकर्षस्येन्द्रियमनःसन्निकर्षस्य चेत्यर्थपरस्य सिद्धान्त**सूत्र**त्वं भविष्यति, को दोषः ? तत्राह—**सिद्धान्तेति ।**

पूर्वेणैवेति । नात्ममनसोरित्यादिनैव ।

तदर्थेति । सिद्धान्तार्थः ।

सोऽयं विरोध इति । नात्ममनसोरित्यादि **सूत्रं** पूर्वपक्षोपपादकतया व्याख्यातवतो **भाष्यकृतः** सिद्धान्तार्थप्रकाशकतया अवतारयतो **वार्त्तिककृत**श्च ।

अनागतावेक्षणेनेति । सूत्रभाष्योक्तं भाविनं सिद्धान्तमवेक्ष्य ।

भाष्ये । ननु यदि ज्ञानोत्पत्तिर्दृश्यते, एतावता कथमात्म[म]नःसन्निकर्षः कारणमित्यत आह—**नासंयुक्ते** इति ।

उने ॥ नोक्तोत्तरत्वादिति वार्त्तिकमिति । सिद्धान्तरूपम् ।

टीयाम् ॥ सति भावमात्रेणेति । यस्मिन् सति भवति तद् कारणमित्येतावन्मात्रेण कारणलक्षणेन ।

उने ॥ आत्ममनः इति । दिग्देशकालेत्यादिना हि [2]**सूत्रे**णात्ममन सन्निकर्षादेरकारणत्वं व्युत्पाद्यते । तद् यदीदं प्रत्यवस्थानं पूर्वपक्षिणः स्यात् तदा असमग्रता पूर्वपक्षस्य [3]**प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचना**दित्येवमसमग्रतया यः पूर्वपक्षः तस्य विरोधः स्यात् ।

अपसिद्धान्तेति । आत्ममनःसन्निकर्षादेरकारणत्वव्युत्पादनं ह्यपसिद्धान्तो [713b] **नैयायिकानाम् ।**

टीयाम् ॥ तादृश इति । सति भावमात्रेण कारणम् ।

उने ॥ दिग्देशेति । यथा हि येनैवानुसन्धानादिना प्रमाणेनात्मा धर्मी निश्चीयते, तेनैवास्या ज्ञानं प्रति कारणत्वमपि निश्चीयते । न तथा येन प्रमाणेन दिगादयो धर्मिणो

1 II. i. 22 2 II. i. 23 3 II. i. 21

निश्चीयन्ते, तेनैषां ज्ञानं प्रति कारणत्वमपि निश्चेयम् । यतो य एव मूर्तान्तरापेक्षया परः, स एव नवीनः सन् चिरन्तनापेक्षया अपरः, य एव च मूर्तान्तरापेक्षया अपरः स एव चिरन्तनः सन् नवीनापेक्षया परः इत्येवं परापरव्यतिषङ्गः । शब्दश्चान्यथा नोपपद्यते यदि दिगादयो न स्युरित्येवं परापरव्यतिकरमात्रोपपादकतया दिग्देशकालौ शब्दमात्रोपपादकतया आकाशश्च सिध्यन्ति । न चैतयैषां ज्ञानकारणत्वमाक्षिप्यते इत्यर्थः ।

नापि स्वर्गं प्रतीति । यथा यागस्य स्वर्गं प्रति कारणत्वमागमेन निश्चीयते, नैवं दिगादीनां ज्ञानं प्रति कारणत्वमागमेनापि ।

तदभावादिति । आगमाभावात् ।

आत्ममनःसन्निकर्षवदिति । आत्ममनःसन्निकर्षादेरिव ।

तच्चेति । सन्निधिमात्रम् ।

प्रकृते त्विति । आत्ममनःसन्निकर्षादौ ।

उभयमिति । अन्वयव्यतिरेकौ ।

अन्वयव्यतिरेकाविति । यत्राकाशादीनां सेन्द्रियशरीरवर्त्यात्मना सन्निकर्षः तत्रापि ज्ञानम् , यत्र च न सेन्द्रियशरीरवर्त्यात्मना सन्निकर्ष आकाशादीनां तत्र न ज्ञानमित्यन्वयव्यतिरेकौ ।

तस्यापीति । आकाशादीनां सेन्द्रियशरीरवर्त्यात्मसन्निकर्षस्यापि ।

ननु सेन्द्रियशरीरवर्त्यात्मनोऽपि मनसा सन्निकर्षोऽवर्जनीय इत्यात्मनोऽपि सन्निकर्षद्वारा कारणत्वं भविष्यतीत्याशङ्क्याह—**न चेति ।**

विपक्षे बाधकादिति । आत्मनोऽकारणत्वेऽनुसन्धानाभावप्रसङ्गो बाधक इत्यर्थः ।

अन्वयवदिति । सति भावमात्रेणान्वयोऽपि तावन्न संभवति, घटे सति पटस्य भावे घटपटयोरप्यन्वयप्रसङ्गात् । तस्माद् यथात्रान्वयः तथा व्यतिरेकोऽपि, यदि तदा दैवागतोऽप्रयोजकः स्यात् ।

अप्रयोजक इत्यस्यैव तात्पर्यार्थमाह—**सोऽपीति ।** व्यतिरेकोऽपि । न केवलमन्वय इत्यप्यर्थः ।

इत्येवंपरः । इत्येवंनिष्ठः ।

वाके ॥ पार्श्वस्थ एवैकग्रन्थेन सिद्धान्तिनं पृच्छति—**कतमेनेति** ।

सिद्धान्ती उत्तरयति—**सामर्थ्यानुपलब्धेरिति** ।

सिद्धान्ती पार्श्वस्थमाशङ्कते—**सन्निधीति** ।

परिहरति—**तदयुक्तमिति** ।

उने ॥ **शब्दगतिः समर्थितेति** । चान्द्रमसे तमसि औष्ण्यमसत्कल्पमिति व्याख्याने हि विना तेजःस्पर्शेनौष्ण्येनेत्यत्र **वार्त्तिके** विना शब्दप्रयोग उपपादितः स्यात्, न पुनः स्पर्शाभावेऽपि रूपोपलब्धिरिति स्वरूपिण्यर्थगतिरुपपादिता स्यात् ।

न हि रूपवदिति । यथा रूपे सत्येव रूपोपलब्धिः नासति एवं स्पर्शेऽपि सत्येव रूपोपलब्धिः, नासतीत्यर्थः ।

ननु स्पर्शे सत्यपि वायौ रूपोपलब्धिर्न दृष्टेति व्यभिचारात् स्पर्शस्य कथं तां प्रति कारणत्वमित्याशङ्क्याह—**न चेति** ।

अतिप्रसङ्गादिति । बीजस्यापि केवलस्याङ्कुरं प्रति कारणत्वं प्रसङ्गात् ।

अनवबोधादिति । असत्कल्प इत्यर्थ इति **टीका**व्याख्यानस्य ।

न हि रूपस्येवेति । यथा हि रूपस्योद्भूतत्वलक्षणं विशेषमाश्रित्य रूपोपलब्ध्यन्वयव्यतिरेकौ [714a] न तथा स्पर्शस्योद्भूतत्वलक्षणं विशेषमाश्रित्य रूपोपलब्ध्यन्वयव्यतिरेकावभ्युपेयौ, चान्द्रमसे एव तेजसि स्पर्शस्यानुद्भूतत्वेन रूपोपलब्ध्यभावप्रसङ्गात् । तस्मात् स्पर्शत्वमात्रेण स्पर्शस्यान्वयव्यतिरेकावभ्युपेयौ ।

ततः किमित्याह—**तस्येति** । स्पर्शमात्रस्य ।

किमितरेति । चक्षुरादीतररूपोपलब्धिकारणसामग्र्यां सत्यां योऽयमात्माकाशादौ रूपोपलब्ध्यभावः स **किं** स्पर्शाभावप्रयुक्तः, अथवा अनुद्भूतत्वेनानुपलभ्यमाने स्पर्शे सत्यपि तद्व्याप्यं स्पर्शव्याप्यं यद्रूपं तदभावप्रयुक्त इति व्यतिरेकविषयः सन्देहः ।

अन्वयविषयं सन्देहमाह—**तथेति** ।

नन्वसत्कल्प इत्यर्थ इत्यनेन कथमयमर्थः **टीकाकृता** उक्त इत्यत आह—**प्रकृते** इति । चन्द्रतेजःस्थे स्पर्शे ।

प्रयोजकेति। आत्मादौ घटादौ च सन्दिग्धान्वयव्यतिरेकत्वात् रूपोपलब्धिकारणत्वं प्रति प्रयोजकस्वभावविरहः।

स चेति। आत्मसमवायः।

असिद्ध इति। आत्मसमवायेन ज्ञानस्य गुणत्वं गुणेन च ज्ञातेनात्मसिद्धौ आत्मसमवायित्वं सेत्स्यतीति परस्पराश्रयतया असिद्धिः।

अनैकान्तिकश्चेति। आत्मत्वसामान्येन।

इत्यत आहेति। आत्मसमवायस्यासिद्धौ तद्गुणत्वस्यासिद्धिः। एतस्यां चात्मलिङ्गत्वस्याप्यसिद्धिः। अतो हेतोराह॥

टीयाम्॥ प्रत्यक्षान्तरवेद्यमिति। मानसप्रत्यक्षादितरेण प्रत्यक्षेण वेद्यम्।

अप्रत्यक्षं वेति। गुरुत्वादि हि हस्ताद्यवनत्यादिनानुमेयम्, न तु प्रत्यक्षम्।

प्रश्नोत्तरे इति। कथं पुनर्ज्ञानमात्मनो लिङ्गमित्यादिकः प्रश्नः, तद्गुणत्वादित्यादिकमुत्तरं च **वार्त्तिक**स्थे दर्शितव्यवस्थानुसारेण व्याख्येये ?

कार्यत्वे सति विभुद्रव्यसमवायादित्यर्थ इति। समवायादित्युच्यमाने ज्ञानत्वादेरप्यात्मगुणत्वं स्यादिति तन्निवृत्त्यर्थं द्रव्यपदम्। द्रव्यसमवायश्च द्व्यणुकादेः कार्यद्रव्यस्यापीति तन्निवृत्तये विभुपदम्। विभुद्रव्यसमवायः शब्दसंयोगादेरपीति तन्निवृत्तये व्योमाद्यन्येति ज्ञेयम्। इदं च पृथिव्यादिगुणत्वाभावे साध्येऽर्थात् सेत्स्यतीति मत्वा नोक्तम्। एवमपि द्रव्यत्वस्यात्मगुणत्वं प्राप्नोतीति तन्निवृत्तये कार्यत्वे सतीति।

उने॥ द्वित्वादिना व्यभिचार इति। द्वित्वादिर्हि यदपेक्षाबुद्धिमाश्रित्योत्पद्यते तस्यात्मनः संवेद्यो, न च पृथिव्यादिगुण इति व्यभिचारः॥

यत्तदोर्व्यत्ययेनेति। यश्च पृथिव्यादिगुणः स प्रत्यक्षः स्वपरसंवेद्य इत्येवम्।

स एव व्यभिचार इति। द्वित्वादिना व्यभिचारः। द्वित्वादिर्हि पृथिव्यादिगुणोऽपि यदपेक्षाबुद्धिमाश्रित्योत्पद्यते तस्यैव संवेद्यो नान्येषाम्।

यस्मादेवमिति। यस्मादेवं कार्यत्वे सति व्योमाद्यन्यविभुद्रव्यसमवायेन व्यतिरेकिहेतुना आत्मगुणो ज्ञानं सिध्यति, तस्मात् व्यतिरेकसिद्धादात्मगुणत्वात् ज्ञानमात्मानमनुमापयतीत्ययमर्थस्तद्गुणत्वादित्यस्य भाष्यस्य।

यः पुनरर्थो न स्यात् तमाह—**नन्वन्वयत** इति। सामान्यवत्त्वे सति अस्मदादिबाह्यैकैकेन्द्रियग्राह्यजातीयत्वेन गन्धस्य गुणत्वे सिद्धे गन्धः पृथिव्या गुणस्तदन्वयव्यतिरेकानुविधानात्। यस्य यदन्वयव्यतिरेकानु[714b]विधानं स तस्य गुणो यथा मधुरो रसो जलस्येत्येवमन्वयत एव। यत्तद्गुणत्वं तस्मादेव यथा गन्धादिः पृथिव्याद्यनुमापयति, तथा ज्ञानमात्मगुणः आत्मसमवायात् सुखादिवदित्येवमन्वयत एव यत् तद्गुणत्वं यथाश्रुत**वार्त्तिके** प्रतीयमानं तस्मादेव तज्ज्ञानं कर्तृ आत्मानमनुमापयतीत्ययमर्थः पुनर्नेति **उदयन**व्याख्यार्थः।

बहु विप्लवेतेति। **सूत्रकारो**ऽप्रस्तुताभिधायीत्येवमादि।

उत्तरवार्त्तिकमिति। उत्तररूपं **वार्त्तिकम्**।

टीयाम्॥ उपपत्तिसामर्थ्यादिति **वार्त्तिक**स्थमुपपत्तिपदं व्याख्याति—**उपपत्तिलिङ्गमिति**।

उने॥ **न तथेति**। नार्थलब्धो नाप्युपलक्षणमिति हेतोः किमिति चोद्यते परेण? कथमित्याह—**न वक्तव्य** इति। कस्मादिन्द्रियार्थसन्निकर्षोऽभिधीते इत्यादिना हि आत्ममनःसन्निकर्षादिवदिन्द्रियार्थसन्निकर्षोऽपि न वक्तव्य इत्येतदेव परेण चोदितम्। तत् किमित्यर्थः।

टीयाम्॥ **अर्थप्राप्तिरिति**। अर्थाल्लाभः।

अतिव्यापकत्वादिति। आत्ममनःसन्निकर्षस्यानुमानादावपि गतत्वादति व्यापकत्वमिन्द्रियमनःसन्निकर्षस्य च सुखादिप्रत्यक्षेऽगतत्वादव्यापकत्वम्।

उने॥ **सौत्र** इति। प्रत्यक्षनिमित्तत्वादित्यादि**सूत्रोक्त**[1]॥

नन्वर्थसंगत्यर्थं हि शेष आश्रीयतेऽत्र च **सूत्रे** ज्ञानोत्पत्तिरिति शेषेऽङ्गीक्रियमाणे प्रत्युत सन्निकर्षनिमित्तत्वादित्यत्र सापेक्षत्वेन समासोऽसमर्थः स्यात्। तत् किमनेनेत्याशङ्क्याह—**यद्यपीति**।

उत्तरपदार्थप्राधान्य इति। सन्निकर्षस्य निमित्तमित्येवम्।

अन्यपदार्थप्राधान्ये इति। सन्निकर्षो निमित्तं यस्या इत्येवम्।

---

1 II. i. 26

असमर्थः समास इति। ज्ञानोत्पत्तिं प्रति निमित्तस्य सतः सन्निकर्षस्य इन्द्रियार्थापेक्षत्वात्।

शेषापेक्षा भविष्यतीति। शेषं विना **सूत्रार्थ**संगतेः।

यद्येवमिन्द्रियार्थसन्निकर्षनिमित्तत्वादित्यस्तु। एवं ह्यसामर्थ्यं समासस्य निवर्तेत, लाघवं च स्यादित्यत आह—[1]**असमर्थेति।**

टीयाम्॥ कथं प्रणिधायेत्याह—**अर्धरात्रे भयोत्थातव्यमिति।**

उने॥ पर्यायभ्रममिति। प्रबोधज्ञानशब्दयोरेकार्थत्वात्।

टीयाम्॥ तद्व्यपदेश इति। संख्याव्यपदेशः।

उने॥ पूर्वमिति। सुप्तव्यासक्तेत्यादि**सूत्रे**[2]॥

टीयाम्॥ अस्येति। धर्माधर्माख्यस्य गुणान्तरस्य।

तन्नान्तरीयकतयेति। जन्मायुर्नान्तरीयकतया।

उने॥ अत आह—स्वसंबन्धीति। ईश्वरस्य हि यत् सुखदुःखयोः संवेदनं तत् परकीययोः, स्वकीययोस्तयोरभावात्। अतो नानेन जन्मायुर्नान्तरीयकत्वव्यभिचारो भोगस्येत्यभिप्रायः स्वसंबन्धीति वदतः **टीकाकृत** इत्यर्थः।

ननु सर्वार्थिता अस्य निवर्तते इति वदतो हि **भाष्यकृतः** सर्वकार्याणि प्रत्यदृष्टस्य कारणताभिप्रेता। तथा च प्रध्वंसं प्रत्यपि अदृष्टस्य कारणत्वमिष्टम्। तत् कथमाह **टीकाकारो**ऽन्यथास्य सर्वद्रव्यगुणकर्मकारणता न स्यादित्यत आह—**विनाशं प्रतीति।**

तस्येति। अदृष्टस्य। कर्तरि षष्ठी।

विशेष्येति। प्रध्वंसाभावव्यावृत्तये सर्वपदं द्रव्यगुणकर्मभिर्विशिष्टं कृत्वा।

॥ इति प्रत्यक्षलक्षणपरीक्षाप्रकरणं संपूर्णम्॥

---

1 S समर्थेति 2 II. i. 27

॥ प्रत्यक्षेऽवयविपरीक्षाप्रकरणम् ॥

[२.१.३४–३७]

उने ॥ तत्प्रसङ्गादिति । प्रत्यक्षलक्षणपरीक्षाप्रसङ्गात् ।

पूर्वक एवेति । वाक्यार्थत्वसामान्यात् यथार्थत्वायथार्थत्वसंशयः ।

व्यधिकरणं चेति । प्रासादस्य श्वैत्ये साध्ये काकस्य काष्ण्यर्वद्भिन्नाश्रयम् ।

टीयाम् ॥ एककार्यत्वमिति । एकस्या सामग्र्याः कार्याण्येककार्याणि तद्भावः ।

एककारणत्वं वेति । एकस्य कार्यस्य कारणानि एककारणानि । तद्भावः ।

उने ॥ अस्माकमिति । नये ।

अनेवंभूतानामपीति । कार्यकारणभावेनैककार्यत्वेनैककारणत्वेन च रहितानामपि ।

कार्यप्रत्यासत्त्यभिप्रायं वेति । कार्यवस्तूनां या प्रत्यासत्तिः तदभिप्रायेण वा कार्यस्येत्यादि तथा चास्माकमपि नये घटते इत्यर्थः ।

वाके ॥ एकदेशग्रहणादित्यादि **भाष्यं** विवृणोति—**अपरे त्ववर्गभागेति।**

न तर्हीति परिहार**भाष्यं** व्याचष्टे—**एतस्मिन्नपीति ।**

अनुमाने इति । प्रसिद्धे धूमानुमानादौ ।

प्रतिसन्धायापीति । प्रतिसन्धायाप्यनुमिमीतां परं प्रतिसन्धानमेव न समुदाये घटते न वृक्षे ।

कुत इत्याह—**न हीति ।** न तावदगृहीतस्य समुदायस्य वृक्षस्य वा प्रतिसन्धानम् । प्रत्यक्षं च ग्राहकं नाभ्युपेयते । तस्मादेकदेशदर्शनादनुमाय समुदायो वृक्षो वा प्रतिसन्धेयः न चायमनुमातुं शक्य इत्यर्थः ॥

ननु मा भूत् समुदायमनुमाय प्रतिसन्धानम्, समुदायिनं त्वनुमाय भविष्यतीत्यत आह—**किं चेति ।**

धर्मप्रसिद्धाविति । साधनधर्मप्रसिद्धौ ।

धर्मान्तरविषयमिति । साध्यधर्मविषयम् ।

टीयाम् ॥ **पूर्वमिति** । एतस्मिन्नपि पक्षे वृक्षबुद्धेरभाव एव, कथं परभागस्यार्वाग्भागस्य चावृक्षत्वादित्यत्र ।

ननु कल्पितविषयत्वादनुमानमप्रमाणमेव, प्रमात्राशयवशेन तु प्रमाणमिति व्यवह्रियते, अत आह--**यथा भ्रान्तमपीति** ।

अर्थसंबन्धेनेति । मणिप्रभायां मणिबुद्धिवत् पारम्पर्येणाप्यर्थसंबन्धेन प्रामाण्यमिति **बौद्धाः** ।

ननु विकल्पानामसत्प्रकाशनशक्तिरस्ति, अतः प्रधानाभावेऽपि भ्रान्तिरुपपन्नेत्यत आह--**विपरीतख्याताविति** ।

तदिति । परमाणूनां नैरन्तर्यम् ।

गन्धरसस्पर्शेति । गन्धपरमाणुभिर्व्यवधानात् रूपपरमाणूनाम् ।

उने ॥ ननु यदि साध्यधर्मोऽपि प्रत्यक्षेण प्रसिद्धः, तदा प्रत्यक्षतो दृष्टानुमानेन किं कार्यमित्यत आह्--**त्रिकस्येति** ।

टीयाम् ॥ **अनवस्थापातादिति** । येनाप्यनुमानान्तरेण तद्ग्रहणं तेनापि गृहीतलिङ्गेन लिङ्गग्रहणं चानुमानान्तरेणेत्येवमनवस्थापातः ।

अनुमितिरिति । अनुमानफलम् ।

उने ॥ **तत्रापीति** । एकदेशग्रहणेऽपि ।

वाके ॥ **प्रकारवदिति** । [1]पूर्ववच्छेषवत् सामान्यतो दृष्टं चेत्येवम् ।

टीयाम् ॥ **उत्पत्ताविति** । स्वोत्पादविषये ।

---

1 I, i 5

कार्ये इति । ज्ञाने ।

उने ।। लिङ्गपरामर्शज्ञानेन व्यभिचारनिवृत्त्यर्थमाह—**सर्वत्रेति शेष** इति ।

भाष्ये ।। **न चेदमिति** । इदं प्रत्यक्षम् ।

टीयाम् ।। **तदेतद्भाष्यमिति** । न चैकदेशोपलब्धिरवयविसद्भावात् इति [1]**सूत्र**-ग्रहणपरं **भाष्यम्** ।

इत्यपि द्रष्टव्यमिति । किं च नावयविनः क्रियते इति **वार्त्तिका**नन्तरं न चैकत्र कृत्स्नेत्यादिकमपि ज्ञेयमित्यर्थः ।

वाके ।। **एकद्रव्य** इति । एकं द्रव्यं परमाणुलक्षणं समवायिकारणं यस्य स तथा ।

परिसमाप्तः स्यादिति । समा परिसमाप्तोऽभविष्यदित्यर्थः ।

उने ।। कुतो न संगच्छते इत्यत आह—**वृत्तौ प्रकारेति** ।

अयमभिसन्धिरितीति । अभिसन्धिर्हि नावयविनोऽवयवेषु वृत्तिनिवृत्तिरिति सिद्धमित्यन्तेन **टीका**ग्रन्थेन पूर्णः । तत्र चावयवी नावयवेष्वेकदेशेन कार्त्स्न्येन वा वर्तते । किं तर्हि ? स्वरूपेणैवेति दर्शयता **टीकाकृता** अवयविनो वृत्तावेकदेशकार्त्स्न्याभ्यामन्यः स्वरूपलक्षणः प्रकारो दर्शितः । तथा च **वृत्तौ** प्रकारान्तराभावेन मा वर्तिष्टेत्यपि परो ब्रूयादिति निराकृतमेव ।

टीयाम् ।। **एतेनेति** । कुसुमेषु सूत्रस्यैकदेशेन वृत्तेर्निराकरणव्याख्यानेन ।

एतदपि व्याख्यातमिति । यदि कलविङ्ककण्ठगुणः कलविङ्ककण्ठेषु व्याप्त्यावर्तते किमायातमवयविनः ? अथानेके कलविङ्ककण्ठगुणाः कलविङ्ककण्ठेषु व्याप्त्यावर्तन्ते तदा नैकमनेकत्र व्याप्त्यावर्तते, किं त्वनेकमनेकत्रेत्येवम् ।

उने ।। **रूपतोऽपीति** । स्वरूपतः ।

तेषां प्रयोजकत्वमिति । भागाः सन्ति । अतः सूत्रं कुसुमेषु वर्तते इत्येवं न भागानां सूत्रवृत्तिं प्रति प्रयोजकत्वम् ।

---

1 II. i. 33

रूपमेवेति । येनावयविनोऽवयवेषु वृत्तिरभ्युपेयते तदेतत्स्वरूपमेव ।

तयोरिति । कात्स्न्यैकदेशयोः ।

यथा समुदाये इति । यथा सर्वैर्भोक्तव्यं कतिपयैर्वेति ।

वाके ॥ अथैकमनेकं प्रत्यादि स्ववाक्यमेव भावयति—**ये चेति ।** चो हेत्वर्थे ।

एतस्मिन्नपि पक्षे इति । न केवलं प्रत्यवयवं सर्वात्मना वर्तते इति **पक्षे** प्रत्यवयवमेकदेशेन वर्तते इति पक्षेऽपि ।

अधिकरणमिति । एकमनेकत्र वर्तते इत्येतत् ।

टीयाम् ॥ **अनुभूतावसितमिति ।** अनुभूतं निर्विकल्पकेनावसितं विकल्पेन ।

अनवयवत्वस्य सत्तामात्रानुवर्तित्वमेव दर्शयति—**तथा ह्येकस्येति ।**

तथा हीति । विरुद्धधर्मोपसंसर्गोपदर्शने ।

तस्येति अवयविनः ।

उने ॥ धर्मिविकल्पस्येति । टीकायां यद्यनुभूतावसितं नीलमनवयवत्वेन साध्यते ततः सिद्धसाधनमित्यादेः ।

सांशत्वादिति । भ्रान्तत्वाभ्रान्तत्वादिस्वरूपविशेषरूपांशान्वितत्वात् ।

अनाश्रितत्वं चेदिति । निरवयवमिति कोऽर्थः ? अनाश्रितं यदि तथापि साध्यविकलो दृष्टान्तः, ज्ञानस्याप्यसन्नये आश्रितत्वात् ।

युगपदुत्पन्नेति । बौद्धमते चित्रपटादौ युगपदुत्पन्नानि यान्यनेकज्ञानानि तदुपादानं यदेकज्ञानं नीलादिज्ञानं तेन ।

अनेकमूर्तानुपादानत्वं चेदिति । अथानवयवमिति कोऽर्थः ? अनेकानि मूर्तानि न उपादानं यस्य तत् ।

एतदपि यच्छब्दवाच्यस्य मूर्तस्य सतोऽमूर्तस्य वा ? तत्राद्यं दूषयति—**मूर्तस्य सत** इति ।

द्वितीयं निराचष्टे—**अमूर्तेति ।**

बाधादिति । प्रत्यक्षबाधात् ।

अनेकमूर्तानुपादानत्वपक्षे एव दूषणान्तरमाह—**अनेकमूर्तानुपादानत्वे चेति** ।

तच्चेति । एकमूर्तोपादानत्वम् ।

नन्वनेकमूर्तानुपादानमित्यत्र मूर्तानुपादानत्वमात्रं विवक्षितम् । तथा च न साध्यविकलत्वं दोषः । तत्राह—**मूर्तानुपादानत्वेति** ।

साध्यबाधश्चेति । नीलादीनां मूर्तोपादानत्वस्यैव प्रत्यक्षसिद्धत्वात् ।

विशेषनिषेधानुपपत्तेरिति । अनेकानि मूर्तानि नास्योपादानानीत्येवं यो विशेषनिषेधः, तस्याघटनात् ।

ननु [716a] **बौद्ध**नये परमाणुरपि सकारणक एवेति कथमकारणकत्वनिश्चयो येन साध्यविकलत्वं स्यादित्याशङ्क्याह—**तत्सन्देहेऽपीति** । परमाणोरकारणकत्वसन्देहेऽपि सन्देहात् किं **नैयायिक**मते परमाणुरकारणक इत्ययं विशेषनिषेधानुपपत्त्या साध्यविकलः ? अथ वा **बौद्ध**मते सकारणक इति न साध्यविकल इति संशयात् ।

स हीत्यादि प्रसङ्गो हि यत् सावयवं तदसदिति साध्ये परस्याभीष्टे यदि सन्नीलादि स्यात् निरवयवं स्यादिति वा स्यात्, यत् सत् तन्निरवयवमिति साध्ये तु यदि सावयवं नीलादि स्यात्, असत् स्यादिति वा स्यात् । उभयथापि न घटते इत्याह—**पूर्वस्मिन्निति** ।

विपर्ययापर्यवसानमिति । न चेदं नीलादि अनवयवमिति **बौद्धै**रनभ्युपगमात् ।

व्याप्तेरभाव इति । सावयवत्वस्यासत्त्वेन व्याप्तेरसिद्धेः ।

एतेनेति । यत् सत् तत् सर्वमनवयवमित्यस्य निरासेन ।

प्रथमद्वितीययोरिति । यद्यवयवानां यदि वा अवयविनोरनेकत्वं साध्यते तदा ।

बाधासिद्धी इति । अवयविनः सिद्ध्यसिद्धिभ्याम् । यद्यवयवी सिद्धः तदा धर्मिग्राहकप्रमाणबाधः नोचेत् ? तदाश्रयासिद्धो हेतुः ।

तद्गतेति । अवयविगतम् ।

परिमाणयोरिति । परिमाणमणुमहदादि ।

तुल्योपलम्भेति । तुल्योपलम्भयोग्यता ययोस्तद्भावात् ।

सामान्यविशेषस्येति । स्थौल्यस्य ।

गृह्यमाणावयववृत्तेरिति । गृह्यमाणावयवेषु वृत्तिर्यस्य स तथा तस्मात् ।

पृथग्गतिमत्त्वमाशङ्कितुमुचितमिति । पृथग्गतिमत्त्वं वेति तृतीयोऽपि विकल्पः शङ्कितुमुचितः ।

आपादकधर्मादिति । पृथग्गतिमत्त्वं ह्यवयविनोऽकम्पेऽप्यवयवानां कम्पः । अस्माच्च युतसिद्धेः प्रसञ्जकात् धर्मात् युतसिद्धिलक्षणः प्रसञ्जनीयो धर्मोऽन्य इति मन्यमानेन युतसिद्धिविकल्पेनाशङ्कितः ।

टीयाम् ॥ **तत् सत्यपीति** । पृथग्गतिमत्त्वेऽवयविनोऽकम्पेऽप्यवयवकम्पे सत्यपि तदसंबद्धस्य विद्यमानत्वमवयविनो नास्ति यतो जातः संबद्धश्चेत्येकोऽर्थः । अवयविनो हि जन्म स्वकारणसत्तासमवायः । स च संबन्ध एवेत्यर्थः ।

जातिमानिति । सामान्यवान् ।

उने ॥ **अयं प्रसङ्ग** इति । असंबद्धस्य विद्यमानत्वलक्षणयुतसिद्धिप्राप्तिः ।

प्रत्येकमिति । अप्राप्तिश्च संयोगश्च ।

टीयाम् ॥ **तस्या एवेति** । अयुतसिद्धेरेव ।

संयोगेन बुभुत्सनात् । अवयवावयविनोरयुतसिद्धत्वेन संयोगाभावः, संयोगाभावेन चायुतसिद्धिर्निरूपणीयेति परस्पराश्रयतया असिद्धा अयुतसिद्धिर्न संयोगाभावहेतुतां प्रतिपद्यते इत्यर्थः ॥

उने ॥ **तल्लक्षणत्वेनेति** । युतसिद्धेर्लक्षणत्वेन ।

टीयाम् ॥ **सर्वत्रेति** । समस्तेऽपि पटे ।

तस्येति । विभ्रमस्य ।

तस्य चेति । महारजनसंयोगस्य ।

उने ॥ **एतदिति** । भावाभावयोः परस्पराभावात्मकत्वम् ।

प्रागभावप्रध्वंसस्येति । यदि प्रागभावप्रध्वंसस्य घटप्रागभावप्रध्वंसस्य घटप्रागभावादन्यः प्रागभावः स्वीक्रियते, तदास्य स्वीकृतप्रागभावान्तरस्य प्रध्वंसोऽप्यन्यः स्वीकार्यो यतो यथा घटप्रागभावनिवृत्तिरेव पटप्रागभावनिवृत्तिर्न स्यात, तथा घटप्रागभावस्य यः प्रध्वंसः स एव प्रागभावप्रध्वंसः प्रागभावस्य न स्यात् । घटप्रागभावस्य प्रागभावप्रध्वंस-प्रागभावस्य च भेदेनाभ्युपगमात् । तथा च प्रागभावप्रध्वंसप्रागभावस्य यः प्रध्वंसः [716b] तस्यापि प्रागभावान्तरस्वीकारे प्रध्वंसान्तरस्वीकार इत्यनवस्थेत्यतो घटस्य घटप्रागभाव-प्रध्वंसस्य चैक एव प्रागभावस्तावदभ्युपेय इति भावः ।

ततः किमित्याह—**घटघटेति** ।

प्रतियोगीति । प्रतियोगी घटः । यस्य घटाभावविरहरूपत्वं घटाभावस्य च घटविरहरूपत्वं स्यादेवेति भावः ।

नन्वनवस्थाप्रसङ्गेन प्रागभावस्यैकत्वे सिद्धे प्रागभावस्य घटलक्षणभावविरहस्वभावता भवतु, परं यावत् प्रागभावप्रध्वंसस्य घटेन ऐक्यं न साध्यते तावत् प्रागभावस्य प्रागभाव-प्रध्वंसरूपतया अभावविरहरूपताप्यायातीति घटप्रागभावप्रध्वंसस्य घटेनैक्यं साधयति—**घटस्येति** । यदि घटः स्वप्रागभावप्रध्वंसरूपो नाङ्गीक्रियते तदा घटवद् घटप्रागभावोऽपि घटनिषेधरूपो नाङ्गीकार्य इत्यर्थः ॥

इतरथेति । यदि घटस्य स्वप्रागभावनिषेधरूपत्वं न स्यात्, प्रागभावस्य च घटनिषेधरूपत्वं स्यात् तदा घटप्रध्वंसवत् घटोऽपि घटनिषेधरूपः स्यात् । घटस्य स्वगत-प्रागभावनिषेधाभावाभ्युपगमेन प्रागभावत्वप्रसक्तेः, प्रागभावस्य च घटनिषेधरूपत्वाभ्युपग-मादित्यर्थः ।

परमाशङ्कते—**तथापीति** । यद्यप्येवं घटस्य प्रागभावनिषेधरूपता सिद्धा, तथापि प्रागभावस्य यथा घटः प्रध्वंसस्तथा निवृत्तिमात्ररूपोऽपि प्रध्वंसोऽस्त्वित्यर्थः ।

विपक्षे बाधकेन प्रागभावस्य प्रध्वंसद्वयं साधयति—**कथमन्यथेति** । यदि घट एव प्रागभावस्य प्रध्वंसः स्यात् तदा भावनिवृत्तावपि घटे विनष्टेऽपि कथं न प्रागभावो-न्मज्जनम् ? घटप्रागभावप्रध्वंसरूपस्य घटस्य विनष्टत्वात् पुनर्घटप्रागभावदर्शनं स्यादित्यर्थः ॥

पूर्वं चेति । यदि च निवृत्तिमात्ररूप एव प्रागभावस्य प्रध्वंसः स्यात्, तदा पूर्वं घटेऽनुत्पन्नेऽपि कुतो न प्रध्वंसोन्मज्जनम् ? घटेऽनुत्पन्नेऽपि प्रागभावप्रध्वंसो दृश्येत इत्यर्थः ।

एवं च यदा निवृत्तिमात्रस्यापि प्रागभावनिषेधरूपता सिद्धा, तदा भावस्यैवाभाव-रूपतेति नियमो नास्तीति पराभिप्रायः। तन्निरासायाह—**न प्रागभावेऽपि।** यदि प्रागभावो भावविरहरूपो नाभ्युपेयेत तदा घटे सत्यपि प्रागभावोपलम्भः स्यात्। यदि च प्रध्वंसविरहरूपो नाभ्युपेयेत तदा घटे स्वप्रध्वंसविरहस्वरूपेऽनुत्पन्ने घटध्वंसोपलम्भः स्यात्। तथा यदि भावः प्रागभावप्रध्वंसाभावविरहरूपेणाभ्युपेयेत तदा घटे सत्यपि प्रागभावप्रध्वं-सावुपलभ्येयाताम्। तथा यदि प्रध्वंसः प्रागभावविरहरूपो नाभ्युपेयेत तदा घटे विनष्टेऽपि प्रागभाव उपलभ्येत। यदि च भावविरहरूपो नाभ्युपेयेत तदा घटे सत्यपि प्रध्वंस उपलभ्येत। यदा च प्रागभावभावप्रध्वंसा उभयस्योभयस्य यो विरहस्तत्स्वभावा अभ्युपेयन्ते, तदा प्रध्वंसस्य प्रागभावविरहस्वभावत्वात् घटे विनष्टेऽपि न प्रागभावोन्मज्जनं प्रागभावस्य च प्रध्वंसविरहस्वभावोत्पन्नघटोत्पत्तेः पूर्वं प्रध्वंसोन्मज्जनमित्यभिप्रायः। एवं च यद्यपि प्रागभावप्रध्वंसाभावयोर्मिथो विरहस्वभावत्वेनाभावविरहस्वभावताप्यायाति तथापि विरहस्वभावयोरेव सतोरित्यनयोः भावविरहस्वभावता न निवर्तते इति सर्वमवदातम्॥

टीयाम्॥ एतयोरिति। [717a] भावाभावयोः।

अनयोरिति। भावाभावयोः।

एकस्मिन्नेव काले आश्रयभेदेनैकस्यैव भावाभावौ दर्शयति—**यथा तस्यैवेति।**

कालभेदे आश्रयभेदेन एकस्यैव भावाभावौ दर्शयति—**एवं य एवेति।**

अस्येति। कुम्भस्य।

उने॥ तस्येति। तेनैव समावेशस्य।

समावेशोच्छेदप्रसङ्गादिति। केनापि सह कस्यापि समावेशो न स्यादित्यर्थः।

एवमङ्कुरं प्रतीति। यदि दृष्टान्तविरोधप्रकारमवधीर्य प्रकारान्तरेणापि विरोधोऽभ्युपेयेत, तदा तथाविधबीजस्याङ्कुरमपेक्ष्य जनकत्वमजनकत्वं च विरुद्धमित्यनङ्कुरापे-क्षयापि घटाद्यपेक्षयाप्यस्याजनकत्वं विरुध्येत। तथाविधे काले देशे वाङ्कुरं प्रति बीजस्य जनकत्वमजनकत्वं च विरुद्धमिति। अतथाविधेऽपि काले देशे चाङ्कुरजनकत्वं विरुध्येतेत्यर्थः।

प्रकृते इति। अवयविनि।

प्रकारभेद इति। येन न संभोगभावाभावयोर्विरोधः स्यात् स कः प्रकार-विशेषः।

अवयवान्तराद्यवच्छेद इति। अन्यैरवयवैरवच्छिन्नस्यावयविनो रक्तद्रव्य-संयोगोऽन्यैश्चावच्छिन्नस्य तद्संयोग इत्यर्थः।

सविशेषणे इति। सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामत इति वचनात्।

न हीति। तथाविधेन क्षेत्रेण कालेन विषयेण वाङ्कुरादिना बीजस्य जनकत्वम-तथाविधेन च क्षेत्रादिना अजनकत्वमिति हेतोः। न हि देशादावेव जनकत्वाजनकत्वं वर्तते। किं तर्हि? बीजस्वरूपे एव वर्तते।

यदि जनकत्वाजनकत्वं बीजस्वरूपे एव न देशादौ तर्हि किमिति देशादिविशिष्टस्य बीजस्य तदुच्यते इत्यत आह— **किं त्वेवमिति।** एवं देशादिभिर्विशेषणेन तत्र बीजे वर्तमानं जनकत्वाजनकत्वं न विरुध्यते इत्येव हेतोर्देशादिभिर्बीजं विशिष्यते, न पुनर्देशादिषु जनकत्वाजनकत्वमिति हेतोः।

तथा प्रकृतेऽपीति। अवयवैर्विशेषणेनावयविनि वर्तमानौ संयोगासंयोगौ न विरुध्येते इत्येव हेतोरवयवैरवयवी विशिष्यते, न त्ववयवेषु संयोगासंयोगौ स्त इति कृत्वा॥

तस्येति। संयोगस्य।

अत एवेति। संयोगस्य विद्यमानत्वादेव।

संसर्गाभावे इति। संयोगाभावे।

तादात्म्याभावस्येति। अन्योन्याभावस्य।

तस्येति। तादात्म्याभावस्य।

अवच्छिन्नेति। यथावयवान्तरानवच्छिन्नोऽवयवी न संयोगात्मकः, तथावय-वान्तरावच्छिन्नोऽपीति साधारणत्वम्।

तस्या इति। अवयवान्तरावच्छिन्ने अवयविनि वर्तमानायाः।

तदुपाध्यनवच्छिन्ने इति। अवयवान्तररूपोपाध्यनवच्छिन्ने।

तस्मिन्निति। अवयविनि।

संसर्गिण इति । संबन्धिनः ।

त्रिकालानवच्छेद इति । त्रिकालमग्रहणम् ।

अस्येति । अत्यन्ताभावस्य ।

एकात्मादीति । आत्मादीत्यादिपदेन परमाण्वादिग्रहो ज्ञानादेरित्यादिपदेन कर्मादिग्रहः । यद्धि देवदत्तात्मादिसमवायिज्ञानादि तस्य यज्ञदत्तात्माद्यन्तरेऽत्यन्ताभाव इष्टः । न चायमकारणजातीयेऽकार्यजातीयस्याभाव इत्यनेनात्यन्ताभाव[717b]लक्षणेन व्याप्यते, यज्ञदत्तात्माद्यन्तरस्य कारणजातीयत्वात् ज्ञानादेः कार्यजातीयत्वाच्च ।

ननु देवदत्तात्माद्यन्तरज्ञानादावपि यज्ञदत्तात्माद्यन्तरं न कदाचिदपि कारणमित्यतोऽस्याकारणजातीयत्वात् नाव्यापकं लक्षणमित्येतच्छङ्कते—**आत्माद्यन्तरेति** ।

एवमस्त्विति । अकारणजातीयेऽकार्यजातीयस्याभाव इत्येतदेवात्यन्ताभावलक्षणमस्तु ।

प्रकृतेऽपीति । अवयवान्तरावच्छिन्नावयविस्थे संयोगाभावे ।

तथाभूतस्येति । अवयवान्तरानवच्छिन्नस्य ॥

टीयाम् ॥ **संयोगशब्दबुद्ध्यादीनामिति** । संयोगस्य संयोगिनोः, शब्दस्याकाशे । बुद्धिसुखदुःखादीनां चात्मनि ।

एषामिति । संयोगशब्दबुद्ध्यादीनाम् ।

उने ॥ **वृत्तिविकल्पस्येति** । कार्त्स्न्यैकदेशलक्षणस्य ।

टीयाम् ॥ **प्रसङ्गसाधनमिति** । प्रसङ्गस्य प्रसज्यमानस्य नानात्वस्य साधनमनेकवृत्तित्वम् ।

प्रसङ्गविपर्यय इति । प्रसङ्गविपर्ययो नानात्वाभावोऽनेकवृत्तित्वाभावे साध्ये व्यापकानुपलब्धिर्हेतुः ।

उने ॥ **आश्रयासिद्धाविति** । अवयविनोऽसिद्धिपक्षे ।

बाधिताविति । अवयविनः सिद्धिपक्षे ।

तदिति । शङ्कितविरोधान्तरम् ।

टीयाम् ।। तदभाव इति । एकावयवसंसर्गाभावः ।

तदव्यवच्छेद इति । यद्यवयवान्तरसंसर्गा न व्यवच्छिद्येरन् तदा एकावयवसंसर्गाभाववत्त्वादवयवान्तरसंसर्गाणां तदभावोऽप्येकावयवसंसर्गाभावोऽपि न व्यवच्छिद्येत । तस्मादवयवसंसर्गा अपि व्यवच्छेद्याः । ततश्च एकावयवसंसर्गोऽवयविन इत्यस्य एकावयवसंसर्गाभावो नास्ति । अवयवान्तरसंसर्गश्च न सन्तीत्ययमर्थः संपन्नः । तथा च स एवैकावयव संसर्ग एव तदानीमेव तत्रावयविनि भवेच्च न भवेच्चेति दुर्घटमापद्यते ।

उने ।। तत्प्रामाण्येति । आस्तां तावदुपरिष्टात् प्रतिपादयिष्यमाणतया एकस्यानेकावयवसंसर्गनिश्चयः । तत्प्रामाण्यसन्देहेऽप्येकस्यानेकावयवसंसर्गसन्देहेऽपि व्याप्तिसन्देहः । यदनेकवृत्ति तन्नानेति व्याप्तेः सन्देहः ।

ननु यदनेकवृत्ति तन्नानेत्येतस्मादेव बाधकप्रमाणादेकस्यानेकावयवसंसर्गो भ्रान्त एव भविष्यति, न तु सन्दिग्ध इत्याशङ्क्याह—**अत एवेति ।**

यदनेकवृत्ति तदनेकमित्यस्मात् बाधकात् एकस्यानेकावयवसंसर्गस्य भ्रान्तत्वमस्मिंश्च भ्रान्ते तस्य बाधकत्वमित्यन्योन्याश्रयत्वम् ।

एतदेवेति । एकस्यानेकस्यानेकवृत्तित्वम् ।

तस्येति । ज्ञानस्य ।

तदभावादिति । एकदेशाभावात् ।

एवमिति । वृत्तिविकल्पस्यानुग्राह्यं यदनेककार्यमित्यादि प्रमाणं चावतारयितुं शक्यते इति संबन्धः ।

विपक्षे विरोधाभावेनेति । एकत्वेन सहानेकवृत्तित्वस्य न कश्चित् विरोध इत्येवम् ।

समाधेयमिति । बौद्धेन ।

धर्मिग्राहकेति । येन हि प्रमाणेन ज्ञानं गृहीतम्, तेनैकमेव गृहीतम् । तेनानेकत्वग्राहिणः प्रमाणस्य यो बाधस्तेन ।

वाके ॥ भवति हीदमनेन संयुक्तमिति । प्राप्तिग्रहणस्याकारोऽयं दर्शितः ।

उने ॥ प्रत्यक्षे चेतसीति । अवयविविषये प्रत्यक्षज्ञाने ।

टीयाम् ॥ अमूल्यदानक्रयीति । मूल्यदानं [718a] विनैव क्रेता ।

उने ॥ यद्येवमिति । यदि **सूत्रे** साध्यत्वादित्यस्य परं प्रत्यसिद्धत्वादित्यर्थो विवक्षितः ।

वाके ॥ अनभ्युपगतार्थान्तरावयविन इति । अनभ्युपगतोऽर्थान्तरमवयवी येन तस्य मते ।

टीयाम् ॥ सत्येव धर्मिणीति । अवयविनि ।

उने ॥ अवयवापेक्षो ह्यवयवीति । अवयवानपेक्ष्य हि अवयव्युत्पद्यते, न त्ववयवा अवयविनमपेक्ष्योत्पद्यन्ते इति ।

ननु बुद्धिस्थीकृतपटेन पुंसा रण्डाकरण्डावस्थिता अपि तन्तवोऽवयवा उच्यन्ते । तत् कथमुक्तं नोच्यन्ते इत्यत आह—**प्रतिसंहितपटेनेति शेष** इति ।

वाके ॥ विरुद्ध इति । योऽवयवः स पदार्थान्तरमिति व्याप्तौ पदार्थान्तरेष्वेव घटाद्यवयवेषु कपालादिषु अवयवत्वस्य दर्शनात् विरुद्धो हेतुः स्यात् । यथा तन्त्ववयवा घटादर्थान्तरमिति तु यथा घटादर्थान्तरं तन्तवः पटावयवाः, तथा घटावयवा अपि कपालानि पटादर्थान्तरमित्येतावन्मात्रज्ञापनाय ।

षष्ठीविशेषणादिति । पटावयवत्वेन तन्तूनां पटादनर्थान्तरत्वं साध्यते । तच्च पटादर्थान्तरेषु घटाद्यवयवेषु न दृष्टमिति न विरुद्धत्वप्रसङ्ग इत्यर्थः ।

उपेत्येति । भवतु वा कथमपि तन्तूनां पटावयवत्वम् । परमस्य पटस्वरूपे पटादनर्थान्तरे सपक्षेनान्वयो यश्च गौरश्वादर्थान्तरं विपक्षः, तस्मादेव च न व्यतिरेक इत्यसाधारणत्वादहेतुः ।

अथ पटः पक्षीक्रियते इति । नार्थान्तरं तन्तुभ्यः पट इत्येवम् ।

उने ॥ [1]तस्य ते पूर्वमपि सत्त्वादिति **टीका**वाक्यं योजनया व्याख्याति— **तस्य पूर्वमपीति** । तस्य तन्तुपरिणामभेदस्य ।

टीयाम् ॥ तन्तुष्वपटेष्विति । तन्तुष्वपटेषु पट इति प्रत्ययो मिथ्याप्रत्यय इत्यकामेनापि वक्तव्यम् ।

उने ॥ वार्त्तिककृतोक्तम । मुख्याभावादित्यादिकम् ।

वाके ॥ सांख्या ह्यङ्गुल्योरैक्यमिच्छन्ति इत्यनन्यस्य संयोगत्वेनैते उदाहरन्ति—**अङ्गुल्योस्त्विति** ।

किमितीति । कथमर्थे ।

अन्यासंयोगादित्यादिना हि नार्थान्तरं संयोगः, संयोगत्वादिति संयोगो हेतुः **सांख्ये**न दर्शितः । स च यो गौरश्वादर्थान्तरं तस्मादिवाङ्गुलीलक्षणादनर्थान्तरादपि व्यावृत्तत्वादसाधारण इत्याह—**अर्थान्तरेति** ।

संयुक्ते द्रव्ये आहरेति । उक्ते इति शेषः ।

संयुक्तसंयोगाल्पीयस्त्वमिति । संयुक्तयोर्द्रव्ययोर्ये आकाशसंयोगाः, तेषामल्पीयस्त्वम् ।

क्षेत्रोदकेति । क्षेत्रोदकबीजानि सर्वदाङ्कुरं कुर्युः । अग्नीन्धनानि च पाकजरूपादि सर्वदा कुर्युरिति संबन्धः ।

उने ॥ घटपटादि दृष्टेति **वार्त्तिके** घटादीत्यस्य स्थाने ।

साध्योपसंहारमिति । साध्योपदर्शनम् ।

टीयाम् ॥ साध्यस्यैवेति । संयोगस्य ।

वाके ॥ सर्वदानारम्भकं स्यादिति । कदाचिदारम्भकं स्यादित्यर्थः ।

---

1 J तस्येति

कर्माप्याश्रयेति । अङ्गुर्यां हि कर्मोत्पन्नमङ्गुरीप्रत्यासत्त्या संयोगं करोति । तथा यदि अङ्गुरी पूर्वाभिमुखा तदा पूर्वाभिमुखं संयोगं करोति । यदि तु पश्चान्मुखा तदा पश्चान्मुखम्, न तु वैपरीत्येन । [718b] एवमन्यास्वपि दिक्षु ज्ञेयम् ।

चरमभावीति । स्वोत्पत्त्यनन्तरं व्याप्रियमाणम् ।

द्रव्यजातमिति । द्वितन्तुत्रितन्त्वादिकम् ।

चरमभाविनं संयोगमिति । अन्त्यतन्तुसंयोगम् ।

यथा वा संयोग इति । यथात्ममनःसंयोगो गुणे स्मृतिरूपे कार्ये स्वोत्पत्त्यनन्तरं व्याप्रियमाणं संस्कारं प्रयत्नमदृष्टं च निमित्तमपेक्षते । वेगवद्वायुसंयोगश्च तृणकर्मणि कार्ये संस्कारं वेगाख्यम्, अदृष्टं वा अपेक्षते । प्रयत्नवदात्महस्तसंयोगश्च हस्तकर्मणि कार्ये प्रयत्नमदृष्टं चापेक्षते इत्यर्थः ।

अपि तर्हीति । तदा ।

उने ।। वयं तु ब्रूम इतीति । वयं तु ब्रूम इत्यादि हि **वार्त्तिककृता** सिद्धमुक्तम् । सिद्धवचनं च कस्यापि प्रमाणस्य बलेन स्यादिति तत् प्रमाणमाहेत्यर्थः ।

अन्यथा संस्कारेणानेकान्तः स्यादिति । वेगाख्योऽपि हि संस्कारः कर्मकार्यः । न त्वनपेक्षकर्मकारणको नोदनापेक्षत्वात् कर्मण इत्यनेकान्तः स्यात् । अविनश्यदवस्थयावदित्युक्ते तु संस्कारस्य व्यवच्छेदः स्यात् । यतो यदा नोदनाभिघातादिसहकृतेन कर्मणा संयोग उत्पाद्यते तदा कर्मणो विनश्यत्ता, संयोगस्योत्पन्नता वेगस्य चोत्पद्यमानतेत्यकः काल इति विनश्यदवस्थेनैव नोदनाभिघातादिविशिष्टेनैव च कर्मणा वेगो जन्यते । संयोगस्त्वविशेषेण सर्वैरविनश्यदवस्थैश्च कर्मभिर्जन्यते ।

विपक्षे इति । विभागापेक्षकर्मकारणत्वे संयोगं जनयता कर्मणा स्वरूपतो विभागोऽपेक्ष्यते । पूर्वसंयोगनिवृत्तिं कुर्वन् वा द्वितीयः कल्पोऽभ्युपगत एव ।

प्रथमं दूषयति—**स्वरूपत** इति ।

अनष्ट एव पूर्वसंयोगे इति । विभागोत्पत्त्यनन्तरक्षणे हि पूर्वसंयोगस्य विनाशः ।

तदपेक्षमिति । विभागापेक्षम् ।

वाके ॥ साधारणकार्यद्रव्येति । साधारणैस्तन्त्वादिभिः कार्यं द्रव्यं पटादि ।

गतीत्यादि । यदा हि गत्यादयः प्रतिषिध्यन्ते तदा गतेः संयोगस्य वा अनभ्युपगमात् कर्म संयोगं करोतीति व्याहतमित्यर्थः ।

अथ मनुषे परेति । यदि हि स्वाभ्युपगता एव गत्यादयोऽस्माभिः प्रतिषिध्येरन्, तदा स्यात् व्याघातः । यदा तु पराभ्युपगतान् व्यपेक्ष्यायं प्रतिषेधः, तदा को नाम व्याघात इति पराशयः ।

न हि क्षणिकत्वे प्रमाणमस्तीति । क्षणिकत्वे प्रमाणाभावेन देशान्तरे अविरलद्रव्योत्पातादिवाङ्मात्रमित्यर्थः ।

यदि प्रतिषिध्यमानमिति । असंयोगव्यावृत्तिलक्षणम् ।

चोदयति **परः—इहेतीति ।**

इयमिति । इह बुद्धिः ।

प्रधानसामान्यदर्शनादिति । प्रधानेन सादृश्यदर्शनात् ।

तस्मादिति । अर्थान्तरे एव गतत्वेन विरुद्धत्वात् ।

अयमपीति । अवयवावयविभावादित्ययमपि ।

परः प्राह—**दृष्ट** इति ।

उक्तोत्तरत्वादिति । प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः इत्यस्य [1]**सूत्रस्य** व्याख्यायाम्, एकदेशो ह्यवयविन आधार इत्यनेन ।

टीयाम् ॥ अवयवशब्दार्थ इति । अवयवः नावयव्येवावयवो न च प्रदेश्येव प्रदेशः, किं तु भिन्न इति परमार्थः ।

वाके ॥ सिद्धान्त्याह—**इदमिति ।** अनर्थान्तरत्वसाधकं वाक्यम् ।

हेतुहीनमिति । तत्प्रदेशात्मकत्वस्य साध्यविशिष्टत्वेनाहेतुत्वात् । एवं वक्ष्यमाणेष्वपि अनर्थान्तरत्व[719a]साधकवाक्येषु हेतुशून्यता यथायथं भाव्या ।

---

1 II. i. 31

प्रदेशात्मकत्वस्येति । विवक्षिततत्प्रदेशव्यपदेशविषयत्वार्थस्य । पटप्रदेशव्यपदेशविषयत्वं हि यथा अश्वार्थान्तरभूताद् गोर्व्यावृत्तं तथा पटस्वरूपादपि पटानर्थान्तरादित्यसाधारणो हेतुः । एवं वक्ष्यमाणेष्वपि हेतुष्वसाधारणत्वं भावनीयम् ।

ननु प्रदेशव्यपदेशविषयमात्रेण हेतुत्वेऽसाधारणत्वं न भविष्यतीत्याशङ्क्य आह— **प्रदेशशब्दस्येति ।** प्रदेशव्यपदेशविषयत्वस्य हि कारणव्यपदेशविषयत्वमर्थः । तच्च पटादर्थान्तरेष्वेव घटाद्यवयवेषु कपालादिषु दृष्टमिति विरुद्धो हेतुरित्यर्थः ।

पटपक्षीकरणे इति । नार्थान्तरं तन्तुभ्यः पट इत्येवम् ।

असंबद्धार्थ इति । तदुत्पत्तेरिति हेतुः ।

अथ तच्छब्देनेति । अथ नार्थान्तरं तन्तुभ्यः पट इत्यत्रैव पक्षे तच्छब्देन तन्तवः संबध्यन्ते ।

तथा हि तन्तुभ्यः पट उत्पद्यत इति तथापि विरुद्धः ।

कुत इत्याह—**न तन्तुरिति ।** न तावत् तन्तुस्तन्तुभ्य उत्पद्यते येन नार्थान्तरोत्पत्तिः स्यात् । किं तर्हि ? तन्तुभ्यः पट उत्पद्यते । स चार्थान्तरम् । अतोऽर्थान्तरस्य विपक्षस्यैव साधकत्वात् विरुद्ध इति भावः ।

अवयव्यन्तरावयवानामिति । अवयव्यन्तरस्य रथादेरवयवानां चक्रादीनामवयव्यन्तरार्थान्तरभावात् अवयव्यन्तरात् पटात् योऽर्थान्तरभावः, तस्मात् ।

तद्व्यतिरेकेणेति । पटव्यतिरेकेण ।

विरुद्ध इति । तदुत्पत्तेरिव तद्व्यतिरेकेणान्यानवयवत्वस्य तद्देशोत्पत्तेश्च हेत्वोर्विरुद्धत्वमुद्भाव्यम् ।

टीयाम् ॥ घटोत्पत्तिदेश इति । घटोत्पत्तिदेशः कपाललक्षणो व्यवच्छिद्यते । न तत्र पट उत्पद्यते इति परमार्थः ।

ननु चक्रादयोऽवयव्यन्तराणि नावयवान्तराणीत्यत आह—**रथावयवेभ्यः** इति ।

वाके ॥ विरुद्धो हेतुरिति । प्रत्यक्षत्वादित्ययम् ।

उने ॥ एतच्चेति । अमहत्त्वम् ।

टीयाम् ॥ **तदनिरूपणे** इति । संसृज्यमानस्यानिरूपणे ।

अवयवाग्रहणेऽपीति । द्व्यणुकलक्षणावयवाग्रहणेऽपि ।

उने ॥ नन्वैकरूप्यमसिद्धं **सांख्यनैयायिके**न्द्रियव्यक्त्योर्भिन्नरूपत्वादित्यत आह— **ऐकरूप्यमिति** । एकजातीयं रूपं स्वरूपं यस्य तदेकजातीयरूपं तद्भावः ।

वाके ॥ **भावाभावयोरिति** । महत्त्वस्य ।

तद्वत्त्वादिति । उपलब्धिभावाभाववत्त्वात् ।

अथ पुनः स्पर्शस्यापीति । यथा रूपे महत्त्वे च सत्येव रूपोपलब्धिः, एवं स्पर्शेऽपि सत्येवेति स्पर्शस्याप्यव्यभिचारः । परं यथा स्पर्शो न कारणं तथा रूपमहत्त्वे अपीति पराशयः ।

सिद्धान्त्याह—**कस्मादिति** ।

अवधार्य चेति । चो यस्मादर्थे । यस्मादहो **सांख्य,** अवधार्य प्रमाणेन निश्चित्य एतत् भवतोच्यते यदुत स्पर्शवदेतत् स्यादिति, यथा स्पर्शो न कारणं तथा रूप-महत्त्वे अपि । येन च प्रमाणेन त्वया निश्चितं यदुत स्पर्शो न कारणमिति, मयापि तत एव प्रमाणात् रूपमहत्त्वे अकारणमित्यवधार्यम् । तस्मात् प्रमाणं वाच्यमित्यर्थः ।

टीयाम् ॥ **संयुक्तविशेषणेनेति** । यत्र ह्यात्मनि मनः संयुक्तम् , तस्य विशेषणं प्रत्यक्षज्ञानाभावः ।

उने ॥ **तद्गोचरेति** । परमाणुविषयः ॥

तदप्रत्यक्षत्वमिति । परमाणूनामप्रत्यक्षत्वम् ।

स चेति । परमाणु[719b]गोचरप्रत्यक्षज्ञानाभावः ।

तस्मिन्निति । परमाणुगोचरज्ञाने ।

प्रमाणान्तरेति । अनुमानादि ।

साक्षात्कारिजातीयस्येति । यत्किञ्चित् साक्षात्कारि तस्य सर्वस्यापि ।

तद्विषये इति । परमाणुविषये विज्ञाने आनुमानिकादौ ।

वाके ॥ एके । मीमांसकाः ।

त्रुटिमिति । त्रसरेणुम् ।

टीयाम् ॥ मृद्यमानस्यादर्शनादवगम्यते इति चेत् ? अत आह—**अङ्गुल्यग्राभ्यामिति ।**

वाके ॥ कथं चान्यथेति । यदि भेद्योऽपि त्रुटिः परमाणुः स्यात्, तदा कथमभेद्यः सन् परमाणुरित्युच्यते ।

टीयाम् ॥ **अनन्तावयवत्वेनेति** । यदि महाभूतमूलकारणं सावयवमुच्येत, तदा तदवयवानामप्यवयवाः, अवयवान्तराणामप्यवयवा इति योऽतिसूक्ष्मः सर्षपो या चातिस्थूला पृथ्वी तयोर्द्वयोरप्यनन्तावयवत्वेनाभिन्नपरिमाणत्वं प्रसज्येत ।

अप्रतिषेधे वेति । यदि वा संहताः न प्रतिषिध्यन्ते तदा ।

वाके ॥ सिद्धान्त्याह—**अवयविनः पक्षीकरणे** इति । संयोगविभागाभावो हि संयोगविभागयोर्न पक्षीकृतस्यावयविन इत्यसंबद्धमित्यर्थः ।

असंयोगित्वाविभागित्वे हेतू इति । यद्यसंयोगित्वमेवाप्राप्त्यभाववत्त्वमेव वा केवलो हेतुः स्यात्, तदा अर्थान्तराभ्यामपि सदा असंयोगिभ्यां हिमवद्विन्ध्याभ्यामर्थान्तरेणापि प्राप्तिमता गवाश्वादिना च व्यभिचारः स्यादित्यतोऽसंयोगित्वे सति अप्राप्त्यभाववत्त्वं हेतुरित्यर्थः ॥

उने ॥ नन्ववयव्यद्याप्यसिद्धः, तत् कथमाह **टीकाकृत्** अवयव्यन्तरेणेत्यत आह—**द्रव्यान्तरेणेति ।**

टीयाम् ॥ ननु पटस्तन्तुभ्यो न भिद्यते, स्वावयवैस्तन्तुभिरसंयोगित्वे सत्यप्राप्त्यभाववत्त्वात् । ये तु भिद्यन्ते न ते तन्तुभिरसंयोगित्वे सत्यप्राप्त्यभाववन्तो यथा घटादय इत्यस्त्येव भिन्नेभ्यो विपक्षेभ्यः स्वावयवैस्तन्तुभिरसंयोगित्वे सत्यप्राप्त्यभाववत्त्वादित्यस्य हेतोर्व्यावृत्तिः । अतोऽनुपपन्नम् अव्यतिरेक इति **वार्त्तिकम्** । अत आह—**यथा भिन्नादिति ।**

यथा संयोगाप्राप्त्यभावः संयोगस्याप्राप्तेश्चाभावस्य प्रतिपादकः स्वावयवैरसंयोगित्वे सत्यप्राप्त्यभाववत्त्वादित्ययं हेतुरित्यर्थो भिन्नाद् घटादेर्व्यावृत्तो न हि तन्तुभिरसंयोगित्वे सति

घटादिः प्राप्तिमांस्तथा अभिन्नादपि तन्तुस्वरूपादपि व्यावृत्तो न हि तन्तुः स्वात्मनैवासंयोगित्वे सति प्राप्तिमान् । तदिदमाह—**न हि स एवेति** । एतेन न व्यतिरेक इत्यस्य **वार्त्तिकस्य** हेतोर्विपक्षादेव न व्यतिरेकः, किं तु विपक्षादिव सपक्षादपीत्ययमर्थः ॥

वाके ॥ **स्वकारणेनेति** । सर्पशरीरेण ।

तदसिद्धमिति । अनर्थान्तरत्वम् ।

उने ॥ न संयोगो नाप्यप्राप्तिरितीति **वार्त्तिकम्** ।

तत्रेति । सत्त्वरजस्तमःसु ।

संयोग एव च वक्तव्य इति । अप्राप्तिनिषेधेन या प्राप्तिः प्रसजति सा संयोग एव वाच्यः ।

तथा चेति । अप्राप्तिनिषेधस्य संयोगत्वे ।

वाके ॥ पक्षेणासंबन्धमेवं दर्शयति—**क्वचनेति** ।

गुरुत्वान्तरकार्याग्रहणाच्चेति । गुरुत्वान्तरकार्याग्रहणं गुरुत्वान्तरकार्ये एव, न गुरुत्वे, न गुरुत्वान्तरे नावयविनीत्यतो गुरुत्वान्तरकार्याग्रहणेन गुरुत्वान्तरकार्यमेवावनतिविशेषो निषेद्धुं शक्यम् । न गुरुत्वमवयवस्थं न च गुरुत्वान्तरमवयविस्थं नाप्यवयवी । तस्मादत्यन्तमनुचितमेतत् यत् दूरमसंबद्धेनानेन [720a] साधनेनावयविनिषेधः साध्यते इत्यर्थः ।

एके त्विति । हेतोर्व्यधिकरणतां परिजिहीर्षवः ।

ननु गुरुत्वान्तरकार्याग्रहणादित्यनेन गुरुत्वान्तरारम्भप्रतिषेधसाधकेन गुणान्तरारम्भप्रतिषेधः कथं साध्यते? तत्राह—**उदाहरणेति** । गुरुत्वान्तरारम्भप्रतिषेधं साधयता गुरुत्वान्तरकार्याग्रहणादित्यनेन गुणान्तरारम्भप्रतिषेधोऽपि साध्यते इत्यर्थः ।

गुणान्तरारम्भप्रतिषेधं पृच्छति—**कथमितीति** ।

उत्तरयति—**न कार्यमिति** ।

उने ॥ **इदमिति** । गुरुत्वान्तरकार्याग्रहणादित्येतत् ॥

टीयाम् ॥ कार्याग्रहणेनेति । गुरुत्वान्तरत्वप्रसङ्गादिति वदता हि परेण गुणान्तरारम्भ-प्रतिषेधे साध्ये गुरुत्वान्तरकार्याग्रहणादित्यस्य गुरुत्वान्तरवत्त्वाभावादित्ययमर्थो दर्शितः । स च कार्याग्रहणेनावनतिविशेषाग्रहणेन कार्याभावोऽवनतिविशेषाभावः । ततः कार्याभावाच्च कारणस्य गुरुत्वस्याभावः पटेऽस्तीति [1]विवक्षित्वा । तथा चोपपादितः पक्ष[2]धर्म इति भावार्थः ॥

वाके ॥ सत्त्विति । गुरुत्वान्तराभावः पक्षधर्मः प्रत्यक्षबाधात् प्रत्यक्षेण साध्यस्य बाधितत्वात् न किञ्चित् साध्यं साधयतीत्यर्थः ।

टीयाम् ॥ तथापीति । कार्यगतरूपाद्यभ्यनुज्ञायामपि अभ्युपगमविरोध एव स्यादित्यर्थः ।

उने ॥ स्वचरितविरुद्धमिति । स्वाभ्युपगमविरुद्धम् ।

वाके ॥ तदेवं गुरुत्वान्तरत्वप्रसङ्गविपर्ययं गुरुत्वान्तरभावं प्रत्यक्षबाधेन दूषयित्वा गुरुत्वान्तरवत्त्वप्रसङ्गमभ्युपगमेन दूषयति —**यश्चायमिति ।**

गुरुत्वान्तरकार्यमिति । अवनतिविशेषः ।

अवनमनविशेषानाधारत्वस्येति । अवनमनविशेषाधारवत्त्वं हि पटेन तुलायामित्यसिद्धो हेतुरित्**येकदेशि**न आशयः ।

न तद्वृत्तानुपलब्धेरिति । यद्यवनमनविशेषानाधारत्वं न तुलायां तर्हि अवनमनविशेषाधारत्वं स्यात् । तच्चास्यां नोपलभ्यते । तस्मात् नासिद्धो हेतुरिति सिद्धान्तिनोऽभिप्रायः ।

महागुरुत्वे चेति । चो हेतौ ।

सममिति । यावत् [3]कारणानां गुरुत्वं तावत् कार्यस्यापीति तुल्यम् ।

द्विस्तावत्संबन्धः[4] स्यादिति । द्विगुणं प्राप्नोति । यत एकं कारणगुरुत्वमन्यत् कार्यगुरुत्वम् । मिलितं च द्विगुणम् ।

तन्मनुष्येति । तस्मात् ।

चरमद्रव्यमिति । कपाललक्षणम् ।

---

1 S विवक्षितत्वात् 2 S धर्मो 3 S करणानां 4 J संबन्धे

टीयाम् ॥ तर्हीति । परमाणवः ।

वाके ॥ न पूर्वोत्तरे इति । य एव मृत्कणस्य देशः स एव मृच्चूर्णस्येत्यर्थः ।

कार्ये इति । अवनतिविशेषे ।

कार्यगुरुत्वमिति । घटगुरुत्वम् ।

एतेनेति । एतेन लक्षणस्य कार्यगुरुत्वकार्यस्य दर्शनेन ।

यथा **सूत्रकारेण** संयोगः क्रियाहेतुत्वेन संकीर्तितस्तथाह—**नोदनेति ।**

उने ॥ गुरुत्वं पततीति । पतनं हि कर्मत्वाद् द्रव्ये एव समवैति । गुरुत्वं च न द्रव्यम् । अतो गुरुत्वं पततीत्यसंभावितमेव ।

तथात्वे चेति । पतनं प्रति गुरुत्वस्य समवायिकारणत्वे वा ।

वार्त्तिककारोक्तां युक्तिमिति । गुरुत्वं चानुपतत् कुतः पततीत्यादिका ।

ननु यदि गुरुत्वं द्रव्यपतनं प्रति करणम्, तर्हि किमित्यस्य हेतुकर्तृत्वेन प्रयोगस्तेन हि द्रव्यं पात्यते इत्यत आह—**करणेऽपि हीति ।**

ननु गुरुत्वस्य स्वगतपतनं प्रति कर्तृत्वमेव तत्कथमाह **टीकाकृत्** तदेव कर्म करणं चेति ? तदेव कर्तृ करणं चेति वक्तुमुचितमित्यत आह—**पतत** [720b] इति । गुरुत्वस्य ।

अत एवेति । यत एव गुरुत्वस्य वस्तुतः कर्तुः सतः कर्मत्वं विवक्षामात्रकृतमभिप्रेतम्, अत एवानुरूपं वस्तुतः कर्तुः सतो विवक्षामात्रकृतकर्मत्वविषये यत् सदृशं तत् शङ्कोदाहरणं यथात्मनः स्वात्मनि प्रकाशयितव्ये एकस्मिन्नेव कर्तृत्वकर्मत्वयोर्वृत्त्यविरोधः तथा गुरुत्वेऽपि कर्मत्वकरणत्वयोर्वृत्त्यविरोधो भविष्यतीत्येवंरूपायां शङ्कायामुदाहरणमित्यर्थः ।

नन्वात्मसमवेतक्रियाजनितफलशालित्वं कर्मत्वमात्मनि नास्तीति मा भूत् स एव कर्ता कर्म च । मनस्तु स्वात्मनि प्रकाशयितव्ये कर्म च करणं चास्तीति । तद्वद् गुरुत्वमपि भविष्यतीत्येतदपि न वाच्यमित्याह—**न चेति ।**

तत्रापीति । मनस्यपि मनसा गृह्यमाणे ।

करणान्तरस्येति । युगपज्ज्ञानानुत्पत्तिरूपस्य ।

वाके ॥ परिहायेति । विनापि ।

उने ॥ अनयैव दिशेति । यदि संयोगः संयोगवानभ्युपेयते तदानवस्था प्राप्नोतीत्यतो यथा संयोगस्यासंयोगवत्त्वे सिद्धे संयोगदृष्टान्तबलेन गुणत्वेन रूपादिनां सर्वगुणाभावः साधितः **टीकाकृता,** तथा यदि रूपादि गत्यादि च सजातीयरूपादिमत् सजातीयगत्यादिमच्चेष्यते तदानवस्था प्राप्नोतीत्यतो रूपादीनां सजातीयरूपादिमत्त्वाभावे गत्यादीनां च सजातीयगत्यादिमत्त्वाभावे सिद्धे रूपादिगत्यादिदृष्टान्तबलेन गुणानां गुणत्वेनाद्रव्यत्वेन वा कर्मणां चाद्रव्यत्वेन सर्वगुणाभावः साधनीय इत्यर्थः ।

लक्षणव्याघात इति । यदि गुणाः कर्माणि च गुणवन्ति अभ्युपेयन्ते तदा सामान्यवानगुणोऽकर्मरूपो गुण इत्यादिलक्षणं व्याहन्यते इत्यर्थः ॥

वाके ॥ संशयापाकरणार्थमिति । साध्यत्वादवयविनि सन्देह [1]इति यः सन्देह उक्तः, तन्निराकरणाय ।

ते इति **भाष्यं** व्याचष्टे—**ते वयमिति ।** यैरस्माभिः प्रत्यक्षादिभिः प्रमाणैरर्था गृह्यन्ते, ते वयम् ॥

उने ॥ निरवयव इत्येतावतीति । अवयवोऽपि निरवयव एवेति यद्यपि निरवयव इत्यनेनावयवोऽपि परमाणुर्लभ्यते एव । परमवयवे चेत्यनुच्यमाने कदाचित् परो ब्रूयात् निरवयवे विज्ञानाकाशादौ धारणाकर्षणाभावो मूर्तत्वाभावप्रयुक्तः, न त्ववयवित्वाभावप्रयुक्त इति गोघटादौ ये धारणाकर्षणे ते मूर्तत्वात् नावयवित्वादित्येतन्निरासार्थं परमाणुरमूर्तोऽपि नास्ति न च धारणाकर्षणे इति दर्शयितुं **वार्त्तिककृता** अवयवे चेत्युक्तमित्यर्थः ।

यथाश्रुते इति । [2]धारणाकर्षणोपपत्तेश्चावयवी अर्थान्तरमित्यस्मिन् ।

धर्मिग्राहकप्रमाणबाध इति । येनैव प्रमाणेन परमाणवो गृहीताः, तेनैवैषामनवयवित्वमेव गृहीतमिति ।

तस्येति । परमाण्वतिरिक्तस्य ।

एकस्थूलेति । एकस्थूलमिदमिति यः प्रत्ययः, तद्विषयस्य । न त्वेकस्थूलप्रत्ययोऽयं भ्रान्तः, तत् कथमेतद्विषयस्य पक्षीकरणमित्यत आह—**तदभ्रान्तत्वस्येति ।**

---

1 II. i. 33 2 II. i. 35

एकस्थूलप्रत्ययाभ्रान्तत्वस्य स्थापितत्वात् । कया ? अनन्यथासिद्धतया एकस्थूलवस्त्वन्तरेणासिद्धतया ।

एषापि कुत इत्याह—[1]बाधकाभावे ।

ननु सञ्चितपरमाणुविषयोऽयमेकस्थूलप्रत्ययः, ततो भ्रान्तत्वमेवेत्यत आह—**सञ्चितेति** ।

[721a] ननु भवत्वेकस्थूलप्रत्ययविषयः पक्षः, परमप्रसिद्धविशेषणता परिहार्यैवेत्यत आह—**अनाश्रितत्वस्येति** । एतेन नान[ा]वयवीत्यस्य नानाश्रितो नैकैकाश्रितो वेत्यर्थः ।

प्रतीतस्यैवेति । अनाश्रितत्वं परमाणुषु प्रतीतम् । एकैकाश्रितत्वं चात्माकाशादिगुणेषु ॥

भाष्ये ॥ संग्रहो नामेति । कारणाकारणसंयोगादन्यो गुणो गुणान्तरं द्रव्यारम्भकः संयोगः कथ्यते । दण्डचक्रनीरादीनां च कपालादिभिर्यः संयोगविशेषः तत्सहचरितं यद्गुणान्तरं द्रव्यारम्भकसंयोगलक्षणं स्नेहद्रवत्वाभ्यामधिष्ठितेभ्यः कारणेभ्यो निष्पन्नं स संग्रहः ।

वार्त्तिके ॥ पांशुराशिप्रभृतिष्वभावादित्यादि । पांशुराशिर्ह्यवयव्यपि नैकदेशग्रहणेन धार्यते, नाप्याकृष्यते । जतुना संबद्धीकृताश्च तृणोपलकाष्ठादयस्तथाभूताः सन्तोऽनवयविनोऽपि एकदेशग्रहणेन धार्यन्ते आकृष्यन्ते चेति **परा**शयः ।

उने ॥ नन्वन्वयव्यतिरेकिणो विपक्षसंस्पर्शो व्यभिचारः स्यात् । व्यतिरेकिणस्तु विपक्षसंस्पर्शाविरोध एव । तत्कथं **टीकाकृद्** विरोधं व्यभिचारत्वेन व्याख्यातीत्यत आह—**यद्यपीति** ।

स चेति । कोटिद्वयसंस्पर्शः ।

संग्रहस्योपाधित्वसन्देह इति । किमवयविकारिते धारणाकर्षणे किंवा संग्रहकारिते इत्येवम् ।

अवयवित्वस्येति । यथावयवित्वं विना धारणाकर्षणे स्तः, एवं संग्रहोऽपि नावयवित्वं विनास्ति । तस्मात् धारणाकर्षणवत् संग्रहोऽपि यदि परमवयवित्वे साध्ये हेतुरेवेति भावार्थः ।

---

1 J बाधकभा

नन्नु यथावयवित्वेन धारणाकर्षणे व्याप्ते इष्येते, तथा संग्रहेणाप्येते व्याप्ते। अतोऽवयवित्वप्रयुक्ते एते इत्येतत् कुत इत्यत्र प्रश्ने किमुत्तरमित्याह—**कुत एतदित्यत्रेति**।

विपक्षे इति। यद्यवयविप्रयुक्ते धारणाकर्षणे न स्यातां तदा अवयव्यभावे सर्वाग्रहणलक्षणं बाधकमुत्तरमुक्तमित्यर्थः।

एतच्चेति। अवयव्यभावे सर्वाग्रहणलक्षणबाधकम्।

अग्रे इति। अनन्तरसूत्रे॥

टीयाम्॥ असाविति। संग्रहो धारणादिहेतुता च।

एष इति। संग्रहः।

उने॥ अवयवित्वं स्वीकृत्येति। नैयायिका हि पांशुराश्यादेः संख्याविशेषत्वमेव वदन्ति नावयवित्वम्।

टीयाम्॥ कश्चित् विशेषहेतुरिति। यतः पटादौ धारणाकर्षणे स्यातां पांशुराश्यादौ तु न स्याताम्।

वाके॥ परः पृच्छति—**कः पुनरसाविति**। हेतुः।

सिद्धान्त्याह—**उक्तोऽसाविति**।

एतमेवाह— **एकदेशेति**।

एतच्च **टीकाकृत्** व्याख्याति—**तत्सहचरितस्येति** एकदेशगृहीतस्य एकदेशसहचरितस्यावयविनः संचन्धिनामवयवानां संबन्धः संबन्धविशेषः स्नेहद्रवत्वकारितो यत्रास्ति तत्रावयविनो धारणाकर्षणे भवतः। यत्र तु पांशुराशिप्रभृतिषु नास्ति तत्र न भवतः। यथा भवन्मते द्रवद्व्यसंयोगाभावान्न संग्रहो भवतीति।

उने॥ विजातीयानामनारम्भकत्वेनाभ्युपगमात् तेषामारम्भो विरुद्ध इत्यत उक्तम्—**साजात्ये सतीति**।

आरम्भिकाभिमतेष्विति । यस्यैकदेशग्रहणेनारम्भकत्वेनाभिमतेषु स्वावयवव्यतिरिक्तेषु [721b] तन्त्वादिषु विषये धारणाकर्षणानुपपत्तिः स पटादिरन्त्यावयवी । न हि पटादिरेकदेशो गृहीतः स्वावयवव्यतिरिक्तांस्तन्त्वादीन् धारयत्याकर्षति वेत्यर्थः ।

यथावयविनोऽन्त्यावयविनश्च धारणाद्यधारणादि च शुद्धं लक्षणं स्यात् तथाह—**तदयमर्थ** इति ।

आरम्भाविरोधे सतीति । एतेन जतुसंगृहीततृणकाष्ठादिव्यवच्छेदः कृतः ।

सर्वदा स्वसंयोगेनाविधारितसजातीय इत्यादि । एतेन सर्वदा स्वसंयोगेन विधृताकृष्टसंगृहीतसजातीयतृतीयतन्त्वादिकात् खण्डावयविनो द्वितन्तुकाद्यात् पटादिकस्यान्त्यावयविनो विशेषं दर्शयता स्वसंयोगेन विधृतसजातीय इत्यादिकं खण्डावयविनो लक्षणं ज्ञापितम् ।

एतत्सर्वमिति । यथाश्रुत**भाष्या**नुरोधेनेत्यादिकम् ।

टीयाम् ॥ भाष्यकारसूत्रेति । भाष्यकारेण यत् **सूत्रस्य** दूषणं पांशुराशिप्रभृतिष्ववयविषु धारणाकर्षणयोरसिद्धत्वोद्भावनलक्षणं, तद् यः कश्चित् पांशुराश्यादेरवयवित्वमभ्युपैति तन्मतमाश्रित्य ज्ञेयमित्यर्थः ।

वाके ॥ अन्वयव्यतिरेकिणमेव हेतुं दर्शयति—**एकानेकबुद्धी** इति ।

एतयोश्च व्याख्या **टीकायाम्**—**पटोऽयमितीति** ।

आशङ्केति । आशङ्का च तदुत्तरं च तयोः **सूत्रम्** ॥

भाष्ये ॥ समाधत्ते—**गृह्यमाणेति ।**

वाके ॥ अनैकान्तिकीकरणपक्षे इति । विशेषवत्त्वसमुच्चितासमुच्चितविषयत्वयोर्हेत्वोः ।

टीयाम् ॥ तज्जनितायेति । वनमिति व्यपदेशजनिताय ।

अनुत्पन्नापेक्षाबुद्धेरिति । अगृहीतप्रत्येकवृक्षैकगुणत्वेनानुत्पन्नापेक्षाबुद्धिर्नानैकगुणालम्बना एका बुद्धिर्यस्य स तथा तस्य ।

कारणाभावेनेति । अपेक्षाबुद्ध्यभावेन ।

वाके ॥ **अयुक्तमिति** । अनैकान्तिकीकरणम् ।

अनेकनिमित्तत्वमेवाह—**अस्त्ययमिति** ।

यदेकमिति । ज्ञानादिस्वरूपम् ।

यस्येति । मते ।

टीयाम् ॥ ननु मा भूच्चाक्षुषत्वं पवनसमूहस्यारूपत्वात्, परमाणुवस्तुसरूपत्वात् चक्षुर्ग्रहणयोग्या एवेत्यत आह—**रूपवन्महत्त्वमपीति** ।

उने ॥ ननु रूपं महत्त्वं च गुणत्वात् भावेभ्यो भिन्नमेव, तत् कथमाह, रूपवन्महत्त्वमपि भावनां स्वरूपयोग्यतेत्याशङ्क्याह—**रूपवदिति** ।

यथा ह्यालोकादेरागन्तुकस्य सतः सहकारियोग्यता न तथा रूपमहत्त्वयोरागन्तुकयोस्तयोः सदाभावाश्रयत्वादित्यभिप्रायेणोक्तम्—**स्वरूपयोग्यतेति** ।

टीयाम् ॥ **अत्रान्तरे** इति । त एवातीन्द्रिया ऐन्द्रियकाश्चेति महान् विरोध इति विरोधोद्भावनावसरे ।

न खलु स्थैर्येति । क्षणिकत्वसिद्धौ हि परमाणवोऽर्थान्तराभिसंबन्धात् समर्था जायन्ते । न पुनस्तेष्वप्यन्यः कश्चिदतिशयोऽभ्युपगम्यते । ते च तथा भूता एकेन्द्रियका एवेति न विरोध इतीयं कीर्तिकल्पना सिध्यति । सति तु स्थिरत्वे द्रव्योत्पाद एवातिशयः । तदनभ्युपगमे चानुपजातविशेषा एव परमाणवोऽतीन्द्रिया ऐन्द्रियकाश्चापतन्ति तथा च विरोध एवेत्यर्थः ।

ननु स्थूलबुद्धिरन्यथा नोपपद्यते इति परमाणुजन्यः तद्व्यतिरिक्तः स्थूलावयवी अभ्युपेयते । स्थूलबुद्धिश्च यत्किञ्चिदागन्तुकं [722a] निमित्तमासाद्य परमाणुभिः स्थूलोऽवयवी जन्यते । तेनैव जनयिष्यते । तत् किमनेनान्तर्गडुनावयविनेत्याशङ्कां निराचष्टे—**न चेति** ।

उने ॥ **टीकायां** जनयिष्यन्तीति पाठमपश्यन्नाह—**जनयिष्यन्तीति शेष** इति ।

टीयाम् ॥ तेनैव स्थूलबुद्धिं जनयिष्यन्तीति वदतः किं चक्षुर्वत् जनकत्वं परमाणूनामभिप्रेतम्, उतालम्बनप्रत्ययत्वेन ? तत्राद्येन स्वलक्षणप्रत्यक्षमुपपादितं स्यात्, द्वितीये तु स्थूलानुभवविरोधमाह—**यदाभासा हीति** ।

आलम्बनप्रत्यय इति । विषयरूपं कारणम् ।

अविकल्पोपाधिरिति । अविकल्पनिमित्ता ।

अस्येति । स्थूलप्रत्ययस्य ।

उने ॥ **अन्यथेति** । अग्रहणे ।

तदुपाधिरिति । निर्विकल्पोपाधिः ।

तत्रेति । स्थौल्ये ।

उभयथापीति । यदि निर्विकल्पकेन गृहीतं, यदि न गृहीतं च ।

संग्रह इति । संग्रहवाक्यम् ।

टीयाम् ॥ **तस्येति** । परमाणोः ।

ईदृशत्वमिति । एकज्ञानग्राह्यत्वम् ।

तद्दर्शनमिति । स्थौल्यदर्शनम् ।

ननु नानावस्तुग्रहोऽवास्तवो भविष्यतीत्यत आह—**यतः सांवृतग्रहणं चान्यदिति** । यस्माद् यन्नानावस्तुग्रहादन्यदेकवस्तुग्रहणं तत् सांवृतग्रहणमवास्तवं ग्रहणम् ।

उने ॥ **नहि** [1]**अस्मन्मते** इति । **नैयायिकैः** हि रूपादयो रसादयश्च गुणत्वेन इष्यन्ते । न च गुणान्तरैर्व्यवधानं स्यात् ।

प्राच्यमेवेति । अनन्तरमेव प्रागुक्तम् ।

अत एवाह—न चासतीत्यादि । न चासतीत्यादि निराकरणं हि, ननु योऽयं स्थूलमेतदेकमिति प्रत्ययः स मिथ्यैवेत्येवं पराशङ्कायां सत्याम् । एषा चाशङ्का यदाभासा हीत्यादिके परमतदूषणे सति संभवति । तस्मात् ज्ञायते न चासतीत्यादि वदतः **टीकाकृतः** स्वमते यदाभासाद्येव दूषणमभिप्रेतमिति भावः ।

---

1 S °स्मिन्

टीयाम् ॥ ननु वृत्तिविकल्पाद्यस्त्येव बाधकम्, तत् कथमसति बाधके इत्यत आह— **उक्त** इति ।

बाके ॥ **व्याख्यात** इति । निराकृतत्वेन ।

टीयाम् ॥ नन्वतथाभूतस्य तथाभाविभिः सामान्यादुभयत्रापि वाहीके माणवके च गोसिंह-प्रत्ययौ । अतो न वयं भावतस्यौपमिकस्य च प्रत्ययस्य विवेकं गृह्णीमः । अत आह— **तिरोभूतेति ।**

ननूभयसंप्रतिपन्ने धर्मिणि विशेषेषु संशयो भवति, न चावयविवादिना अणुसञ्चयोऽभ्युपेयते । अभ्युपगमे वा अणुसञ्चय एवास्तु, कृतमवयविनेत्यत आह—**येषामपीति ।** परमाणूनां सञ्चयः संयोगः । स च संमतोऽवयविवादिनः । तस्मादुभयसंमते सञ्चये युक्तः संशय इत्यर्थः ।

उने ॥ **ते** इति । शब्दादयः ।

टीयाम् ॥ **तन्निवृत्तिमात्रमिति ।** समुच्चयनिवृत्तिमात्रमेकमेवेत्यतो हेतोर्न द्वे इत्युक्ते एकमेवेति निश्चयः स्यात्, न पुनरेकमनेकं वेति संशयः ।

सति सन्देह एकमिति नियमार्थमिति **वार्त्तिकं** व्याख्याति – **न च तत्रेति ।** न द्वे इत्युक्ते तत्रैकमनेकं वेति सन्देहे सति अनेकत्वनिवृत्त्यर्थं यदेकमेवेत्युत्तरमुच्यते तदपि न भवेत्, न द्वे इत्यनेनैव एकत्वस्य निश्चितत्वादित्यर्थः ।

बाके ॥ ननु यदि नाम नियमार्थमेकमित्युत्तरं स्यात्, ततः किमित्याह—**यतो नियम** इति ।

[722b] **एवमिति ।** यथा शब्दादिष्वेकप्रत्ययः समुच्चयनिवृत्तिनिमित्तस्तथा ।

टीयाम् ॥ नन्वेकत्वसंहितासमुच्चयनिषेधे समुच्चयमात्रं प्राप्यते न द्विसमुच्चयः, त्र्यादिसमुच्चयो वा । अतः समुच्चयमात्रनिश्चयेऽपि समुच्चयविशेषेषु युक्तः संशयः । अत आह— **अयमभिसन्धिरिति ।** द्वित्वादिभिर्विशेष्यमाणः समुच्चयो विशिष्येत । द्वित्वादीनामभावे विशेषकाभावात् समुच्चयमात्रं स्यात् । तच्चासमुच्चयसंहितमसमुच्चयेनैकीकृतसमुच्चयस्वरूपमिति यावत् । यदेकत्वं तस्य निषेधे निश्चितमेवेति सन्देहो न स्यादित्यर्थः ।

वक्तव्यमिति । **नैयायिकं** प्रति **बौद्धेन** ।

अस्येति । समुच्चयस्य ।

आजानत इति । स्वभावतः ।

इहेति । शब्दादौ ।

विशिंष्यादिति । समुच्चयं कर्म ।

संशयविषय इति । नैकमित्यत्र ।

उने ॥ समुच्चयो हि **नैयायिकैः सांख्यैर्वा**भ्युपेयते तत्समुच्चयादिविलक्षणं द्वित्वादीति

टीका विरुध्यते इत्यत आह—**अयमर्थ** इति ।

तदतिरिक्त इति । संख्यातिरिक्तः ।

एकत्रेति । घटादौ ।

अन्यत्रेति । शब्दादौ ।

बाधकादिति । यदि हि शब्दादिर्द्वित्वादिसंख्या गुणवानभ्युपगम्यते तदा शब्दादिसजातीयगुणवानप्यभ्युपेयः । तथा चानवस्थाप्रसङ्गो बाधकमित्यर्थः ।

भ्रान्तिबीजमिति । समानधर्मलक्षणम् ।

तथाविधेति । तथाविधापेक्षाबुद्धिविषयत्वं द्वित्वादिसंख्यारहिते शब्दादावपि ।

तदेवेति । अपेक्षाबुद्धिविषयत्वमेव ।

सत्तामात्रव्यवस्थितस्येति । अगृहीतस्य ।

ननु यद्यपेक्षाबुद्धिविषयत्वं सत्तामात्रेण विशिष्टव्यवहारं प्रत्यनङ्गम्, तर्हि द्वित्वादि-कार्यविशेषोऽप्यनेनानुत्पाद्य एव । तथा च द्वित्वादिसंख्याप्रत्ययो न कुत्रापि सत्य इत्यत आह—**कार्यविशेषेति** ।

तथाभावस्येति । सत्तामात्रव्यवस्थितत्वस्य ।

न हीति । न हि वह्निरस्मदादिभिर्ज्ञात एव धूमे कारणं स्यात् ।

नन्वेवमपि **टीका**विरोधो न परिहृत इत्यत आह---**अपेक्षेति**। तेन समुच्चयादेरपेक्षाबुद्ध्यादेर्विलक्षणमिति समुच्चयादिविलक्षणमित्यस्यार्थः।

तत् किमिदं स्वमते विरुद्धमेवेत्यत आह---[1]**तद्गुणेति**। अत्रापि समुच्चयाद् द्वित्वादिसंख्याया यदन्यदपेक्षाबुद्ध्यादि तद्विलक्षणमित्ययमेवार्थः। एतेन समुच्चयः सामान्यमित्यादौ **वार्त्तिके** यः कैश्चिदपेक्षाबुद्धिलक्षणः समुच्चयस्यार्थ उच्यते स एव ज्ञेय इति ज्ञापितम्। अत एवाह--**तदिदमुक्तं तदनुसरणप्रकारश्चेतीति**। इदमत्राकूतम्। ननु यदा शब्दादौ द्वित्वाद्यभावे इत्यादिनीत्या परेण प्रत्यवस्थीयते, तदापि तावद् द्वित्वाद्यवगाहमानां द्वित्वादीनां व्यवस्थापिकां संविदमन्तरेण नान्यः कश्चित् परिहारः। तस्मात् संविद एव परिहारो युक्तो **वार्त्तिक**कृतः।

किं नैकमित्यत्रेत्यादिना परिहारेणेत्याशङ्कायां **टीकाकृ**दाह---**तदनुसरणप्रकारश्चेत्यादि**। योऽयं नैकमित्यत्रेत्यादिर्युक्तिरूपः परिहारः सोऽपेक्षाबुद्ध्यादिविलक्षणं द्वित्वाद्यवगाह्यमानाया द्वित्वादिव्यवस्थापिकायाः संविदोऽनुसरणप्रकारो युक्तिनिपुणत्वेन **वार्त्तिककृता** कृतः। [723a] यथोक्तसंविदनुसरणप्रकारश्च कृतस्तदा स्यात् यदि नैकमित्यादियुक्त्या अपेक्षाबुद्ध्यादिविलक्षणं द्वित्वादिप्रत्ययनिमित्तं व्यवस्थाप्येत। तद्व्यवस्थापनं च तदा स्याद् यदि निराकार्यः समुच्चयोऽपेक्षाबुद्धित्वेन विवक्षितः स्यात्। तस्मात् तदनुसरणप्रकारश्चेत्यादि वदता **टीकाकृता** समुच्चयः सामान्यमित्यादि **वार्त्तिके** समुच्चयस्यार्थोऽपेक्षाबुद्धिरित्युक्तमिति।

तस्यापीति। एकत्वस्यापि।

तस्येति। व्यवहारस्य॥

भाष्ये॥ **एकत्वबुद्धिश्च तस्मिंस्तदिति प्रत्यय** इति। अत्रेति शेषः।

विशेषहेतुमेवाह -- **महदिति**।

वाके॥ परः प्राह---**किमेते** इत्यादि।

सिद्धान्त्याह---**अयं विशेषेति**।

टीयाम्॥ यदीयत्तानवधारणेनापरिमाणत्वं शब्दस्य, हंत तर्हि इयानाकाश इत्यनवधारणा-

---

1 J अतद्गु

दाकाशादेः परिमाणं न सिध्येत् तद्वदेव वा शब्देऽपि परिमाणं सेत्स्यतीत्यत आह—**प्रत्यक्षेति** ।

भाष्ये ॥ यथा द्रव्येष्विति । यथा द्रव्येष्वियत्तावधारणं तथा शब्देऽनवधारणात् ।

अणुरित्यस्यैवार्थमाह—**अल्पः** ।

शब्दे परिमाणाभावादेतदेव किमित्याह—**मन्दः शब्द** इति । एवमग्रेऽपि ॥

वार्के ॥ ननु यदि शब्देषु इयत्तावधारणं निषिध्यते, तर्हि अस्माच्छब्दादयं शब्दोऽणुर्महान् वेत्यवधारणं न प्राप्नोतीत्याशङ्कयाह—**पूर्वानुभूतमिति** ।

उने ॥ महद्व्यपदेशवानिति व्याचष्टे—**महच्छब्दवानिति** ।

टीयाम् ॥ ननु महत्प्रत्ययविषयत्वं शब्देऽप्यस्तीत्याशङ्कयाह—**न तन्मात्रादिति** ।

वार्के ॥ **अणुद्रव्यसामान्यादिति** । सूक्ष्मत्वादणु द्रव्यं नाशेषतः प्रतीयते, किं तर्हि ? सामान्यमात्रं तस्य गृह्यते । यत्तु महद्द्रव्यं तत् सामान्यतो विशेषतश्च गृह्यते इति स्वसंविदितमेव । एवं शब्दस्यापि यस्य कारणमान्द्यात् सामान्यमात्रेण शब्दत्ववर्णत्वादिना ग्रहणं स मन्दः, यस्य तु कारणवशादेव गत्वात्वादिदीर्घह्रस्वानुनासिकतादिविशेषवतः प्रतीतिः स तीव्रः । एवंविधबुद्धिविशेषविषयत्वं तीव्रमन्दत्वं चाणुमहद्द्रव्यसामान्यं शब्दस्य । तस्मादयं भाक्तः प्रत्ययो जायते अणुः शब्दो महान् शब्द इति ।

टीयाम् ॥ यदि समुदायान्तरमपि समुदायान्तरेण प्राप्तम्, ततः किमित्याह—**एकः समुदाय** इति ।

तथापि किमित्याह—न चेति ।

भाष्ये ॥ **द्रव्ययोरिति** । भेर्यादिदण्डाद्योः ।

रूपादिष्विति । पाकजेषु प्रत्ययविषयश्चेत्यादिप्रत्ययविषयश्च भावविशेषो वा स्यात्, यथा कुण्डली गुरुः । अभावविषयो वा, यथा अकुण्डलश्छात्रः । संयुक्ते इमे इति संयोगबुद्धेश्च यदि भावविशेषो न विषयः, तर्हि भावविशेषाभावो विषयः । तत्र प्रतिषिध्यमानवचनं यस्य भावविशेषस्याभावो विषयः संयोगबुद्धेः स वाच्य इत्यर्थः ।

तत्र प्रतिषिध्यमानवचनमिति स्ववाक्यमेव व्याचष्टे—**संयुक्ते** इति।

टीयाम् ॥ **जन्माजन्मेति**। जायमानपिण्डस्थस्य गोत्वस्य जायमानत्वेन पिण्डान्तरस्थस्य चाजायमानत्वेन जन्माजन्मरूपो विरुद्धधर्माध्यासस्तेन।

प्रत्यक्षेति। प्रत्यक्षज्ञानरूपा।

उने ॥ **सहावस्थानस्य परस्परसंबन्धव्यभिचारो दर्शित** इति। सन्ति हि केचित् भावा ये सहावस्थानेऽपि परस्परमसंबद्धा इत्यनेन।

परस्परासंबन्धस्य [723b] **सहानवस्थानव्यभिचारो दर्शित** इति। तथा सामान्यमपि सर्वासंबद्धमपि सर्वैः सहावतिष्ठते इत्यनेन।

उक्तदोषेति। यदा क्वचिद् देशे पिण्डो जायते इत्यादिना॥

टीयाम् ॥ **तासामिति**। व्यक्तीनाम्।

ननु यदि सर्वसामान्यानि सर्वैः सहासंबद्धानि सन्ति, तर्हि केन विशेषणेन काचिदेव व्यक्तिः केनचित् सामान्येनावच्छिद्यते, न तु सर्वाः सर्वैरित्यत आह—**स च स्वकारणादिति** ॥

उने ॥ **तस्येति**। अवयविनः।

एवमुत्तरत्र [1]**परिवर्तनेति**। तन्तूनां तु पटोत्पादनसामर्थ्यं न पटस्येति शेष इत्यर्थः।

तत्संबन्धि वास्तु तदात्मकं वेति। पटादिसंबन्धि वास्तु रूपम्, पटाद्यात्मकं वा।

तत्तयेति। घटादितया।

यत्कार्यमिति। रूपादि।

यद्द्रव्यात्मकमिति। यत्पटादिद्रव्यात्मकम्।

1 S परिवर्तनेति

तन्तुपटवदिति । यथा पटो येषां तन्तुद्रव्याणामात्मभूतः सन् कार्यं तानि तस्मात् पूर्वं ध्रुवभावीनि । तेभ्यस्तु पटो नियतोत्तरभावी ।

आमकुम्भेति । यथा च यस्यामकुम्भस्यात्मभूतः सद्रक्तादि कार्यम्, सोऽस्मात् पूर्वं ध्रुवं भावी । तस्माच्च रक्तादि नियतोत्तरभावि ।

तद्दर्शने इति । तादात्म्यवादिदर्शने ।

प्रयोग इति । रूपादिप्रतिरूपादिमतः समवायिकारणतासाधकः ।

प्रत्यक्षबाध इति । रूपादेः पटादेश्च सहोपलम्भलक्षणेन प्रत्यक्षेण बाधः ।

तन्निषेधायोगादिति । सूक्ष्मकालनिषेधायोगात् ।

तत्र कथमिति । रूपयोर्भेद इति संबन्धः ।

टीयाम् ॥ भिन्नकारणत्वमात्रं वा साध्येत भिन्नसमवायिकारणत्वं वा ? तत्राद्ये सिद्धसाधनम्, भिन्ननिमित्तकारणाभ्युगमेऽपि परस्य सिद्धान्तान्यथावृत्तेः । द्वितीये तु हेतोर्व्यभिचारः एकस्मिन्नपि पार्थिवपरमाणौ रूपयोर्विशेषवत्त्वादित्याशङ्क्य व्याचष्टे—**विशेषवत्त्वं चेति ।**

॥ इति प्रत्यक्षपरीक्षाप्रसङ्गागतावयविपरीक्षाप्रकरणं संपूर्णम् ॥

॥ अनुमानपरीक्षाप्रकरणम् ॥

[२.१.३८–३९]

उने ॥ **एकवाक्यतयेति** । एकवाक्यप्रतिबद्धतया ।

पूर्वापरप्रकरणयोरिति । प्रत्यक्षपरीक्षाप्रकरणात्रयविपरीक्षाप्रकरणयोः ।

वृत्तमिति । अतीतम् ।

तत्रेति । इदानीमो (?) योऽस्मिन्नवसरे इत्यर्थः । तन्मध्येऽवसरलक्षणोऽर्थोऽवसरशब्देनैवोपात्तो **वार्त्तिककृता** । अस्मिन्नित्येतस्यार्थस्तु प्राप्तमित्यनेनेति भावः ।

प्रतिपत्तिमात्रमिति । यद्यप्रमाणशब्दस्याप्रतिपादकत्वमात्रमर्थः, तदेतदप्रतिपादकत्वमात्रं यो रोधाद्युत्थत्वादिनानैकान्तिकादिर्नदीपूरादिः तस्यापि नास्ति, अनैकान्तिकत्वादावपि प्रतिपादकत्वमात्रस्य सत्त्वात् । ततश्च कस्याप्रतिपादकत्वं साध्यमित्यर्थः ।

पूर्ववदनुदाहरणत्वादिति । पूर्ववन्नाम यत्र कारणेन कार्यमनुमीयते । यथा मेघोन्नत्या भविष्यति वृष्टिः ।

शेषवत्त्वानुपपत्तेरिति । शेषवन्नाम यत्र कार्येण कारणमनुमीयते । यथा पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रतरत्वं च स्रोतसो दृष्ट्वानुमीयते भूता वृष्टिरिति ।

सामान्यतोदृष्टत्वायोगादिति । सामान्यतोदृष्टं नाम अकार्यकारणभूतेन यत्र साध्यधर्माविनाभाविना साधनधर्मेण विशिष्यमाणो धर्मी गम्यते । यथा बलाकया सलिलमिति ।

व्याख्यान्तरो[724a]**दाहरणतयेति** । पूर्ववदिति वतिप्रयोग एषः । पूर्वेण तुल्यं वर्तते इति । यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थः, तथानुमानेनापि तमेवार्थं प्रतिपद्यते । तथा शेषवन्नाम परिशेषः । स च प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गात् शिष्यमाणसंप्रत्ययः । व्यतिरेकिणो नामान्तरमिदम् । तथा सामान्यतो दृष्टं नाम यत्राप्रत्यक्षे [लिङ्ग]लिङ्गिनोः संबन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते । इत्येवं पूर्वोक्तव्याख्यान्तरस्योदाहरणतया ।

लक्षणमिति । **प्रज्ञाकरगुप्तस्य** ।

अनुपपन्नं चेति। भाविवर्षं विना पिपीलिकाण्डसञ्चारस्याजायमानत्वेन भाविवर्षस्यासतोऽपि कारणत्वप्रसङ्गेन।

टीयाम् ॥ **तस्य पूर्वकार्याणीति प्रत्यासत्त्येति।** मरणकारणं प्रथमं नासावक्रत्वादीनि कार्याणि कृत्वा पश्चान्मरणकार्यं करोतीत्येषा प्रत्यासत्तिर्या नासावक्रत्वादीनां मरणस्य च, तया ॥

वाके ॥ **सोऽयं हेतुरिति।** प्रमाणत्वेन प्रयुज्यमानो व्यभिचारित्वलक्षणः ॥

टीयाम् ॥ न हि व्यभिचारव्यभिचारे किञ्चित् प्रमाणमस्तीति **वार्त्तिकं** व्याख्याति—**न हीति** ॥

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् इति **सूत्रम्**[1]। अस्यार्थः। रोधसेतुभङ्गगजक्रीडावृष्टिकार्यचतुर्विधनदीपूरसमुदायस्य वृष्टिकृतात् नदीपूरादन्यो नदीपूर एकदेशश्च। नीडोपघातात् पिपीलिकानां त्रासश्च। पुरुषेणानुकृतस्य रुतस्य मयूरकृतेन रुतेन सादृश्यं च तेभ्यो यदनुमानं प्रवर्तते तस्माद् व्यभिचारिणः सकाशादव्यभिचारिणोऽनुमानस्यार्थान्तरभूतत्वात् तस्य प्रामाण्यप्रतिषेधो नोपपद्यते इति।

भाष्ये ॥ **सदृशात् शब्दात्** सकाशाद् **विशिष्टम्**।

॥ इत्यनुमानलक्ष्यपरीक्षाद्वारेणानुमानपरीक्षाप्रकरणं संपूर्णम् ॥

———

1 II. i. 39

॥ अनुमाने वर्तमानकालपरीक्षाप्रकरणम् ॥

[२.१.४०–४४]

उने ॥ एतदिति । वर्तमानाक्षेपसूत्रं कालपरीक्षणं च ।

टीयाम् ॥ कारणान्तरवैकल्यमिति । कारणविशेषवैकल्यम् ।

अनियतदिग्देशयोरिति । दिश एकत्वात् दिशो देशः संयोगस्याव्याप्यवृत्तित्वमेव । अनियतो दिग्देशो ययोस्तौ तथा, तयोः ।

देशात इति । अव्याप्यवृत्तिसंयोगतः ।

शरीरावस्थेति । शरीरावस्थाभेदेनानुमितमतीतानां सूर्यस्योदयास्तमयरूपाणां क्रियाणां यत् प्रचयबहुत्वम्, तेनान्तरितं व्यवहितं जन्म यस्य तस्मिन् ॥

उने ॥ सवित्रुदयास्तमयानां विनष्टत्वात् न तैः कालप्रदेशस्य व्यवच्छेदः संभवतीत्यत आह—**विशिष्टेनेतीति ।**

वैशेषिके इति । **वैशेषिका**णां शास्त्रे **न्यायकन्दल्यादौ ।**

तत्तदुपाधीति । तत्तत्क्रियोपाध्यवच्छिन्नस्य कालस्य ।

तच्चेति । अप्रत्यक्षत्वम् ।

टीयाम् ॥ संयुक्तसमवाय इति । यत्र सवितरि क्रियायाः समवायः तेन यथा कालः संयुक्तः तथा पिण्डेनापीति संयुक्तसमवाय इत्यर्थः ।

परापरव्यतिकरायेति । मूर्तान्तरापेक्षया यः परः, तस्मिन्नपि यूनि वर्षीयोऽपेक्षयापरप्रत्ययः । यश्च मूर्तान्तरापेक्षया अपरः, तस्मिन्नपि वर्षीयसि युवापेक्षया पर इति प्रत्यय इति यः परापरयोर्व्यतिकरो विनिमयस्तस्मै ॥

उने ॥ नन्वेवमपीति । ननु मा भूत् स्वरूपेणाभिन्नमाकाशं परापरव्यतिकराय भिन्नौ त्वाकाशात्मानौ भविष्यत इत्यर्थः ।

विपक्षे इति । परापरव्यतिकरकारणत्वे ।

संबन्धान्तरमिति । [724b] संबन्धविशेषम् ।

अन्यसमवायिनीमिति । सूर्यसमवायिनीम् ।

अन्यत्रेति । पिण्डे ।

सर्वसंक्रामणप्रसङ्गादिति । देवदत्तात्मा यज्ञदत्तसमवेतं सर्वं स्वापक्रियादि सर्वत्र संक्रामयेदित्यर्थः ।

एवं प्रसङ्ग इति । सर्वत्र संक्रामणप्रसङ्गः ।

स्वभावनियमादिति । दिक्कालावेवंविधस्वभावावेवाभ्युपगम्येते यत् स्वप्रत्यासत्तिमात्राविशेषेऽपि रविसमवायिनीमेव क्रियामुदयादिकामन्यत्र मूर्तद्रव्ये संक्रमयतो, नान्य समवेतं किञ्चिदपि । दिगपि हि रविसमवायिनीमुदयादिकां क्रियां तदार्जवावस्थितेन मूर्तद्रव्येण संयुक्तसमवायेन संबध्नाति, पूर्वादिव्यवहारस्य रव्युदयादितदार्जवावस्थितद्रव्यसंबन्धप्रभवत्वादित्यर्थः ।

विपक्षे इति । दिग्देशनियमानपेक्षाणामपि दिक्कारणत्वे ।

सूर्यपरिस्पन्दावच्छेदप्रत्यय इति । देवदत्तादिपरिस्पन्दस्य ।

स्वरूपेणानवच्छेदकत्वादिति । सूर्यपरिस्पन्दस्यासंबद्धत्वेन ।

तत्प्रत्यये चेति । सूर्यपरिस्पन्दावच्छेदप्रत्यये ।

अत्रापीति । दण्डीतिशब्दे ।

समवायिवदिति । समवायीत्यत्र हि समवायस्य समवायिना सह कस्यापि संबन्धस्याभावात् मत्वर्थीयोऽवच्छेदमात्रवचनः ।

अवयव्यादिवदिति । अवयवा ह्यवयविनि न संयुक्ता नापि समवेता इत्यवयवीत्यादौ मत्वर्थीयः संबन्धमात्रवचनः ।

संबन्धान्तरेणेति । संयोगादन्येन संबन्धेन समवायेन ।

टीयाम् ॥ **दण्डीति विज्ञानमिति** । तथात्रेति शेषः ।

उने ।। नन्वरूपतया अचाक्षुषत्वमात्रं सिध्यति नाप्रत्यक्षत्वम्, अरूपाणामपि शब्दादीनां प्रत्यक्षत्वादित्यत आह—**अरूपतयेतीति** ।

टीयाम् ।। **कारकव्यङ्ग्य** इति । अध्वरूपकारकव्यङ्ग्यः ।

उने ।। **तदपेक्षत्वादिति** । वर्तमानापेक्षत्वात् ।

उने ।। यदा खल्वयमित्येतस्मिन्नपि वाक्ये प्रतिपद्यते इत्यस्ति, तद्व्यवच्छेदार्थमाह—**तां खल्वितीति** ।

तदिदमिति । वर्तमानां क्रियामुररीकृत्यातीतानागतवर्तमानानां व्यपदेश्यत्वेन प्रतिपादनम् ।

टीयाम् ।। **तन्मूले चेति** । वर्तमानक्रियामूले । अस्य कालस्यातीतानागतत्वे । वर्तमाना क्रिया प्रध्वस्ता सती अतीता भवति । तदवच्छिन्नश्च कालोऽतीत इत्युच्यते । या च प्रागभाववती कारणसमवधानाद् भविष्यति सा अनागता । तदवच्छिन्नश्च कालोऽनागत इत्युच्यते ।

एतदुक्तं भवति । य एव वर्तमानक्रियावच्छिन्नो वर्तमानः कालः, स एवेदानीमुपरतायां क्रियायां तदवच्छिन्नोऽतीतो भवति । यश्चाग्रे वर्तमानक्रियावच्छेदेन वर्तमानो भविष्यति स एवेदानीं क्रियानुत्पत्तिदशायामनागततामवलम्बते, तस्मात् वर्तमानक्रियावच्छिन्नो वर्तमानः कालोऽभ्युपगन्तव्यः । अन्यथा तदपेक्षावतीतानागतौ न स्यातामिति । क्रियायाश्च वर्तमानादिरूपत्वं न कालसंबन्धकारितमितरेतराश्रयप्रसङ्गात्, किं तु स्वरूपेणेति मन्तव्यम् ।

उने ।। **ननूक्तमिति** । न तु क्रियाव्यङ्ग्यस्तस्यासाध्यतया असिद्धत्वादित्यनेन ।

प्रत्यक्षसिद्धमपीति । वर्तमानं पतनम् ।

टीयाम् ।। **तदसत्त्वे** इति । वर्तमानस्य पतनस्यासत्त्वे ।

यच्चोक्तं पितापुत्रवदित्यादि तन्निराचष्टे—**न च परत्वेति** ।

सन्निकर्षविप्रकर्षावपि कावित्याह—**पूर्वसंख्येति** । पूर्वसंख्यैकादिका । [725a] परसंख्या द्व्यादिका ।

परस्परापेक्षसिद्धेरिति । परस्परापेक्षयोः सिद्धिः परस्परापेक्षसिद्धिस्तस्याः ।

भाष्ये । केन कल्पेनातीत इति । वर्तमानाभावेऽतीतस्य स्वरूपमेव न स्यादित्यर्थः । तथा च कथमतीतापेक्षा अनागतसिद्धिः ।

तथा केन कल्पेनानागत इति । वर्तमानाभावेऽनागतस्य स्वरूपमेव न स्यात् । तथा च कथमनागतापेक्षा अतीतसिद्धिरित्येतदत्रापि ज्ञेयम् ।

यद्येकस्येत्यादि । यद्येकमन्यतरापेक्षं सिध्येत् तदा अन्यतरदप्येकापेक्षं सिध्येत् । एवं चोभयस्याप्यभावः स्यादित्यर्थः ।

उने ॥ सत्ताशब्दं स्वरूपार्थं मन्यमान आक्षिपति—**न त्वाख्यातेति ।**

तथेति । आख्यातार्थः ।

तत्कीर्तनमिति । अस्तिक्रियाकीर्तनम् ।

टीयाम् ॥ यो हि वर्तमानकालो नास्तीत्यभ्युपगच्छति तेन न किमपि वर्तमानं वस्त्वभ्युपेयम् । तदभ्युपगमे हि तदवच्छिन्नः कालोऽपि वर्तमानः अस्याभ्युपगम्यः प्राप्नुयादित्याशयवान्, न चायं विद्यमानं सत् किञ्चिदनुजानातीति **भाष्यं** पूरयित्वा व्याख्याति—**न चायं वर्तमानेति ।**

उने ॥ आधार इति । आत्मलक्षणः ।

भाष्ये ॥ क्रियासन्तानो नानाविधा चैकार्था क्रिया क्रियाभ्यासश्चेति योगः ।

उने ॥ न ह्येकस्मिन्निति । यदि हि पचतीत्यत्र पदे प्रकृतिः पचिः स्वातन्त्र्येण विक्लित्तिं ब्रूयात् तिप्रत्ययश्च स्वातन्त्र्येणाध्येषणादि ब्रूयात्, तदैतयोः स्वस्वार्थे वाचकयोः स्वातन्त्र्येण कदाचित् प्रयोगोऽपि स्यात् । न च भवति । तस्मात् नैतयोः स्वातन्त्र्येण वाचकत्वमित्यभिप्रायः ।

प्रकृत्यन्तरेति । यस्मात् तिप्रत्ययाविशेषेऽपि पचतीत्यत्र पाकः प्रतीयते पठतीत्यत्र तु पाठः, तथा पचिप्रकृत्यविशेषेऽपि [प] चतीत्येतस्मात् पचत इत्यस्य भिन्न आख्यातार्थः प्रतीयते । तस्मात् प्रकृतिप्रत्यययोर्भेदेन स्वार्थप्रतिपादकत्वमित्यभिप्रायः ।

पूर्वव्यवस्थायामिति । न ह्येकस्मिन्नित्यादिकायाम् ।

उत्तरविवक्षायामिति । प्रकृत्यन्तरेत्यादिकायाम् ।

वार्त्तिककारीयमिति । **पाणिनिसूत्रवार्त्तिककार**संबन्धि ।

यथासंभवमिति । यथोक्तमित्यर्थः ।

तथा चेति । यदा हि नानारम्भ इति **वार्त्तिके** अनारम्भस्याननुष्ठानमित्यर्थः **टीकाकृता** व्याख्यातः, तदा सन्तानारम्भेति **वार्त्तिके** आरम्भशब्दस्यानुष्ठानार्थता प्राप्ता । ततश्च सन्तानारम्भविवक्षायां पक्ष्यतीति **वार्त्तिक**स्य सन्तानानुष्ठानविवक्षायां पक्ष्यतीत्यर्थ आयाति । स च यथा पक्ष्यतीत्यत्राननुष्ठानमित्यनेन **टीकाकृता** स्वयमुक्तेनैव विरुध्यते इत्यर्थः ।

टीयाम् ॥ **अतीतानागतत्वेनेति** । क्रियाया अतीतानागतत्वेन कारकस्याप्यतीतानागतत्वं व्यक्तिः ।

किं कृत्वा क्रियाया अतीतानागतत्वम् ? अपेक्ष्येति योजना ।

तद्धेतुकमिति । अतीतानागतत्वव्यक्तिहेतुकम् ।

भाष्ये ॥ **योपरता क्रियेति** । स्थाल्यधिश्रयणादिका ।

या चिकीर्षितेति । दर्वीघट्टनावश्रवणादिका ॥

टीयाम् ॥ **शब्दमाहात्म्यादिति** । विद्यते इत्यत्र योऽतीतानागतसंपर्कः स शब्दमाहात्म्यात, न पुनर्वास्तवः ।

॥ एवमौपोद्घातिकं वर्तमानपरीक्षाप्रकरणं संपूर्णम् ॥

॥ उपमानपरीक्षाप्रकरणम् ॥

[२.१.४५-४९]

उने ॥ प्रतिषिध्यते इति । **भाष्यकृता ।**

तस्माद् गवयशब्दवाच्य इति शेष इति । ततश्च यथा गौरेवं गौः । [725b] तस्मात् गवयशब्दवाच्य इत्ययमर्थो यथा गौरेवं गवय इति वाक्यस्य न भवतीति संबन्धः ।

उत्तरत्रेति । न हि भवति यथेत्यत्र ।

टीयाम् ॥ महिषादिपरिहाणेति । प्रतीतमहिषादिकत्वेन महिषाद्यजिज्ञासुर्नाहमनेन वनेचरेण यथा गौरेवं गवय इति वाक्यात् महिषादेर्भूयः सादृश्यं प्रतिपादनीयः । तस्मादवगम्यते यदुतानेन महिषादिपरिहारेण भूयः सादृश्यं विवक्षितमिति प्रकरणादवगम्य ।

उने ॥ उक्तप्रकारेति । साधर्म्यस्य कृत्स्नप्रायाल्पभावरूपप्रकारत्रयानभ्युपगमः ।

टीयाम् ॥ ननु यदि साधर्म्यानैयत्येनातिदेशवाक्यं प्रवर्तते, तर्हि यथा गौस्तथा गवय इत्यतिदेशवाक्यमत्यन्तसाधर्म्याल्पसाधर्म्याभ्यामपि प्रवर्तते । तथा चास्मात् नारण्यकजीवविशेष एव गवयशब्दवाच्यः स्यादित्यत आह—**तच्चेति** । साधर्म्यम् ।

एकस्यैवोपमानोपमेयभावनमसहमान आह—**तत् क्रियान्तरमित्यर्थ** इति ।

टीयाम् ॥ तस्येति । गवयत्वस्य ।

वार्त्तिकं त्विति । परार्थं चोपमानमित्यादिना हि **भाष्येणो**पमानस्य परार्थत्वमात्रं व्यवस्थापितम् । न पुनः परार्थत्वेनानुमानादुपमानस्य भेद उक्तः । **वार्त्तिकं** तूपयुक्तत्वात् तमाहेत्यर्थः ।

वाके ॥ अनेनेति । अनुमानादुपमानस्य प्रतिपत्तिभेदव्यवस्थापकेन तथेत्युपसंहारादित्यादिना सूत्रेण ॥

॥ उपमानपरीक्षाप्रकरणं संपूर्णम् ॥

॥ शब्दसामान्यपरीक्षाप्रकरणम् ॥

[२.१.५०–५८]

उने ॥ प्रकरणमितीति । इति हेतोः ।

तत्प्रामाण्यमिति । इति शब्दप्रामाण्यम् ।

टीयाम् ॥ न तु भवतीति । न तु भवतिमात्रम् ।

उने ॥ भिन्नप्रस्थान इति । भिन्नव्यापारः ।

तदन्तर्भूत एवेति । प्रत्यक्षानुमानान्तर्भूत एव ।

तदपेक्षणादिति । आकाङ्क्षाद्यपेक्षणात् ।

वैभवलिङ्गेति । वैभवलक्षणं लिङ्गं वैभवलिङ्गम् ।

टीयाम् ॥ तज्ज्ञानमिति । महत्त्वज्ञानम् ।

अर्थस्यानुपलब्धेरनुमेयत्वादिति **सूत्रावयवेन** यः सिद्धो हेतुः **वार्त्तिककृता** उक्तः, प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति तं व्यभिचारपरिहारार्थं पूरयित्वा व्याचष्टे— **यज्ज्ञानमिति** ॥

उने ॥ तथा भवत इति । प्रत्यक्षापेक्षौ ।

तथा भवन्त्यपि इति । परमार्थविषया भवन्त्यपि ।

टीयाम् ॥ तेऽपीति । संशयादयः ।

तद्धीति । प्रत्यायनाङ्गान्वयव्यतिरेकज्ञानम् ।

उने ॥ सा हीति । स्वर्गादिपदप्रवृत्तिः ।

स चेति । समयः ।

तदभावे त्विति । प्रमाणोपनीतार्थाभावे ।

एतादृशव्यवहारानुपपत्ताविति । एवंविधोच्चारणाभावे इत्यर्थः ।

वाक्यस्यापीति । स्वर्गादौ यस्य प्रामाण्यमभ्युपेयते, तस्य स्वर्गकामो यजेतेत्यादिवाक्यस्यापि ।

टीयाम् ॥ सहस्राक्षेति । सहस्रमक्षाणीन्द्रियाणि नेत्राणीत्यर्थः ।

उने ॥ एतच्चेति । शस्त्रवाहनादि ।

स्वर्गपदार्थवदिति । यथा स्वर्गपदार्थस्य दुःखेन यन्न संभिन्नमित्यादिस्तुतिवादतः सिद्धिः, तथा शास्त्रादेरपि स्तुतिवादतः सिद्धेः ।

प्रकृत इति । शब्दे ।

टीयाम् ॥ एष इति । स्वर्गादिरूपो वाक्यार्थः ।

अस्मिन्निति । स्वर्गादौ वाक्यार्थे ।

उने ॥ तर्हीति । यदि संबन्धिनोऽगृहीतत्वेन संबन्धाग्रहात् स्वर्गादावनुमानं न प्रवर्तते तर्हि ।

तथापीति । मा भूद् वाक्यार्थे [726a] स्वर्गादौ पदार्थस्मरणद्वारेण प्रवर्तमानं पदं संगतिग्रहापेक्षं परं पदार्थस्मारणं पदस्य समयग्रहापेक्षमेव । समयग्रहश्च स्वर्गरूपवाक्यार्थप्रतिपादकानां पदानामशक्य एव संबन्धिनः स्वर्गस्यागृहीतत्वात् । ततश्च स्वर्गरूपवाक्यार्थो वाक्यादपि न कथमप्यवगम्यः प्राप्नोतीति पराशयः ।

लौकिकार्थेति । लौकिको लोकप्रसिद्धार्थो यत्र तद् यत्पदकदम्बकं दुःखेन यन्न संभिन्नमित्यादि तद्रूपो यो वाक्यार्थः स गोचरो येषां तद्भावे ।

तथाविधैरिति । लोकप्रतीतार्थैः ।

त्रयाणामपि पदानां वाक्यार्थगोचरत्वमिति । तथा हि,

ब्राह्मणो ब्रह्मचर्येण संस्कारैर्द्विज उच्यते ।
विद्यया चापि विप्रश्च श्रोत्रियस्त्रिभिरेव च ॥

तथा तथाविधैकाक्षरादिवृत्तप्रतिपादको ग्रन्थविशेषश्छन्दः । तथा विनयपूर्वकं गुरोर्विद्याग्रहणमध्ययनम् ।

टीयाम् ॥ **पदमिति** । **नैयायिका**नां मते ।

तदर्थे वेति । **मीमांसकानां** मते ॥

उने ॥ **प्रमाणतदाभासेति** । पदानां पदार्थानां वा प्रमाणत्वे प्रमाणाभासत्वे च संभवि ।

प्रत्यक्षस्येवेति । यथा प्रत्यक्षस्य चक्षुरादेरर्थक्रियास्थितेरर्थप्रवृत्तिसामर्थ्यात् प्रमाणत्वं तदाभासत्वं च विवेच्यते, तथा पदानां तदर्थानां चैतदाप्तोक्तत्वेन विवेचयिष्यते ।

वाक्यार्थेनेति । स्वर्गादिना सह ।

पदानामिति । दुःखेनेत्यादीनाम् ।

मा भूद् विशेषतः संबन्धावगम इति । स्वर्गादेरप्रत्यक्षत्वात् ।

पदार्थपक्षे इति । पदार्थेषु पक्षीक्रियमाणेषु ।

आशङ्क्ते इति । **आचार्यः** परम् ।

स्यादेतदितीति । अवगतमित्येतदन्तम् ।

अपक्षधर्मत्वमिति । पक्षीकृतपदानां पदैः स्मारितत्वादिति न धर्मः, किं तु पदार्थानामिति ।

गौरश्व इति । पदैः स्मारिताः पदार्थाः संसर्गवन्तः पदैः स्मारितत्वादित्यत्र गौरश्वः पुरुषो हस्तीत्यादिस्मारितैर्व्यभिचारो गवादयो हि गौरश्व इत्यादिपदैः स्मारिताश्च विद्यन्ते न च संसर्गवन्तः ।

भागासिद्धतेति । गौरश्व इत्यादिपदस्मारितेषु हि गवादिषु आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वं नास्तीति हेतोर्भागासिद्धता स्यात्, तत्परिहारार्थम् ।

टीयाम् ॥ **संसर्गस्य चेति** । न हि संबन्धस्य संबन्ध्यमानातिरिक्तः कश्चिद्विशेषः ।

भेद इति । विशेषः ।

अचतुरस्रमिति । विषमं व्यधिकरणमित्यर्थः ।

व्यधिकरणतामेव भावयति पदानामेवेत्यादिना तेषां चापक्षधर्मतया न लिङ्गत्व-मित्यन्तेन ।

ननु भवतु पदानां प्रमाणत्वं परं लिङ्गभूतानां सतां भविष्यतीत्यत आह—**तेषां चेति** । पदान्येव तावत् पदार्थस्मारणामवान्तरव्यापारं कुर्वाणानि वाक्यार्थप्रमां जनयन्तीत्यतः पदानि स्मारितार्थसंसर्गवन्तीत्येवं पदान्येव पक्षीकर्तुं युक्तानि । अन्यथा पदानां वाक्यार्थप्रतिपादकत्वं न प्रतिपादितं स्यात् । तस्माद् येऽमी पदार्थाः पक्षीकृताः, तेषां साध्यधर्मस्य संसर्गवत्त्वस्याभावेनापक्षत्वात् आकाङ्क्षादिमत्त्वे सति पदैः स्मारितत्वादित्यस्य हेतोरपक्षधर्मतया पदानां लिङ्गत्वस्यानुपपत्तिरित्यर्थः ।

पदार्थमात्रपर्यवसितवृत्तीनीति । पदार्थमात्रं प्रतिपाद्य कृतकृत्यानि ।

उने ॥ **एवं हीति** । पदानपेक्षाणां पदार्थानां वाक्यार्थप्रतिपादनपरत्वाभ्युपगमे इत्यर्थः ।

तथा सतीति । [726b] आकाङ्क्षां विना आसत्तियोग्यताभ्यामेव पदार्थ-संसर्गाभ्युपगमे योग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वादित्ययं हेतुरनैकान्तिकः स्यात् । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र हि पुरुषस्य राज्ञा सह योग्यतासत्तिमत्त्वे सति पुरुषपदस्मारितत्वमस्ति, न च संसर्गः ।

अविनाभावनिबन्धने[ति] । पदार्थानां योऽविनाभावस्तन्निबन्धना ।

अदर्शनादिति । आकाङ्क्षायाः ।

श्वेतरूपेति । श्वेतरूपसाक्षात्कारे हेषाशब्दसाक्षात्कारे चापदस्मारितेऽपि हि कस्येदं श्वेतं रूपं कस्यायं हेषाशब्द इत्येवं गुणिविशेषविषया तुरङ्गलक्षणकारणविशेषविषया चाकाङ्क्षा दृश्यते, श्वेतरूपादेर्गुणिविशेषाद्यविनाभावित्वात् ।

भवत्वविनाभावेति । यथा श्वेतरूपदर्शनादेर्गुणिविशेषादिषु आकाङ्क्षाया अविनाभावो निबन्धनम्, तथा पदकदम्बकस्य वाक्यार्थप्रतिपादनपरतायामविनाभावः पदार्थानां पदैः स्मारितत्वं चोभयमाकाङ्क्षाया निबन्धनमित्यर्थः ।

अन्यथेति । यद्यविनाभाव एव केवल आकाङ्क्षाया निबन्धनमभ्युपेयेत, तदा पटो भवतीति वाक्यं साकाङ्क्षत्वादप्रमाणं भवेत् । यदि च पदस्मारितत्वमेव केवलमाकाङ्क्षाया

निबन्धनमभ्युपेयेत, तदा गौरश्वः पुरुष इत्यादिष्वपि मिथः साकाङ्क्षत्वप्रसक्तावेकवाक्यता भवेदित्युक्तदोषापत्तिरित्यर्थः ।

टीयाम् ॥ तथा सतीति । आकाङ्क्षाया अविनाभावैकनिबन्धनत्वाभ्युपगमे ।

एवं हीति । यद्येकदेशः पटो भवतीत्ययं कश्चिद् गुणमाक्षिप्य निराकाङ्क्षो भवेत् तदा ।

निर्वृणुयादिति । निर्वृतं भवेत् ।

उने ॥ विशेषेणेति । रक्तत्वेन ।

पूरिताकाङ्क्षत्वादिति । पटो भवतीत्येकदेशस्य ।

न प्रयोजक इति । अन्यस्यानाक्षेपे ।

तथा चेति । प्रतीतिपर्यवसानमन्यस्यानाक्षेपे प्रयोजकं, न तु सन्निधिलाभ इति सिद्धे ।

एतदेवेति । प्रतीतिपर्यवसानमन्यस्यानाक्षेपे प्रयोजकमित्येतदेवाहेति संबन्धः ।

प्रकृतोपयोगिनीमिति । वाक्यार्थप्रतिपादनोपयोगिनीम् ।

टीयाम् ॥ वाक्यार्थेति । किं पुनरिदं पदार्थानामपर्यवसानं नाम? पदानां यद्विशिष्टार्थप्रतिपादनपरत्वं तस्यानिर्वाहकत्वमिति ब्रूमः । तथा हि, वाक्यार्थप्रतिपादनपरतया समभिव्याहृतानि पदानि आत्मनो विशिष्टार्थप्रत्ययपरत्वमुपपादयितुं पदार्थान् प्रतिपादयन्ति । ते च प्रतिपादिताः सन्त एवमालोचयन्ति । वयमात्मनो विशिष्टार्थपरत्वनिर्वाहार्थं पदैरवबोधिताः । न चानन्वीयमानैरस्माभिः पदानां विशिष्टार्थपरत्वं समर्थितं भवति । तद् यदि गुणान्तरद्रव्यान्तराक्षेपेण निर्वृता भवामः, तदा न किञ्चित् पदानामुपकृतं स्यादिति व्यर्थप्रतिपत्तित्वं न आपद्येत इत्येवमपर्यवस्यन्तः साकाङ्क्षाः पदार्था योग्यतादिसहायाः परस्परमन्वीयन्ते इति युक्तं पदानां विशिष्टार्थप्रतिपादनपरत्वानिर्वाहकत्वमपर्यवसानं पदार्थानाम् । एतदेव चाकाङ्क्षा ।

उने ॥ पदस्मारितमर्यादापर्यन्तमिति । पदस्मारितत्वमारभ्येत्यर्थः ।

टीयाम् ॥ लक्षयन्तीति । प्रतिपादयन्ति सन्ति ।

न ह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं वा संभवति। नापि विशेषणविशेष्य-भावः। स [727a] हि भावरूपाणां संयोगसमवायपूर्वक एव स्यादित्युक्तम्। तस्मात् ज्ञाप्यज्ञापकभावो वाच्यः। तत्र च दूषणम्।

नैवमिति। प्रकृतेऽन्योन्याश्रयत्वस्य सुखप्रतिपत्त्यर्थम्।

दृष्टान्ते धूमानुमाने परस्पराश्रयत्वं दर्शयति—कर्मकारकं हीत्यादिना न हि वृक्ष एव च्छिदा भवति इत्यन्तेन।

तद्वत्तेति। अग्निमत्ता।

नन्वग्निमत्ताग्निज्ञानजनकत्वं यदि स्यात् तदा को दोषः? तत्राह—**फलव्यङ्ग्यं हि तदिति**। अग्निज्ञानजनकत्वं हि अग्निज्ञानेन व्यङ्ग्यम्। ततो नानुपजाते फलेऽग्नि-ज्ञानजनकत्वं [1]कल्प्यते।

फलोपजनने सतीति। फलोपजनने ज्ञानोत्पादे सति अग्निमत्ता अग्निज्ञानजन-कत्वम्। तद्वत्तायां च कर्मणि अग्निज्ञानजनकत्वरूपे च कर्मणि सति ज्ञानोत्पादो विषय-मन्तरेण ज्ञानस्यानुत्पत्तेरितीतरेतराश्रयापत्तिः।

ननु वस्त्रं करोतीत्यत्र वस्त्रं फलमेव कर्म प्रतीयते, अतो नास्ति फलकर्मणोर्भेदः। तदभावाच्च कथमितरेतराश्रयत्वमत आह—**न च फलेति**।

प्रकृते योजयति—**तदिहेति**। संसर्गज्ञानलक्षणफलोपजने सति पदानां संसर्ग-ज्ञानजनकत्वम्, संसर्गज्ञानजनकत्वरूपे कर्मणि च फलोपजन इतीतराश्रयत्वात् पदानां संसर्ग-ज्ञानजनकत्वं नानुमानसाध्यं भवितुमर्हतीत्यर्थः।

७२६॥ संसर्गवत्त्वे प्रमाणमिति। एतानि पदानि स्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेति पदवत्।

अन्यथेति। यदि पदानामतिरिक्तः संबन्धो न भवेत्, तदा पदानि पदार्थविषयां स्मृतिमपि न कुर्युः। अथातिरिक्तसंबन्धाभावेऽपि कुर्वन्तीत्यभ्युपगमः, तदा एकं घटपदम-संबन्धाविशेषात् सर्वपदार्थविषयां स्मृतिं कुर्यादित्यतिप्रसङ्ग इत्यर्थः।

संबन्ध इति। सङ्केतलक्षणः।

---

1 MSS °ल्पते

सिसाधयिषितधर्मादीति । स्मारितपदार्थसंसर्गवत्त्वस्य धर्मस्याभावात् सिसाधयिषितधर्मादिना सिसाधयिषितधर्मविशिष्टो धर्मी पक्ष इति पक्षलक्षणेन विशिष्टत्वाभावे ।

पांशुरपादका इति । हालिकाः ।

अस्येति । आगमस्य ।

उक्तमपीति । न हि प्रवृत्तीत्यादिना ।

तदनपेक्षमितीति । इति एतत् ।

वैधर्म्यमात्राभिधायिनी इति । भेदाप्रयोजकवैधर्म्याभिधायके ।

अनुमानलक्षणेति । यतो यदि शब्देऽनुमानलक्षणमस्ति तदाप्तोक्तत्वलक्षणे वैधर्म्येऽप्यस्य नानुमानत्वे कश्चित् विरोधः, धूमनदीपूरादीनां प्रसिद्धानुमानानामपि वैधर्म्येऽप्यनुमानत्वादित्यर्थः ।

टीयाम् ॥ एवं व्यवस्थिते इति । पक्षधर्मत्वापेक्षापक्षधर्मत्वानपेक्षाभ्यामेवानुमान-शब्दयोर्भेदे सिद्धे ।

अभ्युच्चयमात्रतयेति । न तु भेदप्रयोजके वैधर्म्ये एते इति कृत्वा ।

उने ॥ यथाश्रुतेति । यथाश्रुते **भाष्ये वार्त्तिके** च रुचिर्यस्य तस्य **भाष्य-वार्त्तिक**तात्पर्यार्थविमुखं प्रतीत्यर्थः ।

तयोरिति । भाष्यवार्त्तिकयोः ।

एतदेवेति । नानुमानमपक्षधर्म इत्यादिना **सूत्रार्थ**तया व्याख्यातं पक्षधर्मापेक्षा-पक्षधर्मानपेक्षालक्षणमनुमानशब्दयोर्भेदप्रयोजकं वैधर्म्यमेव, न तु वैधर्म्यमात्रम् ।

स्वत एवेति । अनुव्यवसायादेव ज्ञायते इति समर्थितमादि**सूत्रे** । यदि य परतः प्रामाण्या[727b]भ्युपगमः, तदापि लिङ्गसमुत्थत्वेनैव ज्ञायते । न पुनराप्तोक्तत्वेनेत्यर्थः ।

भाष्ये ॥ अस्येदमितीति । अस्य शब्दस्येदमर्थजातमभिधेयमित्येतत् वाक्यं षष्ठी-विभक्तियुक्तम् । तस्य वाक्यस्यार्थविशेषो वाच्यवाचकभावसंबन्धोऽनुज्ञात इत्यर्थः ।

उने ॥ विततमिति । तादात्म्यस्य प्रत्यक्षलक्षणे निराकृतत्वेन तत्रैवोक्तत्वात् प्रत्याय्य-

प्रत्यायकभावस्य च प्राप्तिनिराकरणहेतुनोपरिष्टात् निराकरिष्यमाणत्वेन वस्तुतः तत्रैव वक्ष्यमाणत्वात् विक्षिप्तम् ।

ननु तादात्म्येति । ननु शब्दार्थयोस्तादात्म्यमपि निषेध्यमेव, तत् कुतोऽत्र तादात्म्यविकल्प उपन्यस्य **भाष्यकृद्वार्त्तिककृद्भ्यां** न निषिद्ध इत्यर्थः ।

टीयाम् ॥ प्राप्तिनिराकरणहेतुनेति । प्रमाणभावेनेत्यर्थः ।

औत्पत्तिक इति । उत्पत्तिरेव संकेतादिनिरपेक्षा प्रयोजनमस्य व्यक्तश्चेत् शब्दः, तदैव ज्ञानं जनयति ।

शब्दशब्दस्यार्थ इति । स्वरूपाभिधायकस्य शब्दस्यार्थः शब्दः ।

अस्ति चातीन्द्रियेत्यादि । अस्ति शब्दशब्दस्यार्थः समानेन्द्रियग्राह्यः परं यद्यसावेव स्यात् , तदा स्यात् प्रत्यक्षतः शब्दार्थप्राप्तेरुपलब्धिः, न त्वसावेवास्ति यावता यः शब्दग्राहकेन्द्रियातिपतितः श्रोत्रेतरेन्द्रियग्राह्यो घटादिर्यश्चेन्द्रियमात्रमतिपतितः सर्वेन्द्रियाग्राह्यः परमाण्वादिः सोऽपि शब्दस्य विषयो विद्यते । अत एतदपेक्षया प्रत्यक्षतः शब्दार्थप्राप्तेर्नोपलब्धिरित्यर्थः ।

लोकव्यवहार उच्छिद्येतेति । अर्थकर्मजसंयोगाभावादित्यर्थः ।

क एवमाह सन्तानवृत्त्या गच्छतीति ? अपि त्वागमनं परिस्पन्दभेदं ब्रूमो न चासौ नित्यस्य न संभवति परमाणुष्वभ्युपगमादत आह—**न तावद्गुणस्येति** ।

वाक्ये ॥ विततत्येति । व्याप्त्या ।

यत्र क्वचनावस्थितानामिति । गोशब्दश्रवणायोग्ये देशे स्थितानामपि पुंसाम् ।

सर्वत्रेति । गोव्यक्तिदर्शनायोग्ये देशे ।

टीयाम् ॥ सामान्यस्याश्रयेत्यादि वार्त्तिकं यथा न च वाच्ये इत्यादिवाक्येन संगच्छते इत्येतदर्थं पूरयित्वा व्याख्याति—**सामान्यस्येति** ।

यत इति । यस्या आश्रयोपलब्धेः सकाशात् ।

तथा चेति । यदा हि शब्देनैवाश्रयो व्यज्यते तदा योऽर्थाश्रितः शब्दः परैरभ्युपगम्यते सोऽर्थव्यञ्जकः । स च **ताल्वादिभिरप्राप्तैः सर्वान् प्रति व्यक्त** इति । यत्र क्वचनावस्थितानामर्थप्रत्यायनं स्यात् इत्युक्तदोषापत्तिरित्यर्थः ।

वाके ॥ ननु मा भूत् शब्दस्यार्थे समवायः, शब्दार्थौ त्वेकस्मिन्नाकाशे समवेतौ भविष्यत इत्यत आह—**नापीति ।**

अयमिति । प्राप्तिलक्षणः शब्दार्थयोः संबन्धः ।

उने ॥ ननु शब्दस्य द्रव्यत्वं **मीमांसकैः** अभ्युपेयते । ततोऽर्थेन संयोगो भविष्यतीत्याशङ्कयाह—**द्रव्यत्वेऽपीति ।** सर्वेषां शब्दानां व्यापकत्वेनाभ्युपगमात् सर्वैरर्थैः संयोगित्वं स्यात् ।

गुणाद्यव्यापकं चेति । गुणादीनां द्रव्येण संयोगाभावात् द्रव्यत्वेऽपि शब्दस्य गुणादिभिः संयोगित्वं न स्यादित्यर्थः ।

टीयाम् ॥ निरुक्तादिरिति । आदिपदादभिधानकोशादिग्रहः ।

उने ॥ आत्माश्रयेति । निरुक्तादीनां शब्दरूपाणामर्थसंबन्धे प्रतीते प्रतिपादकत्वमर्थसंबन्धप्रत्यायकत्वम् । अर्थसंबन्धप्रत्यायकत्वे [728a] चार्थसंबन्धप्रतीतिरिति अर्थसंबन्धप्रतीतिः स्वात्मानमेवापेक्षते इत्यात्माश्रयः । तथा निरुक्तादीनामर्थसंबन्धे प्रतीते शब्दानामर्थसंबन्धप्रतिपादकत्वम् । शब्दानामर्थसंबन्धप्रतिपादकत्वे च निरुक्तादीनामर्थसंबन्धप्रतीतिरित्यन्योन्याश्रयः ।

वाके ॥ तस्मादेवेति । अनुमानसाधर्म्यादेव ।

सामान्यमिति । अर्थपरिच्छेदकत्वम् ।

अभेदश्चोद्यत इति । शब्दानुमानयोः ।

स्वपरात्मप्रत्यायकत्वादिति । धूमादिज्ञानं त्वनुमानं यस्योत्पद्यते तस्यैव प्रत्यायकमित्युक्तमेव ।

उने ॥ **देवदत्तवदिति** । देवदत्तपदवत् ।

टीयाम् ॥ **प्रवृत्तिहर्षे**त्यादि । प्रयोज्यवृद्धगतान् प्रवृत्तादीन् दृष्ट्वेत्यर्थः ।

तद्धेतुमिति । प्रवृत्त्यादीनां कारणम् ।

तस्येति । प्रत्ययस्य ।

सत्स्वप्यन्येष्विति । प्रयोजकवृद्धशरीरावस्थानादिषु ।

तदवयवानामिति । वाक्यावयवानां च ।

[1]**आवापोद्धारभेदेनेति** । एकेषां पदानां निक्षेपादन्येषां चोद्धारस्तद्विशेषेण ।

उने ॥ **अभिप्रायस्थमाक्षेपमिति** । ननु सर्गादौ वृद्धव्यवहाराभावात् तदानीन्तनानां सङ्केतग्रहाभावे सांप्रतिकानां कथं वृद्धव्यवहारात् सङ्केतग्रह इत्येवंरूपम् ।

टीयाम् ॥ **तत** इति । सङ्केतग्रहात् ।

भाष्ये ॥ अर्थस्य लक्षणत्वं भावयति—**पदसमूह** इति । अर्थपरिपूर्णतायां सत्यां पदसमूहो वाक्यम् ।

उने ॥ **तथा चेतीति** । तथा च स्वाभाविकेत्यादि ।

उने ॥ **ततः किमिति** । यदि स्वाभाविकः संबन्धः कस्यचित् शब्दस्य केनचिदर्थे-नास्ति, न तु सर्वस्य सर्वेणेति ततः किम् ?

टीयाम् ॥ **स्तोत्रियानवके** इति । स्तोत्रार्हाणामृचां नवके ।

स्वाभाविकसंबन्ध इति । स्वाभाविकः संबन्धो यस्य स तथा ।

तत्रेति । द्वितीयेऽर्थे प्रियंग्वादौ ।

असन्नेव स्वाभाविकः सङ्केतेन व्यज्यते इति पराभिप्रायं मत्वाह—**असदेव हीति** ।

---

1 C आवापोद्वाप°

उने ॥ स चेति । सङ्केतः ।

अन्यथानुपपत्तिरेवेति । सर्वेषां शब्दानां सर्वैरर्थैः सह स्वाभाविकसंबन्धमन्तरेणानुपपत्तिः ।

अत्रेति । स्वभावसंबन्धे ॥

॥ इति शब्दसामान्यपरीक्षाप्रकरणं संपूर्णम् ॥

॥ शब्दविशेषपरीक्षाप्रकरणम् ॥

[२.१.५८–६९]

उने ॥ परीक्षित इति । निषेध्यत्वेन ।

तदसिद्धाविति । यदि हि शब्दस्य प्रामाण्यं न सिद्धम्, तदानुमाने शब्द-स्यान्तर्भावो बहिर्भावो वा असंभावित एव । न ह्यप्रमाणस्य प्रमाणे कदाचिदन्तर्भावबहिर्भाव-संभावनास्यात् ।

ततः किमित्याह—**संभावितस्य च साध्यत्वात्** [इति] । यदि ह्यनु-माने शब्दस्यान्तर्भावो बहिर्भा[वो] वा संभावितः स्यात्, तदैवासौ साध्यते । इदमुक्तं स्यात् । पूर्वप्रकरणे तावत् पूर्वपक्षिणा अनुमानान्तर्भावः साधितः । सिद्धान्तिना चानुमानात् बहिर्भावः । एतौ च तदैव साध्येते शब्दस्य यदि संभावितौ स्याताम् । संभावितत्वं च तदैव स्यात्, यदि शब्दस्य प्रामाण्यमभिप्रेतं स्यात् । तथा च पूर्वपक्षिणः सिद्धान्तिनश्च प्रामाण्याभ्युपगमे शब्दविशेषस्य प्रामाण्यपरीक्षणमयुक्तमित्यर्थः ।

समस्तलोकयात्रानुबन्धस्येति । समस्तलोकव्यवहारनिर्वाहकस्य ।

स्वचरितविरुद्धं चेति । शब्दाप्रामाण्यप्रतिपादशब्दानामेव प्रामाण्याभ्युपगमेन स्वाभ्युपगमविरुद्धम् ।

अनुमानान्तर्भावमुखेनेत्यादि । एतदर्थं शब्दस्यानुमानेऽन्तर्भावमहं ब्रुवे येन सिद्धान्ती अनुमानाद् [728b] बाह्यतां व्यवस्थापयति । तथा च शब्दस्याप्रामाण्यं मया सुखेनैव व्यवस्थाप्यते इत्येवमनुमानान्तर्भावद्वारेण या तद्बाह्यता अनुमानाद् बहिर्भावः तया तस्य शब्दस्याप्रामाण्यमेवाभिप्रेतम् । ततश्च बहिर्भावसिद्धौ सत्यां तदेवाभिप्रायीकृता-प्रामाण्यमेवेदानीं प्रकटय्य प्रत्यवस्थानं पूर्वपक्षिणः ।

यद्येवं शब्दविशेषस्य प्रामाण्याक्षेपः कुत इत्यत आह—**सामान्यतश्चेति** ।

तद्व्युत्पादने इति । अप्रामाण्यव्युत्पादने ।

अस्येति । सिद्धान्तिनः ।

स्ववचनव्याघात इति । प्रमाणत्वेनाभ्युपगतेन शब्दाप्रामाण्यप्रतिपादकेन स्ववचनेनैव व्याघातः ।

टीयाम् ॥ **तन्नान्तरीयकतयेति** । वेदप्रामाण्यव्युत्पादनाविनाभूततया निःश्रेयसाधिगमपरत्वस्य ।

उने ॥ अशक्यत्वमेव कुत इत्यत आह—**तस्येति** । शास्त्रस्य ।

तदुपदिष्टेति । वेदोपदिष्टा ।

टीयाम् ॥ नन्वप्रमाणमप्यर्थं प्रत्याययति । तत् कथमुक्तमप्रामाण्यमर्थस्याप्रत्यायकत्वमित्यत—**अर्थस्येतीति** ।

भाष्ये ॥ **समयाध्युषिते** इति । अर्धोदिते सूर्ये ।

[1]**श्याव** इति । श्वा ।

टीयाम् ॥ **उदितहोमादिविधिवाक्यानामिति** । उदिते होतव्यमित्यादिवाक्यानाम् ।

तेषामिति । मध्याह्नादीनाम् ।

यस्त्विति । चोदक उक्ते व्याघाते न तुष्यतीति संबन्धः । प्रधानोद्देशेन हि विधीयमानानां गुणानां प्रति प्रधानं संबन्धावगमाद्युक्तं यत्प्रति प्रधानमावृत्तिर्भवति । पतद्ग्रहं संमार्ष्टीत्यत्र संमार्गस्यैव प्रति पतद्ग्रहम् । प्रधानस्य तु सकृच्छ्रुतस्यैव विधीयमानानेकगुणसंबन्धोपपत्तेः । समुदाये वाक्यपरिसमाप्तेर्न गुणानुरोधेन प्रधानावृत्तिर्युक्ता ।

अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यत्रारुणादिगुणानुरोधेन क्रयस्यैव वाक्यभेदप्रसङ्गादित्यभिप्रायेणाह—**न च कालेति** ।

सकृच्छ्रुतहोमानुवादेन कालमात्रविधिपरेषु वाक्येषु न होमाभ्यासः प्रतीयते इत्याह—**न चोदितेति** ।

उने ॥ ननु एककर्तृकत्वेनेत्यादि**वार्त्तिक**वाक्ये एककर्तृकत्वार्थपरमेककर्तृकत्वं हेतुः । अग्निहोत्रादीत्यादिवाक्ये च वेदवाक्यत्वार्थपरं वेदैकदेशत्वं हेतुः । अतो हेतुभेदात् नाग्निहोत्रादीत्यादिवाक्यस्य पौनरुक्त्यम् । तत् केनाभिप्रायेण **टीकाकृ**दाह—पर्युदासं साध्यमित्यादीत्याशङ्क्याह—**यद्यपीति** ।

---

1 MSS श्यामः

वार्के ॥ प्रतिज्ञागतेन विकल्पेन सूचितं साध्यभेदं दर्शयितुं पर्युदासमित्यादि **टीकाकृता** उक्तम् , न तु हेतुपौनरुक्त्यं परिहर्तुम् । **तेनैव हेतुनेति** तूभयोरपि हेत्वोः पर्युदास-प्रसज्यप्रतिषेधरूपसाध्यद्वयस्यापि साधकत्वेनाभेदं विवक्षित्वोक्तमित्युदयनाभिप्रायः ।

भाष्ये ॥ **प्रयोक्तेति** । यायजूक इत्यर्थः ।

टीकायाम् ॥ **अशृतमिति** । अपक्वम् ।

अप्रोक्षितमिति । मन्त्रैरसंस्कृतम् ।

हीनेति **भाष्य**पदं व्याचष्टे—**अन्वाहार्यमिति** ।

न्यूना वेति । वाशब्दो दुरागतापेक्षया ।

स चेत्यादिना निन्दिता वेति **भाष्यं** व्याख्यातम् ।

जरत्तरत्वेनेति । पुरातनत्वेन ।

वार्के ॥ **उपेत्येति** । न केवलैवेष्टिः कारणमिति यदुक्तं न चेयमिष्टिर्मया इत्यादिना तदिष्टिसंपदमिष्टेः स्वसाधनादिसामग्रीमङ्गीकृत्य । अन्यथा तु [729a] स्वसाधनादिसामग्र्य-भावेऽपि इष्टिर्न कारणमित्यर्थः ।

उने ॥ **कर्मसाधनाक्षेप इति** । मन्त्राक्षेपः ।

एतदिति । सम्यक्संप्रयुज्यमानयोः पित्रोः पुत्राजननम् ।

अयं प्रकार इति । अन्वयव्यतिरेकादर्शनस्य कार्यकारणभावनिराकारकत्व-लक्षणः । अत एव म्लेच्छादीनामित्यादिना सूचितः ।

प्रमाणान्तरेति । आगमः ।

तमन्तरेणेति । यदि आगमगम्यस्य पुत्रेष्ट्यादेः कारणभावो न स्यात् तदा पुत्रेष्ट्यादिर्धर्म्यैव न सिध्येत् कारणस्वभावस्यैव तस्यागमेन प्रतिपादनात् ।

दृष्टवैगुण्य इति । दूरदेशावस्थानादिना मातापित्रोः संप्रयोगवैगुण्ये ।

टीकायाम् ॥ **तदनेनेति** । सर्वत्र पुत्रेष्ट्यादीनां पुत्रोत्पत्तिं प्रति कारणत्वस्य सूचनेन ।

अनियफलत्वमपीति । भवान्तरेऽप्युपभोग्यफलत्वं च पुत्रकामेष्ट्यादीनां तदेव स्याद् यदि कर्मकर्तृसाधनवैगुण्येऽपि कर्मान्तरप्रतिबन्धेन फलं नोत्पद्येतेत्याह— **तथा चेति ।** पुत्रकामेष्ट्यादीनां भवान्तरोपभोग्यफलत्वे सूचिते ।

उने ॥ अनन्तरफलत्वमिति । ऐहिकफलत्वम् ।

साधनसामर्थ्यमात्रेणेति । अग्निहोत्रादिस्वर्गादिसाधनसंपत्तिमात्रेण ।

आनुश्रविक इति । वैदिकः ।

अर्थ इति । स्वर्गादिः ।

कामनासत्त्वे इति । कामनायां सत्याम् ।

तदिति । वैदिकार्थस्य स्वर्गादेर्भवनं कर्तृ ।

वैचित्र्यं नानुरुध्येतेति । नानारूपतां नाश्रयेत् ।

तेषामेवेति । एकस्यैवाग्निहोत्रादेः कर्मणः कामनाविशेषेणैकं प्रति स्वर्गसाधनत्वम् , अन्यं प्रति चापवर्गसाधनत्वं दृश्यते ।

अव्युत्थितैषणात्रयस्येति । अव्यवच्छिन्नलोकैषणावित्तैषणापुत्रैषणारूपेच्छात्रयस्य पुरुषस्य ।

अमीषामिति । कारीर्यादीनाम् ।

भाष्ये ॥ न चेदमिति । पुत्रकामः पुत्रकामेष्ट्या यजेतेतीदं लौकिकादग्निकामो दारुणी मथ्नीयादिति विधिवाक्यात् न भिद्यते ।

योऽभ्युपेतं होमेति । उदितानुदितसमयाध्युषितेषु कालेषु एकं नियतं कालमग्निपरिग्रहसमय एवाभ्युपेत्य पश्चात् कार्यव्यासङ्गात् तस्य कालस्य भेदे तदुल्लङ्घनेनान्यत्र हवने दोषोऽयमुच्यते । उदितहोमी यद्यनुदिते जुहोति शबलो वास्याहुतिमभ्यवहरतीत्यादि योज्यम् । ततो न व्याघातः ।

उने ॥ तदश्रुतिमात्रेणेति । निपाताश्रुतिमात्रेण ।

टीयाम् ॥ व्यवस्थितमिति । सिद्धम् ।

उने ॥ **तस्यापीति** । धर्मस्य स्वर्गस्य वा ।

टीयाम् ॥ **न कर्तव्य इतीति** । इति हेतोः ।

वाके ॥ चोदकः प्राह—**एवमेतदिति** । यथा भवता व्याख्यातं तथैतत् । यथात्व-स्साभिव्यर्थाधातोऽभिधीयते न तथेत्यत्र नियमहेतुर्वाच्यः ।

सिद्धान्त्याह—**इदमेवेति** ।

चोदकः । **कथमितीति** ।

सिद्धान्ती । इदमेवेति ।

भाष्ये ॥ **अनर्थकोऽभ्यास** इति । अनर्थकः शब्दाभ्यासः पुनरुक्तम् । अयं त्वर्थवान् । तस्मादनुवादो न पुनरुक्तमित्यर्थः । तथा च एनमहं पञ्चदशारेण वाग्वज्रेण भ्रातृव्यमवबाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति मन्त्रे पञ्चदशसामिधेनीकल्पितार-वज्राभिवादः । एकादश च सामिधेन्य उत्पत्तिवाक्ये पठिता इति प्रथमतृतीययोः सामि-धेन्योः त्रिरनुवचनं पञ्चदशत्वपूरणायेति नानर्थक एवायं शब्दाभ्यास इति भावः ।

भ्रातृव्यमिति । शत्रुम् ।

उने ॥ [729b] **अप्रयोजकत्वमिति** । न हि भूमेरावपनवाक्यं वेदैकदेशत्वात् प्रमाणम् । किं तर्हि ? अव्यभिचरितार्थप्रतिपादनात् ।

अनैकान्तिकत्वमिति । पदादिनियमो **बौद्धा**दिसिद्धान्तेऽप्यस्ति । न चासौ प्रमाणम् । एवमग्रेऽपि अप्रयोजकत्वमनैकान्तिकत्वं च भाव्यम् ।

तात्पर्यमिति । प्रामाण्यसंभवमात्रपरत्वरूपम् ।

टीयाम् ॥ **सौत्रं हेतुमिति** । विध्यर्थवादेत्यादिसूत्रसूचितमित्यर्थः ।

भाष्ये ॥ **वाक्यविभागस्य चार्थग्रहणादिति** । वाक्यप्रकारसंबन्धिनोऽर्थस्य ग्रहणात् ।

टीयाम् ॥ शब्द[१]स्तद्व्यावृत्तिः[२] कार्यं[३] फलं[४] रागो[५] नराशयः[६] ।
इष्टाभ्युपायता[७] चेति विधौ विप्रतिपत्तयः ॥

तत्रेष्टाभ्युपायतां विधिमभिप्रेत्याह—**अत्र चारोग्येति** ।

व्युत्पित्सुरिति । संकेतं जिघृक्षुः ।

स्वात्मसिद्धमेवेति । स्वात्मनः प्रवर्तकत्वेन निश्चितमेव प्रयोज्यवृद्धस्य प्रवर्तकं ज्ञानमनुमिमीते । यज्जातीयं ज्ञानं मे प्रवृत्तिहेतुरस्यापि तज्जातीयमेवेत्यनुमिमीते इत्यर्थः ।

न चैष शब्देति । न तावल्लिङादिशब्दप्रत्यय एव तद्दिनजातस्य बालस्य [1]स्तन्यपानादौ प्रवर्तकः । लिङादिशब्दप्रत्ययमात्रस्य प्रवर्तकत्वेऽन्तरेणापि संबन्धसंवेदनं प्रथमश्रुतादपि लिङादेः पुंसः प्रवृत्तिप्रसङ्गात् **पाणिनीयस्मरण**विरोधाच्च । यतो भगवान् **पाणिनिः** विधौ लिङादिप्रत्ययं सस्मार, न तु लिङादिस्वरूपमेव विधिं व्याजहार । नाप्यभिधारूपलिङादिशब्दव्यापारप्रत्ययः प्रवर्तकः संगतिप्रतिसन्धानात्मको हि अभिधाव्यापारः । तत्प्रत्ययोऽगृहीतसङ्केतत्वेन बालस्य न संभवत्येव । संभवतु वा तथाप्यभिधाव्यापारप्रत्ययमात्राधीनत्वात् प्रवृत्तेरभिधाव्यापारप्रतीतौ निष्प्रयोजनमपि प्रवर्तते । नापि पुरुषः शब्दप्रयोक्ता । तस्याशयोऽनुज्ञानादिरूपोऽभिप्रायः । तत्प्रत्ययोऽस्य प्रवर्तकोऽगृहीतसङ्केतत्वादेव बालेन पुरुषाभिप्रायाग्रहणात् ॥ ग्रहणेऽपि [2]चानुज्ञायां प्रेषणायां चात्मीयफलोद्देशस्यैव यथायोगं योगरूपस्य क्षेमरूपस्य च प्रवर्तकत्वात् । अध्येषणायामपि प्रवर्तकपुरुषाभिलषितफलोद्देशस्यैव प्रवृत्तिहेतुतया , फलेच्छैव सर्वत्र प्रवर्तिकेति न पुरुषाशयस्य प्रवर्तकत्वकल्पनं ज्यायः । नापि निरुपाधिप्रवर्तकत्वमात्रस्य फलेच्छोपाधिरहितप्रवृत्तिकर्तृत्वमात्रस्य प्रत्ययः प्रवर्तकः । प्रवृत्तिकर्तृत्वमात्रस्य हि प्रवर्तकत्वे स्तन्यपानादावेव नियते प्रवृत्तिर्न स्यात् नाप्यपूर्वप्रत्ययः प्रवर्तकः । अपूर्वस्य हि पारत्रिकेष्टाभ्युपायतेतिकर्तव्यतारूपस्य प्रत्यय ऐहिकेष्वर्थेषु व्युत्पन्नानामपि न प्रवर्तकः, किं पुनर्बालानाम् ? ततः कथं बालस्य स्तन्यपानादौ स प्रवर्तको भविष्यति ? तत एतत्प्रत्ययपरिहारेणैव बालेन लौकिकवाक्येषु प्रयोज्यवृद्धस्य प्रवर्तकप्रत्ययोऽनुमितः । असावेव [3]चावापोद्वापाभ्यां लिङाद्यर्थतया अवगतः । तस्मात् वेदवाक्येष्वपि न शब्दादयः प्रवर्तका लिङादिरभिधीयन्ते । पुरुषाशयस्तु महेश्वराभिप्रायोऽत्र ज्ञेयः । लिङो हि लौकिकार्थातिक्रमे य एव लौकिकास्त एव वैदिकाः, त एव चामीषामर्था इति विप्लवेत । [त]था च [730a] जबगडदशादिवाक्यवदनर्थकत्वप्रसङ्गो वेदस्य स्यादिति **टीका**संक्षेपार्थः ।

---

1 MSS स्तन 2 S वानु° 3 MSS °पोद्धारा°

तेष्विति । शब्दादिषु ।

प्रवर्तकत्वशङ्कापीति । बालस्य ॥

कार्यप्रत्यय इति । कार्यमिदमिति प्रत्ययः ।

कार्यप्रत्ययो हि प्रवर्तकः । कार्यं च कृत्या पुरुषप्रयत्नेन व्याप्यमुच्यते । एवं च वस्तुतः प्रतीयमानः पुरुषप्रयत्नः प्रवृत्तिहेतुरभ्युपगतः, एतदुपहितस्यैव कार्यत्वात् । पुरुषप्रयत्नश्च शारीरिकादिर्न प्रवृत्तिहेतुः, स्वात्मनि वृत्तिविरोधात् । तस्मात् मानसोऽसौ ग्राह्य इत्याह—**ननु कृतिरिति हीति ।**

प्रवृत्तिफलस्य मानसप्रवृत्त्युपहितकार्यत्वे हेतुमाह—**फलोद्देशेनेति ।**

तदवगमश्चेति । प्रवृत्तिविषयस्य प्रवृत्तिफलस्य वा अवगमः ।

प्रवृत्त्यवगम इति । मानसप्रवृत्त्यवगमः ।

अननुविधेयेति । अननुविधेयोऽनुष्ठेयो नियोगो व्यापारणा येषां तेषु ज्वरापहारकामस्तक्षकचूडामणिमवधाय्य पिबेदित्यादिवाक्येषु ।

प्रवृत्त्यवगम इति । मानसोत्साहावगमः ।

उने ॥ तथा तुल्योऽनुयोगः परिहारश्चेति । यथा कार्यविधिपक्षे मानसोत्साहावगमस्य विद्यमानत्वात् तक्षकचूडा[मणि]ग्रहणे कस्मात् न प्रवृत्तिरित्यनुयोगः, तथापेक्षितोपायता विधिपक्षेऽपि । तक्षकचूडामणेरपेक्षितोपायस्य सत्त्वात् तद्ग्रहणे कस्मान्न प्रवृत्तिरिति तुल्योऽनुयोगः । यश्चापेक्षितोपायताविधिपक्षे अशक्यत्वात् न तक्षकचूडामणिग्रहणे प्रवृत्तिरिति परिहारः, स कार्यविधिपक्षेऽपि भविष्यतीति पराशयः ।

विशेषानपेक्षणादिति । कार्यत्वस्य सामान्यमात्रनिष्ठतयापि संभवेन शक्यत्वादिविशेषानपेक्षणात् ।

तदप्रतीताविति । शक्यत्वादिविशेषाप्रतीतौ ।

टीयाम् ॥ स्वकारणे इति । इच्छायां द्वेषे वा ॥

उने ॥ संकल्पेति । संकल्प इच्छारूपो द्वेषरूपो वा स एव विधिरिति वादिनम् ।

टीयाम् ॥ लिङादिगोचराविति । सप्तम्यादिवाच्यौ ॥

कस्मात् ज्ञात एव प्रवृत्तिहेतुर्लिङादिवाच्य इत्यत आह—**शब्दस्य ज्ञापकत्वादिति।** यद्यज्ञात एव प्रवृत्तिहेतुरत्राभ्युपगम्येत तदा तज्ज्ञापनार्थं लिङाद्युच्चारणं व्यर्थमेव स्यादित्यर्थः।

ननूत्पन्नः सन् प्रवृत्तिहेतुः प्रवृत्तिं जनयेदिति तदुत्पत्त्यर्थमेव लिङाद्युच्चारणं भविष्यतीत्यत आह—**अनुत्पादकत्वाच्चेति।**

निसर्गेति। फलान्तररूपोपाधिमन्तरेण।

तदुपायोऽपीति। फलोपायः।

तत्तयेति। फलोपायतया।

स्वत एवेति। फलान्तरमन्तरेण।

तद्विषयेति। फलविषया।

तत्रेति। फले।

तस्येति। फलस्य।

अयोग्यत्वेनेति। असिद्धत्वात्।

अन्यत्र तदुपाये इति। फलादन्यो यः फलोपायस्तत्र।

एकविषयतयेति। यत्रैव विषये कारणमिच्छा तत्रैव कार्यं प्रयत्नोऽपीत्येवम्।

ननु फलविषययैवेच्छया फलान्यथानुपपत्तेः फलोपायविषयः प्रयत्नो जन्यते। तत् कथमिषिप्रयत्नयोरेकविषयतया संप्रतिपत्तिरित्यत आह—**न चेति।** फलसंबन्धात् फलोपायो न च नेष्यते। अपि तु इष्यत एव।

येनेति। फलोपाये इच्छाया अभावेन ॥

उने ॥ अयमेवार्थ इति। अपेक्षितोपायतालक्षणः।

ज्ञापिकेतीति। यदपेक्षितोपायस्तत् [730b] कर्तव्यं स्यादित्येवमपेक्षितोपायता कर्तव्यस्यैव ज्ञापिकेति हेतोस्तज्ज्ञानस्यापेक्षितोपायताज्ञानस्य यावन्वयव्यतिरेकौ प्रवर्तकत्वाश्रितौ तावन्यथापेक्षितोपायताज्ञानमन्तरेण कर्तव्यताप्रत्ययेनैव सिद्धौ प्रवर्तकत्वं कर्तव्यताप्रत्ययस्यैव। अपेक्षितोपायताज्ञानं तु कर्तव्यताप्रत्यये उपयुक्तमिति भावः।

नित्येऽपीति । मनःप्रभृतिनि ।

सहिताया अपीति । अपेक्षितोपायतायाः ।

कृषीवलेति । कृषीवलानिर्वर्त्तितं हि कारीर्यादि अभूत्वा भावित्वे सति अपेक्षितोपायोऽप्यस्ति । न च कृषीवलानां कर्तव्यम् । अतो[ऽ]व्यभिचारः ।

ननु कर्तव्यत्वे सतीष्टोपायता कार्यत्वाव्यभिचारिणी कार्यत्वस्य ज्ञापिका भविष्यतीत्याशङ्कयाह—**कर्तव्यत्वे सतीति ।**

अयं प्रसङ्ग इति । नन्वपेक्षितोपायतापि प्रवृत्तिं व्यभिचरत्येव । जानाति हि प्रागेव यजमाननिर्वर्तितां कारीरीमपेक्षितोपायत्वेन कृषीवलः, न तु तत्र प्रवर्तते इत्येवंरूपो व्यभिचारप्रसङ्गः ॥

टीयाम् ॥ सिद्धे इति । कारीर्यादौ ।

कर्तृतास्तीति । कृषीवलानाम् ।

शास्त्रेति । विधिवाक्यम् ।

प्रयोक्तरीति । कर्तरि ।

क्रियैवेति । पाकादिः ।

शब्दार्थ इति । पचेदित्यादिविधिवाक्यार्थः ।

क्रियामेवेति । हवनादिकाम् ।

उने ॥ तस्या इति क्रियायाः ।

प्रमाणबाधितमिति । तस्मादपूर्वस्यैव स्वर्गं प्रति साधनत्वमपूर्वमेव च लिङाभिधीयमानाया इष्टाभ्युपायताया धर्मस्याश्रय इति पराभिप्रायः ।

स्वर्गसाधनेति । यदि हि यागस्य स्वर्गसाधनत्वं न सिद्धं तदा अपूर्वकल्पनायां प्रमाणमेव नास्ति । आस्तां तावदपूर्वस्य स्वर्गं प्रति साधनत्वेनापेक्षितोपायता, अस्तित्वमेव [तस्य] न घटते इत्यर्थः ।

कुत इत्याह—**तद्धीति ।** यतो यद्यपूर्वं न भवेत्, तदा क्षणविनश्वरस्य यागस्य स्वर्गसाधनत्वं न भवेदित्येवमपूर्वं विना अनुपपद्यमानं तत् स्वर्गसाधनत्वमेवैकमपूर्वे प्रमाणम् ।

तस्मादपूर्वमभ्युपगच्छता परेण यागस्य स्वर्गसाधनत्वं सिद्धमभ्युपेयम् ।

तथा च किमित्याह—**तत्प्रतीताविति ।** यागस्य स्वर्गसाधनत्वसिद्धौ तु यथा लोके कृष्यादिक्रियायास्तत्तदङ्कुराद्यवस्थावान्तरव्यापारायाः सत्याश्चिरभाविफलान्वयावगमः, तथा यागादिक्रियाया अवान्तरापूर्वव्यापारायाश्चिरभाविस्वर्गादिफलान्वयावगमे लिङादिभिरपूर्वमिष्टोपायोऽभिधीयते इति कल्पनानवकाश इत्यर्थः ।

अस्तु वैवमिति । भवतु वा अपूर्वमिष्टोपायः ।

टीयाम् ॥ कर्त्रपेक्षितेति । कर्तुरपेक्षितोपायतालक्षणो यः समानोपाधिः तेन प्रवृत्तिर्यस्य स तथा ।

उपदेशे इति । आरोग्यकामः पथ्यमश्नीयादित्यादौ ।

नियोज्यप्रयोजनेति । नियोज्यस्य प्रयोजनं फलं यत्र तत् तथा कर्म यत्र तस्मिन् ।

तदेवेति । अग्निहोत्रं जुहुयात् स्वर्गकामः इति वाक्यमेव ।

तत्साधनेति । अग्निहोत्रसाधनं दध्यादि ।

प्रतिग्रहादिनेतीति । ब्राह्मणः प्रतिग्रहेणार्जयति । क्षत्रियोऽन्यथा ।

तेनेति । धनेन ।

पुरुषार्थेनैवेति । पुरुषेच्छयैव ।

तस्येति । धनार्जनस्य, धनार्जननियमस्य वा । धनार्जननियमपक्षे तु ब्राह्मणः प्रतिग्रहे[731a]णार्जयतीत्यादिधनार्जनविधेरेव हेतुत्वादिति हेतुर्ज्ञेयः ।

अन्यत इति । रागतः ।

टीयाम् ॥ उपयोगद्वयमिति । विधिसहकारितया प्रवृत्तिजनकत्वं तथा श्रद्धाविशेषोत्पादनद्वारेण प्रवृत्तिकार्यधर्मजनकत्वमिति श्रुतेरुपयोगद्वयम् ।

तत्राद्यं भावयति—**विधिनेति ।**

द्वितीयं भावयति—**सा चेति ।**

प्रवृत्तेः कार्ये इति । धर्मे ।

सहकारितामिति । स्तुतेः ।

विधेः कार्ये इति । प्रवृत्तौ ।

भाष्ये ॥ विश्वजितो यागस्य स्तुतिमाह—**सर्वजितेति** । यागभेदेन ।

एतेनेति । सर्वजिता यागेन ।

आप्नोतीति । यजमानः ।

वावेति । एवार्थे ।

प्रमीयते इति । हिंस्यते ।

अन्यकर्तृकस्येति । अन्यकृतस्येति क्वचित् पाठः । अन्यैरन्यथानुष्ठितस्य विधेरन्येषां विपर्ययेणानुष्ठानं परकृतिः । तथा हि, केचिदध्वर्यवो वपां पूर्वं जुह्वति । हुत्वा पश्चात् पृषदाज्यमभिधारयन्ति । सोऽयं वपाहवनपूर्वकोऽभिधारणविधिरन्याध्वर्युकर्तृकः, तमपरे विपर्यासयन्ति । तेनासौ व्याहतो भवति ।

ब्रह्महत्याव्रतं (?) चीर्णं यैस्ते **चरकाध्वर्यव**स्ते । **तदुह**—तदनन्तरम् । **पृषदाज्यं** दधिमिश्रं घृतमभिधारयन्ति । पश्चात् पशुकायैकदेशलक्षणां वपां जुह्वति । कस्मात् ते व्युत्क्रमं कुर्वन्ति इत्याशङ्क्य प्राणाः पृषदाज्यमित्याद्यर्थवादोऽवतारयितव्यः ।

एतर्हीति । अस्मिन् काले ।

तस्माद्धेति । वेदवाक्यमेतत् । तत्र तस्माद्धेत्येतत् पूर्वोक्तकारणान्तरापेक्षया । पुरा ब्राह्मणा एतेन मन्त्रेण बहिः पवमानं बहिःप्रदेशं पवित्रयन्तं सोममस्तौषन् तुष्टुवुरित्यर्थः ।

तमेव मन्त्रमाह—**त्वत्त** इति । हे सोम त्वत्तः सर्वयज्ञयोनेरिमं यज्ञं प्रतनवामहे विस्तारयामः ।

अयमर्थः । अनेन मन्त्रेण सोमं स्तुत्वा पुरा ब्राह्मणाः स्वयमाच्छिदन्ति । आच्छिद्य चानयन्ति । तदिदमाच्छेदनपूर्वकमानयनं सोमस्य विक्रयवद् ब्राह्मणस्य प्रतिषिद्धमिदानीं नाचरन्ति ब्राह्मणाः । प्रभाववन्तो निषिद्धाचरणदोषैर्न लिप्यन्ते । संप्रति तु प्रायश्चित्तीयन्ते । तस्मात् नाचरन्ति ॥

टीयाम् ॥ **क्रमभेदस्याप्राप्तस्येति** । अग्रे पृषदाज्याभिधारणं पश्चात् वपाहोम इत्येवंरूपस्य ।

पुरुषविशेषधर्मतया विधायकमिति । हुत्वा वपामेवाग्रेऽभिधारयन्ति । अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिधारयन्ति । तस्मात् चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिधारयेयुः । पश्चाद् वपां जुहुयुरित्येवम् ।

मन्त्रसंबन्धस्येति । स्वयमाच्छेदनपूर्वकमानयनं सोमस्येत्यर्थः ।

इदानीन्तनपुरुषधर्मतया पुराकल्पवाक्यं विधायकमिति । त्वत्त इत्यादिना मन्त्रेण सोमं स्तुत्वा पुरा ब्राह्मणाः स्वयं छिन्नवन्तः । तदिदानीन्तना अपि ब्राह्मणाः स्वयं छिन्दुरित्येवम् ।

विधेः शेषभूतेन संबन्धादिति । कस्यचिद् विधेः शेषभूतं यत् स्तुति-निन्दावाक्यं तद्रूपत्वात् परकृतिपुराकल्पवाक्ययोरित्यर्थः ।

कस्यचिद् विधेः शेषभूतेन संबन्धादित्युक्तम् । तत्र यथा विधेः शेषभूतत्वमन-योर्युज्यते, तथा विविच्याह—**न तावदिति** ।

अश्रूयमाणो विधिः कल्प्यतामिति । चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽ-भिधारयेयुः । पश्चाद् वपां जुहुयुः । तथेदानीन्तना[731a]अपि ब्राह्मणाः त्वत्त इत्यादिना स्तुत्वा सोमं स्वयं छिन्दुरित्येवम् ।

तदेकवाक्यताकल्पनेति । कल्पितेन विधिवाक्येनैकवाक्यताकल्पना ।

उने ॥ **यद्येवमिति** । परकृतिपुराकल्पयोः स्तुतिनिन्दाभ्यां यद्यभेदः ।

टीयाम् ॥ **कालविशेषेति** । पूर्णमास्यमावास्ये कालविशेषः ।

दध्यादिगुणविधानार्थमिति । दध्यादेर्गुणस्याप्रधानस्य विधानार्थम् ।

एवमिति । ब्राह्मणस्य दीक्षा विहिता गृहपतेश्च तयोरानन्तर्यं विधातुमुभया-नुवादः ।

भाष्ये ॥ **अङ्ग पच्यतामित्यध्येषणार्थमिति** । अभ्यास इति संबन्धः । एव-मग्रेऽपि । पचतु पचतु भवानित्यभ्यासेन क्षिप्रं पच्यतामिति क्रियातिशय उच्यते, अङ्ग पच्यतामित्यध्येषणं वा, पच्यतामेवेत्यवधारणं वेत्यर्थः ।

टीयाम् ॥ नन्वर्थविभागवत्त्वं **बौद्धा**द्यागमेष्वप्यस्तीति न वेदप्रामाण्यनिश्चयहेतुरित्यत आह—**प्रामाण्यमिति** ।

टीयाम् ॥ ननु यथा **भाष्यकारे**णानुवादप्रयोजनमुक्तं तथा निर्बीज एवायं पूर्वपक्षः । अत आह—**भाष्योक्तमिति** ।

टीयाम् ॥ नन्वत्र क्रियाविशेषणीभूतस्य शीघ्रत्वस्यातिशयः प्रतीयते न क्रियायाः । तस्मादनुपपन्नमिदं **वार्त्तिकं** क्रियातिशयोऽभिधीयत [इति] । अत आह—**क्रिया-विशेषणेति** । अतिशयितविशेषणसंबन्धो हि विशेषस्यातिशयो भवत्येवेत्यर्थः ।

वाके ॥ **शीघ्रशब्दादिति** । शीघ्रशब्दं प्रयुज्येत्यर्थः ।

टीयाम् ॥ **पूर्वस्य प्रामाण्येति** । च शब्दः पूर्वहेत्वनुकर्षणार्थ इति ब्रुवाणो **वार्त्तिककारो**ऽर्थविभागवत्त्वं प्रामाण्यसंभावनायां हेतुर्न प्रामाण्ये इति दर्शयति । अन्यथा हेत्वन्तरसमुच्चयार्थश्चशब्द इति ब्रूयात् । न केवलं पूर्वो हेतुः, अयं चेत्यर्थः । न हि द्वयोः प्रामाण्यं प्रति स्वतन्त्रहेतुत्वे पूर्वस्येहानुकृष्यानयने प्रयोजनमस्ति । संभावनाहेतोश्चानुकर्षो युक्तः संभावितस्य साधनार्हत्वादिति भावः ।

भाष्ये ॥ **विषभूतेति** । विषभूताशनिप्रभृतिसंबन्धिप्रतिषेधप्रयोजनानाम् ।

टीयाम् ॥ त्रिविधविशेषणविशिष्टोऽपि करणपाटवं विना अनुपदिशन्नाप्तो भवति मूक इव । तत् कस्मादिदमुपेक्षितं **वार्त्तिककृते**त्यत आह—**उपलक्षणमिति** ।

उने ॥ **तदर्थमिति** । आगमैकगम्यादृष्टार्थम् ।

तदर्थेति । अदृष्टार्था ।

तत्प्रामाण्येति । अदृष्टार्थागमप्रामाण्यम् ।

अदृष्टत्वादेवेति । प्रत्यक्षादिमूलो ह्यागमः स्यात् । प्रत्यक्षादिमूलत्वं वास्य विषयप्रत्यक्षादिना । विषयश्चास्यादृष्टं न केनापि दृष्टम् । तस्मात् मूलस्य प्रत्यक्षादेरसंभवः ।

तत्संभवेऽपीति । मूलस्य प्रत्यक्षादेः संभवेनादृष्टार्थागमस्य तत्प्रामाण्यस्य वा संभवेऽपि आगमोक्तसृष्ट्यादावनाश्वासेन सर्गादिविषयस्यागमस्य तत्प्रामाण्यस्य वानाश्वा-

सादृष्टविषयस्याप्यागमस्य तत्प्रामाण्यस्य वानुपपत्तेः सर्वमिदमसमञ्जसमिति संबन्धः । एवमग्रेऽपि ।

परमेश्वरस्येति । ईश्वरे आद्रियमाणे तु सर्गादौ समाश्वासः स्यात् । परमीश्वरे प्रमाणाभावः ।

सद्भावेऽपीति । प्रमाणसद्भावेऽपीश्वरस्य वक्तृतायां प्रमाणाभावेन ।

सर्वमिदमिति । यथा मन्त्रायुर्वेदवाक्यानीत्यादि **वार्त्तिको**क्तम् ।

आह—**एतदत्रा**[732a]**कूतमितीति ।** अनन्तान्तर्गणिकेत्यादिनागमगम्यादृष्टसंभवप्रतिपादनपरम् । तच्च कस्यचित् प्रत्यक्षमित्यादिना च मूलस्य प्रत्यक्षस्य संभवप्रतिपादनद्वारा अदृष्टार्थागमस्य तत्प्रामाण्यस्य वा संभवदर्शकम् । तनुभूवनादीत्यादिना च सर्गादौ समाश्वासविषयस्येश्वरस्य प्रमाणसद्भावप्रतिपादकम् । सोऽयमित्यादिना चेश्वरस्य वक्तृत्वसंभवोपदर्शकम् । [क] तमोऽसावागम आप्तोक्त इत्यादिना च वेदा एव तेन प्रणीता इति नियमे प्रमाणसद्भावाविर्भावकमेतदत्राकूतमित्याद्याहेत्यर्थः ।

टीयाम् ॥ सत्त्वादेरिति । आदिपदात् सामान्यविशेषवत्त्वादिग्रहः ।

उपपादितमिति । शब्दलक्षणे ।

उने ॥ देवादय इति । देवर्षिमनुष्याः ।

निरतिशयेति । सर्वोत्कृष्टा ।

अतीन्द्रियार्थदर्शिन एवेति । एतेन तदातनैर्देवादिभिः सर्वज्ञत्वमीश्वरस्य साक्षात् ज्ञात्वा तद्वचने वेदे श्रद्धानात् प्रवृत्तिः कृतेत्युक्तम् ।

तद्विभूतय इति । तेषां देवादीनां विभूतयो निरतिशयधर्मज्ञानादिसंपदः ।

अनुमिततथाभावा इति । देवादिभिरनुमितस्तथाभाव ईश्वरस्य सर्वज्ञत्वम् । यकाभिः[?]कृत्वा तास्तथा न तु तदोत्पन्नैर्देवादिभिः संस्काराभावात् ।

स्मृत्यभावेन कथं सर्वज्ञत्वमनुमितमित्यत आह—**संस्कारस्येति ।**

टीयाम् ॥ ननु सर्वकर्तृकत्वं विनापि योगिनां सर्वज्ञत्वमभ्युपेयते इत्यत आह—**तदुपायेति ।** सर्वज्ञतोपायो ध्यानभेदः ।

निषेकेति । निषेको गर्भाधानम् ।

एतदिति । श्रुत्याद्युक्तम् ।

उने ॥ तदिति । कर्तृस्मरणम् ।

बाधितार्थत्वादिति । वेदानां पौरुषेयत्वे पुरुषदोषाशङ्कया अप्रवृत्तिप्रसङ्गेन बाधितत्वात् ।

अर्थवादमात्रमिति । स्तुतिवादमात्रं न पुनरर्थतः सत् ।

तदिति । पुराणादिषु कर्तृस्मरणम् ।

पौरुषेयत्वे इति । यावत्पौरुषेयत्वे किञ्चित् बाधकं नोक्तं स्यात् तावत् कर्तुरस्मरणेन किं कर्तुरभावे वेदेषु कर्तुरस्मरणम्, सद्भावे वेत्येवं सन्दिग्धासिद्धेन वेदानामपौरुषेयत्वं न साध्यं सन्दिग्धासिद्धत्वात् । अनेनैव **पौरुषेयत्व**स्यानिराकार्यत्वात् ।

ननु पौरुषेयत्वे किंचिद् बाधकं भविष्यतीत्यत आह—**न चेति ।**

अपि [ः] । पुनरर्थः ।

दोषाशङ्काप्रवृत्तिप्रसङ्गस्तु गुणाभावाशङ्कया अपौरुषेयत्वेऽपि समान इति ।

तदभावे इति । अनुभवाभावे ।

टीयाम् ॥ तत्रेति । बौद्धादिवाक्येषु ।

विगायतामिति । बौद्धादिवाक्यानि निन्दतां लौकिकानां कर्तृणाम् ।

तदर्थानुष्ठानमिति । बौद्धादिवाक्यानुष्ठानम् ।

अध्येत्रिति । यथा य एवाध्येत्रध्यापयित्रनुष्ठातृरूपा [ः] कर्तारः स्मृतेस्तथा वेदस्य, न तथा **बुद्धा**दिवाक्येषु ।

वैदिकेति । यानि हि वेदे उक्तानि शान्तिकपौष्टिकादीनि कर्माणि तेषामेव मन्त्रेष्वभ्यनुज्ञानात्, तथा यद् वेदे चान्द्रायणादि प्रायश्चित्तं विहितं तस्यैवायुर्वेदेषु रसायनादिपापक्रियारम्भेषु उपदेशात् ।

आयुर्वेदेनेति । मन्त्रवेदेनेत्यपि ज्ञेयम् ।

भाष्ये ॥ अस्येति । वेदस्य ।

उने ॥ सामान्यत इति । विवादाध्यासितानि वेदवाक्यानि प्रमाणानि वाक्यत्वात् कारीर्यादि[वाक्य]वत् ।

विशेषत इति । वेदवाक्यत्वादित्येवम् ।

टीयाम् ॥ तत्तदक्षरावापोद्धारभेदस्य चेति । मन्त्रसंबन्धिनोऽन्वयव्यतिरेकौ [732b] कर्मतापन्नाविति संबन्धः ।

उने ॥ इति स्यादिति । एवंविधोऽनादिप्रवादः स्यात् किं सर्वज्ञेनेत्यर्थः ।

द्वैतोपलम्भादिति । प्रामाण्याप्रामाण्ययोरुपलम्भात् ।

विशेषेति । अपौरुषेयत्वरूपो विशेषः ।

पौरुषेयत्वमपि नावहेदिति । आप्तोक्तलक्षणविशेषदर्शने ।

तन्निश्चयहेतोरिति । प्रामाण्यनिश्चयहेतोः ।

तदभाव इति । महाजनपरिग्रहाभावे ।

न कश्चित् प्रतीकार इति । प्रामाण्ये ।

भाष्ये ॥ शब्दस्य वाचकत्वादिति । शब्दस्य तावदर्थप्रतिपादकत्वं वाच्यवाचकभावसंबन्धात् न नित्यत्वात् । यदि हि नित्यत्वादर्थप्रतिपादकत्वं शब्दस्योच्येत तदानित्यत्वस्य सर्वार्थान् प्रत्यभिन्नत्वात् सर्वेण शब्देन सर्वार्थप्रतिपादने शब्दार्थव्यवस्था न स्यात् । तद्वद् वेदवाक्यानामपि यथार्थप्रतिपादकत्वं यदि नित्यत्वेनाभ्युपेयेत न वाच्यवाचकभावेन, तदा सर्वेण शब्देन सर्वयथास्थितार्थानां प्रतिपादनं प्रसज्येतेत्यर्थः ।

लौकिकेष्विति । शब्देषु ।

तेऽपीति । लौकिकाः शब्दाः ।

वाके ॥ परः प्राह—**नोदाहरणेति** । गृहीतसंबन्धत्वे सति परप्रतिपादकत्वं नित्यत्वाविनाभूतं धूमवत्त्ववदिति पराशयः ।

सिद्धान्त्याह—**क एवेति** । आख्यात एव गृहीतसंबन्ध एव प्रतिपादयतु । तथापि न नित्यत्वं गत्वादिजात्युपलक्षितवर्णत्रयस्य विशिष्टानुपूर्वीविशिष्टस्य संबन्धग्रहणोपपत्तेर्धूमव्यक्तिवदनित्यस्यापि गौरित्यादेः पदस्य प्रतिपादकत्वमुपपत्स्यते इति भावः ।

अमुमभिप्रायमविद्वानाह परः—**संबन्धस्येति ।**

सिद्धान्ती तु पूर्वोक्ताभिप्रायेणैवाह—**उक्तमेतदिति ।**

टीयाम् ॥ संसारानादित्वाल्लोकतोऽधिगम्यते इत्यसंबद्धम् । न हि कृतकसंबन्धवादिनां संसारानादित्वोपवर्णनं क्वचिदुपयुज्यते । लोकतो वृद्धव्यवहारादवगतेरिति विपरीतार्थत्वात् न युक्तम् । नित्यसंबन्धवादीनामेवैतद् युक्तं वक्तुमित्याशङ्क्य तात्पर्यं **टीकाकृदाह—यद्यपि वर्णेति ।** एतदुक्तं भवति, ईश्वरादन्येषामस्मदादीनां लोकतो वृद्धव्यवहारतो वर्णपदवाक्यानामनित्यत्वेऽपि सामान्यद्वारेण सङ्केताधिगतिरुपपन्नैवेति ।

[इति शब्दविशेषपरीक्षाप्रकरणं संपूर्णम्]

येनास्थापि ममाहृदोऽपि हृदये न्यायद्वितीयोद्धुरा-
ध्यायाद्याह्निकभाग् नवप्रकरणी वज्रावली प्रोज्ज्वला ।
निर्भिद्यान्तरतः स्वया धिषणया चित्रं कुशाग्रीयया
सत्सूत्राः सुधियोऽनुलक्ष्मितिलकोपाध्यायमेनं[1] श्रुवम् ।

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां द्वितीयाध्याये प्रथमाह्निकं संपूर्णम् ॥

---

1 S मेवं

॥ द्वितीयाध्याये द्वितीयाह्निकम् ॥

॥ प्रमाणचतुष्ट्वपरीक्षाप्रकरणम् ॥

[२.२.१–१२]

उने ॥ **प्रथमे** इति । आह्निके ।

प्रमाणप्रमेयेत्यादीति । प्रमाणप्रमेयेत्यादि**सूत्रे**[1] हि प्रामाण्यविशिष्टानि प्रमाणान्युद्दिष्टानि, तथारूपाणामेव धर्मित्वस्य विवक्षितत्वात् ।

एतदेव विशदयति—**यद्यपि हीति** ।

एकत्रेति । प्रथमाह्निके ।

सोऽङ्क इति । चतुष्ट्वाक्षेपसमाधानरूपं प्रकरणम् ।

लक्षणस्यैव व्याघातं स्पष्टयति—न हि परस्परेति ।

परस्परेति । परस्परानुप्रवेशोपदर्शनरूपेण पूर्वपक्षेण ।

तत्रेति । प्रथमाह्निके ।

आश्रयासिद्धत्वमिति । प्रत्यक्षादेर्लक्ष्यस्याभावेन ।

ननु यावदपि वृक्षादिलिङ्गभूतमुपलभ्यते तावतापि प्रत्यक्षस्य सत्त्वात् कथमाश्रया-सिद्धत्वं प्रत्यक्षलक्षणस्येत्याशङ्क्याह–[733a] **अतिव्यापकत्वं चेति** । भवतु यावदु-पलभ्यते तावत् प्रत्यक्षं परमनेन योऽनुमीयते वृक्षादिस्तत्रानुमानेऽपि प्रत्यक्षलक्षणस्य गतत्वा-दतिव्यापकत्वमिति भावः ।

आधिक्ये त्विति । यदि प्रमाणानामाधिक्यं भवेत् तदा न काचिल्लक्षणक्षतिः, यदि परं यो विभागोद्देश**सूत्रे**णाधिकसंख्याव्यवच्छेदः स एवासङ्गतः स्यादिति भावः ।

आक्षेपः सूत्रार्थ इति । यः **सूत्र**स्यार्थ आक्षेपो व्याख्यातः स न घटते इति **सूत्र**स्यार्थसंशयं व्याख्यातीत्यर्थः ।

---

1 I. i. i.

टीयाम् ॥ **अयथार्थः प्रमाणेति** । अयथार्थः प्रमाणोद्देश इत्यर्थपरतया प्रथमं न चतुष्ट्वमित्यादिसूत्रं व्याख्यातम् ।

उने ॥ **तस्येति** । विभागोद्देशस्य ।

टीयाम् ॥ **उक्तमिति** । विधिन्यूनतेत्यादि ।

वाके ॥ **विधिहीनमिति** । विद्यमानस्य विधिना प्रतिपादनेन हीनमित्यर्थः ।

दोषहीनमिति । दोषाभिधानहीनम् ।

उने ॥ **न हि प्रतिज्ञेति** । विभागोद्देशसूत्रेण हि चत्वार्येव प्रमाणानाति प्रतिज्ञामात्रं प्रतिपाद्यते । तेन च न किञ्चित् सिध्यति ।

टीयाम् ॥ **उपपादनीयमिति** । **सूत्रकारेण** ।

उने ॥ **नाक्षेपेति** । वार्त्तिके । सिद्धत्वादनारम्भ इत्यादि आक्षेपस्य यो भावार्थः, तदनुरूपो नावधारणेत्यादिः । परिहारो न भवतीत्यर्थः ।

टीयाम् ॥ **यत्तु सूचितमपि तिरोहितमिवेति** । अनेन यद्यपि विभागोद्देश-सूत्रेणावधारणप्रयोजनं सूचितं तथापि तिरोहितप्रायम् । अतोऽनेन प्रकरणेन **सूत्रकारेणो-**द्भाव्यते इत्युक्तम् ॥

उने ॥ **तत्कार्यत्वादिति** । अपरोक्षार्थकार्यत्वात् ।

अन्योन्यस्मादिति । भिन्नो भिन्नादवगन्तव्यः । कुतः ? संबन्धात् ।

अन्यथेति । संबन्धमन्तरेण ।

तच्चेति । अन्यत् ।

लक्षणं [1]चेति । लिङ्गम् ।

उपलक्षणं वेति । साधर्म्यं वैधर्म्यं वा ।

सामायिकं [2]चेति । साङ्केतिकं शब्दरूपम् ।

---

1 J वेति   2 J वेति

नियतमिति । स्वसाध्याव्यभिचारि ॥

प्रामाण्येति । प्रामाण्यावधारणे उपायो यस्यास्ति तत् शक्यप्रामाण्यावधारणं चेत्यर्थः ।

टीयाम् ॥ ननु यथा साक्षात्प्रतीतिप्रयोजनं प्रत्यक्षम्, व्यापकत्वोपहितवस्तुप्रतीतिप्रयोजनमनुमानम्, अन्वितत्वोपहितज्ञानप्रयोजनं शास्त्रम् संज्ञितत्वोपहितावभासप्रयोजनमुपमानमित्येवं प्रयोजनसामान्यविशेषैः परस्परतो व्यावृत्तैः प्रत्यक्षादीनि भिद्यन्ते, नान्तर्गणिकभेदैः । तथैतिह्यादीनि परस्परव्यावृत्तप्रयोजनसामान्यविशेषैर्भेत्स्यन्ति । न चातिप्रसङ्गो भविष्यतीत्यत आह—**न तावदिति** ।

उने ॥ **विषयत्वाव्यतिरेकेणेति** । विषयत्वैक्येन ।

विवक्षितविपरीतापत्तिरिति । विषयभेदेन विवक्षितेभ्यः पञ्चभ्य इन्द्रियेभ्यो विपरीतस्यैकस्यैवेन्द्रियस्य प्राप्तिः ।

टीयाम् ॥ **विषयसामान्यमिति** । विषयस्य सामान्यविशेषः ।

निरुपधानस्वरूपमेकमिति । यथा रूपत्वमेकं विषयस्य सामान्यविशेषः, एकं च रूपज्ञानमित्येवमाकारं प्रयोजनमित्यतो न चक्षुरिन्द्रियान्तरं नीलादिप्रतीत्यर्थमभ्युपगम्यते, तथा चत्वारो विषयसामान्यविशेषाः प्रयोजनसामान्यविशेषाश्चतुर्भिरेव प्रमाणैर्व्याप्ता इति न प्रमाणान्तरमभ्युपेयमित्यर्थः ।

वाके ॥ **द्वयोरिति** । असत्सु च मेघेषु वृष्ट्योः ।

टीयाम् ॥ भुञ्जानोऽपीत्यादि **वार्त्तिकस्य** व्याख्या—**व्यापृतः कदाचिदिति** ।

क्रियान्तरनिवृत्तेरसंभवेन निराकृतत्वादिति **वार्त्तिकं** पूरयित्वा व्याख्याति—**क्रियान्तरेति** ।

[733b] **वाके** ॥ **तच्च वर्णितमिति** । **भाष्यकारेण** ।

टीयाम् ॥ कथमनुमानं संबन्धग्रहणाभावात् । तथा हि बहिर्भावगृहाभावौ न केनचित् प्रत्यक्षेण प्रतीयेते । नित्यं गृहाभावेनैव बहिर्भावस्येन्द्रियाविषयस्य प्रत्येतव्यात् यदि त्वर्था-

पत्त्यैव बहिर्भावमवगम्य परतो गृहाभावेन सममविनाभावं प्रतिपद्य पश्चादनुमानमवतार्यते, तदा न नः किञ्चित् क्षतमर्थापत्तेः सिद्धत्वात् ।

गृहद्वारि स्थितेन गृहाभावबहिर्भावौ संबद्धौ गम्येते इति चेत् ? किं कर्तव्यम् एकत्र भावेनान्यदेशाभावप्रतिपत्तौ ? न च गत्वा गत्वा तत्तद्देशाभावं प्रतिपद्यैकत्र भावेन समं संबन्धग्रहणमिति सांप्रतम् , मनुष्यधर्मणः सर्वदेशान् गन्तुमशक्तेः । त्यक्ते देशे सद्भावाशङ्कायां नास्त्येवैकत्र सद्भावस्यान्यत्राभावेनाविनाभावज्ञानम् । तस्मान्नियतदेशोपलभ्यमानपरिमितपरिमाणपुरुषशरीरान्यथानुपपत्त्यैव तदितरसकलदेशे नास्तित्वावधारणमित्यर्थापत्तिसिद्धिरित्याशङ्क्य गृहभावबहिर्भावयोरेकत्र सद्भावान्यत्राभावयोश्च संबन्धग्रहणं दर्शयति—**यदा खल्विति ।**

उने ॥ यदा चाव्यापक एकत्रास्ति तदान्यत्र नास्तीत्यत्र यद्यव्यापको न सर्वत्रभावीत्यर्थः स्यात्, तदा [1]साध्यविशिष्ट एव हेतुः स्यात् तदा अन्यत्र नास्तीत्येतदेव ह्यत्र साध्यम् । इत्थं व्याख्याने चाव्यापकशब्दस्यायमेवार्थः स्यादित्यभिप्रेत्य अव्यापको मूर्त इत्यर्थ इत्युक्तम् ।

टीयाम् ॥ सोऽयं स्वशरीर एव व्याप्तिग्रहः सुकर इति । एकत्रस्थितशरीरो हि पुरुषो देशान्तरेष्वहंप्रत्ययसुखदुःखकार्यानुदये कारणस्य शरीरस्याभावं प्रतिपद्य शक्नोति स्वशरीरे एकत्र सद्भावान्यत्राभावयोः संबन्धं ग्रहीतुमित्यर्थः ।

तस्येति । अव्यापकस्य ।

समानविषयत्वाभावादिति । असत्त्वं हि गृहे, सत्त्वं च यत्र क्वचन ।

प्रमाणविनिश्चितस्येति । गृहेऽसत्त्वस्य ।

सांशयिकेनेति । पाक्षिकत्वात् सांशयिकेन गृहे सत्त्वेन ।

सांशयिकत्वं वा नेतुमिति । सत्त्वमेव विरुद्धयोः प्रमाणयोरिति यो जीवति स क्वचिदस्तीति गृहेऽपि सत्त्वोपस्थापकस्यानुमानस्य गृहेऽभावोपस्थापकस्य प्रत्यक्षस्य च ।

अवच्छिन्नेति । अवच्छिन्नं नियतं गृहेऽसत्त्वं प्रत्यक्षस्य विषयोऽनवच्छिन्नं चानियतं सत्त्वमनुमानस्य विषयः । अतो न विरोधः ।

---

1 J °वशिष्ट

टीयाम् । **तस्येति** । अभावस्य ।

यथोक्तमिति । यथाश्रुतम् ।

अग्रे वक्ष्यते इति । अनन्तर**सूत्रे** प्रतिपद्य चानयतीत्यनेन । वर्षाभावप्रत्ययस्तु वाय्वभ्रसंयोगेऽनुमानमुक्तमिति । तस्मादेनमप्याश्रित्य नाभावः प्रमाणमिति परेण न वाच्यमिति भावः ।

उने ॥ **शङ्कैवेति** । सूत्रस्था ।

व्याघातादिति । असत्यर्थित्वेनाभाव इति वदतो हि परस्य सत्यर्थेऽभाव इत्यभिप्रेतम्, न चार्थे सत्यभावोऽतो व्याघातः ।

कथमिति । प्रत्यक्ष इति योगः ।

तत्प्रतियोगीति । प्रागभावप्रतियोगी ।

ननु मा भूद् दधिविशेषस्य प्रतियोगिनः प्रत्ययो दधिसामान्यस्य त्वस्त्येवेत्यत आह— **न चेति** ।

तयोरिति । वर्तमानप्रध्वस्तयोः ।

तथात्वेऽपि । प्रतियोगित्वेऽपि ।

तत्काले इति । वर्तमानप्रध्वस्तयोः काले ।

चरमसामग्रीति । यतोऽनन्तरं कार्यस्योत्पत्तिः सा चरमसामग्री तस्यां योऽन्तर्निवेशस्तेनाव्यभिचारिणा कार्यं प्रति ।

इयं गतिरिति । [734a] प्रागभावस्य प्रत्यक्षानुभवलक्षणा । क्षीरावयविन एकत्वादनारम्भकत्वमित्यत आह— **क्षीरे** इति ।

टीयाम् ॥ **सूत्रमिति** । अन्यलक्षणोपपत्तेरित्ययं [1]**सूत्रांशः** ।

त्वं त्वभावोपलब्धिं ब्रूषे इति । इतराणि लक्षणाभाव विशिष्टानि प्रतिपद्यते इत्यनेन ।

ननु नैवमलक्षितेषु लक्षणानामुपपत्तिं पश्यतीत्यनेन हि **भाष्यकारो**ऽलक्षितेषु

---

1 I. ii. 9

लक्षणादर्शनमुक्तवान्, न तु **वार्त्तिककृदिव** व्यतिरेकोपयुक्तामलक्षितेषु लक्षणाभावोपलब्धिम्। तत् कथमिदं **भाष्यं वार्त्तिके**न संवदति यत उच्यते—**अतएवाहेत्याशङ्क्याह-लक्षणादर्शनेनेति**।

एतच्चोपलक्षणं सोऽयमित्यादि वदता **भाष्यकृता** स्वयमेव दर्शितम्।

उने ॥ अधिकरणमिति। क्षीरादि।

भविष्यदाधेयस्येति। दध्यादेः।

तदाश्रये एवेति। भविष्यदाधेयस्याश्रये एव।

तदिति। अधिकरणम्।

अनुमितेति। पिपीलिकाण्डसंचारादिनानुमितो यः प्रतियोगी भविष्यद्वृष्ट्यादिः तस्य कालात्।

शास्त्रार्थ इति। अन्यत्र स्थितभावज्ञानेन वेत्यस्य शास्त्रस्यार्थः।

भवन्तीति। भवन्ति लक्षणानि एकस्मिन्नेव काले एकस्मिन्नेव देशे एकस्मिन्नेव लक्षणत्वप्रकारे अभावविरोधीनि, न तु भिन्ने काले देशे प्रकारभेदे चेति वस्तुस्थितिः।

॥ [इति प्रमाणचतुष्ट्वपरीक्षाप्रकरणं संपूर्णम्] ॥

॥ शब्दनित्यत्वपरीक्षाप्रकरणम् ॥

[२.२.१३–३९]

टीयाम् ॥ ननु तदेवं विभागोद्देशः परीक्षितः संप्रति शब्दपरीक्षावशेषं वर्तयिष्यन्नाहेति किं केन संगतमित्यत आह—**शब्दपरीक्षां प्रस्तुत्येति** । प्रथमाह्निकप्रान्ते शब्द-परीक्षायाः प्रस्तुतत्वाद् विभागोद्देशे परीक्षिते तदवशेषवर्तना संगतेति भावः ।

वाके ॥ **सामान्येन विचार** इति । वर्णावर्णात्मकं लौकिकवैदिकात्मकं वा द्विविधमपि शब्दमधिकृत्वेत्यर्थः ।

विमर्षहेत्वनुयोगे चेति । संशयहेतुकप्रश्ने च ।

उने । अत आह—**जरन्मीमांसकानामितीति** । इदं हि प्रकरणमाप्तोक्तत्वसिद्ध्या वेदप्रामाण्यसिद्ध्यर्थम् । आप्तोक्तत्वं च तदा भवति यदि शब्दस्यानित्यत्वं सिध्यत्यतः शब्दानित्यत्वसिद्ध्यर्थमिदं प्रकरणम् । परीक्षायां सत्यां शब्दानित्यत्वं सिध्यति । शब्दा-नित्यत्वपरीक्षायाश्च शब्दनित्यत्वविषयः संशय उपयोगी, न तु शब्दद्रव्यत्वाद्रव्यत्वविषय इत्यतः **कौमारिला**नां मतं नोत्थापितमिति **टीकाकृतो**ऽभिप्राय इति भावः ।

तद्दोषेति । पुरुषदोषः ।

तदर्थोपलम्भेति । वेदवाक्यार्थसाक्षात्कारः ।

अनेवंमूलानामिति । अर्थोपलम्भादिगुणामूलानाम् ।

अलौकिकत्वेन तदतिक्रमे इति । यदि तु वेदानामलौकिकत्वेनार्थो-पलम्भादिगुणातिक्रमोऽभ्युपेयते तदा ।

तथा चेति । आकाशगुणत्वे सिद्धे च ।

इन्द्रियनियम इति । श्रोत्रेणैव ग्राह्य इति ।

एतस्येति । प्रकरणस्य ।

आकाशस्योत्तर इति । गन्धरसरूपस्पर्शशब्देषूत्तरः शब्द आकाशस्य गुणः ।

तदर्था इति । चक्षुरादीन्द्रियविषयाः ।

टीयाम् ॥ संयोगादीति । परमाण्वोः ।

उने ॥ शब्दाधारत्वप्रतिषेधादिति । शब्दो न पृथिव्यादीनां चतुर्णां गुणः प्रत्यक्षत्वे सत्यधिकरणगुणाहेतुकत्वादयावद्द्रव्य[734b]भावित्वादित्यादिना ।

व्याचष्टे इति । **मीमांसका**भिप्रायेण ।

टीयाम् ॥ नादस्तु साक्षादिति । एतेनात्र नादस्यार्थो वायुर्दर्शितः ।

उने ॥ अतिप्रसङ्ग इति । अप्राप्तत्वाविशेषाद्दूरदेशस्थादिशब्दानामप्युपलब्धिप्रसङ्गः ।

टीयाम् ॥ विकुर्वन्निति । स्वग्रहणरूपतया परिणमयन् ।

उद्भावयतीति । परः ।

नात्र षष्ठ्येत्यादिसमाधान**वार्त्तिकं** व्याचष्टे—**असंबन्धेऽपीति ।**

भावाधीनेति । भावग्रहणेनात्र प्रत्ययमुपलक्षयति । असतो भावस्य निरूपकत्वानुपपत्तेर्यथा संबन्धः संबन्धिनिरूपणाधीननिरूपणस्तथा अभावो भावनिरूपणाधीननिरूपण इत्यर्थः ।

अनित्यमित्युच्यते तस्य भावोऽनित्यतेति **वार्त्तिकं** पूरयित्वा व्याचष्टे—**अपि चेति ।**

वाके ॥ त्यपोऽपीति । नेर्ध्रुवेऽर्थे विहितस्य त्यप्प्रत्ययस्यापि ।

अन्येन योगादन्यनिमित्त इति । विनाशहेतुना योगाद् विनाशयोगनिमित्तः ।

न चासति संबन्धे प्रयोगो भवितुमर्हतीति । तस्माद् विनाशहेतुसंबन्धाद् विनाशवच्छरीरमिति प्रयोगो युक्त इति पराशयः ।

अध्रुवशब्दं विनाश्यर्थं मन्यमान आह—**अध्रुवा एते** इति ।

टीयाम् ॥ **तिरोभावश्चेति** । पटादिना हि यस्य घटादेस्तिरोभावो नासावुपलब्धि-लक्षणप्राप्तः । अतोऽनेन पदेन तस्य तिरोभावो नित्यस्य वाच्यत्वेन व्यवच्छिन्न इत्यर्थः ।

उने ॥ **बीजेति** । बीजं मिथ्यावासना ।

निरधिकार इति । अयोग्ये ।

लक्षणपरिणाम इति । धर्मलक्षणावस्थापरिणामभेदात् त्रिधा परिणामः । तथा हि सुवर्णं धर्मि तस्य धर्मपरिणामो वर्धमानरुचकादिः । धर्मस्य तु लक्षणपरिणामः अनागतत्वादिः । यदा वर्धमानभङ्गे रुचकाद्युत्पद्यते, तदा वर्धमानस्य वर्तमानतानिवृत्तौ अतीत-लक्षणता आपद्यते । रुचकादेस्त्वनागतलक्षणनिवृत्तौ वर्तमानता आपद्यते । वर्तमानतापन्नस्य तु रुचकादेर्नवपुराणादिरवस्थापरिणाम इति त्रिविधः परिणामः **स्वायंभुवा**नाम् । तेषां तु तादात्म्यवादिभ्यः **सांख्येभ्यो** धर्मिणः सकाशाद् धर्माणां भेदाभेदवादित्वेनैव भेदः ।

टीयाम् ॥ **प्रधानविकारत्वादिति** । पुनरुद्भवाभावात् तिरोभूतं मोपलभ्यतां परं यस्य कस्यचित् प्राधानिकस्योपलब्धौ तदभिन्नं प्रधानमुपलभ्यमेव । तदुपलब्धौ च तदभिन्नाः सर्वे विकारा उपलब्धा भवन्तीत्यर्थः ।

तथा चेति । तिरोभावो नाम विशेषान्तरेण परिणामः । स च विशेषोत्पत्तौ स्यात् । यदा चासतो जन्म नास्ति तदानुपजातविशेषं वस्तु । तस्य च तिरोभावो न युक्तः ।

उने ॥ **आगमबाध** इति । **पाणिनिस्मृत्या** बाधः ।

तत्रेति । विरुद्धजात्यन्तरव्यवच्छेदे ॥

टीयाम् ॥ विवादाध्यासिता षष्ठी भेदनिबन्धना अबाधितषष्ठीत्वात् राज्ञः पुरुषवदित्यनुमानं यावकादिषु न संभवतीति । अत आह—**स्वतलभिप्रायमिति** ।

अनुमानमिति । **उदयनो**क्तम् ।

उक्तमिति । अनुग्राहकतर्कभणनेन ।

ननु भावकालेऽभावद्वयस्यासत्त्वादविशेषणत्वमिवोपलक्षणत्वमप्यनुपपन्नमसंबद्धत्वा-दित्यत आह—**तच्च भिन्नेति** । साक्षादसंबद्धमपि बुद्धिस्थतामात्रेण दृष्टमुपलक्षणमित्यर्थः ।

[735a] **उने कार्यत्वमिति** हेतुः ।

साध्यैकदेश इति । साध्यस्य पूर्वान्तापरान्तावच्छिन्नसत्तालक्षणानित्यत्वस्यैक देशः ।

टीयाम् । **उत्पत्तिरिति** । कार्यत्वम् ।

उने ॥ **ननु यदीति** । ननु यदि तन्त्वादिषु पटादिलक्षणकार्यसमवायः कारणत्वं तर्हि तन्तुगतरूपादिवेमादीनां तन्न स्यात् कार्यासमवायादित्यर्थः ।

टीयाम् ॥ **समस्तकारणेति** । तन्तवोऽपि पटसमवायात् पूर्वं न कारणमित्यकारणैरेव तन्तुभिः कार्यं कृतं स्यादिति यदाहुः **एके** तदनेन व्यापकलक्षणकथनेन प्रत्युक्तम् । कार्योत्पादात् पूर्वमेव स्वरूपशक्तिशालितया कारणत्वावधारणादिति भावः ।

वाके ॥ **एतदिति** । कारणम् ।

टीयाम् ॥ ननु कार्यात्मलाभहेतुः समवाय इत्यसंबद्धम् । न हि समवायः कार्यात्मलाभहेतुः, समवायस्यैव कार्यात्मलाभरूपत्वात् । अत आह—**कार्यस्येति** ।

वाके ॥ का पुनरियमिति प्रश्न**भाष्य**स्य व्याख्या—**किं पुनरिदमिति** ।

उत्पत्तिधर्मकत्वादिति उत्तर**भाष्य**स्य व्याख्या—**निमित्तेति** ।

टीयाम् ॥ **गम्यगमकयोरिति** । निमित्तकारणभेदानुविधायिशब्दभेददर्शनात् शब्दानामुत्पत्तिधर्मकत्वमवसीयते इति गम्यगमकत्वमनयोः ।

अत एवोत्पत्तिधर्मकत्वे साध्ये निमित्तकारणभेदानुविधायित्वस्य विपक्षाद् व्यावृत्तिं दर्शयति **वार्त्तिककारः—तदभिव्यङ्ग्येष्विति** ।

ननु भेददर्शनमुत्पत्तिपक्षे एव घटते न व्यक्तिपक्षे न ह्यभिव्यज्यमानं घटादि प्रदीप-भेदेन भिद्यते । अतो विशेषोपलब्धावयुक्तः संशयः । अत आह—**यथा हीति** ।

उने ॥ **विशेषेणेति** । कर्णशष्कुली ।

विशिष्टस्येति । कर्णशष्कुल्यवच्छिन्नस्य नभसः ।

वाके ॥ **क्रियाकारणं च गुण** इति । ज्ञानेच्छादिः ।

टीयाम् ॥ प्रतिबद्धं गुरुत्वं न स्वकार्यमारभते । अप्रतिबद्धं तु करोति । तेनाप्रतिबद्धगुरुत्वान्वयव्यतिरेकानुविधायि कार्यं नाप्रतिबद्धगुरुत्वप्रयुक्तान्वयव्यतिरेकोपजीवितसंनिहितप्रोषितं प्रतिबन्धकाभावमपि कारणतया स्वीकरोति । तदुक्तम्—**तदन्वयस्येति** । प्रतिबन्धापगमान्वयस्य ।

उने ॥ सहकारिशक्तिविनाशो हि गुरुत्वादेः प्रतिबन्धः । प्रतिबन्धकानां च कारणविरोधित्वं प्रतिबन्धकत्वं तदुभयमप्यभावस्य पतनं प्रत्यकारणत्वेन स्यात् । न च गुरुत्वस्य पतनं प्रत्यन्वयव्यतिरेककृतो विशेषो दृश्यते । वैपरीत्यस्यापि सुवचत्वादिति हृदि निधायाह—**ननु प्रतिबन्धस्येति** ।

नन्विति । न चाभावसाध्यं पतनादन्यत् किञ्चिदस्ति ।

विषयो ह्यत्र योग्यो न योग्यतेत्यत आह—**विषय** इति ॥

वाके ॥ **आश्रयाप्रतिबन्धमिति** । कुड्यादिना ।

अन्यथेति । व्यङ्ग्यत्वे ।

उने ॥ **तद्धर्मैरिति** । व्यञ्जकधर्मैः ।

टीयाम् ॥ **शब्दसंस्कारपक्षमिति** । व्यञ्जकैः शब्दस्य संस्काराः क्रियन्ते इति पक्षम् ॥

उने ॥ ननु भवतु शब्दस्याश्रय आकाशं सर्वगतम् । परं शब्दे व्यञ्जकैः कृताः संस्कारा असर्वगताः । अतो न सर्वत्र सर्वेषामुपलम्भो भविष्यतीत्याशङ्क्याह—**न हीति** ।

कृतकधर्मसमवायासंभवादिति । गुणेषु हि अकृतकधर्माणामेव सामान्यादीनां समवाय उभयसंमतः ।

ननु शब्दो द्रव्यमभ्युप[735b]गम्यते **कौमारिलैः** । ततः कृतकधर्मसमवायो भविष्यतीत्याशङ्क्याह—**द्रव्यत्वेऽपीति** ।

तत्कल्पनेति । शब्दकल्पना ।

तेषामिति । संस्काराणाम् ।

तदर्थमिति । आश्रयार्थम् ।

तदतिरिक्तवस्तुकल्पनेति । संस्कारातिरिक्तशब्दलक्षणवस्तुकल्पना ।

तस्येति । शब्दस्य ।

वाके ॥ **एतेनेति** । सर्वैः सर्वत्र श्रवणप्रसङ्गदोषेणेत्यर्थः ।

टीयाम् ॥ **दोषान्तरमाहेति** । संस्कारस्याव्याप्यवृत्तित्वमभ्युपेत्येदं दोषान्तरभणनम् । अन्यथा संस्कारव्याप्यवृत्तित्वस्याघटमानत्वेनोक्तत्वात् ।

वाके ॥ **कोलाहलं च स्यादिति** । संस्कारस्याव्याप्यवृत्तित्वादेकेनोपलब्धौ सर्वेषां तदुपलम्भो मा भूत् । एकशब्दोपलब्धौ तु तत्समानदेशानां सर्वेषामुपलम्भः स्यादिति ।

टीयाम् ॥ **ध्वनिरिति** । वायुः ॥

उने ॥ **भवेदेवमिति** । नियतेन व्यक्तिलक्षणेन कार्येण व्यञ्जकानां नियमसिद्धिर्न भवेत् ।

स इति । व्यक्तिनिश्चयः ।

टीयाम् ॥ **श्रोत्रसंस्कारेऽपीति** । यः पूर्वं श्रोत्रेन्द्रियं विकुर्वन्नित्यनेन सूचितः **सांख्यीय**मते श्रोत्रसंस्कारः, तत्रापि ।

प्रादेशिको वेति । अव्यापको वा ।

उभयथापि दोष इति शङ्कोत्तराभ्यामादर्शयतीति । अव्यापकत्वपक्षे निमित्तसन्निधाने चेत्यादिना दर्शयति । व्यापकत्वपक्षे तु सर्वत्र सन्तीति चेत्यादिना ।

वाके ॥ **भूतेति** । दण्डादिसन्निधाने ।

उने ॥ **तत्र चेति** । व्यक्तौ ।

सन्देह इति । [1]उत्पत्तेरपि संभाव्यमानत्वात् ।

तत्रेति। वायुसन्तानगत्या विप्रकृष्टस्य कर्णशष्कुलीमति नभसि शब्दस्य व्यक्तौ ।

टीयाम् ॥ संयोगविभागा इति । आकाशे ।

व्यञ्जका इति । आकाशसमवेतस्य शब्दस्य ।

वाके ॥ एतेनेति । वायुगुणनादानां व्यञ्जकत्वनिराकरणेन ।

टीयाम् ॥ तदानुगुण्यायेति । प्रत्यभिज्ञानुगुण्याय ।

सोऽयमिति । प्रसङ्गः ॥

उने । नोपचारमात्रेणेति । ननूपचारः प्रयोगः । स च यथा कृतके कम्बले कम्बल प्रदेश इति भवति, तथा अकृतकेऽप्याकाशादावाकाशप्रदेश आत्मप्रदेश इति स्यात् । अतः कथं कृतकतुल्यशब्दाभिलापमात्रेण व्यभिचारिणा प्रत्यभिज्ञासिद्धैकत्वविरुद्धं नानात्वं सिध्यतीति भावः ।

टीयाम् ॥ अत्र चोपचारेणेति । प्रत्यक्षमेव शब्दस्य तीव्रमन्दादिभेदग्राहकमेवमुपन्यस्तमिति भावः ।

रूपत इति । स्वरूपतः ।

उने ॥ भेदो विशेष इति । बालादि ।

टीयाम् ॥ शब्दरूपेति । रूपं स्वरूपम् ।

भेदस्येति । तीव्रतामन्दतादेः ।

मुखस्येवेति । यथा मणिकृपाणदर्पणगतमुखसंबन्धिनो भेदस्य औपाधिकत्वे प्रमाणमस्ति । तदेवाह—**नो खल्विति ।**

पर एवाचार्यमाशङ्कते—**कथमिति ।**

---

1 J उत्पत्तेतिरपि

प्रख्येति । ज्ञानम् ।

गकारसमवायिन इति । विरुद्धधर्मसंसर्गस्य ।

उने ॥ **एवमपीति** । बाधकाभावेऽपि ।

तथा चेति । सर्वत्र स्वाभाविकत्वोच्छेदे प्रसक्ते उपाधावपि स्वाभाविकत्वोच्छेदं-प्रसङ्गः । यद् वा उपाधावप्यौपाधिकत्वमुपाधावप्यौपाधिकत्वमित्यनवस्था ।

असत्त्वेऽपीति । अथोपाधावुपाधेरसत्त्वमभ्युपेयते तदा तीव्रत्वादिभेदानां यदौपाधिकत्वं तस्याप्यभावः ।

एवमस्वीकारे वेति । प्रत्यभिज्ञानस्य सामान्यालम्बनत्वानभ्युपगमे [73ᶜa] अयं गौरित्यादिरूपस्य सामान्यग्राहकस्य प्रत्यभिज्ञाप्रकारस्य प्रमाणस्याभावात् सर्वत्र सामान्योच्छेदप्रसङ्गः ।

तदप्रतीताविति । कादिव्यक्त्यप्रतीतौ ।

स्वयोग्यतामात्रेणेति । स्वस्य ग्रहणयोग्यतामात्रेण ।

तदेति । परमाण्वादेश्चक्षुरादिना सन्निकर्षकाले ।

तदिति । सत्ताद्रव्यत्वादिकम् ।

तथा सतीति । अयोग्यत्वे सति ।

तदिति । सामान्यम् ।

नोक्तदोष इति । परमाण्वादौ सत्ताद्रव्यत्वादिकस्य प्रतीतिप्रसङ्गलक्षणः, परमाण्वादेर्व्यक्तेरयोग्यत्वात् ।

प्रतीयेतेति । स्फटिकस्य सलिलस्य च व्यक्तेर्योग्यत्वात् ।

सामग्र्यभावादिति । जवाकुसुमसन्निधानाभिभूतत्वेन स्फटिकधावल्य-सामान्यस्य विषयरूपसामग्र्यभावात् ।

न तत् तथा न धावल्यसामान्यं प्रतीयते । प्रकृते तु शब्दस्य सामान्ये सा विषयादिसामग्र्यन्त्यतस्तत् प्रतीयते । एतेन सामान्यप्रतीतौ सामग्र्येव कारणं न व्यक्तिप्रती-तिरिति पराभिप्रायः ।

न यदेति । सामग्र्यपि हि अन्वयव्यतिरेकानुविधानात् सामान्यप्रतीतेः कारणत्वेन वाच्या, अन्यथा अतिप्रसङ्गात् । यदा चोक्तनीत्यान्वयव्यतिरेकानुविधाने सत्यपि व्यक्तिप्रतीतिर्जातिप्रतीतेर्न कारणं तदा सामग्री कारणं भविष्यतीति केयमाशेत्यर्थः ॥

कथं तर्हीति । यदि व्यक्तिप्रतीत्यधीना जातिप्रतीतिः, तदा कथं सामान्यमात्रं गोत्वादि गवादिपदानामर्थः ।

अत एवेति । जातेर्व्यक्तिप्रतीत्यधीननिरूपणत्वादेव ।

यथा च सामान्यमात्रं न कथञ्चित् पदार्थः, तथा व्यक्त्याकृतिजातयस्तु पदार्थः[1] इत्यत्र वक्ष्यतीत्याह—**तथा च वक्ष्यतीति** ।

अन्यत्रेति । शब्दादिना प्रतीतौ भवतु वा सामान्यमात्रं पदस्यार्थः । परं प्रत्यक्षप्रतीतौ व्यक्तिप्रतीत्यधीनैव जातिप्रतीतिरित्यर्थः ।

तस्मात् कत्वादीनामिति । यस्मात् प्रत्यक्षे तावत् व्यक्तिप्रतीत्यधीनैव जातिप्रतीतिरिति व्युत्पादितम्, तद् यदि हट्टकोलाहले कादिव्यक्तीनामेवान्योन्यमभिभवः स्यात् तदा कादिव्यक्तीनामप्रतीतेः शब्दत्वसामान्यस्याप्रतीतौ न किञ्चित् प्रतीयेत । तस्मात् कत्वादीनामवान्तरसामान्यानामन्योन्याभिभवादप्रतीतिस्तस्यां तु सत्यामित्यर्थः ।

अनभिभूतेति । अनभिभूतं यन्महासामान्यं सत्त्वशब्दत्वादि । तेनालिङ्गिताः ।

तेनेति । अवर्णात्मकशब्देन ।

तस्येति । अवर्णात्मकशब्दस्य ।

नादेनेति । वायुना ।

ध्वानमात्रमिति । न तु विभक्ता वर्णाः ।

नोक्तदोष इति । विदूरवर्तिनः कोलाहलमात्राश्रवणप्रसङ्गलक्षणः ।

स एव व्यञ्जनीय इति । यो निकटे व्यञ्जितो दूरेऽपि स एव व्यञ्जनीयो न त्वन्यः । तथा च कोलाहलमात्रं विदूरवर्तिना न श्रूयेतेति तदवस्थमेव ।

तस्येति । अवर्णात्मकशब्दस्य ।

उपाधयश्चेति । ककाराः ।

---

1 II. ii, 68

बहव इति । मन्दतीव्रादिभेदेन ।

एकं कत्वसामान्यमास्थेयमिति । यस्मात् सर्वेषु ककारेषूपाधिषु अयं कः, अयमपि क इति प्रतीतिः स्यात् ।

उक्तदोषभियेति । तथा च तीव्रत्वादिवदित्यादिनोक्तस्य दोषस्य भिया ।

तावन्त एव ध्वानवदिति । यावन्तस्तीव्रतादयः तावन्तो यथा ध्वानाः शब्दाः, तथा कादयोऽपि ॥

टीयाम् ॥ **न चैते तदानीं प्रमाणान्तरेण**ानुमानादि**नोपनीयन्ते स्मृत्या वेति** । कदाचिदप्यननुभूतत्वात् ।

अन्येषामिति । अनक्ताक्षाणाम् ।

तद्धीति । साधर्म्यम् ।

उने ॥ **तीव्रज्ञानजनकैरिति** । वाद्याद्यभिहततताल्वा[736b]द्याकाशसंयोगविशेषादिभिः ।

तदसंभवादिति । गृह्यमानस्यैवेत्यादिनोक्तस्याभिभवार्थस्यासंभवात् ।

ज्ञानसामग्र्येति । श्रोत्रादिकया ।

टीयाम् ॥ स्वरूपेणापि यद्यभिन्नं किञ्चित् न भवेत् तर्हि भिन्नं भवेत् । तत्राह— **भेदोऽपीति** ।

वाके ॥ **एकदेशे ग्रहणादिति** । एकस्मिन् देशे कर्णशष्कुल्यवच्छिन्ने नभसि ग्रहणात् ।

पुनः **सांख्यः** चोदयति—**निमित्तदेशाग्रहणादिति** ।

टीयाम् ॥ **परोक्षे वक्तरीति शेष** इति । एके तु ब्रुवते इत्यनन्तरम् ॥

भाष्ये ॥ **यत् तदात्मानमहासीदिति** । अस्यैव व्याख्या यद् भूत्वा न भवतीति ।

तत् किं रूपं स्यादित्याह—**न जातु तत् पुनर्भवतीति**। एतेन प्रध्वंसाभावस्य नित्यत्वोपचारे अविनाशो बीजमुक्तम्।

वाके॥ भक्त्येति। भज्यते अनयेति भक्तिः सादृश्यं तया।

प्रागभावस्य कारणाभाव इति। प्रसङ्गेनोक्तमिदम्।

वाके॥ ते इति। आमलकादिके द्रव्ये।

किमोऽनुपपत्तेश्च पूर्ववत् इत्येतदेव व्याचष्टे—**यांश्चाकाशेति**।

अङ्गुलिरूपादीति। आदिपदाद् घटरूपादि।

टीयाम्॥ अनुपलब्धिविरोधादिति। संयोगादयो हि यत्र यत्राङ्गुल्यादेराश्रयस्योपलब्धिः, तत्र सर्वत्र ग्रहणयोग्या अपि नोपलभ्यन्ते। किं तु क्वचित् प्रदेशे एवेत्यनुपलब्ध्या अननुभवेन विरोधः संयोगादीनाम्।

उने॥ व्यापकत्वाव्यापकत्वलक्षणमिति। एकं व्यापकत्वाव्यापकत्वलक्षणं समुदितस्थानविषयम्। अन्यच्चैकाश्रयविषयम्।

अत इति। अव्यापकलक्षणत्वभणनात्।

तेनाविरोध इति। यदि हीदमव्यापकत्वस्वरूपं स्यात् तदा रक्तारक्तविरोधं परिहरता यदुक्तं तेन विरोधः स्यात्। तत्र हि संयोगस्यैकत्र भावाभावावुक्तौ। अत्र तु न ह्येते समुदायिन्येकस्मिन्निरूप्यन्ते इत्यनेनैकत्र संयोगस्यानिरूपणम्। लक्षणभणने तु न विरोधः। तेन हि संयोगस्याव्यापकत्वस्वरूपं प्रतिपाद्यते। अनेन तु व्यापकत्वव्यवच्छेदकोऽसाधारणो धर्म इति भावः।

नन्वेवमविरोधं व्युत्पादयता एकस्मिन्नपि द्रव्ये संयोगस्य स्वरूपतोऽवस्थानमभ्युपगतम्। ततश्च तत्रापि एवमेव रूपादिवद्व्यापकलक्षणं किमिति न स्वीक्रियते? एवं च पुनरपि भावोऽभावश्चेत्यनेन विरोधः प्राप्त इत्याशङ्क्य परिहरति—**ननु तत्रापीति**।

यावदाश्रयेति। यावानाश्रयो यावदाश्रयः।

दीर्घयोर्द्रव्ययोरिति। ये दीर्घे द्रव्ये अधस्तान्निरन्तरे उपरि च सान्तरे तयोः।

उपलम्भेऽपीति । द्रव्ययोः ।

टीयाम् ॥ नन्वेकसमुदाय्युपलब्धावुपलब्धिर्व्याप्तिरिति लक्षणमव्यापकम् । तथा हि, अवयवी अवयवव्यापकोऽभ्युपेयते । न चासावेकावयवोपलब्धावुपलभ्यते, नाप्यवयवग्रहणादित्यत आह——**एकसमुदायीति** ।

न त्वेको विवक्षितस्तद्ग्रहणं वेति । एकस्यैव समुदायिनः उपलब्धाविति न विवक्षितम्, नाप्येकस्य समुदायिन उपलब्धावेवेत्यर्थः ।

तदनुपलब्ध्येति । अवयवानुपलब्ध्या ।

उने ॥ **त्र्यणुकाभिप्रायमिति** । त्र्यणुकं ह्यवयवानां द्व्यणुकाणामनुपलब्ध्यैवोपलभ्यते ।

वाके ॥ **कार्यद्रव्यसंयोग** इति । कार्यद्रव्यस्य पटादेराकाशादिना संयोग उत्पत्त्यनन्तरभावी ।

उत्पद्यमानस्येति । उत्पद्यमानस्य पटादेः कारणसंबन्धिभिस्तन्त्वादिसंबन्धिभिराकाशादिभिः कार्यस्य पटादेरकार्यैराकाशादिभिः [737a] संयोगः संयोगज इति कारणाकारणसंयोगात् कार्याकार्यसंयोगो भवतीति **वैशेषिक**प्रक्रिया दर्शिता ।

ननु पटादावुत्पत्तिसमयपश्चाद्भाव्यपि क्रियाजः संयोगः कृतको भविष्यतीत्यत आह——**क्रियाजं त्विति** ।

केचिदिति । ये कांश्चित् कृतकान् प्रतिपद्यन्ते कांश्चिदकृतकांस्त एव ।

यावद्द्रव्यभावित्वादिति । विभक्तस्य हि संयोगो भवति । अप्राप्तिपूर्विका हि प्राप्तिः संयोगः । न चाकाशेनाप्राप्तिरस्ति, आकाशादीनामव्यापकत्वप्रसङ्गात् । अतो न घटादेराकाशेन क्रियाजः संयोगः संभवति । तस्मात् कार्यद्रव्ये उत्पत्तिसमयानन्तरभावी य आकाशसंयोगो यावद्द्रव्यभावी स कृतक इति ।

अथ यावद्द्रव्यभावित्वेनैव हेतुना नित्ययोरण्वाकाशयोरकृतकः संयोग इत्याह——**अण्वाकाशेति** ।

उने ॥ **द्रव्यत्वे सतीति** । सत्तादिसामान्यादयो हि सर्वमूर्तसंयोगिनोऽपि स्युः । न

चाकाशेन कृतकसंबन्धसंबन्धिन इति तद्व्यभिचारनिवृत्त्यर्थमाह—**द्रव्यत्वे सतीति ।**

अत्रापीति । टीकायामपि ।

तद्विपरीताभ्युपगमेनेति । यावद्द्रव्यभावित्वविपरीताङ्गीकारेण ।

टीयाम् ।। तेनैवेति । विनश्यदाधारद्रव्यवर्तिद्रव्यसंयोगेन ।

नन्वेवमपि नीलीद्रव्यसंयोगेनैव व्यभिचारः पटसंयुक्तस्य नीलीद्रव्यस्य पटवत् क्रियावत्त्वात् । अन्यथा गच्छति पटे नीलीद्रव्यगतं नीलं रूपं न दृश्येत इत्यत आह— **विवक्षितेति ।** पटसंयुक्ते हि नीलीद्रव्ये क्रियावत्त्वं विद्यते । परमिदं न विवक्षितयोर्नीलीपटयोः परस्परविभागहेतुः । पटे तु क्रियावत्त्वं पटाकाशयोः परस्परविभागहेतुः ।

क्वचिदिति । वार्त्तिके ।

विप्रतिपत्तिविषया इत्यादि । एतदप्यनुमानं वस्तुतो विप्रतिपत्तिविषयस्य कार्याकाशसंयोगस्यायावद्द्रव्यभावित्वसाधकम् ।

भाष्ये ।। नन्वाकाशप्रदेशवत् शब्दस्य तीव्रमन्दता भाक्ती भविष्यतीत्यत आह— **परीक्षितो वेति ।**

तत्त्वमिति । पारमार्थिकी ।

उने ।। न साक्षात् सूत्रितमिति । न प्रयोगोपन्यासेन **सूत्रे** उक्तम् ।

तथा चेति । प्रश्नशोभायाम् ।

पूर्वोत्तरग्रन्थव्याख्यावक्रतेति । प्रश्नोत्तरग्रन्थयोर्या व्याख्यावक्रता सापि ।

नित्येष्वव्यभिचार इतीति । कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् इत्यत्र **सूत्रे**[1] ।

अव्यभिचार इति प्रकृतमितीति । सन्तानानुमानविशेषणात् इत्यत्र **सूत्रे**[2] ।

पूर्वसूत्रप्रतीकानुवृत्त्येति । न घटाभावेत्यादि**सूत्र**[3]संबन्धिनो नित्येष्वित्यस्य

1 II. ii. 17 2 II. ii. 16 3 II. ii. 14

तत्त्वभाक्तयोरित्यादिसूत्र[1]संबन्धिनोऽव्यभिचार इत्यस्य चावयवस्यानुवृत्त्या ।

नन्वेवं तर्हि श्रुत्यर्थाभ्यां सूत्रकारेणैवात्र पक्षद्वयस्यानैकान्तिकतापरिहारनिष्प्रदेशत्वादिसद्भावरूपस्य व्यवस्थापितत्वात् ।

द्वौ पक्षाविति **भाष्यस्य** कोऽर्थ इत्याह—**मूकस्तर्हीति** ।

द्वौपक्षावित्यत्रस्थं द्वाविति पदं व्याख्याय द्वौ पक्षौ न व्यवस्थापयतीत्येतद्विषयां **सूत्रकार**स्यान्यत्रापि शैलीमाह—**द्वावितीत्यादि** ।

आक्षिप्तमिति । अर्थाक्षिप्तं निष्प्रदेशत्वादि ।

अभिहितं चेति । श्रुत्योक्तं सन्तानानुमानम् ।

टीयाम् ॥ **नैतदभिहितमिति** । निष्प्रदेशत्वमात्मादीनां शब्दसन्तानश्च साक्षादनुमानप्रयोगेण [737b] नोक्ते इत्यर्थः ।

उने ॥ पर्यनुयुञ्जान आहेति । **भाष्यकारः** ।

अन्यथेति । प्रत्यक्षोपन्यासमन्तरेण ।

हेतुरिति । उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुलब्धेरित्ययम् ।

तत्रैवेति । कृतकवदुपचाराच्चेति **सूत्रे**[2] एव ।

ननु यदि प्रत्यक्षोपन्यासपरमिदं **सूत्रं** तर्हि किमिति **भाष्यकृता** श्रूयमाणश्चाभूत्वा भवतीत्यनुमीयते इत्येवमग्रे अनुमानार्थतया व्याख्यातमित्यत आह—**तस्मादिति** ।

अनुमानार्थतयापीति । प्रत्यक्षार्थपरमेव सदित्यपि नावद्योत्यते ।

एतदिति । **सूत्रम्** ।

अग्रे इति । सोऽयमुच्चार्यमाण इत्यादिना ।

वार्त्तिकमपीति । स एवमनुयुक्त इत्यादिकम् ।

एवमेवेति । प्रत्यक्षार्थव्याख्यापरतयैव ।

---

1 II. ii. 15 2 II. ii. 13

एतदिति । असत एव शब्दस्यानुपलम्भ इत्येतत् ।

टीयाम् ॥ **प्राक्प्रध्वंसेति** । प्रागभाव प्रध्वंसयोर्हि अनुपलब्धिकारणाभावे कदाचिदुपलब्धिरस्ति घटावस्थायामनुपलम्भात् न चानित्यत्वमिति व्यभिचारनिवृत्त्यर्थम् । नित्यत्वं चानयोः **मीमांसक**मताभ्युपगमेन ज्ञेयम् ।

वाके ॥ **सूत्रार्थ** इति । प्रागुच्चारणानुपलब्धेरिति । **सूत्रा**वयवस्य कदाचिदुपलब्धेरित्ययं तात्पर्यार्थः आवरणानुपलब्धेश्चेत्यस्य च सतोऽनुपलब्धिकारणाभावे इत्ययम् ।

भाष्ये । **तन्न गृह्यते** इति । आवरणम्, अतिसन्निकृष्टत्वात् इन्द्रियवधाद्यपि नोपलभ्यते ।

टीयाम् ॥ **अनुपलब्धिस्वरूपविरोधादिति** । यद्यावरणानुपलब्धिरुपलभ्येत, तदा अनुपलब्धेर्यत् स्वरूपमनुपलब्धित्वं तदेव विरुध्येत ।

यदि पूर्वोक्तेति । आवरणसद्भावेनानुपलब्धिकारणाभावे सतीति विशेषणासिद्धिदोषभयादित्यर्थः ।

उने ॥ **अत्रेति** । चोदने ।

तदेतदिति । प्रथम**सूत्रे** विशेषणासिद्धेश्चोदनम्, द्वितीये त्वनैकान्तस्य ।

भाष्ये ॥ **तत्त्वमिति** । उत्पत्तितिरोभावधर्मकः शब्द इत्येतद् व्यवस्थापितं पांशुप्रायजातिप्रत्यवस्थानैर्निराकुर्वन् ।

टीयाम् ॥ **सूत्र**योस्तात्पर्यं प्रश्नपूर्वकमेकत्र दर्शयति— **कोऽस्य वाक्यस्येतीति** । एतेनास्य वाक्यस्येत्यस्य **सूत्र**द्वयरूपमहावाक्यस्येत्यर्थो दर्शितः ।

जातिवादीति । आवरणोपलब्धिवदावरणानुपलब्धिस्तावत् स्वसंवेद्येति सर्वसिद्धम् । तदस्यां स्वसंवेद्यत्वेन प्रतिपादितायामावरणानुपलब्धेरनुपलब्धिरप्यनुपलब्धित्वात् स्वसंवेद्यत्वेन प्रतिपादिता भविष्यतीत्यभिप्रायवान् ।

नानैकान्तिकमिति । आवरणानुपलब्धौ विपक्षभूतायां मानसेन प्रत्यक्षेणोपलभ्यमानायामनुपलब्धेरगमनात् नानैकान्तिकत्वम् । आवरणानामनुपलब्धिग्रस्तत्वेनोपलब्धेरभावात् नावरणसद्भाव इत्यर्थः ।

वाके ।। एवं च सत्यपहृतविषयमुत्तरवाक्यमिति **भाष्य**मनुभाष्य तत्रस्थमपहृतविषयमिति पदं गृहीत्वा व्याचष्टे---**एवं च सतीति** ।

टीयाम् ।। **न सूत्रद्वयस्याप्युत्थानमस्तीत्यर्थ** इति । आवरणानुपलब्धेरनुपलम्भस्यासिद्धत्वादिति भावः ।

उने ।। **यथा व्याख्यातमिति** । यथा **टीकाकृता** व्याख्यातं तथा अभ्यनुज्ञावादेन तूच्यते इति **भाष्यं** न गमयतीत्यतो यथा व्याख्यातं तथान्यथा वेति दोदूयमानं हृदयं नानुरञ्जय[738a]तीत्यर्थः ।

टीयाम् ।। **तत्र विधीति** । यद्यनुपलब्धिविषयं प्रमाणं विधिरूपोपलब्धित्वेनानुपलब्धिगोचरयेत्तदा स्याद् विरोधः । यदा तु निषेधरूपानुपलब्धित्वेनैव गोचरयति, तदा न कोऽपि विरोध इति भावः ।

नन्वस्मिन् **सूत्र**व्याख्याने **भाष्यं** न संगच्छते, **भाष्यकारो** हि सेयमनुपलब्धिरभावान्नोपलभ्यते इत्याह । भवद्भिश्चोपलम्भः प्रतिपाद्यते । तत् कथं न विरोध इत्याशङ्क्य **भाष्यं** व्याचष्टे— **तदेतद् भाष्यकृदाहेति** ।

उने ।। **किमर्थं तर्हि परमाणुनित्यत्वोपन्यास** इति । यद्यस्पर्शेन कर्मणैवोभयतो व्यभिचारो लब्धः, तदा **भाष्यकारे**णोभाभ्यां साधर्म्यवैधर्म्यदृष्टान्ताभ्यामस्पर्शत्वाख्यो हेतुः सव्यभिचार इत्युक्त्वा यद्वैधर्म्यदृष्टान्तव्यभिचारार्थं दर्शितं स्पर्शवांश्चाणुर्नित्यश्चेति तत् किमर्थमित्यर्थः ।

न हि स्पर्शवत इति । परमाणोः । यत्र साध्याभावेऽपि साधनाभावो नास्ति, स व्यतिरेकव्यभिचारार्थं वक्तव्यः । न च तथा परमाणुः । साध्यस्य नित्यत्वस्य तत्र सद्भावात् केवलं सपक्षैकदेशवृत्तित्वमुक्तं स्यात् । न च तेनागमकत्वं धूमस्याप्यगमकत्वप्रसङ्गात् । तस्माद् व्यतिरेकव्यभिचारोदाहरणमपि कर्मैव प्रकृतोपयोगीति भावः ।

तस्य चेति । समव्याप्तिकत्वनिरासस्य ।

अनैकान्तिकीकरणेऽपीति । कर्मणा ।

यद्येवं स्यादिति । अनैकान्तिकोऽप्यस्पर्शत्वहेतुर्यदि नित्यत्वं शब्दस्य साधयेत् ।

तच्चेति । नित्यत्वेन स्पर्शराहित्यसाधनम् ।

तवानिष्टमिति । अणोरपि स्पर्शराहित्यप्रसङ्गात् ।

भाष्ये । साध्यसाधर्म्येणेति । नित्यत्वविशिष्टे साध्ये शब्दे कर्मणि चानित्येऽस्पर्शवत्त्वस्य सद्भावात् साध्येन सह साधर्म्यं कर्मणः । तेनाऽस्पर्शत्वस्य नित्यत्वव्यभिचारोदाहरणमित्यर्थः ।

साध्यवैधर्म्येणेति । नित्यत्वविशिष्टत्वेन साध्ये शब्देऽस्पर्शवत्त्वस्य सद्भावादणौ चाभावात् साध्येन सह वैधर्म्यमणोः । तेनोदाहरणमस्पर्शवत्त्वं विनापि नित्यत्वमस्तीति अस्पर्शवत्त्वस्य व्यभिचारोदाहरणमिति भावः ।

उने ॥ वैयधिकरण्यमिति । न हि शब्दाय किञ्चिद् दीयते । येन शब्दः संप्रदानं स्यादिति वैयधिकरण्यम् ।

उने ॥ बाधोद्भावनमिति । शब्दावस्थितिव्यवस्थापकस्य संप्रदीयमानत्वहेतोः ।

तच्चेति । बाधोद्भावनम् ।

तदिति । उत्तर**सूत्रम्** ।

न चानेनेति । अध्यापनादप्रतिषेध इति हि [1]**सूत्रं** तदन्तरानुपलब्धेरहेतुरित्यस्य परिहाररूपम् । न चानेन शब्दस्यान्तरालोपलब्धिव्यवस्थापनेनान्तरालानुपलब्धिः परिह्रियते, येन तदन्तरालानुपलब्धेरहेतुरिति [2]**सूत्र**बाधोद्भावनमाकल्प्येतेत्यर्थः ।

नन्वध्यापनादप्रतिषेध इति **सूत्रं** शब्दस्योपालम्भायोग्यत्वं ख्यापयत् शब्दस्यावस्थितस्यापि येयमन्तरालानुपलब्धिः सा अयोग्यत्वादिति परिहारनिष्ठं भविष्यतीत्याशङ्कयाह—**न चायोग्यत्वमिति** ।

तथा सतीति । यदि अध्यापनादप्रतिषेध इति **सूत्रे** शब्दस्योपलम्भायोग्यत्वं ख्याप्येत तदा बाधोद्भावनं परिहरन् परः संप्रदानत्वस्य स्वयमेवासिद्धत्वमुद्भावयेत् । तथा च स्वाभिमतविपरीतसाधकः स्यादित्यर्थः ।

---

1 II. ii. 27 2 II. ii. 26

[738b] ननु बाधोद्भावनेन संप्रदानत्वे दूषिते अध्यापनादिति हेत्वन्तरमेव परकीयं भविष्यतीत्याशङ्कयाह—**न चेति** ।

अप्रतिषेध इतीति । **सूत्र**स्थेनाप्रतिषेध इत्यनेन ।

फलनिषेधमुखेनेति । संप्रदानानुमानस्य यत् फलमन्तराले शब्दोपलब्धि-लक्षणं तन्निषेधद्वारेण ।

हेतोरिति । संप्रदानत्वस्य ।

विभक्तिव्यत्ययमेवाह—**अहेतोरिति** । शब्दस्यान्तरालोपलब्धिसाधनाय प्रयुक्तः संप्रदानादिति हेतुरसिद्धत्वेनाहेतुः । तस्मादहेतोः शब्दस्यान्तरालेऽनुपलब्धिः ।

असिद्धत्वमेवाह—**न हीति** ।

कल्पितत्वभ्रमनिरासाय स्वव्याख्यानं **भाष्येण** संवदति—**तदुक्तमिति** ।

भाष्ये ॥ **अध्यापनं लिङ्गमिति** । अध्यापनस्वरूपं यत् संप्रदानं तल्लिङ्गमित्यर्थः ।

असति संप्रदाने इति । संप्रदीयमाने शब्देऽन्तरालेऽसतीत्यर्थः ।

उने ॥ **व्यवहर्तव्यतयेति** । अयं शब्दोऽमुकार्थतया व्यवहर्तव्य इत्येवम् ।

संधेयेति । एवं संधेय एवं च धार्य इत्यादिप्रकारेणोपदिश्यते । शरीरादिरप्यतो भवति दृष्टान्तः ।

तस्यैवेति । **आचार्य**स्थस्यैव शब्दस्य ।

असिद्ध इति । न हि आत्मस्थस्यैव शब्दस्य व्यवहर्तव्यतया **आचार्ये**णो-पदेशः कदाचिदपि स्यात् **नैयायिक**मते उच्चरितप्रध्वस्तत्वात् शब्दानाम् ।

अनैकान्तिक इति । नृत्ये हि हस्तकविशेषादिरुपाध्यायेनानुकर्तव्यतयो-पदिश्यमानोऽप्यस्ति, न च स्थिरः ।

उत्तरमिति । उभयोः पक्षयोरित्यादि समाधान**सूत्र**म् ।

वाके ॥ **अभ्यासाद् वीणावदिति** । स्थिरः शब्दोऽभ्यस्यमानत्वाद् वीणावत् ।

एकविषय इति । घटादिषु ।

एकाकारविषयो वेति । लूनपुनर्जातकदलीकाण्डादिषु ।

अभ्यासासिद्धाविति । सन्दिग्धासिद्धत्वेनाभ्यासस्यासिद्धौ सत्याम् ।

टीयाम् ॥ तयोरितरेतरापेक्षसिद्धेरित्यनुपपन्नं परस्परापेक्षसिद्धावुभयोरभावप्रसङ्गादत आह—**तयोरन्येति ।**

वाके ॥ अन्यत्वेऽपीति । लूनपुनर्जातकदलीकाण्डादिषु ।

टीयाम् ॥ सत्यं विशेषेति । सत्यं विशेषं दर्शनमेकत्वप्रत्ययनिवृत्तिहेतुः । शब्दे तु विशेषादर्शनेन विशेषाभावे साध्ये विशेषादर्शनं सदसत्साधारणम्, न संशयहेतुतामतिपततीत्यर्थः ।

भ्रान्तत्वे हीति । गोशब्दप्रत्ययस्य ।

वाके ॥ आहोस्वित्तद्भावादिति । किं वा स्थिरैकगोशब्दसद्भावात् ।

टीयाम् ॥ कारणसामान्यं ताल्वादिसंयोगः । न तस्मात् गोशब्दप्रत्ययस्याव्यावृत्तिरेकरूपत्वं युक्तमालम्बनैकत्वनिबन्धनत्वात् बुद्धीनामेकावभासतायाः । अत आह—**गोशब्दबुद्धिरिति ।**

मीमांसकोऽपि हि गोबुद्धीर्भिन्ना एवाभ्युपगच्छतीत्यत आह—**भिन्नास्वपीति ।**

गोशब्दोऽपि गोशब्दबुद्धिसंबन्धी अस्ति, न तु सामान्यनिबन्धन इति तद्व्यवच्छेदार्थमाह—**अनुगतित्वे सतीति ।**

भिन्नमिति । लूनपुनःप्ररूढकदलीकाण्डादि ।

भिन्नमभिन्नं चेत्यर्थ इति । उपलब्धविशेषं पुरुषं प्रति भिन्नम् । अनुपलब्धविशेषं प्रति त्वभिन्नमित्यर्थः ।

पुरुषाणामालम्बनतया विषयत्वमुक्तमिति मन्दबुद्धिभ्रमनिरासार्थमाह—**आधारतयेत्यर्थ** इति ।

वाके । [739a] **असिद्धेति ।** शब्दस्यैक्ये साध्ये सर्वेषामव्यावृत्ततत्प्रत्ययविषयत्वम-

सिद्धम्। न हि शब्दः सर्वेषामव्यावृत्ततत्प्रत्ययविषयः। केषाञ्चित् अव्यावृत्तविषयत्वं त्वनैकान्तिकम्, लूनपुनर्जातकदलीकाण्डादेः केषाञ्चिदव्यावृत्ततत्प्रत्ययविषयत्वेऽप्यनेकत्वात्।

भाष्ये ॥ **व्यञ्जकाभावादिति चेदिति।** व्यञ्जके हि सति श्रवणं व्यञ्जकं च कादाचित्कमतो न सततं श्रवणप्रसङ्ग इत्याशङ्कार्थः।

प्रतिषिद्धमिति । आदिमत्त्वादिति [1]**सूत्रे** हि व्यञ्जकाः शब्दस्य न संभवन्त्येवेत्युक्तम्।

उने ॥ **समवायीति।** कार्यद्रव्यमाश्रयविनाशाद् विनश्यति, असमवायिकारणविनाशाद् वा। न चैतदुभयरूपत्वं कारणविभागस्येत्यर्थः।

वाके ॥ **सन्तानोपपत्तेरिति** । सिद्धे हि सन्ताने कार्यः शब्दः कारणशब्दस्य विनाशहेतुर्लभ्यते इत्यर्थः।

विनाशकारणानुपलब्धेरिति अनपदेशोऽसत्त्वादित्यभिधाय **भाष्यकारे**णोदाहरणं दत्तम्। तद् **भाष्या**नुवादपूर्वकमाक्षिपति—**यथा विषाणीति**। यस्माद् विषाणीति पाठान्तरम्।

टीयाम् ॥ ननु विरुद्धमर्थं साधयदिदमनुमानं कथमसदविद्यमानं स्यादत आह—**असद्-शोभनमिति**।

यथा विरुद्धादिति हि त्वाभासतया विरुद्धस्याप्यसिद्धेन साम्यमित्यर्थः।

अश्रवणकारणानुपपत्तेरिति ब्रूम इति। **वार्त्तिक**मनन्वितमाभासमानं साध्येन पूरयित्वा पठति—**शब्दस्य नित्यस्येति**।

उने ॥ **वैशेषिकविरोधमिति**। गुणस्य हि शब्दस्य प्रतिघातिद्रव्यसंयोग एव तावद् **वैशेषिकै**र्नेष्यते, किं पुनरेतेन विनाश्यत्वम्?

अविरोधेऽपीति। शब्दस्य प्रतिघातिद्रव्यसंयोगभावात् तद्विनाश्यत्वानभ्युपगमेन **वैशेषिकैः** सहाविरोधेऽपि प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य निरोधक इत्यस्यास्मन्मतस्य न काचित् क्षतिरित्यर्थः।

---

1 II. ii. 13

भाष्ये ॥ तिरःकुडयमिति । तिरस्तिरश्चीनं कुडयं यत्राश्रवणे तत् ।

वाके ॥ अवस्थितमिति । एकस्वरूपम् ।

सन्तानवृत्तीति । नैरन्तर्येण नवं नवं जायमानम् ।

श्रुतिभेदो न प्राप्नोतीति । तारतरादिभेदेन श्रवणं न प्राप्नोति व्यञ्जकस्य संस्कारस्यैकरूपत्वात् ।

उने ॥ ननु नित्यानामपि पार्थिवादिपरमाणूनां यथा स्वाभाविको भेदः, एवं नित्यस्यापि शब्दस्य स्वाभाविको भेदो भविष्यति । तत् कथमाह **टीकाकृत्** नित्यस्य च शब्दस्य न स्वाभाविको भेद इत्याशङ्कयाह—**यन्न सिद्ध** इति ।

शेष इति । यथा परमाणूनामयं न सिद्धः स्वाभाविको भेदो न तथा नित्यस्य शब्दस्येत्यर्थः ।

टीयाम् ॥ भवेदेव यदि सर्वे सन्तति पतिताः सर्वेषां व्यञ्जका भवेयुस्तेऽत्र प्रत्येकं प्रतिनियतशब्दव्यञ्जकाः । अत आह—**न च साभानेति ।**

उने ॥ न तु घटस्थमिति । व्यञ्जकम् ।

टीयाम् ॥ न हि समीचीनादिति । युक्तं स्फटिके रक्तादिप्रत्यये औपाधिकत्वेन भ्रान्तत्वम् , उपाधिविरहे स्वेन रूपेण प्रतीयमानत्वात् ।

इह तु तारत्वादीनां सर्वदा शब्दसमानाधिकरणैव प्रतीतिः । औपाधिकत्वे तु तद्रहिताः स्वेन रूपेण शब्दाः कदाचिदुपलभ्येरन्निति भावः ।

स्यादेतत् । [339b] शब्दा अभिव्यक्ता एव प्रत्येतव्याः । अभिव्यक्तिश्च व्यञ्जकाधीना । व्यञ्जकाश्च नियमेन तारत्वाद्यन्यतरधर्मवन्तो भवन्ति । तेन व्यञ्जकरहितस्य श्रोत्रस्य शब्दश्रुतिं प्रत्यनिमित्तत्वादवर्जनीयः । शब्देष्वौपाधिकस्तारत्वादिप्रत्यय इति न स्वेन रूपेण कदाचिदपि प्रतीयन्ते । स्फटिकस्तु न नीलीद्रव्योपधानाधीनप्रत्ययः । अतस्तस्य स्वरूपेण प्रतीतिरुपपन्नैवेति वैषम्यमत आह—**न च निर्बीजेति ।**

एवं हि सर्वदा भ्रान्तिज्ञानगोचरत्वमेव शब्दानामभ्युपगतं स्यात् , न सम्यग्ज्ञान-

गोचरत्वम् । न च समीचीनज्ञानेन पृथगगृहीते आरोप्ये आरोपविषये च निरधिष्ठाना भ्रान्तिर्भवतीत्युक्तपूर्वम् ।

तदनिवृत्तिमिति । कार्यनिवृत्तिम् ।

वाके ॥ कारणाभावात् कार्याभाव[1] इतीति कारणस्य संस्कारस्याभावात् कार्यस्योत्पाद्यस्य कल्पनया दशमादेः शब्दस्याभावोऽनुत्पादोऽन्त्यस्य तु नवमशब्दस्य स्वकारणेनाष्टमशब्देनैव विनाश इति शब्दसन्तानोच्छेद इत्यर्थः ।

उने ॥ विनाशकारणेति । शब्दस्यावस्थाने साध्ये यद्यविशिष्टा येन केनचित् प्रमाणेन विनाशकारणानुपलब्धिर्हेतुः, तदानैकान्तिकः । शब्दोपलब्धेः प्रत्यक्षेण विनाशकारणानुपलब्धावप्यस्थिरत्वात् ।

सर्वैः प्रमाणैरिति । विशिष्टा तु हेतुरसिद्धः, अनुमानेन शब्दकारणानामुपलम्भस्योक्तत्वादिति भावार्थः ।

टीयाम् ॥ संप्रति सांख्यः प्रत्यवतिष्ठते इति । **सूत्रेण** पाणिनिमित्तसंश्लेषस्य शब्दनिवृत्तिकारणत्वे उक्ते तदुपजीवनेनैव **सांख्यः** कांस्यपात्र्यादिसंस्कारवच्छब्दस्यापि स्पर्शवद्विशेषगुणत्वं समर्थयितुमाकाशगुणत्वं निराकरोतीत्यर्थः ।

भाष्ये ॥ कम्पसमानेति । पाणिप्रश्लेषाद् योऽयं कम्पवतः कारणस्य कांस्यपात्र्यादेरुपरमः कम्पवत्स्वरूपताया निवृत्तिः तस्मात् कम्पसमानाश्रयस्यानुनादस्याभाव इति योजना ।

उने ॥ धर्मभेद इति । तीव्रत्वमन्दत्वादिः ।

उभयत्रापीति । संस्कारस्येत्यत्र मूर्तद्रव्यसंयोग इत्यत्र च ।

टीयाम् ॥ मूर्तद्रव्यसंयोगेनेति । परमाण्वादिसंयोगेन ।

उने ॥ तस्मिन्निति । संस्कारे ।

---

1 Vai. sū. I. ii. 1

तत्कल्पनायामिति । सहकारिकल्पनायाम् ।

प्रसाधितमिति । [1]आदिमत्त्वादित्यादि**सूत्रैः** ।

तत इति । अनित्यत्वसाधनानन्तरम् ।

अपास्तमिति । [2]अस्पर्शत्वादप्रतिषेध इत्यादि**सूत्राभ्याम्** ।

नन्वनित्यस्य शब्दस्यैन्द्रियकत्वान्यथानुपपत्त्या येयं सन्तानोपपत्तिः तया अमूर्ताश्रितत्वमात्रं सिध्यति, नत्वमूर्तगुणत्वम् । तत् कथमिदं मूर्तगुणत्वनिराकरणेनेत्यत आह—**सामान्येति** । सन्तानोपपत्त्या सिध्यतामूर्ताश्रयत्वेनैव गुणत्वमस्य सिद्धमित्यर्थः ।

द्रव्यस्यामूर्तमाश्रयो भवन्नेकं वा स्यादनेकं वा ? तत्राद्यं दूषयति—**एकस्येति** ।

तदारब्धस्येति । एकारब्धस्य ।

नित्यत्वप्रसङ्गाच्चेति । अमूर्तस्यारम्भकस्य नित्यत्वात् । द्रव्यं च समवाय्यसमवायिकारणविनाशाद् विनश्यति । एकस्य नित्यस्य चारम्भकत्वे स नास्ति ।

द्वितीयं कल्पं दूषयति—**अनेकस्येति** । आकाशात्मादेः ।

परस्परसंयोगादिति । [740a] अजसंयोगस्यानिष्टत्वात् ।

ननु मा भुवन् विजातीया आरम्भकाः सजातीया आत्मानोऽनेके आरम्भका भविष्यन्ति । तत्राह—**सजातीयेति** ।

समवायीति । आत्मनामात्मसंयोगस्य च नित्यत्वादविनाशेन । कर्मणोऽमूर्ताश्रयत्वासंभवे हेतुमाह—**व्यापकस्येति** । कर्मणो ह्याश्रयो द्रव्यमेव तच्चामूर्तं यद्यभ्युपेयेत तदा व्यापकत्वमेव । तस्य च गतिविरोध इत्यर्थः ।

नन्वैन्द्रियकत्वान्यथानुपपत्त्या कर्णशष्कुल्यवच्छिन्नं नभ उपसर्पणमात्रमेव सिध्यति। तच्चानाश्रितस्यापि नित्यस्य शब्दस्य परमाणोरिव संभवति । अत आश्रितत्वमात्रमस्यासिद्धम्, किं पुनरमूर्ताश्रितत्वं तत्साध्यं गुणत्वं वेत्याशङ्क्याह—**आश्रितत्वमस्येति** ।

सामान्यवत इति । अनेन समवायव्यवच्छेदः ।

अप्रत्यक्षत्वमपि कुत इत्यत आह—**विशेषेति** । रूपादिविशेषगुणवत्तां विनेत्यर्थः ।

---

1 II. ii. 13 2. II ii. 22

तथाभावाभ्युपगमे इति । विशेषगुणत्वाभ्युपगमे ।

भाविकेति । स्वाभाविक° ।

भेदसिद्धाविति । शब्दस्य ।

अनाश्रितत्वानुपपत्तेश्चेति । अनित्यत्वे हि अनाश्रितस्य कर्णशष्कुल्युपसर्पणासंभवेन ।

अप्रयोजकमिति । नाकाशैकगुणत्वप्रयुक्तं नित्यत्वं किं त्वकृतकत्वप्रयुक्तम् ? अकृतकत्वं च शब्दे नास्तीति व्यवस्थापितम् ।

अनैकान्तिकं चेति । अनित्यत्वेनाभ्युपगतैर्ध्वनिधर्मैः ।

॥ इति शब्दानित्यत्वपरीक्षाप्रकरणं संपूर्णम् ॥

॥ शब्दपरिणामपरीक्षाप्रकरणम् ॥

[२.२.४०–५६]

उने ॥ न तु गुणस्येति । कार्यधर्माधारो हि प्रकृतिर्गुणस्य च समवायिकारणत्वानुपपत्तेः कार्यधर्मायोगात् न प्रकृतित्वमित्यर्थः ।

टीयाम् ॥ आदेशोपदेशस्तत्त्वमितीति । **भाष्या**नुवदनमिदम् ।

अस्यार्थमाह—**अवधारयतीति ।**

उने ॥ इकारधर्मस्येति । इकारलक्षणो धर्म इकारधर्मस्तस्य ।

टीयाम् ॥ वर्धमानक इति । कच्चोलकः ।

रुचक इति । स्वर्णबीजपूरः । ग्रीवाभरणम् ।

उने ॥ किं तदर्थेन विवृतकरणेनेति । इकारोच्चारण एवैतस्योपयोगात् ।

द्वयोरिति । इकारयकारयोः ।

कारकज्ञापकयोरिति **भाष्य**योजनया विस्पष्टयति—**उभयत्रेति ।**

विकाराविकारयोरिति । विकारभूताविकारभूतयोः ।

टीयाम् ॥ ननु क्षीरावयवी दध्यवयव्यन्तरत्वेन मा परिणंसीत्, अतत्स्वभावत्वात् । क्षीरावयवास्तु परिणंस्यन्तीत्याशङ्क्याह—**न ह्यवयवा अवयविस्वभावा** इति । अवयवावयविनोरत्यन्तभेदात् ।

उने ॥ तस्येति । कार्यकारणभावस्य ।

टीयाम् ॥ बुद्धिसमाहारमात्रस्येति । वर्णानामुच्चरितप्रध्वंसित्वेन स्वरूपसमाहारासंभवात् ।

तत्समुदायस्येति । वर्णसमुदायस्य ।

क्लृप्तत्वादिति । समर्थत्वात् ।

अत इति । न्यग्रोधबीजात् ।

नारिकेलतरुरल्प इति । न्यग्रोधतरोरिति द्रष्टव्यम् । प्रकृत्यनुविधाने हि विकाराणामल्पाद् बीजादल्पेन पादपेन महतो महता भाव्यं न चैतदस्ति । तस्मात् न प्रकृत्यनुविधाननियमो विकाराणाम् । तथा च प्रकृत्यनुविधानाभावेऽपि वर्णविकारो भविष्यतीति भावः ।

उने ॥ अनुक्तोपालम्भमाशङ्क्याहेति । ननु न मया न्यूनसमा[740b]धिकोपलब्धेरिति दृष्टान्तः साधनत्वेनोच्यते । किं तर्हि ? प्रकृत्यनुविधानस्य दूषणत्वेन । तस्मात् द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्त इत्यनुक्तोपालम्भोऽयमिति परो मा वादीदित्याशङ्क्य यद्युपनिबन्धेनाहेत्यर्थः ।

ननु प्रकृतीति । यस्य **सूत्र**स्यानैकान्तिकत्वं परिहर्तुं प्रकृतिभेदमनुविधीयन्ते इति वदसि, तत् त्वया विस्मृतम् । तद्धि **सूत्रम्**[1] प्रकृतिविवृद्धौ प्रकृतिविवृद्धेरिति । न चैवंभणनेनास्यानैकान्तिकत्वं परिहृतं स्यादिति भावः ।

लाक्षणिके प्रयोगे इति । विभेदेऽर्थे लक्षणया विवृद्धिशब्दे प्रयुक्ते ।

मुख्येनेति । विवृद्धेर्योमुख्यार्थस्तेन ।

टीयाम् ॥ न नन्विवर्णमित्यादि **भाष्य**मनुपपन्नमिव दध्यत्रनद्यत्रेत्युभयत्रापीवर्णानुविधायित्वात् यकारस्येत्यत आह—**तस्यार्थ** इति ।

उने ॥ ननु कारणेति । ननु ह्रस्वदीर्घाभ्यां प्रकृतिवैषम्ये विकारसामान्यं न प्राप्नोतीति **न्यायवादि**नोक्ते **सांख्य**स्य प्रकृतिवैषम्येपि विकारसाम्यमस्तीति प्रतिपादयितुं युक्तम् । तस्मात् प्रकृतिसाम्ये विकारवैषम्यप्रतिपादनमसंगतमिति प्रश्नार्थः ।

टीयाम् ॥ वैषम्येऽपीति । प्रकृतेः ।

प्रकृतिसाम्य इवेति । दृष्टान्ततयेदमुक्तमिति भावार्थः ।

1 II. ii. 41

उने ॥ तयोरिति । कार्यभेदाभेदयोः ।

टीयाम् ॥ विकारभेदे इति । विकारभेदविषये ।

इति स्थिते परिहारे इति । प्रकृताक्षेपोपयोगित्वात् । **भाष्यकारेण** स्वयं परिहारः **सूत्र**स्थोऽपि सुगमत्वात् नोक्तः ।

टीयाम् ॥ दूषणपक्षे इति । विकारप्राप्तानामपुनरापत्तेरित्यस्यानैकान्तिकत्वोद्भावनपक्षे ।

उने ॥ वर्णत्वस्य पञ्चाशत्साधारणत्वादिति ततश्च इक इव कादीनामपि यण्विकारप्रसङ्गात् ।

नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्चेत्यस्य [1]**सूत्र**खण्डस्यैवं योजना । केषाञ्चित् नित्यानां व्योमादीनामतीन्द्रियत्वात्, केषाञ्चिच्च गोत्वादिसामान्यानां तद्धर्मविकल्पादन्यथात्वादैन्द्रियकत्वात् ।

उने ॥ ननु नित्यस्य यद्यैन्द्रियकत्वेनाविरोधस्तदानैन्द्रियत्वेन तद्विपक्षेण विरोध एव तत्कथं नोखल्वैन्द्रियकत्वानैन्द्रियकत्वाभ्यामस्ति कश्चित् नित्यस्य विरोध इत्याशङ्क्याह— **विरोधेति** । नित्यमैन्द्रियकं च स्यादनैन्द्रियकं चेत्यनियमः प्रकृतिविकारभाववच्च नित्यं न स्यादेवेति नियम इत्यर्थः ।

इत्यत्रेति । आचार्येण प्रयुक्तेऽनुमाने विकल्पसमप्रयोगः परोत्थापितः स्फुट एव यथा हीत्यादि**टीका**याम् ।

अप्रकृतिविकारेति । अप्रकृतिविकारयोर्वृषभाश्वयोर्यत् साधर्म्यं तस्मात् ।

तदेवाह—**कालविच्छेदादिति ।**

एतयोरिति । इकारयकारयोः ।

प्रकृतिविकारसाधर्म्यादिति । पौर्वापर्योपलब्धिरूपात् ।

तथाभाव एवेति । प्रकृतिविकारभाव एव ।

तदिति । प्रकृतिविकारसाधर्म्यम् ।

---

1 II. ii. 51

न चास्ति कश्चिद्विशेष इति। येनाप्रकृतिविकारसाधर्म्यं स्वसाध्यं साधयति, न तु प्रकृतिविकारसाधर्म्यम्।

प्रत्यवस्थानबीजमिति। जात्युत्तरस्य बीजम्।

अविशेषेण प्रत्यवस्थितस्येति। अप्रकृतिविकारसाधर्म्यप्रकृतिविकार-साधर्म्ययोर्विषये।

नोपलब्धीति। [741a] यथोपलब्धिहेतवो वर्णास्तथा विकारकर्तारोऽपि स्युरित्येवमुपलब्धिहेतुत्वेन हेतुना यद् विकारकर्तृत्वम्। कोऽर्थः? विकारकर्तृत्वसाधनं विकारकर्तृत्वव्यवस्थापना वर्णानां तन्न तुल्यम्। केन? तदकर्तृत्वसाधनेन।

कालविच्छेदनया। विकाराकर्तृत्वव्यवस्थापनयेत्यर्थः।

टीयाम्॥ **प्रतिपादने** इति। साधने।

आदेशविरोधितया तन्निवृत्त्येति। यदीकारादेर्वर्णस्य प्रसङ्गे यकारादि-रादेशः स्यात्, तदेकारादेर्वर्णस्योपलब्धिर्न स्यात्। न च नास्ति। तस्मात् नादेश इत्येवं वर्णोपलब्धेरादेशविरोधितया या तन्निवृत्तिरादेशपक्षनिवृत्तिस्तया।

भाष्ये। न चेद्वर्णोपलब्धिरिवर्णनिवृत्तौ सत्यां यकारप्रयोगस्य निषेधिका। एतदेव व्याचष्टे—**योऽयमिति**।

उने॥ **यत्वानुपलब्धेरिति**। एतेन यत्वानुपपत्तेरित्यत्र **वार्त्तिके**ऽनुपपत्तिशब्दोऽनु-पलब्ध्यार्थो दर्शितः।

व्यत्ययेन योजनेति। **वार्त्तिके** हि इकारस्योपलभ्यमानता यत्वस्य चानु-पलब्धिरुक्ता। **टीका**यां तु यत्वस्योपलभ्यमानता इकारस्य चानुपलब्धिरिति व्यत्ययेन योजना टीकायाम्।

भाष्ये॥ **नात्रार्थस्येति**। नात्रानियमस्य तथाभावोऽनियमत्वं प्रतिषिध्यते नियमेन।

तथाभूतस्यैवेति। अनियमस्यैव।

वाके॥ **अथ विक्रियन्ते** इति। यदि विक्रियन्ते तदैवं विकारो भवति।

टीयाम् ॥ स्थान्यादेशभावादप्रयोगे इति **भाष्यं** व्याचष्टे—**एकस्येति** ।

भाष्ये ॥ **तयोर्वेति** । ह्रस्वदीर्घयोर्वा ।

एते विशेषा इति । सोऽयं सर्व आदेशपक्ष एवास्यैवोक्तप्रकारेण विकारनामकरणे का क्षतिरिति भावः ।

उने ॥ **तदिति** । शब्दान्वाख्यानम् ।

एतस्यां सामग्र्यामिति । इकोऽचीत्यादिकायाम् ।

प्लुतप्रगृह्या अचीत्यादिनेति । प्लुतानां प्रगृह्यस्य च द्विवचनेदूदादेः स्वरे विसन्धिप्रतिपादकेन [1]**सूत्रेण** ।

आदेशपक्षे तु न किञ्चिदनुपपन्नमिति । आदेशपक्षो हीकारप्रसङ्गे यकार उच्चार्य इत्येवंरूपः । स च शब्दान्वाख्यानानुसारेणैव प्रवर्तते इति विधिरूपं प्रतिषेधरूपं च शब्दान्वाख्यानमादेशपक्षे सफलमेवेत्यर्थः ।

॥ इति शब्दपरिणामनिराकरणपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 पा. सू. VI. i. 125

॥ शब्दशक्तिपरीक्षाप्रकरणम् ॥

[२.२.५८–६९]

उने ॥ तथा विवर्तते इति । ककारादिनानारूपो गृह्यते इत्यर्थः ।

निरसिष्यन्त इति । **नैयायिकैकदेशीयाः** ।

कस्यचिदर्थस्येति । कादेः ।

अनेकवदिति । यथा अनेकस्य विवर्तो न संभवति ।

परिणमते इत्यस्यैवार्थमाह—**उपजनेति** ।

इति को नेच्छतीति । एवंभूतो ह्याकाश एव । स चास्माभिरपीष्यत एवेत्यर्थः ।

पूर्वमेवेति । शब्दानित्यत्वपरीक्षाप्रकरणे एव ।

एषोऽप्यर्थ इति । एक एव शब्दो धर्मी तथा विवर्तते परिणमते चेत्ययम् ।

उत्तरस्तु विचार इति । पदार्थविचारः ।

विषये इति । विचारविषये पदे धर्मिणि ।

विप्रतिपत्तिमिति । वर्णातिरिक्तं पदमित्यभ्युपगमरूपाम् ।

धर्मविचार इति । व्यक्ति [ः] पदार्थो जातिर्वा व्यक्त्याकृतिजातयः पदार्थ इति युक्तमित्येवंविधः ।

तदर्थं विषयेति । धर्मविचारार्थं धर्मविचारस्य विषयभूतं यत्पदं तस्य विप्रति-
[741b] पत्तिनिराकारकं यत्स्वरूपं तत् ।

अस्येति । सूत्रस्य ।

टीयाम् ॥ नागदन्तका इति घोडुलेति प्रसिद्धाः ।

उने ॥ तेन रूपेणेति । व्यक्तत्वेन ।

टीयाम् ॥ कोऽयं संस्कारोऽभिमत आयुष्मतः ? स्मृतिबीजमन्यो वा ? न तावत् स्मृतिबीज-मित्याह—**भावनापरनाम्न** इति ।

तत्काले इति । स्वार्थसङ्केतस्मृतिकाले ।

न हि चिरध्वस्तस्येति । सङ्केतग्रहो ह्यर्थप्रत्यये स्वरूपेणोपयुज्येत सङ्केत-ग्रहमन्तरेण तत्स्मृतिर्न भवतीत्यतः स्मृतिद्वारेण वा ? नाद्यः, तत्स्वरूपस्य चिरध्वस्तत्वात् । नापि द्वितीयः, तत्स्मृतेरनपेक्ष्यत्वाभ्युपगमादित्युभयथापि सङ्केतग्रहस्य नोपयोगो यत इत्यर्थः ।

द्वितीयं कल्पमाशङ्क्य दूषयति—**नाप्यन्य** इति ।

उने ॥ **व्रीह्यादेः प्रोक्षणेति** । यथा यागे होतव्यव्रीह्यादेः प्रोक्षणादिभिर्मन्त्राधि-वासनादिभिरात्मनि अपूर्वाख्यः संस्कारो जन्यते, तथा पूर्ववर्णानुभवैरपूर्व एव कश्चित् संस्कार आत्मनि जनित इति भावः ।

टीयाम् ॥ न तावदसावेको वर्णानां जन्यः संभवति यथैव प्रत्येकसंघातविकल्पानुपपत्तेर्वर्णा नार्थप्रत्ययमाधातुमुत्सहन्ते, तथैवैकं संस्कारमपि नाधातुमर्हन्ति । तस्मात् वर्णैः क्रमशालिभिः प्रत्येकं संस्कारा जन्यन्ते इत्यभ्युपगन्तव्यमिति स्थिते दूषणमाह—**अनेकादृष्टेति** ।

उने ॥ ननु वर्णानां यन्नानात्वं गृह्यते तद्भ्रान्तमेव भविष्यत्यतो नैकस्य नानात्वविरोध इत्याशङ्क्याह—**न चायमिति** । वर्णनानात्वग्रहरूपः ।

टीयाम् ॥ **आलम्बते** इति । अनुभवः ।

नन्वर्थप्रत्ययमिव वर्णाः स्फोटमपि कथं व्यंक्ष्यन्तीत्यत आह—**तच्चेति** । पदं वाक्यं वा ।

ननु प्रत्येकमभिव्यञ्जकत्वे ध्वनीनां प्रथमादेव ध्वनेः पदस्य प्रतीतत्वादानर्थक्य-मन्येषां ध्वनीनामत आह—**केवलमिति** ।

ननु पूर्वध्वनयोऽर्थमेवारूपमवभासयिष्यन्ति, चरमस्तु व्यक्तम् । तत्किमनेनार्थप्रत्य-यार्थं स्फोटेन कल्पितेनेत्याशङ्क्याह—**न चेयमिति** ।

अपरिहृतं पूर्वपक्षं मन्यमान आह—**इदमत्राकूतमिति** ।

अभिन्नकारकावस्थावत्तयेति । अर्थप्रतिपत्तिं प्रति साधकतमत्वलक्षणाभिन्नव्यापारवत्तया ।

भाक्त इति । एकस्मृत्यारूढत्वेन स्मृतिगतस्य वा एकार्थप्रतिपादकत्वेन विषयगतस्य वा अर्थप्रतिपत्तिं प्रति साधकतमत्वरूपैकव्यापारवत्त्वेन स्वव्यापारगतस्य वैकत्वस्य घटादिवर्णेष्वारोपादौपचारिकः ।

ननु यद्येकस्मृतिसमारोहित्वेन बहुष्वपि वर्णेषु पदमित्येकत्वव्यपदेशः, तदा निरर्थकेषु ग ज ड द वादिष्वपि पदत्वप्रसङ्गः स्यात् । तस्मादेकार्थधीहेतुतया वा अभिन्नकारकावस्थावत्तया वा असावास्थेयः । तत्र चान्योन्यसंश्रयं दूषणमित्याशङ्क्य निराचष्टे—**न चैवमिति** ।

अभिन्नार्थस्यार्थस्याधिगमोऽभिन्नेन साधकतमत्वरूपेण व्यापारेण अर्थस्याधिगमो वेत्यर्थः ।

तन्मात्रस्य वेति । एकस्मृत्यारोहिघटादिवर्णसमुदायमात्रस्य ।

स्वार्थे इति । कम्बुग्रीवादिमदादौ ।

तदुत्तरकालत्वाच्चेति । संकेतग्रहणोत्तरकालत्वात् ।

पदमिति कारकेति । [742a] पद्यते गम्यते कारकसंसृष्टोऽर्थोऽनेनेति ।

पदमिति । करणकारकप्रधानशब्दप्रवृत्तेः ।

इतरथेति । कारकशब्दप्रवृत्तेः प्राक् कारकशब्दवाच्यानामर्थक्रियाकारित्वानभ्युपगमे ।

इतरेतराश्रयत्वमिति । क्रियासंबन्धावगमात् कारकशब्दवाच्यत्वावगमः, कारकवाच्यत्वावगमाच्च क्रियासंबन्धावगमे इतिरूपम् ।

तदनुपातित्वाच्चेति । कारकानुपातित्वाच्च कारकशब्दानाम् ।

व्यपदेशमात्रानुरोधेनेति । पदमिति व्यपदेशमात्रालम्बनेन ।

वर्णविभागेति । वर्णविभिन्नत्वेनाप्रथमान इत्यर्थः ।

नापि निर्भागस्येति । परैर्हि स्फोटो निर्भाग इष्यते । तस्य च पूर्वध्वनय आरूपमेव भासयन्ति । चरमस्तु व्यक्तमित्येवं स्फुटत्वास्फुटत्वे भागकल्पना वा न युज्यते ।

निर्भागस्य हि स्फोटस्य स्फुटत्वास्फुटत्वे भागविपर्यासो वा अदृश्यस्य वा स्यात्, दृश्यस्य वा ? तत्राद्यं दूषयति--**नो खल्विति** ।

नापि समारोपविषय इति । विशेषाग्रहनिमित्तत्वात् समारोपस्येति भावः ।

द्वितीयं दूषयति --**न च निर्भागे** इति ।

तदेव तेनेति । एकमेव एकेनैव स्वरूपेण ।

मैष धादिति । नित्यत्वेनाभ्युपगम्यमानः पदात्मा मा कार्षीन्नित्यमर्थप्रत्ययम् ।

मा भूदनुमानमर्थापत्तिस्तु भविष्यत्यत आह--**न चेयमर्थधीरिति** । ननु वर्णानां वास्तवः क्रमोऽपि बुद्धिनिमित्तः । सा चैका सकलवर्णावगाहिनी स्मृतिरूपाभ्युपेयते इति नाक्रमानुक्रमविपरीतक्रमाणां विशेषः प्राप्नोतीत्यत आह--**न चाक्रमेति** । अक्रमा युगपद्भाविनः ।

उने ।। ननूच्चरितध्वंसिनां वर्णानां क्रमः संभवत्येव न, तत् कथमपि तु क्रमेत्यादि **टीका ?** अत आह--**पूर्वपूर्वेति** ।

एतच्च सर्वमिति । क्रमन्यूनातिरेकाद्युपहितत्वेऽर्थे प्रतिपादकत्वम् ।

सामयिकचेष्टासमूहे इति । भोजनादिज्ञापकसाङ्केतिकहस्तादिविन्यास-विशेषादिसमूहे ।

टीयाम् ।। **तत्तदुपधानाच्च तत्त्वेऽपि वर्णानामिति** । वर्णानां तत्त्वेऽप्यभेदेऽपि तत्तदुपधानात् नदी दीन इत्यादीनां क्रमविशेषेण कलेत्यादीनां न्यूनताविशेषेण कलकलेत्यादीनामतिरिक्तत्वविशेषेणोपधानात् ।

उने ।। **क्रियाविशेषेति** । क्रियाविशेषयोगेन क्रियाविशेषयोगेनेति पदेन विशेषणस्य क्रियाविशेषयोगरूपस्य ।

अस्येति । अविनाभावस्य ।

शब्दस्वरूपपर्यालोचने चेति । शब्दस्वरूपविचारप्रस्तावे चार्थभणनम-प्रस्तुतमित्यर्थः ।

टीयाम् ।। ब्राह्मणपदान्न काचित् क्रिया प्रतीयते । अतः कथं क्रियादिसमुच्चयस्तदर्थत्वेनोच्यते ? अत आह—**अत्र हीति** ।

उने ।। **ब्राह्मण इत्यस्मादितीति** । सविभक्तिकादित्यर्थः ।

टीयाम् ।। आख्यातलक्षणमिदमव्यापकं यजेतेत्यादौ क्रियायाः कालसंबन्धाबोधादत आह—**क्रियायाः कालयोगः पूर्वापरीभाव** इति ।

उने ।। **पूर्वं त्विति** । क्रियाकालयोगाभिधायीत्येतत् ।

पञ्चमभाष्य इति । पञ्चमाध्याय**भाष्ये** ।

विशेषचिन्तेति । व्यक्त्यादिविशेषवाचकत्वविचारः ।

तदेवेति । वाचकत्वमात्रमेव ।

टीयाम् ।। तस्मात् पदमवाचकमिति **वार्त्तिक**मसङ्गतम् ।

[742b] न हि व्यवहारानुपयुक्तमपि सामान्यं प्रतिपादयत् पदमवाचकम् । अत आह—**न चास्येति** । विशेषस्य ।

तदिति । तस्मात् ।

न पदार्थचिन्तावसर इति । अवाचकत्वनिष्प्रयोजनत्वाभ्यामिति भावः ।

न तावदित्यादि । यदि पदातिरिक्तं वाक्यं वाक्यार्थस्य प्रतिपादकं स्यात्, वर्णमाला वा पदार्थप्रतिपादनावान्तरव्यापारशून्या वाक्यार्थं गमयेत्, ततो भवेन्निष्प्रयोजनत्वेन पदार्थविचारोऽनवसर इति भावः ।

अधस्तादिति । शब्दसामान्यपरीक्षाप्रकरणे ।

तस्या इति । वर्णमालायाः ।

तदवबोधने इति । वाक्यार्थबोधने ।

उने ।। **अन्विताभिधानमिति** । पदार्थान्तरैरन्वितस्य पदार्थस्याभिधानम् ।

अधिकरणमिति । तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशय इत्यादिको विचारः ।

टीयाम् ॥ भवतु वा पदादेवोभयमिति **वार्त्तिकं** प्रकृतसंबद्धत्वेन व्याख्यातुं पीठमारचयति—**एवं तावदिति ।**

उने ॥ **एवं सतीति ।** यदि क्रिया क्रियासाधनं च पदार्थस्तदा ।

तामेवेति । वादिविप्रतिपत्तिमेव ।

टीयाम् ॥ ननु यदि याशब्दादिप्रयोगसामर्थ्याद् व्यक्तिरेव गोशब्दवाच्या, तर्हि गोशब्दाद् या काचिद् व्यक्तिरनियमेन प्रतीयेतेत्यत आह—**गोत्वं चेति ।** गोत्वोपलक्षितव्यक्त्यभिधानाभ्युपगमात् नातिप्रसङ्ग इति भावः ।

नन्वनवगतोपाधेरुपहितप्रत्ययायोगादुपाधिरप्यभिधेयः स्यादत आह—**न चोपाधिरिति ।**

तच्छब्देनेति । उपहितवाचकेनेत्यर्थः ।

गार्गिकयेति । अत्र हि गोत्रचरणाच्छ्लाघात्याकारतदवेतेष्विति[1] **सूत्रेण** श्लाघायां विषयभूतायां गोत्रवाचिनः प्रातिपदिकाद्भावे वुञ् विधीयते । तेनायमर्थो गार्ग्यत्वेनात्मानं विकत्थते स्तौतीत्यर्थः ।

टीयाम् ॥ नन्वतिप्रसङ्गवारणायोक्तं गोत्वमुपाधिर्भविष्यतीत्यत आह—**नाप्रतीत** इति ।

तस्येति । उपाधेः ।

तद्विशेषेति । पशुविशेषः ।

उने ॥ **अवाचकमपीति ।** इतिहरिरित्येतत् ।

तत्रैवेति । पशुत्व एवं ।

किमत्र क्रियतामिति । स्वभाव एवायमीदृश इत्यर्थः ।

तदवाचकमपीति । श्लाघालक्षणोपाधेरवाचकमपि ।

---

1 Pā Sū. V. i. 134

टीयाम् ॥ न च प्रयोगादेवेति । इतिहरिरिति कृदन्तं पदं वृद्धैः पशावेव कर्तरि प्रयुज्यते, नान्यत्र। अतश्च प्रयोगादेवोपाधेर्लब्धत्वात् नैतत्पदवाच्यत्वमिति न युक्तमित्यर्थः।

तदुपाधीति । यदि हि पशुरूपोपाध्यनभिधायी इतिहरिशब्दः, तदा पशावेवासौ कुतः प्रयुज्यते इति प्रयोगनियमहेतुर्वाच्य इत्यर्थः।

ननु पश्वनभिधाय्यपि इतिहरिशब्दोऽनादिप्रवाहेण लोकैः पशावेव प्रयुज्यते नान्यत्रेत्यपर्यनुयोज्यः प्रयोगनियम इत्याशङ्कयाह—**नन्विति ।**

उने ॥ स इति। प्रयोगनियमः।

भाष्ये ॥ जात्येति । इदमविशिष्टमित्यनेन संबन्धनीयम्। न त्वभिधीयते इत्यनेन।

उने ॥ अनुपपत्तिमुखेनेति । मुख्यार्थस्य।

तदितरकल्पनायामिति । तस्माद् यज्ञादेरितरस्य ब्राह्मणादेरेव कल्पना न स्यात्, किं तु यस्य कदाचिद् यज्ञादिसहचरणादि तस्यापि कल्पना स्यादित्यर्थः।

मुख्यार्थोच्छेदप्रसङ्गादिति । [743a] यत्र यष्टिकांश्छिन्धीत्यादौ मुख्यार्थ उपपद्यते तत्राप्यौपचारिकार्थस्य ब्राह्मणादेः प्रसङ्गादित्यर्थः।

टीयाम् ॥ एकार्थसमवायादिति । समवेतसमवायादिति बोद्धव्यम्। संस्थानस्यावयवसंयोगभेदरूपस्यावयवेषु समवेतत्वेन जातेश्चावयविनि समवेतत्वेन जात्या सहैकार्थसमवायस्यासंभवात्।

व्यावर्त्तमानाभ्यामिति । व्याक्त्याकृती हि एकस्मिन् गोपिण्डे अनुवर्तते, अन्येभ्यस्तु व्यावर्तते।

वाके ॥ चित्रादिवदिति । चित्रालिखितगोरूपकादाविव।

नाम्नि विवादो नार्थे इति। अनुवृत्तिप्रत्ययनिमित्तस्याकृतिरिति नाम तव मते, मम तु जातिरिति।

यस्य **सूत्रस्य** व्याघातः, तत् पठति—**सामान्यविशेषेष्विति । तैरपि त्वदेकदेशैरिति ।** तैरपि पुनरेकदेशैरेकदेशेषु सामान्यं वर्तत इति।

वाके ॥ **व्यक्त्याकृती इति प्राप्ते** इति । व्यक्तेरल्पस्वरत्वात् अल्पस्वरतरं तत्र पूर्वमिति वचनात् ।

उने ॥ **व्यक्त्याकृतिलाभे** इति । उपचारेण ।

तदभिधानेति । व्यक्त्याकृत्यभिधानं ।

इत्युक्तमिति । जातिमात्रपदार्थवादिना स्वशास्त्रे ।

टीयाम् ॥ **एकपदे** इति । युगपत् ।

न तु पुनरिति । नैव पुनस्तथेह गौरित्यादिष्ववगतिरिति संबन्धः ।

वाक्यार्थेन तत्संबन्धानुपपत्तेरिति । वाक्यार्थेन गङ्गाया घोषं प्रत्याधारत्वलक्षणेन गोवाहीकयोः सामानाधिकरणलक्षणेन वा हेतुभूतेन यस्तत्संबन्धः स्रोतोरूपाया गङ्गाया घोषेण सह ककुदादिमतोऽर्थस्य वाहीकेन सह वा संबन्धस्तदनुपपत्तेः । एतेन मुख्यार्थबाधो दर्शितः ।

तदविनाभावेनेति । स्रोतोरूपगङ्गाविनाभावेन ।

लक्ष्यमाणेति । लक्ष्यमाणा ये गुणा गोसंबन्धिनो जाड्यमान्द्यादयः तद्योगेन ।

उने ॥ **एतदिति** । एकपदे व्यक्त्याकृतिजातीनां तिसृणामपि निर्भासज्ञानम् ।

आनन्त्येति । व्यक्तीनामाकृतीनां चानन्त्याद् व्यभिचाराच्च शक्यसङ्केतग्रहत्वेन यथाभिधानं न संभवति, एवं पराभ्युपगता लक्षणापि न संभवति । यतो जात्या व्यक्त्याकृती तदा लक्ष्येते यद्यनयोर्जात्या सहाविनाभावग्रहः स्यात् । न चासौ युज्यते, आनन्त्यव्यभिचाराभ्यामेवैतयोरित्यर्थः ।

कथञ्चिद् योगेऽपीति । अविनाभावस्य ।

ननु पदेनैकस्या जातेरभिधाने कल्पनालाघवं व्यक्त्याकृत्योरप्यभिधाने कल्पनागौरवं दोषः स्यादित्यत आह—**कल्पनेति** ।

ननु किमिदमिति । अपि च न रूपिशून्या रूपावगतिरित्यनेन जातिर्न रूपिशून्यावगम्यते रूपत्वादिति हेतुर्ज्ञापितः । तद्यदि रूपत्वं रूपिसमवेतमात्रत्वं रूपिधर्मत्वं

वा, तदा त्रसरेण्वादिभिर्गन्धादिभिर्वा व्यभिचारः। अथ जातित्वं तदा असाधारण्यं जातिपक्षं विना अन्यत्र सत्त्वेन जातित्वस्य रूपिशून्यानवगमेन सह क्वचिदपि व्याप्त्यसिद्धेः। तस्मात् किमिदं रूपत्वं नामेत्यतो रूपत्वस्य विवक्षितमर्थमाहेत्यर्थः।

आश्रयेणैव सहेति। न तु केवला।

तात्पर्यार्थमाह--**व्यक्तियोग्यतामिति**। व्यक्तेर्ग्रहणयोग्यतामन्तरेण जातेर्ग्रहणयोग्यता नास्तीति भावार्थः।

इदमिति। जात्यभिधानेनैव व्यक्तिप्रतिपत्तिर्भविष्यतीति किं व्यक्त्यभिधान-[743b] कल्पनयेत्येतत्।

अतिप्रसङ्गादिति। यदि व्यक्तिः स्वत एव प्रतीयते तदा शब्दोच्चारण-मन्तरेणापि प्रतीयेतेति भावः।

सत्तामात्रेणेति। यदि जातिः स्वसत्तामात्रेण व्यक्तिं गमयति, तदा जातेर्नित्यत्वात् नित्यं व्यक्त्यवगमप्रसङ्गः। अथ प्रतीता सती व्यक्तिमवगमयति, तदा गम्यगमकयोर्भिन्नप्रत्ययविषयत्वात् यदेतत् व्यक्तिजातिनिर्भासरूपप्रत्ययस्यैक्यं तद् व्याहन्येतेत्यर्थः।

शब्दसहकारिस्वीकारे इति। शब्दसहकृता सती व्यक्तिरवसीयते इत्यभ्युपगमे।

तत्रेति। व्यक्तौ विषये।

तच्छक्तिरिति। शब्दशक्तिः।

तस्माच्छक्तिभेदेऽपीति। शब्दस्य व्यक्तावपि सामर्थ्यं तावदस्त्येव परं तदन्यत् जातावन्यच्च व्यक्तावित्येवं यः सामर्थ्यभेदः केनाप्युच्येत सोऽपि।

एतावन्मात्रमिति। न तु शब्दस्य व्यक्तेरप्यभिधायकत्वम्।

टीयाम्॥ ननु पदमर्थे समर्थमिति लोके प्रयुज्यते, अर्थश्च जातिव्यक्तिरूपो भिन्न एवेति पदस्य सामर्थ्यभेदः कल्पनीय एव स्यादित्याशङ्क्याह--**तद्द्वारेण त्विति**। कार्यस्यानुभवस्य द्वारेण।

कर्मण्यपीति। कार्यस्यानुभवस्य व्याप्येति।

अन्यदिति । सङ्केतादपरम् ।

उने ॥ तदिदमिति । कार्यव्यङ्ग्यं हीत्यादेः शक्तिभेदोऽपि नास्तीत्येतावन्मात्रप्रतिपादकत्वम् ।

विभावयतीति । शब्दस्य व्यक्त्यभिधायकत्वे युक्त्यन्तरोपदर्शनेन ।

टीयाम् ॥ तत्रेति । व्यक्तौ ।

अर्थस्यैवेति । जातेः ।

वाके ॥ गवाश्वमिति सामानाधिकरण्यमिति । गौश्चासावश्वश्चेत्येवम् ।

गुण इति । अप्रधानं धर्म इत्यर्थः ।

व्याख्यात इति । सच्छब्दानभिधेयत्वेन ।

संबन्ध इति । सङ्केतः ।

परिप्लवते इति । भ्राम्यति ।

तद्भेदा इति । सद्भेदाः ।

तद्गतेति । सद्गत ।

तद्गतामिति । जातिमतां घटादीनाम् ।

टीयाम् ॥ वृत्तियौगपद्यमिति । जातौ तद्वति च ये वृत्ती तयोर्यौगपद्यम् ॥

वाके ॥ अन्यत्रेति । स्वलक्षणान्तरे सत्प्रत्ययाभावप्रसङ्गात् ।

टीयाम् ॥ तदर्थमिति । व्यक्तिज्ञानार्थम् ।

द्वयोरपीति । व्यक्तिजात्योः ।

अस्येति । जातिशब्दस्य ।

अत्रेति । जातिमद्व्यक्तिमात्रे ।

व्यक्तिनियम इति । नियता घटादिव्यक्तिः ।

तत्रेति । व्यक्तिनियमे ।

अस्मिन् पक्ष इति । व्यक्त्याकृतिजातयः पदार्थ इति पक्षे ।

जातिव्यक्तिशब्दयोरिति । सच्छब्दघटादिशब्दयोः ।

उने ॥ ननु यदि जातिव्यक्तिशब्दावेकार्थाभिधायिनौ तर्ह्येकतरस्याप्रयोगः प्राप्नोतीत्याशङ्क्याह—**जातिशब्दस्येति** ।

यदि सत्ताया न वाचकः केन संबन्धेन सत्तायाः शब्द इति । न हि सत्ताया अवाचकः सन् शब्दोऽसत्ताशब्दः सत्तायाः संबन्धी शब्दो भवितुमर्हति शब्दार्थयोः संबन्धान्तरानिरूपणादित्यर्थः ।

न वाचक इत्येतावन्मात्रेणैवेति । न तु तस्या इति सहितेन ।

व्याघातादिति । सत्तारूपेण शब्देन सत्तार्थप्रतिपादनस्य ।

टीयाम् ॥ ननु यथा सत्तानभिधायित्वे सति सत्ताशब्द इति व्यपदेशो नोपपद्यते, तथा सत्ताया इति शब्देन सत्तानिर्देशोऽपि न घटतेऽतस्तदपि दर्शनीयमित्यत आह—**सत्ताशब्द इति चेति** ।

उने ॥ **सर्वेष्टीनामिति** । सर्वाभ्युपगमानाम् ।

विषय इति वार्त्तिके शेष इति । विषय इति **वार्त्तिके** [744a] वर्तमानं **टीका**यामित्यर्थ इत्यतः प्राक् शेषो ज्ञेय इत्यर्थः ।

स चेति । विषयः ।

तदाकारप्रतीतेराश्रयत्वमेव भावयति—**तमाश्रित्येति** । तदाकारप्रतीतिलक्षणं स्वात्मानम् ।

अतस्मिंस्तदाकारप्रतीतिरूपतयैव भ्रान्तिरुत्पद्यते इति भावार्थः ।

विषयशब्दमाश्रयलक्षणगौणार्थत्वेन व्याख्याय गोचरलक्षणमुख्यार्थत्वेनैव व्याचष्टे—**यद्वेति** । अतस्मिंस्तदाकारा प्रतीतिर्भ्रान्तित्वेन व्यवह्रियते इत्यर्थः ।

अतथेति । अतथाभूतस्येत्यनेन तदाकारा प्रतीतिरिति संबन्धनीयम् ।

सामान्य इति । सामान्यं जातिमाश्रित्य ।

टीयाम् ॥ **जातिशब्द इतीति** । जातिशब्द इत्येवं प्रकारेण ।

प्रतिषेधतीति । जातिशब्दः कथं भेदानां वाचक इत्येवम् ।

अस्येति । कश्चैवमाह जातिशब्दो भेदानां वाचक इति वदत आचार्यस्य ।

वाके ॥ **शब्दं पक्षयसि आनन्त्यादिति वस्तुधर्मं हेतुत्वेनाभिधत्से** इति । सच्छब्दः पिण्डानां वाचको भवति इति न युक्तः पिण्डानामानन्त्यादित्येवम् ।

एकदेशानिति । भेदानाम् ।

टीयाम् ॥ **विशेषणोपादानविरोधादिति** । भेदमन्तरेण वस्तुनोऽभावात् भेदानां च वाचकशब्दाभावात् व्यवच्छेद्याभावेन भेदा इत्यस्य जातिशब्दवाच्य इत्यस्य च विशेषणस्यानर्थक्यादित्यर्थः ।

एतदेव भावयति—**न हीति** । न हि शब्दोऽर्थे इदं द्रव्यं सत्त्वादित्येवं यदि शब्दोऽर्थप्रत्यायने लिङ्गं भवेत् तदा सद्गुणाद्यप्यस्तीत्येवं व्यभिचारेण दुष्येत् । न चैवं शब्दोऽर्थप्रत्यायने लिङ्गम् । तस्मात् न व्यभिचारेण दुष्येदित्यर्थः ।

विशेषमात्रमिति । द्रव्यादिमात्रम् ।

विशेषशब्देनेति । द्रव्यादिना ।

असाविति । विषयः ।

तदन्तरेणेति । द्रव्याद्यन्तरेण सत्ताशब्दानुपपत्तेः ।

तदर्थक्रियेति । स्वाम्यर्थक्रिया ।

वाके ॥ **न चास्येति** । विशेषणस्य ।

जातिशब्द इति । सत्ताशब्दादिः ।

टीयाम् ॥ यच्चोच्यते न जातीत्यादौ ।

वाके ॥ कथं विशिष्य वक्तव्यमित्याह—**अस्मत्प्रक्लृप्तेति** ।

बौद्धप्रक्लृप्तयथासुतिवाक्ये इति । न जातिशब्दो भेदानां वाचक इत्यस्मिन् ।

उने ॥ **इत्यर्थ** इति । व्याघातद्वयमित्यस्य ।

इति न विचारार्थ इह स्फुट इति । इत्येवंविधो विचारार्थः प्रथमव्याघात-परिहारोपयोगी इहोपचारतो न व्याघात इत्यादि **वार्त्तिकेन** स्फुटः ।

निमित्तभेदेनेति । असद्व्युदासाद्व्यव्युदासरूपेण ।

तेनेति । येनाध्यवस्यत इति तात्पर्यम् ।

ननु शब्देनेति । ननु लक्षणादिवृत्त्यन्तरासंभवे सति शब्देन यत्प्रतिपादनमर्थ-प्रतिपत्तिजननं तदेवाभिधानं नान्यत्किञ्चित् । ततश्च ब्रूते अध्यवस्यत इत्युक्तेऽपि अध्य-वसानस्य प्रतिपादनरूपत्वादेकस्यार्थस्य स्वलक्षणस्याभिधानमायात्येवेत्यर्थः ।

तच्चेति । एकविषयत्वम् ।

दुरुत्तरमिति । इतरेतराश्रयम् ।

भिन्नप्रस्थानत्वादिति । शब्दो हि संकेतग्रहणादिप्रस्थानो विकल्पस्तु निर्वि-कल्पकपूर्वकत्वादिप्रस्थानः ।

एतदिति । एकविषयत्वम् ।

ननु सदवगाह्यसदवगाहीति द्वय्या सद्धर्म्यवगाह्यसद्धर्मावगाहिविकल्पानां संग्रहः स्यात् । यस्तु सच्चासच्चावगाहते यश्च न सदवगाहते नाप्यसत्, न तयोः संग्रहः । तत् कथमुक्तं द्वयीत्येव सर्वसंग्रह इत्याशङ्क्याह—**सदसदिति** ।

[744b] **टीयाम्** ॥ **एवमिति** । एकत्वेनानुसंबन्धीयन्ते ।

तद्वत्ताया इति । तानी सामान्यानि सन्त्येषां तानि तथा तद्भावस्य ।

स्वलक्षणमिति । कर्तृ ।

वृक्षत्वमिति । कर्म ।

एकोपकारके इति । एकस्य वृक्षत्वाद्येकतरस्य सामान्यस्योपकारके स्वलक्षण-स्वभावे ।

सामान्यवद्भेदगोचरा इति । सामान्यवन्तश्च ते भेदाश्च स्वलक्षणानि ते गोचरा येषां ते तथा ।

ज्ञानतद्ग्राह्येति । ज्ञानगोचरत्वं ज्ञानग्राह्याकारगोचरत्वं च ।

आरोपयतीति द्विकर्मकम् ।

अविकल्पस्वसंवेदनेति । विकल्पेन स्वगोचरोऽनहङ्कारास्पदं यथा भवति, तथारोप्यमाणः स्वाकारादभेदेन प्रतिपाद्यमानो न शक्यः स्वाकारादभिन्नः प्रतिपत्तुमिति योजना । एतदुक्तं भवति । सर्वे विकल्पाः स्वात्मनि प्रत्यक्षाः । तेन यस्मिन्नेव क्षणे स्वसंवेदनप्रत्यक्षमहङ्कारास्पदं स्वविषयाद् भिन्नमाकारं बोधयति विकल्पो न तस्मिन्नेव क्षणे विकल्पः स्वविषयेण स्वाकारस्याभेदमध्यवसातुमीष्टे भेदाभेदप्रतीत्योर्युगपद्विरोधादिति ।

ननु मा भूद् विकल्पाकारेण विकल्पविषयस्याभेदप्रतिपत्तिः, स्वलक्षणे न तु बाह्येन भविष्यतीत्यत आह—**नापीति** ।

तद्वतामिति । विकल्पविज्ञानवताम् ।

अस्येति । अलीकस्य ।

बाह्ये इति । स्वलक्षणे ।

तदुपनीतेति । निर्विकल्पोपनीत° ।

ननु अलीकानां नानात्वात् कथमेकावभासिनी बुद्धिरत आह—**तेषां चेति** । विकल्पविषयाणामलीकानामिति शेषः । अलीकत्वादेव न तेषां भेदोऽस्तीति न गृह्यते इति भावः ।

तदभेदादिति । विषयाणामलीकानामभेदात् ।

अवमर्शानामिति । विकल्पानाम् ।

तथा हीति । भावाभावसाधारण्यादीनामुपदर्शने ।

न चायमसिद्धो हेतुरनुभवसिद्धो ह्युभयसाधारणरूपावलम्बनो विकल्प इत्याह—**गौरस्तीति** ।

ननु भावाभावसाधारणोऽपि विकल्पविषयोऽन्यव्यावृत्तिरूपो न भविष्यतीति कोन्वत्र विरोधः ? अत आह—**नानिमित्तमिति** ।

विधिरूपविषयस्येति । विधिरूपस्य बाह्यस्वलक्षणस्य ।

तत्स्वरूपविषयस्य चेति । तस्य भावाभावसाधारणग्रहणस्य यत्स्वरूपं बाह्यतयाध्यवसीयमानः स्वात्मा तल्लक्षणो यो विषयः, तस्य वा ।

तत्रेति । भावाभावसाधारणग्रहणे निमित्तभावः संभवतीति । उक्तादेव विरोधादिदोषादितिभावः ।

विषक्तादिति । विधिरूपात् स्वलक्षणान्निवर्तमानमिति संबन्धः ।

तदनुपलब्ध्येति । निमित्तवत्तानुपलब्ध्या ।

स्वसाध्येनेति । अन्यव्यावृत्तिरूपेण ।

तथोपपादितमिति । नोपाधीनां परस्परं तादात्म्यं नाप्युपाधिमतः, येनैकोपाधिविशिष्टस्य ग्रहणे उपाध्यन्तरविशिष्टस्य ग्रहणं प्रसज्येतेत्युक्तम् । एवं स्वपक्षे परोक्तान् दोषान् परिहृत्यात्यन्तासतोऽलीकस्य प्रतिभासानुपपत्तेस्तादूप्यानुभवादिति हेतुमसिद्धतया दूषयति—**न चात्यन्तेति** । भावाभावसाधारण्यादिति हेतुरन्यथासिद्ध इत्याह—**न च शब्देति** ।

सन्दिग्धव्यतिरेकित्वादनैकान्तिकमिति । यदेवास्माकमन्यथासिद्धं तदेव **बौद्धानां** सन्दिग्धव्यतिरेकमनैकान्तिकमुच्यते ।

[745a] अलीकस्यानिरूप्यमाणत्वात् नान्यव्यावृत्तिरूपसाध्यधर्मवत्ता संभवतीति सालक्षण्यापादनादित्यसिद्धो हेतुरित्यत आह—**जातिमति चेति** ।

इदानीमन्यव्यावृत्तिरूपमलीकमङ्गीकृत्य तत्सारूप्यं स्वलक्षणस्य निराकरोति—**अपि चेति** ।

भाविकीति । वस्तुतः पारमार्थिकीति यावत् ।

न तावद् विधिरूपं स्वलक्षणमन्यव्यावृत्तिस्वभावं शक्यं शक्रेणापि संभावयितुं द्रवकठिनयोरिव विरोधेन तादात्म्यानुपपत्तेः । अथ विरोधं नाभ्युपगच्छसि, तर्हि तयोरेकत्वादन्यव्यावृत्तिरूपता अलीकस्य विधिरूपतैव । एवं च विधिरूपेणालीकस्य स्वलक्षणसादृश्योपपत्तेर्व्यर्थमन्यव्यावृत्तिरूपतोपपादनमित्याह—**अविरोधे चेति** ।

एवं विधिरूपतान्यव्यावृत्तिरूपतयोरेकत्वाभ्युपगमपक्षे दूषणेऽभिहिते परो भेदमवलम्ब्य शङ्कते—**विधिरूपेणेति** ।

न हि तुच्छस्यालीकस्यातुच्छं रूपं स्वलक्षणसाधारणं संभवति येन तेन रूपेणा-

लीकस्य स्वलक्षणसारूप्यं स्यात् । अतः सादृश्यान्योन्यव्यावृत्तिरूपता अलीकस्य व्युत्पाद्यते इति भावः । यथा तुच्छस्यालीकस्यातुच्छं रूपं स्वलक्षणसारूप्योपपादकं नास्त्येवं तुच्छं रूपं स्वलक्षणस्यालीकसारूप्यापादकं नास्तीत्याशयवानाह--**हन्तेति ।**

ओमिति ब्रुवाणं प्रत्याह--**तथा सतीति ।**

एवमन्यव्यावृत्तिर्भाविकी स्वलक्षणस्य स्वभाव इति पक्षं दूषयित्वा अन्यो वेति पक्षं दूषयति--**न च स्वलक्षणादन्येति ।**

ननु हस्तिमशकयो रासभो धर्मो न भवतीति न सरूपयति । न पुनरन्यत्वात् अन्यव्यावृत्तिस्तु भिन्नापि धर्मत्वात् सादृश्यमापादयिष्यति । अत आह--**न चेति ।**

परः पूर्वोक्तदोषपरिहारेण प्रत्यवतिष्ठते--**स्यादेतदिति ।**

यच्च गृह्यते इति । अलीकं सामान्यम् ।

यच्चाध्यवसीयते इति । स्वलक्षणं संतन्यमानम् ।

तामिमां कल्पनां निष्प्रयोजनत्वेन दूषयति--**अलीकस्येति ।**

तत्रेति । अलीके ।

एतदिति । अलीकम् ।

तस्येति । स्वलक्षणस्य ।

सिद्धान्त्याह--**अथास्येति ।** अस्यालीकस्य ।

विधिरूपेणापि प्रसङ्ग इति । तथा चान्यव्यावृत्तिरूपोपपादनमलीकस्यानर्थकमिति भावः ।

तस्या इति । अगोव्यावृत्तेः ।

तत इति । विधिरूपात् ।

तदेवं विकल्पद्वयेऽप्यर्थक्रियासामर्थ्यारोपणं दूषितम् । अथैतदन्यथा शङ्क्य दूषयति--**वह्निस्वलक्षणादिति ।**

तद्रूपसमारोप इति । तस्य वह्निस्वलक्षणस्य यद्रूपं दाहपाकादिसामर्थ्यं तस्य समारोपः ।

स इति । तद्रूपसमारोपः ।

तत्समयभावीति । स्वलक्षणसमयभावि ।

तदिति । स्वलक्षणं कर्म ।

तत इति । विकल्पात् ।

निर्विकल्पकव्यापारेति । निर्विकल्पकस्य व्यापारः साक्षात्कारः ।

तस्येति । स्वलक्षणस्य ।

तद्व्यापारपरामर्शादिति । तस्य निर्विकल्पकस्य व्यापारः स्पष्टाभत्वम् । तत्परामर्शः स्वकारणनिर्विकल्पकोपाधि स्पष्टाभत्वं विकल्पस्य तस्मादित्यर्थः ।

अतद्गोचरोऽपीति । अस्वलक्षणगोचरोऽपि ।

अनुभववासनेति । निर्विकल्पकरूपवासनाप्रभवाणां विकल्पानां तद्व्यापारपरामर्शादियं कल्पना भवेदपि, अविद्यावासनाप्रभवाणामनु[745b]भवव्यापारपरामर्शाभावात् तद्धेतुकेयं कल्पना नोपपद्यते इत्यर्थः ।

तस्मिन्निति । स्वलक्षणे ।

तदुत्पत्तिमात्रादिति । अनुभवोत्पत्तिमात्रात् ।

न भवितुमर्हतीति । रसानुभववासनाप्रभवस्य रूपविकल्पस्य रसगोचरत्वाभिमानप्रसङ्गादिति भावः ।

अगृह्यमाणे वेति द्वितीयं विकल्पं दूषयति—**अगृह्यमाण** इति ।

तदभाव इति । निर्विकल्पप्रभवत्वाभावः ।

तद्धीति । अलीकबाह्यत्वम् ।

अस्येति । बाह्यालीकस्य ।

तत्त्वमिति । भेदरूपम् ।

तद्भेदादिति । कल्पनाभेदात् ।

अभिलापसंसर्गायोग्यत्वमेव साधयति—**अभिलापेति** ।

तदिति । अलीकस्य बाह्यत्वम् ।

तेनेति । अभिलापेन ।

अतिप्रसङ्गादिति । स्वलक्षणेन ।

सेति । शक्यसमग्रता ।

तद्धर्म चेति । सोऽगोव्यावृत्तिर्धर्मो यस्य तत् ।

बिभ्यतोऽपीति । वयम् ॥

वाके ॥ इतरेतराश्रयत्वं दूषणमाह—**यावच्चेतरदिति ।**

टीयाम् । न च गोशब्दादभावं कश्चित् प्रतिपद्यते इत्यनेन न हि गोशब्दश्रवणादभावेन संप्रतिपत्तिरित्यस्य पुनरुक्ततामाशङ्क्य[1] व्याचष्टे—**प्रैषेति ।**

वाके ॥ द्व्यादिशब्दानां चेति । द्व्यादीनां समुच्चयशब्दानां समुच्चयविषयत्वादेकादिप्रतिषेधे सत्येकैकाङ्गप्रतिषेधे प्रतिषिध्यमानानामेकैकाङ्गानामसमुच्चयत्वादसमुच्चयस्य व्युदासेन समुच्चयशब्दानां प्रवृत्त्यभ्युपगमेऽङ्गप्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनोऽनभ्युपगमाद् द्व्यादिशब्दानामनर्थकत्वं प्राप्नोति ।

टीयाम् ॥ कर्मेति । अपोहो व्यावृत्तिक्रिया । तस्याः किं व्यावर्त्यमिति वक्तव्यमिति भावार्थः ।

वाके ॥ अन्यत्र प्रतिपत्तिरिति । गवि अपोहस्य प्रतिपत्तिः ।

टीयाम् ॥ यथा विज्ञानमिति । तथापोहोऽगोविषयोऽपि गोसंबन्धी भविष्यतीति पराशयः ।

वाके ॥ केनार्थेन षष्ठीति । व्यतिरिक्तस्यानाश्रितस्य तुच्छस्वरूपापोहस्य कस्मिन्नप्यर्थेऽनन्तर्भाविनासंबद्धत्वादिति भावः ।

अनवस्था वेति । अनपोहव्युदासेनापोहः प्रत्येतव्यः न चापोहोऽनवगतो निषेद्धुं शक्यते इत्यपोहापोहेनाधिगम्यः सोऽप्यपोहोऽनवगतो निषेद्धुभयोग्य इत्यन्ये-[2] नापोहनिषेधेन ज्ञेयः । सोऽप्यनपोहोऽन्येनापोहनिषेधेनेत्येवमनवस्थेत्यर्थः ।

---

1 संप्रतिपत्तिप्रतिपद्यते इत्यनयोरेकार्थतयेति प्रान्तटिप्पणम् । 2 S त्वनेन

अथावाच्य इति। यद्यपोहादिशब्देनापोहोऽवाच्यः, तदा शब्दोऽन्यशब्दान्तरार्थापोहं करोतीत्यत्रान्यशब्दान्तरार्थापोहमित्यस्यानर्थकस्य प्रयोगो व्याहन्यत इत्यर्थः। यदा तु करोतीत्यस्याभिधत्ते इत्यर्थस्तदा स्पष्ट एव व्याघातः।

स एवेति। अभिधेयोऽपोह एव।

किं व्याहतमित्याह—**अन्यशब्देति**।

श्रुतिरिति। शब्दः।

तदानीमिति। अपोहस्यैव स्वार्थत्वाभ्युपगमकाले।

टीयाम् ॥ **सामान्यगताविति**। यथा गौरित्यस्य गोत्वसामान्यावगतौ सत्यां बाहुलेयादिविशेषो ज्ञायते, तथा अनेकमित्यत्रापि एकत्ववर्जितसंख्यात्वसामान्यावगतौ सत्यां विशेषो द्व्यादिर्ज्ञेय इत्यर्थः।

अस्य तात्पर्यार्थमाह—**संख्यात्वेति**। यथा गोत्वसामान्यमाश्रित्य बाहुलेयादि विशेषेषु[746a]गोशब्दः प्रवर्तते, तथैकत्ववर्जितसंख्यात्वसामान्यमेवाश्रित्य द्व्यादिविशेषेष्वनेकशब्दः प्रवर्तते, न त्वन्यापोहमात्रमाश्रित्येति तात्पर्यार्थः।

न हि सामान्यशब्दाद् विशेषप्रतिपत्तिर्युक्तेति अयुक्तं सर्वत्र सामान्यशब्दानामेव सतां विशेषशब्दत्वाभ्युपगमात् विशेषशब्दैर्वृद्धव्यवहाराभावात्। तेन सामान्यशब्दा एव प्रकरणादिवशेन विशेषप्रतिपत्तिं कुर्वन्तो विशेषशब्दा इति व्यपदेशं लभन्ते। अत आह—**न ह्यसतीति**। न ह्यन्यापोहमात्रादिति संबन्धः।

अनीलानुत्पलव्युदासाविति। कर्मणी।

नीलोत्पलशब्दाविति। कर्तारौ।

टीयाम् ॥ [1]व्यक्तिर्गुणविशेषाश्रयो मूर्तिरिति लक्षणं यथा **भाष्यकारेण** व्याख्यातं तथा अव्यापकमित्याशङ्क्य **भाष्या**भिप्रायमाह—**यत्र हीति**।

तत्रेति। आकाशादौ।

1 II. ii. 69

यथाह **भाष्यकारो न सर्वं द्रव्यं व्यक्तिरिति ।** एतेन जात्याकृति-व्यक्तीनां समावेशे आकाशादिद्रव्यं न व्यक्तिरिति भाष्यार्थो दर्शितः ।

ननु गुरुत्वादीनां सामान्यगुणत्वाद् गुणविशेषग्रहणेनानुपादानात् यो गुणविशेषाणा-मित्युपक्रम्य गुरुत्वादीनामिति **भाष्य**मनुपपन्नम् । अत आह—**यद्यपीति ।**

तद्द्रव्यं मूर्त्तिरिति न घटते मूर्तेरसर्वगतद्रव्यपरिमाणत्वेनाद्रव्यत्वात् । अत आह **भाष्यकृत्–मूर्च्छितावयवत्वादिति ।**

तद्व्याचष्टे—**मूर्च्छिता** इति ।

ननु कथं याशब्दादि**सूत्रै**र्व्यक्त्यादीनामधिगतिः, तेषां वाच्यत्वप्रतिपादनपरत्वात् । अत आह—**स्वरूपेति ।**

तन्नान्तरीयकत्वादिति । तद्वाच्यत्वप्रतिपादनं नान्तरीयकमविनाभावि यस्य स्वरूपावगमस्य तद्भावात् ।

आक्षेपाभिप्रायमपरिहृतं मन्यमान आह—**एतदुक्तं भवतीति ।**

भेदमिति । स्वरूपभेदम् ।

वाके ॥ एतत् त्विति । अनन्तरोक्तं **भाष्यकार**कृतं **सूत्र**व्याख्यानम् ।

टीयाम् ॥ गुणाश्च ते विशेषाश्चेति । गुणाश्च ते आकृतेर्विशिष्यन्त इति विशेषाश्चेत्यर्थः । अत उपपद्यते विशेषाविशेषगुणानां संग्रहः ।

गुणेभ्यो व्यावृत्ता इति । गुणेषु न संभवतीत्यर्थः ।

वाके ॥ नन्वत्र व्याख्याने द्वन्द्वसमस्ते गुणविशेषाश्रय इत्यत्र पदे गुणकर्मवाचकगुणविशेष-शब्दाभ्यामपि मूर्च्छितावयवत्वार्थस्य मूर्तिशब्दस्य सामानाधिकरण्यं प्राप्नोति । न चैतद् युज्यते, गुणकर्मस्ववयवानामेवाभावात्, इत्यत आह—**आश्रयसमानाधिकरण** इति । मूर्तिशब्दार्थस्य द्रव्ये एव संभवेन द्रव्यस्यैव योग्यत्वादित्यर्थः ।

मूर्च्छयंत इति । परस्परमवयवैः संयुज्यते ।

टीयाम् ॥ द्वन्द्व एवेति । एकवचनं तु **सूत्रे** लिङ्गं संख्या कालश्चातन्त्राणि भवन्तीति वचनात् ।

मूर्च्छनमिति। अस्मिंश्च व्याख्याने मूर्तिशब्दो गुणकर्मद्रव्यसमानाधिकरण इति सिद्धम्।

मनुष्यजातिलिङ्गमिति। मनुष्यजातेर्लिङ्गं ज्ञापकम्।

वाके॥ शिरःपाण्यादीनां चावयवानामवयविविशेषदर्शने इति। शिरःपाण्याद्यवयवसंबन्ध्यवयविविशेषदर्शने।

टीयाम्॥ आमिक्षाया इति। शृतोष्णक्षीरगं दधि आमिक्षा।

वाजिनस्येति। आमिक्षामस्तुनः।

तद्व्यञ्जकस्येति। क्षीरजातिव्यञ्जकस्य।

टीयाम्॥ ननु सर्वथेति। जातित्वेनानभ्युपगतेषु पाचकादिष्वपि गतत्वेनापि व्यापकत्वादिति भावः।

व्यपदेशः संबन्धिनेति। एतेन व्यपदेशविषयत्वादित्यस्य गोर्गोत्वमिति गोरित्यनेन विशिष्यमाणत्वादित्यर्थो दर्शितः।

वाके॥ विचार इति। सामान्यतः [746b] परीक्षा।

तद्व्यवस्थितिरिति। प्रमाणानां विशेषतः परीक्षेत्यर्थः।

तत्त्वमिति। अनित्यत्वमादेशित्वम्।

टीयाम्॥ ननु यत्रानपुंसकेन सह नपुंसकस्य वचनं भवति तत्र नपुंसकशब्दः शिष्यते, एकवच्चास्य कार्यं भवति अन्यतरस्याम्। यथा शुक्ला च शुक्लश्च शुक्लं चेति शुक्लं शुक्लानीति वा, तथा अत्रापि कीर्तितं कीर्तितानीति वा भवितव्यम्। कथं कीर्तित इति पुंनिर्देशः? अत आह—**कीर्तित** इति।

K—न्यायाध्यायं द्वितीयं सलिलनिधिमिवागाधमध्यं विगाह्या-
दायार्थानर्घ्यरत्नोत्करमखिलमथो संप्रदायस्वतुल्यम्।

यो माहक्षार्थिलोकं व्यरचयदलभद्दातृसाम्राज्यमेतं
मातर्वाग्देवि लक्ष्मीतिलकयतिपतिं नन्दनं स्वं निरुञ्छ ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थान-न्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां द्वितीयोऽध्यायः संपूर्णः[1] ॥

---

1 J ॐ अर्ह । ओं नमः श्रीअरिष्टनेमये ॥

॥ इन्द्रियभेदपरीक्षाप्रकरणम् ॥

[३.१.१–३]

उने ॥ विद्यासन्ध्येति । विद्या सम्यग्ज्ञानमेव प्रभातसन्ध्या तस्या य [उदयोद्रेकः] उदयातिरेकस्तस्मात् ।

एवमिति । बुद्ध्युत्पादकप्रमेयपरीक्षायाः प्रथमाह्निकार्थत्वे ।

अत्रैवेति । प्रथमाह्निके एवान्तर्भावप्रसङ्गो बुद्ध्युत्पादकत्वात् ।

तथा प्रसक्ताविति । इन्द्रियान्तर्लक्षणीयत्वेन प्रसक्तावपि ।

तथापीति । यदि प्रमाणेन प्रमेयपरीक्षा जन्यते तथापि ।

तत्परीक्षाया इति । प्रमाणपरीक्षायाः ।

अपवादे इति । बोधे ।

निष्पादितेति । निष्पादिता क्रिया यस्य तस्मिन् ।

न चेदिति । अधिगतमिति संबन्धः[1] ।

टीयाम् ॥ प्रतिजानीते इति । आत्मा विचार्यते इति वदन् **भाष्यकारः ।**

उने ॥ तर्हीति । यद्यत्रात्मादिलक्षणमेव परीक्ष्यम् ।

लक्षणपरीक्षाया इति । निष्प्रयोजना तावल्लक्षणपरीक्षा चेतनप्रवृत्तिं प्रत्यनङ्गमेव । तस्मात् सप्रयोजनेयमास्थेया । सप्रयोजना चेयं लक्ष्योद्देशेन । अतो लक्ष्योद्देशेन चेतनस्य प्रवृत्त्युपपत्तिः ।

तथापि किमित्याह—**आहत्य चेति ।** साक्षात् ।

साध्यस्येति । आत्मादिप्रमेयस्य ।

साधनेति । लक्षणम् ।

---

1 S प्रबन्धः

तदिति । साध्यम् ।

व्याप्यत इति । परीक्षया ।

लक्षणस्य प्रमाणविशेषतयेति । लक्षणं हि व्यतिरेकी हेतुः ।

लक्षणद्वारेणैवेति । इति द्वितीयेऽपि प्रमाणविशेषपरीक्षैवेत्यर्थः ।

आत्माश्रयेति । यदि तावत् तेनैव प्रमाणेन तदेव परीक्ष्यते, तदा आत्माश्रयः । अथान्येन, तदेतरेतराश्रयोऽन्यस्य तदपेक्षणात् तस्य चान्यापेक्षणात् । अथान्यदप्यन्येन, तदा अनवस्थेति भावः ।

तत्रेति । द्वितीयाध्याये ।

अत एवेति । द्वितीयाध्यायेऽपि लक्षणपरीक्षणादेव निरस्तमिति संबन्धः ।

तथा स्यादिति । परीक्षितप्रमाणाधीना स्यात् । तथा चानवस्था स्यादिति भावः ।

इहापीति । प्रमेयपरीक्षायामपि ।

न हि ब्रूम इति । यदि हि वयं सर्वं प्रमाणं परीक्षितमेव परीक्षाङ्गं ब्रूमः, तदानवस्था दूषणं स्यात् । न चैतद् ब्रूमः । तस्मात् न किञ्चिद् दूषणमित्यर्थः ।

ननूक्तं दूषणमपरीक्षितेनैव लक्षणेन प्रमेयव्यवस्था भविष्यतीत्यत आह—**किं तु लिङ्गमिति ।**

आचार्योऽपीति । वार्त्तिककारोऽपि ।

परीक्षाविषय इति । लक्षणम् ।

अग्रे इति । व्यपदेशस्यो[747a]भयथासिद्धेः संशय इत्यत्र ।

तदुपदर्शनपरेणेति । प्रयोजनोपदर्शनपरेण ।

तदिति । सामान्यलक्षणम् ।

अत इति । **भाष्यकारेणे**त्युपक्रमादेव ।

अन्येनैवान्यस्येति । अवयवा अवयविनः समुदायाच्च भिन्ना एव नैयायिकैरभ्युपेयन्ते ।

एकदेशेनैवेति । अवयवेनैव समुदायिनैव वा ।

एकदेशिनोऽपीति । अवयविनोऽपि समुदायस्यापि वा ।

संशयः शक्यते कर्तुमिति । स्वमतेनैवेति शेषः ।

तथा हि **असमुदायिनेति** । यो देवदत्तस्य न समुदायी नाप्यवयवः परशुस्तेन कृत्वा परशुना असमुदायस्यावयविनश्च देवदत्तस्य व्यपदेशो दृष्टः, यथा देवदत्तः परशुना छिनत्ति ।

दृष्टश्चावयवेति । यथा मूलैर्वृक्षस्तिष्ठति, स्तम्भैः प्रासादो ध्रियते ।

अयमिति । संशयः ।

आत्मविचारेति । आत्मविचारश्चक्षुरादिभ्योऽनन्यत्वव्यवच्छेदेनान्यत्वसाधनरूपः ।

कर्तृकरणेति । यदि हि अत्रात्मनः कर्तृकरणकर्मसमुदायेऽन्तर्भावनिरासेनानन्तर्भावो विचार्येत, तदा असमुदायिना असमुदायस्य व्यपदेशो दृष्टः । परशुना छिनत्ति । दृष्टश्च समुदायिना समुदायस्य व्यपदेशः, स्तम्भैः प्रासादो ध्रियते । अस्ति चायं व्यपदेशश्चक्षुषा पश्यति । तत्र नावधार्यते किमयमसमुदायिना कर्तृकरणाद्यसमुदायस्य व्यपदेशः ? अथ समुदायिना समुदायस्येत्येवमयं संशय उपयुज्येतापि । यदा चात्मनोऽपि कर्तृकरणकर्मसमुदायान्तर्भूतत्वाभ्युपगमेन कर्तृकरणकर्मसमुदायानन्तर्भावरूपा द्वितीया कोटिरेव नास्ति, तदा आत्मविचारानुपयोग्येवेत्यतोऽन्येन चान्यस्येति **भाष्य**स्यावयवेन च समुदायस्येत्यपेक्षाया विपर्ययेणासमुदायस्येति व्याख्याया व्याख्यातुं शक्योऽप्ययं संशयः **टीकाकृता** न व्याख्यात इति भावः ।

टीयाम् ॥ ननु सिद्धश्चेदात्मा नार्थस्तद्विचारेणेत्यत आह—**इच्छादयो हीति** । अनेन यथात्मलक्षणपरीक्षेयं तथोपरिष्टाद् देशयिष्यतीति यदुक्तं तद्दर्शितं वेदितव्यम् ।

तस्येति । प्रमाणस्य ।

उने ॥ **शरीरादिति** । जीवच्छरीरं निरात्मकमित्यादिप्रकारेण ।

टीयाम् ॥ **अभावस्य चेति** । अभावो हि भावाधीननिरूपणइत्यतोऽस्यात्यन्ताभाव इत्येवमनिरूपणेनानिरूपणादत्यन्ताभावत्वेन निरूपयितुमशक्यत्वादित्यर्थः ।

उने ॥ आश्रयासिद्धिरिति । आत्मनः कुत्राप्यसिद्धत्वेन तत्राभावस्याप्यसिद्ध्या साध्याभावे पक्षस्याभावादित्यर्थः ।

एतदिति । आत्मनिराकरणमेव ।

टीयाम् ॥ परे इति । बौद्धाः ।

परिनिष्ठित इति । दर्शितः ।

तस्मिन्निति । विकल्पे ।

अस्यानुपलम्भनं तथा हेतुरिति । अस्य विकल्पस्य । तथाभावोपादानत्वेनानुपलम्भनं हेतुर्भावोपादानत्वेनानुपलभ्यमानत्वादिति हेतुरित्यर्थः ।

न तस्यैवेति । न पुनरात्मनोऽभाव एव कुतः शब्दप्रयोगत आत्मशब्दप्रयोगात् ।

उने ॥ विकल्प एवायमिति । किं बाह्यात्मोपादानत्वमित्ययम् ।

साध्यसामान्योपक्रमस्येति । साध्यसामान्येनोपक्रमस्य ।

अगुरित्यत्र हीति । [747b] अगुरित्यत्र गोप्रतिषेधे गोविशेषतया प्रसिद्धत्वाद् यथा शावलेयादीनां प्रतिषेधो भवति, तथा बाह्योपादानतामात्रप्रतिषेधे बाह्योपादानविशेषतया प्रसिद्धत्वात् नीलादीनां प्रतिषेधो भवतु । आत्मनस्तु बाह्योपादानतया अत्यन्तासिद्धस्य कथं प्रतिषेधः स्यादित्यर्थः ।

विधिनिषेधयोरिति । यद्यपि विधिर्निषेधश्चानुमानेनापूर्वावप्रतीतावेव प्रतीयेते इत्ययमनयोरविशेषस्तथापि विधिरपरतन्त्र एव प्रतीयते । निषेधस्तु प्रतियोगिपरतन्त्रः । ततश्च प्रतियोगिनि सिद्धे एव निरूप्यते इत्ययमनयोर्विशेषः ।

कर्त्रादिविशेषस्य विधिरूपस्य सिद्धिरिति । ईश्वराद्यनुमाने ।

विकल्पार्थ इति । किं वा बाह्यात्मोपादानत्वमित्यस्यार्थः ।

टीयाम् ॥ बाह्ये इति । बहिः ।

चैत्र इव गेहे इति । प्रतीत इति शेषः ।

उने ॥ तस्येति अनुपलब्धिमात्रस्यानैकान्तिकत्वादुपलम्भकारणाभावे सतोऽप्यनुपलब्धेः ।

तथा भावेऽति । प्रत्यक्षाद्य[न्य]तमेनात्मोपलम्भो यादृच्छिक आकस्मिको यो विकल्पः स एव सामग्री ।

तत्सद्भावे इति । यादृच्छिकविकल्पसामग्रीसद्भावे ।

एकत्रेति । यदा यादृच्छिकविकल्पसामग्रीसद्भावः तदा अनुपलब्धिहेतोः स्वरूप मेव नास्ति । यदा त्वनुपलब्धिः, तदा यादृच्छिकविकल्पसामग्रीसद्भावे इति हेतुविशेषणं नास्ति ।

टीयाम् ॥ **भवद्भिरेवोक्तमिति** । अनन्तरोक्ते श्लोके ।

उने ॥ **विकल्पस्वरूपादिति** । यथा नीलं बाह्यमेवमात्मानं विकल्पस्वरूपाद् बाह्यं विवक्षित्वा विकल्पस्वरूपाद् भेदोऽस्य निषिध्यते ।

टीयाम् ॥ **न बाह्येति** । यदारोप्यं बाह्यं तद्विकल्पैर्न गृह्यते, अथ चैतत् स्वाकारेऽलीके वा आरोप्यते इति चित्रम् ।

उने ॥ **आरोपसंभवेऽपीति** । यदि च कथमप्यनादिवासनाबलेन बाह्यारोपः कल्प्येत, तदारोपितस्य बाह्यस्य निषेधकं प्रमाणं नास्ति । निषेधकं हि प्रमाणं यादृच्छिकविकल्पसामग्रीसद्भावेऽप्यनुपलब्धेरित्येतत् । तच्च स्वरूपतो विशेषणतो वा असिद्धमित्यर्थः ।

टीयाम् ॥ **एवमस्य बाह्यत्वमपीति** । न निषेद्धुं शक्यं प्रतीतत्वादिति संबन्धः ।

किमलीकमपीति । यदि मिथ्यात्वादलीकस्य बाह्यत्वं निषेध्यते, तदा प्रथममलीकमेव निषेध्यमित्यर्थः ।

उने ॥ **तस्येति** । अलीकनिषेधस्य ।

टीयाम् ॥ ननु नालीकस्य बाह्याध्यारोपं बाह्यतादात्म्यग्रहं ब्रूमो येन न बाह्यविषया विकल्पाः कथमलीकबाह्यतादात्म्यमध्यवस्यन्तीति दूषणं भवेत्, अपि त्वलीकस्य बाह्यभेदाग्रहम् । स चोपपद्यते बाह्याग्रहेऽपीत्यत आह—**बाह्यभेदे इति** ।

उने ॥ **अतिप्रसङ्गादिति** । यदि भेदाग्रहोऽलीकस्य बाह्यप्रसञ्जकः, तदा घटादिनापि

मेदाग्रहोऽस्तीति तमप्यलीकस्य प्रसञ्जयेदित्यर्थः ।

टीयाम् ।। **तत्समारोपासंभवादिति** । बाह्यसमारोपासंभवात् ।

तथाविधेनेति । बाह्येन ।

उने ।। **नीलवदिति** । व्यतिरेकी ।

न चैवमिति । न च समारोपपूर्वाः ।

उपसंदानानामिति । उपपादानामिति पाठान्तरम् ।

टीयाम् ।। **आहार्य** इति । संभाव्यः ।

नास्त्यात्मेति पदे इति द्विवचनं नोपपद्यते, नास्त्यात्म्येति बहुत्वात् पदानाम् । अत आह—**यद्यपीति** ।

[747a] **न हि पदार्थानां सत्ता देशवत्त्वेन व्याप्तेति** । आदेशानामपि परमाण्वादीनां सत्त्वादिति भावः ।

व्यपवृक्तेति । विविक्तः ।

उने ।। **तद्व्याप्तत्वादिति** । अतीतानागतकालव्याप्तत्वात् ।

तस्येति । वर्तमानकालस्य ।

शब्दैरिति । गजडदबादिभिः ।

अर्थविवृद्धिप्रसङ्गादिति । तेषामपि केनाप्यर्थेनार्थवत्त्वप्रसक्त्या ।

टीयाम् ।। **लोकसिद्धमिति** । नोन्मादकल्पितम् ।

उने ।। **आत्मनि कल्पयित्वेति** । तमहङ्कारम् ।

वाके ।। **उपादानरूपत्वात् तमस इति** । मन्दतमेन ह्यालोकरूपेण तमोरूपमुपादीयते इति भवतां दर्शनम् । तस्मात् तमःशब्दोऽप्यर्थवानेव ।

रूपं भदन्त नाहमिति । पञ्चेन्द्रियाणि पञ्चस्वविषयसहितानि रूपस्कन्धः, सुखदुःखवेदना वेदनास्कन्धः, अमी अश्वा अमी षण्डा इत्येकजातीयनानाजातीयव्यवस्था-निबन्धनस्य स्वरूपस्य विभागकरणं बोधरूपमेव संज्ञेति संज्ञास्कन्धः, रागादयश्चित्तस्य संक्ले-शावस्थाः संस्कारस्कन्धः, विषयोपलम्भलक्षणं विज्ञानं विज्ञानस्कन्ध इति स्कन्धपञ्चकमूचु-**र्बौद्धाः** । एतदेव द्वादशायतनत्वमष्टादशधातुत्वं च भजते । तत्र रूपस्कन्ध एवैको विषये-न्द्रियमिलितपञ्चकद्वयेन दशायतनतां याति । वेदनासंज्ञासंस्कारलक्षणं च स्कन्धत्रयमेकं धर्मायतनमित्येकादशायतनानि । विज्ञानं च मन आयतनमिति द्वादशायतनत्वसिद्धिः । तत्र धर्मायतनेन सह रूपस्कन्धात्मकदशायतनानि एकादश धातवः । मन आयतनमेव सप्तचित्त-धातुतां व्रजति । तथा हि, रूपादिविषयज्ञानपञ्चकं षष्ठं सविकल्पकम्, सप्तमः समनन्तरः प्रत्ययः । तदुक्तम् ,

षण्णामनन्तरातीतं यत् तन्मनः

इति अष्टादशधातवः ।

उने ॥ ग्रन्थेनेति । रूपं भदन्त नाहमित्यादिना ।

वाके ॥ न प्राप्नोत्यहमिति । वयमिति स्यादित्यर्थः ।

अर्थवत्तायां शक्यमिति । तथागतेन हि विशेषनिषेधमुखेन स्कन्धाति-रिक्त आत्माभ्युपगतः । तदनभ्युपगमे तस्य दर्शनं हन्त हतं स्यादित्यर्थः ।

सर्वाभिसमयसूत्र इति । सर्वेषां स्कन्धधात्वायतनानामभिसमयसूत्रे संकेत-सूत्रे ।

बौद्धसमानतन्त्रसंवादमप्यात्मविषये दर्शयति—**भारं चेति ।**

पुद्गल इति । पूर्यते गलति चेति निर्वचनेनात्मैवोच्यते । स हि शरीरपरिमाणात्म-वादिनः पक्षे गजवाजिदेहप्राप्तिसमये कैश्चिदवयवैः पूर्यते, पुत्तिकादेहसमये च गलत्यवयव-द्वारेणेति । न केवलं तैः पुद्गलशब्देनात्माभ्युपगतः, आत्मानभ्युपगमवादी मिथ्यादृष्टित्वेन निन्दित इति तेषां **सूत्रान्तरं** पठति—**यद्चेति ।**

यथानुदकः कमण्डलुरिति । न ह्यत्र कमण्डलोर्निषेधः स्यात् ।

टीयाम् ॥ स्वतन्त्रस्य धर्मस्यादर्शनादिति **वार्त्तिकं** पूरयित्वा व्याख्याति—**स्वतन्त्र-स्येति ।**

तस्मात्तत्प्रभवतीति । तस्माच्छशात् तद्विषाणं प्रभवतीति कृत्वा ।

वाके ॥ **इदं चेति** । प्रष्टव्य इत्यनेन संबन्धः ।

टीयाम् ॥ पर्यनुयोगार्थमिति । परं प्रष्टुम् । एतेन पर्यनुयोगपरत्वमात्रेणास्य पुनरुक्तार्थतेत्युक्तम् ।

वाके ॥ किञ्चिद् विषाणं शशस्य प्रतिषिध्यत इति प्रतिषेधस्येवोल्लेखमाह—**यस्य शश** इति ।

टीयाम् ॥ **तद्व्याप्तस्येति** । कर्मव्याप्तस्य ।

[748a] **धर्मवदात्मविषयमिति** । सुखादिमदात्मविषयम् ।

आत्मधर्मकर्मेति । आत्मधर्माः कर्म यस्य स तथा ।

उने ॥ **तदा तदुत्पत्तिनिमित्तत्वादिति व्याहन्येतेति** । न ह्यहङ्कारस्य अहंप्रत्ययस्य यदालम्बनं विषयो रूपादिः, तस्योत्पत्तिनिमित्तत्वाद्रूपादय आत्मोच्यते इति संगच्छते । किं तर्हि ? अहंप्रत्ययोत्पत्तिनिमित्तत्वाद्रूपादय आत्मोच्यत इति ।

टीयाम् ॥ **न व्यपदेशमात्रमिति** । देहाद् व्यतिरिक्त आत्मा अहमिति व्यपदिश्यमानत्वादित्येवम् ।

अनैकान्तिकमिति । स्वतोऽतिरिक्तेनापि गौरोऽहमिति व्यपदिश्यमानेन शरीरेण ।

अनुभव इति । अहमित्यनुभवः ।

असंभिन्नेति । असंभिन्न इदं प्रत्ययो यत्र स तथा ।

स चेति । शरीराद्यतिरिक्तः ।

शरीरादिष्वहंप्रत्ययस्यान्यथासिद्धत्वमाह—**शरीरादयस्त्विति** ।

वाके ॥ **मतुब्लोपमिति** । गौरवानित्यत्र ।

षष्ठ्यर्थमिति । गौरं रूपं विद्यतेऽस्येत्येवंरूपम् ।

गम्यते मतुब्लोप इति । यत्रैव मम गौरमिति षष्ठ्या भेदेन निर्देशो जातस्तत्रैव कदाचिदभेदेनाहं गौर इति निर्देशो भवति । अतो ज्ञायते मतुब्लोप इत्यर्थः ।

उने ॥ ममकारेति । मम शरीरमित्येवं भिन्नाधिकरणतासत्कप्रतिभासविषये भावित्वादहं गौर इत्येवं समानाधिकरणताप्रत्ययो यदि भ्रान्तः, तदाहं जाने इत्यस्यापि समानाधिकरणताप्रत्ययस्य ममात्मेति भिन्नाधिकरणताप्रत्ययविषये भावित्वाद् भ्रान्तत्वं प्राप्नोतीत्याशङ्कार्थः ।

बाधकादिति । अहमिच्छामि प्रयते इत्येवं सामानाधिकरण्यप्रतीतेरिच्छाद्यधिकरणमेवाहंशब्दवाच्यं शरीरादेश्चेच्छाद्यधिकरणत्वे मानसप्रत्यक्षवेद्यत्वादि बाधकमुक्तं तस्मादित्यर्थः ।

वाके ॥ योऽयमिति । भूत्यादिः ।

उने ॥ नन्वात्मासत्त्ववादिन आत्मा नास्तीति विरुद्धप्रतिपत्तेर्हेतुं किञ्चित् प्रमाणमभिमन्यमाना आत्मानं निषेधन्ति । अन्यथा निषेधानुपपत्तेः तस्मात् तत्प्रतिषेधोऽयं भविष्यतीत्यत आह—**आभिमानिकेति ।**

तथाविधस्येति । आभिमानिकप्रमाणस्य ।

न च तदभावेति । न हि आत्मा नास्तीत्येवंरूपविप्रतिपत्तिहेतुराभिमानिकं प्रमाणं नास्तीत्युक्ते आत्मा सिध्यतीत्यर्थः ।

वाके ॥ उपलम्भनमिति । उपलब्धिसाधनं चक्षुरादि ।

प्रतिज्ञार्थ एवेति । आत्मा नास्तीति प्रतिज्ञाया ह्यात्मोपलभ्यो नास्तीत्ययमेवार्थः ।

उने ॥ आगामीति । आगामिनः कः साधनार्थ इति **वार्त्तिक**स्य पौनरुक्त्यभिया ।

ननु धर्मधर्मिणोः समवायसंबन्धाभ्युपगमात्, असता च संबन्धासंभवाद् यदि **नैयायिका**नां भावरूपो धर्मोऽसति विरुध्यते । ततो **बौद्ध**स्य किमायातमित्यत आह—**बौद्धेति ।**

टीयाम् ।। ननु यथैवानुपलब्धिस्तुच्छा साधनं न भवति, तथा धर्मोऽपि न स्यात् । अत आह—**नानुपलब्धिरिति** ।

उने ।। **न कल्पितप्रतियोगिक** इति । कल्पितः प्रतियोगी उपलब्धिलक्षणो निषेधो यस्य स तथा न ।

न कल्पिताश्रयोऽपीति । न कल्पितनिषेध्याधिकरणः ।

उभयथेति । [749a] कल्पितप्रतियोगिकत्वे कल्पिताश्रयत्वे च पारमार्थिकत्वव्याघातात् ।

टीयाम् ।। **असाविति** । अनुपलब्धिः ।

अयमिति । **बौद्धः** ।

असत्त्वेनेति । सन्तमात्मानमसत्त्वेन कल्पयित्वेति योजना ।

अस्येति । आत्मनः ।

अन्यधर्मेणेति । सतो धर्मेण ।

रूपादिशब्दैरनैकान्तिकत्वमिति । रूपादिशब्दा हि एकपदान्यपि न रूपादिव्यतिरिक्तविषयाः ।

आत्मशब्दसाध्यत्वेनेति । यथात्मशब्दो रूपादिव्यतिरिक्तविषयत्वेन साध्यो व्याख्यातः, तथा अहं प्रत्ययो व्याख्यातो ज्ञेय इत्यर्थः ।

उने ।। **तेनेति** । **सूत्रेण** ।

न चैवमिति । न च **सूत्रेण** तमःशब्दस्य निर्विषयत्वमुच्यते ।

टीयाम् ।। **सद्विषयत्वमिति** । न चैतदस्माभिरभ्युपगम्यते तमःशब्दो निर्विषय इत्यनेन यत् तमःशब्दस्य सविषयत्वं सिद्धान्तिनोक्तं तत् सद्विषयत्वं भावविषयत्वमुक्तमिति मन्यमानः ।

वाके ।। **कस्य वेति** । मते ।

निसः इति । उपसर्गस्य ।

टीयाम् ॥ **अन्यथेति** । यदि नित्यशब्दोऽनित्यव्यावृत्तिमात्रमाचक्षीत न तु नित्यम्, तदानित्यस्याभावात् नित्यप्रतिषेधोऽनुपपन्नः स्यादित्यर्थः ।

शरीरादिव्यतिरिक्तविषय इति **वार्त्तिकं** प्रयोजनभणनपुरःसरं पूरयित्वा व्याचष्टे—**सिद्धसाधनेति** ।

वाके ॥ **विन्ध्यवासि**नोऽनुमानेनाप्यात्मानं साधयति—**परार्था** इति ।

विशेषविरोधमाशङ्कते—**सङ्घातान्तरार्था** इति ।

अथ प्रतिपद्यसे इति । रूपादिस्कन्धव्यतिरिक्तं संघातान्तरम् ।

अनभ्युपगमाच्चेत्येतदेव तावद् विवृणोति—**न हीति** । व्यतिरिक्तात्मवादिनो **नैयायिकादेः** सर्वः संघातः शयनासनादिरात्मार्थ एव, न तु देहार्थः कश्चिदिति भावः ।

विरोधाच्चेति विवृणोति—**यदीति** ।

ते इति । तव ।

टीयाम् ॥ **वादिन** इति । **नैयायिकस्य** ।

परार्थाश्चक्षुरादय इति ब्रुवत इति । वचनलिङ्गत्वात् पराभिप्रायस्येति शेषः । अयमर्थः । यो यः संघातः, स सर्वः परार्थ इत्येतावन्मात्रेण सामान्येन व्याप्तिरवधार्यते । न तु योऽसौ परः तस्यापि संहतत्वमसंहतत्वं वा व्याप्तावनुप्रविशति । न हि यदेव दृश्यते, तदेव व्याप्तावन्तर्भाव्यते प्रयोजकस्यानन्यथासिद्धस्य व्याप्तावन्तर्भावात् । तस्मात् व्याप्तावननुप्रविष्टोऽपि व्यापकमात्रे सिध्यति । तत्सिद्ध्याक्षेपेण यो विशेषः समागच्छति, स एव परं व्यापकेन सिध्यतानुकूलत्वात् क्षम्यते । न तु विरुद्धः प्रतिकूलः । अन्यथा कृतकत्वादनित्यत्वे सिध्यत्यव्यभिचारिणोऽश्रावणत्वस्यापि सिद्धिः स्यात् । न चैवमस्ति । तस्मात् सकलानुमानोच्छेदनिदानं विशेषविरुद्धत्वमनुमानं प्रमाणमङ्गीकुर्वता न चोदनीयमिति स्थितम् ।

वाके ॥ **अनुमानेनेति** । श्रोत्रेन्द्रियतद्भावभावित्वलक्षणेन ।

अयं प्रतिज्ञार्थः इति । न श्रोत्रग्राह्यः शब्दः ।

टीयाम् ।। **अभिप्रेतेति** । अभिप्रेतादभिप्रायीकृतादसंघातपरार्थत्वाद् विपरीतं यत् संघातपरार्थत्वं तत्पक्षे ।

अस्येति । संघातान्तरार्थाश्चक्षुरादय इत्यस्य ।

उने ।। **तद्विपरीतेति** । तस्मात् संघातपारार्थ्याद् विपरीतं यदसंघातपारार्थ्यं तत्साधकत्वात् ।

वाके ।। **न चैनां शक्तः कश्चित् प्रतिपादयितुमिति** । आनन्त्यात् ।

तदेवमनुमानप्रमाण[1]प्रसा[749b]दासादितसद्भावो ह्यात्मानुमानप्रमाणत्वाभ्युपगमे न शक्यो नास्तीति प्रतिपादयितुमिति **चार्वाके**णानुमानं प्रमाणमेव न भवतीत्यभ्युपगम्यमिति मन्यमानो दूषयितुं **चार्वाक**मतमाशङ्कते—**अथानुमानं नास्तीति** ।

यथा स्तनयित्न्विति । स्तनयित्नुशब्दस्य हेतौ स्तनयित्नौ स्वशब्दाद् गम्ये ।

अवयवेन च समुदायस्येत्यभिधाय **भाष्यकृता** वृक्ष उदाहृतः । तत्र वृक्षस्यावयविनः समुदायत्वाभिधानमसंगतम् । अत आह—**समुदाय शब्देनेति** ।

उने ।। **तदेकदेशान्तराणीति** । प्रासादैकदेशान्तराणि भित्त्यादीनि ।

वाके ।। एकार्थग्रहणादिति **सूत्र**वर्तिनोऽर्थशब्दस्य ग्राह्यघटादिपरत्वं मन्यमानः **पर** आह—**घटादिविषयत्वादिति** ।

सिद्धान्ती तु अर्यमानत्वादात्मैवार्थपदेनोच्यते । तथा हि प्रकृतप्रत्यभिज्ञाप्रत्ययेनात्मा अर्यते । न चात्मानमन्तरेण प्रत्यभिज्ञोपपद्यते इत्यभिप्रायेणाह—**न सूत्रार्थेति** ।

यदि चानुषक्तमिति । एतेन दर्शनस्पर्शनप्रत्ययावेकविषयत्वेन प्रतिसन्धीयमानौ चक्षुरादिव्यतिरिक्तमेकमात्मानं साधयन्तौ रूपादिगुणेभ्यो व्यतिरिक्तमेकं घटाद्यर्थमपि साधयत इति प्रतिपादितम् ।

दर्शनस्पर्शनग्रहणयोरिति । यदि हि दर्शनस्पर्शनग्रहणयोरेकः कश्चिद् विषयः सिद्धः स्यात्, तदैतयोरेकविषयत्वेन प्रतिसन्धानमन्यथा अनुपपद्यमानमेकं कर्तारं

1 J °प्रासा°

साधयेत् । यदा तु दर्शनस्य विषयो रूपमेव स्पर्शनस्य च स्पर्श एव नान्यः कश्चिद् घटादिः, तदा न चक्षुरादिभ्यो व्यतिरिक्त एकः कश्चित् कर्ता सिध्यतीति **पराशयः** ।

तद्विशिष्टेति । घटादिविशिष्ट° ।

त्वगेकेन्द्रियवादिमतमाश्रित्याशङ्कते—**एकेन्द्रियेति** ।

अभिधास्यमानेन्द्रियभेददर्पेणाह—**न विषयत्वादिति** ।

उने ।। ननु व्यतिरेकिणो हेतोर्विपक्षगमने विरुद्धतैव स्यात्, तत् कथमुक्तं मनसानैकान्तिकः स्यादिति ? अत आह—**मनसेति** ।

साध्याविशिष्टत्वप्रसङ्गादिति । चैतन्येन हि साध्येनाविशिष्टं ज्ञानादिसमवायित्वम् ।

उभयपदोपादानमिति । घटादिनि हि कर्माणि चक्षुःस्पर्शनाभ्यामेव साक्षात्क्रियन्ते नान्येन्द्रियैरिति व्यवस्थितत्वादव्यवस्थानादित्यनेन व्यवच्छिद्यन्ते ।

तदेतदिति । अव्यवस्थानादिति पदोपादानप्रयोजनम् ।

तदनुयायीति । **वार्त्तिकानु**यायी ।

ननु यदि स्वातन्त्र्यं केवलं विरुद्धं तर्हि **वार्त्तिक**कृता अग्रे किमिति हेतूकृतम् ? अत आह—**स्वातन्त्र्यं हीति** ।

विपक्षासंस्पर्शादिति । विपक्षस्याचेतनस्यासंस्पर्शात् ।

ननु यदि स्वातन्त्र्यं केवलमप्यविरुद्धं तर्हि अव्यवस्थानादित्यनेन प्रथमं किमिति विशेषितम् ? अत आह—**पूर्वेति** । पूर्वव्याख्याने अकरणत्वव्याख्याने ।

तदपीति । अव्यवस्थानादित्यपि ।

न साक्षाद् दूषितमिति । अव्यवस्थानादित्ययुक्तमित्येवं **टीकाकृता** साक्षात् न दूषितम् ।

न च प्रयत्नवत्त्वलक्षणं स्वातन्त्र्यमसिद्धमित्याह—**तच्चेति** ।

विपक्ष इति । प्रयत्नवानप्यचेतनो भविष्यतीत्यत्र ।

अतिप्रसङ्ग इति । देवदत्तस्य ज्ञाने यज्ञदत्तस्य प्रयत्नप्रसङ्गः ।

एतदिति । ज्ञानप्रयत्नयोरेकाधिकरणत्वम् ।

न विषयव्यवस्थानादिति । [750a] पूर्वपक्ष**सू**[1]**त्रीयटीका**वाक्यमिदं सिद्धान्त**भाष्य**मिति । तच्च यावत्यामुत्तरपक्ष**सूत्रटीका**यां व्याख्यातायां सुलग्नकं भवति । तावतीमेतद्वाक्यादग्रे स्थितामपि व्याख्यायास्य **टीका**वाक्यस्य प्रयोजनमाह—**सूत्रभ्रमं निवारयतीति** ।

यथा चाग्रेतन**टीका**व्याख्याने सत्येव एतद्वाक्यं सुलग्नकं स्यात् तथैव दर्शयन्नस्य वाक्यस्य तात्पर्यं भावयति—**दर्शनस्पर्शनाभ्यामिति**[2] ।

क्वचिदिति । अर्थे ।

तदेतदिति । न विषयव्यवस्थानादिति [3]**सूत्रोक्तम्** ।

तदिति । प्रमाणम् ।

सूत्रे इति । न विषयव्यवस्थानादित्यत्र ।

टीयाम् ।। **करणमित्यर्थ** इति । करणमित्यत्रेत्यर्थः ।

साधयतीति । इति हेतोः ।

।। इतीन्द्रियव्यतिरेकप्रकरणं संपूर्णम् ।।

---

1 J त्रार्थटी 2 III. i. 1 3 III. i. 2

॥ शरीरव्यतिरेकपरीक्षाप्रकरणम् ॥

[३.१.४–६]

उने ॥ शरीरविषय एवायमहंप्रत्यय इति दर्शयितुं शरीरसाधारणविशेषणैर्विशिनष्टि—**गौरः पीन** इति ।

टीयाम् ॥ **प्राणातिपाते पातकाभावप्रसङ्गादितीति** । [1]**सूत्र**तात्पर्यार्थोऽयम् ।

वाके ॥ **प्राणिभूतमिति** । अनेन मृतशरीरव्यवच्छेदः, तद्दाहेऽपि पातकाभावात् ।

ननु प्राणिहिंसाकृतमपूर्वमधर्माख्यं भावनाशब्दवाच्यं **बौद्धै**रभ्युपगतमेवेत्याशङ्क्य फलतोऽभावं दर्शयति—अकर्तुः **फलेनेति** ।

टीयाम् ॥ **न बुद्धिरात्मेति वक्तव्ये** इति । न देहादिसंघातमात्रमात्मेत्यस्य **भाष्य**स्य स्थाने ।

उने ॥ ननु सुखदुःखोपभोगवैचित्र्यमभ्युपगच्छन् भूतचैतनिको धर्माधर्मावङ्गीकारयितुं शक्य एतेत्यतः प्रतिपादितम्—**यदि भूतचैतनिकोऽपि कश्चित् पातकमिच्छेदिति** ।

तस्मादुपलक्षणेन यदि कश्चित् **शाक्यो**ऽपि भूतचैतन्यमिच्छेदित्यपि द्रष्टव्यमित्येतदपि तदा प्रतिपाद्यं स्यात्, यदि **शाक्यो** भूतचैतन्यमङ्गीकारयितुं शक्येत इत्याशङ्क्याह—**शक्यते चेति** ।

प्रतिक्षणपरिणामे विलक्षणशक्तेः कार्यस्योत्पादाभ्युपगमादिति । ततश्च भूतानि प्रतिक्षणं परिणामेन विलक्षणशक्तिकान्युत्पद्यमानानि चेतनाशक्तिकान्यप्युत्पत्स्यन्ते इत्यभिप्रायः ।

इति यथाश्रुतेति । इत्येतत् पातकशब्दस्य पापार्थत्वम् ।

नन्‌ यद्यस्य **सूत्र**स्य श्रूयमाणोऽर्थो न वास्तवः, तर्हि यो वास्तवः तदभिधायक-

---

1 III. 1. 4

तयैवेदं किमिति न सूत्रितमित्यत आह—**शाक्येति**। शरीरदाहे इत्यंशेन देहमात्रात्मवादिनः चार्वाकस्य पातकाभावादित्यंशेन पातकमभ्युपगच्छतः शाक्यस्य च प्रतिक्षेपकत्वेन साधारणमिदमिति यथा स्पष्टं ज्ञायेत इत्येतदर्थमिदं **सूत्र**मेवमुक्तम्। न तु यथाश्रूयमाणार्थप्रतिपत्त्यर्थम्। तस्माद् वास्तवोऽर्थो य उक्तः स एवास्य ज्ञेय इति भावः।

अत एवेति। यत एव **शाक्यचार्वाक**योः प्रतिक्षेपकत्वेन साधारणमिदं **सूत्रम्**।

न शरीरादिसंघातेतीति। **भाष्यकारो** न देहादिसंघातमात्रमित्यत्र **वार्त्तिककार**श्च शरीरादिव्यतिरिक्त इत्यत्रादिपदेन बुद्ध्यादिसंगृहीतवानिति भावः। एतच्च शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघातः प्राणिभूतो गृह्यते इत्यग्रे वदद्भ्यां स्पष्टितम्।

जातेष्टेरिति। पुत्रेष्टेः।

टीयाम्॥ शास्त्रे चोदितमिति। यजेत स्वर्गकाम इति कर्तृगामिफलावगमादिति भावः।

उने॥ सम्यग्गृहस्थाश्रमोक्तधर्मपरिपालनस्येति। [750b] श्राद्धकरणादेः।

प्रातिस्विकेति। प्रतिस्वं भवं प्रातिस्विकम्। पित्राद्याश्रयत्वेनासाधारणं यत्क्रियाफलं तदभिप्रायेण।

वाके॥ य एव करोति स एवेति। प्रमाणबाधितत्वात् नास्त्येको नित्य आत्मेति भावः।

उक्तोत्तरमेतदिति। आत्मलक्षणावसरे।

यत्पुनरेकस्मिन्नदर्शनादितीति। यदि च भवानेनमर्थमित्यादिना ज्ञापितम्।

तस्यापीति। **नैकायिक**स्यापि।

उने॥ उक्ते इति। **सिद्धान्ति**ना।

कुष्माण्डपतनवदिति। अत्यसंबद्धमित्यर्थः।

वाके ।। यदि तर्हीति । परमाण्ववस्था अवयवा न बीजत्वादिविशेषवन्तमारब्धुमर्हन्तीत्यतो यद्यापरमाणोर्विभागो नास्ति, तर्हि कल्पादावुत्पत्तिर्न प्राप्नोतीति योजना ।

टीयाम् ।। बीजत्वेति । बीजत्वजातीया अवयवा यथा लक्ष्यन्ते इत्येतदर्थमित्यर्थः ।

एतदपि किमर्थमित्याह—**प्रतिसन्धानायेति ।**

ये इति परमाणवः ।

उने ।। नन्ववयवानुप्रवेशो येनैव क्रमेण द्रव्यस्य विनाशः, तेनैव क्रमेण संयोगोऽपीत्यभ्युपगमे कथं भाजनविनाशे भाजनगतानामपामवस्थानं न स्यादित्यत आह—**द्व्यणुकादिति ।**

टीयाम् ।। ननु सच्छिद्रत्वेऽपि भाजनगतानामपामवस्थानं न स्यादेवेत्यत आह—**सान्तरत्वे त्विति ।**

उने ।। यथा चेति । यथा च क्षणिकानामिति ।

टीयाम् ।। केवलादिति । ज्ञानात् ।

वाके ।। एकस्मिन् पक्षे इति । **सौगत**पक्षे ।

एकस्मिंस्तु पक्षे इति । **नैयायिक**पक्षे ।

उच्छिद्यते इति । तिरोभवति ।

टीयाम् ।। त्रिविधोऽप्ययमिति । अयं च द्वितीयाध्याये शब्दानित्यत्वप्रकरणो**दयन**व्याख्यावसरे व्याख्यातः ।

तद्वतामिति । कारणवताम् ।

वाके ।। एतच्चेति । ज्ञानचिकीर्षाप्रयत्नसमवायलक्षणं कर्तृत्वम् ।

।। इति शरीरव्यतिरेकप्रकरणं संपूर्णम् ।।

॥ चक्षुरद्वैतपरीक्षाप्रकरणम् ॥

[३.१.७–१४]

उने ॥ **समुच्चीयमानार्थासंभवस्येति** । समुच्चीयमानोऽर्थः सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादितिरूपो हेतुः, तदसंभवस्य ।

अर्थस्येति । चक्षुर्द्वैतस्य ।

उपेक्षानर्हत्वादिति । निषेध्यत्वेन ।

टीयाम् ॥ **अस्यैवेति** । व्यवसायस्यैव ।

अनुव्यवसायः पूर्व इति । यमज्ञासिषमितिरूपः ।

भाष्ये ॥ **विषयग्रहणलिङ्गमिति** । विषयग्रहणं लिङ्गं यस्य तत् तथा ।

भाष्ये ॥ **बहुषु चावयविष्विति** । शाखाप्रशाखादिषु ।

एतदिति । भेदेन स्थानग्रहणम् ।

टीयाम् ॥ रश्मिविषयसन्निकर्षस्य भेदादित्येतद् **भाष्यं** व्याचष्टे–**रश्मिभेदादिति** ।

चतुर्थव्याख्यानेन **सूत्रं** योजयति—**अङ्गुल्येवेति** ।

भाष्ये ॥ **भिन्नप्रतिसन्धानमिवेति** । भिन्नयोः सन्धानमिव गृह्यते ।

टीयाम् ॥ **भाष्य**निरपेक्षं पञ्चमं व्याख्यानमाह—**एकविनाशे** इति । यश्चक्षुर्द्वैत-साधनमेकविनाशहेतुरुक्तः स दृष्टान्तः, तेन विरोधात् ।

दृष्टान्तत्वमस्य भावयति—**स खल्विति** । एतेनास्य सबलत्वमुक्तम् । तथा च एकविनाशे द्वितीयाविनाशादित्यनेन बलवता अवयविनाशेऽप्यवयव्युपल[1]ब्धेरिति हेतोरबलस्य बाधनादित्यर्थः ।

---

1 J ब्धिरिति

उने ॥ प्रतिसन्धानाभासेति । प्रतिसन्धानाभासस्य सव्यदृष्टस्येत्यादि **सूत्र**[1]-दर्शितस्य निरासार्थम् ।

टीयाम् ॥ शास्त्रे इति । न तु कथास्वित्यर्थः ।

उने ॥ तुल्योपलम्भप्रसङ्ग इति । [751a] **वार्त्तिककृतो**क्तः ।

टीयाम् ॥ तदिति । चक्षुः ।

उने ॥ तथेति । जातिवचनाः ।

टीयाम् ॥ न च तदिति । चक्षुः ।

वाके ॥ ननु द्वितीयमवतिष्ठत इति मा भूत् प्रत्यक्षमिन्द्रियस्यातीन्द्रियत्वात् परं विषय-ग्रहणेन लिङ्गेन ज्ञायत एवेत्याशङ्क्याह—प्रत्ययमात्रं **त्विति ।**

एतद्व्याख्याति **टीकाकृत्—विनष्टेऽपीति ।**

योऽविनष्ट इति । अधिष्ठानविशेषः ॥

उने ॥ ननु यद्येवं चक्षुरद्वैतव्यवस्थापनं प्रकरणमिदं तर्हि चक्षुर्द्वैतव्यवस्थापननिष्ठितं दृष्टान्त-विरोधादप्रतिषेध इति समाधान**सूत्रं**[2] विरुध्यते इत्यत आह—**सूत्रविरोधस्त्विति ।**

एकविनाशे द्वितीयाविनाशान्नैकत्वमिति चक्षुर्द्वैतवादिनोक्ते य **एकदेशीयानां** परिहारोऽवयवविनाशेऽप्यवयव्युपलब्धिरिति स दृष्टान्तविरोधादप्रतिषेध इत्यनेन निरस्यते । न तु चक्षुर्द्वैतं साध्यते ।

चक्षुर्द्वैतवाद्युक्ते च साधनेनान्यथा तदुपपत्तेरित्यादि**वार्त्तिको**क्त एव परिहार इत्यविरोध इति भावः ।

अत एवेति । यत एव चक्षुरद्वैतमभिमतम् ।

वाके ॥ न च प्रतिक्षणविनाशिषु संस्कारेष्विति । स्मृतिः प्राप्नोतीति संबन्धः ।

1 III. i. 7 2 III. i. 11

उत्पत्तिवदिति । यथोत्पत्तिरुत्पत्त्यपेक्षा ।

व्यतिरेकहेतुरिति । इन्द्रियेभ्य आत्मनो व्यतिरेके हेतुः ।

भाष्ये । विषयव्यवस्थानुपपत्तिरिति । रूपादिमध्ये रूपमेव चक्षुषो विषयो रस एव रसनाया इत्यादिविषयव्यवस्थानुपपत्तिः ।

भिन्ननिमित्त इति । भिन्नानि निमित्तानि चक्षुरादीनि अनेकार्थदर्शने यस्य स तथा ।

सद्भाव इति । स्मृतेरेव ।

टीयाम् ॥ तस्मादिति । विषयात् ।

यथामुष्मिन्निति । अत्र हि ज्ञानमिति ज्ञानक्रियामात्रं प्रतीयते । न तु तत्कर्त्रादीन्यप्यनुप्रविष्टानि ।

स्मृतिच्छायावाहित्वादिति । तदित्यंशेन ।

तद्दर्शनं चेति । अर्थदर्शनदर्शनम् ।

संविदिते एवेति । प्रत्यभिज्ञया ।

यत्रेति । प्रत्यभिज्ञाने ।

भाष्ये ॥ एकार्थे ज्ञानम् । त्रीण्यप्येतानि ज्ञानान्येकस्मिन् घटादावर्थे ।

उने ॥ अवस्थावदिति । शरीरम् ।

प्रत्यभिज्ञानमिति । तदेवेदं शरीरमित्येवम् ।

तदिति । प्रत्यभिज्ञानम् ।

रूपभेदवदिति । यथैकत्र घटे अपक्वे श्यामता, पक्वे च रक्तता ।

पूर्वेति । एकत्रैकदैव परिमाणभेदस्तावन्न संभवति विरोधात्, तस्मादेकत्र पूर्वपरिमाणस्य निवृत्तावुत्तरस्योत्पादोऽभ्युपेयः । तच्च न संभवति पूर्वपरिमाणस्य विनाशकारणाभावात्, उत्तरस्य चोत्पादकारणाभावात् ।

विनाशोत्पादकारणयोरभावोऽपि कुत इत्याह—**आश्रयेति ।**

तथाभावादिति । यथाक्रमं विनाशकारणाभावादुत्पादकारणभावाच्च ।

अन्यथा त्विति । यदि तु विनाशोत्पादकारणाभावेऽपि पूर्वनिवृत्तावुत्तरोत्पादे-नैकत्र परिमाणभेदः स्यात्, तदा घटादावपि परिमाणभेदः स्यादित्यर्थः ।

टीयाम् ॥ सादृश्यमपि दुर्विज्ञानमिति । एकं वस्तु दृष्ट्वा अन्यत् तत्समानधर्मकं पश्यतो हि इदमनेन सदृशमिति सादृश्यज्ञानं भवति । एतच्च पूर्वोत्तरज्ञानयोरनुसन्धातारमेकं विना दुर्घटमित्यर्थः ।

उने ॥ तदनुभूतानामिति । करचरणादिनानुभूतानाम् ।

वाके ॥ अननुभूतत्वादिति । गृहीतचरस्यातीतस्य[751b]रूपादेश्चक्षुराद्युपघा-तेऽपि स्मृतिदर्शनेनेन्द्रियाधारायाः स्मृतेरननुभवादिति भावः ।

असत्त्वादिति । अतीतत्वेन ।

तेभ्य इति । इन्द्रियादिभ्यः ।

तदुत्पत्ताविति । स्मृत्युत्पत्तिविषये ।

तयोरिति । चक्षूरूपयोः ।

टीयाम् ॥ न च नास्तीति व्याहतमिति । न हि निराधारं कार्यं किञ्चिदस्तीति वक्तुं शक्यम् ।

वाके ॥ व्यर्थं वाक्यं न तच्चक्षुषि नो रूपे इतीति । अनाधारं विज्ञानमित्येता-वत्तु वाच्यं स्यात् ।

टीयाम् ॥ अप्रसक्तत्वादिति । नाप्यनादृतत्वेन प्राप्तत्वात् ।

वाके ॥ वाक्यमिति । कारिकारूपम् ।

अर्थवत्तायामिति । चक्षुरादिविशेषप्रतिषेधलक्षणार्थवत्तायाम् ।

॥ इतीन्द्रियव्यतिरेकप्रसङ्गेन चक्षुरद्वैतपरीक्षाप्रकरणं संपूर्णम् ॥

॥ मनोऽव्यतिरेकपरीक्षाप्रकरणम् ॥

[३.१.१५-१७]

उने ॥ प्रसङ्गाभासेति । सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादित्यनेन प्रसङ्गाभासेनापह्नुतम् ।

प्रतिसन्धानमिति । दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतत् ।

उक्तिवैचित्र्येणेति । इन्द्रियान्तरविकारादित्यादिरूपेण ।

ननु ज्ञानमतिशब्दयोर्बुद्धिपर्याययोर्न बुद्धेरन्योऽर्थः । तत् कथमिदं मतिःस्मृत्यनुमानादिज्ञानमिति ? अत आह—**बुद्धिपर्यायत्वेऽपीति ।**

सामान्यविशेषेति । यतो बुद्धिसंबन्धिसामान्यविशेषवाचकाविह ज्ञानमतिशब्दाविति भावः ।

संस्कारादिति । आदिपदाल्लिङ्गादिग्रहः ।

ननु शरीरसंयुक्तं संस्कारदोषव्यतिरिक्तं साक्षात्प्रतीतिजनकमितीन्द्रियलक्षणमुक्तम् । ततः स्मृत्यादेरिन्द्रियजत्वे साध्ये साक्षात्प्रतीतिरूपताप्रसङ्ग इत्याशङ्क्याह—**इन्द्रियजेनेतीति ।**

संस्कारकेति । अञ्जनादि ।

दोषेति । पित्तादि ।

ननु स्मृत्यादेः शरीरसंयुक्तसंस्कारकदोषव्यतिरिक्तद्रव्यसंयोगजत्वरूपेऽन्द्रियजत्वे साध्ये कथं न साक्षात्कारित्वप्रसङ्ग इत्यत आह—**संस्कारातिरिक्तेति ।**

यदा संस्कारादन्यार्थेन सह प्रत्यासत्तिर्भवति, यदा च स्वान्यासाधारणकारणस्यापेक्षा न स्यात्, तदैव हि इन्द्रियं साक्षात्कारिज्ञानजनकम्, न तु शरीरसंयुक्तसंस्कारदोषव्यतिरिक्तद्रव्यस्वरूपमात्रम् । ततश्च संस्काररूपायामेवार्थप्रत्यासत्तौ सत्यामिन्द्रियेण जन्यमानत्वात् स्मृतेर्लिङ्गाद्यसाधारणकारणापेक्षायामिन्द्रियेण जन्यमानत्वादनुमानादेश्च न साक्षात्कारित्वमित्यर्थः ।

टीयाम् ॥ भावान्मतेरिति । स्मृत्यादेर्भावात् ।

इन्द्रियान्तरसहकारीति । एकतरस्येन्द्रियस्य सहकारि न तु सर्वस्य । अत आह—**तच्च ज्ञानायौगपद्यलिङ्गमितीति ।** ज्ञानायौगपद्येन हि लिङ्गेन मनो गृह्यमाणमिन्द्रियान्तरसहकारि अणुपरिमाणं च गृह्यते । यदि हीदमेकदैव सर्वेन्द्रियसहकारि व्यापकं वा स्यात्, तदापि ज्ञानायौगपद्यं न स्यादित्यर्थः ।

कारणसत्तयेति । सत्तामात्रावस्थितेन कारणेन, न तु ज्ञानेनेत्यर्थः ।

मनोलिङ्गेनेति । मनोलिङ्गस्य ज्ञानायौगपद्यस्य ज्ञानम् ।

तत्स्वरूपमिति । मनःस्वरूपम् ।

उने ॥ किं तु कार्येति । पदार्थानां यः कार्यकारणस्वभावानतिक्रमः तेन विरोधो निवार्यते ।

विशेष इति । योगिनाम् ।

ईक्षन्ते इति । योगिनः ।

तदपीति । न केवलमचिन्त्यो हि योगातिशय इति **पर**मतम् । मनो मनोऽन्तरेण प्रत्यक्षं वीक्षते इत्यपि **पर**मतम् ।

[752a] अस्मदादिमनोज्ञानतुल्यतामेव भावयति—**यथा हीति ।**

इहापि तथेति । प्राप्तं मनो गृह्यते नाप्राप्तम् । प्राप्तिश्च भेदाधिष्ठाना नाभेदे भवितुमर्हतीति ।

अन्यथेति । यदि योगिप्रत्यक्षे योगजधर्मानुग्रहलक्षणाया [:] प्राप्तेः सकाशादन्या प्राप्तिर्विवक्ष्येत, तदा अतीतानागतार्थानामसत्त्वेन मनःप्राप्तेरसंभवादसाक्षात्कारप्रसङ्गः ।

एतेनेति । कर्मकरणविरोधव्याख्यानेन ।

टीकेयमिति । यथा कारणसत्तयेत्यादिका ।

वाके ॥ बहुत्वं चात एवेति । आत्मैक्ये देवदत्तदृष्टं यज्ञदत्तोऽपि स्मरेदिति [1]दर्शनस्पर्शनाभ्यामेकार्थग्रहणव्यवस्था हिंस्यहिंसकभावाभावेन पातकव्यवस्था च न स्यात् । अस्ति चेयं व्यवस्था । तस्मादात्मनानात्वमिति भावः ।

॥ इति मनोव्यतिरेकपरीक्षाप्रकरणं संपूर्णम् ॥

1 III. i. I

॥ आत्मनित्यतापरीक्षाप्रकरणम् ॥

[३.१.१८–२६]

टीयाम् ॥ शास्त्रार्थेति । अर्थशब्दः प्रयोजनवचनः ।

उने ॥ आन्वीक्षिक्या इति । यद्यपीदं शास्त्रं निःश्रेयसार्थमेव, तथाप्यान्वीक्षिकी स्वर्गाद्यभ्युदयार्थानां **कर्ममीमांसा**दिविद्यान्तराणां यागादिकर्मव्यवस्थापकत्वेनोपकारिकेति तस्या अभ्युदयार्थत्वमप्यस्ति । तदिदमान्वीक्षिकी सामान्यप्रसङ्गागतमभिप्रायीकृत्येत्यर्थः ।

भाष्ये ॥ उभयथादृष्टत्वात् संशय इति **सूत्रम्**[1] ।

वाके ॥ आत्मास्तित्वव्यतिरेकहेतुभिरिति । आत्मास्तित्वस्य शरीरास्तित्वादिभ्यो यो व्यतिरेकस्तद्धेतुभिः प्रतिसन्धानादिभिः ।

टीयाम् ॥ सिद्धे देहादिव्यतिरेके इति । प्रतिसन्धानादिहेतुतः ।

अनुगमे इति । सिद्धेऽपीत्यत्रापि योज्यम् ।

उने ॥ तेनेति । [2]शरीरदाहे पातकाभावादित्यादिना ।

देहस्य भेदादिति । देहस्य भेदो यतः, अतो देहस्याप्रतिसन्धातृत्वात् ।

टीयाम् ॥ देहभेदादवस्थानं सिद्धमिति **भाष्य**मनुपपन्नम् । न हि देहभेदोऽवस्थानहेतुः संभवति । अत आह—**ल्यब्लोपे पञ्चमीति ।**

अस्येति । आत्मनः ।

उने ॥ द्वन्द्वकर्मधारयेति । द्विवचनप्रसङ्गात् समाहारविवक्षायां तु नपुंसकलिङ्गप्रसङ्गात् द्वन्द्वानुपपत्तिः । सामानाधिकरण्याभावाच्च कर्मधारयानुपपत्तिः ।

---

1 V.S. II. ii. 22 2. III. i. 4

ननु न विद्यते शक्यं शक्तिर्यस्य तद्भावोऽशक्यता, अशक्ततेत्यर्थपरतायां हानाशक्तता प्रतिपत्तृधर्मो भविष्यतीत्याशङ्क्याह—**अशक्ततेति** । अ[1]शक्यतेत्यस्या-शक्ततेत्यर्थपरत्वेऽपीत्यर्थः ।

सत्तामात्रेणेति । अज्ञातं सत् ।

तदिति । हानाशक्तत्वम् ।

अनुपलब्धेति । यस्य पुत्रविनाशो देहान्तरेऽभूत् न चानेन श्रुतः, तस्य या विनष्टस्य पुत्रस्य दर्शनप्रार्थना सा इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थनात्वात् शोकः प्राप्नोतीत्यर्थः ।

टीयाम् ॥ अनर्हणेनेति । इष्टविषयवियोगे सतीत्यस्मात् प्राप्तेनानर्हणेन प्राप्त्ययोग्य त्वेन प्राप्त्यशक्यताज्ञानं शोचतः सूचयति अनर्हणेनैव प्राप्त्यशक्यतामात्रस्य सिद्धत्वात् पुनः प्राप्त्यशक्यतोपादाने तज्ज्ञानं लभ्यते इत्यर्थः ।

वाके ॥ तदनुभव इति । हर्षाद्यनुभवतः ।

अभ्यस्तादिपदानि व्याचष्टे—**एकविषयेति** ।

उने ॥ यथा प्रत्यक्षगृहीते विषये स्मृतिः, तथानुमानादिगृहीतेऽपि स्यात् । अत आह—**अनुमेयादीति** ।

नानुसन्धानविषयेति । तत् कथमुक्तं तस्याः स्मृतेरनुसन्धान[752b]रूपो विषयो यस्य तदनुसन्धान इति शेषः ।

टीयाम् ॥ अनुसन्धीयते इतीति । एतच्च व्याख्यानं तस्य प्रत्यक्षस्य यदनुसन्धेयं ग्राह्यं तद्विषय इति स्मृतिलक्षणेऽपि ज्ञेयम् ।

वर्तमानस्येति । एतेन तस्य वर्तमानस्य दृश्यस्य भावो वर्तमानत्वं दृश्यत्वं विषयो यस्य स तथेति तद्भावविषयस्यार्थो दर्शितः ।

उने ॥ अनयोरिति । अनन्तरोक्तलक्षणयोः ।

---

1 S °शक्ताविल्य°

वाके ॥ सर्वत्र योज्यमिति । सा हि शोकादिमदात्मवती भवति स्मृतिमदात्मवती चेत्येवं सर्वत्राविनाभावो दर्शनीय इत्यर्थः ।

भाष्ये ॥ अनेन हेतुनेति । केनापि ।

आसेवितेषु विषयेष्विति । यौवनावस्थायामुपभुक्तेषु विषयेषु ।

एवं च सतीति । पद्मादिषु प्रबोधसंमीलनक्रिययोः कारणे सिद्धे ।

वाके ॥ किं दृष्टकारणप्रत्याख्यानमिति । किं शोकादेर्यद्दृष्टं कारणं स्मृत्यनुबन्धः, तत्प्रत्याख्यायते ? अथ वा दृष्टात् कारणादन्यत् कारणमुपपाद्यते ।

उने ॥ तत् कथं दृष्टान्तादेरुपादानमिति । दृष्टत्वात् ।

वाके ॥ अत एव दृष्टेन विशेषितत्वादिति । दृष्टात् कारणादन्यस्य कारणस्योपादानमिति वदता त्वयैव दृष्टत्वं व्यवस्थापितम् । ततश्च प्रस्तुतकारणस्य **दृष्टत्वात्** कारणान्तरोपपादनमयुक्तमित्यर्थः ।

उने ॥ इति भाव इति । इति **परा**भिप्रायः ।

साधर्म्यसमप्रकरणसमाभ्यां न भिद्यत इति । यदि विकारित्वादनित्यसाधर्म्यादनित्य आत्मा, तदा नित्यसाधर्म्यादमूर्तत्वान्नित्यो भवत्वित्येवं परकीयहेतौ दूष्यमाणे साधर्म्यसमैवेयं जातिः ।

सपक्षपरपक्षाभ्यां कृते हेतौ प्रसङ्गतः ।
साधर्म्योक्तिर्विपक्षेण सा साधर्म्यसमा मता ॥

इति हि तल्लक्षणम् । परहेतोरनेन हेतुना बाधाभिपाते तु प्रकरणसमैवेयं जातिः समानबलेन बाधाभिधानं प्रकरणसम[1] इति हि तल्लक्षणमित्यर्थः ।

साध्याविशिष्ट इति । उत्पत्तिनिरोधरूपौ धर्मावात्मनि यत् साध्यं तेनाविशिष्टः ।

तयोरिति । धर्मधर्मिणोः ।

---

1 cf. V. i. 16

एवं सतीति । परोक्ते आत्मन उत्पत्तिनिरोधानुमाने दूषिते ।

भाष्ये ॥ न चोत्पत्तिनिरोधकारणानुमानमिति । एतच्चानन्तरसूत्रवार्त्तिककारादिभिः स्पष्टितम् ।

दृष्टान्तादिति । [1]पद्मादिषु प्रबोधसंमीलनविकारलक्षणात् ।

नौष्ण्यादिवदिति । यथा पद्मसङ्कोचादीनां पद्मादिव्यतिरिक्तमुष्णादि निमित्तमुपादीयते, न तथा हर्षादीनां स्मृत्यनुबन्धव्यतिरिक्तं निमित्तमुपादीयते ।

एतदिति । पद्मादिषु प्रबोधसंमीलनविकारवत् तद्विकार इत्येत् ।

वाके ॥ पूर्ववत्प्रयोग इति । यथा पूर्वाभ्यस्तेत्यादि सूत्रे स्मितरुदितादिमत्त्वेन शोकादिमदात्मवती बाल्यावस्था साध्यते शोकादिमदात्मवत्त्वेन च स्मृतिमदात्मवती बाल्यावस्थेत्यादि, तथात्रापि प्रवृत्तिमत्त्वेनाहाराभिलाषवदात्मवती बाल्यावस्था साध्यते । आहाराभिलाषवदात्मवत्त्वेन च स्मृतिमदात्मवतीत्यादि ।

टीयाम् ॥ इत्यभिप्राय इति । [2]अयसोऽयस्कान्तेत्यादिसूत्रबाधिनः पूर्वपक्षिणः ।

वाके ॥ तत्केनेति । तदिति निमित्तम् ।

टीयाम् ॥ तेन हेतुनेति । स्मृत्यनुबन्धलक्षणेन कारणेन सह ।

स्मृतेः कार्यमिति । स्तन्याभिलाषरूपम् ।

उने ॥ तथापीति । [753a] भवतु बालस्यापि पूर्वाभ्यस्तस्मृत्यनुबन्धहेतुका प्रवृत्तिः परम् ।

टीयाम् ॥ तन्नियमेनेति । अदृष्टपरिपाकनियमेन ।

वाके ॥ पूर्ववत् प्रसङ्ग इति । पद्मादिषु प्रबोधेत्यादिसूत्रे[3] इव ।

भाष्ये ॥ यदि निर्निमित्तं । तदेति शेषः ।

---

1 cf. III. i. 19 2 III. i. 22 3 III. i. 19

क्रियालिङ्ग इति । क्रियया क्रियाहेतुर्ज्ञायते । क्रियानियमेन च क्रियाहेतुनियम इत्यर्थः ।

उने ॥ अनयोरिति । [1]अयसोऽयस्कान्ताभिसर्पणं न तावत् निर्निमित्तम् । अयसोऽन्यत्र लोष्टादावयस्कान्ततत्प्रवृत्त्यभावादिति यथाश्रुताक्षरार्थस्य **सूत्रस्य** यदि निर्निमित्तमित्यादिना अन्यथा **सूत्र**व्याख्यापरस्य **भाष्यस्य** च ।

भाष्ये ॥ दृष्टेन विशिष्यते इति । दृष्टत्वादभ्यस्तस्मरणं कारणं नान्यदित्यर्थः ।

अभ्यस्तस्मरणस्याहाराभिलाषकारणत्वं प्रति दृष्टत्वं दर्शयति—**दृष्ट** इति ।

शरीरिणामिति । युवादीनाम् ।

टीयाम् ॥ पूर्वानुभूतविषयानुचिन्तनमिति **भाष्यमे**कविषय इत्यादिवाक्यैर्व्याचक्षाणेन न च स्मृतिमन्तरेण भवतीत्यादि **वार्त्तिक**मपि यद् व्याख्यातं तत्पूर्वानुभूतविषयानुचिन्तनमिति **भाष्य**व्याख्यारूपमेतद् **वार्त्तिक**मिति दर्शयितुम् ।

वाके ॥ कारणनियमेनेति । पूर्वानुभूतस्मृतेरेव रागो नान्यस्मादित्येवं न नियमपरं **सूत्रम्** ।

तदिति । पूर्वशरीरसंबन्धमात्रम् ।

न किञ्चिदुक्तमिति । ततश्चादृष्टाद्राग इत्यनेन किञ्चिदस्मदभिमतं प्रतिषिद्धमित्यर्थः ।

टीयाम् ॥ ननु **सूत्रकारः** पूर्वानुभूतविषयस्मरणस्येवादृष्टस्यापि रागकारणत्वं वक्ति जातिविशेषाच्चेति **सूत्रे**ण । तत्कथमुच्यते परमार्थतस्तन्मयत्वात् पूर्वानुभूतस्मृत्यनुबन्धाद् राग इत्याशङ्क्य जातिविशेषाच्चेति [2]**सूत्र**मवतारयति—**स्यादेतद् यदीति** । अदृष्टं संस्कारोद्बोधकम् । उद्बुद्धसंस्कारजन्यस्मरणहेतुश्च राग इत्यर्थः ।

उने ॥ भेषजाद्यनुपपत्तिश्चेति । प्रज्ञाद्यर्थं ब्राह्म्याद्यौषधानुपपत्तिः ।

---

1 cf. III. i. 22 2 V.S. VI. ii. 16

प्रत्यङ्गिरयतीति । प्रत्युत्तरयति ।

निमित्तोपकारद्वारेणेति । निमित्तस्य प्राग्भवीयसंस्कारोद्बोधद्वारेण ।

तस्यापीति । भेषजादेरपि ।

॥ इत्यात्मनित्यतापरीक्षाप्रकरणं संपूर्णम् ॥

॥ शरीरपरीक्षाप्रकरणम् ॥

[३.१.२७–३१]

उने ॥ आत्मपरीक्षेति । आत्मपरीक्षारूप एकोऽर्थोऽभिधेयो येषां तद्भावेन ।

प्रागेव समर्थितत्वादिति । द्वितीये प्रमाणानि परीक्षितानि । इहेदानीं कारणरूपप्रमेयषट्कं परीक्षिष्यते तदेवाध्यायार्थ इत्यनेन ।

तद्व्याघातादिति । तृतीयाध्यायानुप्रवेशव्याघातात् ।

ननु शरीरादिप्रकरणैः स्वरूपतो भिन्नमेवाह्निकं भविष्यति । तत आह्निकानन्तर्भावेऽपि न तद्व्याघात इत्याशङ्क्याह—**स्वरूपतश्चेति ।**

उभयसंग्राहकस्येति । अध्यायत्वाह्निकत्वसंग्राहकस्य ।

नन्वेषां द्वितीयाह्निके संग्रहो भविष्यतीत्याशङ्क्याह—**द्वितीयेति ।** शरीरान्तर्वर्तिप्रमेयपरीक्षा हि द्वितीयाह्निकार्थो वक्ष्यते । न च शरीरादीनि शरीरान्तर्वर्तिप्रमेयाणि । ततश्च द्वितीयाह्निकोपाधिना शरीरान्तर्वर्तिप्रमेयपरीक्षालक्षणेनासंग्रहः शरीरादिप्रकरणानामित्यर्थः ।

तथेति । शरीरादिप्रकरणानां क्रोडीकारकः ।

असाविति । आत्मपरीक्षारूपः ।

पूर्वोक्त एवेति । उत्तरषट्कं प्रति कारणरूपप्रमेयषट्कस्य मध्ये बुद्ध्युत्पादक-[753b]प्रमेयपरीक्षालक्षणः ।

सिद्धान्त्याह—**नेति ।** न वाच्यमेतत् । यत आत्मपरीक्षा अमीषामर्थश्च विवक्षितश्च । न चाह्निकोपाधिरिति ब्रूमः ।

एतदेव भावयति—**प्रधानतया हीति ।**

उत्तरत्रेति । उत्तरप्रकरणेषु ।

पार्थिवत्वेनेति । पार्थिवत्वेन चेष्टेन्द्रियार्थाश्रयः शरीरमिति शरीरलक्षणस्य किमुपपद्यते, आप्यत्वादिना वा किं वा नोपपद्यते इति संबन्धः ।

इदमिति । शरीरपरीक्षाप्रकरणम् ।

अस्येति । शरीरस्य ।

तत इति । अचैतन्यसिद्धेः ।

प्रयत्नवदिति । प्रयत्नवत आत्मनः संयोगोऽसमवायिकारणं यस्या सा या क्रिया तद्रूपा या चेष्टा तदाश्रयत्वम् ।

तदारम्भकेति । तस्य शरीरस्यारम्भकेभ्योऽवयवेभ्यः शेषीभूता ये आहारावयवाः, तेषां यावुपचयापचयौ, तौ हेतुभूतौ ययोस्तौ तथाभूताविन्द्रियोपचयापचयौ, तल्लक्षणमिन्द्रियाश्रयत्वं सिध्येदिति वक्ष्यमाणेन योगः ।

भौतिकत्वे ह्यनिरूपिते शरीरस्य न तदारम्भकेत्यादिस्वरूपमिन्द्रियाश्रयत्वं घटते इत्यर्थः ।

तदवच्छिन्नस्येति । शरीरावच्छिन्नस्यात्मनो यद्भोगाधिकरणत्वं तत्स्वरूपं यत् तस्य शरीरस्यापाश्रयत्वम् । तच्च सिध्येद् भौतिकत्वे निरूपिते शरीरस्याचेतनत्वसिद्ध्या ।

लक्षणमेवेति । शरीरलक्षणमेव ।

टीयाम् ॥ **न कारणं कार्यस्यात्मेति** । पृथिवी च कारणं शरीरं च कार्यम् ।

उने ॥ **अत्र चेति** । शरीरपरीक्षायाम् ।

शरीरस्यैकप्रकृतिकत्वे सिद्धे इति । यदि हि शरीरस्यैकप्रकृतिकत्वं सिद्धं स्यात् तदा ।

तदेवेति । एकप्रकृतिकत्वम् ।

एवमिति । सततोत्पादकत्वम् ।

न ह्यनपेक्षितेति । अनपेक्षितमारम्भणीयस्य पटादिरूपादेः समवायिकारणं पटादि येन तत् तथा सदसमवायिकारणं तन्त्वादिगतरूपादि न ह्यारम्भकम् ।

तदेतदेकत्रापि तुल्यमिति । एकपार्थिवपरमाणुगन्धोऽपि यत्र गन्ध आरम्भणीयस्तस्यापेक्षणीयस्य समवायिकारणस्याभावात् नारम्भक इति न सततोत्पादकत्वप्रसङ्ग इत्यर्थः ।

आरम्भकत्वदर्शनादिति । पटादिगतरूपादिं प्रति ।

कारणानामिति । कारणानां तन्त्वादिगतानां सजातीयतया तत्र पटादिगत-रूपादौ तथोपपत्तेः तन्त्वादिगतानां रूपादीनामनेकेषामेवारम्भकत्वोपपत्तेः ।

विजातीयानामिति । पार्थिवाप्यादिपरमाणूनाम् ।

अन्यथेति । पार्थिवादिपरमाणूनाम् ।

अन्यथेति । पार्थिवादिपरमाणुगतस्य गन्धादेरेकस्याप्यारम्भकत्वम् ।

विपक्षे इति । विजातीय एकोऽप्यारम्भक इत्यत्र ।

तेनोष्णं जलमिति । तेजोऽम्बुपरमाणुभ्यां द्व्यणुकोत्पत्तय उष्णजलस्य भूवायुपरमाणुभ्यां द्व्यणुकोत्पत्तयः सुरभिवायोश्च मूलकारणानीति हि **पर**स्याभिमानः ।

अनियमारम्भे हीति । अनेके आरम्भका एकोऽप्यारम्भक इत्येवम् ।

तथा चेति । सजातीययोरपि परमाण्वोरारम्भकत्वाभ्युपगमे ।

गन्धवद्द्रव्यमिति । गन्धवद्द्रव्यं गन्धवतारभ्यते नागन्धवतेत्यगन्धवत आरम्भकस्य व्यवच्छेदोऽत्र विवक्षितः । गन्धवच्च द्रव्यं गन्धवदारभते इत्यत्र तु गन्धवदारभते नागन्धवदित्यगन्धवत आरभ्यस्य व्य[व]च्छेदो विवक्षित इत्यनयोर्न पुनरुक्तार्थत्वम् । एवमि-तरत्रापि । इमां च विवक्षामग्रे प्रमाणार्थं दर्शयन् स्वयमेव विस्पष्ट[754a]यिष्यति ।

निर्गन्धता च प्रतिक्षेप्तव्येति । गन्धवता द्रव्येण स्वकारणे ।

विरुद्धव्याप्तोपलब्धेरिति । कारणसंबन्धिन्या निर्गन्धताया निषेध्याया यद्विरुद्धं गन्धवत्त्वं कारणस्य । तेन यद् व्याप्तं गन्धवत्कार्यं तस्योपलब्धेः ।

ततः किमित्याह—**तत्र पाथसीयस्यापीति** । तत्र गन्धाक्षेपे सति ।

जातिसंकारो वेति । गन्धसंभवेऽपि चेत् पाथसीयत्वमिष्यते तदा पार्थिवत्व-माप्यत्वं च स्यादित्यर्थः । यदि तु गन्धसंभवेऽपि पाथसीयत्वमेवेष्यते, तदा न वा गन्धो लक्षणं पृथिव्या इति ।

तस्यापीति । गन्धाक्षेपे पाथसीयस्याप्यणोः पार्थिवत्वम् । अतोऽस्य विजाती-यत्वाभावात् विजातीयश्चासावारम्भकश्च विजातीयारम्भकः तद्भावेन व्याघातो विजातीयोऽ-यमारम्भक इति व्याहन्यते इत्यर्थः ।

इति सर्वं समाकुलमापद्येतेति । इत्येवं सर्वमनवस्थितं भवेदित्यर्थः ।

पार्थिवाप्यारब्धस्य द्व्यणुकस्य यदि गन्धवत्त्वं स्यात् तदा स्वकारणे गन्धाक्षेपे उक्तदूषणानि भवेयुः, तदेव त्वस्य न भविष्यतीत्याशङ्कयाह—**निर्गन्धत्वं त्विति ।**

तदारम्भकेति । तच्छब्दो गन्धपरामर्शकः । स चासावारम्भकश्चेति कर्मधारयः ।

प्रमाणार्थ इति । एकस्यानारम्भकत्वादित्यस्य प्रमाणस्यार्थः ।

तयोरिति । आप्य तैजसाण्वोः संबन्धिनां गुणानां मिथो विरोधेन ।

तदारब्धस्येति । आप्यतैजसाण्वारब्धस्य ।

विपक्षे इति । पार्थिवाप्याण्वोः संभूयारम्भे ।

एतेनेति । विजातीयारम्भनिषेधेन ।

तन्तुभिरिति । बहुत्वसंख्यायुक्तैरपि पटस्य कार्यद्रव्यस्यारम्भकैः ।

वाक्छलावकाशः स्यादिति । न कार्यद्रव्यमारभते इत्यत्रैकमिति पदं विना जात्यभिप्रायेण बहुष्वप्येकवचनसंभवे कार्यद्रव्याणीति कल्पयित्वा बहुकार्यद्रव्यानारम्भोऽस्माकमपीष्ट इति सिद्धसाधनतया प्रतिज्ञावाक्यघातकं वाक्छलं यथा न प्रवर्तेतेत्यर्थः ।

विपक्षे इति । त्रयाणां परमाणूनां कार्यद्रव्यारम्भकत्वे ।

कार्यकारणयोरिति । कार्यं द्व्यणुकम्, कारणमणुः ।

तुल्यजातीयत्वप्रसङ्गादिति । महदारम्भकत्वेन ।

इदमिति । कार्यकारणयोस्तुल्यजातीयत्वम् ।

कार्यकार्ये इति । कार्यस्य द्व्यणुकस्य यत् कार्यं महद्द्रव्यम्, तत्र विषये ।

कारणकारणस्येति । महद्द्रव्यकारणस्य द्व्यणुकस्य यत्कारणमणुस्तस्य ।

अन्यथेति । यद्यन्त्यावयवी परमाणुभिरारभ्येत ।

सेति । तदवयवतन्त्वंश्वादिपरम्परा ।

ननु सन्तु परमाणवोऽतीन्द्रिया परमेतैर्यथा अन्त्यावयवी आरभ्यते, तथा अन्तरालावयविनस्त्रसरेण्वंश्वादयोऽप्यारप्स्यन्ते तत उपलप्स्यन्ते इत्याशङ्कयाह—**पटस्य चेति ।**

तैरेवेति । परमाणुभिरेव ।

द्रव्यान्तराभावोऽपि कुत इत्याह—**मूर्तानामिति**। येष्वेकं द्रव्यं समवेतं तेष्वन्यस्य द्रव्यान्तरस्य समवायानुपपत्तेरिति भावः।

नन्वेवं घटे विद्यमानेऽपि कपालशर्कराचूर्णक्रमो नोपलभ्येतेति भवता व्यवस्थापितम्। **टीका**यां तु घटनाशे इत्युक्तम्, तत् कथमिदम्? अत आह—**टीकायां त्विति**।

अवयवपरम्परेति। अवयविविनाशे हि अवयवपरम्पराप्रतिपत्तिर्विस्पष्टा स्यादित्येतावन्मात्रार्थम्। वस्तुतस्तु **टीकाकृतो**ऽपि मदुक्तमेव विवक्षितमित्यर्थः।

पूर्वकार्यविनाशे इति। घटविनाशे।

परिशिष्टेति। घटारम्भकसंयोगेभ्यः परिशिष्टा ये संयोगाः, तदुपकरणैः।

खण्डपटारम्भन्यायेनापीति। यथा अन्त्यावयविनि पटे स्फाटिते-
[754b]पटारम्भकसंयोगपरिशिष्टसंयोगोपकरणैस्तन्तुभिः खण्डपट आरभ्यते तथा।

तदारम्भोपपत्तेरिति। कपालशर्कराद्यारम्भोपपत्तेः।

सेति। क्लेदपाकाद्युपलब्धिः।

संयुक्तसमवायेनेति। शरीरसंयुक्ते ये अप्तेजसी तत्र यः समवायस्तेन।

अत्रेति। **सूत्रे**।

आनाशमिति। नाशं यावत्।

इतरविशेषेति। इतरस्याबादेर्ये विशेषगुणाः, तेषामनुद्भूतत्वं च।

तदवयवानामिति। शरीरावयवानाम्।

यावत्तथाभूतेति। यावत् तथाभूतो गन्धोऽनुवर्तते, तावच्च शरीरस्य प्रत्यभिज्ञानात्।

ननु विपरीतेनेति। व्यवस्थाप्यते इति संबन्धः।

आगमापायिनेति। आगन्तुकत्वेनापायिना।

टीयाम्॥ **कृतकनित्यत्वेति**। कृतकस्यापि नित्यत्वप्रसङ्गः।

उने॥ **एकद्वित्रीति**। शब्दलक्षणैकेन तन्मात्रेण नभोलक्षणं भूतसूक्ष्ममारभ्यते। द्वाभ्यां च शब्दस्पर्शाभ्यां वायुलक्षणम्। त्रिभिश्च शब्दरूपस्पर्शैस्तेजोलक्षणम्, चतुर्भिश्च

शब्दरूपस्पर्शरसैरब्धलक्षणम् । पञ्चभिश्च शब्दरूप[स्पर्श]रसगन्धैर्भूलक्षणं भूतसूक्ष्ममारभ्यते । तत्र पञ्चतन्मात्रारब्धत्वाविशेषेऽपि गन्धतन्मात्रप्रकर्षात् पृथिवी । चतुस्तन्मात्रारब्धत्वाविशेषेऽपि रसतन्मात्रप्रकर्षादापः । त्रितन्मात्रारब्धत्वाविशेषेऽपि रूपतन्मात्रप्रकर्षात् तेजः । द्वितन्मात्रारब्धत्वाविशेषेऽपि स्पर्शतन्मात्रप्रकर्षाद् वायुः । एकतन्मात्रारब्धं त्वाकाशम् । तस्य चैकतन्मात्रारब्धत्वं विशेष एव, नाविशेषः ।

अतस्तन्मात्रारब्धप्रसङ्गादेवोक्तम्—**एकेति** । न त्वविशेषोक्तावुपयुक्तमिदम् ।

तेषामिति । **सांख्या**नाम् ।

किञ्चिदिति । भूतसूक्ष्मविकारभूतं घटादि ।

यदेतदिति । यदेतत् तिर्यङ्नारकादिशरीरं तत् सर्वं समानगुणप्रकर्षादेव पार्थिवमिति संबन्धः ।

वाके ॥ एवं च सतीति । यदा कार्यस्य कारणे लयः प्रलयो नाभिधीयते, किं तु प्रलयशब्देन कार्यशून्यं कारणमेवाभिधीयेत तदा ।

अयमर्थ उक्तो भवतीति । न चायमर्थोऽभिप्रेतः **सांख्या**नाम् ।

॥ इति शरीरपरीक्षाप्रकरणं संपूर्णम् ॥

॥ इन्द्रियपरीक्षाप्रकरणम् ॥

[३.१.३२–५१]

उने ॥ अनेनैवेति । उद्देशलक्षणक्रमानुरोधादिति **टीका**वाक्येनैव ।

द्वे च परीक्षे इति । भौतिकत्वपरीक्षातैजसत्वपरीक्षालक्षणे ।

भविष्यद्वार्त्तिकानुसारेणेति । किमा[भि]व्यक्तिकान्याहङ्कारिकाणीति **वार्त्तिका**नुसारेण ।

भाष्यमिति । किमा[भि]व्यक्तिकानीत्येतत् ।

टीयाम् ॥ मूलकारणत्वादिति । साक्षादाहङ्कारिकत्वम् , परम्परया तु प्राकृतत्वमित्यर्थः ।

उने ॥ सति भावव्यतिरेकाविति । सति कृष्णसारे भावश्च उपलम्भस्य व्यतिरेकश्चोपलम्भकाले कृष्णसारस्य विषयाप्राप्तता ।

अलौकिकेति । किमाहङ्कारिकाण्याहो भौतिकानीति संशय्यमानस्य कोटिद्वयस्य न साधारणो धर्मः ।

व्यतिरेकावधित्वानुपपत्तेरिति । सति भावव्यतिरेकावहङ्काराद्व्यावृत्तावित्येवं व्यतिरेकं व्यावृत्तिं प्रति यदवधित्वमहङ्कारस्य तदनुपपत्तेः । प्रमाणगृहीतमेव हि वस्त्ववधिः स्यादिति भावः ।

टीयाम् ॥ संशयादन्यत्वाद् विप्रतिपत्तेः कथं संशय इत्यनेन विप्रतिपत्तिरुच्यते । अत आह—**कारणेति ।**

तदतिरिक्तमिति । कृष्णसारातिरिक्तं चक्षुः ।

तच्चेति । कृष्णसारातिरिक्तं चक्षुः ।

उने ॥ तत इति । कृष्णसारात् ।

प्रदीप एवेति । स्वतोऽणुग्राहकेऽपि[755a]भौतिकः ।

ननु यदि अणुग्राहकसाधकं तर्हि किमर्थमेतदत आह—**तत्परिमाणेति ।** विषयपरिमाण° ।

वाके ॥ तस्य तदिति । एतेन कृष्णसारकरणकं रूपग्रहणमित्युक्तं स्यात् ।

उने ॥ ननु प्रदीपादिति । ननु प्रदीपादौ सति रूपोपलब्धिर्भवन्ती प्रदीपादिकरणिकैवेति लोकसिद्धमतः कथं प्रदीपादिभिर्व्यभिचार इत्यर्थः ।

वाके ॥ प्रदीपस्येति । प्रदीपकरणिकेत्यर्थः ।

टीकायां ॥ न चायमिति । उत्पादविशेषः ।

उने ॥ विवृततात्पर्या इति वयमिति शेषः ।

वाके ॥ प्रदीपाद्यनभ्युपगमे इति । प्रदीपादीनां महदणुप्रकाशकत्वानभ्युपगमे ।

उने ॥ तावद्रूपिप्रकाशिकेति । हानोपादानोपेक्षाबुद्धीनां प्रकाशिकेत्यर्थः ।

ननु लिङ्गादिज्ञानेन लिङ्ग्यादि प्रकाश्यते, लिङ्गादि चाणु महद्वेत्यत आह—**लिङ्गिबुद्ध्यादौ त्विति ।**

लिङ्गादिकमेवेति । न तु लिङ्गादिज्ञानम्, यथा चैतत् तथोक्तं प्राक् ।

अभौतिकानीति । इन्द्रियमभौतिकमिति अभूतात्मकमिति यावदुक्तं स्यादित्यनेनाभूतात्मकानीत्यर्थः । **परे** अभौतिकानीति साध्ये सामान्येनेन्द्रियाणीति धर्मिणं वदतोऽभूतात्मकं मन इतीन्द्रियमेव दृष्टान्तं च वदत इत्यर्थः ।

अनैकान्तिकत्वं चेति । प्रदीपादिप्रभया ।

इन्द्रियत्वादित्यस्य तु किमायातमिति । इन्द्रियत्वादिति त्वदुष्टमेवेत्यर्थः ।

उत्तोलयतीति । उत्कर्षयतीत्यर्थः ।

वाके ॥ प्रतिबध्यमानाप्रतिबध्यमानयोरिति । वृत्तिवृत्तिमतोः ।

अनर्थकमिति । मिथो व्याघातात् निरभिधेयम् ।

वाके ॥ उभयप्रतिपत्ताविति । परभागाधोभागयोः प्रतिपत्तौ ।

टीयाम् ॥ आचार्यदेशीयानामिति । तदनुपलब्धेरहेतुरित्येतत्परिजिहीर्षूणाम् ।

वाके ॥ इदं [1]सूत्रमिति । महत्त्वादनेकद्रव्यवत्त्वाद् रूपाच्चोपलब्धिरित्येतत् ।

कारणप्रतिपादकमिति ॥ समग्रकारणप्रतिपादकम् ।

नैतान्युपलब्धिकारणानीति । न महदनेकद्रव्यरूपाणि उपलब्धेः समग्रकारणानि कारणसामग्र्ये ह्युपलब्धिः स्यादेव ।

टीयाम् ॥ ततो महत्त्वादिस्त्विति । महत्त्वादित्यादिसूत्रस्य यत्रोपलब्धिः, तत्र महदनेकद्रव्यरूपाणि सन्त्येवेत्युपलब्धिनियमार्थपरत्वे हि महत्त्वानेकद्रव्यवत्त्वरूपाणि तावदुपलब्धेः कारणानीति कारणनैयत्यमुक्तं स्यात्, न पुनर्महत्त्वादीन्येवोपलब्धिकारणानीति कारणसाकल्यम् । एतद्धि तदोक्तं स्यात्, यदि यत्र यत्र महदनेकद्रव्यरूपाणि सन्ति तत्तदुपलभ्यत एवेत्युपलभ्यमाननियमार्थपरत्वं सूत्रस्य स्यात्, न चैतदुच्यते । कारणनैयत्यप्रतिपादनं च **सूत्रे** महत्त्वाद्येकतरपदोपादानेऽपि महत्त्वाद्येकतरत् तावदुपलब्धेः कारणमित्यर्थः सिध्यत्येवेत्यनेकपदोपादानवैयर्थ्यम् । तस्मात् समस्तार्थानां महत्त्वादीनां या ग्रहणे योग्यता तदर्थाभिधानपरं **सूत्र**मित्यर्थः ।

वाके ॥ रूपग्रहणेन रूपविशेषोऽभिधीयते न रूपादिमात्रमिति स्वकपोलकल्पितं मा मंस्तेत्याशङ्क्य **सूत्रकार**संवादमाह—**एवं च सूत्रमिति ।**

भाष्ये ॥ यथा च चेतनस्येति । विषयोपलब्धिप्रकारः सुख[755b]दुःखोपलब्धिप्रकारश्च यथा चेतनस्यार्थः प्रयोजनं संपद्यते तथेन्द्रियाणि कर्मणा व्यूढानि वर्णितानि[?] ।

ननु भवतु विषयोपलब्ध्यर्थं सुखःदुखोपलब्ध्यर्थं वेन्द्रियव्यूहः, चाक्षुषरश्मिव्यूहस्तु किमर्थं इत्यत आह—**विषयप्राप्त्यर्थश्चेति ।**

यद्येवं रूपस्पर्शानभिव्यक्तिः किमर्थमत आह—**रूपस्पर्शेति ।**

1 V.S. IV. i. 8

टीयाम् ॥ **आदौ निपतितेनेति** । चक्षुषेति शेषः ।

वाके ॥ **तन्न व्यतिभेदादनुग्रहाच्चेति** । आदित्यरश्मयो हि निबिडत्वाभावाद्व्यतिभिद्यन्त इति युक्तम् । अनुग्रहार्थं च ते चक्षुषः प्रवृत्ताः कथमनुग्राह्यमेव व्यवदधीरन् ? नयनरश्मीनां तु निबिडत्वाभावो नाद्यापि सिद्धः, अनुग्राहकत्वं तु नास्त्येव । अनुग्राहकत्वं ह्येषामालोकसापेक्षाणां स्यात्, निरपेक्षाणां वा ? आद्ये सत्यप्यालोके अनुग्राहकमुद्भूतरूपत्वमिव रश्म्यन्तरमन्तरेण एकस्य ग्रहीतुः चाक्षुषं ज्ञानं न स्यात् । द्वितीये तु आलोकाभावेऽपि बहुषु दृष्टेषु चाक्षुषं ज्ञानं स्यादिति भावः ।

समग्रासमग्रचक्षुषोरिति । द्व्यक्षैकाक्षयोः ।

उने ॥ **इतस्ततो व्यवस्थितानामिति** । यथा पश्चाद्भागावस्थितपृष्ठादि मिथः पश्यन्ति, यथा च मिथश्चक्षूरश्मय संसृजन्ति, एवं व्यवस्थितानामित्यर्थः ।

इतरचक्षुर्वदिति । इतरचक्षुष इव स्वचक्षुषोऽपि पृष्ठादिना संबन्धादित्यर्थः ।

वाके ॥ न केवलमिन्द्रियाणां सृष्टिः कर्मकारिता किं तु सर्वेषामेव द्रव्याणामिति प्रसङ्गादुपपादयति— **सर्वद्रव्याणां चेति** ।

विश्वरूप इति । नानारूपः ।

उने ॥ **अलग्नकं भाष्यमिति** । अप्यनुमानतोऽनुपलब्धिरित्येतत् ।

टीयाम् ॥ **किं चानुद्भूतेरित्यत आहेति** । **भाष्यकारः** ॥

उने ॥ **दृष्टान्तस्थान एतद्वार्त्तिकमिति** । दृष्टान्तस्थान एतत्सूत्रमित्येतद् **वार्त्तिकं** विद्यते ।

प्रागेव बाह्येति । यदा हि आप्यद्रव्येण न कश्चिद् विषय उपलभ्यते, तदा बाह्यप्रकाशानुग्रहः किमर्थमपेक्ष्येतेत्यर्थः ।

टीयाम् ॥ **यदिति** । कर्तृ ।

उने ॥ **तज्जातीयतयेति** । विषक्तावयवाप्यद्रव्यजातीयतया ।

तत्तयेति । विषक्तावयवाप्यद्रव्यतया ।

मार्जाररश्मिर्हि उद्भूतरूपतयोपलभ्यते इति हेतोर्बाधितपक्षैकदेशतानिरासार्थमाह—**विवादाध्यासित** इति ।

तथा चायं तस्मात् तथेति । एतावान् परं विशेषश्चक्षुषः परप्रकाशे बाह्यप्रकाशानुग्राह्यजातीयत्वम्, आप्यद्रव्यस्य तु स्वप्रकाशे न चैतावता दृष्टान्तत्वक्षतिः ।

टीयाम् ॥ तमिमं विशेषमिति । मध्यन्दिनोल्काप्रकाशात् चाक्षुषस्य रश्मेर्बाह्यप्रकाशानुग्रहापेक्षत्वलक्षणो विशेषो विद्यते तमिममजानन् ।

उने ॥ अणुकरूपवत्त्वस्यापि लिङ्गभूतस्यास्तीति । द्व्यणुकं रूपवद् रूपवत्कार्यकत्वात् तन्त्वादिवत् ।

टीयाम् ॥ सन्निकर्षादिभिरिति । आदिपदाददृष्टादिग्रहः ।

उने ॥ अत्रापीति । सावधारणत्वेऽपि ।

संपातायातमिति । रूपादीनामित्यत्र हि आदिशब्देनावयविसंयोगादि गृह्यते । तच्च रूपस्यैवेत्यनेनैव मनसो व्यवच्छिद्यमानत्वात् प्रसङ्गागतमिति भावः ।

सन्निकर्षस्य समवायादिरिति । द्रव्ये गृह्यमाणे संयोगलक्षणस्य सन्निकर्षस्य समवायरूपा प्राप्तिर्द्रव्ये चक्षुषि च समवेतत्वात् संयोगस्य [756a] द्रव्यगतरूपादौ च गृह्यमाणे संयुक्तसमवायलक्षणस्य सन्निकर्षस्य संयुक्तसमवेतविशेषणत्वरूपा प्राप्तिः संयुक्तसमवायविशिष्टत्वाद् रूपादेरित्यादिरित्यर्थः ।

संयुक्तसमवायेति । अदृष्टं समवेतमात्मनि, आत्मा च संयुक्तोऽर्थेनेति संयुक्तसमवायरूपा प्राप्तिः ।

टीयाम् ॥ काचान्तर्गतेनेति । काचोऽन्तर्गतो मध्यस्थितो व्यवधायको यत्र तेन ।

नन्ववयवा व्यूह्यमाना न त्ववयवी, अतोऽप्रसक्तं व्यूह्यमानत्वं न निषेधमर्हतीत्यत आह—**अवयवव्यूहनमिति** ।

तस्य कीदृशस्येति । द्रव्यस्य कलशादेः ।

अव्यूह्यमानावयवात् कलशादेर्द्रव्याद् बहिरवस्थिते हस्तादिद्रव्ये यान्तर्व्यवस्थितस्य मधूदकादेः प्राप्तिः सा वा अविघात इति भावः ।

उने ॥ यथाकथञ्चिदिति । यदि द्रव्यान्तरासंपृक्तद्रव्यसमवाय इति कोऽर्थो, यत्किञ्चिद् द्रव्यान्तरं विद्यते तेन सर्वेणाप्यसंपृक्ते द्रव्ये समवाय इति तन्न संभवति । अथारम्भकद्रव्या-दन्येनारम्भकद्रव्येणारब्धे द्रव्ये समवाय इति ? एतदपि सर्वसाधारण्येनाविशेष एवेत्यर्थः ।

टीयाम् ॥ तदिति । अग्रं कर्तृ ॥

उने ॥ परावृत्त्याभिमुख्येति । परावृत्तेराभिमुख्यसंबन्धस्य दृश्यानां च मुखादीनाम् ।

वाके ॥ यथोदकादर्शादयश्चाक्षुषः प्रतिनिवृत्तिद्वारेण प्रतिबिम्बोपलम्भक्षमास्तथा स्फटिकादय एव व्यतिभिद्यन्ते न कुड्यादय इति । कुत एतदित्यत्र **भाष्येणैव वार्त्तिककृदु**त्तरमाह— **दृष्टानुमितानामिति ।**

न चाञ्जनशलाकादीति । न रश्मिनाञ्जनशलाकादि संबद्धं यतः कृष्ण-साराच्चक्षुर्निर्गत्य बहिरेव याति न तु पृथुत्वं प्रथममेव भवतीति भावः ।

॥ इतीन्द्रियभौतिकत्वपरीक्षाप्रकरणं संपूर्णम् ॥

॥ इन्द्रियनानात्वपरीक्षाप्रकरणम् ॥

[३.१.५२-६१]

उने ॥ अस्येति । प्रकरणस्य ।

अत इति । यत इन्द्रियनानात्वपरीक्षाप्रकरणमारभ्यमतः ।

तत्रेति । **सूत्र**स्य यथाश्रुत्यसंबद्धत्वे सति ।

व्याख्यातमिति । बहूनि चेत्यादिना व्याख्यातं **सूत्रम् ।**

न विभावितमिति । भाष्यकारेण ।

टीयाम् ॥ एकत्वस्य तु बीजं नानास्थानत्वमिति । उक्तमित्यनुषज्यते ।

नानास्थानत्वमवयविनो बीजमुक्तं न त्वेकत्वस्यात आह—**अवयवीत्वेकत्वमिति ।** एतदुक्तं भवति स्थानान्यत्वं नानात्वसंबन्धि दर्शितम् । नानास्थानत्वं चैकत्वस्य संबन्धि, न त्वनयोरेकमपि उभयसाधारणं दर्शितमिति ।

नन्वनयोर्भेदो नास्त्येव, अतश्चावयवद्वयेन **सूत्रकृतो** नानास्थानत्वस्यैवैकानेकत्वसाधारण्यं दर्शितम्, अत आह—**स्थानान्यत्वं चेति ।**

मा भूत् प्रत्येकं संशयकारणत्वं मिलितयोस्तु भविष्यति, अत आह—**न चेति ।**

एकानेकत्वसाधारण्यं वाच्यमिति । न च तदुक्तमिति शेषः ।

तत्रेति । एवं सतीत्यर्थः ।

नन्वेकस्यापि स्थानिनोऽवयविनः स्थाननानात्वं दृष्टमतोऽनुपपन्नमेकत्वे स्थाननानात्वस्यादर्शनादत आह—**सूत्रालोचनेनेति ।**

तदुक्तमिति । तदिति स्थानान्यत्वम् ।

ननु नानास्थानमनेकमपि द्रव्यं दृष्टं घटपटादि, अतोऽयुक्तं नानास्थानमनेकं न दृष्टमिति अत आह--**सूत्रे** इति ।

यत्तु घटादीत्यादि **वार्त्तिकं** प्रमाणविरुद्धार्थ[756b]प्रतिपादकत्वात् साकाङ्क्षमित्यध्याहारेण पूरयति---**उक्तं सूत्रकृतेति ।**

उने ॥ एतस्येति । वार्त्तिककृतः ।

तदेवेति । नानास्थानत्वनिमित्त इन्द्रियेष्वेकत्वानेकत्वसंशय इत्येतदेव ।

[1]स्थानान्यत्वे इति **सौत्रं** पदं योजयतीति **सूत्रकारः** स्थानान्यत्वमपि विमर्शकारणं दर्शयति । **भाष्यकारस्तु** नानास्थानत्वमेवेत्यतो विरोधः, तत्परिहाराय ।

टीयाम् ॥ स्थानान्यत्व इत्यनेनेति । स्थानभेदेन स्वविशिष्टो नानास्थान एवोपलक्ष्यते इति भावः ।

उने ॥ उत्तरवार्त्तिकस्येति । इन्द्रियेषु त्वित्यादेरुत्तररूपस्य ।

वार्त्तिकस्यार्थमाह—**भाष्यं व्याकुर्वन्निति ।** किं त्विन्द्रियविषयो नानास्थानत्वादेव संशयो **भाष्यकारीयः** साधीयानित्येतद्धि बहूनि च द्रव्याणीत्यादि**भाष्य**व्याख्यारूपम् ।

यद्येवमिति । यदि नानास्थानत्वादेव संशयस्तदा ।

वार्त्तिकमिति । अन्यथा संशयप्रतिपादकमिति शेषः ।

उने ॥ नन्विन्द्रियाणामतीन्द्रियत्वात् भा भूत् लोकविरोधः, तदधिष्ठानानां त्वैन्द्रियकत्वादिन्द्रियैक्यं कथं लोकेन विरुध्यते? अत आह—**अधिष्ठानमात्रे चेति ।** इन्द्रियैक्येऽप्यधिष्ठाननानात्वं भविष्यतीति भावः ।

वाके ॥ त्वगिन्द्रियस्य विद्यमानत्वं कुत इत्यत आह—**स्पर्शोपलब्धिलिङ्गे** इति ।

न ह्यवयवाव्यतिरिक्ता इति । किं त्ववयविनस्त्वगिन्द्रियाद् व्यतिरिक्ता इत्यर्थः ।

उने ॥ न युगपदर्थेति । तदा न युगपदर्थानुपलब्धेः इत्येतत् **सूत्रं**[2] सूत्रेण चाभिसंबन्धः इत्येवं प्रकारेण **वार्त्तिककृत्** नावतारयेत् ।

---

1 III. i. 52 2 III. i. 54

उने ॥ तदेतदिति । न युगपदर्थानुपलब्धेरित्येतत **सूत्रम्** ।

प्रकृते इति । इन्द्रियैकत्वनिषेधे ।

वाके ॥ नासाधना क्रियेति । नानात्वसिद्धिरपि क्रियातो नासाधना ।

उने ॥ तदुत्तरपदं चेति । तस्मादनन्तरशब्दादुत्तरपदम् ।

नानात्वसिद्धाविति । तदपि नान्यवचनम् ।

समीपवचन इति । अनन्तरशब्दः ।

प्रकृतत्वेनेति । व्यतिरेकिणः ।

तस्य चेति । विरुद्धयोरेकतरनिषेधस्यैव यदन्यतरविधित्वं तस्य व्यतिरेकिण्यन्वयिनि च साधारणत्वात् ।

ननु दृष्टान्ते केवलव्यतिरेकिसाध्यस्यैकतरनिषेधस्यान्यतरविधित्वं दर्शयतः **टीकाकृतः** केवलव्यतिरेकिसाध्यस्यैवैकतरनिषेधस्थान्यतरविधित्वमभिप्रेतं ज्ञायते इत्याशङ्क्याह— **दृष्टान्तेति** । अन्यतरविधिरूपो द्वयोर्विरुद्धयोरेकतरनिषेधः क्वापि दृष्टान्ते दृष्टः साध्यः । स त्वत्र केवलव्यतिरेकिणा साध्यमानोऽस्तीत्यतो दृष्टान्तीभूतो निषेधोऽपि केवलव्यतिरेकिसाध्यो दर्शित इति भावः ।

परसाध्येति । परस्य पूर्वपक्षिणो यत् साध्यं तस्य निवृत्तिरेव न तु **दूषणम्** ।

तत एवेति । निवृत्तिसाधनादेव ।

एतद्भाष्यमिति । प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते इति ।

प्रयोगस्त्विति । व्यतिरेकिप्रयोगः ।

वाके ॥ असंबद्धमिति । व्यधिकरणमित्यर्थः ।

एवमेवेति । व्यधिकरणमेव ।

अथ ग्रहणानीति । यदि तु व्यधिकरणतानिरासार्थमिन्द्रियग्रहणानि पञ्चेति पक्षः क्रियते, तदा ग्रहणलक्षणप्रयोजनपञ्चत्वस्य पक्षे सत्त्वाद् व्यधि[757a]करणत्वं न स्यात् परं साध्याविशिष्टत्वाद्धेतुरेव न स्यादित्यर्थः ।

एतेन विषया व्याख्याता इति । इन्द्रियविषयाः पञ्चेति पक्षीकरणे यदीन्द्रियप्रयोजनपञ्चत्वादिति हेतुः, तदा व्यधिकरणता । यदि त्विन्द्रियविषयपञ्चत्वादिति हेतुः, तदा साध्याविशिष्टतेति भावः ।

तदेवमिन्द्रियादौ धर्मिणि व्यधिकरणतादिदोषात् कर्तारमेव ज्ञातारं धर्मिणं कृत्वा नाना साधनक्रियत्वं साधनीयमित्याह—**इदं तु सूत्रमिति** ।

टीयाम् ॥ **अनया वचोभंग्येति** । इन्द्रियार्थपञ्चत्वरूपया ।

वाके ॥ यस्य कर्तुरनेको विषयः, तस्यान्यतमविषयावसाये इत्यत्र यस्य तस्येत्यनयोर्व्यत्ययेन योजना ।

वाके ॥ नन्विन्द्रियार्थपञ्चत्वमनितरेतरसाध्यप्रयोजनपञ्चत्वमुक्तम्, अतः कथं तदर्थबहुत्वादित्यस्योत्थानमत आह—**यथा श्रुत्युत्थानमिति** । अर्थपञ्चत्वश्रवणमात्रोत्थितमित्यर्थः ।

अस्य चेति । सूत्रस्य ।

वाके ॥ **नोक्तोत्तरत्वादिति** । अस्यार्थः । यदा हीन्द्रियार्थपञ्चत्वादिति [1]**सूत्र**मनितरेतरं साध्यप्रयोजनभेदपरं जातं तदा कथं विषयत्वाव्यतिरेकमात्रेण गन्धादीनामेकेन्द्रियग्राह्यत्वमापादयितुं शक्यते । न हि यथा वयं गन्धत्वावान्तरसामान्यस्वीकृतानां गन्धभेदानामेकेन्द्रियग्राह्यत्वात् न प्रतिगन्धभेदमिन्द्रियभेदकल्पना प्रसरतीति व्यवस्थापयितुं शक्नुमः, तथा भवद्भिः शक्यते । कुतो विषयत्वक्रोडीकृतानामेकेन्द्रियग्राह्यत्वस्य शक्रेणापि समर्थयितुमशक्यत्वात् ।

अस्य चार्थस्य ज्ञापनार्थमिति । अनेनेन्द्रियार्थपञ्चत्वात् इति **सूत्र**विवरणपरमेवेदम्, न. बुद्धिलक्षणेत्यादि [2]**सूत्र**मिति दर्शितम् ।

उने ॥ **घटेनैवेति** । अवयवरूपभिन्नाधिष्ठानेनाप्येकरूपेणावयविनेत्यर्थः ।

अनैकान्तिकमिति । भेदे साध्ये अधिष्ठानभेदमात्रम् ।

टीयाम् ॥ नियतत्वमेव स्फोरयति—**एतदुक्तं भवतीति** । न ह्यवयविनो नियतमधिष्ठानं सर्वावयवसाधारणत्वादिति भावः ।

---

1 III. i. 56 2 III. i. 60

वाके ॥ यथा घटादीति । घटपटादयो हि कपालतन्त्वादिनियताधिष्ठानाः सन्तोऽनेके ।

टीयाम् ॥ यस्य पुनः सिद्धान्तिन इति । यस्य पुनरित्यादि **वार्त्तिक**स्य व्याख्येयम् । **तस्येति** सिद्धान्तिनो मते ।

उने ॥ इत्येवमादिनेति । यस्य पुनः सिद्धान्तिन इत्यादिना ।

अनुग्राहकस्तर्क इति । भिन्नाधिष्ठानत्वादित्यस्य ।

भाष्ये ॥ घ्राणजिह्वाश्रोत्राणां लिङ्गानि समुच्चित्याह—**गन्धरसशब्देति ।**

टीयाम् ॥ ननु पुरुषार्था सर्वोत्पत्तिः न चोपेक्षणीयस्य तत्त्वादेव पुरुषापेता अत आह—**उपेक्षणीयस्यापीति ।**

तत्रेति । उपेक्षणीये ।

तदिति । दुःखम् ।

वाके ॥ अत एवेति । कर्णशष्कुल्युपकारभेदादेव ।

जातिरिति । योनिमिति, जायतेऽस्मादिति व्युत्पत्त्या ।

कथं पुनर्ज्ञायत इति । अस्य स्वयं तावदुत्तरमाह—**नोक्तोत्तरत्वादिति ।** रश्म्यर्थसन्निकर्षविशेषादित्यादिनाहङ्कारित्वनिषेधेन भौतिकत्वं साधितमेवेति कः प्रश्नस्यावकाशः ?

प्रकृतिविशेषनिरूपणं तु क्रियते इत्याह—**भूतगुणेति ।**

उने ॥ एतच्चेति । विवेचनीयमिति संबन्धः ।

यद्विशेषेति । यस्य विशेषगुणस्याभिव्यञ्जकतज्जातीयेति[757b]तद्विशेषगुणजातीयगुणवत् ।

तेज इति । प्रदीपप्रभादि ।

टीयाम् ॥ गन्धत्वादिव्यञ्जकत्वेनेति । गन्धत्वरसत्वादिसामान्यव्यञ्जकत्वेन ।

यच्छरीरसंयुक्तमित्यादि कुठारादिनिवृत्त्यर्थं प्रतीतिपदम् । साक्षादिति धूमादिनिवृत्त्यर्थम् । साक्षादिति साधनपदेनापि संबध्यते । तथा च सति न साधारणकारणै-र्व्यभिचारः । तथापीन्द्रियसंस्कारकैरौषधविशेषैर्दोषैश्च मिथ्यासाक्षात्कारकरणभूतैर्व्यभिचारः । अत **उक्तं-संस्कारकदोषव्यतिरिक्तमिति** । तथापीन्द्रियार्थसन्निकर्षेण प्रदीपेन च व्यभिचारः, तदर्थमाह—**यच्छरीरसंयुक्तमिति**[1] ।

यथा प्रदीपस्य संस्कारकत्वात् संस्कारकमित्यनेनैव व्युदासः ।

उने ।। ननु सात्त्विकाहङ्कारप्रकृतीन्द्रियमितीन्द्रियलक्षणं **सांख्या**नाम् । तत् किमिति न दूषितमत आह—**सात्त्विकेति** ।

।। इत्यौपोद्घातिकेन्द्रियनानात्वपरीक्षाप्रकरणं संपूर्णम् ।।

---

1 कुष्ठारादि...संयुक्तमिति defective in J ; quoted in margin in Ṭā. Ti. J.

॥ अर्थपरीक्षाप्रकरणम् ॥

[३.१.६२–७३]

उने ॥ अत्र चेति । गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः इत्यर्थलक्षणसूत्रे[1] उद्देशक्रमसारिता अर्था लक्ष्याः । तदर्था इति लक्षणम् । शेषश्च गन्धरसेत्यादिर्विभागः ।

स चेति । विभागः ।

परित इति । परितः समन्तात् स्वरूपतो लक्षणतोऽपि विभागस्येक्षणं परीक्षेति युक्त्या ।

तत्सूत्रमिति । गन्धरसेत्यादि [2]**सूत्रम्** ।

टीयाम् ॥ संमुग्धाभिधानसामान्यादिति । संमुग्धस्यापरीक्षितत्वेनानिश्चितस्य यदभिधानं तल्लक्षिते उद्दिष्टे च समानम् ।

उने ॥ वाक्ये चात्रेति । गन्धरसेत्यादिलक्षणसूत्ररूपे ।

तदर्थेति । नियोगाद्यर्थभावत्वम् ।

गुणाहि केचिदिति । संयोगादयः ।

केचिदिति । ज्ञानादयः ।

लक्षणादीति । आदिशब्देन **रसयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वादि**-त्यादिना भाष्येण यदुक्तं **पार्थिवो रसः षड्विधः, प्रत्यक्ष एकविध आप्य** इति तद् गृह्यते ।

तथा चेति । पृथिव्युदकयोश्चक्षुःस्पर्शनाग्राह्यत्वे स्पर्शवानेव रूपी चाक्षुष इति व्याप्तेः तेजसोऽपि स्पर्शाभावेन चक्षुःस्पर्शनाग्राह्यत्वे पृथिव्यादयो गुणाश्चेन्द्रियार्था अर्था इति लक्षणमसिद्धमापद्येत ।

---

1 I i. 14 2 I. i. 14

वाके ॥ विभक्तिपरिणाम इति **भाष्यं** व्याचष्टे ।

तेन किं कृतं भवतीति । यत् पूर्वं **सूत्रे** स्पर्शपर्यन्ता इति प्रथमाबहुवचनान्तमासीत् तत् संप्रति योग्यतया पूर्वं पूर्वमपोह्येत्यनेन संबध्यमानं निर्धारणषष्ठीबहुवचनान्तं संबध्यते षष्ठ्या च विपरिणामदर्शनमुपलक्षणार्थम् । पञ्चमीविपरीणामोऽपि द्रष्टव्यः । तेन स्पर्शपर्यन्तेभ्यो य उत्तरः शब्दः, स आकाशस्येत्युपपन्नं भवति ।

उने ॥ ए[कै]कशोऽपकर्ष इतीति । वार्त्तिकम् ।

द्रव्यविशेषणमिति । उत्तरेष्ववादिषु एकस्मिन्नेकस्मिन् गन्धादीनामपकर्ष इत्येवंगुणविशेषणमिति गन्धादीनामेकस्यैकस्य गुणस्यापकर्ष उत्तरेष्वित्येवम् ।

अपकृष्यन्ते इति गन्धादयः ।

भाष्ये ॥ अतन्त्रं विनियोगः सामर्थ्यादिति । अव्युत्पन्नोऽयमुत्तरशब्दः प्रयोगसामर्थ्यात् ।

तन्त्रे वेति । अस्तु वोत्तरशब्दो व्युत्पन्नः ।

वाके ॥ इह पुनरिति । बहुषु पुनरित्यर्थः ।

टीयाम् ॥ बह्वीषु **वार्त्तिक**प्रतिषु तन्त्रं चास्पर्शस्य विवक्षितत्वादिति पाठमपश्यन्नाह— **क्वचित् पाठ** इति ।

वाके ॥ भवतु [758a] वा तन्निर्देशः, तथापि न दोष इति शेषः । स्पर्शशब्दयोर्मध्ये स्पर्शादुत्तरः शब्द इति भावः ।

एकैकश्येनेति सौत्रादिनिर्देश इति । एतेन एकैकशो भाव एकैकश्यमिति प्रयोगोऽलौकिक इत्युक्तम् ।

भाष्ये ॥ संसर्गस्यानियमादिति । यथा पृथ्व्या अद्भिः संसर्ग एवमपां पृथ्व्यापि । एवं शेषेष्वपि संसर्गोऽनियतः ।

उने ॥ [त]द्विरुद्धत्वादिति नियोगविरुद्धत्वात् ।

तद्वाद्यपीति । समुच्चयवाद्यपि ।

टीयाम् ॥ एकानेकविधत्वेनेति । पार्थिवस्य रूपस्य रसस्य चानेकविधत्वेनाप्यस्य चैकविधत्वेन ।

भाष्ये ॥ न चैतत् संसर्गाद् भवितुमर्हतीति । यद्यप्संसर्गात् पृथ्व्यां रसस्तदासावेकविध एवास्यां स्यात्, न षड्विध इत्यर्थः ।

रूपयोर्वा पार्थिवेति । पार्थिवाप्ये हि रूपे तैजसरूपानुगृहीते एव प्रत्यक्षे तद्यदि पृथ्व्यामप्सु च तेजःसंसर्गादेव रूपं न स्वाभाविकं तदा तेजःसंसर्गजं व्यञ्जकमेव रूपमत्रास्ति न व्यङ्ग्यमित्यनयोरप्रत्यक्षत्वं प्रसज्येतेत्यर्थः ।

एकगुणानामिति । एक एव गुणो येषां पृथ्व्यादिनां ते तथा तेषाम् ।

उदाहरणमात्रं चैतदिति । पार्थिवाप्ययोः प्रत्यक्षत्वादिति **सूत्रकारेण** यदुक्तं तदुदाहरणमात्रम् ।

टीयाम् ॥ अस्यैवेति । सूत्रस्य ।

भाष्ये ॥ तत्कारणमिति । पार्थिवाप्यद्रव्ययोः कारणमपि परमाणुः ।

तथा गुणमिति । चतुर्गुणं त्रिगुणं चेत्यर्थः ।

उने ॥ भाविकीमिति । स्वाभाविकीम् ।

अत्रापीति । कारणस्य व्यवस्थितगुणत्वस्थापनावसरेऽपि ।

तस्येति । अत्रानीयमानस्यागामि**भाष्य**स्य । तस्य व्याख्यानम्——असंसर्गस्येति । यदि त्वागामि**भाष्य**स्यानयनं न स्यात् तदा विवेकस्य व्याख्यानमसंसर्गस्येति न स्यादित्यर्थः ।

अस्यैवेति । दृष्टश्च विवेक इत्यस्यैव ।

निरनुमानत्वादिति । निरनुमानं तु विष्टं ह्यपरं परेणेत्यादि **भाष्यम्** ।

सिद्धसाधनं चेति । आगमैकगम्यत्वेन निरनुमानत्वस्याभ्युपगतत्वात् ।

टीयाम् ।। **नियोगस्त्विति** । एतेनात्र विष्टं ह्यपरं परेणेत्यनेन विष्टत्वसाध्यो नियोगो **भाष्यकारेण** विवक्षित इत्युक्तम् ।

उने ।। **तथापीति** । भवतु नियोगो निरनुमानः । परं यदि विष्टत्वसाधक आगमोऽक्षतः, तदा तेनैव नियोगः सुसाध्य एवेति भावः ।

उभयत्रापीति । आगमेऽनुमानेऽपि ।

समानवचनेनेति । आगमानुमानयोः ।

टीयाम् ।। **तस्मादत्यन्तसंयोगो हेतु**रन्यगुणानामन्यत्रोपलम्भे इति शेषः ।

उने ।। **समुच्चयपक्षोऽपि निरस्त** इति । सर्वे सर्वेषां गुणा इति समुच्चयपक्षे हि वह्निसंयोगं विनापि अयोगोलके शुक्लभास्वरत्वौष्ण्यादयस्तेजोगुणा उपलभ्येरन् । वह्नौ चायोगोलकगुणा उपलभ्येरन्, न चोपलभ्यन्ते । तस्मात् नायमपि पक्षः साधुरित्यर्थः ।

उने ।। **स्वस्वविषयग्राहकत्वमिति** । एतच्च सर्वेषामिन्द्रियाणामसाधारणम् ।

अव्यापकमिति । स्पर्शनश्रोत्रयोरेकगुणत्वेन मिथो गुणाधिक्यरूपप्राधान्याभावात् ।

अगन्धवत्त्वनिषेधपरं प्राधान्याभिधानमित्यस्य तात्पर्यार्थमाह—**अनद्गुणमिति** ।

न पुनर्गन्धग्रहणे गन्धवत्त्वं प्रयोजकम् इत्यस्य तात्पर्यार्थमाह—**न तु तद्गुणकमिति** ।

आगामिग्रन्थविरुद्धं चेति । सगुणानामिन्द्रियभावात् स्वान् गन्धादीन् नोपलभन्ते घ्राणादीनीत्यादिनागामिना ग्रन्थेन विरुद्धं च ।

टीयाम् ।। सामर्थ्यपदार्थं व्याचष्टे—**अदृष्टवशादिति** ।

पार्थिवद्रव्यान्तरेति । कुक्कुटोच्चारादि ।

चाके ।। **सहकारी** [758b] **च [गन्धः] स्याद् ग्राह्यश्चेति** । ततः को दोषः स्यादिति शेषः ।

टीयाम् ॥ **तदेतद्ग्रहणकवाक्यमिति** । **सूत्र**रूपम् ।

ननु यदीन्द्रियं स्वगन्धं गृह्णाति तदासाविन्द्रियगन्ध इन्द्रियग्राह्य एव भवति, अतः कथं **वार्त्तिककृद्** विपरीतमाह—यदि चेन्द्रियं स्वगन्धं गृह्णीयात्, ते नासाविन्द्रियगन्धः नेन्द्रियग्राह्यः स्यात् इत्याशङ्क्य च्छित्वा(?)ध्याहारेण व्याचष्टे—**यदीन्द्रियं स्वगन्धमिति** ।

नन्वस्त्येव मनोऽत आह—**मनस्त्विति** ।

लिङ्गवदिति । युगपज्ज्ञानानुत्पत्तिसहितम् ।

भाष्ये ॥ **तादृगिदमिति** । स्वगुणग्रहणप्रसञ्जनम् ।

कुत इत्याह—**तुल्यो हीति** ।

न शब्दगुणोपलब्धेरिति पूर्वपक्षसू**त्रम्**[1] ।

वार्त्तिके ॥ **नाकाशं सगुणमिन्द्रियमिति** । आकाशं श्रोत्रं तच्च निरवयवत्वात् न केनचित् कारणद्रव्येणारब्धम् । अतो न कारणगुणपूर्वको ग्राह्यशब्दातिरिक्तः श्रोत्रस्य सहकारितां प्रतिपद्यमान इन्द्रियभूतो घ्राणादीनां गन्धादिवदित्यर्थः ।

बधिराभाव इति । सर्वस्यापि त्वग्विरहाभावात् न कोऽपि बधिरः स्यादित्यर्थः ।

ननु त्वच उपघाते बधिरः संभवी, तत् कथं बधिराभाव इत्यत आह—**सर्वोपघाते** इति । यावत् स्तोकाया अपि त्वचोपघातस्तावद् बाधिर्याभाव एव । सर्वथोपघाते तु देहान्तरसंक्रमणमित्यर्थः ।

उने ॥ **तत्र तत्रेति** । असमवायिकारणत्वादिना पटादौ । अत्यन्तं तु संयोगादिना हि पटादिकार्यमुत्पद्यते ।

॥ अर्थपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 III. i. 7

श्रीलक्ष्मीतिलकाभिषेकनृपतेः प्रज्ञाप्रकर्षोऽधुना
सम्राट् केन न मन्यते त्रिभुवने यस्याविरासन् स्वयम् ।
गूढार्थानि सुदुर्लभान्यसुकृतैन्यायद्वितीयाग्रगा-
ध्यायाद्याह्निकभूनवनकरणश्रीमन्निधानान्यहो ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्च-प्रस्थानन्यायमहातर्कविषमपदव्याख्यायां तृतीयाध्यायस्याद्यमाह्निकं समर्थितमिति ॥

॥ तृतीयाध्याये द्वितीयाह्निकम् ॥

॥ बुद्ध्यनित्यत्वपरीक्षाप्रकरणम् ॥

[३.२.१-९]

उने ॥ तदर्थानभिधानादिति । आह्निकार्थानभिधानात् ।

नापि प्रकरणयोरिति । संगतिरुच्यते इति संबन्धः ।

तत्रेति । प्रकरणसंगतौ कर्तव्यायामिन्द्रियपरीक्षोत्कीर्तनस्यायोगादयुक्तत्वात् पूर्वप्रकरणे ह्यर्थ एव परीक्षितः ।

इन्द्रियार्थग्रहणमिति । परीक्षितानीन्द्रियाणि अर्थाश्चेत्येवम् ।

तेनेति । साक्षादिन्द्रियार्थपरीक्षयोरुपलक्षणेनात्मशरीरपरीक्षयोश्च वृत्तत्वो कीर्तनेन ।

आह्निकोपाधिरिति । प्रथमाह्निकोपाधिः ।

एतदुपाधीति । बुद्धिहेतुत्वोपाधिः ।

तदुत्तरपरीक्षाया इति । बुद्धिपरीक्षायाः ।

पूर्वाह्निकार्थस्येति । बुद्धिहेतुपरीक्षालक्षणस्य ।

न हि सांख्यस्येति । **सांख्या**भिमतस्य हि बुद्धितत्त्वस्य न नित्यत्वं सिद्धम्, नाप्यनित्यत्वमिति तदाश्रित्य संशय उपपत्स्यते इत्यर्थः ।

तथाप्याश्रयेति । भवतु **सांख्य**भिमतबुद्धितत्त्वस्य दूषणार्थमिदं प्रकरणम् । तथाप्याश्रयासिद्धेरेव या संशयानुपपत्तिः, सा तदवस्थैवेत्यर्थः ।

टीयाम् ॥ अनया द्वारेति । नित्यानित्यविचारद्वारेण ।

उने ॥ एतदपीति । वृत्त्यतिरिक्त**सांख्या**भिमतबुद्धिनिराकरणार्थमपि ।

निराकर्तुं शक्यते इति । प्रतीतत्वादेवाप्रतीतत्वादेव वा ।

अनात्मभूत इति । आत्मनोऽतिरिक्तः ।

तत्पदवैयधिकरण्यादिति । आत्मवाचकपदेन वैयधिकरण्यात् । न हि कदाचिदात्मशब्देन [759a] बुद्धिरभिधीयते ।

स किं नित्योऽनित्यो वेतीति । बुद्धिशब्दप्रयोगान्यथानुपपत्त्या सामान्यतो बुद्धिशब्दस्यार्थे धर्मिणि सिद्धे अस्पर्शत्वलक्षणानित्यानित्यकर्माकाशसाधर्म्यात् विशेषस्योपजनापायधर्मकत्वस्य विपर्ययस्य चादर्शनाच्च नित्योऽनित्यो वेति संशय उपपन्न इति भावः ।

एवमपीति । भवतु वृत्त्यतिरिक्तायाः **सांख्या**भिमतायाः बुद्धेर्निराकरणमत्र प्रकरणे, परं प्रकृतस्य बुद्धिलक्षणस्य परीक्षणमिदं कथं स्यादिति भावः ।

टीयाम् ॥ अथ त्विति । किं त्वर्थे । न बुद्धिनित्यत्वस्येशते, अपि तु आत्मनित्यत्वस्य ।

तत इति । नित्यत्वाभावात् ।

तदतिरिक्तमिति । वृत्त्यतिरिक्तम् ।

इति सिध्यति बुद्धिरिति । यदा हि नित्यत्वविचारेण **सांख्या**भिमताया बुद्धेर्नित्यत्वनिरासादुदयव्ययवतीभ्योरभेदः साध्यते, तदा बुद्धेर्ज्ञानं वृत्तिरात्मन उपलब्धिरिति **सांख्य**मतनिरासार्थं पर्यायशब्दाभिधानरूपं बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति यद् बुद्धेर्लक्षणं तदेव व्यवस्थापितं स्यात् । ततश्चास्य नित्यानित्यत्वविचारस्य बुद्धिलक्षणेन संगतिरित्यर्थः ।

इतरथा त्विति । यदि तु वृत्तेरतिरिक्ता **सांख्या**भिमता बुद्धिर्न निराक्रियते तदा ।

उने ॥ नित्यत्वेऽनित्यत्वे वेति । नित्यत्वेऽनित्यत्वे वा बुद्धेर्बुध्यादिशब्दैर्यदभिधीयते सा बुद्धिरिति हि लक्षणं नाबुद्धावपि याति, नापि बुद्धावपि न याति, नापि न संभवत्यतः प्राधान्येन नित्यानित्यत्वविचारो न लक्षणेन संगच्छेतेति भावार्थः ।

उने ॥ अत इति आत्मप्रत्यभिज्ञानाविनाभूतविषयप्रत्यभिज्ञानात् ।

टीयाम् ॥ ननूक्तं चेतनस्य वृत्तिमत्त्वे चेतनस्य कूटस्थनित्यता न स्यादत आह— **वृत्तयो हीति ।**

उने ॥ तेनेति । प्रत्यभिज्ञाने बुद्धिसंज्ञकस्यान्तःकरणस्याप्रकाशनेन ।

तच्चेति । असिद्धत्वम् ।

व्यधिकरणतयेति । आत्मनः प्रत्यभिज्ञानात् ।

विरोधोद्भावनपरमिति । क्रियाधारत्वकरणत्वयोः ।

प्रधानक्रियेति । विक्लित्यादिका ।

तत्प्रतिषेधादिति । कर्माधारत्वप्रतिषेधात् ।

टीयाम् ॥ **क्रियामात्राभिमानेनेति** । सर्वस्या क्रियाया अनाधारः करणमित्या-**चार्येणो**क्तमित्यभिमानेन ।

तद्भेदाभिधानादिति । सामान्ययुक्तविशेषाभिधानात् ।

कारकाणामुपादानेनेति । कारकाण्यहमुपादास्ये इत्येवम् ।

कर्त्रेति । आत्मा ।

अप्रयोज्यमात्रमिति । केनाप्यप्रयोज्यम् ।

प्रत्यक्षे चेदिति । यद्येकत्वे प्रत्यभिज्ञानं प्रत्यक्षं सत् प्रमाणं नाभ्युपगच्छति परः, किं त्वनुमानं सत् तदेदं दूषणमुक्तमित्यर्थः ।

ननु यत् प्रत्यभिज्ञायते तदेकं यथा घटादीत्यस्त्येव निदर्शनमत आह—**न हीति**। दृष्टान्तधर्मिणि साध्यं प्रमाणान्तरसिद्धं वक्तव्यम । अन्यथा व्याप्त्यवधारणं हेतोः क्वचिदपि न स्यात् । न च घटादौ प्रत्यभिज्ञानं हेतुत्वेन संमतं विहायान्यदेकत्वे प्रमाणमस्ति । अथ तत्रैकत्वे प्रत्यक्षं प्रत्यभिज्ञानं प्रमाणमुपेयते, तर्हि **बुद्धये**कत्वेऽपि तथात्वाविशेषात् प्रत्यभिज्ञानस्य लिङ्गत्वानुपपत्तिरितिभावः ।

वाके ॥ **दर्शनदृष्टस्येति** । [759b] **दृष्टस्य** चक्षुषा स्पर्शनेन प्रत्यभिज्ञानात् नानात्वे करणानां प्रत्यभिज्ञानमिति विरुद्धोऽनैकान्तिको हेतुर्न करणैकत्वं निश्चेतुमलमित्यर्थः । अमुं चार्थमग्रे स्फुटीकरिष्यति—**दृष्टं हि करणभेदेऽपि प्रत्यभिज्ञानमित्यादिना** ।

ननु बुद्धेरध्यवसातृत्वं स्वभाव इत्युक्तमेवेत्याशङ्क्य दूषयति—**यदि बुद्धिरिति** ।

विरुद्धमेतदिति । बुद्धेरचेतनत्वात् चितिशक्तिप्रतिबिम्बोद्ग्राहित्वासंभवाचेति[1] भावः ।

---

1 J °संभावा°

बुद्धेर्ज्ञातृत्वं स्वभावं शङ्कते—**बुद्धिर्जानीते इति।**

पुरुषस्यायं स्वभावो न बुद्धेरित्याशयवान् दूषयति—**नेदमिति।**

अद्धेति। सत्यमेतत्।

भाष्ये॥ प्रतिपुरुषं चेत्यादि स्ववाक्यमेव व्याचष्टे—**यश्चेति।** यश्च कश्चित् प्रतिजानीते।

किं प्रतिजानीते इत्याह—**कश्चित् पुरुष** इत्यादि तत्र कः प्रतिषेधहेतुरित्यन्तम्।

अर्थस्याभेद इति चेदिति शङ्कां व्याचष्टे—**अभिन्नार्था** इति।

समानमिति समाधानं व्याचष्टे—**समानं भवतीति।**

तदेतद्**भाष्य**मध्यवसायचेतनयोश्चेत्यादिना पाठमारचय्य यद्यन्यश्चेतयितेत्यादिना व्याचष्टे **वार्त्तिककृत्।**

पर आह—**भवतेति।**

सिद्धान्त्याह—**देशकालेति।** न पुनर्यैव चेतना स एवाध्यवसाय इति वाचकभेदेन वाच्यभेदप्रतीतिरिति भावः।

तदेतदपि प्रसङ्गापादनेन दूषयति—**न प्रतीति।** यद्यन्यश्चेतयितान्यश्चाध्यवसाता भवति, तदान्यः कश्चित् प्रतिजानीते।

किं प्रतिजानीते इत्याह—**अन्यः पश्यतीति।**

तत्र साधनमिति। नित्यत्वविषयं साधनं प्रत्यभिज्ञानम्।

भाष्ये॥ यच्च मन्येतेति। यच्चान्यदुक्तं **कापिलैः** महाह्रदादिव बुद्धेर्नित्याया ज्ञानानि वृत्तिरूपाणि निश्चरन्ति वृत्तयश्च वृत्तिमत्या बुद्धेर्न भिन्नाः, तादात्म्यात्, तद्दूषयति सिद्धान्ती।

न युगपद्ग्रहणादिति **सूत्रम्**[1]। तादात्म्ये हि बुद्धिर्नित्या यावदस्ति तावत् तज्ज्ञानान्यपि स्युः। अतो युगपद् बहुज्ञानवेदनं स्यात्, न चास्ति। तस्मादयुक्तमित्यर्थः।

1 III. ii. 4

टीयम् ॥ वृत्त्यवस्थानमिति **वार्त्तिकं** व्याचष्टे—**वृत्त्यवस्थानप्रसङ्ग** इति ।

भाष्ये ॥ सन्त्येव सर्वाणि घटपटादिज्ञानानि किं तु न वेद्यन्ते तत्राह सिद्धान्ती ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्ग इति **सूत्रम्**[1] । यदि घटज्ञानं पटज्ञानकाले न प्रत्यभिज्ञायते, तदा तद्विनष्टम् । तथा च वृत्तिमती बुद्धिरपि विनष्टैव तादात्म्यात् । अतो बुद्धिरनित्यैव प्रसज्यते । अथ बुद्धिरनित्या नाभ्युपेयते तदा वृत्त्यात्मिकाया बुद्धेर्नानात्वं स्यादित्यर्थः ।

भाष्ये ॥ स्वमते प्राशस्त्यमाह—**अविभु चेति** ।

क्रमवृत्तित्वाद् युगपदग्रहणमिति **सूत्रम्**[2] । केषां युगपदग्रहणमिन्द्रियार्थानाम् । कुतो वृत्तिवृत्तिमतोर्नानात्वाद् भेदात् ।

ननु वृत्तिमति वृत्तीनां प्रादुर्भावस्तिरोभावश्चेष्यते, अतो युगपदग्रहणं भविष्यत्यत आह—**एकत्वे** इति । वृत्तिवृत्तिमतोरैक्ये ।

स्वमते **सूत्र**निरपेक्षं प्राशस्त्यान्तरमाह— **अप्रत्यभिज्ञानं चेति**[3] ।

एतदेव व्याचष्टे—**अनुपलब्धिश्चेति** ।

परपक्षे दोषमाह—**विभुत्वे चेति** ।

भाष्ये ॥ न गत्यभावादिति **सूत्रम्**[4] । विभु **सांख्य**स्यान्तःकरणं बुद्धिरूपं न **नैयायिक**स्येवाणु । ततो न क्रमेण गतिमदित्यर्थः ।

वार्त्ते ॥ [760a] **एतच्च वृत्तिवृत्तिमतोरेकत्वेऽनुपपन्नमिति** । एकमन्तःकरणमनेकं स्यात्, नाना वा वृत्तय एकत्वं प्रतिपद्येरन् । अन्यथा तादात्म्यानुपपत्तेरिति भावः ।

उने ॥ **असौ धर्म** इति ज्ञानलक्षणः ।

तस्येति । अन्तःकरणस्य ।

तदिति । **सांख्य**मतम् ।

1 III. ii. 5 2 III. ii. 6 3 III. ii. 7 4 III. ii. 8

वाके ॥ सोऽभ्यनुज्ञायते इति । न चेदृशेन व्यासङ्गेनान्तःकरणस्य वृत्तिमत्ता सिध्यति ।

टीयाम् ॥ ईदृशो व्यासङ्ग इति । **वार्त्तिक**निर्दिष्टः ।

वाके ॥ सांख्यः समाधत्ते—**यथैवान्तःकरणमेकं तथैवैका वृत्तिरिति** । एतेन सत्यभेदे वृत्तेः सकाशादिति **भाष्यं** व्याख्यातम् ।

टीयाम् ॥ ननु न स्फटिकवदेकत्वे वृत्तीनां प्रमाणमस्ति येन नानाप्रतिभानस्यौपाधिकत्वं कल्प्येतेत्यत आह—**एतदुक्तं भवतीति ।**

उने ॥ अनेनेति । सांख्येन ।

अत आह—**योऽपीतीति ।** योऽपीत्यादि वदता हि **टीकाकृता वार्त्तिके** दृष्टान्तस्यानैकान्तिकत्वमुद्भावितम्, न हेतोरित्युक्तम् । अतो हेत्वभावादनैकान्तिकत्वोद्भावनं नोचितमिति न वाच्यमित्यर्थः ।

टीयाम् ॥ भिन्ना वक्तव्या इति । यदि च प्राधानिकत्वेन तत्तादात्म्याद् गन्धादीनामप्येकत्वं ब्रूयात्, ततो वृत्तीनामौपाधिकोऽपि भेदो न स्यादित्यर्थः ।

दृष्टान्तगतानैकान्तिकत्वस्य स्वरूपमाह—**नैकस्य साधक** इति ।

वाके ॥ अभिन्ना वृत्तिः प्रत्ययश्च भिन्न इति व्याहतमिति । वृत्तेरभेदेऽभ्युपगम्यमाने प्रत्ययभेदादिति व्याहतम् ।

उने ॥ अभिन्ना इत्यर्थ इति प्रतिज्ञायाः ।

वाके ॥ एकानेकविषयाधिगतिः कथमिति । प्रत्ययनानात्वाभिमानान्न कथञ्चिदित्यर्थः ।

एकानेकविषयत्वाच्चेति यदुक्तं तद्विभजते—**एकस्मिंश्चेति ।**

एकानेकविषयाधिगतिः कथमित्येतद् विभजते—नानात्वाभिमानस्येत्यादिना न युक्तः प्रत्यय इत्यन्तेन ।

टीयाम् ॥ **एकस्मिन्नर्थे** इति । स्फटिकादौ ।

उपधानभेदाभावादिति । उपधानस्य स्फटिकादेरर्थस्यैकत्वेन भेदाभावात् ।

उने ॥ ननु स्फटिकद्रव्यस्य सान्तरालत्वात् तत्तिरोहितेनापि नीलीद्रव्येण चक्षुः सन्निकृष्यताम् । यदा तु नीलीद्रव्यलेपेन व्यवहितः स्फटिकस्तदा कथं चक्षुः सन्निकृष्यते इत्याह—**ननु नीलीद्रव्येति** ।

नीलीद्रव्यव्यवहितत्वात् । नीलीद्रव्यलेपव्यवहितत्वात् ।

टीयाम् ॥ **नीलीद्रव्यलेपस्यापीति** । न केवलं स्फटिकस्येत्यप्यर्थः ।

सान्तरत्वं सान्तरालत्वम् । एतेन स्फटिकव्यवहितेन नीलीद्रव्येण नीलीद्रव्यलेपव्यवहितेन स्फटिकेन च चक्षुःसन्निकर्षे स्फटिकनीलीद्रव्ययोः [1]सान्तरालत्वं हेतुः । **वार्त्तिको**क्तं तु नैरन्तर्यदर्शनं स्फटिकस्य नीलगुणाध्यारोपे हेतुरिति दर्शितम् ।

उने ॥ **ततोऽन्यस्येति** । प्रत्ययाद् भिन्नस्य ।

फलभेदेनेति । फलस्य प्रत्ययस्याभेदेन ।

स इति । प्रमाणभेदः ।

तैरिति । सांख्यैः ।

स चेति । विषयभेदश्च तथा प्रमाणभेदसमर्थकत्वेन निर्वहति विषयभेदानन्त्यात् प्रमाणानामपि भेदानन्त्यप्रसङ्गादित्यन्यदेतद्विषयभेदेन प्रमाणभेदसमर्थनं न किञ्चिदित्यर्थः ।

तथैवेति । त्रिधैव ।

तस्येति । प्रत्ययाभेदे साध्ये प्रत्ययभेदभणनस्य ।

तैरनभ्युपगमाच्चेति । विषयभेदेन [760b] प्रत्ययभेदस्य ।

टीयाम् ॥ **तदपीति** । अवान्तरसामान्यम् ।

एकस्मिन्नपीति । यथा शिंशपादौ शिंशपात्वाद्यवान्तरसामान्यं स्वरूपनिष्ठं तथा यदि विषयावान्तरसामान्यं विषयेषु स्वरूपनिष्ठं स्यात् तदा यतो विषयावान्तरसामान्याद् यः

---

1 = सच्छिद्रत्वम्

प्रत्यक्ष उच्यते स ततः प्रत्यक्ष एव स्यात् नानुमेयादिः । एवमनुमेयादिष्वपि ज्ञेयम् । यथा या शिंशपात्वात् शिंशपा सा शिंशपैव न धवादिः, तथा चैकस्मिन् विषये प्रमाणानां संप्लवो न स्यात् । अथ चास्ति, अतोऽनावान्तरं सामान्यं विषयाणां स्वरूपनिष्ठमित्यर्थः ।

प्रत्ययभेदेति । अनुपहितप्रतीतिग्राह्यत्वेन च व्यापकोपहितप्रतीतिग्राह्यत्वेन च संसर्गोपहितप्रतीतिग्राह्यत्वेन चावच्छेदेन त्रित्वेऽवतिष्ठमाना इत्यर्थः ।

ननु येनोपाधिना विषयास्त्रित्वे व्यवतिष्ठन्ते सत्प्रत्ययभेद एव कथमत आह—**सामग्रीत्रयेति** । तिस्रः सामग्र्यो विषयसहिताः चक्षुरादिलिङ्गादिशब्दादिकाः ।

उने ॥ स्वरसभङ्गेनेति । स्वभावभङ्गेन सरलमार्गभङ्गेनेत्यर्थः ।

ताभ्यामिति । लिङ्गशब्दाभ्यामतितरां भिद्यते इति ।

अतः **प्रमाणाभेद** इति **वार्त्तिकं** न संगच्छते इति शेषः ।

टीयाम् ॥ प्रमाणाभेद इति । अस्य व्याख्यानं सामग्रीत्रयाभेदे इति ।

उने ॥ नन्वेतदेव कुत इति । सामग्रीत्रयाभेदोऽसिद्ध इत्यर्थः ।

टीयाम् ॥ तस्मात् प्रत्ययेति । प्रत्ययानां सामग्र्याश्चाभेदेऽपि विषयभेदस्त्रित्वाधिगमोपाय इति न । कुतः, प्रत्ययभेदमन्तरेण विषयभेदानधिगतेरिति योजना ।

उने ॥ जात्येति । स्वरूपमात्रनिष्ठेन विषयावान्तरसामान्येन ।

अतीन्द्रिय इति । सामग्र्यन्तःपातिनां केषाञ्चिदिन्द्रियादीनामतीन्द्रियत्वात् ।

तदेकदेशेति । तस्याः सामग्र्या य एकदेशो विषयादिः, तद्भेदेन ।

अतिप्रसङ्ग इति । सामग्रीभेदानन्त्यात् प्रत्ययभेदानन्त्यप्रसङ्गः ।

फलत्रित्वमिति । प्रत्ययत्रित्वम् ।

इतरेतराश्रयचक्रकाभ्यामिति । प्रत्ययोपहिताद् विषयभेदात् प्रमाणभेदः । प्रमाणभेदाच्च प्रत्ययभेद इत्यन्योन्याश्रयः । नाप्रतीतो विषयभेदः प्रमाणभेदज्ञापक इति प्रत्ययभेदाद् विषयभेदो विषयभेदात् प्रमाणभेदः प्रमाणभेदाच्च प्रत्ययभेद इति चक्रकम् ।

॥ इति बुद्ध्यनित्यताप्रकरणं संपूर्णम् ॥

॥ क्षणभङ्गपरीक्षाप्रकरणम् ॥

[३.२.१०–१७]

उने ॥ एवमादयश्चेति । स्थैर्ये हि सति क्वचिदाश्रितत्वसाधकाः कार्यत्वादयश्च हेतवो निष्प्रत्यूहा भवन्तीति योगः ।

यथाभाष्यं न सांप्रतिका बौद्धाः प्राहुरिति । **भाष्ये** हि अपरापरोत्पत्तिः साध्या प्रतीयते । सांप्रतिक**बौद्धा**स्तु क्षणिकत्वमेव साधयन्ति इत्यत आह— **यत् सदिति** । यत् सदित्यादि वदता हि **टीकाकृता** या **भाष्ये** अपरापरोत्पत्तिः साध्या दृश्यते सा जरद्**बौद्धा**भिप्रायेणेत्युक्तम् । साधनं च सत्त्वमेव दर्शितमुपचयापचयप्रबन्धदर्शनं तु दृष्टान्तस्य शरीरस्य सिध्यर्थम् । तदाह स्वयमेव **शरीरस्य चेति** ।

टीयाम् ॥ क्षणिकमिति । प्रतिक्षणमपरापरमित्यर्थः ।

पूर्वं चेति । उपचयापचयादर्शनकालेऽपि ।

उने ॥ तस्येति । आहारस्य ।

अविशिष्ट इति । अभिन्नजातीय इति भावः ।

एवमन्नपानप्रचयोऽपीति । अन्नपानप्रचयोऽपि [761a] यदि प्रथमं शरीरोपचयं न कुर्यात् पश्चादपि न कुर्यात् । पश्चात् कुर्वन् प्रतिक्षणं करोत्येवेत्यर्थः ।

यथोक्तस्येति । यथाव्याख्यातस्य बाह्यप्रत्ययाभेदस्य ।

विपक्षादिति । प्रतिक्षणजायमानान्यान्यारुणिम्नः पटात् ।

वाके ॥ अपच्यमानभूमिपाकजवच्चेति । व्यतिरेकोदाहरणम् ।

उने ॥ तत्रापीति । येषूपचयापचयप्रबन्धदर्शनेन क्षणिकत्वं साध्यते तेषु शरीरादिष्वपि ।

अत एवेति । यत एव व्याप्तिपक्षधर्मतयोः सन्देहे साधनस्य साधनत्वं न स्यादत एव ।

टीयाम् ॥ **उत्पत्तिकारणोपलब्धेरित्यस्येति** । उत्पत्तिविनाशकारणोपलब्धेरिति **सूत्र**संबन्ध्येकखण्डस्य ।

ननु समवायिकारणमपि कारणत्वात् पूर्वकालभाव्येव कार्येणापेक्ष्यते कार्यसमानकालीनसत्त्वस्य सव्यशृङ्गोत्पत्तौ दक्षिणस्येव कार्योत्पत्तिं प्रत्यकिञ्चित्करत्वात् । अत आह— **कार्यात्पूर्वं चेत्यादि** । इतरकारणविलक्षणं समवायिकारणं प्रतीतिबलादुपेयते इत्यर्थः ।

आधाराधेयभावस्य प्रतीतिसिद्धत्वात् कथमसिद्धिराशङ्क्यते अत आह— **भिन्नलोकमर्याद** इति ।

सिद्धमित्यध्याहारेण **वार्त्तिकं** पठति—**सिद्धं भवतीति** ।

न सिध्यतीत्यग्रे इति मन्यसे **नैयायिक** इति शेषः ।

स त्विति । कार्यकारणभावः ।

उने ॥ **भिन्नकालतेति** । निराकार्या ।

टीयाम् ॥ **न चायमिति** । कार्यकारणभावः ।

पूर्वस्मिन् कल्पे इति । कारणाभावपक्षे ।

उने ॥ **ननूत्पद्यमानतेति** । यदैवोत्पत्तिकारणसान्निध्यम्, तदैव विनाशकारणसान्निध्यमपि । ततश्चानन्तरमुत्पादविनाशयोः सहभावात् नाधाराधेयभावक्षतिरित्यर्थः ।

ननु विरुद्धसामग्रीद्वयसन्निपातेऽप्युत्पत्तेरनन्तरं नाशो भविष्यत्यत आह— **विनाशकारणस्येति**। यदि हि विनाशकारणस्य न्यूनत्वं स्यात् तदोत्पत्तेरनन्तरं विनाशः स्यात् पूर्णता च भवद्भिर्विनाशकारणस्येष्यते । तस्माद् विरुद्धसामग्रीद्वयसन्निपाते कार्यं न स्यादेव युगपद्वा स्यादिति भावः ।

कार्योत्पादोऽपि किं कारणोत्पत्तिसमयेऽभ्युपगम्यते समवायान्तरे वा ? तत्र प्रथमे कार्यकारणत्वानुपपत्तेः, द्वितीये तु न तयोः सहभावः समर्थितो भवतीत्यभिप्रायवानाह— **अधिकमाहेति** ।

टीयाम् ॥ **अवयवकर्मणी** इति । अवयवयोस्तुल्यान्तयोः कर्मणी ।

अवयविकर्मेति । तुलायां कर्म ।

तुलाधारस्येति । सूत्रस्य ।

संयुक्तसंयोग इति । अङ्गुष्ठाङ्गुलीभ्यां संयुक्तस्य सूत्रस्य संयोगस्तुलावयवेन ।

तत्संयुक्तेति । सूत्रसंयुक्ततुलावयवविशेषवर्ति गुरुत्वम् , तदितरस्य तुलावयवस्योन्नतेः कारणमित्यर्थः ।

वाके ॥ कर्मार्थान्तरमिति । तुलाया व्यतिरिक्तं कर्म ।

न चानुपलभ्यमानं शक्यमभ्यनुज्ञातुमिति यदुक्तं तत् [1]**सूत्रे**णाक्षिपति—**क्षीरविनाशेति** । यथा क्षीरस्य विनाशकारणमनुपलभ्यमानमप्यभ्यनुज्ञायते दध्युत्पत्तिवच्च यथा च दध्नः उत्पत्तिकारणमनुपलभ्यमानमप्यभ्यनुज्ञायते तथा तदुत्पत्तिः स्फटिकेऽप्युत्पत्तिविनाशकारणे अनुपलभ्यमाने [761b] अप्यभ्यनुज्ञायते इत्यर्थः ।

परिहार**सूत्रम्**[2]—लिङ्गतो ग्रहणान्नानुपलब्धिरिति । नाशोत्पादौ हि दधिक्षीरयोः स्पष्टसिद्धौ अतस्ताभ्यां लिङ्गाभ्यां तत्र तत्कारणयोः पूर्वावयवसंयोगनाशापूर्वावयवसंयोगयोरनुमानं युक्तं, स्फटिकादौ तु स एवायमिति प्रत्यभिज्ञायमाने नाशोत्पादकथैव नास्ति । अतः किं लिङ्गं स्यादित्यर्थः ।

यद्यप्युत्पत्तिविनाशौ स्फटिकस्य न प्रत्यक्षगम्यौ तथापि लिङ्गगम्यौ भविष्यतः, ततश्चोत्पत्तिविनाशाभ्यां तत्कारणमनुमास्यामहे । अत आह—**न हि स्फटिकादीति** । इदं चाक्षेपमात्रं न परपक्षानुवादः, परेण निर्हेतुकविनाशाभ्युपगमात् ।

न युक्तं न हीति । यदा हि वह्निरेव केवलो धूमस्य कारणमभ्युपेयते नान्यत् किञ्चिदार्द्रेन्धनादि तदा अग्नौ सति धूमेनावश्यं भाव्यम्, अन्यस्यापेक्षणीयस्याभावात् । एवं यद्यन्यत्वमात्रमुत्तरोत्तरविशेषदर्शनस्य कारणं नान्यत् किञ्चित् , तदा एकस्मात् काष्ठक्षणाद् अपरः काष्ठक्षणोऽप्यन्य इति तत्रापि विशेषदर्शनं स्यात् तस्माद् भूतस्वभावविशेष एव साध्यते न पुनरन्योत्पादः । न च वाच्यमुत्तरोत्तरविशेषदर्शनसिद्धौ भूतस्वभावविशेष एवान्योत्पादसाधकः, तस्यान्योत्पादेऽसेजोऽवयवानुप्रवेशे च तुल्यत्वात् । न ह्यसेजोऽवयवानुप्रवेशे भूतस्वभावविशेषो निवारयितुं शक्यः । तस्मात् नोत्तरोत्तरविशेषदर्शनम् । नाप्येतत्साध्यो भूतस्वभावविशेषः क्षणिकत्वे साधनमित्यर्थः ।

---

1 III. ii. 13. 2 III. ii. 14.

अमुमेवार्थं **टीकाकृदाह--यदि प्रतिक्षणमिति ।**

तस्मादेव विशेषादिति । काष्ठत्वादेरेव विशेषात् ।

अयमिति । सन्निहितभूतस्वभावहेतुपरामर्शभ्रमो मा भूद् अत आह--**विरुद्धश्चायं हेतुरुत्तरोत्तरेति ।**

भूतलक्षणव्याघात इति । भूतलक्षणेन भूतलक्षणस्य वा व्याघातः ।

उने ॥ तथापीति । एकमेवैकदा काठिन्योष्णत्वाद्यनेकविशेषस्वभावमिति पराभ्युपगमेन हेतोर्दूषणोद्भावनेऽपि ।

अनैकान्तिकत्वमिति । उत्तरोत्तरविशेषदर्शनस्य नानात्वे इवैकत्वेऽपि गतत्वात् ।

टीयाम् ॥ येनैवेति । उत्तरोत्तरविशेषदर्शनेन तथोत्पादे ह्यभ्युपगम्यमाने यत् कठिनं तदेकस्मिन् काले उष्णमपि स्यात् । गच्छति च तदेकं वस्तु त्रिस्वभावकमुत्पन्नमित्यभ्युपेयम् । तथा च येनैव शीतोष्णादिभेदेन पूर्वं नानात्वमभ्युपेतम्, तेनैव तथोत्पादाभ्युपगमकाले एकत्वमिति भावः ।

उने ॥ सिद्धान्तमभ्युपेत्येतीति । वार्त्तिके सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति यद्विरुद्धलक्षणं[1] तत् कर्तृ ।

स चेति । विरोधः ।

टीयाम् ॥ पूर्वेण हेतुनेति । एतेन पूर्वमागमविरोधः संप्रति त्वभ्युपगमविरोध उत्तरोत्तर-विशेषदर्शनस्य हेतोरिति दर्शितम् ।

मा भूदिति । मा भूद् रूपस्यैकस्य नानात्वमिति संबन्धो यदि हि विशेषमात्रं नानात्वं प्रतिपादयतीत्यभ्युपेयेत, तदा सप्रतिघं सामग्र्यन्तःपातिरसादिसहितं सद्रूपं रूपस्योपादानकारणमिति [762a] [2]विशेषमात्रस्य विरोधित्वेनालिङ्गितकारणभेदलक्षणस्यात्रापि विद्यमानत्वाद् रूपस्य कार्यस्यैकस्य नानात्वं स्यादिति भावार्थः ।

---

1 I. i. 2 S विशेषधर्माणामिति शेषः

उने ॥ नानात्वमात्रमिति । न तु कार्यभेदकत्वम् ।

वाके ॥ किमित्यभिधीयते इति । किमभिधीयते इत्यर्थः ।

टीयाम् ॥ तद् दूषयतीति । तदेकदेशिमतम् ।

उने ॥ पूर्वस्फटिकादिनेति । वार्त्तिकेन ।

तत् कथमाहेति । वार्त्तिककारः ।

प्रत्येकमभिसंबध्यते इति । विरोधिना, आश्रयेण च ।

न हि सर्वमाश्रयविनाशाद् विनश्यतीति । केवलाद् विरोधिनोऽपि सकाशाद् विनाशस्य भावात् ।

कर्मधारय इति । विरोधी चासावाश्रयविनाशश्चेत्येवम् ।

द्वित्वेति । द्वित्वं ह्यपेक्षाबुद्धेर्निमित्तकारणस्य विनाशाद् विनश्यति । द्व्यणुकं च संयोगस्यासमवायिकारणस्य विनाशात् ।

टीयाम् ॥ न च कारणोत्पादसमये कार्योत्पाद इति । द्रव्यविनाशः कारणम्, कर्मविनाशः कार्यम् ।

तस्यैवेति । नीलस्यैव नीलस्वभावत्वात् ।

भावाभावयोरभेदमङ्गीकृत्येदमुक्तम् । वस्तुतस्तु नानयोरभेदः संभवतीत्याह—**न चेति ।**

कारणभेदमाह —**तन्त्विवति ।**

पीलव इति । हस्तिनः ।

एवं तावद् भिन्नाभिन्नविकल्पासहत्वात् न सहेतुकोऽभावः शक्यो भवद्भिर्व्यवस्थापयितुमित्युक्तमिदानीं विरुद्धव्याप्तोपलब्धिबाधितमभावस्य हेत्वन्तरापेक्षित्वमित्याह—**अपि चेति ।**

ननु यद्यभावो न क्रियते कथं तर्हि लौकिको व्यवहारोऽभावं करोतीत्यत आह—**करोतीति ।**

उने ॥ तत्र कोऽयं विकल्प इति **वार्त्तिके** उपन्यस्तः । किमकारणत्वाद्विनाशो उताकारणत्वान्नित्य इति विकल्पः तत्र दर्शने दूषयितुमुपक्रान्ते न लगतीत्यर्थः ।

टीयाम् ॥ **नित्यत्वमुपपादयतेति** । प्रध्वंसो ह्यविनाशी तदभिन्नो भावोऽपि तथा स्यादित्यर्थः ।

तत्त्वमिति । भावत्वम् ।

उने ॥ नाशानुवृत्तौ भावानुवृत्तिरित्येतद्भावकाले विनाश इत्येतच्च ।

प्रागेव निरस्त इति । न तावत् पूर्वः कल्प इत्यादि**टीकया** ।

द्वितीये त्विति । यद्यविरुद्धेनापि क्षणान्तरेणावच्छिन्नो भावो विनाशात्मा स्यात्, तदा भावस्य यः स्वसत्ताक्षणः, तत्रापि तथाविधैरविरुद्धैरनेकोपाधिभिः सत्त्वप्रमेयत्वादिभिरवच्छिन्नत्वाद् विनाशाविनाशव्यवहारः प्रसजेदित्यर्थः ।

इदमुत्तरमिति । प्रथमद्वितीयेत्यादि **टीको**क्तम् ।

तत्रापीति । टीकोक्तोत्तरेऽपि ।

तस्यैवेति । तदा द्वितीयक्षणस्यैवायं भावो विनाश इति स्यात् ।

एतस्येति । भावस्य ।

एतदपेक्षयेति । भावापेक्षया ।

अनयोरिति । भावनाशयोः ।

टीयाम् ॥ **बौद्धः** शङ्कते—**नन्वेवमिति** ।

नैयायिकः समाधत्ते—**नापवृज्यन्ते** इति ।

विनश्वराणामिति । उत्पत्तेर्यत् स्वकारणं तस्माद् विनश्वराणाम् ।

अत्यन्ततुच्छस्याभावस्यानभ्युपगमादकारणमसदिति पक्षो मा भूत्, तथाप्यस्माकमकारणं नित्यमेवेति नोपपद्यते, अकारणस्य प्रागभावस्य नित्यत्वानभ्युपगमात् । अत आह—**अस्मदभिमतस्येति** ।

नास्तीत्यारोप्येति । **बौद्धा**भिमतः स्वाभिमतश्चाभावो नास्ति किलेत्यङ्गीकृत्येत्यर्थः ।

नन्वकारणस्य विनाशस्योक्तदोषपराहतत्वात् तमपहृत्याकारणत्वा[762b]शङ्का तुच्छैवेत्यत आह—**प्रयोजनेति । अकारणत्वे विनाशस्यैष दोषः ।** अनन्तर-मुक्तो दोषः कार्यानुत्पादादिरियं प्रयोजनक्षतिः । इदमुक्तं स्यात्, विनाशस्याकारणत्वे कार्यानुत्पादादिप्रसङ्गेन यद्यपि सर्वस्यापि प्रवर्तकत्वं न स्यात् तथाप्येतद्दोषभयेन विनाशस्या-विनाशित्वलक्षणं यत् स्फुटतरं प्रमाणं तेन बाधितं कारणवत्त्वं न शक्यमङ्गीकर्तुमिति भावार्थः ।

उने ॥ प्रयोजनं चाप्रामाणिकमपीति । रजतत्वेन गृह्यमाणायां हि शुक्तौ रजतत्वस्याप्रामाणिकस्यापि प्रवर्तकत्वमुपलभ्यत एव ।

टीयाम् ॥ ननु विनाशाभावो भाव एव भावाभावयोः परस्पराभावात्मकत्वादतोऽयुक्तं न हि विनाशाभावो भाव इति । अत आह—**बौद्धमतमिति ।**

तस्येति । **बौद्धस्य** मते ।

तस्येति । पटाभावाभावस्य ।

वाके ॥ तत्समकालं रूपादीनारभते इति । संयोगा[न]न्तरम् ।

टीयाम् ॥ ये इति । स्वभावभेदाः ।

उने ॥ यदि त्विति । यदि तु **बौद्धो** ब्रूयाद् अङ्कुरप्रागभावोऽङ्कुरस्योपादानकारण-मेवातो नास्य बीजादिभिरप्रकारसंभवः, तथापि प्रागभावसहकारिभिर्बीजादिभिरत्र तुच्छस्वभावे किं क्रियते ?

तस्यैवेति । अङ्कुरस्यैव ।

तत्कालवत् । अङ्कुरकाले इव ।

टीयाम् ॥ नैयायिकः पृच्छति—**अथोत्पादादिति ।**

उने ॥ जल्पकथामिति । यस्यां वाग्दोषा अप्युद्भाव्यन्ते ताम् ।

टीयाम् ॥ समागात् सदृशात् ।

नन्वु यदि कपालसन्ततिरध्रुवभाविनी तदा तयोरन्यस्याभावस्य किमायातं येनाभावोऽ-

ध्रुवभावी स्यात्, अत आह—**न खल्विति** । भिन्नोऽप्यभावो नासदृशक्षणोत्पादमन्तरेण ज्ञायते । न चाज्ञातोऽस्तीति शक्यमभ्युपगन्तुमित्यर्थः ।

विसभागेति । विसदृशः ।

वाके ॥ **स चापरिहार्य** इति । स एवापरिहार्यो यस्तु सकारणविनाशे दोषः, स सपरिहार इत्यर्थः ।

ये त्विति । सांप्रतिक**बौद्धाः** ।

उने ॥ **वार्त्तिककारीयेति** । **वार्त्तिककारीयं** यत्प्रतिज्ञाया दूषणप्रकरणं तस्य भेदः ।

टीयाम् ॥ यदा आशुतरविनाशित्वमेव क्षणिकत्वं परः सिद्धान्तयति । तदा कथमाशुतरेति विशेषणं सिद्धान्तं व्याहन्ति ? अत आह—**यद्यनादिविति** । तथा चानाशुतरविनाशिभावाभ्युपगम इत्यर्थः ।

वाके ॥ सिद्धान्त्याह—**तेन यथानुत्पन्नस्येति** ।

शङ्कते—**अथोत्पन्नमिति** ।

निराचष्टे—**एतस्मिन्नपीति** ।

टीयाम् ॥ कथं भिन्नकालेनाभावेन भावो विशिष्यते अत आह—**उपलक्ष्यमाण** इति ।

वाके ॥ **तदापि तेनैवेति** । भाव एवानन्तरविनाशेन विशिष्यमाणः क्षण इत्युच्यमाने हि क्षणोऽनन्तरविनाशेन विशिष्यमाणो भावो विद्यते यस्यानन्तरविनाशविशिष्यमाणभावस्येति स्यात् । न चेदं संभवतीत्यर्थः ।

पञ्चेति । कालाकाशादयः ।

भिक्षव इति । संबोधने ।

उने ॥ **तस्येति** । सत्त्वस्य ।

तदिति। अर्थक्रियाकारित्वं लक्षणम्।

अव्याप्तीति। सत्त्वलक्ष्यं प्रत्यव्याप्तिलक्षणदोषपरिहारेण।

असिद्धमव्यापकमिति। सत्तासामान्यं सत्तासमवायो वेत्येतत्सत्त्वलक्षणम्।

अर्थक्रिया[763a]**कारित्वानतिरिक्तं चेति।** प्रमाणग्राह्यतेति तत्सत्त्वलक्षणम्।

अत इति। यतः परेषां लक्षणं दुष्टमतोऽर्थक्रियाकारित्वं लक्षणमाहेति संबन्धः।

तथा चेति। लक्ष्यलक्षणयोरभेदव्यवहारे च।

अनवस्थेति। अर्थक्रियाया अपि अर्थक्रियान्तरेण सत्त्वं तस्याप्यर्थक्रियान्तरेणेत्यनवस्था। सत्यर्थक्रिया, अर्थक्रियायां च सत्नित्यन्योन्याश्रयः। आदिपदादव्यापकत्वम्। अनवस्थाभयादर्थक्रियायामर्थक्रियान्तरं चेत् नेष्यते, तदा अव्यापकत्वम्।

टीयाम्॥ दृश्यमानस्तम्भेति। यथा स्तम्भः प्लवङ्गात्मा न भवति, एवं पिशाचात्मापि न भवतीत्येवमविशेषणानुपलब्ध्या प्रतिषेधात्।

अत्रार्थे **बौद्ध**संवादमाह--**यथाहेति।** तादात्म्ये निषेध्येऽनुपलब्धिर्दृश्यस्येत्यनेन विशेष्येत्यर्थः।

अनेवंभूतेति। अप्रसिद्धक्रमयौगपद्यव्यतिकरवति तु प्रकारान्तरे ये अप्रसिद्धे क्रमयौगपद्ये करम्बिते इष्येते, ते क्रमयौगपद्ये एव न भवतोऽप्रसिद्धत्वात्।

नन्वप्रसिद्धेऽपि क्रमयौगपद्ये प्रसिद्धक्रमयौगपद्यवाचकशब्दाभ्यामुच्यमाने स्तः, तत् कथं न ते क्रमयौगपद्ये? अत आह—**न हि शब्देति।**

उने॥ अनयोरेवेति। प्रसिद्धयोरेव।

मिश्रीभाव इति। मिश्रीभावलक्षणम्।

अनुभयात्मकमिति। क्रमाक्रमोभयाभावरूपम्।

परैरिति। बौद्धैः।

अस्मदभिहिते इति। **नैयायिका**भिहिते।

स्वाभाविके प्रतिबन्धे इति। धूमधूमध्वजादीनाम्।

दूषयतीति । **बौद्धः** ।

तदिति । प्रकारान्तरम् ।

तत्संभावनायामिति । प्रकारान्तरसंभावनायाम् ।

तेनापीति । प्रकारान्तरेणापि ।

तन्निर्वाहादिति । अर्थक्रियानिर्वाहात् ।

टीयाम् ॥ निषिद्धमानप्रकारेति । निषिध्यमानप्रकारोऽक्रमयौगपद्यलक्षणः । तेना- विषयीकृते ।

कार्यकारणे इति । कार्यस्य कारणे मृत्पिण्डादौ ।

उने ॥ दृष्टान्त इति । यथा नीलप्रकारनिषेधेनानीलप्रकारव्यवस्थायां पीते इत्ययम् ।

नीलानीलयोरिति । नीलानीलयोरपि विषये प्रकारान्तरस्य निषेधासंभवात् ।

ननु यथा नीलानीलावन्योन्यात्मकौ न भवतस्तथा क्रमाक्रमावपीति तादात्म्यमात्र-निषेधे साध्ये साध्यविकलता दृष्टान्तस्य न भविष्यत्यत आह—**तादात्म्यमात्रेति** ।

मिथो विधीति । मिथो विधिरूपस्य नीलानीलात्मकस्य मिथो निषेधरूपस्य नीलानीलाभावात्मकस्य च प्रकारान्तरयोर्मध्ये नीलरूपानीलरूपप्रकारद्वयापेक्षया यदा तृतीयः प्रकारो नीलानीलोभयरूपो नीलानीलानुभयरूपो वा शङ्क्यते, तदा स्ववचनविरोधः स्यात् इत्येवं तर्कसामर्थ्याद् एकत्र नीलानीलयोः सुदृढं प्रत्यक्षं प्रकारान्तरनिषेधग्राहकम् , अन्यत्र च क्रमाक्रमयोस्तदेव प्रकारान्तरनिषेधसाधकानुमानतयोच्यते तर्कदृढप्रत्यक्षनिश्चितस्य नीलप्रकार-निषेधेनानीलप्रकारव्यवस्थायां पीते प्रकारान्तराभावस्य दृष्टान्तस्य बलेन क्रमाक्रमयोः प्रकारान्तराभावः साध्यत इति भावः ।

टीयाम् । **यत्कार्येति** । यच्च तत्कार्यं [763b] च यत्कार्यम् , तस्य यावन्वयव्यतिरेकौ ताभ्यामनुविहितावनुकृतौ भावाभावौ यस्य तत् तथा ।

रूपं चेति । स्वरूपम् ।

क्रमवद्व्यापारतेति । क्रमवान् व्यापारो यस्य तद्भावः ।

एवमुपकारकत्वेन सहकारित्वं निरस्यानुपकारकत्वपक्षे दोषमाह—**अनुपकार-केति** । यद् यस्योपकरोति तेन तदपेक्षणीयम् । अन्यथा अतिप्रसङ्गः स्यादिति भावः ।

उने ॥ अविज्ञातवन्त इति। परे **बौद्धाः।**

कस्तत्र क्रमेति। नीलादिषु हि क्रमयौगपद्ययोरुपलम्भ एव। ततः कस्तत्र क्रमयौगपद्यानुपलम्भः ?

टीयाम् ॥ तादृशेति। तादृशं समारोपिताक्षणिकभावं यन्नीलस्वरूपं तदुपलम्भः।

बौद्धः समाधत्ते—**ननूत्पन्न** इति।

तर्हि तत्सन्तानेति। यदि पूर्वस्माद् बीजक्षणमात्रात् समर्थोत्पत्तिः, तदा क्षित्यादिसहकृतं यद् बीजमधुना अङ्कुरं जनयिष्यति तत्सन्तानवर्त्तिनां सर्वेषामपि प्राक्तनानां बीजत्वाविशेषात अङ्कुरजननसामर्थ्यमिति। तत्सन्ताने यदेव कुसुमानन्तरप्रथमबीजमुत्पन्नं तदेवाङ्कुरं जनयेत्।

अस्येति। अन्त्यक्षणस्य।

तदनपेक्षस्यापीति। क्षित्याद्यनपेक्षस्यापि।

तस्येति। कार्यस्य।

तदभावे इति। सामग्र्यभावे।

ननु निरपेक्षाणां जनकत्वे एकेनैवेतरनिरपेक्षेण कार्यं जनितमिति कृतस्य करणायोगादपरैः कार्यान्तरमेव जन्यम्, तथा च क्षित्यादिभिः सह बीजस्याङ्कुरजननात् सहकारिणस्ते इति न घटते। अत आह—**न च निरपेक्षाणामिति।**

कृतकरत्वमाशङ्क्य परिहरति—**न च कृतेति।**

उपसर्पणेति। उपसर्पणस्य परस्परसन्निधानस्य प्रत्ययः कारणं वाय्वाद्य इत्यर्थः।

व्याप्तिसाधनादेवेति। सत्त्वक्षणिकत्वयोर्व्याप्तिग्राहकप्रमाणादेव।

एवमपीति। दृश्यादृश्योपसंग्रहेण सर्वोपसंहारवत्यामपि व्याप्तौ।

उने ॥ उभयत्रेति। सपक्षे विपक्षे च।

टीयाम् ॥ तदनुपलम्भेनेति। क्रमाक्रमानुपलम्भेन।

उने ॥ **येन हीति** । येन हि प्रकारेणार्थक्रियाकारित्वासंभवरूपेण विचाराभासारूढेन प्रसङ्गाभासव्यवस्थापितेनार्थक्रियाकारित्वमक्षणिकाद् व्यवर्तते, तेन प्रकारेण क्षणिकादपि व्यवर्तते । तदाश्रित्यासाधारण्यं प्रमाणतः पुनर्नाक्षणिकात् नापि क्षणिकाद् व्यावर्तते सत्त्वम्, तदाश्रित्य सन्दिग्धव्यतिरेकित्वमिति भावार्थः ।

एवमिति । **टीको**क्तनीत्या ।

उभयत्रेति । अक्षणिके क्षणिके च ।

इति प्रसङ्गतोऽपीति । इति हेतोः प्रसङ्गोद्भावनेनापि सत्त्वस्य हेतोरसिद्धत्व-मुद्भावयितुमुचितम् ।

पक्षे इति । शब्दादौ ।

अन्यथेति । यद्येवं सत्त्वहेतोरसिद्धिप्रसञ्जनमेव स्यात् तदा ।

अनवबुद्धेति । अनवबुद्ध**टीका**यास्तस्माद् गन्धवत्ववदित्यस्या अर्थः पक्षे प्रमाणसिद्धस्यैवेत्यादिको भावार्थो येन स तथा तेन ।

यत्किञ्चिदुक्तमिति । नन्वेवमुभयत्रासंभवे इत्यादिकम् ।

टीयाम् ॥ सापेक्षत्वानपेक्षत्वयोः सत्त्वव्यापकत्वयोः क्षणिकाद् व्यावृत्तिं दर्शयितुं भूमिमार-चयति—**तथा हीति** ।

कृतं सहकारिभिरिति । ततश्चानपेक्षितक्षित्यादिसन्निधयोऽपि कुशूलस्था [764a] बीजक्षणा केचनाङ्कुरं कुर्युरिति भावः ।

स्वप्रत्ययेति । स्वकारणानि ।

किमयं कृषीवलोऽपीति । किमयं कृषीवलोऽपि कुटुम्बी न प्रेक्षावान्, यो जानन्नपि निरपेक्षाङ्कुरजनकत्वं प्रयत्नेन कुशूलादवतार्य बीजमावपति । न चासावेवं न जानाति अपरीक्षकत्वादिति वाच्यमज्ञातसाधनभावे वस्तुनि नियमेन प्रवृत्त्यनुपपत्तेः । अतस्तेन प्रेक्षावता अनपेक्षस्य बीजस्याङ्कुरजनकत्वं प्रतिपद्यमानेन न क्षित्यादिसंयोगे यतितव्यम् । यतते चासौ, तेन ज्ञायते न निरपेक्षस्य कारणत्वमिति तेन प्रतिपन्नमिति भावः ।

तत्र चेति । स्वकार्ये ।

नैयायिकः परिहरति— **ननूत्पत्तावपीति ।** अन्त्यबीजक्षणे हि क्षित्याद्यन्तरेणाङ्कुरजननसमर्थो नोत्पद्यत इति समर्थोत्पत्त्यर्थं तेन क्षित्याद्यपेक्ष्यते इत्यभ्युपगमोऽपि तदा स्यात् यदि तज्जनकः क्षणः क्षित्याद्यपेक्ष एव तं जनयेदेवं तस्य तस्य पूर्वः पूर्वः क्षणः। यदा तु पूर्वः पूर्वोऽग्रेतनमग्रेतनं क्षित्याद्यनपेक्ष एव जनयति, तदोपान्त्यक्षणेन क्षित्यादिनिरपेक्षेणैवान्त्यक्षणः समर्थो जनित इति कथं समर्थक्षणस्योत्पत्तावपि क्षित्याद्यपेक्षा ततश्च कुशूलस्थस्यापि बीजस्याङ्कुरजननसामर्थ्यात् न कर्षको भूमौ बीजं वपेदिति भावः ।

उने ॥ तेनैवेति । ज्ञानश्रियैव ।

तैरिति । सहकारिभिः ।

प्रथमे इति । प्रथमापेक्षार्थाभ्युपगमे ।

सत्त्वादिति । सद्भावात् ।

तैर्विनेति । सहकारिभिर्विनाभावो नास्त्येव । ततोऽसताऽभावेन कस्याकरणमित्यस्तु ?

तदिति । करणम् ।

नोभयप्रकारव्यावृत्तिरिति । न सापेक्षत्वं नाप्यनपेक्षत्वं व्यावर्तते । प्रथमकल्पमाश्रित्य सापेक्षत्वात्, तृतीयकल्पं वाश्रित्यानपेक्षत्वात ।

तद्विरहेऽपीति । सहकारिविरहेऽपि ।

तस्येति । अक्षणिकभावस्य ।

भवत इति । विद्यमानस्य ।

तदभावे इति । सहकार्यभावे ।

तस्येति । बीजलक्षणभावस्य ।

तथा सतीति । यदि सहकार्यभावे भावस्याभावो भवेत् तदा ।

अनवस्थादेरिति । टीकायां पूर्वपक्षे उद्भावितात ।

अन्यथेति । अन्वयनियमानभ्युपगमे ।

तथा चेति । अन्वयनियमाभ्युपगमे च ।

स चायमेवम्भूतस्वभाव इति । तैः सहैव करोति, तैर्विना न करोत्येवेत्ययम् ।

अन्यदेतदिति । तैः सहैव करोतीति स्वभावेऽप्रयोजकत्वमित्यर्थः ।

यस्तु प्रयोजकः सोऽविशिष्ट इत्याह—**स्वभावेति** ।

अयं गभीरतरो ग्रन्थमहाह्रद इति । तथा ह्ययं क्षणप्राप्तानीत्यादिकः ।

कार्यमात्रव्यावृत्तिरिति । विद्यमानोऽपि भावः सहकारिभिर्विना न कार्यं करोत्येवम् ।

कुतो निश्चितमिति । किं तु संदेह इत्यर्थः ।

प्रसङ्गेति । यदि सहकारिभिर्विनाप्यर्थस्य सत्ता, तदा तैर्विनापि कार्यं कुर्यात्, न च करोतीति प्रसङ्गतद्विपर्ययाभ्यां तैर्विना स्वरूपव्यावृत्तिर्न तु कार्यमात्रव्यावृत्तिरित्येतत् निश्चितम् ।

अनेनेति । स्वकारणवशात् तैर्विना स्वरूपव्यावृत्तिर्न तु कार्यमात्रव्यावृत्तिरिति कुत इत्यनेन ।

तयोरेवेति । प्रसङ्गतद्विपर्यययोः ।

प्रारब्धमिति । मया [764b] **नैयायिकेन** ।

न हीति । यदि हि तैर्विना स्वरूपव्यावृत्तिरित्येवं स्वाभाव्यं सिद्धं स्यात्, तदा प्रसङ्गातद्विपर्यययोः प्रवृत्तिः । यदा त्वेवं स्वाभाव्यमन्यादृशस्य सामर्थ्यस्य तैर्विना कार्यमात्रव्यावृत्तिरित्यस्यापि संभावनया संदिग्धम्, तदा सन्नपि पदार्थः सहकारिभिर्विना कार्यं न करोतीति स्वभावाश्रयणेन प्रसङ्गतद्विपर्यययोः प्रवृत्तिरिति भावः ।

तदिति । समर्थं बीजम् ।

तादृशस्येति । समर्थजातीयस्य ।

कार्येति । अङ्कुरलक्षणकार्यानुपलब्धेः ।

तादृशत्वेऽपीति । क्षित्यादिसहकृतमेव बीजमङ्कुरं जनयतीति स्वभावाभ्युपगमे समर्थजातीयत्वे सत्यपि यत् कोष्ठगतं बीजं नाङ्कुरं जनयति तत्सहकारिविरहादित्येवमपि कार्यानुपलम्भोपपत्तेः ।

एतच्चेति । समर्थजातीयत्वम् ।

न ह्यतादृशत्ववदिति । इदमसमर्थजातीयं न वेत्येवमतादृशत्वं यथा कोष्ठगतबीजस्य संदिह्यते न तथा । किमिदं समर्थजातीयं नवेत्येवं तादृशत्वमपि संदिह्यते ।

ननु शिलादेरसमर्थजातीयत्वेऽङ्कुरानुपलम्भनमुपपन्नमेवं कोष्ठगतबीजस्याप्युपपत्स्यते अत आह—**इह चेति** ।

शङ्कोत्थापनमिति । **बौद्धेन** ।

तत्सन्देहेऽपीति । व्यतिरेकसन्देहेऽपि । अतादृशत्वेऽप्येतदुपपद्यते इति शङ्कमानेन च **बौद्धेन** तादृशत्वाद् विपक्षात् कार्यानुपलब्धेर्हेतोर्व्यतिरेक एव स्वयं सन्दिग्धीकृतः ।

तन्मध्यमिति । अवनिपवनपावकादिमध्यम् ।

तदिति । तस्याङ्कुरस्य ।

अविशेषादिति । अनुपकारकतामात्रस्य ।

तेनेति । **ज्ञानश्रियैव** ।

नानास्वभावेति । नानास्वभावं यत्कार्यं तत्कर्तृस्वरूपं यस्य तस्य बीजादेरर्थस्य ।

प्रतिबन्ध इति । व्याप्तिः ।

सौगताभ्युपगम इति । नाप्येवं **बौद्धा**ङ्गीकारः ।

समयो वेति । नाप्येवं **बौद्धा**गमः ।

तत्कार्यसाजात्येति । अङ्कुरजातीयाः सजातीयकार्याणि, तदपेक्षया घटजातीया विजातीयकार्याणि । तत्र कार्यसाजात्यं प्रति सामग्रीसाजात्यम् । बीजक्षित्यादिका सजातीया सामग्री प्रयोजकं कार्यवैजात्यं च प्रति सामग्रीवैजात्यं मृत्तिकाचक्रादिका विजातीया सामग्री प्रयोजकमित्येतावन्मात्रमाश्रित्या**यमेव हीत्या**द्युक्तम् । तेन कारणभेदो भेदहेतुरित्यस्य सजातीया कारणसामग्री सजातीयकार्यहेतुः, विजातीया कारणसामग्री विजातीयकार्यहेतुरित्यर्थः सिद्धः । न पुनरेकं स्वलक्षणं रूपाद्यन्यतरत् स्वलक्षणं न वैकं सन्तानं रूपाद्यन्यतरसन्ततिम् , नापि वा कयाचित् प्रत्यासत्त्यैककालतैकार्थकारितादिकया कृत्वा समग्राणां

बीजक्षित्यादीनां यैकसमूहता तया या कार्यकारणात्मकरूपता एकसमुदायरूपस्य कारणतैक-समुदायरूपस्य च कार्यतेत्यर्थः । तामाश्रित्यायं **ही**त्यादि वाक्यम् । तेनानेकेष्वपि रूपादिषु कारणेष्वेकं स्वलक्षणं कार्यम । अनेकेष्वपि रूपादिषु कार्येष्वेकं कारणं स्वलक्षणम् । तथा अनेकेष्वपि रूपादिसन्तानेषु कारणेष्वेको रूपादिसन्तानकार्योऽनेकेष्वपि रूपादिसन्तानेषु कार्येष्वेकं रूपादिसन्तानः कारणम् । तथा भिन्नेष्वपि [765a] बीजक्षित्यादिषु कारणेषु अभेदोऽङ्कुरक्षित्यादेः कार्यस्य, भिन्नेष्वपि चाङ्कुरक्षित्यादिषु कार्येष्वभिन्नं कारणं क्षित्यादीति सिद्धं भवति ।

अङ्कुरादीनामिति । अङ्कुराणामनङ्कुराणां च घटादीनाम् ।

तदतद्रूपतेति । अङ्कुररूपता अनङ्कुररूपता च ।

अतिप्रसङ्गादिति । सर्वमङ्कुररूपमनङ्कुररूपं वा प्रसजेदित्यर्थः ।

नाप्यङ्कुरादीति । अङ्कुरस्यानङ्कुरस्य वा कर्ता यः स्वभावः, तदधीनापि न तदतद्रूपताविरोधात् कारणस्य हि यः स्वभावो नाङ्कुरं करोति, नाप्यनङ्कुरं तस्मादङ्कुरोऽपि विरुध्यते, अनङ्कुरोऽपीति ।

तदेकस्वभावेति । अङ्कुरकर्त्रेकस्वभावनिष्पाद्यतया ।

अन्यथेति । यद्यङ्कुरकर्त्रेकस्वभावनिष्पाद्यानामपि क्षित्यादीनां नाङ्कुरत्वम् ।

एतेनेति । अङ्कुरस्वभावत्वप्रसङ्गव्याख्यानेन क्षित्यादीनामङ्कुरैकजातीयत्वाङ्कुरैक-देशीयत्वप्रसङ्गावपि व्याख्येयौ ।

टीकायां क्वचित् प्रत्यन्तरे आकस्मिकत्वप्रसङ्गादिति स्थाने एकत्वप्रसङ्गादिति पाठं पश्यन्नाह—**एकत्वशब्देनेति** ।

एतदपीति । एकस्वभावनिष्पाद्यतया कार्याणामेकस्वभावापत्तिरिति ।

वर्त्तिविकारादीति । आदिपदात् स्नेहशोषप्रकाशादिग्रहः ।

सिद्धान्ती बौद्धं पृच्छति—**तदिति** । यदेकस्मादनेककार्योत्पत्तिरित्यभ्युपैषि ।

अभ्युपगममेव स्पष्टयति—अङ्कुरानङ्कुररूपस्यानेकस्य कर्ता यः स्वभावो बीजस्य तस्मादनेकस्याङ्कुरस्यानङ्कुरस्य च क्षित्यादेरुत्पत्तिः ।

अमीषामिति । अङ्कुरक्षित्यादीनाम् ।

प्रत्यक्षबाधस्येति। प्रत्यक्षेण क्षित्यादिस्वरूपामिश्रितस्यैवाङ्कुरस्वरूपस्य गृह्य-माणत्वादित्यर्थः।

पूर्वदोषेति। न तावदङ्कुरादीनां प्रत्येकनियतता कारणानपेक्षा भवितुमर्हति अतिप्रसङ्गात्, नाप्यङ्कुराद्यकर्तृस्वभावाधीना विरोधादित्यादयः पूर्वदोषाः।

तदयं प्रमाणार्थः इति। क्षित्यादीनामप्यङ्कुरस्वाभाव्यापत्तेरिति प्रसङ्गस्यायमर्थः।

अमीषामिति। क्षित्यादीनाम्।

प्रत्यक्षसिद्धमशक्यापह्नवमिति। तस्मादङ्कुरानतिरेकित्वसाधनं प्रत्यक्ष-बाधितमिति भावः।

न च सिद्धसाधनमिति। नाङ्कुरकर्तृस्वभावाधीनोत्पत्तिकानीत्येतत्।

तदतिरिक्तस्येति। अङ्कुरकर्तृस्वभावातिरिक्तस्य।

तत्कारणस्येति। क्षित्यादिकारणस्य।

सन्दिग्धविपक्षवृत्तितेति। अनङ्कुररूपाण्यपि क्षित्यादीन्यङ्कुरकर्तृस्वभावा-धीनोत्पत्तिकान्यपि भविष्यन्तीत्येवम्।

विपक्षे इति। अङ्कुरकर्तृस्वभावाधीनोत्पत्तिकत्वे हि क्षित्यादीनामनङ्कुररूपत्वं विरुध्यते अङ्कुरत्वप्रसङ्गादित्युक्तमेव।

अनेनाभिप्रायेणेति। वक्ष्यमाणेन।

तमेवाह—**एतदपीति**। कार्यसाजात्यवैजात्ये प्रतीत्यादि।

तदतिक्रमे इति। कारणस्वभावातिक्रमे।

समानो न्याय इति। यथा **बौद्धेन टीकाकारस्य बौद्धशास्त्राभिप्राया-**परिज्ञानमुक्तम्, एवं बौद्धस्यापि **टीकाकारा**भिप्रायापरिज्ञानमित्यर्थः।

भिन्नसन्तानेति। एकत्र भिन्नसन्तानान्तःपातीनि अङ्कुरकर्तृस्वभावानि पञ्च-बीजानि, अन्यत्र चाङ्कुरकर्तृस्वभावाः क्षितिसलिल[765b]तेजोबीजवायवः पञ्चोभयेषा-मप्यङ्कुरकर्तृस्वभावत्वमविशिष्टमेव। ततश्चाद्यपञ्चके इव द्वितीयेऽपि पञ्चकेऽङ्कुरनानात्वं प्रसज्यते। द्वितीयपञ्चके इव प्रथमेऽप्यङ्कुरैकत्वं वा नियमहेतोरभावादित्यर्थः।

त्वयापीति। **नैयायिके**नापि।

मभापीति । **बौद्धस्यापि** ।

समानशक्तीनामपीति । यद्यपि पञ्चबीजानि पञ्च च क्षित्यादीनि अङ्कुर-जनने समानशक्तीनि, तथापि पञ्चबीजानि मिथो निरपेक्षाण्येवाङ्कुरं जनयन्तीत्यतोऽत्र सामग्रीभेदः स्यात् । क्षित्यादीनि तु मिथः सापेक्षाण्येवाङ्कुरं जनयन्तीत्यतोऽत्र न सामग्रीभेद इति भावः ।

टीयाम् ॥ मा भूदाकस्मिकत्वम्, अतिप्रसङ्गस्तु स्यात् । तथा हि स्वकारणा-धीनोत्पादस्वभावविशेषवतः कस्यचिद् बीजादेर्निरपेक्षस्य नानाङ्कुरादिकार्यजनकत्वाभ्युपगमे क्षित्यादीनन्तरेणापि क्षित्यादेरुत्पादप्राप्तेरतिप्रसङ्गः स्यादत आह—**नाप्यतिप्रसङ्ग** इति । तादृशस्य स्वभावविशेषवतः क्षित्यादिसहभुवोऽसार्वत्रिकत्वात् क्षित्यादीनन्तरेण सर्वत्रैवाभावा-दित्यर्थः ।

न तावत् तेनैवेत्यादिना यो **नैयायिकेन** कारणस्वभावाभेदेन कार्यभेदः प्रसञ्जितः, तं निषेधति—**न च कार्येति** ।

कार्यभेदाभेदाविति । कर्तारौ ।

तदेतदभ्युपगतविरोधापादकत्वेन दूषयति— **मुधैवेति** ।

किं वा रूपान्तरेणेति द्वितीयं कल्पमाशङ्कते— **रूपान्तरेणेति** ।

जनकमिति । बीजम् ।

तदेतद्विकल्प्य दूषयति—**अथेति** ।

अनयोरिति । सहकारितोपादानतयोः ।

ताभ्यामिति । सहकारितोपादानताभ्याम् ।

तदुपादानमिति । क्षित्याद्युपादानम् ।

उने ॥ **तस्मादितीति** । तस्मादङ्कुराद् भिन्ने इत्यादि ।

टीयाम् । उपसंहरति—**तस्मात् स्वसन्तानेति** ।

अनुपकारिण्यपेक्षाविरहादिति । सापेक्षत्वनिराकरणहेतुरुपसंहृतः । निरपेक्षत्वनिराकरणहेतू चावशिष्टाविति ।

तदेवमक्षणिकादिव क्षणिकादपि व्यावृत्तेरसाधारणं सत्त्वमिति प्रतिपाद्येदानीं सन्दिग्ध-व्यतिरेकत्वं प्रतिपादयितुं शङ्कते—**अथ मा भूदिति ।**

उने ॥ अपेक्षेति । सहकार्यभावे एव यत् कार्याकरणं सा अपेक्षा ।

एष च स्वभाव इति । सहकारिसद्भावे कार्यकरणमेवेति रूपः ।

क्षणस्य दुरन्वयत्वादिति । सहकारिसद्भावे कार्यं करोत्येवेत्येवं क्षणो नान्वेतुमनुगततया ज्ञातुं शक्यः क्षणत्वादेव ।

नन्वङ्कुरेण कार्येण शक्ष्यते बीजक्षणः, सहकारिषु [सत्सु] कार्यं करोत्येवेत्येव-मन्वेतुमत आह—**कार्येकेति ।** कार्येणैकेनोन्नेयो यो विशेषः स्वलक्षणं, न ह्यसौ सामान्य-निष्ठस्यान्वयव्यतिरेकव्यवहारस्य प्रवर्तकः स्यात् । यदा च स्यात्, तदापि विशेषं प्रतीति भावः ।

तथा च सतीति । सदृशसन्तानमाश्रित्यापेक्षायां च सत्याम् ।

टीयाम् ॥ क्रमवत्सहकारिनानात्वादक्षणिकपक्षेऽपि क्रमवत्कार्यनानात्वोपपत्तेरशक्यं भावानां प्रतिक्षणमन्यत्वमध्यवसातुमित्यन्यथासिद्धतामाह—**नत्वनेनेति ।**

अनुपकारकानपि सहकारिण इति । येषां भावाभावौ कार्यमनुपतति ते कार्येणापेक्षितसन्निधयः सन्निपतन्तः तदेव कार्यं विवक्षितहेतुना सह कुर्वन्तीति सहकारिण उच्यन्ते । [766a] न तु येन सह कुर्वन्ति तस्यैव कर्तारो भवन्तः सहकारिणो भवितु-मर्हन्तीत्यर्थः ।

उत्पत्तिमत इति । आगन्तुकात् ।

एषामिति । बीजादीनाम् ।

रूपेणेति । स्वरूपेण ।

तत्सहितादिति । स्वरूपसहितादेव ।

तत इति । समवधानात् ।

ननु यस्मिन् सति यद् भवत्येव तत्तस्य कारणम्, एवं च समवधानमेव कारणं प्राप्नोति न रूपमिति शङ्कते—**रूपे सत्यपीति ।**

तत्समवधानस्येति । बीजसमवधानस्य ।

तत्कारणत्वादिति । अङ्कुरकारणत्वात् ।

समवधानं संनिधीयमानपरतन्त्रं नासति तस्मिन् भवितुमर्हति इत्यवर्जनीयतया तस्य निवेशो न पुनः कार्येण तदपेक्षितं समवधानादेव कार्योपपत्तेरत आह—**न चावर्जनीयतयेति** ।

तत्र तत्रेति । तन्तुतुरिवेमादिषु ।

तस्माद् यथोभयेत्यादि । एतेन यस्मिन् सति भवत्येवेति कारणलक्षणं दूषितम्, तथा च समवधानवत्स्वरूपस्यापि बीजादीनां कारणत्वं व्यवस्थापितम् ।

उने ॥ व्यभिचाराशङ्केति । कारणमन्तरेणापि कार्यं भविष्यतीति या व्यभिचाराशङ्का तस्या निरसनमेव ।

जल्पमाश्रित्याहेति । अर्थक्रियाकारित्वमेव सत्त्वमिति यदुक्तं तद्वचनदोषाणामप्याविर्भावकं जल्पमाश्रित्य निषेधतीत्यर्थः ।

टीयाम् । **कारणतैवेति** । अर्थक्रियाकारितैव ।

अनुभूतावसितमिति । निर्विकल्पकसविकल्पकाभ्याम् ।

अनेकार्थक्रियाकारिण इति । स्वविषयज्ञानजलाहरणाद्यनेकार्थक्रियाकारिणो घटादेः ।

प्रत्यय इति । कारणम् ।

जनित्वेति । उत्पाद्य ।

उने । **ननूक्तमिति** । **बौद्धैः** ।

अनेनेति । न च कारणतैवेत्यादिकेन ।

एकधर्मीति । यत्रैव धर्मिणि लक्ष्यं सत्त्वं तत्रैव लक्षणमर्थक्रियाकारित्वमपीत्येकधर्मिप्रत्यासत्तिः ।

लौकिकी लक्षणेति । मञ्चाः क्रोशन्तीत्यादिवत् ।

ननु भविष्यति प्रयोजनमत आह—**न चेति** ।

प्रयोजनसंभवेऽपीति । आत्यन्तिकाव्यभिचारप्रदर्शनादेः प्रयोजनस्य संभवेऽपि ।

तत्प्रयोजनमस्तीति । हेतोः ।

विरुद्धधर्मसंसर्ग इति । अक्षणिकस्य ।

प्रकाराभेदेनेति । येनैव स्वरूपदेशकालादिप्रकारेण जनकः, तेनैवाजनक इति विरुध्यते ।

स चेति । प्रकाराभेदेन जनकत्वाजनकत्वविरोधः ।

प्रकृते इति । अक्षणिके ।

टीयाम् ॥ **सहेतुकेऽपीति** । यदि निर्हेतुकं विनाशं विना कृतकत्वं नोपपद्येत तदैतत् क्षणिकत्वं साधयेत् । कृतकत्वं तु सहेतुकेऽपि विनाशे उपपद्यत एव कृतकेन हि भावेनावश्यं विनष्टव्यमित्येव व्याप्तिः । न तु विनाशकारणं विनैवेति । ततो यावद् विनाशकारणं नोपनिपतिष्यति तावत् कृतकोऽपि भावः स्थिरो भविष्यतीति भावः ।

भूतलं च तथोत्पन्नं घटाभावो न स्वभावो नाम कश्चिदस्तीति यदुक्तं तद्दूषयति—**न चोत्पत्तीति** ॥

उने ॥ **वस्तुन्येवेति** । वस्तुभूते एव स्वात्मनि ।

हेतुरिति । सत्त्वादिः ।

न त्वेवमिति । न पुनर्वस्तुभूते एव स्वात्मनि हेतुः स्थिरत्वमापादयति ।

तव दर्शने इति । यदर्थक्रियाकारि तत् क्षणिकमित्यभ्युपगमरूपे ।

तथाभूतस्येति । तुच्छरूपस्य ।

न कस्यचित् सर्वस्यैव स्यादिति । तथा चायं न क्षणिकस्यापि धर्मोऽक्षणिकस्यापि वा स्यादित्यर्थः ।

तदिति । नियतस्वभावत्वम् ।

उत्थापिता इति । उत्थाप्य दूषिता इत्यर्थः ।

अर्थानवबोध एवेति । अज्ञानं नाम निग्रहस्थानमिति भावः ।

टीयाम् ॥ [766b] **विशेषवत्त्वस्येति** । अन्ते विशेषदर्शनादिति हेतोः ।

वाके ॥ **अनेकान्त** इति । नानात्वे साध्ये एकत्वेऽपि गतत्वात् ।

विरुद्धो हेतुरिति । एकस्मिन्नेवान्त्यक्षणे गतत्वात् ।

टीयाम् । **प्रघणेति** । अगारैकदेशो द्वारकोष्ठको बाह्यः प्रघण उच्यते ।

[1]**उपसर्पणप्रत्ययवशादिति** । उपसर्पणलक्षणकारणवशात् ।

प्रसज्येरन्निति । तथा च बाधितार्था प्रतिज्ञा स्यादिति भावः ।

देवनादीनामिति । पाशकादीनाम् ।

तद्विषयाणामिति । अक्षशब्दविषयाणाम् ।

तत्प्रत्ययसामानाधिकरण्ये इति । तदेवेदमिति प्रत्ययसामानाधिकरण्ये [इ]ति ।

सिद्धे इति । संपूर्णे हेतावित्यर्थः ।

उने ॥ अन्यापोहविषयः शाब्दो व्यवहारोऽयुगपत्कालप्रत्ययानामेकविषयत्वमन्तरेणाप्युपपत्स्यते । अत आह—**तच्चेति** । हेत्वन्तरम् ।

क्षीरविनाशकारणानुपलब्धिवदित्यत्र पूर्वपक्षसूत्रे **सांख्य** आह—न पयसः परिणामे गुणान्तरप्रादुर्भावात् इति [2]**सूत्रम्** । **तद् भाष्यकृद्** व्याचष्टे—**पयस** इति । पयसः परिणामो न विनाशः इत्यर्थः ।

एक इति । **सांख्यभेदः** ।

अपर इति । **सांख्यः** ॥

वाके ॥ **एकस्य तिरोभावेति** । एकस्य धर्मस्य तिरोभाव एकस्य चाभिव्यक्तिः, तथा मतान्तरे एकस्य धर्मस्य विनाश एकस्य च प्रादुर्भाव उत्पादः ।

---

1 This pratīka is absent in the printed *Ṭīkā*. 2 III. ii. 15

अनुमानमिति। क्षीरदधिनीपरस्परमर्थान्तरभूते द्रवकठिनत्वात् जलपाषाणवत् । नानयोरेकार्थसमवायित्वं द्रव्यत्वात् किंशुकाशोकवदित्यनुमानं द्रष्टव्यम् ।

भाष्ये ॥ **संमूर्छनालक्षणादिति** । द्रव्यजनकानामवयवानां संयोगः संमूर्छना ।

वाके ॥ **निवृत्तिप्रादुर्भावादिति** । विनाशोत्पत्ती ।

टीयाम् ॥ ननु निरधिष्ठानत्वं हेतुदोषः कथं दृष्टान्तवचनस्योच्यते अत आह—**धर्मिणमिति** ।

आत्मसामान्येनेति । व्यापकद्रव्यसमवेतेनापि नित्येन । एवमपि तेनैवात्मपरिमाणेन योगिप्रत्यक्षेण व्यभिचारोऽत आह—**अस्मदादीनामिति शेष** इति ।

उने ॥ **तस्मिंस्त्विति** । गुणत्वादिविशेषयोगे तु ।

इदमिति । व्यापकद्रव्यसमवायादित्येतत् ।

एवमिति । इहानुपयोगे ।

एतदेवेति । व्यापकद्रव्यसमवायादित्येतदेव ।

तथापीति । जातिमत्त्वे सतीत्यनेन सामान्यसमवायाभ्यामनैकान्तिकत्वपरिहारेऽपि ।

अपिर्भिन्नक्रम इत्यादि । एतेन जातिमत्त्वे सत्यस्मदादिप्रत्यक्षत्वादिति हेतुद्वयभ्रमो निवारितः ।

॥ इति प्रासङ्गिकं क्षणभङ्गप्रकरणं संपूर्णम् ॥

॥ बुद्ध्यात्मगुणत्वपरीक्षाप्रकरणम् ॥

[३.२.१८–४१]

उने ॥ तदात्मगुणत्वप्रकरणमिति । बुध्यात्मगुणत्वप्रकरणम् ।

तत्सद्भावे इति । **सांख्या**भिमतनित्यबुद्धितत्त्वसद्भावे ।

तद्धर्मतयेति । नित्यबुद्धिधर्मतया ।

पूर्वप्रकरणमिति । बुद्ध्यनित्यत्वप्रकरणम् ।

उत्तरस्येति । बुद्ध्यात्मगुणत्वप्रकरणस्य ।

ननु यदीह प्रकरणे बुद्ध्या गुणतयात्मसाधनं विशेषः, तदा अप्रसिद्ध एवायमर्थः प्रक्रियते । तत् कथमाह **भाष्यकृत्** प्रसिद्धोऽपि खल्वयमर्थ इति ? अत आह— **तथापीति** । आत्मप्रकरणे यथा शरीरादिव्यतिरिक्त एव बुद्धेः कर्तेति साधितं तथा शरीरादिव्यतिरिक्त एव स्मृतिसंस्कारानुभवानामाश्रय[767a]इत्यपि साधितं तथा चार्थतो बुद्धेरात्मगुणत्वं प्रसाधितमेवेति भावः ।

वाके ॥ अनित्यत्वे सतीति । प्रत्यक्षत्वादित्युक्ते घटेन व्यभिचारोऽत आह— **अचाक्षुषेति** । घटो हि गृह्यमाणो नाचाक्षुष एवेति । तथाप्यात्मना [1]बुद्धि[म]त्त्वेन च व्यभिचारः । अत आह—**अनित्यत्वे सतीति** । न च वाय्वादिभिर्व्यभिचारः, तेषामरूपत्वेनाप्रत्यक्षत्वात् ।

टीयाम् ॥ विमृश्य सिद्धान्ती पक्षं गृह्णाति—**सन्निकर्षोत्पत्तेरितीति** ।

सन्निकर्षोत्पत्तेः संशय इति हि विमर्श**सूत्रम्** । नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानादिति च पक्षपरिग्रह**सूत्रम्**[2] ।

वाके ॥ अद्राक्षमित्येतन्नेति । येन्द्रियार्थसन्निकर्षादुदेति बुद्धिः सेन्द्रियार्थगुणत्वेनाभ्युपेयते न स्मृतिरित्यर्थः ।

---

1 J S बुद्धित्वेन   2 III. ii. 18

ज्ञातारमिति । ज्ञातृत्वेन कल्पितमिन्द्रियमर्थं वा ।

अनुभवितरीति । अनुभवितृत्वेन कल्पिते इन्द्रियेऽर्थे वा ।

युगपज्ज्ञेयानुपलब्धेश्च न मनस इति [1]**सूत्रम्** । तस्यार्थो यदि मनो ज्ञातृ स्यात्, तस्यान्यकरणानपेक्षत्वे युगपज् ज्ञानानि स्युः, न च सन्ति । तस्मात् न मनोगुणो बुद्धिः ।

टीयाम् ॥ **युगपज्ज्ञेयानुपलब्ध्येति** । युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतमित्येत-दार्थ्या वृत्त्या **यद्भाष्यं** तदाक्षिपति ।

उने ॥ **सूत्रत्वेन प्रसिद्धमपीति** । **भाष्ये** कस्य तर्हीत्येवम्, **वार्त्तिके** च कस्य तर्ह्यस्यार्थस्य प्रदर्शनमित्येवं **सूत्र**ग्रहणोचितपातनया गृह्यमाणत्वात् ।

युगपज्ज्ञेयेति । यदि [2]ज्ञस्य वशित्वादिति **सूत्रं** स्यात, तदैतदपेक्षया यत् पूर्वं **सूत्रं**[3] युगपज्ज्ञेयानुपलब्धेश्च न मनस इति, तत्रस्थस्य चकारस्य या अग्रे **भाष्य-कारे**ण युगज्ज्ञेयोपलब्धेश्च योगिन इत्येवं विचरिष्यमाणता सा न संगच्छेतेति भावः ।

भाष्ये ॥ **वशी ज्ञाता वश्यं करणमिति** । ज्ञाता तावत् वशी स्वतन्त्रः । तस्य करणादि वशं गच्छतीति वश्यं कर्त्रधिष्ठानाधीनव्यापारमित्यर्थः ।

टीयाम् ॥ **अन्तःकरणान्तररहितमिति शेष** इति । एवं सति सर्वेन्द्रियैर्युगपदु-पलब्धिप्रसङ्ग इति दोषः स्यात् नान्यथेति भावः ।

भाष्ये ॥ **योगी खल्विति** । योगर्द्धिप्रभावाद् योगिनः सञ्चितकर्मोपभोगार्थं नाना-देशेष्वनेकरण्डान्तःकरणवत्कायनिर्माणे युगपज्ज्ञानानि सन्तीत्यागमसिद्धम् । तच्च विभौ ज्ञातरि युगपदुपपद्यते, नाणौ मनसीति ।

उने ॥ **पूर्वपूर्वपक्षेति** । पूर्वमग्रेतनं यत्पूर्वपक्ष**सूत्रं** तदपेक्षया ।

भाष्ये ॥ सिद्धान्त्याह—सन्निकर्षाभावात् तदनुपपत्तिरिति [4]**सूत्रम्** ॥

टीयाम् ॥ **बाधकं प्रमाणमिति** । ज्ञानयौगपद्यासमवायिकारणाभावादि ।

---

1 III ii. 9 2 cf. N.Bh. III. ii. 19 3 III. ii. 19 4 III. ii. 21

अयुगपदुत्पत्तौ वेत्यादिना गतार्थतां परिहर्तुमन्तःकरणप्रत्याख्याने चेति व्याख्यानानन्तरं व्याख्याति—**यदि सर्वाण्यपि ज्ञानानि न युगपज्ज्ञायन्त** इति। कादाचित्केन्द्रियार्थसन्निकर्षापेक्षया।

अव्यभिचाराद् आत्मादित्रयसन्निकर्ष एव कारणमतः कथं कारणानपदेश आपाद्यते, अत आह—**असतीन्द्रियेति**। विमनस्कस्य त्रयसन्निकर्षे बुध्यनुत्पादाद् व्यभिचार इति भावः।

भाष्ये॥ **सांख्य** आह—विनाशकारणेत्यादि **सूत्रम्**[1]। तदात्मगुणत्वेऽपि [767b] तुल्यमित्येतदनेन समुच्चीयते इति। न केवलं विभुरात्मा सर्वेन्द्रियैः संपृक्त इति न्यायेनात्मगुणत्वपक्षे ज्ञानयौगपद्यं तुल्यं किं तु क्रमवतीनामपि बुद्धीनां विनाशकारणानुपलब्धेरवस्थानप्रसङ्गेनापि बुद्धियौगपद्यं तुल्यं प्राप्नोतीति सूत्रार्थः।

भाष्ये॥ सिद्धान्त्याह—अनित्यत्वग्रहणाद् बुद्धेर्बुध्यन्तराद् विरोधः शब्दवदिति [2]**सूत्रम्**। अनित्यत्वं बुद्धेः प्रत्यक्षमेव नास्ति इदानीं मे घटज्ञानमित्यादि वेदनात्। न च नाशो निर्हेतुक इति बुद्ध्यन्तरमेवात्र विरोधीगुणः शब्दस्य शब्दान्तरवत्। बुद्ध्यन्तराभावे च नाशकः सुष्वापादौ संस्काराभावेऽपि स्थितिहेत्वदृष्टनाशो नाशको मुमुक्षोरन्यतत्त्वज्ञानस्य चेत्यर्थः।

उने॥ **चोद्यतादवस्थ्यमिति**। किं विनाशकारणमिति चोद्यं तदवस्थमेव।

टीयाम्॥ **कथं कालादिति**। कथं कालात् स्थितिहेत्वोर्धर्माधर्मयोरभावः।

उत्तरम्—**यावन्त्यस्य जन्मन इतीति**। अन्त्यसुखदुःखोपभोगे कालाद् धर्माधर्मयोरभावः। तस्माच्चात्यन्ताया बुद्धेरभाव इत्युत्त[र]रहस्यम्।

टीयाम्॥ **परिहारान्तरमिति**। वक्ष्यमाणम्।

भाष्ये। ज्ञानसमवेतेत्यादि **सूत्रम्**[3] ज्ञानजन्यः संस्कारो ज्ञानं कार्ये कारणोपचारात्। तैः संस्कारैः समवेताः संबद्धा ये सन्त्यात्मप्रदेशा अनेके तैः सह मनो गत्वा संबध्यते इति तत्संबन्धक्रमेण स्मृत्युत्पत्तेर्न युगपदुत्पत्तिरित्यर्थः।

---

1 III. ii. 23 2 III. ii. 24 3 III ii. 25

टीयाम् ॥ दूषयतीति । एकदेशिनं सिद्धान्ती ।

भाष्ये ॥ नान्तःशरीरेति सूत्रम्[1] । यावत् प्रायणमन्तःशरीरवृत्ति मनो न बहिर्याय[ा]दित्यर्थः ।

उने ॥ नियतव्यवहारेति । अमुकेनैवेदं संयुक्तमिति यो नियतो व्यवहारः तदनङ्ग च संयोगो मनसो न कुत्रापि नास्तीति शरीरादन्यत्रापि प्रसक्त इति भावः ।

टीयाम् ॥ कर्मोपार्जितमिति । कर्मणोपार्जितम् ।

चोदयतीति । एकदेशी ।

भाष्ये ॥ साध्यमन्तःशरीरवृत्तित्वं मनस इति । अन्तःशरीरवर्त्येव मन इति साध्यमित्यर्थः ।

टीयाम् ॥ परिहार इति । सिद्धान्तिनः ।

पुनश्चोद्यमिति । **एकदेशिनः ।**

भाष्ये ॥ सुस्मूर्षया मनसीति । सुस्मूर्षया कृत्वा मनसि धार्यमाणे स्थिरीक्रियमाणे चिन्ताप्रबन्धे सति स्मर्तव्यार्थाविनाभाविनः कस्यचिदेवार्थस्य यच्चिन्तनं स्मरणमाराधितं सिद्धं तच्चिह्नवतः स्मृतिहेतुर्भवतीति योजना ।

तच्चैतत् चिरनिश्चरिते मनसि नोपपद्यत इति देहपातप्रसङ्गात् ।

टीयाम् ॥ शरीरान्न बहिर्मन इत्यत्रैकदेशिपरिहारमुपन्यस्यतीति । शरीरान्न बहिर्मन इतिवादी अपर एकदेशी एव शरीराद् बहिर्मनो गच्छतीतिवादिनमेकदेशिनं विकल्प्य दूषयतीत्यर्थः ।

भाष्ये ॥ आत्मप्रेरणेति [2]**सूत्रम्** । मनसो हि बहिर्गत्वात्मप्रदेशैः संयोगविशेष आत्मप्रेरणाद्वा स्याद् यदृच्छया वा स्वयं ज्ञातया वा सर्वथा चानुपपत्तिरित्याह—स्मर्तव्यत्वादिच्छातः स्मरणज्ञानासंभवाच्चेति **सूत्रम्**[3] ।

1 III. ii. 26 2 III. ii. 31 3 N. bh. III. ii. 31

संयुज्यतामितीति। ज्ञात्वेति शेषः।

न स्मर्तव्य इति। ततो व्यर्थं मनोगमनमिति भावः।

स्यादेतत्। संस्कारवन्तमात्मप्रदेशमध्यक्षेण दृष्ट्वा तदभिमुखं मनः प्रेरयिष्यत्यत आह— [768a] न चात्मेति।

इच्छातः **स्मरणमिति सूत्रावयवं** व्याचष्टे—**सुस्मूर्षया चेति**।

ज्ञानासंभवाच्चेति व्याचष्टे—ज्ञातृत्वं चेति ॥ ३१ ॥

टीयाम् ॥ **दूषयतीति**। तमेनं द्वितीयैकदेशिनं सिद्धान्ती।

भाष्ये ॥ **यदा खल्वयमिति**। शरीराद् बहिर्मनो गच्छतीति वादिनमेकदेशिनं प्रति यथोद्भाव्य त्रयो विकल्पा निषिद्धाः, शरीरात न बहिर्मन इति वादिना द्वितीयैकदेशिना तथा अन्यत्र व्यासक्तमनसोऽकस्मात् कण्टकादिना पादव्यथायां पाददेशे यो मनस आत्मना संयोगविशेषो दुःखस्यासमवायिकारणम्, तमभ्युपगच्छन्तं द्वितीयैकदेशिनं प्रत्यप्येषां त्रयाणां विकल्पानां निषेधः प्राप्नोति। पादावच्छिन्नयोर्दुःखतत्संवेदनयोरुत्पत्तौ पादावच्छेदवानेवात्ममनः-संयोगोऽसमवायिकारणमित्यत्र प्रमाणम् आत्मविशेषगुणाः............[स]र्वेऽप्यसमवायि-कारणाव्यवहितोत्पत्तयः प्रदेशवृत्तित्वात् शब्दवदिति। अदृष्टवशात्तदा मनःकर्मेति चेत्— इहापि तुल्यम्। अदृष्टवशात् मनो बहिर्यास्यतीति तस्मात् प्रथमैकदेशिनो नान्तःशरीर-वृत्तित्वात् मनस इत्ययमेव युक्तः परिहार इति भावः।

टीयाम् ॥ भाष्यं व्याचष्टे—**प्रातिभवदितीति**।

नन्वसंवेद्यमानस्य स्मृतिहेतोः प्रणिधानादेः सत्त्वं कुतस्त्यमतः **टीकाकृद्** आह— **अदृश्यमानमपीति**।

भाष्ये ॥ शङ्कां विभजते—**प्रातिभमिदानीमिति**।

समाधानं विभजते—**यथोपभोगेति**।

उने ॥ **इतरकारणेति**। इतरकारणसाकल्यं ह्यदृष्टं विना न स्यादितीतरकारणसाकल्यं

---

1 J ७६८ संख्यकं पत्रं खण्डितम्

यावददृष्टापेक्षायां प्रमाणं स्यादितरकारणसाकल्ये तु कार्यस्यावश्यम्भावित्वात् **नास्यां प्रमाण**मस्तीति भावः ।

करणधर्मोऽपीति ॥ एकदैकक्रियानिवृत्तिलक्षणः ।

एतदपीति । व्रश्चनावयवभेदात् करणभेदोन्नयनमपि ।

अत एवेति । प्रमाणाभावादेव । एतेन द्वितीये कल्पे सामर्थ्याभावादिति हेतोर्वैयर्थ्यादिति हेतुना अभिन्नार्थता दर्शिता ।

एकस्यैवेति । नानेकस्य ।

तदनेनेति । करणस्य प्रत्ययक्रमे सामर्थ्यप्रदर्शकेन नैकस्मिन् ज्ञेये इत्यादिना **भाष्येण** यद्यपि मनः सर्वेन्द्रियव्यापकत्वाद्युगपद् ज्ञानोत्पादकं प्राप्नोति, तथाप्यस्य करणत्वात् क्रमकारित्वं भविष्यति । करणस्य धर्मो हि क्रियाक्रम इति शङ्काशेषस्योत्थापनया निराकरणं सूचितम् । तच्चोक्तमेव मनोलक्षणे ।

भाष्ये ॥ **न ज्ञातुरिति** । अत्र सामर्थ्यमित्थंभूतमित्यनुषज्यते ।

टीयाम् ॥ अयं च द्वितीयः प्रतिषेधः । ज्ञानसंस्कृतात्मप्रदेशभेदशभेदस्यायुगपत् ज्ञानोत्पादकस्येति । ज्ञानेन संस्कृतात्मप्रदेशस्यायुगपत् ज्ञानोत्पादकत्वं वदन्तं प्रथमैकदेशिनं प्रति नान्तःशरीरवृत्तित्वात् मनस इत्ययमेकः परिहारोऽयं च द्वितीय इत्यर्थः ।

अवस्थितेतीति । [1]**सूत्र**ग्रहणमिदम् ।

अतश्चापरिहार इति **वार्त्तिकं** पूरयित्वा व्याचष्टे—**अतश्चेति** ।

अपरिहार इति । ज्ञानसमवेतात्मप्रदेशेत्यादि **सूत्रेण**[2] प्रथमैकदेशिनोक्तः ।

आचार्यदेशीयानां त्विति । कर्तरि षष्ठी ॥ ज्ञानसंस्कृतात्मप्रदेशभेदस्यायुगपज्ज्ञानोत्पादकत्वं वदता प्रथमैकदेशिना युगपज् ज्ञानोत्पादः [768b] परिहृतः । स च परिहारः समानात्मप्रदेशोत्पन्ननानासंस्कारावस्थितशरीरे स्मृतियौगपद्यप्रसङ्गेन सिद्धान्तिना निषिद्धः । प्रसङ्गं चैतमरोचयमानाः सिद्धान्त्येकदेशीया यं स्मृतियौगपद्यप्रसङ्गमुद्भावयन्ति तमाशङ्कते सिद्धान्तीत्यर्थः ।

---

1 N. Bh. III. ii. 33. 2 III. ii. 25.

सर्वसंस्काराणां समानदेशत्वाभ्युपगमादाचार्यदेशीयैः सुतरामवस्थितशरीरस्य संस्काराः समानदेशाः स्युरिति तदयुक्तत्वाभिधानमयुक्तं **वार्त्तिक**कृतः। अतोऽवधारयन्नाह— **अवस्थितशरीरस्यैवेति**।

अपरिहार्य इति। प्रथमैकदेशिना।

शङ्केति। आचार्यदेशीयकृता।

उने॥ तदवतारे इति। आत्मलक्षण इच्छादीनामवतारे।

दोषत्वेनेति। दोषापात इतिकृत्वेच्छादीनां व्युत्पादनार्थमुत्तरो ग्रन्थ इति चेदित्यर्थः।

उपपत्तिसिद्धतां भावयति—**ज्ञानेच्छेति**।

कर्तृभेदे व्यावृत्तिदर्शनादिति। न हि देवदत्तज्ञाने यज्ञदत्तस्येच्छादयो दृष्टाः कदाचित्।

तदेव प्रकरणमिति। बुद्धेरात्मगुणत्वप्रकरणमेव।

इदमिति। बुद्धेरिच्छादिसामानाधिकरण्यपरीक्षणम्।

तथापीति। अस्तूक्तयुक्त्या बुद्धेरिच्छादिसामानाधिकरण्यविचार आरभ्यः(?)-परम्।

कौटस्थ्यविरोधेनेति। **सांख्या**नां हि धर्मपरिणामविशेषोऽतो ज्ञानस्य धर्मस्य परिणामत्वात् पुरुषस्य परिणामित्वे कूटस्थनित्यताया विरोधः।

तथात्वे वेति। ज्ञानस्यापि कौटस्थ्ये।

वृत्त्यभिमानं वेति। पुरुषस्य।

टीयाम्॥ प्रतिवृत्त्येति। प्रति कोऽर्थो वृत्त्या ज्ञानलक्षणया अञ्चति प्रत्यक् ज्ञातेत्यर्थः।

करणे चेति। प्रत्यक्षीकरणे।

भाष्ये॥ ननु ज्ञातृसामानाधिकरण्ये नोपलब्धव्ये निर्णीयतां स्वस्मिन्नात्माश्रिता एवेच्छा-दयः। परत्र तु कथमात्माश्रिता एवेति ज्ञेयमत आह—**परत्रानुमानमिति**।

टीयाम् ॥ **भूतचैतनिक** इति । यो भूतानां चेतनेत्याह स भूतचैतनिकः ।

भाष्ये ॥ **प्राप्तं तर्हीति** । आदौ यदीति शेषः ।

व्यभिचरत इति । इच्छादिभिर्योगम् ।

नियमानियमौ तु तद्विशेषकाविति सूत्रं[1] व्याचष्टे—**तयोरिच्छेति** ।

उने ॥ **विवक्षाभेदेनेति** । यदेच्छाज्ञानानाधारत्वं साध्यत्वेन विवक्ष्यते तदा स्पन्दाधारत्वं हेतुः, यदा तु द्वेषज्ञानाधारत्वं तदा अस्पन्दाधारत्वं हेतुरिति भावः ।

भाष्यवार्त्तिकयोर्विरोधमिति । यत्रैवासार्वत्रिकेऽनियमशब्दः प्रयुक्तो **भाष्ये**, तत्रैव नियमशब्दं **वार्त्तिककृ**दाहेत्यनयोर्विरोधः ।

टीयाम् ॥ **प्रयोज्य एवेत्यवधारणं विवक्षित्वेति** । यानि भूतानि तेष्वेव प्रवृत्तिनिवृत्ती भवत इत्यवधारणं विवक्षित्वा ।

प्रादेशिके इति । असार्वत्रिके ।

उने ॥ ननु मदशक्तिः पृथिव्यादिधर्मः । न चैषा सार्वत्रिकीति । एवं चैतन्यं पृथिव्यादिधर्मोऽपि न सार्वत्रिकं भविष्यतीति भावः ।

टीयाम् ॥ **किण्वादय** इति पिष्टकादयः ।

उने ॥ गुणेषु नियमाभिधाने प्रस्तुते ये ये पृथिव्यादिधर्मास्ते यावत् पृथिव्यादिभाविन इत्यत्र हि ये ये पृथिव्यादिगुणास्ते यावत् पृथिव्यादिभाविन इति गुणेषु व्याप्त्यभिधानं प्रस्तुतं ततः शक्त्याप्यभिचारोऽसङ्गत एवेत्यर्थः ।

[769a] **वाके** ॥ क्वचित्प्रतौ पाठो **बहुत्वे व्यवस्थानुमानं भवेत्** । **व्यवस्थां तु न पश्याम** इति । अस्यार्थो यद्येकशरीरे चेतनबहुत्वं स्यात् तदैतत् साधिका येनानुभूतं तेनैव प्रतिसन्धीयते नान्येनेति प्रतिसन्धाननैयत्यलक्षणा व्यवस्थानुमानं भवेत् न त्वेतां व्यवस्थां पश्याम इति ।

---

1 III. ii. 37

अयं चार्थः स्फुट एवेति **टीकाकृतो**क्तम्—**स सुगम इति**।

सुगमत्वमेव भावयति **उदयनः—प्रत्ययव्यवस्थैवेति**। एकस्मिन् शरीरे चेतननानात्वे न तावत् प्रत्यक्षं प्रमाणं चेतनामात्रग्राहित्वात् तस्य। तस्मादनुमानं वाच्यम्। तच्चेत् प्रत्ययव्यवस्थैव नान्यत् तदा नैकस्मिन् शरीरे भेदश्चेतनानां प्रत्ययव्यवस्थाया हेतोरसिद्धेः।

असिद्धिमेव भावयति—**यदि हीति**।

टीयाम्॥ **हिताहितप्राप्तिपरिहारहेतुरिति**। एतच्च व्याख्यानं निवृत्तिसंग्रहार्थम्। तेन प्रवृत्तिनिवृत्ती न स्वाश्रये इत्यादिना प्राक्तनेन न विरोधः।

व्याचष्टे इति। **भाष्यकारः**।

भावप्रत्ययेनेति। हेतुशब्देन गृहीतस्वेच्छादि**सूत्र**स्य इच्छादिलिङ्गवचनरूपस्य हेतुभावो हेत्वर्थविषयपरीक्षायामेव स्यादिति भावप्रत्ययेन सोपलक्षिता आत्मपरीक्षायामात्मसाधनाय ये हेतव उक्तास्ते उपलक्षिता इत्यर्थः।

उने॥ **एतदेवेति**। भावप्रत्ययेनात्मपरीक्षोक्तहेतूपलक्षणमेव।

वार्त्तिके इति। आत्मपरीक्षोक्तहेतूनां यथोक्तहेतुत्वप्रतिपादनपरे।

किमित्युपेक्षितमिति। यथोक्तहेतुत्वेन किमिति नोक्तमित्यर्थः।

भाष्ये॥ पारतन्त्र्यादिति [1]**सूत्रा**वयवं व्याचष्टे—**पारतन्त्र्यादिति**।

उने॥ **साध्यस्येति**। परतन्त्राणीत्यस्य।

टीयाम्॥ भूतचैतनिकेन स्वातन्त्र्याभ्युपगमान्नायमनिष्टप्रसङ्गस्तस्य भवति। चैतन्ये पुनः स्वतन्त्राणि स्युरित्यत आह—**तथा चेति**। **तस्येति**। सुकृतस्य।

उने॥ **भूतचैतनिकस्येति**। नास्तिकस्य।

टीयाम्॥ **स्वकृताभ्यागमाच्चेति**। [2]**सूत्रा**वयवोऽयम्।

1 III ii. 38 2 III. ii. 38

शास्त्रफलमिति । उपदेशफलम् ।

कर्त्रभिप्रायेति । कर्तारमभिप्रैति कर्त्रभिप्रायं यत् क्रियाफलं तदवगमात् ।

तत्रैवेति । कर्त्रभिप्रायक्रियाफल एव ।

त एवेति । शरीरादय एव ।

भाष्ये ॥ परिशेषाद् यथोक्तोपपत्तेश्चात्मन इति [1]**सूत्रम्** ॥

भाष्ये ॥ स्मरणं त्वात्मनो ज्ञस्वाभाव्यादिति [2]**सूत्रम्** ।

उने ॥ **तस्येति** । चिद्रूपत्वस्य ।

अप्रकृताभासशङ्कामिति । अप्रकृतमिव प्रणिधानेत्यादि [3]**सूत्र**मिति शङ्का ।

समस्तैकपदं चैतदिति । स्मृतिहेतूनामयौगपद्यादित्येष यः सिंहावलोकितन्यायस्तेनेत्येवम् ।

टीयाम् ॥ **सूत्रमवतारयतीति** । **वार्त्तिककारः** ।

सुस्मूर्षितलिङ्गानुचिन्तनं वेति । सुस्मूर्षितेऽनुचिन्तनम् , सुस्मूर्षिते लिङ्गेवानुचिन्तनमिति प्रत्येकमभिसंबन्धोऽत आह— **साक्षाद् वेति** ।

तत्रेति । सुस्मूर्षितेषु ।

जैगीषव्येति । जिगीषोरपत्यं **जैगीषव्यो योगशास्त्र**कृन्नामेदम् ।

बीजरूपेति । बीजमन्त्राक्षररूपाणि यानि संस्थानास्त्रभरणानि तद्भूतम् ।

पट्वादरप्रत्ययावपीति । दाक्षिणात्योष्ट्रदर्शनदेवहृदीयसौवर्णराजतपद्मदर्शनात्मकौ ।

[769b] **उने** ॥ **तर्हि स एवास्त्विति** । संस्कारेणैव स्मृतिर्जन्यत इति हेतोरभ्यासेन यदि संस्कारो लक्ष्यते, तदा सर्वापि स्मृतिः संस्कारमन्तरेण न भवतीति सर्वत्र संस्कार एव हेतुः । ततः स एव वाच्यः, किं प्रणिधानादिभिरिति शङ्कार्थः ।

---

1 III. ii. 39   2 III. ii. 40   3 III. ii. 41

टीयाम् ॥ अत्र च स्मृतीति । अभ्यासपट्वादरप्रत्ययजन्यः संस्कारः स्वोद्बोधकानि प्रणिधानादीन्यन्तरेण न शक्तः स्मृतिं जनयितुमिति तान्युक्तानीति भावः ।

निबन्धादिभिस्त्विति । प्रणिधानादयस्तु निबन्धादीन्यन्तरेणापि स्मृतिं जनयन्तीति भावः । प्रणिधानेन लिङ्गस्य स्मृतिहेतोः संग्रहात् पृथगभिधानमयुक्तम् । उक्तं च **भाष्यकृता** लिङ्गानुचिन्तनं वेति । अतः पूरयति—**अयत्नत उपलब्धमिति ।**

उने ॥ एकार्थसमवायीति । एकस्मिन्नर्थे समवाय एकार्थसमवायः । सोऽस्यास्तीति एकार्थसमवायी ।

नन्वविनाभावः स्वाभाविकसंबन्ध एवोच्यते, तत् कथं स्वाभाविकेति विशेषण-मस्येत्यत आह—**अविनाभावेति ।**

ननु साङ्केतिकं तु लक्षणमिति वक्तव्ये किमर्थमुक्तं साङ्केतिकं तु चिह्नमिति, अत आह—**विवक्षितार्थेति ।**

संबन्धादिति । स्वचरितविरुद्धं चेति संबन्धात् स्मृतिरित्यनेन हि वियोगात् संबन्धाभावात् स्मृतिरिति विरुध्यते ।

टीयाम् ॥ ततोऽपीति । शोकादपि ।

सप्तदशावराणामिति । सप्तदशसंख्ययजमानविशेषाणाम् ।

उने ॥ येनातिशय इति । येनातिशय उत्पादित इत्यनन्तरमभीक्ष्णं स्मरतीत्ययं **भाष्य**शेषो **भाष्ये**ऽपेक्षितः । शेषोऽग्रे, यतोऽनेन किञ्चित् प्राप्तं प्राप्तव्यं वा भवति तमभीक्ष्णं स्मरतीत्यग्रेतन**भाष्ये** भविष्यतीति हेतोरुदाहरणं तु **भाष्ये भाष्येण** भविष्यतीत्यतो हेतोर्वक्तव्यमपि तमभीक्ष्णं स्मरतीति शेषमुपेक्ष्योदाहरणमेवाहेत्यर्थः ।

टीयाम् ॥ प्रासर्पक इति । भिक्षाचरः ।

उने ॥ ताभ्यामिति । इच्छाद्वेषाभ्यां सकाशात् ।

। इति बुद्ध्यात्मगुणत्वप्रकरणं संपूर्णम् ॥

॥ बुद्धेरुत्पन्नापवर्गित्वपरीक्षाप्रकरणम् ॥

[३.२.४२–४५]

उने ॥ बुद्धेः पुरुषगुणत्वनिरूपणानन्तरमुत्पन्नापवर्गित्वनिरूपणस्य संगतिं दर्शयति—**ज्ञानयौगपद्येति** ।

विचारित इति । बुद्धेरात्मगुणत्वप्रकरणे ।

तन्निर्वाहायेति । ज्ञानस्येच्छाद्येकाश्रयत्वनिर्वाहाय ।

तदेतत्सर्वमिति । स्मृतीनां क्रमविचारणमात्माश्रितत्वभणनं च ।

तच्चेति । स्मरणम् ।

तदिति । आशुतरविनाशित्वम् ।

अत एवेति । यत एवोक्तनीत्या अस्यार्थस्यात्र विचार[ः]संगतः ।

ननूत्पन्नापवर्गित्वस्यानित्यताविशेषत्वादनित्यताप्रकरणेऽस्यार्थस्य निरूपणं संगतमासीत् । तत् कुतस्तत्र न निरूपणमत आह—**प्रयोजनाभावादिति** ।

तच्चेति । पुरुषगुणत्वं बुद्धेः ।

धर्माधर्मवदिति । धर्माधर्मयोरिव ।

उक्तोऽभिप्राय इति । अप्रकृताभासशङ्कानिवारणरूपः ।

भाष्ये ॥ उत्पन्नापवर्गित्वादित्यादि [1]**सूत्रम्** ।

टीयाम् ॥ **पिठरादिगतै रूपादिभिरिति** । अनाशुतरविनाशिभिः ।

उने ॥ **बुद्धिमात्रमिति** । सर्वापि बुद्धिरविशेषतः ।

टीयाम् ॥ **एका बुद्धिरिति** । एका बुद्धिर्घटबुद्धिरेक[770a]विषया घटविषया न

---

1 N. Bh. III. ii. 42

विषयान्तरविषया न पटादिविषया। एवमन्या अपि बुद्धयः पटादिबुद्धयः स्वविषयमात्रे पटादावेव विषये पर्यवसिताः।

उने॥ श्रोत्रादीनि। आदिपदादनाशुतरविनाशित्वगिन्द्रियादिग्रहः।

तथेति। एकविषयम्।

अपूर्वस्येति। नवीनस्य।

विषयकारणत्वादिति। विषयः कारणं यस्याः तद्भावात्।

उने॥ प्रत्यर्थेतीति। प्रत्यर्थनियमविशेषणेत्यादि, न तु प्रत्यर्थनियतत्वमव्यापकमित्यादिना प्रत्यर्थनियतत्वं सर्वा बुद्धीर्न व्याप्नोतीत्यव्याप्तिराशङ्किता प्रतिक्षणमित्यादि **वार्त्तिक**ग्रन्थावतारणेन च कर्मादिसन्तानविषयाणां सर्वासामपि बुद्धीनां प्रत्यर्थनियतत्वसिद्धिप्रतिपादनपरेण स्वरूपासिद्धिः परिहृता, नाव्याप्तिः। तत् कथमिदमत आह— **अत्र च यद्यपीति।** अव्याप्तिर्हि एकदेशासिद्धिः। स्वरूपासिद्धिश्च सर्वत्रासिद्धिः। ततः प्रत्यर्थनियतत्वस्य सार्वत्रिक्यां सिद्धौ व्युत्पादितायामेकदेशासिद्धिः परिहृतैव भविष्यतीत्येकदेशासिद्धिमाशङ्क्य सार्वत्रिकसिद्धिव्युत्पादनेन सार्वत्रिक्यसिद्धिः परिहृतेति ज्ञेयमिति भावः।

तात्पर्यसिद्धमर्थमाह— **एका बुद्धिरिति।**

तत इति। समूहात्।

वाके॥ कर्मानवस्थायिग्रहणादिति सूत्रमिति। कर्मण उत्क्षेपणादेरनवस्थायिनः प्रतिक्षणं नाशिनो ग्रहणात् तदेकैकनियता बुद्धिरपि क्षणनाशिनी। न हि विषये क्रमिणि बुद्धिरक्रमिका युक्तेत्यर्थः।

टीयाम्॥ कर्मानवस्थायिग्रहणादिति वदन् **सूत्रकारः** प्रत्यक्षं कर्माभ्युपगच्छतीति सति व्यवधाने प्रत्यक्षनिवृत्तेरुत्तरकालं बुद्धिर्नानुवर्तत इति सिध्यति। पूर्वं तु सन्तानेनैव कुम्भादिविषया बुद्धयो वर्तन्ते इति नातः सिध्यतीत्याह— **यद्यपीति।**

हेत्वन्तरादेवेति। जातिमत्त्वे सत्यस्मदादिप्रत्यक्षत्वे च सति व्यापकद्रव्यसमवायादित्यादितः।

उने ॥ तर्हीति । यद्यभ्युच्चयमात्रतयैतत् द्रष्टव्यं न साधनतया तदा ।

एतत्प्रयोगेति । स्थिरगोचरा बुद्धयः क्षणिका बुद्धित्वादिति प्रयोगः ।

अयं टीकाकृतो यत्न इति । यद्यपि शक्यमित्यादिकः ।

निमित्तनाशनाश्यत्वेनापीति । स्पर्शादिबुद्धेस्तावन्तं कालमवस्थाने निमित्तकारणविनाशोऽपि हि कार्यविनाशहेतुर्दृष्ट इत्यनेन यन्निमित्तनाशनाश्यत्वं साधकं दर्शितं तेनापि।

तथेति । निमित्तनाशनाश्याः ।

शङ्कापगमे इति । यद्यपि शक्यं वक्तुमित्यादिनोद्भाविताया: शङ्काया अपगमे ।

तथाभावादिति । आश्रयभावात् ।

नापि साक्षात् कारणमिति । बुद्धिः स्मृतेः ।

तथाभावादिति । साक्षात् कारणत्वात् ।

यदर्थोऽयमिति । संस्कारसाधनार्थः ।

अयमारम्भ इति । स्मृतेरवतिष्ठते इति चेदित्यादिः ।

भाष्ये ॥ हेतूपादानादिति । बुद्धेरनवस्थायित्वे बोद्धव्यस्याव्यक्तग्रहणप्रसङ्गः, व्यक्तं तु द्रव्याणां ग्रहणम् । तस्मादयुक्तमुत्पन्नापवर्गिणी बुद्धिरित्येवं हेतूपादानात् यत् प्रतिषेद्धव्यं तस्याभ्यनुज्ञा ।

तामेव दर्शयति— **उत्पन्नापवर्गिणीति ।**

टीयाम् ॥ अव्यक्तग्रहणस्य चेतीति । अव्यक्तं च ग्रहणं [770b] ज्ञानमेव । तच्च तस्य रूपं कारणभेदप्रतिबद्धं कार्यभेदस्य कारणभेदाधीनत्वादिति भावः ।

भाष्ये ॥ विशेषाग्रहणे चेत्यादि स्ववाक्यमेव व्याचष्टे—**यत्र समानधर्मयुक्तश्चेति ।**

ग्रहणनिमित्ताभावादिति । ग्रहणनिमित्तस्य चक्षुःसन्निकर्षादेरभावात् ।

वाके ॥ ग्रहणहेतुविकल्पादित्यादि **भाष्यम**व्यक्तग्रहणस्य चेत्यादिना व्याख्याय यथाविषयं च ग्रहणमित्यादि **भाष्यं** व्याचष्टे—**तदसंभवाचेति ।**

तदेतद् **वार्त्तिकं** टीकाकारो व्याचष्टे—**धर्मिणमनाश्रित्येति** ।

टीयाम् ॥ अनैकान्तिकत्वाच्चेतीति । आशुतरविनाशित्वं बुद्धीनामव्यक्तत्वं प्रसञ्जयितुमुपन्यस्तम् । तच्च प्रदीपार्चिषां व्यक्तग्रहणे वर्तमानं सव्यभिचारं न व्यक्तत्वमासञ्जयितुमर्हतीति प्रदीपार्चिषां ग्राह्याणामनवस्थानं तद्गतग्रहणानवस्थानत्वसिद्ध्यर्थमुक्तं वेदितव्यमिति ।

वाके ॥ ग्रहणानवस्थानमिति । गृह्यतेऽनेनेति ग्रहणं चक्षुःसन्निकर्षः । तस्यानवस्थानम् ।

॥ इति बुद्धेरुत्पन्नापवर्गित्वप्रकरणं संपूर्णम् ॥

॥ बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ॥

[३.२.४६–५५]

उने ॥ वक्ष्यमाणा हेतवः सुप्रतिपदा भविष्यन्तीति । अयावदूद्रव्यभावित्वं हि शरीरगुणत्वव्यतिरेकसाधनाय वक्ष्यमाणो हेतुर्बुद्धेरुत्पन्नापवर्गित्वे सिद्धे सुखेन प्रतिपद्यते । अन्येषु च हेतुषु वक्ष्यमाणेषु यथासंभवं सुप्रतिपदत्वं भाव्यम् ।

अयमर्थ इति । शरीरगुणत्वव्यतिरेकः ।

टीयाम् ॥ उपक्षेपात् शरीरस्येति । साधारण्यात् शरीरस्य चैतन्यं निराकृतमिति संबन्धः ।

उने ॥ तथापीति । अवान्तरतात्पर्यभेदादस्त्वपौनरुक्त्यं परम् ।

भाष्ये ॥ चेतनाहीनं तु गृह्यत इति । शवावस्थायाम् ।

शङ्कां विभजते—**यथाविधे** इति ।

संस्कार इति । वेगाख्यः ।

समाधानं विभजते—**न तत्रेति ।**

नेति । न वाच्यमेतत् ।

तत्रेति । शरीरद्रव्ये ।

कारणोच्छेदात् । नोदनादेः कारणस्योच्छेदात् ।

उने ॥ अत्रेति । यदि शरीरगुणश्चेतना स्यादित्येवं प्रसञ्जतद्विपर्ययहेतुरूपे यावच्छ-रीरभावित्वात् रूपादीनामित्यत्र [1]**सूत्रे** ।

तदेतदिति । विशेषभणनम् ।

---

1 cf. III. ii. 47

विशेषगुण एवात्रापेक्षित इति। यदि शरीरविशेषगुणश्चेतना स्याद् रूपादिवद्यावच्छरीरभाविनी स्यात्, न तु यावद्द्रव्यभाविनी। तस्मान्न शरीरविशेषगुण इत्येवम्।

संस्कारेणेति। अविशेषगुणेन।

अत एवेति। यत एव संस्कारेण नानेकान्तः।

पाकजेनेति। रूपादिना विशेषगुणेन।

न पाकजगुणान्तरोत्पत्तेरितीति समाधान**सूत्रम्**[1] ॥

ननु शरीरविशेषगुणा रूपादयोऽप्ययावद्द्रव्यभाविनः पाकजानां तेषामन्येषामन्येषा-मुत्पत्तेः, अत एतैरेवानैकान्तिकमयावद्द्रव्यभावित्वमत आह—**तज्जातीयस्येति**। तज्जातीयापि चेतना न यावद्द्रव्यभाविनी शवावस्थायां सर्वथा चेतनाया अभावात्। तज्जातीयास्तु शरीरविशेषगुणा रूपादयो यावद्द्रव्यभाविन एवातो यावद्द्रव्यभावित्वं नानैकान्तिकमिति भावः।

वाके ॥ तत्रापि चेतनावत्प्रसङ्ग इति। यच्चेतनोत्पत्तिनिमित्तस्य कारणम्, तत् किं यावच्छरीरभाव्युत नैमित्तिकम्? यदि यावच्छरीरभावि न कदाचित् चेतनोत्पत्तिनिमित्तस्य कारणेन हीनं शरीरमिति न कदाचिच्चेतनाहीनं शरीरमुपलभ्येत। अथ तदपि [771a] नैमित्तिकं पुनस्तदेवावर्तते इत्यर्थः।

द्रव्यान्तरस्थं चेन्नित्यमिति। द्रव्यान्तरसमवेतं चेत् निमित्तं नित्यं तदा नित्यं चेतना स्यात्। अथानित्यं तदापि शरीरैककारणायाश्चेतनाया यावच्छरीरं प्रसङ्ग उक्तः, तथा अस्यापि अनित्यस्य निमित्तस्य कालान्तरावस्थायिनः क्षणप्रध्वंसिनो वा द्रव्यान्तरैक-कारणत्वेन द्रव्यान्तरं यावत् प्रसङ्गः स्यात्। तथा च द्रव्यान्तरं यावत् चेतना स्यादिति भावः।

उने ॥ अनेनाभिप्रायेण। वक्ष्यमाणेन।

अथापीत्यादीति। अथापि शरीरस्थं वेत्यादि।

अन्यथेति। यदि वक्ष्यमाणाभिप्रायेण **भाष्यं** न व्याख्यायेत तदा।

---

1 III. ii. 48

तत्रेति । आत्मगुणत्वे ।

इहापीति । शरीरगुणत्वेऽपि ।

तस्माद् बाह्येति । यदि बाह्यविशेषगुणजातीया चेतना, तदा शरीरस्यैव गुण इति नियमो न स्यात्, यथा बाह्यविशेषगुणजातीया गन्धादयः शरीरस्यान्यस्यापि लोष्टादेर्विशेषगुणा एवं चेतनापि स्यादित्यर्थः ।

तस्येति । बाह्यविशेषगुणजातीयस्य ।

टीयाम् ॥ **तद्व्यभिचारेति** । पाकजैर्यो व्यभिचारस्तदुद्भावनेन ।

यावच्छरीरभावित्वाप्रतिषेध इति । **आचार्येण** शरीरगुणत्वे चेतनाया रूपादिवद् यावच्छरीरभावित्वं स्यादित्युक्ते घटादिश्यामतोदाहरणबलेन परेण तत्प्रतिषेधः कृतः स नेति **सूत्र**व्याख्याया अर्थः ।

उने ॥ **न चैवमिति** । न च शरीरव्यापिनी ।

गुणस्य मानसेति । यो मानसप्रत्यक्षो गुणः सोऽव्यापी सुखादिवदित्येव चेतनाया अव्यापकत्वानुमानाच्च ।

[1]**सूत्रमिति** । शरीरव्यापित्वादित्येतत् ।

टीयाम् ॥ **शरीरावयवत्वं केशनखादीनां हेतुरसिद्ध** इति । केशनखादिष्वप्रसङ्ग इति [2]**सूत्र**खण्डस्यायं भावार्थ उक्तः ।

उने ॥ **असाधारणश्च हेतुरिति** । चेतनत्वेनाभिमतात् शरीरावयविनो विपक्षादिव केशादेरचेतनादपि व्यावृत्तेः ।

अथ मृतेति । यदि च न करचरणादयश्चेतनाः शरीरावयवत्वात्, मृतकचरणादित्येवमुदाहरेत्, तदा जीवच्छरीरमचेतनं शरीरत्वात्, मृतशरीरवदित्येवं शरीरस्याप्यचैतन्यं सिध्येत् ।

टीयाम् ॥ **इन्द्रियाश्रयत्वं हीति** । ननु यथा रूपाश्रयत्वं घटादेर्न तथेन्द्रिया-

---

1 III ii. 50 2 III. ii. 52

श्रयत्वं शरीरस्य स्वावयवाश्रितत्वादिन्द्रियाणामिति तत्रैव व्युत्पादितम् । तस्माद् वक्तव्योऽत्राभिप्रायः । उच्यते । त्वगधिष्ठानमिन्द्रियं त्वगिन्द्रियम् । त्वचा च शरीरं तदवयवाश्च सर्वे व्याप्ता इति प्रतीतिसिद्धम् । तद्यदि नखादयोऽवयवाः, तेऽपि त्वचा व्याप्ताः स्युर्हस्तादिवत् । न च ते तथा । अपि च यदि केशादिषु शरीरं समवेयात् ततस्तेष्वपि वर्तमानस्य शरीरस्योपभोगसाधनता दृश्येत हस्तादिगतस्येव ।

इन्द्रियाश्रयेणेति । त्वग्वेष्टितेनेत्यर्थः ।

तथेति । इन्द्रियाश्रयः ।

तादृशा इति । इन्द्रियाश्रयाः ।

न शरीरावयवा इति । केशादयो न शरीरावयवाः, त्वचा अवेष्टितत्वात् । ये तु शरीरावयवाः, न ते त्वचा अवेष्टिताः, यथा हस्तादय इति व्यतिरेकी । मच्छरीरं न केशादिषु समवेतम् , अभिहन्यमानेषु तेषु तत्रानुपलभ्यमानदुःखसंवेदनकार्यत्वाद् घटवत् । एवं शरीरान्तराणि स्वशरीरदृष्टान्तेन साधयितव्यानीति ।

भाष्ये ॥ शरीरगुणवैधर्म्यादिति [1]सूत्रम् ।

न रूपादीनामितरेतरवैधर्म्यादिति परसूत्रम्[2] ।

ऐन्द्रियकत्वादित्यादि सिद्धान्तिनः [3]**सूत्रम्** । अस्यार्थो यद्यपि चाक्षुषत्वरासनत्वादिभेदेन विधर्माणो रूपादयः, तथाप्यस्माभिरुक्ते [771b] अप्रत्यक्षत्वबाह्येन्द्रियप्रत्यक्षत्वे द्वौ धर्मौ नातिक्रामन्ति, तथा देहगुणत्वे चेतनापि द्वयोर्धर्मयोरन्यतरं नातिक्रामेदिति ।

टीयाम् ॥ न हि ते शरीरगुणा इति दृष्टमिति । शब्दादिना व्यभिचारात् ।

अशरीरगुणानामिति । शब्दादीनाम् ।

तादृशवैधर्म्यदर्शनादिति । तादृशं चाक्षुषरासनत्वादिसदृशं यत् श्रावणत्वादिरूपं वैधर्म्यं तस्य दर्शनात् ।

शरीरगुणत्वेति । शरीरगुणत्वेन सहान्वयव्यतिरेकयोरभावात् एतद्रूपादीनां चाक्षुषरासनत्वादिवैधर्म्यमात्रं यदनेन यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वमतिवर्तन्ते

1 III. ii. 53 2 III. ii. 54 3 III. ii. 55

तथा रूपादिवैधर्म्येऽपि सति चेतना न शरीरगुणत्वं हास्यतीति शरीरगुणत्वं साध्यते परेण तन्न सिध्यतीत्यर्थः ।

उने ॥ शरीरगुणवैधर्म्यमिति । चेतनायाः ।

टीयाम् ॥ अन्वयव्यतिरेकीति । न शरीरगुणाश्चेतना मानसप्रत्यक्षत्वात् सुखादिवत् । यच्छरीरगुणः, तन्न मानसप्रत्यक्षं रूपादिवदित्येवं शरीरगुणत्वाभावेन सहान्वयव्यतिरेकि ।

संस्कारेणेति । वेगाख्येन ।

॥ इति बुद्धेः शरीरगुणत्वव्यतिरेकप्रकरणं संपूर्णम् ॥

॥ मनःपरीक्षाप्रकरणम् ॥

[३.२.५६–५९]

उने ॥ द्वितीये न स्थैर्येति । क्षणभङ्गभङ्गप्रकरणेन हि स्थैर्ये सिद्धे कार्यकारणयोराधाराधेयतोपपन्ना । तथा च कार्या बुद्धिः फलतस्तात्पर्यतो गुणतया द्वितीयेन परीक्षिता ।

तच्चेति । युगपज्ज्ञानानुत्पत्तिरूपं लक्षणम्[1] ।

एतत्त्रयविपर्यय इति । एकस्मिन् शरीरे मनस एकत्वमाशुसञ्चारित्वमव्यापकत्वं च ।

सांप्रत्ययिकेति । प्रामाणिकः ।

अन्यथा त्विति । यदि त्वेकस्मिन् शरीरे मनोबहुत्वमनाशुसञ्चारित्वं विभुत्वं च स्यात्, तदैकस्मिन् मनसि विषयान्तरात् प्रत्याहृतेऽपि अन्येषां मनसां विषयव्यासङ्गादसंचारित्वे वैभवे च विषयव्यासक्तस्य मनसः प्रत्याहर्तुमशक्यत्वात् न प्रत्याहारधारणादिसिद्धिः स्यात् , तदसिद्धौ च निदिध्यासनासिद्धिर्मत्वा च सततं ध्येय इत्यस्यासिद्धिः । तथा च मन्तव्यश्चोपपत्तिभिरित्यस्यानुपयोगे न्यायविद्याया वैयर्थ्यं स्यात् ।

भाष्ये ॥ ज्ञानायौगपद्यमेतल्लिङ्गमिति । आत्मेन्द्रियार्थसन्निकर्षाः कार्यकारणसापेक्षाः सत्स्वन्येषु कार्यानुत्पादकत्वात् ये कारणान्तरेषु सत्सु कार्यं नोत्पादयन्ति, ते किञ्चिदपेक्षन्ते यथा तन्तवः संयोगभेदानिति मनः सिद्धिः ।

एकं मन इतीति । प्रतिशरीरमेकं मनो नियमेनायुगपत्क्रियाहेतुत्वे सति करणत्वाच्चक्षुर्वदिति मनस एकत्वसिद्धिः ।

वाके ॥ भाष्यमिति । सूत्रग्रहणकरूपम् ।

भाष्ये ॥ अथापि दृष्टश्रुतेति । विप्रतिपत्तिविषया बुद्धयः पर्यायेण भवन्ति बुद्धित्वात्, दृष्टश्रुतार्थबुद्धिवत् , वर्णपदवाक्यबुद्धिवत् , तदर्थबुद्धिवद् वा ।

॥ इति मनःपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 I. i. 16

॥ अदृष्टनिष्पाद्यत्वप्रकरणम् ॥

[३.२.६०–७२]

उने ॥ तदन्तरेणापीति । शरीराद्यन्तरेणापि ज्ञानसुखदुःखवेदनादिरूपवृत्तेर्लाभात् ।

जन्मवैचित्र्यं चेति । उच्चाभिजननीचाभिजननीरोगसरोगतादि ।

तदिति । जन्मवैचित्र्यम् ।

भाष्ये ॥ विप्रतिपत्तेः संशय इति **सूत्र**मपेक्षणीयेन पूरयित्वा गृह्णाति ।

विषयेति । विषयो निमित्तम् ।

श्रूयते खल्वत्र विप्रतिपत्तेरिति । कश्चिदाह- कर्मवशाच्छरीरसर्ग इति । अन्यस्त्वाह–कर्मानपेक्षाद् भूतमात्रादिति ।

उने ॥ सर्वाण्यतीतानि प्रकरणानीति । आत्मपरीक्षादीनि ।

कर्मान्तरानपेक्षस्यैवेति । न ह्यग्निहोत्रादिजन्मनोऽदृष्टस्यादृष्टान्तरापेक्षस्य तत्तत्स्वर्गादिफलसंबन्ध **आगमे** श्रूयते ।

टीयाम् ॥ तच्चैवेत्यादि । [772a] परवाक्यमेव व्याचष्टे ।

दृष्टं सेवादीति ।

विषयिणेति । शब्देनागमेन ।

तद्विषयमिति । आगमस्य विषयम् । अदृष्टं ह्यागमैकगम्यम् ।

ननु सहकुर्वन्तः सहकारिण उच्यन्ते, तत् कथं प्रतिबन्धापगमे हेतोर्धर्मान्तरस्य सहकारितेत्यत आह—**सहकारिणं चेति ।**

उने ॥ तेषामेवेति । देवतानमस्काराद्यवान्तरकर्मणामेव ।

तत्फलत्वमिति । ग्रामादिफलत्वम् ।

शब्दबलेनेति । आगमबलेन ।

तस्येति । ग्रामेष्ट्यादिजन्मनोऽदृष्टस्य ।

टीयाम् ॥ सत्त्वान्तरकर्मणां वेतीति । सत्त्वान्तरकर्मणां वा सहकारिणामनुत्पत्ते-रित्यादि ।

उने ॥ अन्यथेति । यदि करणमिहयोगीन्द्रियमपि विवक्षितं भवेत्, तदा करणस्य बाह्येति विशेषणे सत्यपि पुरुषगुणविशेषप्रेरितभूतापूर्वकैरपि योगिनां बाह्यकरणग्राह्ये रूपादि-मद्भिः परमाणुभिः पुनरनेकान्तः स्यात् ।

उने ॥ मूर्तत्वादित्यादिनेति । शरीरं कर्मनिरपेक्षभूतपूर्वकं मूर्तत्वात् सिकतादिव-दित्यादिना ।

तद्विपक्षाभावनिश्चयादिति । तस्य पुरुषार्थक्रियासमर्थत्वस्य हेतोर्विपक्षे कर्मानपेक्षभूतपूर्वको योऽभावस्तन्निश्चयात् ।

तदेवेति । कार्यत्वमेव ।

अनेनेति । पुरुषार्थक्रियासमर्थत्वेन ।

एतदिति । नियतपुरुषगुणविशेषप्रेरितभूतपूर्वकत्वम् ।

तस्येति । कार्यत्वमात्रस्य तत्र नियतपुरुषगुणविशेषप्रेरितभूतपूर्वकत्वेऽनैकान्तिक-त्वात् । देवदत्तगुणविशेषप्रेरितभूतपूर्वकघटादेरन्यदपि हि कार्यमुच्यते एव ।

अत एवेति । यत एव नियतपुरुषगुणविशेषप्रेरितभूतपूर्वकत्वं शरीरस्य साध्यम्, अत एव यदि परः शरीरस्येश्वरज्ञानेच्छाप्रयत्नपूर्वकत्वाभ्युपगमात् पुरुषगुणविशेषप्रेरितभूत-पूर्वकत्वस्य [1]सिद्धस्य साधनमिति ब्रूयात् तन्न ।

उने ॥ दृश्यस्य चेति । तथाभूतं सिकतादिकारणेभ्यो विलक्षणं दृश्यं दर्शनयोग्यं शरीरस्य यदि कारणं भवेत् तदोपलभ्येत, न चोपलभ्यते । तस्मादनुपलम्भबाधितत्वान्न तदस्ति अदृश्यमपि शरीरस्य कारणं यदन्यसमवेतं परमाण्वादिसमवेतं तदा सर्वात्मसंबन्धा-विशेषात् परमाण्वादेरदृश्यकारणस्य सर्वात्मसाधारण्यं स्यात् । तथा च नियतपुरुषसमवेत-

---

1 J सिद्धत्वस्य

निमित्तमन्तरेणोत्पत्तौ शरीरस्य प्रतिपुरुषं नियमाभावे सर्वस्य सर्वाणि शरीराणि स्युः। तस्माददृश्यमपि नान्यसमवेतम्। एवं सतीति भावार्थः।

कर्मण्यपीति। अदृष्टरूपे कर्मकारकेऽपि।

तत्फलस्येति। कर्मफलस्य।

उने॥ दृष्टं कारणमिति। मातापितरौ।

न तु कार्यमेवेति। शरीरं मातापितरौ विना नोत्पद्यते इत्यर्थः।

शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्मेति [1]**सूत्रम्**। यथास्य विचित्रस्य शरीरस्योत्पत्तौ कर्मनिमित्तं नियामकत्वात् तथा कस्यचिदेवात्मनः केनचिदेव शरीरेण भोग्यभोक्तृरूपतया यः संयोगविशेषः, तस्यापि निमित्तं कर्माभ्युपेयं नियामकम्। अन्यथा सर्वेषामेवात्मनां सर्वगतत्वात् संबन्धाभेदे सर्वशरीराणि सर्वेषां स्युरिति **सूत्र**संक्षेपार्थः।

विस्तरतः सूत्रार्थमाह **भाष्यकारः—यथा खल्विति**।

एवमिति। एवं तदेव शरीरोत्पत्तिनिमित्तं कर्म व्यवस्था[772b]हेतुरिति विज्ञायते इति संबन्धः।

ननु सर्वात्मनां साधारणैः पृथिव्यादिभिरुत्पाद्यतां शरीरं परं पृथिव्याद्याश्रितमसाधारणं निमित्तं भविष्यति यत उपपत्स्यते व्यवस्था, अत आह—**पृथिव्यादिगतस्य चेति**।

सूत्रस्थसंयोगपदस्यार्थमाह—**प्रत्यात्मव्यवस्थानं त्विति**।

उने॥ तस्येति। नास्तिकस्य मते।

व्यवस्थापितत्वादिति। शरीरव्यवस्थायाः कृतत्वात्।

टीयाम्॥ निमित्तमिति। धर्माधर्मौ।

वरणभेदस्त्विति। प्रतिबन्धापगमः।

तत इति। निमित्तात्।

एतेन कर्मसापेक्षाणामिति। कर्मसापेक्षेभ्यो भूतेभ्यः शरीरसर्ग इति

---

1 III. ii. 66.

वादिनां कस्यचिदात्मनः किञ्चिच्छरीरमित्यनियमो घटते इत्यभिधानेन कर्मनिरपेक्षेभ्यो भूतेभ्यः शरीरसर्ग इति वादिनामनियमो न घटते इत्येवं व्यतिरेकमुखेनानियमो निरस्त इति भावः ।

उने ॥ **कथमुक्तमिति** । कथं तर्ह्युक्तम् ।

भाष्ये ॥ **तददृष्टकारितमिति चेदिति** शङ्कासूत्रम्[1] ।
पुनस्तत्प्रसङ्गोऽपवर्गे इति परिहारसूत्रम्[2] ॥

टीयाम् ॥ **प्रागिति** । प्रकृतिप्रवृत्तेः ।

उने ॥ **संसारदशायामपीति** । [3]अपिर्गर्ह्यर्था ।

टीयाम् ॥ **अपि तु गुणेति** । गुणः प्रकृतिः ।

न भवतीत्यारभन्ते इति । न भवतीति हेतोरचरितार्थानि भूतानि आरभन्ते ।

तदिति । पुरुषप्रधाननानात्वदर्शनम् ।

अन्यत्त्विति । विषयदर्शनम् ।

तन्मूलमिति । दिदृक्षापूर्वकं हि दर्शनमिति दर्शनस्य मूलं दिदृक्षा ।

वाके ॥ **अपवृक्ते प्रधाने** इति । अपवृक्ते आत्मनि सति दृष्टत्वात् नानात्वस्य प्रधाने दिदृक्षा न भवतीत्यर्थः ।

उने ॥ **सति दिदृक्षा न चैवमिति** । न च दिदृक्षा प्रवृत्तिकारणम् ।

टीयाम् ॥ **द्वयोरप्यभावादिति** । दिदृक्षाया बुद्धेश्चाभावात् प्रकृतिमात्रस्यैव भावात् ।

श्लिष्टमिति । संमुग्धम् ।

तदर्थमिति । नानात्वदर्शनार्थम् ।

---

1 III. ii. 68 2 III. ii. 68 3 J अपिर्हेरार्था

उने ॥ ननु संसाराभावे इति। यदा हि प्रधाने दिदृक्षावन्नानात्वदर्शनमप्यस्तीत्युच्यते तदा संसाराभावप्रसङ्गो वक्तुमुचितः। नानात्वदर्शने प्रकृतेरप्रवृत्त्या संसारस्याभावात् कथं **वार्त्तिके** अपवर्गाभाव प्रसङ्गादित्यर्थः।

टीयाम् ॥ तत्प्रध्वंसश्चेति। संसारप्रध्वंसरूपः।

एतदेवेति। श्लिष्टं विभक्तमेव।

उने ॥ अव्यक्तात्मनेति। प्रकृत्यात्मना।

तदवस्थानस्य। दिदृक्षावस्थानस्य।

तदापीति। अपवर्गकालेऽपि।

टीयाम् ॥ निदानेति। निदानं दिदृक्षानिदानी संसारः।

वाके ॥ न सदिति। यत् सत् तत् नात्मानं जहाति।

तादर्थ्यमिति। तत्त्वज्ञानार्थता।

व्याहतं भवतीति। असतो विशेषस्योपजनाभ्युपगमेन सत्कार्यवादो व्याहन्यते।

भाष्ये ॥ तददृष्टकारितमिति चेदिति शङ्का**सूत्रम्**[1]।

तन्मन इति। तच्छरीरं कर्म, मनः कर्तृ।

पुनस्तत्प्रसङ्गोऽपवर्गे इति परिहार**सूत्रम्**[2]।

भाष्ये ॥ मनःकर्मेत्यादि **सूत्रम्**[3]।

भाष्ये ॥ नित्यत्वप्रसङ्गश्चेत्यादि **सूत्रम्**[4]।

टीयाम् ॥ नन्वेवं प्रायणानुपपत्तेः प्रायणानुपपत्तिरित्युक्तं स्यादत आह—**विनाशेति।** प्रायणानुपपत्तेर्मनःसंयोगाभावानुपपत्तेः शरीरस्य नित्यत्वप्रसङ्गो विनाशानुपपत्तिप्रसङ्ग इत्यर्थः।

---

1 III. ii. 68 2 III. ii. 68 3 III. ii. 69 4 III. ii. 70

उने ॥ **नित्यत्वेनेति** । परमाणुगुणस्याऽदृष्टस्य शरीरहेतोर्नित्यत्वेनोच्छेदानुपपत्तेः ।

भाष्ये ॥ **पुनस्तत्प्रसङ्गोऽपवर्गे इत्येतदिति** । **आचार्यो**क्तं समाधित्सुराह **परः** ।

टीयाम् ॥ [773a] **अकारणत्वादित्यस्य हेतोरिति** । **आचार्यो**क्तस्य ।

भाष्ये ॥ **नाकृताभ्यागमप्रसङ्गादिति**[1] । अकृतं प्रमाणतोऽनुपपन्नं तस्याभ्यागमापत्तेः । न हि नित्यं वस्तु विनश्यतीति प्रमाणमस्ति, पार्थिवपरमाणुश्यामता अनित्या पृथिवीरूपत्वात् लोहितपृथिवीरूपवदिति प्रत्युत विपर्यये प्रमाणमस्तीति **सूत्रार्थः** ।

तमिमं **टीकाकृदाह**— **प्रमाणेनेति** ।

ननूक्तमणुश्यामतावत् नित्यमपि परमाणुगतमदृष्टं सम्यग्ज्ञानात् विनङ्क्ष्यत आह— **न चेति** ।

परमाणुगुण एवेति । अदृष्टम् ।

भाष्ये ॥ **अनुमानमिति** । व्यवस्थितगुणान्तरनिबद्धं निःप्रयत्नस्य चेतनस्य सुखादिव्यवस्थानत्वात् सप्रयत्नस्य सुखादिव्यवस्थानवत् ।

ननु सुखादिव्यवस्थानं बुद्ध्यादिव्यवस्थितगुणान्तरकृतं भविष्यति, तत् कुतोऽदृष्टानुमानमत आह—**तच्च गुणान्तरमिति** ।

बुद्ध्यादयस्तु संवेद्याश्चापवर्गिणश्चेति । अतो न बुद्ध्यादिगुणान्तरस्याऽदृष्टस्य फलमेतदिति भावः ।

अनुष्ठानपरिवर्जनाश्रयमिति । अनुष्ठानाश्रयं परिवर्जनाश्रयं च ।

तच्चोभयमिति । उपदेशस्तत्फलं च प्रवृत्तिरेतस्यां दृष्टौ दर्शने विरुध्यते इति संबन्धः ।

---

1 III. ii. 72

श्रीलक्ष्मीतिलकः स कस्य न मुदे न्यायद्वितीयाग्रिमा-
ध्यायक्षेत्रवरे विचारनिकरै[ः]केदारवारैश्चिते ।
यद्व्याख्यानसरस्वतीं प्रसृमरामद्योष्मकेऽपि क्षिपन्
धीदुःस्थोऽप्युदजीवयं पृथुमहं गूढार्थबीजव्रजम् ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थान-न्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां तृतीयोऽध्यायः संपूर्णः ॥

॥ चतुर्थाध्याये प्रथमाह्निकम् ॥

॥ प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥

[४.१.१–२]

उने ॥ **यानासनेति** । अन्यो हि नृपतिः सन्धिरेकत्वं विरुद्धं ग्रहणम् । स्वस्थानात् परमण्डले दाहलोपादिविग्रहः । यानं यातव्यं प्रति यात्रा । आसनं विग्रहादिनिवृत्तिः । **द्विधैव** द्वेधा एकेन सन्धायान्यत्र यात्रा । यद्वा बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः । अशक्त्या बलवदाश्रयणमाश्रयः संश्रयाख्यः । इत्येतैः षड्भिर्गुणैर्युक्तः स्यात् । परमात्मनस्तु व्यापकत्वात् न कुत्रापि गमनम्, नापि कुत्रापि आसनम् । नित्यमुक्तत्वात् न केनापि सह सन्धिः । नापि विग्रहो विरोधो न शरीरं वा । परिपूर्णप्रयोजनत्वात् न कस्याप्याश्रयणम् । एकत्वाच्च न द्वित्वमित्यसौ षड्गुणविनिर्मुक्तोऽथ तु नृपतिः परमात्मा हि परमपुरुषत्वेन नृपतिः ।

तदेवेति । कार्यरूपप्रमेयषट्कपरीक्षणमेव ।

सर्वप्रमेयाणामिति । द्वादशानामपि प्रमेयाणाम् ।

प्रवृत्तिदोषसूत्राभ्यामिति । [1]प्रवृत्तिर्यथोक्ता: [2]तथा दोषाः इत्येताभ्याम् ।

प्रसङ्गसिद्धेति । प्रसङ्गेन सिद्धायाः परीक्षाया अनुत्कीर्तनमुपाधिर्यस्य तत् तथा ।

अवशिष्टसंगतिरिति । अवशिष्टरूपा संगतिः । उद्देशलक्षणक्रमानुसरण-मात्ररूपा संगतिरित्यर्थः ।

सा का ? अत आह—**मनसोऽनन्तरेत्तीति** ।

मनसोऽनन्तरा प्रवृत्तिरवसरप्राप्ता परीक्षितव्या इत्यत आह—**साशङ्केति** । प्रवृत्तिर्यथोक्तेत्यनेन **वार्त्तिके**नाशङ्कापूर्वकं यत्सूत्रग्रहणं तस्य तात्पर्यम् ।

टीयाम् ॥ **अस्य शेष** इति । प्रवृत्तिर्यथोक्तेत्यस्य **सूत्रस्य** शेषः ।

---

1 IV. i. 1 2 IV. i. 2

उत्तरं यावद्धर्माधर्माश्रयमितीति । धर्माधर्माख्यायाः कार्यरूपायाः प्रवृत्तेः परीक्षया कारणरूपापि [1]प्रवृत्तिर्वाग्बुद्धिशरीरारम्भाख्या परीक्षितेति भावः ।

वाके ॥ विंशतिधा भेद [773b] इति । शरीरेण वाचा मनसा च सेयं प्रवृत्तिः प्रत्येकं दशधा पुण्या पापा च । पुण्या कायेन परित्राणं दानं परिचरणमिति । वाचा सत्यं प्रियं हितं स्वाध्याय इति । मनसा दया अस्पृहा श्रद्धा चेति । विपर्ययेण दशविधेत्येवं प्रवृत्तिलक्षणे उक्तः ।

उने ॥ क्वचिदेकत्वं वर्तत इति **टीका**पाठं पश्यन्नाह—एकस्मिन् नित्यात्मन्येवेति शेष इति ।

टीयाम् ॥ न तु बुद्ध्यादिवदाशुतरविनाशिनीति । एतेनावस्थितत्वं न नित्यत्वमित्युक्तम् ।

उने ॥ तावन्मात्रव्यवच्छेदे इति । आशुतरविनाशित्वमात्रव्यवच्छेदे ।

अतीन्द्रियत्वं सूचितमिति । अवस्थितेत्यनेनाशुतरविनाशित्वमात्रे व्यवच्छिन्ने अप्रत्यक्षत्वनिश्चयोऽपि कार्यरूपायाः प्रवृत्तेः स्यादित्यर्थः ।

नन्ववस्थितत्वनिषेधं विना किमप्रत्यक्षत्वनिश्चयो न स्यात् यदयमनवस्थितत्वनिषेधस्य फलतयोच्यते, अत आह—**अन्यथेति** । अनवस्थितत्वव्यवच्छेदं विना ।

प्रत्यक्षत्वमिति । बुद्ध्यादेरिव ।

प्रवृत्तिःप्रध्वंसस्येति । यस्मिन् शरीरेऽपवर्गः स्यात् तदपवर्गशरीरम् । तदन्तर्भूतो हि प्रवृत्तेरभावः तच्छरीरसंबन्धिप्रवृत्तिरूप इत्यर्थः ।

हीनक्लेशस्येति । हीनक्लेशस्य हि या प्रवृत्तिः सा न प्रवृत्त्यन्तरप्रतिसन्धानाय हीनक्लेशत्वादेव । अतः स्वकार्यकरणेनाकिञ्चित्करत्वात् प्रवृत्तिः सत्यप्यसती विवक्षितेत्यर्थः ।

अन्यथेति । यदि हीनक्लेशस्य प्रवृत्तिः स्यात् तदा ।

उने ॥ उक्तमिति । परीक्षितमित्यर्थः ।

---

1 Cf. I. i. 17

अतिदिष्टमुक्तमिति । वार्त्तिककृता ।

एतदिति । बुद्धिसमानाश्रयत्वादात्मगुणत्वम् ।

तस्या इति । कारणरूपप्रवृत्तेः ।

दानं परिचरणमिति । दानं परिचरणमित्यादिका कारणरूपापि प्रवृत्तिर्यद्यप्यात्माश्रिता, तथापि शरीराश्रितत्वभ्रान्त्या योऽस्या अनात्मगुणात्वभ्रमः सोऽपि मा भूदित्येतदर्थं कार्यरूपेत्याद्युक्तम् ।

तस्येति । प्रत्यक्षानुवादस्य ।

अत्रेति । बुद्धिसमानाश्रयत्वादात्मगुणा इत्यत्र ।

गुणत्वे न तु विशेषणे इति । गुणत्वे सति बुद्धिसमानाश्रयत्वादित्येवम् ।

कण्ठतोऽपीति । मुख्यतोऽपि परमन्यप्रसङ्गेन ।

उत्तरप्रयोगाद्भेदयितुमाह—**इन्द्रियान्तरं मन इतीति ।** अस्मिन् व्याख्याने हि अचाक्षुषप्रत्यक्षत्वादित्युत्तरप्रयोगादिन्द्रियान्तरप्रत्यक्षत्वादिति प्रयोगस्य भेदः सिद्धः । अन्यथा चक्षुरिन्द्रियादन्यदिन्द्रियान्तरमिति व्याख्याने भेदो न भवेत् ।

तैरेवेति । मानसप्रत्यक्षैरात्मसुखत्वादिभिरेव ।

अनयोरिति । प्रयोगयोः ।

अगुणत्वे हीति । अगुणा हि सन्तो दोषाः सामान्यविशेषसमवाया वा स्युर्द्रव्याणि वा कर्माणि वा । तद्यदि सामान्यादयः, तदेषां कार्यत्वं व्याहन्येत । अथ द्रव्याणि वा कर्माणि वा तदा द्रव्यकर्मणी मूर्त एव समवेते दृष्टे इत्येषामपि मूर्तसमवायप्रसङ्गः । तथा च मानसत्वं न स्यादित्यर्थः ॥

॥ इति प्रसङ्गसिद्धपरीक्षानुकीर्तनप्रकरणं संपूर्णम् ॥

॥ दोषत्रैराश्यप्रकरणम् ॥

[४.१.३–९]

उने ॥ अत्र चेति । प्रकरणे ।

विषय इति । विचारविषयः ।

काष्ठेति । परस्य ।

एतदिति । दोषविभागपरीक्षणम् ।

इह नगेति । केकायिताश्रयस्यानिश्चये यथेह नगनिकुञ्जे मयूरः केकायितादिति सन्दिग्धाश्रयम् ।

तत्रेति । दोषलक्षणसूत्रे ।

यस्यानागतस्यावेक्षणं तदेव दर्शयति—[1]**तदत्राह रागेति ।**

असाधारणकार्येति । अन्यदपि यदसाधारणं कार्यं क्रोधस्य, तदुपलक्षणपरम् ।

नन्वीर्ष्या द्वेषभेदः, तत् कथं [774a] **वार्त्तिकं** साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा ईर्ष्येति अत आह—**पराभिनिवेशेति ।** यथेच्छा प्रयत्नस्य हेतुः, तथा द्वेषोऽपि । इत्येतावता साम्येन द्वेषोऽपीच्छेत्युक्तम् ।

प्रमादो हि मिथ्याप्रत्ययरूपस्य मोहस्य भेदोऽतोऽस्य कर्तव्याकरणमिति कर्तव्यानुष्ठाननिषेधमात्रं लक्षणं न घटते । अत आह— **कर्तव्याकरणमिति ।**

संशयमानौ कथं मोहभेदाविति । मिथ्याप्रतिपत्तिलक्षणो मोह इत्यभ्युपगमे एवं **पण्डितमानिन इति चेति ।** किञ्चित् पाण्डित्ये सति बहुतरपाण्डित्यारोपिणः ।

प्रथमे इति । अध्याये ।

भाष्ये ॥ नैकप्रत्यनीकभावादिति । परसूत्रम्[2] ।

व्यभिचारादहेतुरिति । सिद्धान्तिसूत्रम्[3] ॥

---

1 J यदत्राह 2 IV. i. 4 3 IV. i. 5

वाके ॥ एकयोनित्वादिति । रागादीनां मोह एको योनिर्मोहस्यापि मोहयोनिकत्वात् ।

अनेनैवेति । एकप्रयत्नीकत्वस्य व्यभिचारोद्भावनेनैव ।

एकयोनय इति । एकोऽग्निसंयोगो योनिर्येषां ते तथा ।

उने ॥ न च रूपादिषु तदस्तीति । रूपे हि जन्येऽग्निसंयोगः प्राच्यरूपप्रध्वंसापेक्षः कारणं रसादौ च प्राच्यरसादिप्रध्वंसापेक्षा अतो नान्यूनातिरिक्तहेतुत्वं रूपादिषु ।

सुखानुशयीति । सुखानुसन्धानहेतुक इत्यर्थः ।

अन्यदेवेति । दोषाणां त्रैराश्यमेव ।

अन्यथासिद्ध्युद्भावनपरादपीति । एकप्रत्यनीकत्वस्य हेतोः । अन्यथासिद्ध्युद्भावनं च तत्त्वज्ञानाच्च मोहनिवृत्तावित्यादि **वार्त्तिके** स्पष्टम् ।

[1]**सूत्रादिति ।** तेषां मोहः पापीयान् नामूढस्येतरेतरोत्पत्तेरित्यस्मात् ।

स इति । उच्छेदक्रमः ।

अपेक्षिततमश्चेति । निःश्रेयसार्थेऽस्मिन् शास्त्रे ।

टीयाम् ॥ तन्निदानत्वमिति । रागद्वेषे च कारणत्वम् ।

उने ॥ एतत्सूत्रमिति । तेषां मोहः पापीयान् इत्यादि **सूत्रम्** ।

यः पूर्वपक्षहेतुरिति । निमित्तनैमित्तिकेत्यादि**सूत्रेण**[2] ज्ञापितः ।

भाष्ये ॥ निमित्तनैमित्तिकेति । द्रव्यत्वेन तन्तुपटादीनां गुणत्वेन रूपादीनां तुल्यजातीयत्वेऽपि अस्ति निमित्तनैमित्तिकभाव इत्यनेकान्तो मोहस्य दोषेभ्योऽर्थान्तरत्वे हेतुः परस्येति **सूत्रार्थः** ।

वाके ॥ तुर्यादय इति । तुर्यादयो द्रव्यजातीया द्रव्यस्य पटस्य निमित्तम् । नोदनाभिघातसंयुक्तसंयोगा गुणाः संस्कारस्य वेगाख्यगुणस्य निमित्तम् ।

॥ इति दोषत्रैराश्यप्रकरणं संपूर्णम् ॥

---

1 IV. i. 6 2 IV. i. 7

॥ प्रेत्यभावप्रकरणम् ॥

[४.१.१०–१३]

भाष्ये ॥ उभयमिति । जन्ममरणे ।

अयं सिद्धानुवाद इति । अयमनन्तरोच्यमानसूत्रलक्षणः सिद्धस्य प्रेत्यभावस्यानुवाद इति ।

उने ॥ लक्षणगतेति । पुनरुत्पत्तिः प्रेत्यभाव इत्यत्र [1]लक्षणे गतं यदुत्पत्तिपदं यच्च लक्ष्यपदं प्रेत्यभाव इति तयोः पर्यालोचनया अयमेवार्थ उत्पादोच्छेदरूपः ।

अयं दोष इति । प्रेत्यभावासिद्धिलक्षणः ।

उत्पत्ताविति । न ह्युत्पन्नाया बुद्धेः पौनःपुन्यं संभवति, नष्टाया वा जन्म ।

ननु **बौद्ध**मते यदि सत्त्वस्योत्पादनिरोधौ भवतः, एतावता नष्टस्य यत् जन्म तद्रूपं प्रेत्यभवनं कथं युक्तमित्यभिप्रायवानाह—**ल्ययः प्रयोगमिति ।**

यथापूर्वस्यापीति । यद्यपि व्यादानात् स्वापः पूर्वः, तथापि व्यादानादुत्तरकालं स्वापानुवृत्तिरिति पूर्वस्यापि स्वापस्य यथा व्यत्यय[774b]स्तथा यद्यपि प्रायणात् पूर्वं भवनं तथापि प्रायणादुत्तरकालं भवनानुवृत्तिरिति पूर्वस्यापि भवनस्य व्यत्ययः ।

ननु क्षणिकत्वाभ्युपगमे कथं पूर्वस्य भवनस्य प्रायणोत्तरकालमनुवृत्तिरत आह—**कार्येति ।** एतेन नष्टस्य जन्मानुपपत्तेश्चेति परिहृतम् ।

टीयाम् ॥ तथा च भूत्वेति । तथा च प्रेत्येति पूर्वं प्रयोगमात्रं न त्वर्थस्तथा भवनपूर्वकत्वात् प्रायणस्यातो । भूत्वा प्रैति इत्येककर्तृकत्वोपपत्तिरित्यर्थः ।

उने ॥ उपलक्षणं चैतदिति । बौद्धमते कार्यकारणयोरभेदोपचारेण प्रेत्यभावसमर्थनम् ।

सन्तानमुपादायेति । एतेनोत्पत्तौ पौनःपुन्याभावादिति परिहृतम् ।

---

1 I. i, 19

पुनःशब्दोऽपीति । पुनरुत्पत्तिरित्यत्र ।

सिद्धान्तायेति । उत्तराय ।

एतेनेति । कृतनाशाकृताभ्यागमप्रसङ्गादिभणनेन ।

तत्रेति । देहेन्द्रियबुद्धिवेदनासंबन्धोत्पादविनाशौ जन्मप्रायणे इत्यभ्युपगमे ।

मुख्यार्थ एवेति । न तु **बौद्ध**मत इव भाक्तः ।

विषयसंचारमात्रमिति । आत्मस्थाने संबन्धस्य विषयस्य संचारणम् ।

ननु यदि देहादिसंबन्धविनाशः प्रायणं तत्कथं सत्त्वस्य विनाशः प्रायणमिति दृश्यते, अत आह—**विनाश** इति ।

मुख्यत्वमेवेति । न तु **बौद्ध**मते इवौपचारिकत्वम् ।

ननु भवनपूर्वकत्वात् प्रायणस्य कथमस्मन्मतेऽपि तुल्ययोर्मुख्यत्वमत आह—**भाव** इति । योऽत्रोत्पत्तेरर्थो व्याख्यातः स भावस्य ज्ञेयो न पुनरात्मनः स्वरूपसत्तालाभ इत्यर्थः ।

उने ॥ **अत्रेति** । प्रासङ्गिकविचारे ।

अन्यथा हीति । यदि व्यक्तपूर्वकत्वं प्रसङ्गतो विचार्य न व्यवस्थाप्येत तदा ।

स एवेति । प्रेत्यभाव एव ।

तदेकदेशत्वादिति । प्रेत्यभावप्रकरणैकदेशत्वात् ।

तत्प्रयोजनत्वाच्चेति । प्रेत्यभावसिद्धिप्रयोजनत्वात् ।

भाष्ये ॥ **व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यादिति**[1] । व्यक्ताद् रूपादियुक्तात् परमाणुगुणाद् व्यक्तानां देहादीनां जन्म द्व्यणुकादिक्रमेण । कुतः ? प्रत्यक्षप्रामाण्यात् । प्रत्यक्षपूर्वकत्वात् प्रत्यक्षमत्रानुमानं ज्ञेयम् ।

प्रयोगः । रूपादिमत्सामग्रीपूर्वकं देहादि । रूपादिमत्कार्यत्वाद् घटवदिति **सूत्रार्थः** ।

उने ॥ **ननु सुप्रसिद्धमेतदिति** । ननु रूपादियुक्तेभ्यो भूतसूक्ष्मभ्यो रूपादिमतां शरीरादीनामुत्पाद इति सुप्रसिद्धम् । तत्किमित्युच्यते इति **शङ्कार्थः** ।

1 IV. i. 11

उपकरणं प्राणेति । प्राणस्य मनसश्च यौ शरीरेण संयोगौ तदादिः । एतेन **भाष्ये** द्रव्यमित्येतेन द्रव्यसंबन्धिसंयोगाद्यपि लक्षणयोच्यते इति ज्ञापितम् ।

शरीरं चेन्द्रियाणि च विषयाश्चोपकरणं च । गवादि चेतनम् । अचेतनं दध्यादि । आधारश्च गृहादिरिति द्वन्द्व इति तु **टीकालङ्कारे ।**

टीयाम् ॥ कः पुनरत्र न्याय इति पृष्टे प्रत्यक्षप्रामाण्यादित्युत्तरमसङ्गतम् । यतो न प्रत्यक्षं न्यायः । नापि तेन परमाणुभ्यो गवादि व्यक्तमुत्पद्यते इति परिच्छेत्तुं शक्यते परमाणुनामतीन्द्रियत्वादत आह—**प्रत्यक्षगृहीतेति ।**

अत एव दृष्टान्तगोचरं प्रत्यक्षं **भाष्यकृदु**पन्यस्यति—**दृष्टा हि रूपादीति ।** प्रत्यक्षगृहीतदृष्टान्तबलादित्युक्तं भवति ।

उने ॥ उपचारबीजमिति । अनुमानस्योपचारेण[775a]प्रत्यक्षेत्यपदेशो बीजम् ।

भाष्ये ॥ न घटाद् घटानिष्पत्तेरिति पर**सूत्रम्**[1] **।** व्यक्ताद् घटाद् व्यक्तस्य घटान्तरस्यानिष्पत्तेर्न युक्तमुक्तं सिद्धान्तिनेत्यर्थः ।

समाधत्ते[2]–व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः । मा भूत् घटाद् व्यक्ताद् घटान्तरस्योत्पत्तिः मृद्द्रव्यात्तु कपालसंज्ञिताद् व्यक्तादेव तस्यापि निष्पत्तिरतोऽप्रतिषेधः पूर्वहेतोरिति **सूत्रार्थः ।**

तदेवं प्रत्यक्षप्रामाण्यादिति पूर्वहेतोरप्रतिषेधे व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यादिति [3]**सूत्रा**क्षिप्तं प्रयोगमाह **वार्त्तिककृत् । रूपादिमत्सामग्रीति ।** अस्मदपेक्षया साधनप्रयोगान्न परमाणुभिर्व्यभिचारः ।

उदयनोऽपि प्रयोगान्तराणि दर्शयितुमाह—**अत्र चैवं व्याप्तीति ।**

अत्र चेति । शरीरादिव्यक्तानां व्यक्तपूर्वकत्वे साध्ये च ।

उत्कर्षापकर्षसमेति । यदि रूपवत्कार्यत्वाद् घटसाधर्म्याद् रूपवत्पूर्वकं व्यक्तं शरीरादि तर्ह्यस्मादेव साधर्म्याद् दण्डचक्रादिपूर्वकमपि स्यादित्युत्कर्ष समः । यदि चैवं साधर्म्येऽपि न दण्डचक्रादिपूर्वकं तदा न रूपवत्पूर्वकमपीत्यपकर्षसमः ।

एष इति । उत्कर्षापकर्षसमप्रयोगप्रपञ्चः ।

॥ इति प्रेत्यभावप्रकरणं संपूर्णम् ॥

---

1 IV. i. 12. 2 IV. i. 13 3 IV. i. 11

॥ शून्योपादानताप्रकरणम् ॥

[४.१.१४–१८]

उने ॥ अनभ्यनुज्ञानेऽपीति । यद्यपि **तीर्थिका**नां दर्शनानि सर्वाण्यप्येतानि नाभ्यनुज्ञायन्ते, तथापि तदेकदेशा अभ्यनुज्ञायन्ते एतावतोक्तं तत्र कानिचिदभ्यनुज्ञायन्त इतीत्यर्थः ।

व्यतिरेकीति । नानुपमर्द्यप्रादुर्भावादिति [1]**सूत्रां**शाद् व्यतिरेकः साक्षात् प्रतीयते इत्यर्थः ।

तमेवेति । अन्वयमेव ।

अत्रेति । अन्वये ।

न सत इत्यपि । न सत इत्यत्रापि ।

अत्रान्वयेति । अत्र प्रागभावेपि ।

वाके ॥ तत्र च न्यायं ब्रुवते इति । प्रयोगः पुनरेवम् । शरीराद्यभावकारणकमुत्पद्यमानत्वादङ्कुरवत् ।

उने ॥ उपमर्दे इति । विषये ।

गूढाभिसन्धिरिति । उपमृद्य प्रादुर्भवतीति व्याघात इति वदत **आचार्यस्य** ।

अनेनेति । उपमृद्य प्रादुर्भवतीति प्रयोगोऽयं न घटते **इत्याचार्येणो**क्तमिति मन्यमानेन **परेण** ।

वाके ॥ आनन्तर्यसामर्थ्यादिति । आनन्तर्यमेव सामर्थ्यं तस्मात् । अनन्तरमुत्पत्तिरेवार्थ उपमर्दशब्दस्य । यावदुक्तं भवति बीजाभावानन्तरमुत्पद्यते, तावदुक्तं भवति बीजमुपमृद्य प्रादुर्भवतीति ।

---

1 IV. i. 14

टीयाम् ॥ **उपमृद्योपमर्दकयोरिति** । उपमर्दकं मुद्गरादि घटानन्तरं दृश्यते यथा तथाङ्कुरोऽपि बीजोपमर्दानन्तरमुपलभ्यते इति तत्सामान्यादुपमर्दकत्वमुपचर्यते इति भावः ।

उने ॥ **न भक्तिरिति** । नोपचारं बीजसादृश्यम् ।

अत इति । अतोऽस्मदभिमतं स्वरूपसन्तमभावमुपादायेति संबन्धः ।

ननु भवतु शून्यतायामानन्तर्यं दुर्वचम्, तथापि **नैयायिका**भिमतः स्वरूपसन्न-भावः किमित्युपादीयते, अत आह—**तदभिधानादिति** । आनन्तर्याभिधानात् ।

अस्मद्दिशैवेति । नैयायिकदिशैव ।

टीयाम् ॥ **क्रमनिर्देशादित्यस्य हेतोरिति** । आदौ बीजनाशस्ततोऽङ्कुरजन्मेति वदता **परेण** क्रमनिर्देशादिति हेतुरनक्षरमुक्तः । तस्यैवास्मन्मतेऽप्यप्रतिषेधः । यतो यथादौ बीजनाशः, ततोऽङ्कुरजन्मेति बीजनाशाङ्कुरयोरानन्तर्यं तथादौ बीजावयवव्यूहान्तरं ततोङ्कुर-जन्मेति[775b]व्यूहान्तराङ्कुरयोरप्यानन्तर्यं तुल्यमित्यर्थः ।

उने ॥ **तस्येति** । भावस्य ।

टीयाम् ॥ अस्मदभिमतोऽभावोऽपि निमित्तमिष्यते एवात आह—**अनुपाख्येय इति शेष** इति ।

नो खल्वभावानामस्ति कश्चिदाजानतो भेद इति । अनुपाख्येय-त्वात् नाप्यपेक्षणीयकृतः कश्चिद्भेद इत्यपि गम्यते ।

उने ॥ **एतदुपजीव्येति** । एतदनुपाख्येयत्वम् ।

तदेतदिति । स्वाभाविको भेदो नास्तीत्येतत् ।

न चेति । चो हेत्वर्थे ।

चिन्तेति । उपादानत्वचिन्ता ।

तस्य प्रागेव निरसनादिति । अभावश्चेदङ्कुरोत्पत्तिकारणं स्यादित्यत्र निरूपाख्यस्य कारणत्वमात्रं निरस्यतोपादानत्वस्य निरस्तत्वात् ।

कालनियमाभावाचेति । पूर्वभावि हि कारणं निरूपाख्यस्य चाभावस्य न कालनियमः संभवति ।

सोपाख्यस्येति । इयं चिन्तेति संबन्धः ।

तस्य चेति । सोपाख्यस्य ।

तदिति । उपादानत्वम् ।

विशेषाभावादिति । अङ्कुरकालानुवृत्तित्वस्योभयत्राप्यविशिष्टत्वात् ।

एतल्लक्षणमिति । अयुतसिद्धया हि कार्यं यदाश्रितं तदुपादानमित्येतत् ।

न चैतल्लक्षणमिति । यत्कारणं कार्येत्यादि ।

विकारविकारिभावोऽस्त्विति । लक्षणमिति संबन्धः ।

अव्यापकत्वादेवेति । **बौद्ध**मते बीजप्रध्वंसस्योपादानत्वं वर्तते । न च बीजप्रध्वंसस्य विकारित्वम् , अङ्कुरस्य बीजप्रध्वंसविकारत्वाभावात् ।

एतदेवाह—**न चेति** ।

तथाननुभवादिति । भावस्याभावात्मकतया अनुभवाभावात् ।

तथेति । अङ्कुरं बीजप्रध्वंसात्मकम् ।

कथमन्यथा नष्टोऽङ्कुर इति सामानाधिकरण्यानुभव इति । तथा च यथा नष्टोऽङ्कुर इति सामानाधिकरण्यानुभवान्यथानुपपत्त्याङ्कुरोऽङ्कुरप्रध्वंसात्मा तथाङ्कुरो बीजप्रध्वंसात्मापीति । तदुपादानत्वं सिद्ध्यतीति **परा**शयः ।

अविरोधे चेति । अङ्कुराङ्कुरविनाशयोः ।

अपि च बीजेति । अङ्कुरस्य बीजप्रध्वंसोपादानत्वभणनायाङ्कुरबीजप्रध्वंसयोस्तादात्म्ये विचार्यमाणे यदिदमङ्कुरो नष्ट इति सामानाधिकरण्येनाङ्कुरप्रध्वंसेनाङ्कुरस्य तादात्म्यभणनं तदसङ्गतम् । अङ्कुरस्याङ्कुरप्रध्वंसात्मकत्वं कथमपि यदि स्यात्, तदापि कुतोऽनेन बीजप्रध्वंसात्मकेन भाव्यमित्यर्थः ।

स एव चोत्तरत्र व्यक्त इति चेदिति । सर्वप्रमाणेषु मूलं तावदनुभवः स एव चाङ्कुरप्रध्वंसात्मकत्वानुभव एव चाङ्कुरस्योत्तरत्र नष्टोऽङ्कुर इति सामानाधिकरण्यानुभवकाले व्यक्त इत्यङ्कुरकालेऽप्यङ्कुरप्रध्वंसोऽस्तीति निश्चीयते । तथा च विरोधिनोस्तादात्म्यस्य

निषिद्धत्वादित्यादि यत्किञ्चिदेतदित्याशङ्कार्थः ।

परः प्रमाणमाह—**मध्येऽपीति** ।

उभयावस्थेति । यदाद्यन्तयोर्यद्रूपं तन्मध्येऽपि तद्रूपम्, यथा पूर्वापरोभयावस्थावर्ती घटो मध्येऽपि घटरूपः ।

आद्यन्तविशेषणस्यासिद्धेरिति । यदा हि भावो नास्ति रूपस्तदाद्यन्तविशेषणे आश्रयासिद्धे इत्यर्थः ।

तद्रहितस्येति । आद्यन्तविशेषणरहितस्य ।

अनुभवापेक्षितयेति । अङ्कुरो नष्ट इत्यनुभवापेक्षितया भावस्य नास्तित्वरूपत्वसिद्धिः ।

प्रतिभासमात्रमेतदिति । अङ्कुरो नष्ट इत्येतत्प्रतिभासमात्रं न तादात्म्यानुभवः ।

शून्यता त्विति । उक्तयुक्तिभिर्हि[776a]भावस्याभावात्मकत्वमुक्तं परेण, शून्यतोपादानतां साध्यामभिप्रेत्य शून्यता त्वविच्छिन्नरूपैव निरन्तररूपैव । तथा च किं कस्योपादानम्? असन्तमेव हि पटं प्रति तन्तव उपादानानि स्युः । शून्यतायास्त्वविच्छिन्नत्वे शून्यतारूपस्य पटस्य सर्वदाभावात् कं नामासन्तं प्रति शून्यतोपादानं स्यादिति भावः ।

अस्येति । बीजप्रध्वंसस्य ।

चतुर इति । रूपादीन् ।

चतुर्णामिति । रूपादिप्रध्वंसानाम् ।

तस्येति । पूर्वभावनियमस्य ।

तेभ्य इति । रूपादिप्रध्वंसेभ्यः ।

उत्पद्यन्ते हीत्यादि । उत्पद्यन्ते हि रूपादिमति घटादौ तत्संयोगाः ते विवक्षिता हस्तादिसंयोगाः । न पुनस्तत्संयोगवति विवक्षितहस्तादिसंयोगवति घटादौ विवक्षिता एव हस्तादिसंयोगा उत्पद्यन्ते इत्येवमन्यत्र घटादौ विजातीयाभावव्यभिचारदर्शनाद्; विजातीयाभावं विनापि विजातीयेषु रूपादिषु सत्स्वपि संयोगादीनां कार्याणां दर्शनात् पाकजं रूपं प्रति पूर्वसजातीयरूपाभाव एव कारणम् । न तु पूर्वो रसाभावादिरेव पाकजरसादिं प्रति पूर्वसजातीयरसाद्यभाव एव कारणमिति व्यवस्था ।

एवं द्रव्येति । पटादिद्रव्याभावे एव पटादिद्रव्यम् , न तु पटादिद्रव्ये सति पटादिद्रव्यमुत्पद्यते ।

एवमिति । उत्पद्यन्ते हीत्याद्युक्तयुक्त्या ।

प्रागभावस्य निमित्तत्वं सिध्यत्विति । रूपादिमति तत्संयोगाद्युत्पत्तौ तत्संयोगादिप्रागभावस्य निमित्तत्वदर्शनात् ।

कुतः प्रध्वंसस्येति । पाकजान् रूपादीन् प्रति पूर्वरूपादिप्रध्वंसस्य निमित्तत्वं कुतः ?

तदेतदिति । अभावस्य कारणत्वमात्राङ्गीकरणम् ।

श्रुतिरिति । असदेवेदमग्रे आसीदिति लक्षणा ।

तथेति । युक्तिशास्त्रम् ।

आप्तोक्तत्वेनेति । **नैयायिका**नां मते ।

नित्यत्वेन वेति । **मीमांसका**नां मते ।

पूर्वपक्षत्वे त्विति । अनभ्युपगतो ह्यर्थः पूर्वपक्षोऽप्रामाणिकत्वाच्चानभ्युप[ग]तः स्यात् तद् यदि श्रुतेः पूर्वपक्षत्वं स्यात् , तदा यथा पूर्वपक्षरूपिण्या अप्रामाण्यमेवमन्यस्या अप्यप्रामाण्ये सर्वथैवाप्रामाण्यप्रसङ्गः ।

एषैव रीतिरिति । पूर्वपक्षोत्तरपक्षरूपा ।

कथन्ताग्रन्थस्येति । युक्तिग्रन्थस्य ।

तयोरिति । पूर्वपक्षार्थसिद्धान्तार्थयोः ।

अग्रे पठिष्यतीति । शून्यताविवर्तनिरासम् ।

विवर्तते इति । विश्वम् ।

नीलाद्यशून्यरूपतयेति । नीलादयो ये अशून्यास्तद्रूपतया विवर्तते ।

तेऽपीति । नीलादयोऽपि ।

॥ इति शून्यतोपादानताप्रकरणं संपूर्णम् ॥

॥ ईश्वरोपादानताप्रकरणम् ॥

[४.१.१९–२१]

उने ॥ **तद्विवर्तस्येति** । तस्मात् निरूपाख्याद् विपरीतस्य ब्रह्मणो यौ तावुपादानत्व-विवर्तौ तयोरन्यतरदुपादानत्वं विवर्तो वा भविष्यति ।

यथोक्तेति । तदेवं निरूपाख्यस्येत्यादिना ।

टीयाम् ॥ **नामरूपप्रपञ्च** इति । नाम गवाश्वादिकं रूपं खुरककुदलाङ्गुलसास्नादि-मत्त्वाद्याकारविशेषः ।

उने ॥ **तन्नित्यत्वमिति** । सत्तानित्यत्वम् ।

ननु निर्मितस्येति । यदि ब्रह्मविवर्तो घटपटादेर्निमित्त इष्यते तदा ब्रह्मण इव विवर्तस्यापि अनिवृत्तावविनाशप्रसङ्गः । अथ विवर्तस्य किञ्चिन्निमित्तमिष्यते, यन्निवृत्तौ विवर्तस्यापवर्गः, तदा **विवर्तवाद**ाभ्युपगतं ब्रह्माद्वैतं व्याहन्यते । तथा तत्प्रथने[776b]-ऽविवर्तरूपस्य निमित्तान्तरस्य प्रधानविवर्तवादो व्याहन्यते ।

स्वप्नोपाधिभिरिति । यथा अपारमार्थिकैः स्वप्नलक्षणोपाधिभिर्नभसो गन्तृ-त्वादिविवर्तस्तथा विवर्त्तोपपत्तेः ।

टीयाम् ॥ **तदिति** । ब्रह्म ।

ऐक्षतेति । अज्ञासीत् ।

बह्विति । नाना ।

उने ॥ **तत्परिणाममिति** । ननु जीवा एव चेतना इत्यादिना जीवपरिणाममाशङ्क्य पुरुषकर्माफल्यदर्शनादिति [1]**सूत्राव**यवमुत्तरयति जीवा अचेतना इति । तात्पर्यार्थपरतया उत्तररूपं करोति ।

---

1 IV. i. 19

ननु जीवाश्चेतना इति सर्वप्रतीतं तत् कुतः **सूत्रा**वयवं जीवा अचेतना इति ? तात्पर्यपरतयोत्तरयति, अत आह— **शरीराद्युत्पत्तेरिति** ।

प्रधानादिवदिति । प्रकृत्यादीनामिव ।

सोऽपीति । ईश्वरोऽपीति ।

भवितरि द्रष्टव्यमिति । एवं च तत्त्वेनानुगतस्याविद्यारूपस्यापरिणामः । तच्च तत्त्वं ब्रह्म । अविद्यैव परिमणते, न तु तदनुगतं ब्रह्मेति आशङ्का**टीका**र्थो दर्शितः । स्पर्शवत एव परिणामदर्शनात् कथमस्पर्शं ब्रह्म परिणमते कारणानुरूपत्वाच्च कार्यस्य जगत् चिदानन्दात्मकं प्रसज्येत, ब्रह्मणस्तथाभावादित्यपि वाच्यम् । याः पुनरिमा बहु स्यां प्रजायेयेत्येवमाद्या उत्तमपुरुषश्रुतयस्ताः कार्यकारणयोरभेदोपचारेणात्मा वै पुत्र इतिवद् व्याख्येयाः ।

तद्विवर्तं निवर्तयतीति । ब्रह्मपरिणामं निषिध्य ब्रह्मविवर्तं निषेधति ।

प्रपञ्चात्मतयेति । नीलादिप्रपञ्चात्मतया ज्ञानात्मैव प्रथते इत्यात्मख्यातेरनुपपत्तेः । यतः किंभूतस्यात्मनो निष्प्रपञ्चस्य ।

टीयाम् ॥ न च निर्भागस्येत्यादि । तत् खलु ब्रह्म निरंशं गृह्येत वा न वा । न पुनस्तस्य किञ्चिद् गृहीतम् । किञ्चिच्चागृहीतं संभवति येन मिथ्याप्रत्ययगोचरः स्यादिति भावः ।

उने ॥ अनीश्वरदर्शनमिति । ईश्वरो जगतः कारणं न सापेक्षत्वे घटते नाप्यनपेक्षत्वे । तस्मात् ईश्वरो नास्तीति **मीमांसक**दर्शनम् ।

तत्रेति । अनीश्वरदर्शने ।

तथा चेति । आत्मजातीयत्वे ।

अस्येति । ईश्वरस्य ।

गुणविशिष्टमित्यनेनेति । **भाष्ये**ण ।

मुक्तात्मनामिवेति । यथा मुक्तात्मनां घटादिद्रव्यान्तरैर्यः संयोगो विभागश्च तयोरस्वार्थत्वात् स्वसमवेतधर्मव्यतिरेकेणापि नाकृताभ्यागमदोषः ।

नन्वस्वार्थत्वे ऐश्वर्यमीश्वरेऽनुपपन्नमेवेत्यत आह—**कार्यान्तरसिद्धये** इति । अन्यकार्यसिद्धये ।

ननु धर्माभावे कार्यान्तरसिद्धयेऽपि कथमीश्वरे ऐश्वर्योपपत्तिरत आह—**परस मवेतेति**।

आगन्तुकधर्माभ्युपगमेऽपीति। ईश्वरकार्यधर्माभ्युपगमेऽपि।

यो ह्यर्थ इति। वेदप्रणयनादिः।

अस्येति। ईश्वरस्य।

टीयाम्॥ **परानुग्रहार्थं त्विति**। करुणयेति शेषः।

पितुरिति षष्ठी।

[1]**पिता स्वापत्यानामिति**।

अयमित्यस्य व्याख्या **पितेति**।

समुदायार्थमाह—**स्वापत्यानां यथा पितेत्यर्थ** इति।

उने॥ **आगामिन्यायेति**। आगामी न्यायोऽचेतनत्वादिः। तस्य यो विषयः तस्य विशुद्धये परिहरन्नाहेति संबन्धः।

तर्कापरिशुद्धिरिति। प्रतितर्कोत्थापनेन।

अनर्थित्वे इति। निरर्थककरणे।

सिद्ध[777a]**साधनं चेति**। वयमपि पृथिव्यादीन् कर्तॄन् मन्यामहे।

यद्यपीश्वरमधिकृत्येत्यादि। यदेश्वरो यद्यर्थित्वे सति कर्ता स्यात् तदा अनीश्वरः स्यादित्यादिक्रमेणामी तर्का उद्भाव्यन्ते तदेश्वरासिद्धया सर्वेऽप्याश्रयासिद्धाः। तथा यद्यर्थिना कर्त्रा स कर्तृकं क्षित्यादिकं स्यात् तदा अनीश्वरकर्तृकं स्यादित्याद्यापादनेनानिष्टप्रसङ्गरूपाणाममीषां न चानीश्वरकर्तृकमित्यादिर्हि विपर्ययः। स च क्षित्यादेरीश्वरकर्तृकत्वाभ्युपगमेनैव पर्यवस्येत्। न चैतदभ्युपेयते भवता। तथा च विपर्ययापर्यवसानेन तर्काभासत्वादिभिः कथमीश्वरनिराकरणमिति।

बुद्धिगुणयोगित्वादित्येतावतैव सिद्धे आदिग्रहणं किमर्थमत आह—**आदिग्रहणमिति**।

---

1 J विवृता

लक्षणान्तरेति । इच्छायोगित्वादि ।

इदमेवेति । प्रतिबन्दिस्फोरणरूपम् । अन्यथा तोयादिपरमाणुनामित्याद्येव ।

टीयाम् ॥ शङ्कां परिहृतां मन्यमान आह—**अयमभिसन्धिरिति** ।

उने ॥ **सा चेति** । प्रवृत्तिः ।

सकलदुःखोपशमपर्यन्तत्वादिति । ईश्वरप्रवृत्तेः ।

तत्त्वापवाद इति । कारुण्यापवादः ।

व्यभिचारादिति । दुःखोत्पादकस्यापि वैद्यादेः कारुण्यदर्शनात् ।

तथा करोतीति । दुःखमुत्पादयति ।

तथैवेति । दुःखोत्पादनेनैव ।

तस्येति । दुःखस्य ।

वाके ॥ **गुणपुरुषान्तरदर्शनमिति** । प्रकृतिपुरुषान्तरविवेकज्ञानम् ।

अङ्गाङ्गिभावस्यानियमादिति । कदाचित् किञ्चिदङ्गं किञ्चिच्चाङ्गि प्रधानम् । ततो यदङ्गं तद्धीनम्, यच्चाङ्गि तदधिकमिति वैषम्यम् ।

तदसंभवादिति । बुद्ध्यसंभवात् ।

कानिचित् पुनरिति । यदा तन्तोस्तन्त्वन्तरेणान्यतरकर्मजः संयोगस्तदा कर्मणो विनश्यत्ता द्रव्यस्य चोत्पद्यमानता तदैव तन्त्वन्तरे स्वकारणात् कर्मण उत्पद्यमानता इत्येकः कालः । तदनन्तरं पूर्वकर्मणो विनाशो द्रव्यस्य द्वितीयतन्तुकर्मणश्चोत्पत्तिरित्येकः काल इत्यर्थः ।

निवृत्ते कर्मणीति । आगन्तुकद्रव्यसंबन्धिनि कर्मणि निवर्तमाने इति भावः ।

इतरस्मिन् द्रव्ये इति । अवस्थिते द्रव्ये ।

क्रियावतेति । उत्पद्यमानक्रियेण ।

उने ॥ **द्वितीयकर्मकालसंयोगोत्पत्तावित्यादि** । यदैव द्वितीये तन्तौ कर्म

तदैव द्वितन्तुकादिद्रव्यारम्भकसंयोगोत्पत्तौ द्रव्याणि द्रव्यमारभन्ते इति संबन्धः। एवमन्यत्रापि। तथा यदैव द्वितीये तन्तौ पूर्वसंयुक्ताद् द्रव्याद् विभागः, तदैव द्रव्यारम्भकसंयोगोत्पत्तौ, तथा यदैव द्वितीये तन्तौ। पूर्वसंयुक्ता[द्]द्रव्याद् विभागजो विभागः तन्त्वाकाशविभागस्तदैव द्रव्यारम्भकसंयोगोत्पत्तौ, तथा यदैव पूर्वसंयोगस्य पूर्वभाविनो द्रव्यान्तरेण तन्तोः संयोगस्य निवृत्तिः, तदैव द्रव्यारम्भकसंयोगोत्पत्तौ, तथा यदैवोत्तरसंयोगस्य पूर्वसंयोगनिवृत्तौ तन्त्वाकाशसंयोगस्य निवृत्तिः, तदैव द्रव्यारम्भकसंयोगोत्पत्तौ। कतिचित्संयोगनिवृत्तिकाले स्थितेषु संयोगेषु [1]द्रव्याणि द्रव्यान्तरमारभन्ते इति तु एकावयवविभागे त्वित्यादि**वार्त्तिके** स्फुटमेव।

एकदेशस्येति। अन्यतरकर्मजसंयोगोत्पत्तौ द्रव्याणि द्रव्यान्तरमारभन्त[777b] इति लक्षणस्यान्यतरकर्मजत्वादीना कीर्तनम्।

एवं गुणारम्भेऽप्यनियम इति। कानिचिद् द्रव्याणि उपरतक्रियाणि गुणमारभन्ते कानिचित् पुनः क्रियावन्त्यारभन्ते इत्यनियमः।

समवायिनेति। कर्मणः।

वाके॥ न च बौद्धादेः सक्रियस्य क्वचित् कर्तृत्वं सिद्धमित्याह—**विरोधश्चेति**।

ननु सापेक्षत्वनिरपेक्षत्वयोः कर्तृत्वव्यापकयोरीश्वराद् व्यावृत्तेः कर्तृत्वव्याप्यं व्यावर्तते इत्याक्षिपति—**न कारणमीश्वर** इति।

समाधत्ते—**निरपेक्षेति**।

उने॥ **भाष्यव्याख्याविरोधमिति**। आप्तकल्पश्चेत्यस्य **भाष्यस्य** व्याख्या मा भूत् अस्य भगवतः स्वार्थः। परानुग्रहार्थं तु जगन्निर्माणे प्रवर्त्स्यतीत्यर्थ इति रूपा। तयोर्यो विरोधस्तत्स्वाभाव्यात् प्रवर्तते इति वार्त्तिकस्य, तम्।

टीयाम्॥ ननु यद्ययं परानुग्रहस्वभाववत्त्वात् प्रवर्तेत सुखिरूपमेव जगद् विदधीत। दुष्कृते च पुंसां प्रवृत्तिं निरुन्ध्यात। तथा च वैचित्र्यं न स्यादत आह—**वस्तुस्वभावमनुरुध्यमान** इति।

---

1 Vs. I. i. 8

नन्वथायमीश्वरः कुर्वाणः किमर्थं करोतीत्यादिना हिताहितप्राप्तिपरिहारप्रयोजनव्याप्तं कर्तृत्वम्, तन्निवृत्तौ निवर्तते इति पूर्वपक्षिते स्वभावेनोत्तरदानं कोपयुज्यतेऽत आह—**अयत्वेऽपि चेति**। परोपकारकरणरसरभसोत्पादितप्रवृत्तयः प्रेक्षावन्तः साधवोऽनपेक्षितस्वप्रयोजना एव परार्थं प्रवर्तमाना बहुलमुपलभ्यन्ते, अतो न द्विविधप्रयोजनव्याप्तं कर्तृत्वमिति।

वाके॥ एवमन्येषामपीति। यस्येश्वरस्यानित्यमैश्वर्यं तस्य कारणतो भवति कारणं चान्य ईश्वरः, तस्याप्यनित्येनैश्वर्येण कारणतो भाव्यम्। कारणं चेश्वर इत्येवमनेकेश्वरप्रसङ्ग इति भावः।

टीयाम्॥ एतदुक्तमिति। संकल्पानुविधायी चेत्यादिना ईश्वरधर्मस्य प्रयोजनम्।

वाके॥ तत्स्वभावानवधारणादिति। ईश्वरस्वभावावधारणात्।

टीयाम्॥ नन्वात्मान्तरमात्मविशेष ईश्वर ईष्यत एवेति कोऽयमाक्षेपः? अत आह—**शरीर्यन्तरत्वमिति**। नास्मदादिभ्यो विशिष्टः स्यात् तथा चास्मदादीनामिव क्षित्यादिकर्तृत्वमीश्वरस्यानुपपन्नमिति भावः।

उने॥ नात्मत्वप्रयुक्तमिति। किं तर्हि उत्पाद्यबुद्ध्यादिप्रयुक्तम्।

टीयाम्॥ तदुत्पादार्थेनेति। बुद्ध्याद्युत्पादार्थेन।

वाके॥ एकदेशिमतं निरस्यति—**एतत्तु न बुध्यामहे** इति।

प्रमाणसद्भाव इति। बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्ते, अचेतनत्वाद् वा स्यादित्यादिवदित्यादि प्रमाणसद्भावः।

ननु यदीश्वरस्य धर्मज्ञानवैराग्यैश्वर्याणि नित्यानि नेष्यन्ते, तर्हि केनातिशयेनासावीश्वरः? अत आह—**अतिशयस्त्विति**।

ततः किमित्याह—**तत्रेति**। यथा संख्यापरिमाणपृथक्त्वसंयोगविभागैः सामान्यगुणैः शब्देन गुणभेदेन षड्गुण आकाशस्तथेश्वरः। संख्यादिभिर्बुद्ध्या च षड्गुणः। एतेन

ज्ञानेच्छाप्रयत्नशाली कर्तेति यत कर्तृलक्षणं तृतीये उक्तं तदस्मदादीन् प्रति नेश्वरं प्रतीति नेतव्यम् ।

यदपीच्छा तु विद्यते इति वक्ष्यति तदपि **पर**मतेनेति व्याख्येयम ।

अपरे तु यत्तु षड्गुणत्वमत्रोक्तं तदेव **पर**मतं परिदृष्टसामर्थ्यकारक नियोक्तु-रिच्छाप्रयत्नयोरपि संभवात् न हि कारकनियोक्तेच्छां द्वेषं वा [778a] कदाचिदपि व्यभि-चरति । नियोक्ता चेश्वर इति व्याचचक्षिरे ।

उपलक्षणार्थं षड्गुणाभिधानमि**त्यपरे** ।

ननु मा भूद् धर्मादिनित्यत्वे प्रमाणं बुद्धिनित्यत्वेऽपि किं प्रमाणमित्याह—**अथ बुद्धीति** ।

उने ॥ ननु तर्को ह्यारोपरूपः प्रत्यर्थनियमासंभवश्च ईश्वरबुद्धेर्वास्तवः, तत्प्रत्यर्थनियमा-संभवादित्यादिना तर्क इत्येतत् न घटते । अत आह—**विपर्ययेणेति** ।

टीयाम् ॥ **प्रमाणसहाय** इति । प्रमाणस्याचेतनत्वस्य सहायः ।

उने ॥ **इत्याशयवानाह न चेतीति** । ईश्वरबुद्धेः प्रत्यर्थनियमेऽभ्युपगम्यमानेऽस्य कारणं शरीरयोग ईश्वरस्याभ्युपेयः स्यात् शरीरयोगश्च न कथञ्चन घटते इत्यर्थः ।

ननु प्रत्यक्षेति । अक्षमिन्द्रियं प्रतिगता प्रत्यक्षा ।

वाके ॥ **अर्थाभावादव्याकरणीयः प्रश्न** इति । प्रयोजनाभावात् न व्याक्रियते । परमार्थतस्त्वव्यापकः संबन्धः शब्दबुद्ध्यादिवदिति भावः ।

अयं न्याय इति । प्रधानपरमाणुकर्माणि प्राक् प्रवृत्ते बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वाद् वास्यादिवदिति रूपः ।

उने ॥ **तत्सिद्धौ वेति** । विषयस्येश्वरस्य सिद्धौ वा ।

प्रसिद्धचेतनकर्तृका इत्यादौ कर्तृशब्देन यदि ज्ञानादिशाली उच्येत, तदा चेतन-पदार्थस्य कर्तृपदेनैवोक्तत्वात् चेतनेति विशेषणं निरर्थकं स्यादत आह—**प्रसिद्धचेतनेति** ।

एतेनेति । त्रये खलु जगति भावा इत्यादिना ग्रन्थेन विषयं सन्दिग्धचेतनकर्तृ-

कतरुतनुमहीमहीधरादिरूपमुत्पत्तिमत्त्वादेः साधनस्य विवेचयता चेतनकर्तृकत्वलक्षणमत्र साध्यमित्यपि निष्टङ्कितमित्यर्थः ।

टीयाम् ॥ **अत्र चेति** । तर्वादिषु ।

प्रमेयत्वाद् वेति । सकर्तृके प्रासादादावकर्तृके च परमाण्वादौ गतात् ।

चेतनकर्तृत्व इति । विषये ।

उने ॥ **असाधारणधर्मादिति** । सकर्तृकत्वाकर्तृकत्वाभ्यां व्यावृत्ताद् धर्मात् ।

तथा चेति । तर्वादीनां शरीरानपेक्षोत्पत्तिकत्वेऽसाधारणधर्मे च सति अशरीरिकर्तृकत्वमपि प्रतिज्ञान्तर्गूढं ज्ञेयमिति भावः ।

टीयाम् ॥ कथं बाधकप्रमाणाभावोऽनुपलब्धेर्बाधिकायाः सत्त्वादत आह—**न च प्रत्यक्षानुपलब्धिमात्रमिति** । अनैकान्तिकत्वादिति शेषः ।

अत्रेति । संशये ।

अनैकान्तिकत्वमपि दर्शयति—**स तामपीति** ।

उने ॥ **तृतीयं प्रकारमिति** । प्रतिज्ञायाः ।

टीयाम् ॥ **तथा चेति** । संशये सति ।

उने ॥ **अनेनैवेति** । प्रतिज्ञाया विशेष्यविशेषणोभयरूपतृतीयप्रकारप्रतिपादनेनैव ।

प्रकारद्वयमिति । तर्वादय उपादानाद्यभिज्ञकर्तृका विवादाध्यासिता उपादानाद्यभिज्ञकर्तृका इति रूपम् ।

एतच्चेति । प्रकारत्रयम् ।

अवसरेति । अवसरश्च प्रतिपाद्यश्च तदादीनां विशेषम् ।

निश्चोद्यमिति । निःशङ्कम् ।

यदि हीति । यदि हि कार्यमप्यकर्तृकं भवेत् तदा कार्यस्य हेतूनां कार्ये स्वतन्त्राणामेव प्रवृत्तिः स्यात् । सा च न चैतन्यं विनेत्यतश्चैतन्यं प्रसजेदित्यर्थः ।

अप्रवृत्तौ वेति। यदि कार्यहेतूनां कार्ये प्रवृत्तिर्नाभ्युपेयेत तदा।

अनुपलभ्योत्पत्तिकमिति। पर्वतादिकम्।

एवमाश्रयेति। तर्वादीन् पक्षीकुर्वता आश्रयासिद्धिः सावयव[778b]त्वादिना गिर्यादीनामुत्पत्तिमत्त्वं साधयता स्वरूपासिद्धिः तद्गुणादीनां कार्यगुणत्वादिनोत्पत्तिमत्त्वं साधयता च भागासिद्धिश्च परिहृताः।

टीयाम्॥ महत्त्वे सतीति। परमाणुभिर्व्यभिचारनिरासार्थम्।

न चैतावतेति। साध्येनोपात्तेन सतेत्यर्थः।

उने॥ आश्रयासिद्धिप्रभेदमिति। सन्दिग्धसाध्यधर्मा हि धर्मी हेतोराश्रय इष्यते। न च निर्णीते संशयोऽस्ति।

क्वचिदिति। क्वचित् प्रसिद्धश्च सिसाधयिषितो धर्मस्तथा धर्मिविशेषको भवति। न च प्रकृतश्चेतनकर्तृकत्वलक्षणः सिसाधयिषितो धर्मस्तथा क्वचित् प्रसिद्धः।

स्वरूपतद्विशेषणयोरिति। कर्तृमत्त्वोपादानाद्यभिज्ञत्वयोः।

सपक्षे इति। प्रासादादौ।

पक्षे इति। तनुतर्वादौ।

बाधादिति। प्रत्यक्षबाधात्।

तद्विपरीत इति। तस्माच्छरीरित्वाद् विपरीतो विशेषोऽशरीरत्वलक्षणः।

यथेहेति। यथेह तृणादिविकारकारित्वादग्निमद्धिमं प्रदीपादिवदित्यनुमाने प्रदीपादेर्दृष्टान्तस्यानुसारेण यत् साध्यमुद्भूतौष्ण्यस्पर्शवह्निमत्त्वम्। तस्य हिमे पक्षे उद्भूतौष्ण्यस्पर्शविरुद्धस्य शीतस्पर्शस्य प्रत्यक्षेणोपलम्भाद् बाधे तद्विपरीताभिप्रेतसाध्यविरहात्। तस्मादुद्भूतौष्ण्यस्पर्शवह्निमत्त्वात् साध्याद् विपरीतमभिप्रेतम्, यत् साध्यमनुद्भूतौष्ण्यस्पर्शवह्निमत्त्वं तस्य प्रदीपादौ दृष्टान्ते विरहाद् दृष्टान्तस्य साध्यविकलतया हेतोर्विरुद्धत्वम्। तथा तर्वादय उपादानाद्यभिज्ञकर्तृका उत्पत्तिमत्त्वात् प्रासादादिवदित्यत्राप्यनुमाने प्रासादादिदृष्टान्तानुसारेण यत्साध्यं शरीरिकर्तृकत्वं तस्य तर्वादौ पक्षे प्रत्यक्षबाधे तद्विपरीतस्याभिप्रेतस्य साध्यस्याशरीरिकर्तृकत्वस्य प्रासादादिदृष्टान्ते विरहाद् दृष्टान्तस्य साध्यविकलतया हेतोर्विरुद्धत्वमित्यर्थः।

यद्वानयैवेति। तृणादिविकारकारित्वस्य प्रदीपादौ दृष्टान्ते उद्भूतौष्ण्यस्पर्शाभिमत्त्वेन सह गृहीताया व्याप्तेर्हिम उद्भूतौष्ण्यस्पर्शाभिमत्त्वोपस्थापिकायाः तृणादिविकारकारि चेदं हिममिति पक्षधर्मतायाश्च शीतस्पर्शोपस्थापिकाया यथा विरोधः, तथा प्रासादादौ दृष्टान्ते उत्पत्तिमत्त्वादेः शरीरिकर्तृत्वेन सह गृहीताया व्याप्तेः तर्वादिषु शरीरिकर्तृकत्वोपस्थापिकायाः पक्षधर्मतायाश्चाशरीरिकर्तृकत्वोपस्थापिकाया विरोधो विवक्षितः।

ज्ञानत्वेति। यथा हिमे उष्णस्पर्शशीतस्पर्शयोर्विरोधः, तथा तर्वादिकर्तृस्थे ज्ञाने ज्ञानत्वनित्यत्वयोर्विरोधोऽभिमतः।

अविनाभावेनाक्षिप्त इति। यथा हिमे वह्निमत्त्वेनाक्षिप्त उद्भूतौष्ण्यस्पर्शलक्षणो विशेषः, तथा तर्वादिकर्तरि उपादानादिविषयज्ञानेनाक्षिप्तः शरीरित्वलक्षणो विधेयः।

पक्ष इति। सप्तम्यन्तम्।

समुदायैकेति। यथा शुक्लभास्वररूप उद्भूतौष्ण्यस्पर्शसमुदायस्य वह्नेर्य एकदेश उद्भूतौष्ण्यस्पर्शरूपः, तस्य बाधात् समुदायबाधः। तथा ज्ञानेच्छाप्रयत्नशरीरसमुदायस्य कर्तुरेकदेशशरीरबाधात् समुदायबाधः।

स्वभावानुपलब्धिबाध इति। स्वभावानुपलब्ध्या बाधः।

यस्या इति। स्वभावानुपलब्धेः।

अनिष्टप्रसङ्गमात्रं वेति। यदि हिममग्निमत् स्यात्, तदोद्भूतौष्ण्यस्पर्शि स्यादिति यथा अनिष्टप्रसङ्गः, [779a] तथा यदि तर्वादयः सकर्तृकाः स्युस्तदा शरीरिकर्तृकाः स्युरिति अनिष्टप्रसङ्गमात्रं वा।

तत्र प्रथमे इति। प्रथमे ह्यर्थेऽशरीरिकर्तृकस्याभिप्रेतस्य साध्यस्य विरहाद् दृष्टान्तस्य साध्यविकलतोक्ता। सा च प्रमाणाभावादयुक्ता। न ह्यशरीरी कर्तृविशेषः सपक्षे प्रासादादौ नास्तित्यत्र प्रमाणमस्ति तस्याप्रतीतत्वात्। अप्रतीतस्य च निषेद्धुमशक्यत्वात्। अथ पक्षे सपक्षे वा क्वचिदशरीरी कर्ता प्रतीतः, तर्हि विवाद एव नास्तीत्यर्थः।

पक्षधर्मतयेति। विशेषस्याशरीरिकर्तृकत्वस्योपस्थापनं पक्षधर्मतया। अनुपस्थापनं च यदुत्पत्तिमत् तत् सकर्तृकमिति कर्तृकसामान्योपस्थापिकया व्याप्त्या तयोर्विषये पक्षधर्मतया विरोधानवकाशात् सर्वत्रापि व्याप्त्यानुपस्थापितस्यापूर्वस्यैव विशेषस्य पक्षधर्मतयोपस्थानात्।

ननु व्याप्त्या कर्तुः शरीरित्वं विशेष उपस्थाप्यते, तं च पक्षधर्मता बाधते इति

कथं न तयोर्विरोधोऽत आह—**प्रतीतेति**। प्रतीतं सपक्षे गृहीतं यद्विशेषमात्रं कर्तृत्वलक्षणमाध्यात्व्यापकं शरीरत्वं तस्या बाधे।

विरोधोपसंहारेति। यज्ज्ञानं तन्नित्यत्वेन विरुध्यते इत्येवं विरोधस्य य उपसंहारो ज्ञानं चेदमिति तस्य यो विषय ईश्वरज्ञानलक्षणस्तस्याप्रतीतेः।

विरोधस्य बाधेनेति। ईश्वरज्ञानस्य नित्यस्यैव प्रतीतत्वेन नित्यत्वविरोधस्य बाधः।

बाधादिति। वनवृक्षादीनां कार्याणामपि शरीरकर्तृकत्वस्य प्रत्यक्षेण बाधात्। अबाधे वा शरीरिकर्तृकत्वं सिध्येत्, न च शरीरिकर्तृकत्वमिष्टम्।

व्यापकानुपलब्धेरिति। यः कर्ता स शरीरी क्षित्यादिकर्ता च न शरीरीत्येवं व्यापकानुपलब्धेः कर्तृव्यापकस्य शरीरस्यानुपलब्धेर्य आश्रयः क्षित्यादिकर्ता तस्यासिद्धेः, सिद्धौ वा अशरीरस्यैव क्षित्यादिकर्तुः सिद्धया कर्तृत्वनिषेधसाधिकाया व्यापकानुपलब्धेर्बाधात्।

शरीराजन्यत्वादेस्त्विति। क्षित्यादिकमकर्तृकं शरीराजन्यत्वादशक्यक्रियत्वाद् वा आकाशवदित्यस्त्याश्रयलाभ इति चेत्—न, आकाशस्याजन्यत्वाक्रियत्वमात्रेणैवाकर्तृकत्वसिद्धौ शरीराजन्यत्वस्याशक्यक्रियत्वस्य च हेतोरसमर्थविशेषणत्वादिति।

रासभादिबाधे इति। प्रत्यक्षादिना।

तथाभिधातुमिति। एकदेशस्य रासभस्य बाधे दहनादिसमुदायस्य बाध इत्यभिधातुम्।

परस्य त्विति। **नैयायिक**स्य तु मते ज्ञानेच्छाप्रयत्नशाली कर्ता साध्यो न तु शरीरादिसहितः।

समुदायीति। एकदेशः।

ईश्वरमधिकृत्येति। यदीश्वरः कर्ता स्यात् तदा शरीरी भवेदित्येवम्।

क्षित्यादिमधिकृत्येति। यदि क्षित्यादि सकर्तृकं भवेत् तदा शरीरिकर्तृकं भवेदिति प्रसङ्गस्य विपर्ययोऽशरीरिकर्तृकत्वं तच्च त्वया नेष्यते इति भावः।

एषैव तार्किकरीतिरिति। बाधाद्युद्भावनारूप एव च **तार्किकाणां** परिहारप्रकारः।

बाधादिना चेति । यत्र बाधादिः तत्रावश्यमुपाधिना भाव्यमिति **तार्किका**-भिप्रायेण बाधादिना वोपाधिरुन्नीयतां **मीमांसका**भिप्रायेण तु स्वातन्त्र्येण वा बाधादिविनै-वोपाधिरुन्नीयतामिति न कश्चिद् विशेष [779b] उभयत्राप्युपाधेरुन्नयनादिति मन्वानः **टीकाकृत् मीमांसक**रीत्या परिहरति । स्वातन्त्र्येणोपाधिमुद्भावयन् समाधत्ते इत्यर्थः ।

नाव्यापकेतीति । नाव्यापकेत्यादि टीकया हि न बुद्धिमत्त्वमात्रप्रयुक्तं शरीरित्वम्, अपि तु कार्यबुद्धिमत्त्वप्रयुक्तमिति शरीरित्वस्य बुद्धिमत्त्वव्यापकत्वे बुद्धेः कार्यत्वमुपाधिः स्वातन्त्र्येणोक्तः ।

एवं चार्थमिति नाव्यापकेत्यादिनोक्तम् ।

तार्किकरीत्यैवेति । अनुमानबाधाद्युद्भावनेन ।

प्रपञ्चयिष्यतीति । यच्चेश्वरो नाधिष्ठातेत्यादिना ।

टीयाम् ॥ अव्यापकनिवृत्ताविति । अव्यापकस्य शरीरित्वस्य निवृत्तौ ।

अव्याप्यनिवृत्तेरिति । बुद्धिमत्त्वनिवृत्तेः ।

परः प्राह—[1]**कारणं चेदिति ।** कारणं शरीरम्, कार्यस्य बुद्धेः ।

सिद्धान्त्याह—**भवेदिति ।**

अस्येति । ईश्वरस्य ।

न साहित्योपलम्भं निरुणद्धीति । कार्यज्ञानस्य शरीरादिना ।

अस्मादेवेति । घटसाधर्म्यादुत्पत्तिमत्त्वादेव ।

साधर्म्यमात्रेणेति । न ह्युत्पत्तिमत्त्वमुपादानाद्यभिज्ञकर्तृकत्वस्येव शरीरादेः प्रयोजकमिति ।

उने ॥ दृष्टान्तस्त्विति । तृणादिविकारकारित्वादग्निमद्धिममित्ययं विशेषविरोधविषयः ।

तादृशे च पाके इति । रूपादिपरावृत्तिमात्ररूपे ।

न हि सौरस्येति । सौरं हि तेजो हिमेऽप्यस्तीति भावः ।

---

1 J करणं

विरोधादिरिति । आदिशब्दात् साध्यसामान्यनिवृत्तिः ।

अग्निरिति । दर्शनस्पर्शनग्राह्यः ।

तस्येति । अग्नेः ।

अतादृशस्य त्विति । दर्शनस्पर्शनग्राह्यस्य ।

व्यापकानुपलब्ध्येति । वह्नेर्व्यापकस्योद्भूतौष्णस्पर्शस्य विशेषस्यानुपलब्ध्या अनुमानं तृणादिविकारकारित्वं बाध्यते इत्येवंविधेन विशेषविरोधेन रिक्तं यथा तृणादिविकारकारित्वादग्निमद्भिमित्यनुमानमित्यादिकं वचः ।

चन्दनदहनेति । कटुकधूमवत्त्वेन हि साध्यस्य चन्दनदहनवत्त्वस्य विशेषस्य विरुद्धमेवाचन्दनदहनवत्त्वं सिध्यति ।

साध्यसामान्यनिवृत्तिरिति । क्षित्यादिकर्तुः शरीरित्वे विशेषे निवर्तमाने तद्व्याप्तस्य कर्तृत्वस्यापि निवृत्तिरित्येवं या साध्यसामान्यस्य निवृत्तिरुक्ता सा ।

विशेषस्येति । नित्यसर्वविषयज्ञानवत् कर्तृपूर्वकत्वरूपस्य ।

अप्रतीतेनेति । अशरीरित्वादिना विशेषेणाप्रतीतेन सता सह विरोधादि यथेह दृष्टान्तानुसारेणेत्यादि प्रकारैरुद्भावितं यथा प्रत्येतुमशक्यम् ।

तस्येति । अप्रतीतस्य ।

तत्सहकारीति । सामान्यसंबन्धः सहकारी यस्याः सा पक्षधर्मता तद्वशादप्रतीतेऽपूर्वविशेषे पर्यवसानम् ।

अलौकिक इव वाक्यार्थ इति । अपूर्वे वाक्यार्थे यथा पर्यवसानम् ।

इति प्रमाणवृत्तमिति । अयं प्रमाणमार्गः ।

टीयाम् ॥ पक्षधर्मताबलमेव स्फुटीकरोति—**रूपाद्युपलब्धिगतमिति** ।

उने ॥ **इच्छाद्याश्रयस्येति** । आत्मनः ।

इत्युररीकृत्येति । एवंविधपराभिप्रायं हृदि कृत्वा ।

तत्प्रतीताविति । तावदर्थप्रतीतौ ।

परिदृष्टेति । परि समन्ताद् दृष्टं सामर्थ्यं येषां तानि परिदृष्टसामर्थ्यानि यानि कारणानि तेषां प्रयोक्तुः ।

सर्गादिकार्येति । सर्गादौ यत्कार्यं तस्य पक्षीकरणे ।

विशेषाप्रतीताविति । यदि विशेषो न प्रतीयते तदा ।

शब्दोपात्तेति । शब्देन सकर्तृकत्वादिनोपात्तं यत् सामान्यं तस्य या प्रतीतिः, तस्या [780a] अपर्यवसानात् ।

न ह्याश्रयादीति । यदि ह्याश्रयादिशब्दानां क्षित्यादिभ्योऽन्योऽर्थः स्यात, क्षित्यादीनां विरुद्धो वार्थः स्यात् तदा असंभावितत्वात् क्षित्यादीनामवश्यं प्रतिक्षेपेणेच्छादयः क्वचिदाश्रिताः । कोऽर्थः ? क्षित्यादिद्रव्याष्टकातिरिक्तद्रव्याश्रिता इत्येवमिच्छादिपदानामाश्रयादिपदैरन्वयः स्यात् । यदा त्वाश्रयादिशब्दाः क्षित्याद्यर्था अपि तदा क्षित्यादिपारतन्त्र्यं प्रतीत्य शब्दार्थप्रतीतेः पर्यवसानादिच्छादयः क्षित्याद्याश्रिता इत्यन्वयः स्यात् । केवलं मानसप्रत्यक्षवेद्यत्वादिभिः प्रमाणान्तरैर्बाधस्य पर्यालोचने अनुपपत्तिरित्यन्वयसाधनादन्यदेतद्व्यतिरेकिसाधनमिति भावार्थः ।

टीयाम् ॥ वरमेकमेवालौकिकं बुद्धिनित्यत्वं कल्पितमिति । दृष्टं हि रूपादीनां गुणानामाश्रयभेदेन नित्यत्वमनित्यत्वं चेत्युक्तं, तथा बुद्ध्याद्यपि भविष्यतीति मन्यते । एतेनाशरीरित्वविशेषप्रतिपादनेन शरीरित्वाशरीरित्वविशेषानुपपत्तेर्निर्विशेषस्य च सामान्यस्य सिद्ध्यभावात् साधनानर्हे सामान्ये साधनं ब्रुवाणः पुरुषो निगृह्यते । न च साधनस्य किञ्चिद्दूषणमिति यदुच्यते तत्प्रत्युक्तं परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वं हि कर्तृत्वं न शरीरित्वं सुषुप्तस्योदासीनस्य च कर्तृत्वप्रसङ्गात् । तच्च प्रयोक्तृत्वलक्षणं कर्तृत्वमशरीरस्यापि निर्वहति, यथा स्वशरीरप्रेरणायामात्मनः । यच्च तस्य स्वकर्मोपार्जितं शरीरं तत्प्रेर्यं न प्रेरणोपायः स्वात्मनि क्रियाविरोधादित्यलम् ।

उने ॥ कारणैकदेशेनेति । अदृष्टादिना ।

कार्यमिति । तनुभुवनादि ।

कारणान्तरमिति । चेतनम् ।

टीयाम् ॥ अदृष्टवदिति । मतुबन्तम् ।

उने ॥ युक्तेस्तुल्यत्वेनेति । कारणत्वाविशेषेऽपि यथा चेतनं विनापि अदृष्टादितः कार्योपपत्तिः, तथा अदृष्टाद्यपि विना कार्योपपत्तिरित्येवं तुल्यत्वम् ।

अचेतनत्वं चेति । अचेतनोपादानत्वादित्येवं प्राक् हेतूकृतम् ।

टीयाम् ॥ अधिष्ठानस्येति । आत्मना ।

अपक्षताधर्मिण इति । अनुपलब्ध्या बाधितत्वादीश्वरस्य सन्दिग्धसाध्यधर्मत्वाभावात् ।

अन्यथेति । अन्यथा पक्षेण व्यभिचारोद्भावनेनानुमानवेलायां साध्यानुपलब्धिबाधितत्वेनेत्यर्थः ।

वस्तेति । छागः ।

उने ॥ दृश्यस्य बाधितत्वेनापीति । यथा दृश्यस्य कर्तुर्बाधितत्वेनातीन्द्रियकर्तास्तीति भवतेष्यते तथा ।

ननु यथा व्यक्तिसामान्यव्यङ्ग्यं सत्त्वादिपरमाणुष्वतीन्द्रियं यथा वा पार्थिवव्यक्तिव्यङ्ग्यं पार्थिवपरमाणुषु पार्थिवत्वमतीन्द्रियं यथा वा रूपादिविशेषव्यङ्ग्यं परमाणुगतरूपादिषु रूपत्वादिसामान्यमतीन्द्रियं, तथा शृङ्गमपि व्यक्तिमात्रव्यङ्ग्यं पार्थिवव्यक्तिव्यङ्ग्यं रूपादिविशेषव्यङ्ग्यं वा सदतीन्द्रियं भविष्यत्यत आह—**व्यक्तिमात्रेति ।**

तत्प्रत्यभिज्ञानेति । शृङ्गमिदमिति प्रत्यभिज्ञानप्रसङ्गात् ।

तत्संस्थानेति । शृङ्गसंस्थानरहितेषु ।

तदवयवेष्वपीति । शृङ्गशकलेष्वपि शृङ्गोपलम्भापत्ती रूपादिविशेषस्य सत्त्वात् ।

हेताविति । उत्पत्तिमत्त्वे ।

साध्यसामान्येऽपीति । आस्तामशरीरिकर्तृत्वरूपसाध्यविशेषे कर्तृमत्त्वमात्ररूपसाध्यसामान्येऽपि ।

साधनसामान्यमिति । उत्पत्तिमत्त्वमात्रम् ।

टीयाम् ॥ [780b] तमेवोत्पत्तिमतो विशेषमाह—**यदृष्टेरिति ।** यस्य विशेषस्य दृष्टेः ।

सेति । बुद्धिः ।

यद्बुद्धीति । यद्विशेषरूपं बुद्धिमतो यौ भावाभावौ तदनुविधायिनौ भावाभावौ यस्य तत् तथा ।

तेनेति । बुद्धिमत्त्वेन ।

तज्जातीयं तथेति । बुद्धिमत्कार्यम् ।

अन्यदपि तज्जातीयमिति । उत्पत्तिमद्घटादिजातीयम् ।

तथा भवदिति । बुद्धिमदन्वयव्यतिरेकानुविधायि भवत् ।

तथा न स्यादिति । बुद्धिमद्धेतुकम् ।

उने ॥ सिद्धान्तिनो गूढाभिसन्धिं प्रकटयितुं पराशयमाह—**ननु कारणेति** ।

स एवेति । विशेष एव ।

तद्गतामिति । विशेषगताम् ।

गूढाभिसन्धिं प्रकटयति—**अयं त्विति** ।

अवान्तरविशेषेष्विति । कृतमिति बुद्धिविषयाणां विशेषेः ।

न तद्गतां व्याप्तिमुपजीवतीति । कृतमिति बुद्धिविषयोऽपि यो घटः पटो लगुडादिर्वा अवान्तरविशेषः स बुद्धिमद्धेतुक इत्येवमवान्तरविशेषगतां व्याप्तिं कृतमिति बुद्धिविषयत्वं विशेषो न ह्युपजीवति घटत्वादेरवान्तरविशेषस्य कुम्भकारादिबुद्धिमद्विशेषं प्रति प्रयोजकत्वात् ।

एतस्मिन् विशेषे इति । कृतमिति बुद्धिविषयत्वे उत्पत्तिमतो विशेषे ।

तत एवेति । कृतमिति बुद्धिविषयत्वलक्षणस्य विशेषस्य शरीरिकर्तृकत्वं विशेषं प्रति प्रयोजकत्वादेव ।

विशेष इति । कृतमिति बुद्धिविषयत्वरूपः ।

टीयाम् ॥ **तदयुक्तमिति** । यो हि विशेषेण व्याप्तिमिच्छति, इच्छत्यसौ सामान्ये नापि । अवर्जनीयत्वात् सामान्यरहितस्य विशेषस्याभावात् । तथा च सामान्येन व्याप्तौ सिद्धायां बुद्धिमत्कर्तृत्वे सिद्धे क्षित्यादीनां तदुपादानाद्यभिज्ञा अस्मदादयो मा भुवन् कर्तारो,

नित्यज्ञानस्तु तदुपादानाभिज्ञो भविष्यतीत्यर्थः ।

तदुपादानादिशक्यज्ञानत्वादीति । तदुपादानादेर्यच्छक्यज्ञानत्वमस्मदादिभिस्तदादि ।

उने ॥ विषयभेदव्यवस्थेति । तदुपादानादिशक्यज्ञानत्वादिकल्पनायाः कार्यज्ञानं विषय इति रूपा ।

सैवेति । ज्ञाननित्यतैव । पक्षधर्मताबलेन ज्ञाननित्यत्वमन्तर्भूतं सिध्यत्यत आह— **सिद्धावन्तर्भूयेति द्रष्टव्यमिति ।**

विपक्षे इति । क्षित्यादेरुत्पत्तिमतोऽप्यकर्तृकत्वे ।

तच्चेति । बाधकम् ।

टीयाम् । स्वभावप्रतिबद्धमिति । कर्तृ ।

ननु सर्वज्ञपूर्वका इति प्रतिज्ञा, ततः, उत ज्ञातृमात्रपूर्वकत्वं निषिध्यते इति विकल्पः कथमत आह—**सर्वज्ञग्रहणं त्विति ।**

उने ॥ तच्चेति । न ज्ञातृपूर्वा इति ।

आकाशादिनेति । प्रमेयत्वसत्त्वादिवतापि नैकदेशदर्शिपूर्वकेण ।

यस्त्विति । मीमांसकः ।

प्रकरणमनपेक्ष्येति । स्वस्याप्रसिद्धमपि साधनप्रस्तावसिद्धं सर्वज्ञमनपेक्ष्येत्यर्थः ।

टीयाम् ॥ तत्साधकप्रमाणेति । ईश्वरस्य तद्बुद्धेर्वा साधकं प्रमाणमुत्पत्तिमत्त्वादि । तेन विरुद्धम् ।

तद्विरोद्धुमिति । तत साधकं प्रमाणम् ।

ताभ्यामिति । आगमानुमानाभ्याम् ।

उने ॥ ज्ञाननित्यतायां शरीरवदिति । यथा ज्ञाननित्यतायां शरीरस्यानुपयोगः ।

ईश्वरज्ञानादीनां नित्यत्वात् कार्यकारणरूपोऽविनाभावो न घटते। अत आह—**अविनाभाव** इति। प्रयत्नेच्छयोर्विषयोपस्थापनं [781a] ज्ञानेनैव संपद्यते यदि स्वभावादेवेच्छाप्रयत्नौ विषयावच्छेदे प्रवणौ स्यातां तदैतयोर्ज्ञानादभेद एव स्यात्। तत ईश्वरेच्छाप्रयत्नौ नित्यत्वेन स्वोत्पत्त्यर्थं ज्ञानमनपेक्षमाणावपि विषयोपस्थापनायापेक्ष्येते। तथेच्छाविषयस्यैव कार्यस्य प्रयत्नेन संपादनादन्यथा सर्वस्यैवैकदोत्पादनप्रसङ्गात्। प्रयत्नोऽपि कार्योत्पादं प्रति इच्छापेक्ष इत्येषामविनाभावो विषयसंपादनकृतः।

टीयाम् ॥ **अस्मादिति**। उत्पत्तिमत्त्वात्।

एवंविध इति। अनित्यासर्वविषयबुद्धिमान्।

तद्भावादिति। संबन्धभावात्।

एतेनेति। उत्पत्तिमत्त्वस्य सम्यग्हेतुत्वव्यवस्थापनेन।

उने ॥ **परेषामिति**। **मीमांसका**दीनाम्।

टीयाम् ॥ **उपोद्बलयतीति**। द्रढयति।

एतस्य चाक्षरस्येति। ईश्वरस्य।

प्रशासने इति। तृतीयार्थे सप्तमी। प्रयत्नेनेत्यर्थः।

गार्गीति। संबोधनम्।

विधृते इति। धारिते।

जवन इति। प्रयत्नवान्।

ग्रहीतेति। ज्ञानवान्।

॥ इतीश्वरोपादानताप्रकरणं पूर्णम् ॥

॥ आकस्मिकत्वप्रकरणम् ॥

[४.१.२२–२४]

नन्वनिमित्ततो भावोत्पत्तिरित्यनेन[1] शरीरादेर्निमित्तकारणाभाव एवोच्यते, न तु सर्वथा कारणाभावः। तत्कथमिदमाकस्मिकवादं **चार्वाक** आहेति अत आह—**गुड-जिह्विकया शरीरादौ निमित्तनिराकरणमुखेनेति।**

तदुपनेययोरिति। घटादौ कार्ये हि समवाय्यसमवायिकारणे कुम्भकारादि-भिर्निमित्तकारणैरुपनीयेते।

ननु निमित्तकारणेन समवाय्यसमवायिनौ नोपनेष्येते, ततो निमित्तनिवृत्तावपि न तयोर्निवृत्तिर्भविष्यति। अत आह—**अनुपनेयत्वे वेति।**

सर्वदा सन्निध्यसन्निध्योरिति। यदि समवाय्यसमवायिनोः सर्वदा सन्निधिः, तदा कार्यस्य नित्यं सत्त्वम्। यदा च सर्वदा असन्निधिस्तदा नित्यमसत्त्वं वा स्यात्। कादाचित्कत्वं तु कार्यस्य दृश्यते। तस्मात् तदनपेक्षस्य समवाय्यसमवाय्यनपेक्षस्यास्य कादाचित्कत्वमभ्युपेयम्। तथा चाकस्मिकत्वमिति **परा**भिप्रायः।

अत एवेति। यत एव परस्य यथोक्तोऽभिप्रायः।

कारणमात्रप्रतिषेध इति। सर्वकारणप्रतिषेधः।

अत इति। यतो यथा **सूत्रं** हेतुहीनः प्रयोग उत्पत्तिमत्त्वादिति घटादिभिर-नैकान्तिकः, अतो हेतुं सूचयतीत्येतावता संबन्धः। अत एवेत्यादि तु प्रयोगप्रस्तावात् साध्यपरिशुद्ध्यर्थमेवोक्तम्।

वाके ॥ शरीरेन्द्रियादेरनिमित्तोत्पत्तित्वे साध्ये कण्टकतैक्ष्ण्यादिदर्शनादिति व्यधिकरणो हेतुरत आह—**तदिदं दृष्टान्तसूत्रमिति**। तेन पञ्चमीनिर्देशेऽपि कण्टकतैक्ष्ण्यादिव-दिति द्रष्टव्यम्।

अनिमित्तरचनाविशेषा इति किं निमित्तमात्रं निषिध्यते? उताहो अदृष्टमिति? तत्र प्रथमं कल्पं तावद् दूषयति—**नानुपलभ्यमाननिमित्तानामिति।**

द्वितीये तु पूर्वोक्तमेव कर्मनिमित्तत्वं स्मारयति—**उक्तं चेति।**

॥ इत्याकस्मिकत्वप्रकरणं संपूर्णम् ॥

---

1 N. i. 22

॥ सर्वानित्यताप्रकरणम् ॥

[४.१.२५–२८]

उने ॥ एवं तावत् समर्थितमिति । शून्यतोपादानताप्रकरणादिभिः कार्यस्य व्यक्तोपादानत्वादिव्यवस्थापनेन ।

केचिदिति । बौद्धाः ।

अपरे इति । **सांख्याः ।**

एतदिति । प्रकरणम् ।

उत्पत्तिधर्मकत्वादि[781b]त्येतावत्येव हेतावनित्यत्वसाधके विनाशधर्मकत्वादित्यनर्थकं विनाशधर्मकत्वापरपर्यायेऽनित्यत्वे साध्ये साध्याविशिष्टं चेत्यत उत्पत्तिविनाशधर्मकत्वादित्येतावन्न हेतुवचनं किं तर्हि ? व्याप्तिवचनमित्यभिप्रायवानाह—**भाष्यकृद्व्याख्येति ।** तदुभयमुत्पत्तिविनाशधर्मकमिति विज्ञायते । तस्मात् सर्वमनित्यमिति वदता हि **भाष्यकृता** उत्पत्तिविनाशधर्मकत्वस्य हेतुत्वं व्याख्यातम् । अतः **टीकाकृता** हेतोरित्युक्तमित्यर्थः ।

टीयाम् ॥ हेतोर्गमकत्वं दर्शयितुं पृच्छतीति । साध्यस्वरूपे ज्ञाते हि हेतोः साध्यगमकत्वं गम्यते इति साध्यस्वरूपं पृच्छतीत्यर्थः ।

साध्यधर्मिरूपमिति । साध्यस्यानित्यत्वस्य यद्धर्मि सर्वमिति तस्य रूपम् ।

दृष्टान्तनिमित्तत्वादिति । दृष्टान्तो निमित्तं यस्य तद्भावात् ।

उने ॥ व्याप्तिपरतापीति । उत्पत्तिधर्मकस्य विनाशधर्मकत्वादिति व्याख्यानात् ।

यद्यपि प्रध्वंसाभिप्रायेणेति । नित्यताशब्दस्य प्रध्वंसार्थत्वे नानित्यत्वेत्यादि **सूत्रं** यद्यपि सदुत्तरं स्यादित्यर्थः ।

अनैकान्तिको हेतुरिति । उत्पत्तिधर्मकत्वादित्ययं हेतुः प्रध्वंसेनोत्पत्तिधर्मकेणापि नित्येनानैकान्तिकः ।

उत्तरत्रेति । यदि प्रध्वंसोऽनित्योऽभ्युपेयेत तदाभावोन्मज्जनेन भावस्य नित्यत्वापत्तिः । अतः सर्वमनित्यमिति विरुध्येतेत्यर्थः ।

प्रयुक्तवानिति । सिद्धान्त्येकदेशी ।

रूपादिवदिति । यथा रूपादिधर्मिणा समानकालीनः ।

तद्विरहादिति । अनित्यताविरहात् ।

तद्विपरीतधर्मेति । तद्विपरीतोऽनित्यताविपरीतो नित्यतालक्षणो धर्मो यस्य स तथा ।

वाके ॥ अकारणकमिति । अप्रमाणकम् ।

प्रसज्योल्लेखं पर्युदासोल्लेखं च दर्शयन्नुत्तरपदसिद्धिं स्पष्टयति— **यदि नित्यं नेति** ।

उने ॥ एकदेशोपगममिति । उपन्यस्य कानिचित् निषिध्यन्ते कानिचिदभ्यनुज्ञायन्ते इति या प्रागेकदेशाभ्यनुज्ञोक्ता ताम् ।

टीयाम् ॥ यस्य सन् धर्मीति । यस्यानित्यतालक्षणस्य धर्मस्य विद्यमानो धर्मी स्यात् तस्य धर्मस्य योगादनित्यः स्यात् । स एव धर्म्येव तु कदाचित् न भविष्यति तत् कथमनित्यताभावाच्च सर्वमनित्यं न दोष इत्याशङ्कार्थः ।

वाके ॥ सिद्धसाध्यतामेवोपसंहरति—**एवं च सतीति** ।

सन्दिह्यमानानित्यत्वमिति । भूभूधरादि ।

उने ॥ उत्तरपदसिद्धिवदिति । शब्दगतिमभिसन्धायेति । अनित्यमिति ब्रुवाणेनावश्यं नित्यमित्युत्तरपदमभ्युपेयम् । तथा च नित्यमित्युत्तरशब्दार्थस्य नित्यत्वस्य सिद्धिरिति स्फुटार्था । योत्तरपदसिद्धिवदित्यादिका **टीका** सा शब्दगतिमभिसन्धायानित्यमिति शब्दस्य गतिमभिप्रेत्य ।

अर्थगतौ तु यदर्थः स्यात् तमर्थमाह—**अर्थगतौ त्विति** ।

प्रधानत्वादिति । एतेनोत्तरपदमित्यत्रोत्तरशब्दस्य प्रधानार्थतोक्ता ।

तदर्थस्येति । तस्या आकाशाद्यनित्यमिति रूपायाः प्रतिज्ञाया अभिधेयस्य ।

धर्मिग्राहकप्रमाणबाधादिति । धर्मिण आकाशादेर्ग्राहकं यत्प्रमाणं तेन नित्यस्यैवाकाशादेर्ग्रहणादनित्यत्वस्य बाधः ।

॥ इति सर्वानित्यताप्रकरणं संपूर्णम् ॥

॥ सर्वनित्यताप्रकरणम् ॥

[४.१.२९–३३]

[782a] **उने** ॥ **भेदे** इति । सर्वस्य पञ्चभूतानां च ।

तन्नित्यत्वे इति । भूतानां नित्यत्वे ।

तदसिद्धाविति । यदि भूतानां नित्यत्वमसिद्धं तदा ।

हेतुरिति । पञ्चभूतनित्यत्वादित्ययम् ।

एतदपीति । पञ्चभूतात्मकत्वमपि हेतुः ।

एतदपि कुत इति । उपलम्भनमपि ।

मत्वेति । आशङ्क्येत्यर्थः ।

जघन्यन्यायमिति । परव्युदासात्पश्चाद्भावित्वमात्रं स्वपक्षसाधनस्य जघन्यो न्यायः ।

टीयाम् ॥ **सिद्धान्तमाहेति** । **सूत्रकारः** ।

उने ॥ **व्यपदेशमिति** । मृद्घटो मृच्छरीरमिति व्यपदेशः तम् । तल्लक्षणावरोधाद-प्रतिषेध इति पर**सूत्र**ग्रहणेनोत्थाप्य निवारयति—नोत्पत्तितत्कारणोपलब्धिरित्युत्तर**सूत्र**ग्रहणे-नेत्यर्थः ।

वाके ॥ यदिदमुत्पद्यते विनश्यतीति च मन्यसे तद्भूतलक्षणहीनमर्थान्तरं गृह्यते । ततो नित्यैर्भूतैस्तादात्म्यात् तदपि नित्यमित्यर्थः ।

नोत्पत्तितत्कारणोपलब्धेरिति । कारणेन तन्त्वादिना समानगुणस्य कार्यस्य पटादेरुत्पत्तिरुत्पत्तिकारणं च दृश्यते । तेन भूतलक्षणयोगो भूतकार्यत्वेऽप्युपपद्यमानो न कार्यकारणयोस्तादात्म्यं गमयतीति **सूत्रार्थः** ॥

भाष्ये ॥ **न चोत्पत्तिरुत्पत्त्युपलब्धिस्तत्कारणोपलब्धिश्च शक्या प्रत्याख्यातुमिति** । उपलब्धित्वादेव ।

स खल्विति । कार्योत्पादः ।

टीयाम् ॥ तदर्थिनामिति । अभिमतोत्पत्त्यनभिमतविनाशार्थिनाम् ।

प्रवृत्तिरित्याहेति । भाष्यकारः । अत्र **भाष्यकारेण** पञ्चभूतनित्यत्वात् तल्लक्षणावरोधाच्चेत्यनेन हेतुना शब्दादयो न व्याप्ता इत्यभिधाय तस्मादनेकान्त इत्युक्तम् । तत्कथमव्यापको हेतुरनेकान्त उक्त इत्याशङ्क्य यथा**वार्त्तिकं व्याचष्टे—पक्षो हीति ।**

तस्मिन्निति । हेतौ ।

अस्येति । पक्षस्य ।

भाष्ये ॥ सोऽयमिति । सर्वव्यवहारविलोपः ।

टीयाम् ॥ स्वयमिति । स्वतन्त्रः ।

वार्त्तिककार आहेति । तल्लक्षणावरोधादिति **सूत्र**व्याख्याने ।

वाके ॥ यथा च कारणगुणपूर्वकः कार्यगुणारम्भस्तथोक्तमित्याह—**विभक्तन्यायं चैतदिति ।**

सांख्येन गवादिषु घटादि चोत्पद्यमानं विनश्यच्च निह्नुवानेन ज्ञानमात्रमङ्गीकार्यं तत्राह—**यथा च चित्तेति ।**

उने ॥ एकान्ततः तादात्म्यादित्यत्रानेकान्तभेदमित्यत्र च बहुव्रीहिः ।

तमेवेति । अनेकान्तभेदमेव ।

टीयाम् ॥ नन्वस्ति जायते चेति व्याघातः, अत आह—**धर्मिरूपेणेति शेष** इति ।

निवृत्तमप्यस्तीति विरुद्धमत आह—**अत्रापीति ।**

संक्षेपतो यथा**भाष्यं** सूत्रार्थमाह—**उपजनापाययोरिति ।** येयं स्वरूपतो व्यवस्था अयमुपजनः इयं निवृत्तिरिति, या वा विशेष्यतो व्यवस्था अयं धर्म उपजायते, अयं निवृत्त इति, या वा कालतो व्यवस्था इदानीमुपजननिवृत्ती नेदानीमिति, या वा संबन्धितो व्यवस्था अस्य द्रव्यस्य धर्मोपजननिवृत्ती नास्येति, या वानागतत्वादितो व्यवस्था असावनागतोऽतीतो वर्तमान इति, तस्या सर्वस्या अनुपपत्तिरित्यर्थः ।

॥ इति सर्वनित्यतानिषेधप्रकरणं संपूर्णम् ॥

॥ सर्वपृथक्त्वप्रकरणम् ॥

[४.१.३४–३६]

उने ॥ गुणगुणीति । धर्मधर्मिसमुच्चयो वा, भावाभावसमुच्चयो वा, चेतनाचेतनसमुच्चयो वा, दृष्टादृष्टसमुच्चयो वा, नित्यानित्यसमुच्चयो [782b] वा सामग्रीति समर्थितम् ।

स चेति । समुच्चयविरुद्धोऽर्थः ।

घटादिशब्दा एवोदाहृता इति । सर्वो भावसमाख्याशब्द इत्यादिना सर्वे शब्दा अनेकविषया एकपदत्वाद् घटशब्दवदिति प्रयोगं दर्शयद्भ्यां **भाष्यकृद्वार्त्तिककृद्भ्याम् ।**

टीयाम् ॥ नानेकलक्षणैरेकभावनिष्पत्तेरिति **सूत्रम्**[1] । अनेकविधलक्षणै रूपादिभिर्ग्रीवापार्श्वादिभिश्च संबद्धस्यैकस्य भावस्य घटादेरवयविनो निष्पत्तेरस्त्येकमतो न सर्वं नानेत्यर्थः ॥

भाष्यं व्याचष्टे—**अथापीतीति ।**

तल्लक्षणव्यवस्थानादप्रतिषेध इति **सूत्रम्**[2] । तस्य भावस्य लक्षणं संज्ञा शब्दः, तस्य व्यवस्थितत्वादेकत्रैव नियतत्वादप्रतिषेध एकस्य । तथा च, यमहं कुम्भमद्राक्षं यं चास्प्राक्षं तं स्पृशामीति प्रतिसन्धानं रूपादिभ्योऽवयवेभ्यश्चात्यन्तस्यावयविनो व्यवस्थापकमन्यथा रूपादीनां नियतेन्द्रियग्राह्यत्वादवयवानां च नानात्वात् न स्यादीदृशं प्रतिसन्धानम् । एतेन प्रतिसन्धानाख्यप्रत्यक्षबाधितत्वात् कालात्ययापदिष्टो हेतुः परस्येत्युक्तम् ॥

टीयाम् ॥ तदनेन प्रतिज्ञयेति । एकत्वप्रतिषेधेन प्रतिज्ञार्थेन हेत्वर्थस्य समूहस्यापोदितत्वादित्यर्थः ।

भाष्ये ॥ स एवेति । एको भावः ।

टीयाम् ॥ संप्रतीति । समूहमभ्युपयता एकमुपेतव्यम् । तथा चैकप्रतिषेधः प्रतिज्ञार्थो विघटते इत्यर्थः ।

---

1 IV. i. 35 2 IV. i. 36

भाष्ये ॥ समूहे भावशब्देति । प्रत्येकमेकमुद्दिश्य नास्त्येको भाव इति यः प्रतिषेधः स समूहस्य प्रतिषेधः । एकाभावे हि समूहः कुतस्त्यः ? किं कृत्वा ? समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य ।

वाके ॥ सर्वशब्दानां पक्षीकरणे दृष्टान्ताभावः स्यादत उक्तम्—**कुम्भशब्द** इति । पदत्वादित्युक्ते कूर्मरोमशशशृङ्गादिशब्देन व्यभिचारः स्यादत आह—**एकेति** ।

उने ॥ तद्दृष्टेरिति । सौत्रान्तिकदृष्टेः सकाशात् **तीर्थिकदृष्टेर्नैयायिकदृष्टेः** पारमार्थिकत्वात् । कुम्भशब्दानेकविषयत्वस्य हि पारमार्थिकत्वं **सौत्रान्तिक**सिद्धमेव **नैयायिकै**रुक्तमित्यर्थः ।

वाके । शब्दस्यानेकविषयत्वं संवेदनबलेनाप्याह—**पदश्रवणादिति** ।

आधाराधेयभावेनेत्यादि । एतेनान्यथासिद्धत्वं स्वातन्त्र्येणोक्तं पूर्वं त्वतः शब्दादित्यादिना **सूत्रार्थो** विवृत इत्यपुनरुक्तत्वम् ।

टीयाम् ॥ उपेत्य तूच्यत इति । घटादिशब्दानां नानार्थतायामर्थैक्याभावमभ्युपगम्य तूच्यते तल्लक्षणव्यवस्थानादेवाप्रतिषेध इति [1]**सूत्रे**णानेकार्थत्वमप्यत्रासंभवीति ।

वाके ॥ यथैकस्मिन् बहुवचनमाप इति, तथा बहुष्वेकवचनं भविष्यति । अत आह—**प्रैषसंप्रतिपत्त्योरिति ।** प्रैषो नियोक्ता । नियोगः कुम्भमानयेति । संप्रतिपत्तिश्च नियोज्यस्य शब्दादेवावगमः ।

कामे इति । **वैभाषिकादि**भिः कामरूपारूपात्मकं धातुत्रयं परिभाषितम् । तत्र कामधातावष्टद्रव्यकोऽणुरित्युक्तम् । तद् व्याहतं स्यात् ।

उभयत इति । उभयेनेति द्रष्टव्यम् । तत्र यस्मादेकानुपपत्ताविति प्रतिज्ञया हेतोर्विरोध उक्तः । समूहं चाश्रित्यानेन हेतुना प्रतिज्ञाया विरोधो दर्शित इदं च विशेषतो **भाष्ये** व्याख्यातमित्याह—**शेषं भाष्ये** [783a] इति ।

॥ इति सर्वपृथक्त्वप्रकरणं संपूर्णम् ॥

---

1 Cf. IV. i. 36

॥ सर्वाभावप्रकरणम् ॥

[४.१.३७–४०]

उने ॥ प्रकरणान्तरारम्भं दर्शयितुं **टीका**स्थं प्रकरणान्तरारम्भप्रदर्शनपरं पदं गृह्णाति— **संप्रतीति** ।

यावद्भावजातं तत्सर्वमभावो भावेष्वितरेतराभावसिद्धेरिति[1] यथा **भाष्यवार्त्तिक**मुच्यमाने क्वापीतरेतराभावसिद्धिर्न भविष्यतीति भागासिद्धिशङ्का मा भूत्, अतः **टीका**कृत्प्रतिज्ञां व्याचष्टे इत्याह—**भागासिद्धीति** ।

विरुद्ध इति । विरुद्धत्वं च न स्वभावसिद्धेर्भावानामित्युत्तरसूत्र**वार्त्तिके** स्फुटी भविष्यति ।

वाके ॥ **असत्प्रत्ययभावप्रतिषधाभ्यामिति** । अनश्वो गौरगौरश्व इत्यसत्प्रत्ययभावशब्दयोः समानविषयत्वं गौर्नास्त्यश्वो नास्तीति निषेधेन भावशब्दसामानाधिकरण्यम् ।

कथं नास्तीति प्रश्नस्योत्तरम्—**स्थाल्यात्मना चेति** ।

कदा च नास्तीत्यस्योत्तरम्—**अनुत्पन्नो ध्वस्तश्चेति** ।

उने ॥ **तद्वाचिनामिति** । निषेधवाचिनाम् ।

तदालम्बनानामिति । निषेधालम्बनानाम् ।

अस्य तर्कमाहेति । नन्वेवं सर्वे भावाः पररूपेणासन्तः स्वरूपेण सन्त इत्येव सिध्यति, न तु सर्वथा भावानामसत्त्वमित्यतोऽसत्प्रत्ययप्रतिषेधाभ्यां भावशब्दस्य सामानाधिकरण्यादित्यस्य साधनस्य तर्कमाहेत्यर्थः ।

टीयाम् ॥ मा भुवन् विनाशस्वभावाः, ततः किमत आह—**अतत्स्वभावत्वे वेति** ।

सर्वो भावशब्दोऽसत्प्रत्ययसमानाधिकरण इत्युपक्रमेणासंबद्धतां मन्यमान आह— **सर्वे भावशब्दा इत्यर्थ** इति ।

---

1 IV. i. 37

उने ॥ व्यधिकरणतामिति । सर्वमभाव इति साध्येऽसत्प्रत्ययप्रतिषेधाभ्यां भावशब्दस्य सामानाधिकरण्यादिति हेतोर्व्यधिकरणता ।

भाष्ये ॥ अनेकतया वा अशेषतया वेति । सर्वशब्दार्थेन ।

अनेकमशेषं चेति । प्रत्ययेनेति संबन्धः ।

उने ॥ स्ववाग्विरुद्धमिति । अख्यातिगोचर इति स्ववचनेनैव विरुद्धं यः ख्यातेर्न गोचरः, तत्र ख्यातिगोचरतानिषेधो विरुद्ध इत्यर्थः ।

ननु यः ख्यातेर्न गोचरः, तत्र ख्यातिगोचरतानिषेधोऽविरुद्ध एवात आह— **अख्यातिरिति ।** यः सर्वथा न प्रकाशते तत्रास्तामन्यस्य कस्यचिद् धर्मस्य विधिर्निषेधो वा ख्यातिगोचरताया अपि निषेद्धुमशक्यत्वात् ।

न चात्रेति । असति कस्यचित् यो विधिः प्रतिषेधो वा तद्विषयं मूकत्वमेवा-लम्ब्यते । अतोऽसन्न ख्यातिगोचर इत्यत्रापि मूकत्वालम्बनमित्यपि न वाच्यमित्यर्थः ।

वाच इति । असतः ख्यातिगोचरत्वनिषेधविषयाः ।

कालदेशस्वरूपनियतस्येति । असतः ।

कालाद्यनियमेन प्रसङ्गप्रवृत्तिमेव भावयति—**यदि हीति ।**

प्रागिवेति । यथोत्पत्तिकालात् प्रागभावस्वभावो घटादिः तथा यदीदानीमप्यु-त्पादकालेऽपि अभावस्वभावः, तदा यथा तदानीमुत्पत्तिकालात् प्राक् न प्रतीयते, तथोत्पत्ति-कालेऽपि न प्रतीयेतेति कालानियमेन प्रसंगे एवमन्यत्रेवेत्यादिना देशनियमेन प्रसङ्गोऽपट-रूपतयेवेत्यादिना च स्वरूपानियमेन प्रसङ्गो ज्ञेयः ।

अपटरूपतयेवेति । यथा अपटरूपतया घटादिरूपतया पटोऽसन्, तथा पटरूपतयापि यद्यसन्, तदा यथा तद्रूपतया अपटरूपतया न प्रतीयते [783b] तथैतद्रूपत-यापि पटरूपतयापि न प्रतीयेत ।

ननु न प्रतीयते एव पटो घटे पटरूपतया, अतः कथं पटो नाभावरूपोऽत आह— **क्वचित् तथेति ।** क्वचित् घटे तथा पटरूपतया न प्रतीयते इति यदि अभावरूपः पटः, तदा अत्रापि पटेऽपि अन्यथा अपटरूपताया अन्येन प्रकारेण पटरूपतालक्षणेन न प्रतीयेतेति ।

वाके ॥ सर्वपदे चेति । यदनेकं सदशेषं तत्सर्वपदवाच्यम् । तच्चैकैकस्य भावस्यानङ्गीकारे व्याहन्यते इत्यर्थः ।

व्यावर्तयसीति । निषेधसि ।

उने ॥ हेतुसिध्यसिद्धिविरोधादित्यर्थ इति । यदि हि स्वभावसिद्धिलक्षणस्य हेतोः सिद्धिः, तदा भावानां तुच्छत्वस्य विरोधः । अथासिद्धिः, तदापि यथा असन् गौरश्वात्मनेति स्यात् तथा असन् गौर्गवात्मनेत्यपि स्यादिति गोर्गवात्मनाप्यसत्त्वप्रसञ्जनप्राप्त्या भावानां तुच्छत्वस्य विरोध इति भावः ।

वाके ॥ वैशेषिकश्चेति । अनुवृत्तिर्व्यावृत्तिः इह प्रत्ययहेतुत्वं च वैशेषिको धर्मः ।

उने ॥ तथापीति । यद्यपि स्वभावसिद्ध्यसिद्धो भावः ।

प्रश्नपूर्वकमितीति । प्रश्नपूर्वकमसत्प्रत्ययेत्यादि ।

भाष्ये ॥ अव्यतिरेकप्रतिषेध इति । तादात्म्यनिषेधे ।

अव्यतिरेकेत्यादि स्ववाक्यमेव व्याचष्टे—**आसन् गौरश्वात्मना अनश्च** इति ।

उने ॥ तर्कविकल्पदोषानिति । तर्कस्य यौ विकल्पौ अमी भावा नित्या अनित्या वेत्येतौ, तयोर्दोषान् ।

विनश्यतीति । विनाशस्वभावो भवतीति ।

भ्रमनिरासार्थमाह—**विनाशोऽस्य जायत इत्यर्थ** इति ।

एतदेवेति । अविनाशस्वभावत्वमेव ।

उने ॥ बहुव्याघातेति । परापेक्षत्वमेवास्वभावत्वसाधनाय प्रयुज्यमानं साध्यादि परापेक्षं यदि निःस्वभावं तदा न स्वसाध्यसाधकम् । अथ सस्वभावं तदा व्याघात इत्यादयो बहवो व्याघाताः ।

नापि दण्डादीति । यद्यपि घटादिकार्यनिचया दण्डादिकारणापेक्षाः, तथापि दण्डादिकारणचक्रा न घटादिकार्यापेक्षा इति परस्परापेक्षत्वाभावः ।

तत एषामस्वाभाविकत्वं प्रसाध्येति । इतरेतराश्रयप्रसङ्गेन ।

व्यवहर्तव्यत्वेन तानुदाहृत्येति । सर्वे भावा अस्वभावा व्यवहर्तव्यत्वा- [त्] ह्रस्वत्वदीर्घत्वादिवदित्येवम् इत्यत आह—**समाधत्ते इतीति ।** समाधानं ददता हि **वार्त्तिककृता** अपेक्षायामनपेक्षायां चेत्यादिना ह्रस्वत्वदीर्घत्वादीनामपि न परस्परापेक्षे- त्यत इतरेतराश्रयप्रसङ्गाभावेन न निःस्वभावत्वमित्युक्तम् । तथा च व्यवहर्तव्यत्वेन ह्रस्वत्व- दीर्घत्वादीनुदाहृत्य सर्वभावानामस्वाभाविकत्वं प्रसाधयिष्याम इति परेषां मनो दरिद्रमनोरथ इति दर्शितम् ।

तदेवेति । परस्परग्रहणाधीनविकल्पत्वम् ।

टीयाम् ॥ पूर्वसंख्येति । एकत्वादिका ।

परसंख्येति । द्वित्वादिका ।

उने ॥ भावाभावरूप इति । स्वरूपापेक्षया भावरूपः, पररूपापेक्षया चाभावरूपः । ननु घटादिधर्मः स्वोत्पत्तौ वस्त्वन्तरं मृत्पिण्डाद्यपेक्षते एव, उत्पत्तिमतः सर्वस्यापि वस्त्वन्त- रापेक्षित्वात् । अत आह—**भिन्नत्वेन निरूपितमिति शेष** इति । भिन्नत्वेन गृहीतं पटादिवस्त्वंतरमित्यर्थः ।

टीयाम् ॥ तदधिकरणमिति । परत्वापरत्वाधिकरणं घटादि ।

॥ इति सर्वाभावप्रकरणं संपूर्णम् ॥

॥ संख्यैकान्तवादप्रकरणम् ॥

[४.१.४१–४३]

[784a] **उने ॥ अनुभवेत्यादि ।** पूर्वस्मिन् सर्वाभावप्रकरणे यः शून्यतावादस्य परिग्रहः तस्यानुभवव्याघातोऽपरस्मिंश्च संख्यैकान्तप्रकरणे यच्छून्यतावादस्य परिवर्जनं तस्यानुभवाव्याघातोऽभावस्य च भावपूर्वकत्वेन व्याघातानन्तरो व्याघात इत्यतः सर्वाभाव-प्रकरणानन्तरं संख्यैकान्त प्रकरणारम्भ इति भावः ।

सर्वमेकमिति । सर्वमेकं सदविशेषादिति सर्वं ज्ञानतो विवक्षातो वचनतश्च व्याहतम् । सर्वमिति हि अनेकविषयं ज्ञानं विवक्षावचनं च । एकमिति चैकविषयं ज्ञानं विवक्षावचनं च । ततः प्रतिज्ञापदयोर्व्याघातः । तथैकमिति साध्यस्यैकत्वस्य ज्ञानं विवक्षा-वचनं सदविशेषादिति च द्वितीयस्य साधनस्येति साध्यसाधनयोर्व्याघातः ।

टीयाम् ॥ तत्रेति । अर्थे ।

अकिञ्चित्करस्येति । ज्ञानस्य ।

फलमिति । ज्ञातताम् ।

उने ॥ तद्विषयतयेति । सोऽर्थो विषयो यस्य स तद्विषयः तद्भावेन ।

न प्रकाशसंभव इति । न प्रकाशः स्यादित्येवम् ।

किमायातमद्वैतस्येति । ज्ञानानामेवानेकत्वात् न भवदभिमतब्रह्माद्वैतसिद्धि-रित्यर्थः ।

टीयाम् ॥ सेति । व्यावृत्तिः ।

स्वरूपमात्रावसितानीति । स्वस्वरूपनिमग्नानि ।

उने ॥ अद्वैतस्य किमायातमिति । अद्वैतं कथं सिध्यतीत्यर्थः ।

न हि प्रमाणेति । प्रमाणाभावेन हि प्रमाणव्यावृत्तिरेव स्यात् न तु प्रमेयव्यावृत्तिः प्रत्यक्षादिप्रमाणाविषयाणां मूलकीलादीनामपि व्यावृत्तिप्रसङ्गात् । तस्मात् प्रमाणाभावेऽपि परस्परव्यावृत्तिर्मूलकीलादिवद् भविष्यतीत्याशङ्कार्थः ।

सर्वथेति । व्यावृत्तिर्भविष्यतीत्याशङ्कितुमपि तदा शक्यं यदीयं मूलकीलादिवत् कदाचिद् गृह्येत । सर्वथा त्वसौ न गृह्यते । तथा अग्रहणे च सर्वथा अग्रहणे च सति ।

नन्वावरणापगमादिसामग्रीसद्भावान्मूलकीलादिर्गृह्यते, अस्यास्तु सामग्र्यभावः । अतो न गृह्यते इत्येवं या सामग्र्यभावात् संभावनाशङ्का तस्याश्चानुपपत्तेरिति उत्तरार्थः ।

टीयाम् ॥ किं च तद्व्यावृत्तिग्रहणं निषेध्यनिषेधाधिकरणग्रहणसमकालं वा स्यात्, उत्तरकालभावि वा ? न तावदाद्यः कल्प इत्याह—**न च निषेध्येति** ।

द्वितीयं पक्षं दूषयति—**न चैकमिति** । एकं क्षणिकमेवं मा भूत् ज्ञानद्वयं तु भवेत् । अत आह—**न चैकमिति** ।

अथेति । अथानन्तरं ज्ञानान्तरं निषेधं गृह्णाति ।

तस्मिन्निति । निषेध्यनिषेधाधिकरणे ।

ननु नास्माकं **बौद्धानां** ज्ञानस्वरूपातिरेकिणी व्यावृत्तिरस्त्यतः स्वरूपग्रहण एवान्यव्यावृत्तिग्रहः । अत आह—**न च ज्ञानेति** ।

ते इति । भावाः ।

उने ॥ **एतदिति** । सर्वमेकमित्येतत् ।

टीयाम् ॥ **उक्तादेव क्रमादिति** । सा हि यद्यतो व्यावर्तते, तदुभयग्रहे गृह्यते इत्यादिना ।

मृत्युरिति । मरणान्तरम् ।

पश्यतीत्यादिका इति । आदिपदेन सदेव इत्यादि [1]श्रुत्युपादानम् ।

उने ॥ **यथोक्तसमुच्चयेति** । गुणगुणिसमुच्चयादिर्यथोक्तः समुच्चयः ।

---

1 Cha. Upa. VII

तदुपन्यास इति । अद्वैतोपन्यासः ।

द्वयोरिति । नित्यानित्ययोः ।

अन्यतरेति । अथान्यतरस्य नित्यस्य निवृत्तिः, तदेकशेषस्य नित्यस्य स्थितौ पुनरपि कार्योपयोगिकादाचित्कसामग्र्यसंभव एव ।

अथ निवृत्तो योऽनित्यः, तज्जातीयस्यान्यस्य [784b] संभवे नोक्तो दोषो भविष्यति, अत आह—**तज्जातीयेति** ।

टीयाम् ॥ ननूक्तं ज्ञप्तिर्ज्ञेयतां नातिवर्तते, अत आह—**प्रमेयव्यपदेशमिति** ।

पशुपाशेति । पशुः संसार्यात्मा । पाशः कर्म ।

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्यामिति [1]सूत्रे **कारणं** प्रमाणम् ।

उने ॥ **निराक्रियते** इति । अद्वैतवादिना ।

यथोक्तकारणेति । यथोक्तकारणं निषेध्यनिषेधाधिकरणग्रहः ।

परस्पराश्रयादय इति । निषेध्यनिषेधाधिकरणयोः संकीर्णयोर्ग्रहणे तावन्नीलं पीतं न भवतीति भेदग्रहासंभव एव । तस्मात् परस्परविविक्तयोस्तयोर्ग्रहणे भेदो ग्राह्यः । तथा च विविक्तयोर्ग्रहणे सति भेदग्रहणम्, भेदग्रहणे च विविक्तग्रहणमित्यन्योन्याश्रयः । आदिपदादात्माश्रयो न च विज्ञानानि विलक्षणानीत्यादि **टीको**क्तदूषणानि च गृह्यन्ते ।

तत्रेति । अनिर्वचनीयख्यातौ ।

कारणसमर्थनमिति । भेदज्ञानकारणसमर्थनम् ।

कार्ये इति । भेदग्रहरूपे ।

तद्बलेनैवेति । कार्यबलेनैव ।

टीयाम् ॥ **कारणमुखनिरीक्षणेनेति** । कारणयुक्त्यपेक्षणेनेत्यर्थः ।

उने ॥ **तदिति** । कारणम् ।

---

1 IV. i. 41

टीयाम् ।। **तन्नीलमिति** । नीलमिदमिति हि प्रत्यक्षं नीलं परिच्छिन्दन् शङ्कितं समारोपितं वा तस्याभावं व्यवच्छिनत्ति, नीलमिदं न नीलाभाव इति । एवं नीलाभावा-विनाभाविनः पीतादयोऽपि विरोधाद् व्यवच्छिद्यन्ते नीलमिदं पीतं न भवतीति । एवं च प्रत्यक्षमेव पीताभावविशिष्टं नीलं व्यवस्थापयद् भेदे प्रमाणमित्यर्थः ।

संयुक्तविशेषेणेति । इन्द्रियेण यत् संयुक्तं नीलद्रव्यं तस्य विशेषणं पीताद्यभावः ।

यच्चोक्तं क्षणिकज्ञानपक्षे व्यावृत्तिग्रहो नोपपद्यते इति तत्र स्वमतेनाह—**नीलं हि नीलमिति** ।

ननु भेदेनावगतयोरेवावध्यवधिमद्भावग्रहः, सति च तस्मिन्निदमिदं न भवतीति भेदग्रहः, तथा चेतरेतराश्रयत्वमत आह—**रूपमात्रेणेति** ।

यदेकस्यावध्यवधिमद्भावग्रहो न भवति तदभेदग्रहात्, न तु भेदाग्रहादनेकेषु च स्वभावगृहीतेषु भेदाग्रहेऽपि अभेदग्रहो नास्तीति युक्तस्तद्भाव इति ।

तदिति । स्वरूपम् ।

उने ।। **व्यवस्थालक्षणविरुद्धधर्मेति** । यदेव कस्यचित् सुखं तदेवान्यस्य दुःख-मित्यादि ।

टीयाम् ।। **गोमयपायसीयन्यायमिति** । यथा गोमयं पायसीयत्वेन कथञ्चित् संभाव्यमानमपि न पायसीयम्, एवं विरुद्धधर्मसंसर्गकल्पनया कथञ्चित् संभाव्यमानोऽपि न वस्तुतः स्यादित्यर्थः ।

प्रथमामिति । मुख्याम् ।

गुणवादस्त्विति । एकमेवाद्वितीयमित्याद्याः श्रुतयो गुणवादो लाक्षणिकवादः ।

टीयाम् ।। निरवयवत्वादहेतुरिति समाधान[1]**सूत्रं** गृहीत्वा अहेतुपदं व्याचष्टे—**अवयवाभावादिति** । न कारणावयवभावादिति पूर्वपक्षसूत्रे यः कारणावयवभावादिति हेतुरुक्तः सोऽहेतुरित्यर्थः ।

---

1 IV. i. 43

अथानुज्ञानेनेत्यादि **वार्त्तिकं** पूरयित्वा व्याचष्टे—**अथ विशेषेति ।**

न पुनरस्या ऐकान्तिकत्वमिति । नियम एकमेवेत्यर्थः । सत्तासामान्यमेव तत्त्वम् । भेदास्तु काल्पनिका इति । भावाः [785a] स्वरूपेणैव प्रतीयन्ते । स्वरूपं च तेषां तदेव यत् त्वतलादिभिरुच्यते । ते चानुवृत्तरूपावगाहिनः सत्तामभिनिविशन्ते । तद्रूपाश्च भावाः प्रत्यक्षेण विषयीक्रियन्ते । अतो न प्रत्यक्षं भेदग्राहि । भेदस्यान्यव्यावृत्तिरूपस्यान्यापेक्षत्वेन भावाद् बहिरवस्थितस्यासतः कल्पनामात्रगोचरत्वात् । तदेव परमार्थसत् यत् कालान्तराण्यनुवर्तते । सत्ता च तथा, न भेदाः । तथा [1]चागमो मृत्तिकेत्येव सत्यमिति भावः ।

॥ इति संख्यैकान्तप्रकरणं संपूर्णम् ॥

---

1 Ch. Upa. VII.

॥ फलपरीक्षाप्रकरणम् ॥

[४.१.४४–५३]

उने ॥ सामान्यमादायेति । लोकपक्त्यादिस्वर्गादिरूपविशेषाविवक्षयेत्यर्थः ।

लोकपक्त्यादीनामिति । लोकप्रसिद्ध्यादीनाम् ।

धर्मिग्राहकेति । येनैव प्रमाणेन लोकपक्त्यादिरूपं फलं धर्मि निर्णीतं तेनैव तस्यानन्तरभावित्वमेव निर्णीतं यत इत्यर्थः ।

नन्वेवं मा भूत् फलसामान्यमादाय संशयः फलविशेषं त्वादाय भविष्यति, अत आह—**एवं सद्य** इति ।

अस्येति । यागादिकर्मणः ।

धर्मिभेदादिति । लोकपक्त्यादिलक्षणस्य स्वर्गादिलक्षणस्य च धर्मिणोर्भेदात् ।

प्रकृते इति । यागादिकर्मणि ।

स्वर्गफलश्रुत्येति । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिकया ।

तस्येति । सद्यःफलत्वसाधकस्य पक्त्याद्यनन्तरोपलम्भस्य ।

सैवेति । स्वर्गफलश्रुतिरेव ।

कर्तृविशेषणतयेति । स्वर्गकाम इत्येवम् ।

आपातत इति । श्रवणमात्रेण ।

टीयाम् ॥ तस्मिन्निति । कर्मणि ।

तदुपपत्तेरिति । स्वर्गाद्युपपत्तेः ।

ननु वेदावगतसाधनत्वनिर्वाहायान्तरा अपूर्वं कल्पयिष्यते, अत आह—**अपूर्वेति ।**

प्रधानाङ्गापूर्वाणीति । प्रधानभूतान्यङ्गभूतानि चापूर्वाणि ।

तदनन्तरेति । तस्य यागादिकर्मणोऽनन्तरं यददृष्टं फलं लोकपक्त्यादि तेन बाधनात् ।

अस्येति । कर्मणः ।

उपदेशेति । उपदिश्यते प्रवर्त्यतेऽनेनेत्युपदेशः ।

उने ॥ ननु सामान्यत इति । यदि यागादिकर्मणः सर्वथा निष्फलत्वं स्यात् तदा तत्प्रतिपादकस्य वेदस्य प्रामाण्यं नोपपद्येत, सामान्यतो वेदप्रामाण्यं चाभ्युपगम्यते । तस्मात् सामान्यतो वेदप्रामाण्यसिद्धौ लोकपक्त्यादि फलमस्य यागादिकर्मणः कल्पनीयम् । तथापि च अग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतस्यातिक्रमः । न हि लोकपक्त्यादौ स्वर्गपदं प्रसिद्धप्रयोगमित्यर्थः ।

टीयाम् ॥ न च तद्वाचकेनैवेति । यदि हि स्वर्गशब्दस्यानेकार्थवाचकत्वं विना चन्दनादौ प्रयोगो नोपपद्येत तदा अस्यानेकार्थत्वं कल्प्येत । यदा तु तद्वाचकत्वेनैव सुखविशेषवाचकत्वेनैव चन्दनादौ स्वर्गशब्दस्योपचारेण प्रयोग उपपद्यते, तदा चन्दनादौ तत्प्रयोगस्यान्यथासिद्धत्वात् चन्दनाद्यनेकार्थवाचकत्वकल्पना न युक्ता ।

अनेकार्थत्वमिति । अनियतार्थवाचकत्वमित्यर्थः ।

श्रुतसिद्ध्यर्थमिति । आगमोक्तस्यार्थस्य सिद्ध्यर्थं तत्साधनमागमेऽनुक्तमपि यत्नेन स्वयमूह्यम् ।

उने ॥ सत्तामात्रेति । सत्तामात्रावस्थितं न तु ज्ञायमानं यदनुष्ठानं तस्य [785b] फलम् ।

न चेह ज्ञापनं श्रूयते इति । यदि हि अग्निहोत्रं जुहुयात् स्वर्गकाम इत्येवं श्रुतौ ज्ञापनं [1]श्रूयते, तदा स्वर्गकामा इति लोकपक्त्यादिकाम इत्यर्थः संभवेदित्याशयः ।

भाष्ये ॥ कालान्तरेणानिष्पत्तिर्हेतुविनाशादिति । [2]**चार्वाकसूत्रम्** ।

पुरुषगुणधर्मावस्थानाभिप्रायेण सिद्धान्त्याह—**प्राग्निष्पत्तेर्वृक्षफलवत्तु तत्स्यादिति** । [3]**सूत्रम्** ।

---

1 S श्रूयेत 2 IV. i. 45 3 IV. i. 46

पृथिवीधातुरिति । वृक्षायुर्वेदे कारणभूतं द्रव्यं धातुशब्देनोच्यते इति तथैवोक्तम् ।

रसद्रव्यमिति । पाकजरसादिविशिष्टं द्रव्यमित्यर्थः ।

उने ॥ यथा **प्रभाकर**मतेऽग्निहोत्रं जुहुयात् स्वर्गकामः । कोऽर्थः ? स्वर्गकामोऽग्निहोत्रेणापूर्वमुत्पादयेदित्येवं श्रुतिप्रतिपाद्य एवायं धर्माधर्मलक्षणः संस्कारो **नैयायिक**मतेऽपि किं तथा ?

कर्मणेति । यागेन ।

तस्येति । कर्मणः ।

श्रुतयागेति । श्रौतं यागादिकरणमेव । करणत्वं त्ववान्तरव्यापादमन्तरेणोपपद्यते इत्यन्यथानुपपत्त्या अवान्तरव्यापारः संस्कारोऽनुमेय इत्यर्थः ।

अधिकरणस्येति । विचारस्य ।

प्रयोजनान्तरमाह—सद्यःफलेति ।

टीयाम् ॥ **सिद्धान्त्याहेति** । उत्तरं पक्षत्रयं परित्यज्याद्यं पक्षमाह सिद्धान्ती । प्राग्निष्पत्तेर्निष्पत्तिधर्मकमसदित्यद्धेति **सूत्रम्**[1] ।

उने ॥ **योग्यानुपलब्धीति** । योग्यानुपलब्ध्या बाधितं सत्त्वं यस्य तत् तथा ।

विनाश इति । दृश्यते हीति संबध्यते ।

वाके ॥ न केवलं सत्कार्यवादिनः कारकहेतूपादानं नोपपद्यते ज्ञापकहेतूपादानमपि न प्राप्नोतीत्याह— **प्रतिज्ञादीनां चेति** ।

टीयाम् ॥ **अज्ञानतिरोभावार्थमिति वार्त्तिकं** व्याचष्टे—**अज्ञानतिरोभाव** इति ।

वाके ॥ **यदि कार्यमिति** । यद्यभिव्यक्तिः कार्यं तदा ।

---

1 IV. i. 46

अथास्तीति । संस्थानविशेषः ।

टीयाम् ॥ कारणस्य स्वलक्षणपुष्टिरिति **वार्त्तिकं** व्याचष्टे—**कारणस्य हीति** ।

टीयाम् ॥ **तदिदमुच्यते** इति । **सूत्रकारेण** ।

तस्य चेति । प्रधानस्य ।

इदमिह नेदमिति । देशतः ।

इदमिदानीं नेदमिति । कालतः ।

इदमेवं नेदमिति । प्रकारतः ।

आश्रयासिद्धेरिति । आश्रयस्य कार्यलक्षणस्यासिद्धेः ।

उने ॥ **पारतन्त्र्येणेति** । पूर्वमुपलब्धेत्यतो यथा प्रागवस्थाऽसत्यपि स एवायं घट इति प्रत्यभिज्ञा प्रत्यक्षेण घटविशेषणा सती निरूप्यते, तथा असदपि कार्यं पारतन्त्र्येण निरूप्येत प्रत्यक्षेण यद्येतत् पूर्वमुपलब्धं स्यात् ।

एतदिति । उपलब्धचरत्वम् ।

तदसंभवादिति । उपलम्भासंभवात् ।

टीयाम् ॥ **आश्रयासिद्धत्वादेवेति** । कार्यस्यासिद्धत्वादेवेति ।
धर्मिणीति । तन्त्वादौ ।

वाके ॥ **तन्तुमात्रे** इति । पदे ।

उने ॥ **अपेक्षितविरोध** इति । अपेक्षितस्य संस्थानविशेषवत्त्वस्य संस्थानविशेषशून्यत्वेन विरोधः ।

टीयाम् ॥ **ननु प्रागभावोऽत्र विवक्षित** इति । संस्थानविशेषप्रागभाववत इत्यर्थो न विवक्षित इत्यर्थः ।

उने ॥ **तस्येति** । प्रागभावस्य ।

वाके ॥ तथा धर्मान्तराविर्भावतिरोभावावितीति । व्याख्यातम् ।

यदि यत्प्राप्तीति । यदियं यत्प्राप्तिविरोधिनिमित्तं तस्मात् [786a] अप्राप्ति-रित्युच्यते तदा तत्प्राप्तिविरोधिनिमित्तं विभागोऽतो नाभावो विभागस्य ।

टीयाम् ॥ तद्विरोधीति । तत् तस्मात् ।

वाके ॥ यच्च यत्रेति । आवरणविगमो विभागो न भवतीत्येकत्र प्रतिषिध्यमानोऽन्य-त्राभ्यनुज्ञातो भवतीत्यर्थः ।

सापि द्वयीति । असंश्लेषः संश्लिष्टानां च विगमः ।

टीयाम् ॥ भिन्नादेशोत्पत्तेश्चेति **वार्त्तिकं** पूरयित्वा व्याचष्टे—**अपि च क्षणभङ्ग-मिति ।**

स्वसत्तासमवाय इति । स्वस्मिन् सत्तासमवायः ।

तेषु फलेष्विति । स्वर्गादिषु ।

उने ॥ एतेनेति । आश्रयव्यतिरेकादित्यादीनां [1]**सूत्र**त्वप्रतिपादनेन ।

फलत इति । तात्पर्यतः । यदा हि आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतु-रित्यस्य सूत्रत्वमुक्तं तदा यत् **आचार्यो**क्तमाक्षिप्य परेणेदं सूत्रमुक्तम्, तस्यापि प्राग्निष्पत्ते-र्वृक्षफलवत्तु तत् स्यादित्यस्य सूत्रत्वं दर्शितं तथैतदपि सूत्रमाचार्येणोक्तं कालान्तरेणानि-ष्पत्तेर्हेतुविनाशादिति परोक्तमाशङ्क्य । अतोऽस्यापि सूत्रत्वं दर्शितम् । एवं सापेक्षत्वात् पश्चानुपूर्व्या यावत् सद्यः कालान्तरे फलनिष्पत्तेः संशय इत्यस्यापि सूत्रत्वं दर्शितमिति भावः ।

सूत्रत्वे सिद्धे इति । तदिदं प्राङ्निष्पत्तेर्निष्पद्यमानमिति पातनया **भाष्य-कारेण** ग्रहणात् ॥

॥ इति फलपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 IV. i. 50

॥ दुःखपरीक्षाप्रकरणम् ॥

[४.१.५४–५७]

उने ॥ तन्नित्यत्वे इति । दुःखनित्यत्वे ।

संशयकारणमिति । नित्यमनित्यं वेति संशयस्य कारणम् ।

तन्मतनिरासादिति । **सांख्य**मतनिरासात् ।

इयमपीति । नित्यमनित्यं वेति परीक्षापि ।

ननु विप्रतिपत्तिविषयत्वाभावान्मा भूद् दुःखस्य दृष्टं कारणम्, परीक्षणीयमदृष्टं तु विप्रतिपत्तिविषयत्वात् परीक्षणीयं भविष्यत्यत आह—**अदृष्टरूपा चेति** ।

तदवान्तरकार्यरूपं चेति । तस्याः प्रवृत्तेरवान्तरकार्यरूपम् ।

द्वितीयसूत्रे इति । [1]दुःखजन्मप्रवृत्त्यादौ ।

व्याप्यते इति । दुःखं मुख्यया वृत्त्या दुःखसाधनादि तु गौण्या वृत्त्या ।

मुख्यामिति । दुःखविषयाम् ।

टीयाम् ॥ सेयमतिभीरुतेति । दुःखानुषङ्गात् सर्वं दुःखम् । तस्मात् सर्वं हातव्यमिति सेयमतिभीरुता ।

उने ॥ ननु सुखस्य दुःखत्वोपचारे दुःखमिति कृत्वा हानं सुखस्य प्रयोजनं स्यादित्याह—**तथा सतीति** ।

टीयाम् ॥ त्रिविधदुःखपरिवर्जनहेतव इति । त्रिविधं दुःखमाध्यात्मिकं चाधिदैविकं चाधिभौतिकं चेति । त्रिविधदुःखपरिवर्जनहेतवो मणिमन्त्रौषधादय ऋषिभिरुपदिष्टाः सन्ति ।

तत् किमिदमिति । लक्षणं परामृशति ।

---

1 I. i. 2

तेनैवाभिप्रायेणेति। दुःखानुषङ्गात् सुखादयो दुःखमित्यन्यः कल्पः। स च कथम्? सुखानुषङ्गतया दुःखादयोऽपि सुखं स्युरित्यर्थः।

उने॥ यदुक्तमिति। परेण।

टीयाम्॥ न वै सर्वलोकेति। अनेन विद्यमानस्य सुखस्य दुःखव्यपदेशो गौण इति सूचितम्।

सुखदुःखभावेनोपदेशनिमित्तसद्भावे सति सुखभावनोपदेशपरित्यागेन किमर्थं दुःखभावनोपदेश इत्यभिप्रायेणावतारयति-**अयं तु दुःखेति**।

किं भूतस्येति।

उने॥ एतेनेति। सत्प्रतिपक्षत्वपरिहारेण।

टीयाम्॥ आ सत्यलोकादावीचेरिति। सत्यलोकोऽन्त्यः स्वर्लोकः। अवीचिरन्त्यो नरकः।

उने॥ तदिदमिति। सत्प्रतिपक्षत्वपरिहारेण लोकव्यवहारबाधस्य परिहृतत्वम्।

एतदुक्तं भवतीति। अनेन हि सर्वथा [786b] हातुमिष्टस्य दुःखस्य परिवर्जनेन दुःखाविनाभाविनः सुखस्योपादातुमशक्यत्वेन हेयत्वात् न सुखानुषङ्गात् सुखत्वस्यापि प्रसक्तिरिति सत्प्रतिपक्षत्वपरिहारं प्रकटयता प्रेक्षावान् दुःखमुद्धृत्य सुखं भोक्ष्यते इति लोकव्यवहारस्य बाधायाः परिहारोऽपि मधुविषसंपृक्तान्नाद् विषोद्धारस्येव सुखाद् दुःखोद्धारस्याशक्यता प्रतिपादनेन परिहृतः।

भाष्ये। दुःखोद्देशस्तु सुखस्य प्रत्याख्यानमिति। नेत्यनेन सुखस्यान्तरालनिष्पत्तेरिति [1]**सूत्रावयवेन** संबन्धः।

टीयाम्। न केवलं विविधबाधनायोगात् कारणाद् दुःखभावेनोपदेश इतश्चेत्याह—**इतश्चेति**।

[2]**बाधनाया अनिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः** इति।

1 IV. i. 55   2 IV. i. 56

पर्येषणाद्विषयार्जनदोषात् नानाप्रकारो नानाविधो मानससन्तापो भवतीत्येवं वेदयतो या बाधनाया अनिवृत्तिस्तस्मात् हेतोर्दुःखभावनोपदेशो दुःखोद्देशेन न तु सुखस्य प्रत्याख्यानमिति **सूत्रार्थः ।**

भाष्ये । अथाप्येतदनूक्तमिति । अथापि तथा एतदनन्तरोच्यमानम् ।

अपि चेदुदनेमीति । वेगवती छन्द आपातलिका वा ।

टीयाम् । उदनेमीति । उदकं नेमिर्यत्र तत् समुद्रान्तं यथा स्यात् ॥

[दुःख]भावनोपदेशेनेत्यत आहेति । सूत्रकारः ॥

सुखमात्रमिति । सर्वं सुखम् ।

अक्षिपात्रेति । अक्षिलक्षणं पात्रमक्षिपात्रं तत्कल्पाः ।

वाके । तेन चास्येति । अस्य जन्मनः ।

सिद्धान्त्याह—**दुःखानुषङ्गात् न पुनरभावादिति ।**

ननु जन्मजन्मान्तराले सुखं च यदि दुःखानुषङ्गाद् दुःखं न पुनः सुखाभावात् , तदा विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः इति [1]सूत्रे दुःखमेवेत्येवकारः किमर्थोऽत आह—**जन्मविनिग्रहेति ।**

॥ इति दुःखपरीक्षाप्रकरणं संपूर्णम् ॥

---

1 IV, i, 54.

॥ अपवर्गपरीक्षाप्रकरणम् ॥

[४.१.५८–६७]

उने । आश्रयसिद्ध्येति । अपवर्गस्य धर्मिणोऽसिद्ध्या ।

सन्तानानुमानेति । दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात्, दीपसन्ततिवदिति सन्तानानुमानम् ।

भाष्ये । जरामर्यं वेति । जरामृत्युपर्यन्तमित्यर्थः ।

सत्रमिति । यागः ।

टीयाम् । अस्ति हीति । श्रुतिः ।

ऋणत्रयापाकरणेनैव वयःसमाप्तेरिति । प्रथममृषीणामनृणः स्यामिति वेदग्रहणार्थं ब्रह्मचर्यमाचरति । पितॄणामनृणः स्यामिति गृहस्थः सन् प्रजोत्पादनमध्यवस्यति । तदनु गृहस्थ एव देवानामनृणः स्यामिति क्रतुमनुतिष्ठतीति नास्ति मोक्षव्यवसायावसरो यत्र भिक्षुः सन् परमात्मध्यानं ब्रह्मसंस्थतापरपर्यायमभ्यस्येदित्यर्थः ।

उने । सर्वथा क्लेशानुबन्धाभावेऽपवर्ग इति । क्लेशानुबन्धादपवर्गाभाव इत्युच्यमाने हि सर्वथा क्लेशानुबन्धाभावेऽपवर्ग इत्यागच्छति । सर्वथाक्लेशानुबन्धाभावे च संसार एव न स्यात् कुतः संसारपूर्वकोऽपवर्ग इत्यर्थः ।

टीयाम् । नानुच्छिन्ननिदान इति । एतेन क्लेशानुबन्धादित्यस्य क्लेशानुच्छेदादित्यर्थो दर्शितः ।

उने । उत्तरत्रापीति । प्रवृत्त्यनुबन्धादित्यत्रापि ।

भावश्चेति । अभिप्रायः ।

वाके। कथमिवादिशब्दप्रयोगं विना गौणज्ञानमत आह—**अप्रयुक्तोपममिति।**

कर्मसु स्वतन्त्र इति। अवश्यमनेन कर्म कर्तव्यमित्यर्थः।

न मुख्ये संभवतीति। मुख्यार्थासंभवे सति।

टीयाम्। कस्मादर्थिन इति। अधिकार इति संबध्यते।

अनवद्यमिति। पुनरुक्तादिदोषाभावेनोपदेष्टव्यस्य [787a] यदपेक्षितमेव तदनवद्यमित्यर्थः

न्यायप्राप्तमिममर्थमिति। जायमानोऽत्र गृहस्थ उच्यते इति रूपम्।

लिङ्गदर्शनमिति। कर्तृ।

पत्न्यवेक्षितमिति। पत्नीरक्षितम्।

पत्नय इति। भार्याः।

वसानाविति। स्त्रीपुंसौ।

अर्थित्वस्य चाविपरिणाम इति। अर्थित्वस्यानिवृत्तौ।

भाष्ये। जरामर्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपौर्णमासौ चेति श्रुतिस्थजरामर्यवचनमन्यथा समर्थ्य अथ जरया ह वा एष एतस्मात् सत्राद् विप्रमुच्यते मृत्युना चेति जरावचनमन्यथा समर्थयते—**जरया ह वा इतीति।**

एतदेव विस्पष्टयति—**जरया ह वा एष इति।**

टीयाम्। विषयतृष्णा तनूभवतीति। विषयार्थित्वं निवर्तते। ततश्च प्रव्रज्या विधीयते, न जरामर्यं कर्मानुष्ठीयते इति भावः।

अत्यन्तसंयोग इति। यदि जरया ह वा एष एतस्मात् सत्रात् विप्रमुच्यते मृत्युना चेत्यस्य यावज्जीवं कर्मणा संबन्ध इत्यर्थः, तदा।

भाष्ये। बाह्यां शक्तिमाहेति। श्रुतिः।

टीयाम्। वचनानि त्वपूर्वत्वादिति न्यायात् विधित्वमस्य कल्प्येतेति। **मीमांसका** हि

एवं व्यवस्थापितवन्तो यस्य वाक्यार्थो न वाक्यान्तरात् नापि प्रमाणान्तरात् प्रतीयते तस्याश्रूयमाणविधिविभक्तेरपि विधित्वं द्रष्टव्यम् ।

उने । जायमान इत्यादीति । जायमानो ह वै इत्यादि कर्तृ ।

अस्या इति । शङ्कायाम् ।

टीयाम् ॥ स्वव्यापारे इति । पुरुषस्य ।

अस्येति । पुरुषस्य ।

निराकरणं विभजते—**न प्रतिषेधस्येतीति ।** एतेन **भाष्ये** व्याख्यानानन्तरमपि न प्रतिषेधस्य । प्रत्यक्षविधानादिति पाठः संभाव्यते ।

भाष्ये । ब्राह्मणेनेति । वैदिकमन्त्रेण ।

टीयाम् ॥ औदुम्बरीसर्ववेष्टनवदिति । औदुम्बरी यज्ञकाष्ठविशेषः । तत्सर्वं वस्त्रेण वेष्टितव्यमिति **स्मृतिः ।** औदुम्बरीं स्पृष्ट्वा साम उद्गायेदिति **वेदः ।** अत्र तु श्रुतिस्मृतिविरोधे [तु] श्रुतिरेव गरीयसी इति न्यायेन वेदप्रामाण्यात् सर्ववेष्टनमप्रमाणं स्मृतिविहितमपि । न हि सर्वथावेष्टिते स्पर्शः संभवति ।

भाष्ये । त्यागेनेति । कर्मादेः ।

विभ्राजते यद् यतय इति । यदमृतत्वमुक्तविशेषणं विभ्राजते । यच्च यतयो विशन्ति ।

वेदाहमिति । अहं जानामि ।

उने ॥ स्वचरितविरुद्धमिति । नैयायिकैर्हीश्वरादन्य आत्मा अनित्यज्ञान एवेष्यते ।

टीयाम् ॥ तदनेनेश्वरेति । अनेन ह्यत्र पुरुषशब्दस्यार्थ ईश्वरो न तु क्षेत्रज्ञ इति **टीकाकृता** दर्शितम् ।

भाष्ये ॥ एनमेव लोकमिति । अमृतत्वलक्षणम् ।

यत्कर्मेति । यच्च संकल्पितं कर्म कुरुते, तत् कर्म फलद्वारेणाभिसंपद्यते अधिगच्छतीत्यर्थः ।

उने ॥ तेनोपाधिनेति । फलेच्छालक्षणेन ।

ननु क्रतुशब्देन प्रयत्नो भणिष्यते ततः कुतः पौनरुक्त्यम् ? तत्राह—**न तु प्रयत्न** इति । यतस्तत्कर्म कुरुते इत्यत्रैतने एव **भाष्ये** धात्वर्थस्य करोत्यर्थत्वात् करोत्यर्थश्च प्रयत्न एवेति भावः ।

भाष्ये ॥ प्रकृतमन्यदुपदिशतीति । ब्राह्मणकारः ।

पथय इति । ब्रह्मचारिगृहिवानप्रस्थभिक्षुलक्षणा मार्गाः ।

देवयाना इति । देवाः प्राप्यन्त एभिरिति देवयानाः कर्मिणां स्वर्गप्राप्तौ तन्निवासिनो देवाः प्राप्या भवन्ति । योगिभिस्तु परो देव ईश्वरः प्राप्यते । अतो देवयानत्वमाश्रमाणां श्रुत्या प्रतिपाद्यते ।

समारोपणादात्मन्यप्रतिषेध इति [1]**सूत्रम्** । [787b] ऋणानुबन्धादपवर्गस्याप्रतिषेधः । कुतः ? यस्मात निवृत्तेऽर्थित्वे समारोपणमात्मन्यग्नीनां श्रूयते । यथा—

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति ।

अतस्तदा पञ्चसप्ततिवर्षातिक्रमे प्रव्रज्यावस्थायां न ऋणानुबन्धोऽस्तीत्यर्थः ।

भाष्ये ॥ प्राजापत्यामिति । प्रजापतिर्देवता यस्यास्ताम् ।

सर्ववेद इति । सर्ववेदानधीते स सर्वपूर्वाल्लुगिति तद्धितस्य लुक् ।

सं दत्त्वेति । सर्वस्वं दत्वा ।

आत्मन्यग्नीन् समारोप्येति । बाह्याग्नित्यागेनात्मानमेवाग्निं कृत्वेत्यर्थः ।

एवं च ब्राह्मणानि सोऽन्यद्वृत्तमिति । गृहस्थाश्रमादन्यं यत्याश्रममुपाकरिष्यमाण उपादास्यमानः ।

किमुवाचेत्यत आह—**प्रव्रजिष्यन्निति ।**

अरे इति । मैत्रेयीं संबोधयति ।

---

1 IV. i. 60.

स्थानादिति । गृहात् ।

हन्तेति । अनुकम्पायाम् ।

अन्तमिति । समाप्तिम् ।

यदि कात्यायन्या सह समाप्तिं करिष्यसि समया किं कार्यमिति मैत्रेयीवचनमाशङ्क्याह—**अथापीति** । उक्तमनुशासनं यस्याः सा तथोक्ता अनुशिष्टासीत्यर्थः ।

तच्च पूर्वं व्याख्यातं नान्यदस्तीत्याह—**एतावदिति** ।

पात्रचयान्तानुपपत्तेश्च फलाभाव इति [1]**सूत्रम्** ॥ मृतस्य यजमानस्य यथावयवं यज्ञपात्राणां धारणं पात्रचयः । तेन चरमकालभाविना मरणमुपलक्ष्यते । अतः सर्वेषां कर्तॄणां मरणपर्यन्तं कर्मानुष्ठानानुपपत्तेः फलस्याभ्युदयरूपस्य सामान्येन सर्वकर्तॄन् प्रति प्रयोजकत्वाभावः । यदि ह्यभ्युदयः फलं सामान्येन सर्वकर्तृप्रयोजकं स्यात, तदा सर्वेषामविशेषेण मरणपर्यन्तं कर्मानुष्ठानं स्यात् । अस्तु । को दोषश्चेत् ? नैषणाश्रुतिविरोधादित्यर्थः ।

एषणाश्रुतिविरोधं च **भाष्यकृद्** दर्शयति—**तत्रैषणेति** ।

न श्रूयतेति । विरुध्येतेत्यर्थः ।

नायमात्मेति । शरीरम् ।

टीयाम् ॥ **प्राचेतसेति** । प्राचेतसो **वाल्मीकिः** ।

कृष्णद्वैपायनो व्यासः ।

स्मार्तानीति । तुलापुरुषादीनि कर्माणि ।

स्मृतिशीले च तद्विदामिति । वेदविदां स्मृत्याचारौ च धर्ममूलम् ।

स इति । वेदः ।

निराकृतोऽपीति । अधिकाराच्च विधानं विद्यान्तरवदित्यनेन **भाष्येण** ।

उने ॥ **संस्कारस्येति** । आश्रमान्तरसद्भावविषयस्य ।

टीयाम् ॥ **तद्दूषयतीति** । **सूत्रकारः** ।

---

1 IV. i. 61.

टीयाम् ॥ **तत्राहेति** । **सूत्रकारः** ।

उने ॥ **ननु इत्यर्थ** इति **टीका** असङ्गता क्लेशानुशयेत्यादेः पूर्वोपपादितोपदर्शनरूपत्वा-दत आह—उपपादितमित्यादि इत्यर्थ इत्यन्तमिति ।

टीयाम् ॥ **पूर्वपक्षवाद्याहेति** । **सूत्रकारः** ।

सिद्धान्त्येकदेशी ब्रूते इति । **सूत्रकारः** ।

अणुश्यामतानित्यत्ववद् वेति [1]**सूत्रम्** ।

भाष्ये ॥ **अनुत्पत्तिधर्मकमिति** । उत्पत्तिधर्मकमेवानित्यं दृष्टं नानुत्पत्तिधर्मकम् । अतोऽणुश्यामता अनुत्पत्तिधर्मिका अनित्या चेत्यत्र हेतुर्नास्ति ।

टीयाम् ॥ **पुरुषप्रयत्नेति** । यद्यपि श्यामतापि पुरुषप्रयत्नेन जन्यते तथापि यादृशेन महता पुरुषप्रयत्नेन लोहितरूपं जन्यते न तथा श्यामता अतोऽस्यां सतोऽपि प्रयत्नपूर्वकत्व-स्यासत्त्वविवक्षया आगमेऽनादित्वाभिधानमिति भावः ।

उने ॥ **कार्यमिति** । अनित्यमित्यर्थः । अग्रे उपाधित्वेनो[788a]द्भाव्यमानं कार्यत्वं न संगच्छेत । न हि उपाधिसाध्ययोरेकत्वं स्यात् ।

अत्र कार्यत्वं कार्यरूपत्वं वोपाधिरिति । करकारूपं यदनित्यं तन्न जलरूपत्वाद् रूपत्वाद् वा । किं तर्हि ? कार्यत्वात् कार्यसंबन्धिरूपत्वाद् वा । पाथःपरमाणु-रूपं च न कार्यं कार्यरूपं वा । अतोऽनित्यं न भविष्यति । एवं चेत् कार्यत्वं कार्यरूपत्वं वोपाधिः, तदा लोहितादि यदनित्यं तन्न पृथिवीरूपत्वात् । किं तर्हि ? कार्यत्वात् कार्य-रूपत्वाद् वा । अणुश्यामता च न कार्या न वा कार्यरूपम् । अत इयं नानित्या भविष्यति । एवमुपाधिः प्रकृतेऽपि स्यात् । तदनेन **टीकाकृतो**ऽनुमानं दुष्टमिति **भाष्यकृत** एवात्र परिहारः सुन्दर इति दर्शितम् ।

न संकल्पनिमित्तत्वाच्च रागादीनामिति [2]**सूत्रम्** ।

उने ॥ **इच्छाभेदत्वादिति** । रागभेदात् । रागस्य च स्वात्मनि रागेऽनिमित्तत्वात् ।

---

1 IV. i. 66   2 IV. i. 67

टीयाम् ॥ **तेन मिथ्यानुभवः संकल्प इत्यर्थ** इति । यद्यप्यत्र संकल्पोऽनुभवमात्रम्, तथापि मिथ्यानुभवस्यैव रागादिनिमित्तत्वेन **भाष्यकृता** मिथ्येत्यनेन संकल्पस्य विशेषितत्वात् **सूत्रे** संकल्पो मिथ्यानुभवो ज्ञेय इति भावः ।

उने ॥ **कथं मोहस्यापि संकल्पमूलतेति** । मिथ्याज्ञानस्य स्वात्मनि मिथ्याज्ञानेऽनिमित्तत्वात् ।

प्रतिनियतेति । न हि निकायशब्दवाच्यस्यानौत्तराधर्येणावस्थितस्य प्राणिसमूहस्य निर्माणं प्रतिनियतात्मसमवेतेन कर्मणा संभवति । नापि तन्निर्माणमेकस्यात्मन उपयुज्यते ।

टीयाम् ॥ **जातिरिति** । एतेन सत्त्वनिकायनिर्वर्त्तकमिति **भाष्यस्य** सत्त्वानां मनुष्यत्वादिजात्यभिसंबन्धकमित्यर्थो दर्शितः ।

उने ॥ नन्वेवं सन्तानिनां व्यये सन्ततेरनिवृत्तिस्तदवस्थैवेत्यत आह—**सन्तानीति** ।

तत इति । सन्तानिभ्यः ।

टीयाम् ॥ जरया ह वा इत्यनर्थकमिति प्रतिज्ञायां यस्मात् स्वयमशक्तस्येति हेत्वपदेशको ग्रन्थ इति कस्यचिद् भ्रान्तिः स्यात्, अत आह—**वार्त्तिकं यावज्जीवसंयोगे हीति** ।

पुरुषश्चेति । अङ्गमिति संबध्यते ।

कर्मार्थत्वादिति । कर्मार्थः साध्यं यस्य तद्भावात् ।

॥ इत्यपवर्गपरीक्षाप्रकरणं संपूर्णम् ॥

गीर्लक्ष्मीतिलकस्य नन्दतु चतुर्थाध्यायपूर्वाह्निके
न्यायस्थेऽत्र चतुर्दशप्रकरणीव्याख्यां त्रिलोकोत्तराम् ।
तुष्टातीव चतुर्दशाभरणिकां दत्वाङ्गलग्नां जगत्-
स्वामिन्या विदधे ययातिमहती तुच्छापि वाणिर्मम ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां चतुर्थस्याध्यायस्याद्यमाह्निकं संपूर्णम् ॥

॥ चतुर्थाध्याये द्वितीयाह्निकम् ॥

॥ तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥

[४.२.१–३]

उने ॥ **तस्येति** । प्रमेयस्य ।

तत्क्रमेति । विषयप्रकारयोः क्रमप्रतिपादनार्थम् ।

एतदिति । षोडशापि प्रमाणादयः परीक्षिता इति ।

चतुर्थशेषमिति । चतुर्थस्याध्यायस्य शेषम् ।

वक्ष्यति च पञ्चमे इति । अध्याये ।

तत्रेति । चतुर्थशेषे ।

अदूरविप्रकृष्टार्थत्वादिति । पञ्चमाध्यायापेक्षया प्रथमोऽध्यायो दूरमतिशयेन विप्रकृष्टो द्वितीयस्तु विप्रकृष्टोऽस्ति, न दूरं तदर्थत्वाद् द्वितीयाध्याये यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग इति यत् [1]**सूत्रं** तदर्थत्वादित्यर्थः ।

तत्रेति । चतुर्थाध्यायशेषे ।

तेषामिति । प्रमाणादीनाम् ।

वाके ॥ भाष्याभिमतं विशेषं ग्रहीतुं[788b]विषयमात्रं विकल्प्य दूषयति–**तदिदमिति** ।

तत्रेति । विषयविशेषे विभज्य वचनीये सति ।

निराकरणमिति । अपवर्गहेतुतत्त्वज्ञानविषयत्वेनेति शेषः ।

किं नु खलु भो इति । खल्विति विषयानन्त्यं सूचयति । भो इति सिद्धान्तिसंबोधनम् ।

---

1 II. i. 7

उने ॥ उत्तरवादिन इति । इति कश्चात्र विशेष इत्येवं प्रकारेण यो **भाष्ये** प्रश्नः स उत्तरवादिनः सिद्धान्तिनो न घटते । यतो यदि सिद्धान्तिनोऽविशेषो विवक्षितः स्यात् तदायं प्रश्नोस्य घटेत । तेन सिद्धान्तिना तु मिथ्याज्ञानं खल्वित्यादिना विशेषोऽभिधास्यते । अविशेषश्च सिद्धान्तिनो न विवक्षितः ।

टीयाम् ॥ समुदायैकदेशाभ्यामनुपपत्तेरिति । अपवर्गसाधनस्य तत्त्वज्ञानस्येति शेषः ।

उने ॥ अस्येति । तत्त्वज्ञानस्य ।

प्रकृतोपयोगिनीति । मोक्षोपयोगिनीति ।

स्वरूपस्य तथाभावादिति । स्वप्रागभावनिवृत्तिरूपता हि तत्त्वज्ञानस्य स्वरूपं स्वसत्त्वा, तस्य मोक्षोपयोगित्वात् ।

तथापीति । तथापि न तावन्मात्रं स्वप्रागभावनिवृत्तिरूपतामात्रं मोक्षोपयोगि, मिथ्याज्ञानसाधारण्याद् । यदि स्वप्रागभावनिवृत्तिरूपतामात्रं मोक्षोपयोगि स्यात् , तदैतन्मिथ्याज्ञानस्यापि विद्यते । तदपि मोक्षोपयोगि स्यात् । तस्मात् स्वप्रागभावनिवृत्तिरूपतातिरिक्ता तत्त्वज्ञानस्य या मिथ्याज्ञानविरोधिरूपता । कोऽर्थः ? मिथ्याज्ञानोपदर्शितस्यार्थस्यासहिष्णुस्वभावता सा मोक्षोपयोगिनी ।

टीयाम् ॥ तदुच्छिन्ददिति । तन्मिथ्याज्ञानमुच्छिन्दत् तत्त्वज्ञानं कर्तृ ।

उने ॥ परात्मादावपीति । विषये सप्तमी ।

तस्येति । मिथ्याज्ञानस्य ।

ननु यदि वादिनां तत्त्वज्ञानविषया विप्रतिपत्तयः, तर्हि मिथ्याज्ञानप्रश्ने किमायातमत आह—**केचिदाहुरित्यादाविति** ।

टीयाम् ॥ भेदस्येति । पदार्थानाम् ।

उने ॥ तर्हीति । यदि प्रकाशानन्दावात्मनो व्यतिरिक्तौ धर्मौ ।

अस्माभिरपीति । **नैयायिकै**रपि ।

तस्येति । मूलकारणस्य ।

तथात्वमिति । विश्वात्मकत्वम् ।

टीयाम् ॥ आत्माशीरिति । आत्मन्याशीः ।

तामेवाह—**मा न भूवम् ,** किं तर्हि ? **भूयासमिति ।**

अहिनिर्ल्वयनीमिति । सर्पकञ्चुकम् ।

सर्वमिदं दुःखं पश्यतीत्यादिना पुनरुक्तमाशङ्क्याह—**पूर्वोपसंहार इति ।**

भाष्ये ॥ चतसृभिर्विधाभिरिति । हेयहानोपायाधिगन्तव्यलक्षणाभिः ।

टीयाम् ॥ शास्त्रतात्पर्येति । द्वितीय**सूत्रेण** यः शास्त्रतात्पर्यसंग्रहः सोऽनेन **सूत्रे**णानूद्यते ।

उने ॥ आत्मेतीति । आत्मेत्येवं मोहो भवतु स्थूलोऽहं गौरोऽहमित्यादिप्रत्ययस्य शरीरादिविषयत्वात् ।

आत्मनि नास्तीति भवतु मोह इति । नैरात्म्यवादिदर्शनसंस्कारात् ।

नापि न सन्त्येवैते इति संभवतीति । प्रत्यक्षोपलभ्यमानत्वात् ।

ननु ज्ञानवाद्यादिदर्शनवासितान्तःकरणानां न सन्त्येवैते रूपादयो घटादयो वेति संभवत्येवेत्यत आह—**संभवन्नपि वा न संसारहेतुरिति ।** घटादिषु असत्त्वभ्रमस्य रागाद्यहेतुत्वात् ।

नापि प्रवृत्त्यादिवदिति । नास्ति कर्म, नास्ति कर्मफलम् , तथा अनिमित्तं जन्मानिमित्तो जन्मोपरम इत्येवं यथा प्रवृत्त्यादेर्मिथ्याज्ञानविषयत्वं तथा न सन्ति घटादयः, नैषां फलम् , निर्निमित्ता एते, निर्निमित्त एषां विनाश [789a] इत्येवममीषां न मिथ्याज्ञानविषयत्वं संभवति, एषां स्वभावस्य, फलस्योदकाहरणादेः, कारणस्य मृदादेर्विनाशकारणस्य लगुडादेः सर्वसिद्धत्वात् । तस्मात् कथमेषां विषयाणामात्मादिषु प्रमेयेषु अन्तर्भावपाठेन कथं चैते प्रसंख्येया भावनीया इत्यर्थः ।

तथापीति । समाधिजं तत्त्वज्ञानं विषयेषु सुकरमिति तत्रैव प्रथमं प्रयत्नो युक्त इत्यतो भवतु विषयाणामात्मादिप्रमेयमध्ये पाठः, परं यदभावे तत्त्वज्ञानं तन्मिथ्याज्ञानं कीदृशं विषयेष्वित्यर्थः ।

उने ॥ द्वितीयसूत्रे[1] इति । दुःखजन्मेत्यादौ ।

प्रपञ्चितमिति । मिथ्याज्ञानम् ।

वाके ॥ तत्रावयवीति संज्ञा भावनीयेति । अवयवित्वमात्रेण स्त्र्याद्यपि भावनीयं न हेयमित्यर्थः ।

तत्रापीति । स्त्र्याद्यवयविन्यपि ।

टीयाम् ॥ तद्विशिष्टविषयेति । तद्विशिष्टं दन्तत्वादिविशिष्टं दन्तादि विषयो यस्याः सा तथा ।

स्त्रैणानामिति । कामुकानाम् ।

आधेयशौचत्वादिति । कृत्रिमशौचत्वात् ।

उने ॥ तथापीति । विषयवैराग्यप्रयोजने उक्तेऽपि ।

यथाशङ्कितोऽर्थ इति । निमित्तानुव्यञ्जनसंज्ञयोर्मोहत्वाभावलक्षणः ।

टीयाम् ॥ इदानीमिति । निमित्तानुव्यञ्जनसंज्ञे ।

अभिमान इति । भणनकाले ।

अवयव्यनुव्यञ्जनसंज्ञयोरिति । निमित्तानुव्यञ्जनसंज्ञयोरित्यर्थः ।

द्विविध एवेति । हेय उपादेयश्च ।

अवयव्यादिसंज्ञेति । निमित्तादिसंज्ञा ।

उने ॥ उपादेयविषयबुद्धिरिति । उपादेयोऽयं विषय इति बुद्धिः ।

---

1 I. i. 2

तथा चेति । हेये विषये उपादेयबुद्धी चैते तस्माद् विपर्ययरूपे । अशुभसंज्ञा तु हेयबुद्धिरूपैव । अतो न विपर्ययरूपा । एवं चापाते एव निमित्तानुव्यञ्जनसंज्ञयोः विपर्यस्तत्त्वम् , परमार्थतस्तु विपर्ययस्तत्त्वमिति भावः ।

अत इति । यतो मुमुक्षोः सर्वं हेयं न किञ्चिदुपादेयम् ।

॥ इति दोषनिमित्तप्रकरणं संपूर्णम् ॥

॥ अवयविप्रकरणम् ॥

[४.२.४–१७]

उने ॥ दोषनिमित्तप्रकरणमेव वस्तुतः तत्त्वज्ञानोत्पत्तिप्रकरणम् । अत आह—**एवं तत्त्वेति** ।

तत्रेति । अवयविनि ।

टीयाम् ॥ **प्रसंख्यानोपदेशमिति** । भावनोपदेशम् ।

उने ॥ **प्रधानतयेति** । **विज्ञानवादि**ना हि बाह्या अवयवा अपि निराक्रियन्ते **किं** पुनरवयवीत्यतोऽवयविनिराकारिष्वस्य प्रधानता ।

तथोपगमादिति । अवयविनिराकरणस्याभ्युपगमात् ।

यद्यपीति । अवयविनिराकरणमुपपाद्यते इति । अतः परं यद्यपीति द्रष्टव्यम् । ततोऽथेदानीमर्थं निराकरिष्यता अवयविनि उपपाद्यते । कः ? विद्याविद्याद्वैविध्यात् संशयः[1] इत्येवं यद्यपि उपपद्यते इति क्रियायाः संशयेन योऽभिसंबन्धः, तत्प्रतिपत्तिलाघवम् । तथा यद्यपि निराकरणमिति **भाष्ये** अश्रुतकल्पनागौरवं तथापि परस्यावयवि निराकर्तुः अवयवी नास्त्येवेति विपर्यस्तबुद्धित्वात् संशयोपपादनं न युज्यते । जिज्ञासोर्हि संशयो न विपर्यस्तस्य ।

ननु विपर्यस्तत्वात् परेण संशयोपपादनं मा भूत् परं विचाराङ्गतया पूर्वं संशयमुपपाद्य पूर्वः पक्षः **सूत्रकारे**ण निराचिकीर्षतोपन्यस्यते इत्यतो निराकर्तुं पूर्वं पूर्वपक्षमास्थायार्थं निराकरिष्यता [789b] **सूत्रकारे**णैवेदं संशयोपपादनं भविष्यति । अत आह—**नापि सूत्रकृत** इति ।

वार्त्तिककृता दूषयितव्यत्वादिति । न विद्याविद्याद्वैविध्यं संशयकारणम्, उपलब्ध्यनुपलब्ध्योः पूर्वपदविशेषणत्वादित्यनेनोपलब्ध्यनुपलब्धिभ्यां संशय एवा**क्षपाद**मतेन स्यादिति **वार्त्तिककृता** वक्ष्यते ।

---

1 IV. ii. 4

अध्याहार एवेति । निराकरणमिति रूपः ।

समानप्रयोजनत्वादिति । यथावयविनिराकरणे एकप्रहाराभिहत एवायमर्थसंभार इति प्रयोजनं तथा अर्थमात्रनिराकरणेऽपीति समानप्रयोजनत्वम् ।

न चायमवयविविचारो द्वितीयाध्यायविचारेण गतः इति वाच्यम् । सर्वाग्रहणमवयव्यसिद्धेरिति[1] सिद्धान्तन्यायस्याक्षेपेणात्राधिकविवक्षया विचारकरणात् । अथवा विज्ञानमात्रं साधयितुं बाह्यार्थनिराकरणप्रसङ्गस्य बौद्धेन क्रियमाणत्वेन निर्दोषत्वात् । अत एव सिद्धान्ती पूर्वप्रसिद्धैरेव सिद्धान्तहेतुभिः संशयमाक्षिपति तदसंशयः पूर्वहेतुप्रसिद्धत्वादिति[2] । तस्मिन्नवयविनि न युक्तः संशयः, पूर्वैर्द्वितीयाध्यायोक्तैः सर्वाग्रहणमवयव्यसिद्धेरित्यादिभिर्हेतुभिरवयविनः प्रसिद्धत्वान्निर्णीतत्वादिति **सूत्रार्थः** । उपलब्ध्यनुपलब्ध्यव्यवस्था न पृथक्संशयहेतुः किं तु त्रिकारण एव संशयः । उपलब्ध्यनुपलब्ध्यव्यवस्था तु पूर्वपदविशेषणमिति तल्लक्षणसूत्रे व्यवस्थापितम् । अतो यद्यपि संशयावकाश एव नास्ति, तथापि प्रौढतया अङ्गीकृत्येदं निरसनं ज्ञेयम् ।

टीयाम् ।। **पूर्वपक्षवाद्याहेति** । सिद्धान्तहेतुमाभासयिष्यामीति दर्पेण पूर्वपक्षवाद्यपि संशयानुपपत्तिमाहेत्यर्थः ।

वाके ।। कथं संशयानुपपत्तिरित्याह—**नास्त्येव ह्यवयवीति** । कृत्स्नैकदेशावृत्तित्वादवयवानां[3] तेषु चावृत्तेरवयव्यभाव[4] इति **सूत्रम्** ।।

टीयाम् ।। अवयवेभ्यः पूर्वमवयविनोऽसत्त्वादवयवा अवयविनि वर्तेरन् इति नोपपद्यते, अत आह—**लौकिकीमिति** । संबन्धस्य द्विष्ठतया शक्यमेवं वक्तुमिति भावः ।

एकतन्तुविनाशे द्वितन्तुकमेकस्मिन् क्षणे एकद्रव्यं द्रव्यमस्त्येवेत्यत आह—**अविनश्यदाधारमिति** ।

न ह्यस्यान्ये इत्यादि **वार्त्तिकं** पूरयित्वा व्याख्याति—**न ह्यस्यावयविन** इति ।

वाके ।। अथावयवी वावयवेष्विति द्वितीयं मौलविकल्पं गृह्णन् तेषु चावृत्तेरिति **सूत्राव**यवं व्याचष्टे—**अथावयवेष्ववयवीति** ।

---

1 II. i. 43 2 IV. ii. 5 3 IV. ii. 7 4 IV. ii. 8

उने ॥ शब्दादिवदिति । आदिपदात् ज्ञानादिग्रहः । यथा शब्दादेरेकेनाप्याकाशादिना आरभ्यमाणस्य कादाचित्कभेरीदण्डसंयोगादिनिमित्तान्तरापेक्षया न सतोत्पत्तिः ।

टीयाम् ॥ तन्निमित्तानीति । अवयवव्यापारनिमित्तानि ।

एकद्रव्यस्योत्पत्तिमिति । एकद्रव्यस्य तूत्पत्तिम् ।

अथावयवान् विहायान्यत्र वर्त्स्यतीति चेत्, तत्राह—**पृथक्चावयवेभ्य** इति [1]**सूत्रम् ।**

टीयाम् ॥ अनुपलम्भादाधारान्तरवृत्तित्वं मा भूत् दृश्यमानावयवाधारस्य तु कथं नित्यत्वमापद्यते, अत आह—**दृश्यमानाच्चेति ।**

उने ॥ तस्येति । अवयविनः ।

उक्तदोषेति । [790a] वृत्तिविकल्परूपः ।

टीयाम् ॥ यस्त्विति । शाबरः ।

धर्मिरूपवदिति । यथा धर्मिणः स्वरूपस्य चाभेदे धर्मधर्मिभावानुपपत्तिः ।

न चावयव्यवयवा इति [2]सूत्रम् ।

एवं वादिना नात्यन्तभिन्नो धर्मो धर्मिभ्योऽभ्युपेयते । सति चात्यन्तभेदे पूर्ववत् संबन्धानुपपत्तिर्दूषणं स्यात्, अत आह—**न तावद्भेदेति ।**

अवयवसमूहमात्रमवयवी प्राप्नोतीति । अवयव्येकदेशानां समूह एवावयवी स्यात् न त्ववयवित्वेनाभ्युपगतः पटादिः, तस्यावयवेषु तन्त्वादिष्ववर्तनादेकदेशानां च वर्तनात् ।

एकदेशेनापि वर्तमानो नैकस्मिन्नेव वर्तते, अपि तु बहुषु । तत् कथमेकभागोपलब्धावुपलम्भप्रसङ्ग ? अत आह—**न तावदिति ।**

तन्मात्रेणेति । तदेकदेशानां तत्र तत्रावयवे वृत्तिमात्रेण ।

---

1 IV. ii. 9 2 IV. ii. 10

वाके ।। **न हि कारणं कार्ये वर्तते** इति । यद्यपि संबन्धो द्विष्ठः, तथापि वृत्तिशब्द आशब्दवचनो न च कारणं कार्याश्रितमित्यर्थः ।

एकस्मिन् भेदेत्यादि [1]**सूत्रम्** ।

भाष्ये ।। **नैकदेशेन वर्तते इत्यहेतुरिति** । नास्त्यवयवीति प्रतिज्ञार्थे यतो नैकदेशेन वर्तते इत्ययमहेतुः ।

टीयाम् ।। **अवयवान्तराभावादित्यहेतुरिति** । पटादेस्तन्त्वाद्यवयवव्यतिरेकेणान्यावयवाभावादित्ययमहेतुः ।

प्रतिजानान इति । **नैयायिकः** ।

नानात्वैकार्थसमवायिनेति । नानात्वेन सहैकस्मिन्नर्थे समवायिना ।

भाष्ये ।। उत्तरम्--**एकस्यानेकत्रेति** ।

वाके ।। यद्यात्मलाभ एवाश्रयाश्रितभावः, तर्हि नित्यानामाकाशपरिमाणादीनां न प्राप्नोति आत्मलाभाभावादिति पर आह—**नित्येष्विति** ।

उत्तरम्—**अनित्येषु दर्शनादिति** । यद् यत्र नियमेनोपलभ्यते तत् तदाश्रितम्, यथा वस्त्रं तन्त्वाश्रितम् । उपलभ्यन्ते चाकाशे महत्त्वादयः प्रमाणेन परतन्त्राः । तस्मात् तेषामपि आश्रयाश्रितभावापरपर्यायसमवायसिद्धिरित्यर्थः ।

तदस्य रूपमिति । अस्यावयविनः ।

टीयाम् ।। ननु यद्यवयवव्यतिरिक्तोऽवयवी स्यात्, तदा तस्यावयवरूपादिव्यतिरेकेण रूपान्तरं वाच्यं स्यादितीदं **नैयायिकान्** प्रति प्रसङ्गसाधकं साधनमुच्यते, न त्ववयव्यभावसाधकं साधनम् । तत् कथं **बौद्धै**रवयव्यभ्युपगमः कृतः स्यात्? अत आह—**न च प्रसङ्गेति** ।

अयमिति । तर्कः ।

---

1 IV. ii. 11

वाके ॥ एतावानेवायं विवाद इति । उक्तयुक्त्यावयविसिद्धौ परिपूर्ण एवायमवयविविवाद इत्यर्थः ।

टीयाम् ॥ उपेत्येति **वार्त्तिक**स्य तात्पर्यमाह—**यदपीति** ।

अभिप्राय इति । बौद्धस्य ।

तत्साधनमिति । दृष्टान्तस्य साधनम् ।

वाके ॥ नाप्यनेकस्मिन्नेकमिति । अनेकस्मिन् द्रव्येनाप्येकं रूपम् ।

उने ॥ किं त्वेकस्मिन्नपि इति **टीका**वाक्यं व्याचष्टे—**रूपे** इति । शुक्लादिमान् यो जातिविशेषस्तस्याश्रये ।

टीयाम् ॥ नन्वेकस्मिंश्चित्रग्राह्यनुभवश्चेत् ? न दृष्टः । तत् कथं चित्रं रूपमित्येकत्वे प्रयोगोऽत आह—**पुरुषविवक्षेति** ।

उने ॥ अनारम्भकत्वमेवेति । अवयविरूपविषयम् ।

तद्रूपेणेति । पृथ्वीरूपेण ।

त॰ ॰त । वायोः ।

इह त्विति । यस्य पटस्यैकं पार्श्वं चित्रं द्वितीयमचित्रं तत्र तु चित्राचित्रयोरवयवयोरस्त्यारम्भा[790b]रम्भकभावः । अतोऽत्रावयवरूपेणावयविनो ग्रहणमस्तु ।

अवयवेष्वपि तथा प्रसङ्ग इति । चित्राचित्रपार्श्वयोरपि तन्तुरूपेण ग्रहणं तन्तूनामप्यंशुरूपेणेत्येवमादिप्रकारेण ।

वाके ॥ अत्रैव **सत्यवतीसुत**संमतिमाह—**अयं चार्थो मुनिनेति** ।

सर्व इति । हीनक्लेशो मुनिरपि ।

टीयाम् ॥ द्वितीयाध्यायावयविविचारेणापुनरसक्ततां द्योतयितुं तत्रत्यसिद्धान्ताक्षेपेणेह पूर्वपक्षमवतारयति—**सर्वाग्रहणमिति** ।

भाष्ये ।। तदेतन्नातीन्द्रियत्वादणूनामित्यत्रैव द्वितीयाध्याय**सूत्रे**[1] समाहितं तदेव समाधानं स्पष्टयति—**विषयानतिक्रमेणेति** । केशा हि प्रत्येकमप्यसदादेर्दर्शनयोग्याः परमाणु-वस्तु सर्वथातीन्द्रिया इति न मिलिता अप्यैन्द्रियका इति संक्षेपार्थः ।

भाष्ये ।। **अभाव** इति । अवयविनः ।

विभागेऽल्पतरेति । विभागे क्रियमाणे यतः परं नाल्पीयः तत्राल्पतर[त्व]-प्रसङ्गस्यावस्थानादिति योजना ।

टीयाम् ।। न प्रलयोऽणुसद्भावादिति **सूत्रेण**[2] प्रलयपक्षे दोषान्तरमुक्तम् । अथ न वा क्वचिदपि निवर्तेतेति तृतीयं कल्पमुत्थाप्य दूषयति—**अथानन्त एवेति** । अनिवृत्तिर्वेति विकल्पस्यार्थः परं वा त्रुटेरिति [3]**सूत्रार्थे** व्याख्याते सुखव्याख्येयो भवतीत्यतः अवयवावयवि-प्रसङ्गश्चैवमा प्रलयादिति प्राच्य**सूत्र**[4]संबन्ध्यपि **वार्त्तिक**मत्र गृहीत्वा व्याचष्टे—**यावद् वा प्रलयोऽनिवृत्तेर्वेतीति** ।

वृत्तिविकल्पानिवृत्तिपक्षे अनन्तावयवत्वेन परममहत्परिमाणत्वात् न दर्शनविषयो निवर्तते । तथा च सर्वथोपलब्धिविषयो नास्तीति **वार्त्तिक**मनुपपन्नमत आह—**अनन्तावयवेति** ।

वाके ।। **विभज्यमानावयवं च परमाणुं प्रतिपद्यमानेनेति** । व्याघातभयात् ।

न परमाणुः प्रतिषिध्यते इति । प्रलयान्तो विभाग इत्यभ्युपगमेनाभि-प्रेतपरमाणुनिषेधेनापि ।

॥ इति प्रासङ्गिकमवयविप्रकरणं संपूर्णम् ॥

---

1 II. i. 36   2 IV. ii. 16   3 IV. ii. 17   4 IV. ii. 15

॥ निरवयवप्रकरणम् ॥

[४.२.१८–२५]

उने ॥ अवयविनो हि सिद्धिर्निरवयवेष्ववयवमात्रेषु परमाणुषु चिन्तितेषु स्यात्, अत उक्तम्—**तदुपोद्घातेनेति** ।

टीयाम् ॥ **आनुपलम्भिक** इति । सर्वस्यावयव्यादेरर्थस्यानुपलम्भेन यो व्यवहरति स विज्ञानवादी आनुपलम्भिक उक्तः । न पुनरुपलम्भस्याप्यभाववादी [1]भावेष्वितरेतराभावसिद्धेरित्यत्र तस्य निराकृतत्वादित्यवधातव्यम् ।

आकाशव्यतिभेदात् तदनुपपत्तिरिति—**सूत्रम्**[2] । तच्छब्दं व्या[च]ख्यानेव गृह्णाति— **आकाशेति** । आकाशासर्वगतत्वं वेति **सूत्रम्**[3] ।

वाके ॥ **संयोगमात्रं चेति** । यदि संयोगमात्रं व्यतिभेदः तदा संयोगोपपत्तेरित्युत्तरं सूत्रमनुवादरूपं स्यादित्यर्थः ।

एतदेव स्पष्टयति—**चरितार्थमिति** । व्यतिभेदग्रहणेन चरितार्थं सत् संयोगोपपत्तेरिति [4]**सूत्रेण** संयोगमात्रमेवेदं पुनरुच्यते । उत्तर**सूत्रं** पुनरुक्तं स्यादिति भावः ।

परमाण्वन्तः संबन्ध इति । परमाणोरन्तर्मध्ये आकाशेन संबन्धः ।

अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभाव इति समाधान-[5]**सूत्रम्** । अन्तरिति बहिरिति च कार्यद्रव्यस्य घटादेः कारणान्तरमवयवविशेष उच्यते । तेनाकार्ये [791a] परमाणौ तयोर्द्वयोरप्यभावो निरवयवत्वादित्यर्थः ।

निमित्तान्तरमिति । कर्माख्यम् ।

परिहरति—**तद्व्यतिरेकेणेति** । निमित्तान्तरं विना ।

तदुत्पत्ताविति । विभागोत्पत्तौ ।

उने ॥ **मिथो व्याहतमिति** । यत् सर्वतोऽव्यवहितं सामस्त्येन निरन्तरं तन्मध्येऽपि

---

1 IV. i. 37 2 IV. ii, 18 3 IV. ii. 19 4 IV. ii. 24 5 IV. ii. 20

निरन्तरम्। तत् कथम्? तस्य मध्येऽवयवा न सन्ति। यस्य मध्येऽवयवा न सन्ति तन्मध्ये सान्तरालम्। तत् कथं सर्वतोऽव्यवहितमिति मिथो व्याघातः।

टीयाम् ॥ **परित** इति। पार्श्वतः।

वाके ॥ **विभवन्त्याकाशे** इति। अस्य व्याख्यानम्—**तदाश्रया भवन्तीति**।

न व्युह्यते इति। न रचनाविशेषमापाद्यते।

टीयाम् ॥ **अनुवृत्तिसहितमिति**। मूर्तिमतां चेत्यादि [1]**सूत्रै**कदेशस्य अवयव सद्भाव इति रूपस्य सावयवत्वमिति पर्यायभणनेनानुवृत्त्या सहितम्।

संयोगः संयोगमात्रमिति। संयोग इति कोऽर्थः? संयोगमात्रम्।

प्रलयान्त इति। प्रलयरूपोऽन्तः प्रलयान्तः।

विभागान्त इति। यतः परं नान्यो विभागः, तथाविधविभागगुणरूप इत्यर्थः।

परमाण्वन्तताग्रहणेनेति। परमाणोर्या पर्यन्तता तद्विषयाभिनिवेशेन।

वाके ॥ **विभज्यमानहानानुपपत्तेरिति**। विभज्यमानस्याभावोऽनुपपत्तेः।

टीयाम् ॥ **गुणोऽस्तीति**। अविनश्यदवस्थ इति भावः।

निरवयवं चेत्यादि **वार्त्तिकं** पूरणेन व्याख्याति—**परमाण्वन्ततामिति**।

यथौचित्येन व्याघातं योजयति—**आनन्त्ये त्रुटेरिति**। समानजातीयारब्धमित्येतावत्युच्यमाने भूतचरमपि पटादि सावयवं स्यादत आह—**अपि च तदाश्रितमिति**।

उने ॥ **व्याप्य इत्यर्थ** इति। यत् सावयवं तत् कार्यम् इत्येवं सावयवत्वं कार्यत्वेन व्याप्तमिति भावः।

टीयाम् ॥ अथैकपरमाण्वित्यादि **वार्त्तिकं** पूरयित्वा व्याचष्टे—**अथ मा भूदिति**।

वाके ॥ **प्रागभावादीति**। आदिपदाद् उत्पादग्रहः।

---

1 IV. ii. 23

प्रतिपद्यापीति । अभ्युपेत्यापि ।

यदि रूपादिविशेषो मूर्त्तिरर्थान्तरम्, तदा न **बौद्ध**पक्षे तया रूपादिविशेषरूपतया मूर्त्या कश्चित् मूर्त्तिमान् । कुत इत्याह—**न च रूपादीति** । चो हेत्वर्थे । रूपादय एव परमाणुरित्यभ्युपगम्य रूपादिविशेषरूपया मूर्त्या परमाणवो मूर्त्तिमन्त इत्युच्यमाने रूपादिभी रूपादयो रूपादिमन्त इत्युक्तं स्यात् । न चैतत् संगच्छते इत्याह—**न च रूपादिभिरिति** ।

उतानर्थान्तरं वा परमाणोर्मूर्त्तिरिति कल्पं दूषयति—**न चानर्थान्तरभावे** इति ।

असति चार्थान्तरभूते मूर्तेः सकाशात् **परमाणावसत्यां च मूर्तौ** परमाणोः सकाशादर्थान्तरभूतायाम् ।

व्याघात इति । सिद्धान्तस्य ।

संयोगस्य व्यतिरेकाभ्युपगमे इति । संयोगिभ्यां सकाशाद् भेदाभ्युपगमे ।

पूर्वापराभ्यामिति । परमाणुभ्याम् ।

षट्केनेति । परमाणूनाम् ।

समाधत्ते—**यदि द्वे द्वे** इति ।

टीयाम् ॥ **तदवयवास्तदवयवा** इति । बदरावयवाः, बदरावयवानामप्यवयवाः ।

बहूनां द्रव्याणामिति । बदरबदरावयवबदरावयवावयवादीनाम् ।

एतेषामिति । गन्धादीनाम् ।

किं बाध्यते इति । न किञ्चिद् बाध्यते ।

वाके ॥ न च संयोगा अपि द्वे द्वे अधिकृत्येति समानदेशा इति संबन्धः ।

टीयाम् ॥ **यदुच्यते प्रसङ्ग**[791b]**साधनं परैरिति** । परमाणुर्न निरवयवः षट्केन युगपद् युक्तत्वात् इत्यन्वयेनैव निरवयवत्वसाधने उभयसिद्धदृष्टान्ताभावात् ।

तथा च न परमाणुरिति । षट्केन न युक्तः । तस्मात् न निरवयव इत्यर्थः ।

व्यापकविरुद्धोपलब्धिरिति । परमाणौ निषेधस्य निरवयवत्वस्य व्यापकः षट्कायोगः । तद्विरुद्धः षट्कयोगः । तस्योपलब्धिः ।

उने ॥ समानयोगक्षेमत्वमिति । तुल्यत्वमित्यर्थः ।

आश्रयासिद्धीति । यदि परमाणवो नाभ्युपेयन्ते तदा आश्रय एवासिद्धः । अथाभ्युपेयन्ते, तदा परमाणुग्राहकेण प्रमाणेनानवयवानामेव परमाणूनां ग्रहणात् धर्मिग्राहकप्रमाणबाधः । प्रतिज्ञाविरोधश्च दूरमेव **टीकाकृता** भावितः ।

व्याप्तेरसिद्धिरिति । सावयवत्वेन षट्कयोगस्य ।

भाष्ये ॥ हेत्वोरनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेध इति सिद्धान्त**सूत्रम्** । अत्र तावत् संस्थानवत्त्वादिति हेतुरसिद्धः, परमाणूनां निरवयवत्वात् । अतः त्रिषु द्वौ हेतू मूर्त्तिमत्त्वसंयुज्यमानत्वलक्षणौ सिद्धौ । तौ च यथा परमाणूनां सावयवत्वं साधयतः, तथा तत्तदवयवानामपि इत्यनवस्थायां सर्वावयविनामनन्तावयवित्वे संख्यापलपरिमाणैः त्रुटिर्मेरुतुल्यः स्यादित्युक्तम् । तस्मात् परमाणुग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टाविमौ हेतू, आश्रयासिद्धौ वा परमाण्वसिद्धेरित्यर्थः ।

टीयाम् ॥ अनवस्था नोपपद्यते इत्युक्तमिति । सा चानवस्था नोपपद्यत इति । **भाष्येण । तत् कुत** इति । अनवस्थाया अनुपपादनम् ।

भाष्ये ॥ परमाण्ववयवविभागादूर्ध्वमिति । परमाणोरूर्ध्वमपि परमाण्ववयवानां विभागाभ्युपगमादित्यर्थः ।

वाके ॥ विरुद्ध इति । स्वसिद्धान्तेन ।

॥ इत्यौपोद्घातिकं निरवयवप्रकरणं संपूर्णम् ॥

॥ बाह्यार्थव्यवस्थाप्रकरणम् ॥

[४.२.२६–३८]

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवदिति—**सूत्रम्**[1] ।

वाके ॥ **उद्धृष्यमानेषु** । विविच्यमानेष्वित्यर्थः ।

टीयाम् ॥ परमाणुर्भागश इति **वार्त्तिकं** निरवयवेषु परमाणुषु न घटत इति मत्वा व्याचष्टे—**भवन्त्विति** ।

व्याहतत्वादहेतुरिति—**सूत्रम्**[2] ।

टीयाम् ॥ **तदनुपपत्तेरिति** । विवेचनीयानुपपत्तेः ।

तेनेति । अवधिना ।

सर्वभावानुपपत्त्येति । सह ।

वाके ॥ यद्यपि पूर्वं सर्वाभाववादिनः प्रत्याख्यानम्, इह तु बाह्यार्थासत्त्ववादिनः, तथापि बाह्यार्थाभावो द्वयोरपि समान इति बाह्याभावसाधनदूषणं समानमेवेत्यतिदिशति—**यश्च सर्वमिति** ।

तदाश्रयत्वात्तु पृथग्ग्रहणानुपपत्तिरिति—**सूत्रम्**[3] ।

टीयाम् ॥ **अपृथग्ग्रहणादितीति** । बुद्ध्याविवेचनात्त्वित्यादिना सूत्रेण वस्तुतोऽपृथग्ग्रहणान्नास्ति बाह्यार्थ इति ब्रुवाणः **शून्यवादी** ।

भाष्ये ॥ [4]प्रमाणतश्चेत्यादि स्ववाक्यमेव विभजते—**यदस्ति यथा चेति** ।

तेनेति । बुद्ध्या विवेचनेन ।

---

1 IV. ii. 26 2 IV. ii. 27 3 IV. ii. 28 4 IV. ii. 29

न सर्वभावानुपपत्तिः प्रमाणानुपपत्त्युपपत्तिभ्यामिति—**सूत्रम्**[1] ।

उने ।। **यदिदं भवानिति** । स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमान इत्ययं वक्ष्यमाणोऽर्थो यदिदं भवान् बुद्धिरित्यादिना बुद्धीनां मिथ्यात्वं[792a]वदता ज्ञानवादिनोक्त एव । तत कुतः स्वप्नविषयेत्यादेरुत्थानमित्याशङ्कायां यतोऽस्योत्थानं तदाहेत्यर्थः ।

टीयाम् ।। स्वप्नविषयेत्यादि—**सूत्रम्**[2] । **तत** इति । मायागन्धर्वनगरादिजाग्रत्प्रत्ययेभ्यः ।

दूषयतीति । **सूत्रकारः** ।

आश्रितत्वमात्रेणेति । यथा अवयवोऽवयव्याश्रितः, तथावस्थाप्यवस्थावत्याश्रितेत्याश्रितत्वमात्रं सामान्यम् ।

ननु स्वप्नप्रत्ययवत् जाग्रत्प्रत्ययानां निरालम्बनत्वेन विशेषाभावात् न पुनर्जागरितान्ते विषयोपलब्धिवदिति **भाष्यं** कथम् ? अत आह—**एतदुक्तं भवतीति** ।

तदनुपपत्तेरिति । मिथ्यात्वानुपपत्तेः ।

तदिति । मिथ्यात्वम् ।

वाके ।। **न हेतुरुच्यते** । हेतुर्वक्तव्य इत्यर्थः ।

इत्यत्र को हेतुरिति । इत्यत्रापि हेतुर्वाच्य इत्यर्थः ।

उने ।। **पौनरुक्त्यमिति** । प्रतिबुद्धेनानुपलम्भादित्याद्याशङ्कायां न विशेषणोपादानादित्यादेरुत्तरस्य यदि चोपलभ्यमानमित्याद्याशङ्कायां विपर्यये च सामर्थ्याभावादित्याद्युत्तरस्य च तुल्यार्थत्वात् ।

वाके ।। ननु स्वप्नावस्थायां चित्तमस्ति न विषया इत्यत्र विषयाणामनुपलब्धिरेव हेतुर्भविष्यतीत्याशङ्क्याह—**विपर्यये चेति** । चो हेत्वर्थे ।

को हेतुरित्याह—**जाग्रतोऽनुपलब्धेरितीति** ।

1 IV. ii. 30 2 IV. ii. 31

उने ॥ अधुना त्वनुपलब्धेरिति केवलं विवक्षित्वेत्यर्थ इति। अत एव **वार्त्तिककृत्** विपर्यये च सामर्थ्याभावादित्यादि स्ववाक्यं विवृण्वन् यद्युपलब्धिः स्यादित्यादावनुपलब्धिं केवलां दर्शितवान्।

न हि चित्तेति। चित्तस्वरूपमेव हि चित्ताद्व्यतिरिक्तं तस्मिंश्च गृहीतिरूपे गृहीतिव्याप्यतारूपग्राह्यत्वं नास्तीत्यतो ग्राह्यत्वं विपक्षे व्यतिरेक एव गतमित्यर्थः।

टीयाम् ॥ इदमत्राकूतं **विज्ञानवादिनः** स खलु बाह्योऽर्थः साकारस्य वा विज्ञानस्य विषयो भवेत्, निराकारस्य वा? न तावन्निराकारस्येत्याह **विज्ञानस्य हीति**।

असतोऽपीति। अतीतानागतादेः।

उने ॥ पूर्वातिदेशेनैवेति। अत एवेत्यनेनैव।

तामिति। अतिव्याप्तिम्।

टीयाम् ॥ एकसामग्र्यधीनत्वेन तु विषयत्वे इति। यथैव रूपालोकमनस्कारचक्षुर्लक्षणया सामग्र्या ज्ञानमुत्पद्यते, तथैव योऽर्थ उत्पद्यते स विषय इत्यभ्युपगमे त्वित्यर्थः।

सा त्विति। एकसामग्र्यधीनत्वरूपा विषयता तु।

कारणत्वाविशेषेऽपि यदेव ज्ञानजन्यं फलं धत्ते तदेव तस्य विषयो। न सर्व इत्यभिप्रायेण तुर्यं कल्पमाशङ्कते--**विज्ञानाहितेति**।

एतदिति। प्राकट्यम्।

स इति। अर्थधर्मः।

अप्रत्युत्पन्न इति। सन्[1]।

अवर्तमानोऽपि धर्मिणि विनष्टे एकस्मिन् क्षणे धर्मो वर्तते एवात आह--**धर्मश्चाविनश्यन्निति**।

उने ॥ तेषामपीति। अतीतानागतानामपि।

तेनाकारेणेति। सामान्यरूपेण।

1 J असन्

तस्येति । अतीतादेः ।

न ह्यन्याधारयेति । यत्र ह्याधारे ज्ञाततालक्षणो धर्मः स एव विषयो ज्ञानस्य । यदा च ज्ञातता सामान्याधारा तदा सामान्यमेव ज्ञानस्य विषयो नातीतानागतस्वरूपौ विशेषौ ज्ञानविषयौ स्याताम् ।

ननु **मीमांसकैः** सामान्यविशेषयोः कथञ्चित् तादात्म्यमभ्युपेयते ततो या सामान्याधारा ज्ञातता[792b]सा विशेषाधारापी,यतोऽतीतानागतयोर्ज्ञानगोचरत्वं भविष्यत्यत आह--**तादात्म्येति** ।

टीयाम् ॥ **किमस्य शक्यमिति** । प्रकाशनशक्तियुक्तस्य ज्ञानस्य को विषय इत्यर्थः ।

अस्तु तर्हि निर्विषयैव शक्तिः, अत आह–**न चासतीति** ।

उने ॥ **साधारण्यप्रसङ्गादिति** । सर्वेऽर्थाः सर्वस्य ज्ञानस्य विषयाः प्रसज्येरन्नित्यर्थः ।

टीयाम् ॥ साकारस्य ज्ञानस्य बाह्यो विषय इति पक्षं दूषयितुं शङ्कते–**अस्तु तर्हि** इति ।

तत्सारूप्यतदुत्पत्तिभ्यां विषयत्वाभ्युपगमेनेन्द्रियादिषु विषयत्वप्रसङ्ग इत्याशयवानाह--**नीलमस्येति** । जनकत्वाविशेषेऽपि नीलं ज्ञानस्य सरूपकं न चक्षुरादि । अत एव ज्ञानस्य नीलसादृश्यं प्रमाणं व्यवस्थापकत्वात् । संविद्रूपता तु फलम् । ज्ञानसारूप्ययोरेकत्वेऽपि कथञ्चिद् व्यावृत्तिनिष्ठो भेद इति । अर्थाहिताकारवेदनं चार्थवेदनं ज्ञानाकारश्च वर्तमान इति वर्तमानार्थत्वोपपत्तिरिति ।

परानभिप्रेतमपि संभवमात्रेण सारूप्यमात्रं विषयलक्षणं विकल्प्य दूषयति--**किं सर्वात्मनेति** ।

तन्न नाम नास्तीति । सत्त्वप्रमेयत्वादि हि तावदेकदेशेन सारूप्यं सर्वत्रापि विद्यत एव ।

पराभिप्रेते सारूप्यतदुत्पत्ती अपि विषयलक्षणं न भवत इत्याह---**अपि चेति** ।

उने ॥ नन्विन्द्रियस्योत्पादकत्वमस्ति, सारूप्यं तु स्वाकारार्पकत्वं नास्ति, तत् किमर्थं मनस्कारेन्द्रियादिभिरितीन्द्रियग्रहणम् ? अत आह--**मनस्कारेति** । यथा मनस्कारस्य समनन्तरप्रत्ययस्योत्पादकत्वं विषयप्रतिनियमश्च प्रतिनियतविषयता च तुल्यौ, यथा च

[1]विषयस्वरूपादेरुत्पादकत्वं विषयप्रतिनियमश्च ज्ञानं प्रति प्रतिनियतो विषयेण भानं च तुल्यौ, तथेन्द्रियस्यापि चक्षुरादेरुत्पादकत्वं विषयप्रतिनियमश्च प्रतिनियतविषयता च तुल्याविति दर्शयितुमिहेन्द्रियोपादानम् । एतेन सारूप्यस्यार्थो विषयप्रतिनियम इति दर्शितम् ।

तदेतत् पूर्वत्रापि द्रष्टव्यमिति । आदिशब्देनालोकादिग्रहणमपि चक्षुरादयोऽपीत्यत्रापि ज्ञेयम् ।

टीयाम् ॥ तदिदमतिव्यापकं विषयलक्षणं प्रतिपाद्येदानीं साकारस्य ज्ञानस्य बाह्यविषयमनुभवसिद्धं न भवतीति वक्तुं शङ्कते—**तथापि यमध्यवस्यतीति** ।

द्वावाकाराविति । ज्ञानाकारोऽर्थाकारश्च ।

अगृह्यमाणे एव भविष्यत्यत आह—**न चारोपेति** ।

ननु स्वाकारस्य बाह्यसमारोपं बाह्यभेदाग्रहं ब्रूमः, स चागृह्यमाणेऽपि बाह्ये घटत एव अत आह—**अपि चागृह्यमाण** इति ।

मा भूदनुभवः, अनुमानं तु बाह्यसत्त्वे प्रमाणं भविष्यतीत्याह—**साकारज्ञानवादी–ननु नीलेति** ।

स्वोपादाने इति । स्वालयविज्ञानसन्ताने ।

विच्छिन्नगमनवचनप्रतिभासा इति । अयं गच्छति वक्ति चेत्येवम् ।

तथा चेति । कादाचित्काश्च सत्यप्यालयसन्ताने षडपि प्रवृत्तिप्रत्ययाः षडिन्द्रियजज्ञानानि, तस्मात् तदितरापेक्षाः । यश्चासावालयविज्ञानसन्तानातिरिक्तः सोऽर्थः इति भावः ।

साकारज्ञानवादी विज्ञानवादिनमाशङ्कते—**वासनापरिपाकेति** ।

परिहरति—**नन्वेकेति** ।

तथा चेति । [793a] स्वसन्तानवर्तिपूर्वक्षणस्य वासनापरिपाकहेतुत्वे च सति ये केचिदेकस्मिन्नालयसन्ताने पतिताः क्षणाः, ते सर्वेऽपि वासनापरिपाकहेतवः स्युः । न वै कोऽपि । अविशेषाद् यथा भवदभिप्रेतः कश्चित् परिपाकहेतुः क्षण आलयसन्तानपतितः, तथा सर्वेऽपीत्यविशेष इत्यर्थः ।

---

1 S °स्य रू°

साकारज्ञानवादी विज्ञानवादिनं पुनराशङ्कते—**क्षणभेदादिति ।** एकसन्ततिपतितत्वेनाविशिष्टानामप्यालयविज्ञानानाम् ।

परिहरति—**नन्वेकस्यैवेति ।** यदि क्षणभेदात् शक्तिभेदः, तदा सर्वेषामपि क्षणानां मिथो भेदात् शक्तिभेदे एकस्यैव क्षणस्य ज्ञानजननशक्तिर्नेतरस्येति क्षणान्तरे नीलज्ञानं न जायेतेत्यर्थः ।

सत्त्वे वेति । क्षणान्तरस्यापि यदि नीलविज्ञानजननसामर्थ्यं शक्तिप्रबोधजननसामर्थ्यं चास्तीत्यभ्युपेयते तदा ।

स्वसन्तानमात्राधीनत्वे इति । केवलस्वालयज्ञानसन्तानाधीनत्वे कादाचित्कत्वं निवर्तमानम् ।

कथेत्याह—प्रवृत्तिज्ञानानां स्वसन्तानमात्राधीनत्वे निषेध्यस्य नि[व]र्तनीयस्य कादाचित्कत्वस्य विरुद्धं यत् सदातनत्वं तस्योपलब्ध्या ।

एषापि कुत इत्याह—समर्थहेतुसद्भावे कार्यक्षेपानुपपत्तेरिति योजना ।

ननु गमनवचनप्रतिभासस्यैव ज्ञानस्य प्रवृत्तिविज्ञानानां सन्तानान्तरापेक्षित्वेन कादाचित्कत्वमुपपद्यते, अत आह—**न च सन्तानान्तरेति ।**

सन्तानान्तराणामपीति । ज्ञानसन्तानान्तराणामपि ।

देशविप्रकर्षो भविष्यति, अत आह—**विज्ञानानामिति ।**

व्यतिरिक्तस्येति । ज्ञानाद्भिन्नस्य ।

अपूर्वसत्त्वेनेति । न ह्यपूर्वस्य कस्यचित् ज्ञानसन्तानस्य प्रादुर्भावोऽभ्युपेयते । न कालतो विप्रकर्षः संभवेत् ।

ज्ञानवादी निराकरोति—**तदयुक्तमिति ।**

साकारज्ञानवादी पूर्वोक्तं स्मारयति—**ननूक्तमिति ।**

ज्ञानवादी परिहरति—**कल्पितस्येति । सौत्रान्तिकै**स्तर्हि यदा कल्पितस्यावस्तुनः सन्तानस्य सन्तानान्तरेभ्यो भेदः कार्यभेदहेतुरभ्युपेयते, तदा वस्तुसतः क्षणस्य भेदः कार्यभेदहेतुरिति नितरामभ्युपगम्यमिति भावः ।

ज्ञानवाद्याह—**अथ बाह्यार्थवादिनोऽपीति ।** नीलोत्पलसन्निधानेऽपि कस्मात् पीतज्ञानं न भवति, कथं वा नीलोत्पलज्ञानमेव भवतीति पर्यनुयुक्ते न नीलोत्पल-

क्षणानामेव नीलोत्पलाकारज्ञानजननसामर्थ्यमित्यङ्गीकरणीयम् । **तच्च कथमुपपद्यते, यदि नैकं** सामर्थ्यं भिन्नानामित्यर्थः ।

अथ तत्रापि क्षणभेदेन शक्तिभेदः तद्भेदाच्च कार्यनीलोत्पलाकारज्ञानभेदः, तर्हि मत्पक्षेऽप्येवं भविष्यतीति दर्शयति—**यन्नुच्येत** इति ।

न च प्रत्यक्षवदनुमानमप्यर्थगोचरमिति । अवस्तुसत् सामान्यगोचरत्वात् ।

उते ॥ एतदिति । परोक्तानुमानम् ।

तत्प्रतिषेधेति । व्यतिरेकप्रतिषेधः ।

तत्प्रतीतौ चेति व्यतिरेकप्रतीतौ ।

बाधावकाशादिति । साध्यविपरीतग्राहकप्रमाणबाधितत्वादित्यर्थः ।

टीयाम् ॥ विरुद्धव्याप्तोपलब्धिरिति । अनुपलब्धिभेदः ।

तद्विरुद्धस्तदव्यतिरेक इति । चित्ताव्यतिरेकविरुद्धश्चित्ताव्यतिरेकः ।

तेनेति । चित्ताव्यतिरेकेण ।

अथ [793b] **नैयायिको विज्ञानवादिनं** निराकरोति—**अत्र तावदेतदिति** ।

तस्येति । ग्राह्यत्वस्य ।

नार्थे इति । नाणौ ।

तदात्मनः इति । स्थूलात्मनः । आभासस्य **एकत्राणौ प्रतिषिद्धत्वात्** बहुष्वपि अणुसमूहेऽपि न संभवः ।

तस्य तथात्वे इति । तस्यार्थविच्छेदस्य तथात्वे **विज्ञानात्मत्वे** परमार्थसज्ज्ञानतादात्म्यभूतोऽर्थविच्छेदोऽपि पारमार्थिकः स्यादित्यर्थः ।

अयमपीति । न केवलं स्थौल्यमर्थविच्छेदोऽपि ।

तदीयत्वे इति । अर्थसंबन्धित्वे ।

संबन्धान्तरेण भविष्यतीति चेदत आह—**संबन्धान्तरेति** ।

उने ॥ **निराकृतमपीति** । अथाकिञ्चित्करं विज्ञानमित्यादिना ।

टीयाम् ॥ **न हि गतीति** । गतेः फलं चैत्रस्य नगरप्राप्तिः नगरेण संयोगः । चैत्रनगरयोः समवेतैवोत्पद्यते । न तूत्पद्य चैत्रनगरयोः समवेताहं स्यामित्येव चैत्रनगरसमवायार्थं किञ्चिदन्यत् करोति । एवं ज्ञानमर्थविषयस्वभावमेवोत्पद्यते, न तूत्पद्यार्थविषयस्वभावमित्येवमर्थविषयत्वादस्वाभाविकादार्थविषयत्वस्वभावोत्पादादपरं किञ्चित् जनयतीत्यर्थः ।

अर्थबन्धनत्वमिति । अर्थनिरूपणीयत्वम् ।

अर्थबन्धनत्वमेव भावयति—**न हि ज्ञानमिति** ।

कर्मणीति । कर्मणि व्याप्येऽर्थेऽसमवेतं ज्ञानं कथं कर्मणोऽर्थस्य संबन्ध्युच्यते इत्यर्थः ।

आचार्यः प्रतिबन्दिं करोति—**अथ फलेति** । प्राप्तिलक्षणस्य फलस्य समवायः कर्मणि नगरे समवायस्य समवायान्तराभावादसमवेतः कथं कर्मणो नगरे प्राप्तेः समवाय इत्येवं कथं नगरसंबन्ध्युच्यते इत्यर्थः ।

तत्पारतन्त्र्यादिति । कर्मपारतन्त्र्यात् ।

इहापीति । ज्ञानेऽपि ।

दण्डिप्रकाश इति । दण्ड्यग्रमित्येवंरूपः प्रकाशः ।

विरुद्धव्याप्तमिति । विरुद्धेनाभेदेन व्याप्तं ज्ञानानात्मभूतानां स्थूलादीनां ग्राह्यत्वदर्शनादनैकान्तिकं ग्राह्यत्वं नाभेदेन व्याप्तमिति यदुक्तं तदुपसंहरति-**तस्मादिति** ।

ग्राह्यत्वं भेदं निवर्तयतीति यत् प्रागुक्तं तन्नोचितमित्यर्थः ।

स चेति । स्वसाध्याविनाभावः ।

दृष्टान्तेनेति । ज्ञानादन्यत् यत् स्वसंवेदनं तद्रूपेण दृष्टान्तेन ।

न हि संवित् प्रकाशेनार्थे प्रकाशान्तरं जन्यते इति । ज्ञानप्रकाशाधीनप्रकाशश्च विषयप्रकाशा इत्यत्र ह्येको ज्ञानप्रकाशः, तज्जन्यश्चापरोऽर्थप्रकाश इति प्रतीयते । न च ज्ञानप्रकाशेन स्वप्रकाशादन्यः प्रकाशोऽर्थे जन्यते इति भावः ।

न ह्यात्मैवात्मायत्त इति । यदा हि ज्ञानमेवार्थप्रकाशो ज्ञानप्रकाशश्चेत्यभ्युपगमः, तदा ज्ञानप्रकाशाधीनप्रकाशश्च विषयप्रकाशा इत्युच्यमाने ज्ञानस्यात्मैवात्मायत्त इत्युक्तं स्यात् । न चैतदुपपद्यते इत्यर्थः ।

उने ॥ **इत्युपनीतमिति** । एवंप्रकारेण कृतोऽनयम् ।

विकल्पगर्भमिति किमत्र ज्ञानं प्रमाणं[फलं] वेति विकल्पगर्भम् ।

टीयाम् ॥ **स्वप्रकाशादिति** । अनुव्यवसायात् ।

सहोपलम्भेति । यद् येन सह नियमेनोपलभ्यते तत् ततो न भिद्यते, यथा सच्चन्द्रादसच्च द्र इत्यनुमानम् ।

यदि सहोपलम्भ एकोपलम्भ इति विवक्षितम्, तदासौ हेतुः सिद्ध इत्याह— **अर्थज्ञानयोरिति** ।

अनुवर्तमानेष्विति । असाधारणेषु ।

[794a] **स्वमतदार्ढ्येनोक्तमिति** । **ज्ञानवादिना** ।

उने ॥ **यथोक्तव्याघातानवकाश** इति । यदि रुधिराकारं तर्हि वक्तव्यं किं रुधिरमित्येवं **वार्त्तिके** यथोक्तो व्याघातः, तस्यानवकाशः ।

टीयाम ॥ **तथा चातिप्रसङ्ग** इति । वैयधिकरण्ये च देवदत्तकर्मणा यज्ञदत्तादयोऽपि पुत्राश्वादिफलवन्तो भवेयुरित्यर्थः ।

स्वचित्तेनेति । सामान्यविशेषवतापि चित्तादनर्थान्तरेण ।

उने ॥ **तर्हीति** । यदि स्वचित्तेन व्यभिचारनिरासार्थं मदीयाहङ्कारानास्पदत्वे सतीति विशेषणं कार्यं तदा ।

यथोक्तो हेतुरिति । मदीयाहङ्कारानास्पदत्वलक्षणः ।

आत्मैवानात्मतया स्फुरतीति । बाह्योऽर्थ आत्मैवानात्मतया प्रतिभासते इति परेणाभ्युपगम्यमाने ।

तदर्थमिति । सन्दिग्धविपक्षव्यावृत्तितानिवृत्त्यर्थम् ।

इदन्तास्पदस्येति । अहङ्कारानास्पदस्य ।

तदर्थमिति । सत्यत्वोपादानार्थम् ।

भाष्ये ॥ **उभयथेति** । अर्थानामुपलम्भेऽनुपलम्भे च ।

यथा प्रदीपाभावादिति। यथा प्रदीपाभावात् रूपस्यादर्शनमित्यत्र भावे प्रदीपाभावात् रूपदर्शनस्य सद्भावो न भावसामर्थ्यम् । न भावस्य प्रदीपस्य रूपदर्शने सामर्थ्यम् । किं तर्हि ? प्रदीपाभावात् रूपदर्शनाभावे सति । यदि हि प्रदीपे सति चासति च रूपदर्शनं भवेत्, तदा यथा प्रदीपस्य रूपदर्शनं प्रति सामर्थ्यं न स्यात् तथा यद्युप-लभ्यमाना अनुपलभ्यमाना अप्यर्था न स्युः, तदा प्रबोधेऽनुपलम्भस्य हेतोः स्वप्नावस्थाविषय-निषेधे सामर्थ्यं न स्यादित्यर्थः ।

स्वप्नान्तविकल्पे इति । स्वप्नावस्थानानात्वे ।

स्वप्नान्तविकल्पमेव दर्शयति—**कश्चिद्धीति।**

साधनमिति। दृष्टान्तवचनम् ।

तदाश्रयस्य प्रत्याख्यानादिति। तस्य दृष्टान्तस्य स्वप्नाभिमानस्य य आश्रयः स्वप्नलक्षणः, तस्य जागरितावस्थातो निर्विशेषत्वभगनेन प्रत्याख्यानात् ।

टीयाम् ॥ तासां चेति। मिथ्योपलब्धीनाम् ।

मिथ्योपलब्धिविनाश इत्यादि [1]**सूत्रम् ।**

शुक्तिरियमिति। तत्त्वज्ञानात् बाधकात् रजतमिति मिथ्योपलब्धेरेव नाशो निवृत्तिर्भवति, न त्वर्थसामान्यस्य सितभास्वरपुरोवर्तिनः । तस्मात् बाधकानुरोधादपि मिथ्याज्ञानं न सर्वथा बाह्यानालम्बनं सिध्यति । अत स्वप्नादिति दृष्टान्तः साध्यविकलः । तत्रापि प्रतिबोधे जागरणे सति स्वप्नप्रत्यय एव निवर्तते, न तु अर्थसामान्यमपि दृष्टश्रुतानु-भूतमित्यर्थः ।

भाष्ये ॥ मायेति। इन्द्रजालम् ।

उपादानवचेति। उपादानशब्देनात्र कारणमात्रमुच्यते ।

साधनवानिति। मन्त्रौषध्यादियुक्त ऐन्द्रजालिकः ।

नीहारप्रभृतीनां नगरसारूप्यसन्निवेशविशेषे इति । गन्धर्वनगर-बुद्धेः शीतकाले एव भावात् ।

---

1 IV. ii. 35

मायाप्रयोक्तुरित्यादि । मायाप्रयोक्तुर्यथास्थितार्थज्ञानं द्रष्टुश्चान्यथास्थितार्थज्ञानं तथा दूरस्थस्य गन्धर्वपुरादिज्ञानं नान्तिकस्थस्य । तथा सुप्तप्रबुद्धस्य स्वप्नविषयज्ञानं न प्रतिबुद्धस्येति बुद्धिद्वैतं दृष्टम् ।

टीकायाम् ॥ तेनैवेति । बाह्यापह्नवदृष्टान्तेन ।

बुद्धेश्चैवं निमित्तसद्भावोपलम्भादिति **सूत्रम्**[1] **।** **निमित्तं च सद्भावश्च तयो-**
[794b] रुपलम्भात् ।

उने ॥ तदुपलक्षणत्वादिति । गवयोपलक्षणत्वात् ।

अन्वयव्यतिरेकेति । आदर्शे परमार्थभूतं मुखप्रतिबिम्बस्य ज्ञानं मुखे सत्येव स्यात्, नासतीत्येवमन्वयव्यतिरेकाभ्यां सिद्धो यो निमित्तभेदः, तस्योपस्थापकत्वात् ।

ननु तत्त्वप्रधानेति । तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्यमित्यनेन हि मिथ्याबुद्धेस्तत्त्वबुद्धिः प्रधानबुद्धिश्च द्वौ भेदावित्युक्तं स्यात् तच्च मिथ्याबुद्धिश्चेत् तत्त्वबुद्धिः कथमित्येवं व्याहतमित्यर्थः ।

टीकायाम् ॥ तत्त्वं स्थाणुरिति प्रधानं पुरुष इति **भाष्यं** व्याचष्टे—**यत्र स्थाणाविति ।**

भाष्ये ॥ स्थाणौ पुरुषप्रत्ययवत् स्थाणुप्रत्ययोऽपि भ्रान्त एव भविष्यति **विज्ञानवादिन** इव पक्षे। अत आह—**न तु समानविषये मिथ्याबुद्धीनामिति ।** एकस्मिन्नर्थे मिथ्याबुद्धयो न संप्लवन्ते इत्यर्थः ।

कस्मान् न समावेश इत्याह—**सामान्येति ।** स्थाणौ पुरुषप्रत्ययः सामान्यमात्रग्रहणे विशेषाग्रहणे च सत्यवतिष्ठते निवर्तते । अत एव भ्रान्तः स्थाणुप्रत्ययस्तु विशेषपरिच्छेदादभ्रान्तः । तेनैकस्याभ्रान्तत्वेन अस्माकमुभयोर्भ्रान्तयोरसमावेशः । **विज्ञानवादि**नां तु बलात् समावेशः प्रसज्यते, न च लोके समावेशो दृष्ट इति भावः ।

॥ इति प्रासङ्गिकं बाह्यार्थव्यवस्थाप्रकरणं संपूर्णम् ॥

---

1 IV. ii. 36

॥ तत्त्वज्ञानविवृद्धिप्रकरणम् ॥

[४.२.३८–४९]

उने ॥ विषयविशेष इति । आत्मादिः ।

एतावतेति । विषयविशेषक्रमविशेषदर्शनमात्रेण ।

तस्येति । विषयविशेषक्रमविशेषदर्शनस्य ।

तथाविधतत्त्वेति । यावत् साक्षात्कारि मोहोन्मूलनसमर्थं तत्त्वज्ञानमुत्पद्यते तावदेतत् तत्त्वज्ञानं विवर्धनीयमित्यर्थः ।

तदर्थमिति । तत्त्वज्ञानविवृद्धयर्थम् ।

टीयाम् ॥ दोषनिमित्तेष्विति । शरीरादिषु ।

तथाभूतेति । आगमिकमानुमानिकं च । मोहसाक्षात्कारस्तत्त्वसाक्षात्कारादेव निवर्तते । न चासौ संभवति कारणाभावात् । ध्यानं निमित्तमिति चेत् ? न, विदिताविदितविकल्पासहत्वात् । विदितश्चेत्, कृतं ध्यानेन स्वविषये सर्वज्ञानानां स्फुटत्वात् । अविदिते तु ध्यानं कथम्, निरालम्बनध्यानानुपपत्तेः । अतः सूक्त**मुपायाभावादयुक्त** इति ।

अस्योत्तरं सूत्रमिति[1] । आगमात् निजसकलधर्मशालिनो जरामरणादिशून्यस्य शरीरादिव्यतिरिक्तस्य विदितस्य न्यायेन च तथैव निरूपितस्य प्रत्यक्षमिथ्याज्ञाननिवर्तकत्वेऽसामर्थ्येन ध्यानतो मनःप्रसवसाक्षात्कारविषयत्वेनाभ्युपगम इति भावः ।

सूत्रार्थ इति । नार्थविशेषप्राबल्यात्[2] अनिच्छतोऽपि बुद्ध्युत्पत्तेरित्यस्य **सूत्र**स्यार्थः ।

क्षुदादिभिः प्रवर्तनाच्चेति । एतदप्याक्षेप**सूत्रम्**[3] ।

भाष्ये ॥ समाधिव्युत्थाननिमित्तमिति । समाधेरन्यथाभावनिमित्तमर्थविशेषप्राबल्यम् ।

---

1 IV. ii. 38 2 IV. ii. 39 3 IV. ii. 40

समाधिप्रत्यनीकं चेति । क्षुदादि ।

टीयाम् ।। **पूर्वकृतः समाधिरित्यादि** प्रकारेण **टीकाकृता सूत्रं**[1] व्याख्यातम् । **भाष्यकृता** तु पूर्वकृतो जन्मान्तरोपचितो यः फलानुबन्धः । कोऽसौ ? धर्मप्रविवेकः प्रकृष्टः संस्कारः । किमुक्तं भवति ? योगाभ्याससामर्थ्यम् । पूर्वकृत[795a]समाधिफलभूतः स्थिरः संस्कार इति यावत् । स तत्त्वज्ञानहेतुरित्येवंप्रकारेण व्याख्यातम् । तथापि कार्य-कारणयोरभेदविवक्षया समाधिकार्यः संस्कारः पूर्वकृतशब्देन **भाष्यकृतोक्त** इति न तात्पर्यत**ष्टीकाकृद्**व्याख्यया **भाष्यकृद्**व्याख्यानस्य कश्चित् भेद इत्यत आह—**तद्व्या-चष्टे भाष्यकारः पूर्वकृत इतीति** ।

भाष्ये ।। **निस्फले** इति । संस्कारं विना तत्त्वसाक्षात्काररूपफलरहिते ।

अभ्यासे इति । योगविषयप्रयत्नपौनःपुन्ये ।

टीयाम् ।। **विशरारव** इति । विनश्वराः ।

असंभवन्त इति । असंबध्यमानाः ।

संभवति संभूयकारितेति । स्थिरसंस्कारद्वारेण प्रयत्नानाम् ।

भाष्ये ।। नन्वभ्यासस्य तत्त्वसाक्षात्कारे सामर्थ्यमेव न भविष्यति, तत्किमभ्यासस्य तत्त्वसाक्षात्कारफलसंघटनार्थया संस्कारकल्पनया ? अत आह—**दृष्टं हीति** ।

ननु संस्कारस्य कारणं समाधिः, तस्य चार्थविशेषप्राबल्येन क्षुदादिना च न संभव इत्युक्तम । तत्कथं संस्कारसंभवः ? अत आह—**प्रत्यनीकपरिहा[रा]र्थं चेति** । चकारादर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तिः । तत्परिहारार्थम् ।

ननु संस्कारो जन्मान्तराणि ननुवर्त्स्यति ततः कथमतस्तत्त्वसाक्षात्कारो जन्मान्तरभावी इत्यत आह— **योगाभ्यासेति** ।

टीयाम् ।। **तत्सहकारिशालितयेति** । प्रचयकाष्ठाप्राप्तधर्मसहकारिशालितया ।

---

1 IV. ii. 41

उने ॥ प्रकृष्टे इत्येतदार्थीं वृत्तिमाश्रित्योक्तम् । शाब्दवृत्त्या तु **भाष्ये** प्रचयकाष्ठां गते इत्यस्ति ।

तथानभ्युपगमादिति । नैयायिकैरर्थविशेषप्राबल्यस्य बुद्ध्यनुत्पादकत्वानभ्युपगमात् प्रसङ्गरूपं यदीत्यादि **भाष्यं** सिद्धान्तवाक्यं तदा स्यात्, यदि सिद्धान्तिना तथार्थविशेषप्राबल्यं बुद्ध्युत्पादेऽहेतुरङ्गीक्रियते इत्यर्थः ।

उपक्रान्तपूर्वपक्षेति । नार्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तेरित्ययमुपक्रान्तपूर्वपक्षः । तस्य च प्रसङ्गरूपं यदीत्यादि **भाष्यम्**, प्रतिकूलप्रसङ्गस्य विपर्ययपर्यवसायित्वात् ॥

भाष्ये । **अपवर्गेऽप्येवं प्रसङ्ग** इति **सूत्रम्**[1] ।

उने । **अस्येति** । अपवर्गेऽपि अर्थप्राबल्यात् बुद्ध्युत्पत्तिप्रसङ्गस्य ॥

टीयाम् । **फलीकृता अपीति** । प्रसाधिता अपि ॥

भाष्ये । **तदभावश्चापवर्गे सूत्रम्**[2] ॥

तदर्थं यमेत्यादि **सूत्रम्**[3] । यमोऽहिंसादिः । नियमः शौचादिः । ताभ्यामात्मनः संस्कारो धर्मोपचयाधर्मक्षपणरूपः । तदर्थं तत्त्वज्ञानार्थं कर्तव्यः । तथा योगादिति योगशास्त्रात् **पातञ्जला**देरधिगतेनाध्यात्मविधिना तस्योपायैश्चात्मसंस्कारः कार्यः । अध्यात्मविधिस्तु तपः प्राणायामः प्रत्याहारो धारणा ध्यानमिति । तत्र त्रिविधदुःखसहिष्णुत्वं तपः । वातादिवैषम्यजं शारीरं कामादिजं मानसमिति द्वयमाध्यात्मिकं दुःखम् । सर्पादिनिमित्तमाधिभौतिकम् । राक्षसादिनिमित्तमाधिदैविकमिति त्रिविधानि दुःखानि । योगविरोधिव्याध्याद्युपशमार्थः पादादिसंयमः आसनं पद्मकस्वस्तिकादि । तद्विधाय कोष्ठस्य वायोर्गतिविच्छेदः [795b] प्राणायामः पूरकरेचककुम्भकप्रकारः शनैः शनैर्जेयो[4] वनगजेन्द्रवत्, अन्यथा वातगुल्माद्यनर्थं कुर्यात । समाधिविरोधिभ्यश्चेतसो व्यावर्तनं प्रत्याहारः । तत्त्वे चेतसो निश्चलीकरणं धारणा । ध्येयालम्बना बुद्धिधारा ध्यानमिति । अध्यात्मविधेरुपायाश्च योगाचारविधानानि । एतेऽपि तत्त्वज्ञानहेतव इति **सूत्रार्थः** ॥

---

1 IV. ii. 43 2 IV. ii. 45 3 IV. ii. 46 4 S ज्ञेयो

उने । तदभावादिति । अपरिग्रहाभावात् ।

सोऽपीति । अपरिग्रहोऽपि ।

भाष्यमिति । नियमः प्रतिविशिष्टमित्येतत ।

नियमा इति सर्वधर्मेति । नियमा इत्येवं प्रकारेण सर्वधर्मशास्त्रेषु प्रसिद्धानां शौचादीनाम् ।

अनियमेनेति । देशकालाद्यनियमेन ।

इतिकर्तव्यताविशेषेणेति । कालविशेषादिव्यवस्थापनेन । योगादिति ।

सूत्रमिति । सूत्रावयवः ।

तस्येति । योगस्य ॥

ज्ञानग्रहणेत्यादि **सूत्रम्**[1] । ज्ञायतेऽनेनेति ज्ञानमान्वीक्षिक्येव । तस्य ग्रहणमध्ययनधारणे । तदभासस्तत्र प्रयत्नः । तद्विद्भिश्च सह समायवादः । तथा संशयव्युदासाज्ञातावबोधज्ञाताभ्यनुज्ञानैस्तत्त्वज्ञानबृंहणं स्यादित्यर्थः ।

तं शिष्येत्यादि **सूत्र**[2]**म्** ।

तमिति । वादम् ॥

उने । तेषामिति । प्रावादुकदर्शनानाम् ।

तत्त्वज्ञानविवर्धनोपायानिति । अशुभसंज्ञोपासनादीन् ।

अविरतीति । रूयादिभ्योऽनिवृत्तिः ॥

अनवस्थितत्वव्युदासार्थमिति । समाधेः ॥

अलब्धभूमिकत्वव्युदासार्थमिति । अप्राप्तसमाधियोग्यतत्त्वव्युदासार्थम् ।

व्याधिस्त्यानेति । व्याधिव्यपोहार्थमाहारविशेषादिरूपः । स्त्यानस्य प्रतिबन्धस्य व्युदासार्थं चैकाकितादिरूपो योगाचारः ॥

॥ इति तत्त्वज्ञानविवृद्धिप्रकरणं संपूर्णम् ॥

---

1 IV. ii. 47 2 IV. ii. 48

॥ तत्त्वज्ञानरक्षाप्रकरणम् ॥

[४.२.५०–५१]

टीयाम् ॥ **ननु यत्र वादस्यैवेति** । ननु वीतरागकथाया वादस्यैव यदा स्वपक्षत्यागेन तत्त्वज्ञानहेतुत्वं तदा विजिगीषुकथे जल्पवितण्डे तत्त्वनिर्णये दत्तजलाञ्जली इत्यर्थः ।

तत्त्वाध्यवसायेत्यादि सूत्रम्[1] ।

अतत्त्वज्ञानां तत्त्वज्ञानाय घटमानानां पराहङ्कारप्रशमनमात्रप्रयोजने जल्पवितण्डे तत्त्वज्ञानमपि कथञ्चिदुपकुरुतो मृगादिप्रशमनार्थां कण्टकशाखेव बीजप्ररोहम् । अन्यथा तत्त्वज्ञानाङ्कुरः शाक्यादिमृगैर्भक्ष्येतेत्यर्थः ।

टीयाम् । **दृष्टार्थमिति** । दृष्टं लाभादि तदर्थम् ।

अस्य वक्ष्यमाणोऽभिसन्धिरिति । अन्यथा स्वाङ्गतीक्ष्णानुपपत्तिलक्षणः ।

उने । ननु **सांख्यं** दूषयद्भिरित्यर्थ इति **टीका** असङ्गता, न हि **नोक्तोत्तरत्वादिति** वार्तिकस्यार्थोऽयमतः आह **सांख्यमिति** । **इत्यर्थ** इत्यस्याष्टीकायाः कोऽर्थः ? अर्थशेष इति । **सांख्यं** दूषयद्भिरित्यस्य योऽर्थस्तस्य च साक्षाच्छेषीकर्तुमशक्यत्वात्, तद्वाचकानां शब्दानां शेष इति भावः ।

टीयाम् । ननु प्रयत्नवदात्मसंयोगः सर्वस्मिन्नप्यङ्गे साधारणः, तत्कुतः पाणौ क्रिया जायते, न सकलेऽप्यङ्गे इत्याशङ्क्याह—**यद्यप्यात्मनः** इति ।

अनयोः प्रयत्नयोरिति । शरीरचलनचक्षुःप्रेरणकारणयोः प्रयत्नयोर्न युगपदुत्पादो मनसोऽणुत्वेन शरीरचक्षुर्भ्यां युगपत्संबन्धासंभवात् ।

नन्वेकस्मिन्निति । शरीरचलनहेतुः संयोगः [796a] प्रयत्नो वान्यत्रात्मप्रदेशे चक्षुःप्रेरणहेतुश्चान्यत्र । ततोऽन्यस्य शरीरचलनमन्यस्य च चक्षुःप्रेरणम् । अत

---

1 IV. ii. 50

एकस्यैव स्वाङ्गगतिस्तदीक्षणं च न प्राप्नुतः । तस्मात् यद्येकस्मिन् आत्मप्रदेशे **वर्तमानः संयोगो** वा प्रयत्नो वा यत्रात्मप्रदेशान्तरे स्वयं नास्ति तत्र कर्मारभते तदा एकस्यैव **स्वाङ्गगतिः तदीक्षणं च घटेत** । न चासावात्मप्रदेशान्तरे कर्मारभते । न हि समवाय्यसमवायिकारणे **स्वदेशाद्** भिन्नदेशं कार्यमारभेते । तस्मात् स्वाङ्गगतीक्षणानुपपत्तिदोषस्तदवस्थ **एवेत्याशङ्कार्थः** ।।

वाके । सन्तीत्यचोद्यमिति । इति हेतोरचोद्यम् ।

किं तदित्याह—**प्रदेशवतीति** ।

इति तत्त्वज्ञानरक्षाप्रकरणं संपूर्णम् ।।

व्याख्योर्मिभ्योऽस्तु लक्ष्मीतिलकयतिपतेः स्वस्ति रत्नाकरस्य
न्यायाध्यायेऽत्र तुर्ये विषमपदघटाशुक्तिकासंपुटालीः ।
भित्वान्तःस्थैः प्रपूर्योज्ज्वलकलसकलैरर्थमुक्ताफलौघै-
र्वेलाकूलानि शिष्यान् किमपि हि भुवने निन्यिरे गौरवं याः ।।

।। इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां

चतुर्थोऽध्यायः समर्थितः ।।

॥ पञ्चमाध्याये प्रथमाह्निकम् ॥

॥ सत्प्रतिपक्षचोदनाभासप्रकरणम् ॥

[५.१.१–३]

उने । रागानुगतेति । रागेण प्रेमानुबन्धेनानुगतः संभेदोऽन्योन्यमर्धाङ्गसमर्पणेन संमिश्रणं ययोस्तौ तथा । तथा

वामं तु नयनं सौम्यं भानवीयं तु दक्षिणम् इति प्रसिद्धेः गिरिजार्धाङ्गभागे चन्द्र ईशानार्धाङ्गभागे च सूर्यो रुद्र[ः] ।

भालेऽग्निमयं नेत्रम्

इति श्रुतेरनलश्चेक्षणानि ययोस्तौ तथेति गिरिजेशानपक्षे । यामिनीवासरपक्षे तु रागेण सन्ध्यारागेणानुगतः संभेदः संबन्धो ययोस्तौ तथा । तथा चन्द्रसूर्यानलाः प्रकाशकत्वादीक्षणानि च ययोस्तौ तथा ।

विकल्पं बहुत्वेनेति । एतेन प्रकरणनानात्वे उपाधयो ज्ञापिताः ।

जातिनिग्रहस्थानयोरित्यनेनाह्निकयोरूपाधी ज्ञापितौ ।

वादिप्रतिवाद्यशक्तिसूचकयोरित्यनेन त्वध्यायस्योपाधिर्ज्ञापितः ।

अत एवाह—**प्रकरणसमूहेति** । प्रकरणसमूहरूपे ये आह्निके, तयोः समुच्चयरूपो योऽध्यायरूपो ग्रन्थः तेन व्युत्पाद्यतया प्रथमाध्यायाद् भेदेन स्थितौ सत्यां प्रथमाध्यायादनन्तरमेव जातिनिग्रहस्थानविशेषलक्षणस्याभिधाने प्राप्ते ।

परीक्षाया इति । प्रमेयादीनाम् ।

विच्छेदो वृत्त इति । जातिनिग्रहस्थानविशेषलक्षणस्य ।

यथा च प्रथमाध्याये जातिनिग्रहस्थानविशेषलक्षणस्यानभिधानतः प्रतिपादकत्वं [1]**तद्विकल्पाज्जाती**त्यादिसूत्रस्य तथा भावयति—**अभावेति** । प्रथमाध्याये

1 I. ii. 20

जातिनिग्रहस्थानविशेषलक्षणस्याभणनम् अभावात् अनुपयोगात् कारणान्तरात् वेति शङ्कात्रयम् ।

अनेनेति । तद्विकल्पादित्यादिना **सूत्रेण** ।

तृतीयप्रकार इति । विकल्पबहु[त्व]लक्षणकारणान्तररूपः ।

एतस्यार्थस्येति । जातिनिग्रह[796b]स्थानविशेषलक्षणभणनकारणस्य विकल्पबहुत्वस्य ।

ननु साधर्म्येत्यादिना **भाष्येण** प्रथमाध्याये अभणनकारणस्य जातिविकल्पबहुत्वस्यैव स्मारणं स्यात् निग्रहस्थानविकल्पबहुत्वस्य तु कथमत आह—**अनेन चेति** ।

एकदेशमिति । विकल्पात् जातिबहुत्वमितिरूपम् ।

सकल एवेति । निग्रहस्थानविकल्पबहुत्वलक्षणोऽपीत्यर्थः ।

ननु यदि सकलसूत्रार्थस्मारणमस्य प्रयोजनं तर्हि सकलं **सूत्रं** किमिति न पठितं येन सुखेनैतत् स्यात् , अत आह—**यथाश्रुतेन त्वाह्निकार्थोऽपि दर्शित** इति । प्रथमाह्निकस्य हि जातिबहुत्वमेवाभिधेयम् ।

यद्यपि जातीति । प्रयोगोत्तरकालं प्रयुज्यमानतया जायते इति जातिः ।

लक्षणस्येति । लक्षणं हि प्रथमाध्यायस्यार्थः । अत इदमध्यायस्य भेदकं नोपपद्यते । यद्येषोऽध्यायो लक्षणपरः स्यात् , तदा प्रथमाध्याय एवान्तर्भवेदित्यर्थः ।

दुष्टत्वव्यवस्थापनेनेति । जातीनाम् ।

ननु यद्युत्तरसूत्राणि लक्षणांशेनोपयुज्यन्ते तर्हि स्वतन्त्राण्येव भवन्तु, अत आह—**स्वातन्त्र्येण त्विति** ।

तेषामिति । उत्तरसूत्राणाम् ।

तथा चेति । यदि व्यतिमिश्रार्थत्वमध्यायस्याभ्युपेयते तदा ।

द्वितीयादीति । द्वितीयादावध्याये यत् परीक्षापर्व तस्य ।

तस्येति । पञ्चमाध्यायस्य ।

सेति । परीक्षा ।

हेतुत्वेनेति । परीक्षायाः कारणत्वेन ।

परीक्षार्थत्व इति । अध्यायस्य ।

द्वितीयाह्निकाव्याप्तेरिति । उत्तरसूत्रप्रणयनेन लिङ्गेन ।

भागासिद्धत्वादिति । अध्यायस्य साध्यधर्मिणो भागे द्वितीयाह्निकेऽसिद्धत्वात् ।

जात्याह्निकस्यैव पक्षीकरणे इति । जात्याह्निकं परीक्षार्थमुत्तरसूत्रवत्त्वादित्येवम् ।

तथा सतीति । जात्याह्निकस्य परीक्षार्थत्वे एकस्याह्निकस्यार्थः परीक्षा, अपरस्य च लक्षणम् । ततो वादिप्रतिवाद्यशक्तिसूचकत्वेनाविशेषेऽपि जातिनिग्रहस्थानत्वाभ्यामिव परीक्षार्थत्वलक्षणार्थत्वाभ्यां जातिनिग्रहस्थानयोर्भेद एव स्यात् । ततश्चाध्यायोपाधेरेकस्यालाभ एव स्यात् ।

न चेदेवम् । यद्ययमध्यायो लक्षणार्थो न स्यात् ।

परीक्षाया यथेति । प्रथमाध्याय एव जातिनिग्रहस्थानविशेषलक्षणभणनस्य अवसरप्राप्तस्य विलम्बनं कुत इति चोदनस्य हि तद्विकल्पादित्यादि **सूत्रं** समाधानरूपमस्ति । एतच्च समाधानं तदोपपद्यते, यदि जात्यादिविशेषलक्षणस्याभणनविलम्बनमयुक्तं स्यात् । यदा त्वयमध्यायः परीक्षार्थः परीक्षायाश्च यथाक्रमेणैव प्रवर्तनात् जात्यादिपरीक्षायाः सर्वपश्चात्प्रवर्तने विलम्बनं नायुक्तम्, तदा विलम्बनानुपपत्तिमाश्रित्योत्पद्यमानं समाधानमयुक्तं स्यादित्यर्थः ।

तथा चेति । तद्विकल्पादिसूत्रस्यानारम्भे ।

तत्प्रतिज्ञानमनुस्मार्येति । विकल्पाज्जातिबहुत्वमिति संक्षेपेणोक्तमिति **भाष्येण** ।

इदानीं विशेषो वक्तव्य इत्यध्यायावतारोपीति । तद्विस्तरेण विभज्यत इति **भाष्येण** ।

स्वावसरातिक्रमे हीति । **साधर्म्येत्यादिना विभज्यते** इत्यन्तेन हि **भाष्येण** जात्यादेर्विशेषभणनस्य [797a] यतोऽनवसरत्वं स उपाधिः प्रमेयादिपरीक्षाकाङ्क्षारूपो निवृत्तः ।

इदानीं विशेष उच्यते इति विशेषावसरः प्रदर्श्यते । एतच्च तदा स्यात् यदि स्वावसरातिक्रमः स्यात् । यदा चास्याध्यायस्यार्थः परीक्षा, तदा नास्याः स्वावसराति-

क्रमो येनानवसरत्वोपाधिविगमादवसरप्रदर्शनमुपपद्येत। तत इदं **भाष्यमनर्थकमेव** स्यादिति भावः।

न चायमर्थ इति। तद्विकल्पादित्यादि**सूत्रस्य**।

तद्विशेषेति। यदा जात्यादिविशेषान् परीक्षिष्यामहे तदैवैषां लक्षणान्यपि वक्ष्याम इति परीक्षैवाध्यायार्थो भविष्यतीति **पराशयः**।

अभ्यासत इति। पुनःपुनर्भणनतः।

विभागमवतार्येति। ताश्च खल्वित्यादिना विभाग**सूत्रमवतार्य** लक्षणादतिरिक्तानि **सूत्राणि** [1]गोत्वाद्गोसिद्धिवत् तत्सिद्धिरित्यादीनि किमर्थमित्याशङ्कमानश्च **भाष्यकारः** षट्पक्षीमुपसंहृत्य पञ्चमाध्यायप्रथमाह्निकप्रान्ते यदा तु कार्यान्यत्व इत्यादिना ग्रन्थेन विभावयांबभूवेति संबन्धः।

किमित्याह—**यथोक्तसदुत्तरे** इत्यादि।

इतरथा त्विति। असदुत्तरे तु षट्पक्ष्यां सत्यामुभयोर्वादिप्रतिवादिनोः पक्षासिद्धिः। तस्मादुत्तरमेव वाच्यमित्येवंप्रकारेण या शिष्यशिक्षा तन्मात्रप्रयोजकानि न तु परीक्षापराण्येतानि **सूत्राणीति**।

तदेवमेषामुत्थानमिति। यस्मादुक्तप्रकारेण शिष्यशिक्षामात्रप्रयोजकान्येतानि **सूत्राणि**, तस्माद्धेतोरेवं वक्ष्यमाणरीत्या एषां **सूत्राणां** लक्षणसूत्रान्तरालेषूत्थानम्।

उद्भावितेऽपीति। वादिना।

उपतिष्ठते गोत्वादित्यादीति। गोत्वाद्गोसिद्धिवदित्यादिना सदुत्तरेण जातिवादिप्रयुक्तजातेरसदुत्तरत्वमेव व्यवस्थाप्यमिति भावः।

लक्षणमध्यायार्थ इति च निरपवादमाह **भाष्यकार** इति संबन्धः।

केनेत्याह—**तानीमानीति**। तानि जातिषु लक्षितास्ववसरप्राप्तानीति भावः।

अत एवेति। यत एव लक्षणमध्यायार्थः।

अस्येति। शास्त्रस्य।

उपसंहरन्नाहेति। **वार्त्तिककृदेव**।

लक्षणोत्तरसूत्रसंपिण्डनेनेति। लक्षणस्योत्तरस्य च **सूत्राणां** मेलनेन।

---

[1] V. i. 3

साध्यदृष्टान्तविकल्पप्रभवेति। उत्कर्षादिपञ्चकस्य साध्यविकल्पप्रभवत्वं व्यक्तम्। साध्यसमायास्तु तत्प्रभवत्वमुभयसाध्यत्वाच्चेति चकारात्। इदं **परिशिष्टे** व्यक्तम्॥

प्राप्त्यप्राप्तिलक्षणौ युगनद्धवाहिनौ युगलेन बद्धौ वहन्तौ सहचारिणावित्यर्थः। यौ विकल्पौ ताभ्यामुपक्रमो यत्र तत् तथा यत् जातिद्वयं तस्य प्रकरणम्। प्राप्त्यप्राप्तिरूप-विकल्पसाहचर्ये उभयोरप्युत्थानमेक उपाधिः। तेन द्वयोरपि जात्योरेकं प्रकरणमित्यर्थः॥

व्यवस्थिताव्यवस्थेति। प्रसङ्गसमायां हि दृष्टान्तस्य व्यवस्थापकं प्रमाणं वाच्यमिति प्रमाणप्रसञ्जनेन, प्रतिदृष्टान्तसमायां च प्रतिदृष्टान्तप्रसञ्जनेन व्यवस्थितस्य सिद्धस्य दृष्टान्तस्याव्यवस्थापाद्यते, तस्मादेकस्मादुपाधेरनयोरेकं प्रकरणमिति भावः।

द्विद्विसूत्रकाणीति। [797b] अहेतुसमानुपलब्धिसमानित्यसमाप्रकरणानां त्रित्रिसूत्रकत्वेऽपि द्वयोर्द्वयोरुत्तररूपैकार्थतयैक्यविवक्षया द्विद्विसूत्रकत्वमुक्तम्।

ननु प्रतिज्ञाहान्यादयः प्रतिज्ञाश्रयाः, तत् कथमुक्तमात्राश्रया अत आह—**प्रति-ज्ञोपलक्षितेति**। प्रतिज्ञापदेनोक्तमात्रमेवोपलक्षितमेवं हेत्वन्तरमित्यत्र हेतुपदेनापि। ततश्च प्रतिज्ञोपलक्षितं यदुक्तमात्रं तदाश्रयाणि यानि निग्रहस्थानानि तत्पञ्चकप्रकरणम्।

प्रकृतोपयोगीति। प्रकृतोपयोगि यद्वाक्यार्थप्रतिपत्तिरूपं फलं तेन शून्यं यन्निग्रहस्थानचतुष्कं तस्य प्रकरणम्।

स्वसिद्धान्तेति। वादिप्रतिवादिनोः स्वसिद्धान्तानुरूपो यः प्रयोगः पञ्चा-वयवादिस्तदाभासः तद्विपर्ययरूपं यन्निग्रहस्थानत्रिकं तत्प्रकरणम्।

अनुत्तरेति। अनुत्तरमुत्तराभावः फलं यत्र तद् यच्चतुष्कं निग्रहस्थानानां तस्य प्रकरणम्।

प्रमाणान्तरेति। प्रमाणान्तरस्य य उपनय उपढौकनं तद्रूपो यः प्रयासस्तेनो-द्भाव्यस्य निग्रहस्थानद्विकस्य प्रकरणम्।

अन्येषामिति। दूषणान्तराणाम्।

इहेति। जातिलक्षणे।

इतरेभ्य इति। गुणादिभ्यः।

अव्यापकमिति। आकाशादौ पक्षैकदेशेऽसत्त्वात्।

अतिव्यापकमिति । इतरेभ्यो गुणादिभ्यो भेदे साध्ये गुणादिभ्योऽभिन्नतया विपक्षेषु गुणादिस्वरूपेष्वपि गतत्वात् ।

विरुद्धभेद इति । गुणादिभ्यो भेदे साध्ये गुणादिभ्यो भिन्नस्यान्यस्य कस्याप्यभावेन सपक्षाभावात् केवलव्यतिरेक्येवायम् । तथा च विरुद्धे गच्छन् विरुद्धः ।

असाधारणमिति । अद्रव्येभ्यो भिन्नेषु साध्यमानेषु द्रव्याद्भिन्ना गुणादयो विपक्षाः । तेभ्य इवाद्रव्येभ्यो भिन्नेभ्य आत्मादिभ्यः सपक्षेभ्योऽपि व्यावृत्तेः ।

भागबाध इति । रूपाद्युत्क्षेपणादि च येन प्रमाणेन गृहीतं तेनाद्रव्यरूपं गृहीतमिति भागग्राहकप्रमाणेन बाधः ।

उपमानबाधितमिति । गवयपिण्डस्य गवयादभेदं गृह्णतोपमानेन बाधितम् ।

शब्दनिमित्तमिति । संयोगविभागौ ।

संयोगविभागासमवायिकारणत्वादिति । संयोगजे संयोगे विभागजे विभागे च संयोगविभागयोरसमवायिकारणत्वात् ।

तदेवेति । केवलमुत्क्षेपणादिरहितमित्यर्थः ।

अत एवेति । अवसरसंगतावानन्तर्यस्यानुपयोगादेव ।

अङ्गाङ्गिभावमिति । जातिनिग्रहस्थानैर्हि जल्पवितण्डे प्रवर्तेते इति जातिनिग्रहस्थानानि अङ्गम्, अङ्गिन्यौ च जल्पवितण्डे ॥

बौद्धमिति । बुद्ध्यारोपितम् ।

तद्धि स्वात्मेति । यत् स्वात्मव्याघातकत्वरूपं प्रतिषेधासामर्थ्यं तज्जातिलक्षणमित्यर्थः ।

ननु जातयोऽनैकान्तिकत्वादीनि [1]दूषणानि, दूषणानि च न हेतवः । तत् कथमुच्यते प्रतिषेधहेतव इति ? अत आह—**हेतुत्वं पुनरिति** ।

अस्येति । जातिरूपप्रतिषेधस्य ।

अन्यथेति । प्रयोगदशायामनुमानरूपत्वाभावे ।

---

1 J दूषणाविदूष°

ननु अनैकान्तिकमसाधकमित्येकेनोक्तस्य [७9४a] आप्तोपदेशत्वे साधकमेवेद-मित्यपर याज्ञानं भविष्यति अत आह—**न चायमिति** ।

एतच्छब्दाभिधेयमेवाह—**शब्दानित्यत्वं प्रतीति** ।

[1]नन्वनैकान्तिकमसाधकमिति दूषणाभिधानं निष्प्रमाण[क]मेव भविष्यति । अत आह—**नापि दूषणेति** ।

अतिप्रसङ्गादिति । अदुष्टेऽपि दूषणाभिधानप्रसङ्गात् ।

सर्वस्मात् सर्वमगमिष्यदिति । रासभादिभ्योऽपि वह्न्यादिमवगच्छेत् प्रमातेत्यर्थः ॥

असिद्धेऽप्येवमेवेति । यद्यपि सिद्धमपि साधनमभविष्यत् सर्वस्मात् सर्वमगमिष्यत् ।

अगृह्यमाणविशेषस्येति । प्रकरणसमस्य ।

बाधितेऽप्येवमेवेति । बाधितस्यापि साधकत्वे औष्ण्यग्राहिणा प्रत्यक्षेण बाधितस्य कृतकत्वस्यानौष्ण्यसाधकत्वं स्यात् चौष्ण्यानौष्ण्यरूपविरुद्धस्वभावालिङ्गिततत्त्वप्रसक्तिरित्यर्थः । तथा बलवत्त्वाद् बाधकमिष्यते तस्या बलवत्त्वप्रसङ्गः, अत एवाबाधकत्व-प्रसक्तिश्च ।

इति तर्केति । इत्येवंविधा ये तर्कास्तद्रूपा ये सहायास्तदुपपत्तेः ।

तदुपयोगादिति । पञ्चावयवप्रयोगोपयोगात् ।

प्रकृते इति । दूषणे ।

तेषामिति । दूषणानाम् ।

तावदेव वक्तुमुचितमिति । अनैकान्तिकमिदमित्याद्येव वाच्यमित्यर्थः ।

अभेदादिति । यदनैकान्तिकमसिद्धं वा तदसाधकम् । कोऽर्थः ? तदनैकान्तिकमसिद्धं वेत्यत्र हि न साध्यसाधनयोर्भेदः । साध्याविशिष्टो हेतुरित्यर्थः ।

---

1 Mss नन्वैका

हेत्वभिमानिन इति। यो ह्याद्यवादी तं हेतुं हेतुत्वेनाभिमन्यते तस्य ततः साध्यप्रत्ययस्योत्पत्तिरेव नानुत्पत्तिरित्यनैकान्तिकोऽयं हेतुरित्यर्थः।

तृतीयेऽपि सत्त्वादिति। परमार्थतोऽनित्ये शब्दे परमार्थतोऽग्निमति च पर्वतेऽनैकान्तिकादेव हेतोः सत्त्वलक्षणादनित्यः शब्द इति। अग्निसाधकधूमत्वेनासिद्धया असिद्धादेव च बाष्पधूमरूपाद् धूमत्वेन गृहीताद् बाष्पादेव हेतोरग्निमान पर्वत इति समीचीनप्रत्ययोत्पत्तेः तृतीयेऽपि पक्षे यदनैकान्तिकमसिद्धं वा तदवश्यमसाधकमिति नियमो नोपपद्यते इति संबन्धः॥

नन्वनैकान्तिकासिद्धाभ्यामेव हेतुभ्यां समीचीनोत्पत्तिरिति कथं ज्ञायते? अत आह—**ततः प्रतीति।** ततोऽनैकान्तिकासिद्धहेतुप्रभवप्रत्ययात्।

तत्प्रयुक्तस्येति। सत्त्वबाष्पधूमप्रयुक्तस्य।

तत्रेति। तयोरनुमानयोः।

एतस्मादिति। बाष्पधूमात्।

जात्युत्तरस्य सिद्धत्वेऽपीति। नित्यः शब्दः स्पर्शशून्यत्वादाकाशवदित्युपसंहारेणैतदेवम्॥

अस्ति ह्यस्यानित्येनापि साधर्म्यं प्रमेयत्वम्। ततः किं नानित्यो घटवत्। न चेदेवम्, नित्योऽपि न स्यादविशेषादिति साधर्म्यसमादिना जात्युत्तरेण स्पर्शशून्यत्वादेर्हेतोर्यदसाधकत्वं साधयितव्यम्, तस्य सिद्धया जात्युत्तरस्य सिद्धत्वेऽपि स्पर्शशून्यत्वस्यानित्यगुणकर्मगतत्वेनानैकान्तिकत्वात् परमार्थतो निष्पन्नकार्यत्वेऽपि जात्युत्तरस्य दूषणहेतोरप्रयोजकं सिद्धं भवति। कुत इत्याह—**एतस्मादसाधक इतीति।** एतस्मात् साधर्म्य-[798b]समादेर्जात्युत्तरादयमाद्यवादिप्रयुक्तः स्पर्शशून्यत्वादिर्हेतुरसाधक इत्येवंप्रकारेण स्वात्मना प्रयुक्तं यत्सत्यासाधकत्वं तस्य यज्ज्ञानं तज्जननासामर्थ्यात्॥

टीयाम्॥ ननु नापरिज्ञाता जातयो वर्जयितुं शक्या इति कर्तव्यं विशेषपरिज्ञानम्। अत आह—**परिवर्जनं त्विति।**

ननु जातीनां जल्पवितण्डाङ्गत्वं तयोश्च विजिगीषुकथात्वेन न मुमुक्षोरधिकारः कथं जातिमपि प्रयुङ्क्ते इत्युच्यते। लाभादिकामः प्रयुङ्क्ते इति चेत्—**नार्थदृष्टार्थत्वेन** शास्त्रस्य

दृष्टप्रयोजनजात्यादिव्युत्पादनस्याप्रसङ्गात्। अथ मन्यसे तत्त्वाध्यवसायरक्षणार्थं जल्पाद्यङ्गभूतां जातिमप्यभिदधीत मुमुक्षुरिति, तन्न, असदुत्तरत्वेन जातीनां तद्रक्षणासामर्थ्याद् यथाकथञ्चित् परसंमोहनद्वारेण तद्रक्षणहेतुभूतजातिव्युत्पादनाभ्युपगमे मुख्यानामेव मोहनहेतूनां चपेटादीनां मोक्षविद्यायां व्युत्पादनं कर्तव्यं प्राप्नोति। अत आह— **तेन हीति**। जातिप्रयोगेण।

खटचपेटेति। प्रहारविशेषः।

ननु विरुद्धाकारद्वयासंभवात् कथं परस्य साधु साधनम्? साधुत्वे वा तस्य न तत्त्ववादी तत्त्ववादी स्यात्। अतो न युक्तं साधननिराकरणार्थं वेत्यत आह—**अतत्त्वविषयत्वेनेति**।

ननु न दृष्टार्थः शास्त्रारम्भोऽतः कथमुच्यते लाभादिकामश्चेत्यत आह—**अन्वाचये चकार** इति।

वाके॥ एकान्तपराजयः परस्येति। कर्तरि षष्ठी।

टीयाम्॥ पूर्वमपि वस्तुतोऽसाधौ [1]साधनदोषानभिज्ञतयैव जातिप्रयोगो दर्शितः। असाधुसाधननिराकरणार्थमनभिज्ञतया वा साधनदोषस्य जातिप्रयोग इत्यनेन पुनस्तदेवोच्यते। अत आह—**तत्त्वविषयमपीति**। पूर्वं नास्तिकेन साधनाभासे प्रयुक्ते तत्त्ववाद्येवाह्राय भूतदोषास्फुरणात् तत्त्वसंरक्षणार्थं जातिं प्रयुङ्क्ते इत्युक्तम्। अधुना त्वतत्त्ववादी समीचीने एव साधने संजातासाधुसाधनबुद्धिरसाधुसाधनबुद्धिर्निमित्तानां च पूर्वपरिकल्पितानामनैकान्तिकत्वादिदोषाणामस्मरणात् प्रयुङ्क्ते इत्युच्यते इति भेदः।

तदिदमुक्तम्-अनभिज्ञतया वेति। एतेनानभिज्ञतयेति **वार्त्तिकेन** अनभिज्ञत्वमस्मर्तृत्वं विवक्षितमिति दर्शितम्।

ननु यत एव न बुध्यते न स्मरति अत एव जात्योपक्रमते पूर्वबुद्धिस्थीकृतदूषणस्मरणे हि तदेव ब्रूयात्, न जातिम्। अत आह—**यो हीति**।

वाके॥ अयुक्तमेतदपीति। अयुक्ते साधने अयुक्तमुत्तरं वक्तव्यम्, युक्ते युक्तमित्येतदपि परोक्तमयुक्तम्।

---

1 S साधनसाधनदो°

टीयाम् ॥ ननु साधर्म्यमेव समं वैधर्म्यमेव सममिति न **सूत्रं** नापि **भाष्य**मतः कस्येदं वाक्यमिति नानिर्दिश्य व्याख्यायते । अत उक्तम्—**यस्मिन् प्रयोगे इति शेष** इति । साधर्म्यसम इति सौत्रस्य पदस्य विग्रह एष इत्यर्थः ।

न सर्वापदेशेषु व्याप्तिः सत्त्वम् । तत् कस्येत्याकाङ्क्षायामाह—सर्व**जाति-प्रयोगस्येति** ।

उने ॥ **तथा चेति** । पञ्चम्यन्तव्याख्याने हि साध्यधर्मविपरीतधर्मस्योपपत्तेर्निश्चयात् साधर्म्येणैव प्रत्यवस्थानं साधर्म्यसमः [799a] प्रतिषेध इत्यर्थः स्यात् । एवं च बाधचोदना-भासे साधर्म्यवैधर्म्यसमे जाती स्यातामित्यर्थः ।

संबन्धमात्रविवक्षायां तादर्थ्येऽपि षष्ठी स्यात्, अत आह—**पूरणेन षष्ठ्येवेति** । पूरणेन कृते इत्यनेन ।

टीयाम् ॥ **साधनमिति** । द्रव्यस्य क्रियाहेतुगुणयोगादित्येतत् ।

उने ॥ **तामेवेति** । वस्तुगतिम् ।

उक्तेर्दुष्टत्वेन तु यथेदमुत्तरं जातिस्तथा भावयितुं पीठमारचयति—**व्याप्तिमन-पेक्ष्य हीति** ।

प्रकृतेऽपीति । **भाष्यो**दाहृतसाधर्म्यसमेऽपि ।

इत्याहेति । **भाष्यकारः** ।

नियमापेक्षायां हीति । यदि हि व्याप्तिमपेक्ष्योत्तरं स्यात्, तदोत्तरे व्याप्ति-रेव व्याप्तिरहितात् साधनाद्विशेषहेतुः स्यात् ।

अत एवेति । व्याप्तिमनपेक्ष्य भवनादेव ।

तत्प्रतिपत्त्यर्थमेवेति । व्याप्तिप्रतिपत्तिरर्थः प्रयोजनं यस्य तम् ।

तदेवं पीठमारचय्य जातित्वं भावयति—**तथा हीति** ।

नन्विदं प्रतिसाधनमात्मनो निष्क्रिय[त्व]व्यवस्थापकं सदात्मना अनैकान्तिकत्वोद्भा-वनपरं साधनस्य भविष्यति, अत आह—**अनैकान्तिकत्वस्य चेति** । पक्षेण व्यभिचाराभावात् भावे वा सर्वानुमानोच्छेदप्रसङ्गादिति भावः ।

यद्येवं तर्हि आकाशदृष्टान्तेनेदमात्मनो निष्क्रियतां साधयदाकाशेन वेगवद्द्रव्यादि-संयोगलक्षणक्रियाहेतुगुणयुक्तेनापि निष्क्रियेणानैकान्तिकत्वोद्भावकं भविष्यति, अत आह— **आकाशेति** । क्रियाहेतुगुणयोगेन यः स्पर्शसंबन्धमात्रम् , तस्यानुद्भावनात् । आकाशं क्रियाहेतुगुणयुक्तमपि निष्क्रियमित्येवमनुद्भावनादित्यर्थः ।

यथोक्तहेतोरिति । न हि क्रियाहेतुगुणयुक्तमनुमानं विभुत्वमुपजीव्योत्पद्यते, येन विभुत्वेनास्य बाधा स्यात् ।

नापि सत्प्रतिपक्षत्वमपि । प्रतिसाधनोद्भावनमपि साधनगतव्यभिचाररूप-विशेषदर्शिनस्तददर्शिनो वा ? नाद्यः, तद्दर्शिनो व्यभिचारानुद्भावनानुप[1]पत्तेर्न चास्ति विशेषहेतुरित्युक्तेन व्याघाताच्च ।

न द्वितीयः, स्फुटतरस्य विशेषस्यादर्शनानुपपत्तेरित्यर्थः ।

तथापीति । यद्यपि व्यभिचारादर्शनपक्षो न संभवति, तथापि व्यभिचारं न प्रतिसन्धत्ते ।

वस्तुनो हेत्वाभासेनेति । वस्तुवृत्त्या यो हेत्वाभासः । तेन यदाद्यवादि-साधनस्य सत्प्रतिपक्षीकरणं द्वितीयवादिना सा जातिः । तथा वस्तुतो यो हेतुः, तेन यत् सत्प्रतिपक्षीकरणं तत् सदुत्तरमिति । एतेन वस्तुतो हेतुना विभुत्वेन क्रियाहेतुगुणयोगस्य सत्प्रतिपक्षीकरणात् निष्क्रिय आत्मा विभुत्वादाकाशवदिति सदुत्तरमेव न जातिरित्युक्तं भवति ।

उभयथापीत्यादि । यदि हेत्वाभासेन प्रतिसाधनेन साधनं सत्प्रतिपक्ष्यते, यदि च हेतुना प्रतिसाधनेन साधनं सत्प्रतिपक्ष्यते, उभयथापि साधनप्रतिसाधनसाध्ययोर्वस्तु-नोर्विशेष एकस्यैव साध्यवस्तुनः स्वसाधनव्यापकत्वं नान्यस्येति भेदः । यदि तु द्वयोरपि साध्यवस्तुनोरविशेषः स्वस्वसाधनव्यापकत्वमभ्युपेयते, तदा विरुद्धयोर्धर्मयोरेकत्र समावेशः स्यात् । न चायमस्ति । तेन वस्तुनोर्विशेषाद् [799b] वस्त्वपेक्षया सत्प्रतिपक्षत्वमेव न संभवति, किं पुनरस्य जातित्वं सदुत्तरत्वं वा ? तथा च साध्यवस्तुनोरगृह्यमाणविशेषतया तथात्वं सत्प्रतिपक्षत्वं वाच्यम् । तच्चोभयत्रापि हेत्वाभासेन सत्प्रतिपक्षीकरणे, हेतुना सत्प्रति-पक्षीकरणे च समानम् । तत् कथमिदं जातिरिदं च सदुत्तरमिति विशेषः स्यादिति भावः ।

---

1 J पत्ति°

हेत्वाभासान्तरवदेवेति । असिद्ध्यादिहेत्वाभासान्तरेणेव ।

इमं चार्थमिति । व्याप्तितिरस्कारेण सन्नपि प्रतिहेतुर्वचनदोषेण जातिर्भवतीति रूपम् ।

क्रियावानात्मा क्रियाहेतुगुणयोगात् लोष्टवदिति प्रयुक्ते प्रतिदृष्टान्त उपादीयते । क्रियाहेतुगुणयुक्तमाकाशमक्रियं दृष्टम् । तस्मादनेन प्रतिदृष्टान्तेन कस्मात् क्रियाहेतुगुणयोगो निष्क्रियत्वगुणमेव न साधयति आत्मन इत्यत्र प्रतिदृष्टान्तसमे **टीका** । यदि पुनरियमनैकान्तिकचोदना स्यात् क्रियाहेतुगुणयुक्तस्याप्यक्रियत्वं दृष्टं यथाकाशस्येति । तत एतत् सदुत्तरं स्यात्, न त्वेवमेतदिति जातिरिति स्पष्टैव ।

तथा प्रकरणसमेपि **टीका** स्वसाध्यनिर्णयेन परसाधनविघटनबुद्ध्या प्रतिवादिना साधनं प्रयुज्यमानं प्रकरणसमं जात्युत्तरं भवति । सत्प्रतिपक्षतया वादिनः साधनमनिश्चायकं करोमीति बुद्ध्या प्रतिपक्षसाधनं प्रयुञ्जानो न जातिवादी सदुत्तरवादित्वात् सत्प्रतिपक्षताया हेतुदोषस्यानैकान्तिकत्वादिवदुपपादितत्वादिति वादिसाधनमधिकबलं साधनं सत्प्रतिपक्षतयैव व्यवतिष्ठमानं लोके दृष्टम् ।

ननु बाधकतया दृष्टमिष्टं वा शिष्टैः, तद्यदि तथाभूतसाधनात् बाधेन प्रत्यवतिष्ठते तदोक्तिमात्रदोषेण जातिरिति स्फुटीकृतं **टीकाकृते**त्यर्थः ।

वाके ॥ अनैकान्तिकचोदनाभासेति । एकस्मिन्नन्ते नियतः प्रयोग इति न द्वितीयपक्षप्रयोगस्यापि संभवात् इत्येवमनिर्णायकार्थोऽत्रानैकान्तिकशब्दः । तथा चानेन सत्प्रतिपक्षत्वमेवोच्यते इत्युक्तं स्यात् ।

उने ॥ उद्धरणीयेतीति । इत्येवं रूपम् ।

टीयाम् ॥ गोसाधर्म्याद्धि गोत्वाज्जातिविशेषाद् गौः सिध्यति, न सास्नादिसंबन्धादिति **भाष्य**व्याख्यानेनैव गृह्णाति । यथा गोत्वाद् गौरिति ।

ननु च यथा गोत्वं गोव्यवहाराव्यभिचारि एवं सास्नादिमत्त्वमपि । अतः कथमुच्यते गोत्वाद् गौः सिध्यति न सास्नादिमत्त्वादित्यत आह— **सास्नादीत्यतद्गुण** इति ।

उने ॥ सपक्षादपीति । न केवलं विपक्षान्महिषादेः ।

अस्येति । सत्त्वस्य ।

गोमहिषशब्दयोरन्वयव्यतिरेकाभ्यामर्थसंगतिरिति । महिष्यादावेवाव्यावृत्तेर्गोष्वपि व्यावृत्तेरित्येवं व्यत्ययेन महिष्यादौ केवलेन व्यावृत्तिर्गोष्वपि व्यावृत्तेर्महिष्यादाविव । गोष्वपि एकशफादिवैधर्म्यस्य व्यावृत्तेरित्यर्थसंगतिः ।

येन संभावितेति । येन साधनाङ्गभावेन प्रसक्तप्रयोगा सती सपक्षाद् व्यावृत्तिर्यदि सपक्षादेव केवलात् साधनस्य निवृत्तिः स्यात् स्वसाध्यं साधयेत् परं विपक्षादपि व्यावृत्तिः । अतो नेयं स्वसाध्यसाधिकेत्येवं विपक्षव्यावृत्त्या दूष्येत ।

भाष्ये ।। [800a] **नचैतत् कृतव्यवस्थानमिति** । अवयवसमुदाये च वाक्ये संभूयेतरेतराभिसंबन्धात् प्रमाणानि अर्थं साधयन्तीत्यादिना निगमनस्य स्वरूपं वदता न चैतस्यां हेतूदाहरणपरिशुद्धौ सत्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् जातिबहुत्वं प्रक्रमते । अव्यवस्थाप्य खलु धर्मयोः साध्यसाधनभावमुदाहरणे जातिवादी प्रत्यवतिष्ठते । व्यवस्थिते च खलु धर्मयोः साध्यसाधनभावे दृष्टान्तस्थे गृह्यमाणे साधनभूतस्य धर्मस्य हेतुत्वेनोपादानं न साधर्म्यमात्रस्य वैधर्म्यमात्रस्य चेत्यनेन फलं च वदता ।

उने ।। **सदसद्विषयौ असदुक्तिप्रभवौ चेति** । सद्विषयौ समीचीनसाधनविषयौ । असद्विषयौ साधनाभासविषयौ । असदुक्तिप्रभवौ उक्तिमात्रदोषेण वर्तमानौ । तत्राद्योदाहरणं **वार्त्तिके**—अत्रोत्पत्तिमत्त्वस्य व्याप्तिमपेक्ष्य प्रवृत्तस्य समीचीनत्वमिति सद्विषयत्वं जात्युत्तरस्य ।

द्वितीयोदाहरणं तु नित्यः शब्दः स्पर्शशून्यत्वादाकाशवदित्युपसंहारेणैतदेवम् । अस्ति ह्यस्यानित्यत्वेनापि साधर्म्यं प्रमेयत्वम् । ततः किं नानित्यो घटवत् । न चेदेवं नित्योऽपि न स्यादविशेषात् । यद् वा, अस्त्याकाशेनास्य वैधर्म्यमप्यस्मदादिबाह्यकरणग्राह्यत्वम् । ततः किं नानित्यो घटवत् । न चेदेवम् , नित्योऽपि न स्यादविशेषात् । अत्र स्पर्शशून्यत्वमनित्यगुणकर्मगतत्वेनानेकान्तसाधनमिति तद्विषयं जात्युत्तरमसद्विषयमिति बोद्धव्यम् ।

तृतीयोदाहरणं **भाष्ये** ।। उक्तिमात्रमत्र दुष्टं नार्थ इति ।

।। इति सत्प्रतिपक्षचोदनाभासप्रकरणं संपूर्णम् ।।

॥ जातिषट्कप्रकरणम् ॥

[५.१.४–६]

टीयाम् ॥ अत्र साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चसु जातिषु योज्यमुभयसाध्यत्वादिति साध्यसमायामिति दर्शयन् क्रमातिक्रमेण **सूत्रं** पठति—**साध्यदृष्टान्तयोरिति** ।

ननु साध्यदृष्टान्तयोर्धर्मविकल्पादितीदमेकं वाक्यं कथमुत्कर्षसमादीनां भिन्नं लक्षणं बोधयिष्यत्यर्थभेदेन वाक्यभेदप्रसङ्गादत आह—**पञ्चानामिति** । पञ्चधा **सूत्रमावर्तते** इत्यर्थः ।

पञ्चकृत्वोप्यावर्तनादस्मान्न लक्षणविशेषस्याधिगतिरित्यत आह—**तानि चेति** ।

जातिसमाख्याभेदैर्विशिष्यमाणं लक्षणपदं भिन्नानि लक्षणानि गमयतीति भावः ।

विशेषमेव प्रपञ्चयति—अनित्य इत्यादिना को हेतुरित्यन्तेन ।

उने ॥ **तत्सहचरितेति** । तेन वाद्युक्तहेतुना कृतकत्वादित्यादिना घटादौ **दृष्टान्ते** सहचरितो योऽविद्यमानो धर्मो रूपवत्त्वादिः । तस्य साध्ये उत्कर्षेण ।

विशेषविरुद्धचोदनाभासश्चेति । शब्दादौ वाद्यभिमतस्यारूपत्वादेर्विशेषस्य यद्विरुद्धं रूपवत्त्वादि तच्चोदनाभासः ।

सदसद्विषयश्चेति । समीचीने साधनविषयोदाहरणं **वार्त्तिके** । साधनाभासविषयोदाहरणं च **भाष्ये** । एतेनोक्तिमात्रदूषणमत्र न संभवतीति दर्शितमेवंप्रकारोक्तीनां परमार्थतः सदुत्तरत्वानुपपत्तेः परमार्थतः सदुत्तरत्वे चोक्तिमात्रदोषेण जातिः स्यात् ।

अत्रेति । उत्कर्षसमे ।

तदेतदुभयमुदाहरण[80cb]**मात्रमिति** । शब्दो वा अरूप इति घटोऽप्येवमित्यपकर्षसमोदाहरणं वदता हि **वार्त्तिककृता** यथा शब्दः कृतकः सन्नरूपवानित्येवं शब्ददृष्टान्तेन कृतकत्वारूपवत्त्वयोर्व्याप्तिमारोप्य कृतकत्वेन घटेऽरूपवत्त्वं प्रसञ्जितम् । तच्चायुक्तं । दृष्टान्त एव हि व्याप्तिग्रहणविषयो न दार्ष्टान्तिकः । दार्ष्टान्तिकश्च शब्दः । तस्मादत्र व्याप्तिग्रहणाभावात् **वार्त्तिको**क्तप्रकारेणासंभवदुक्तिकैवेयमपकर्षसमा ।

भाष्योक्तप्रकारेण तु यथा क्रियागुणयुक्तो लोष्टोऽविभुरित्येवं लोष्टेन दृष्टान्तेनैव व्याप्तिमुपदर्श्य साध्ये आत्मनि धर्मान्तरस्याविभुत्वस्यासञ्जनं यद्यपि संभवदुक्तिकमेव तथापि धर्मान्तरापकर्षे प्रकृतस्य साध्यस्य साधनस्य वा न किञ्चिद्दूषणमुच्यते । तथा च प्रकृतेनासंबन्धादर्थान्तरम् । ये त्वविभुमात्मानं मन्यन्ते तान् प्रत्यनिष्टप्रसञ्जनेनेष्टापादनं मतानुज्ञानिग्रहस्थानं स्यात् । न तु निरनुयोज्यानुयोगनिग्रहस्थानरूपा जातिरिति **वार्त्तिकभाष्योक्ते** उदाहरणे उदाहरणमात्रं प्रत्यवस्थानप्रकारमात्रदर्शनपरे व्यापकाभिमतधर्मनिवृत्त्या साध्ये सिसाधयिषितहेत्वोरन्यतरापकर्षसूचके, न त्वपकर्षसमाया उदाहरणे इत्यर्थः ।

व्यापकाभिमतेति । कृतकत्वमनित्यत्वं च प्रति व्यापकत्वेन जातिवादिनो योऽभिमतो धर्मो रूपवत्त्वं तस्य व्यावृत्त्या साध्यधर्मिणि शब्दे प्रकृतयोरेव साध्यसाधनधर्मयोरनित्यत्वकृतकत्वयोर्मध्येऽन्यतरस्यापनयनमपकर्षसमः । यदि यथा घटस्तथा शब्दो, रूपादिमान् घटः । शब्दोऽप्येवं प्रसक्त इत्युत्कर्षसमः । अथ मन्यसे सत्यप्येतस्मिन् साधर्म्ये कृतकत्वरूपेण रूपादिमान् शब्दः, तर्हि अनित्योऽपि नेति साध्यापनयः । व्यापकरूपादिमत्त्वाभावे च कृतकत्वस्य व्याप्यस्याप्यभाव इति साधनापनय इत्यपकर्षसमोदाहरणम् **उदयन**मते । एतेन **भाष्ये** यदि क्रियेत्यादिस्पर्शवानपि प्राप्नोतीत्यन्तमेवोत्कर्षसमोदाहरणम् । अथ नेत्यादि प्राप्नोतीत्यन्तं त्वपकर्षसमोदाहरणमिति दर्शितम् ।

अत्रायमभिप्रायः । अस्पर्शत्वविशिष्ट आत्मा क्रियावत्त्वेन साध्योऽभिमतो वादिनः । लोष्टदृष्टान्तेन तु तद्विरुद्धं स्पर्शत्त्वं प्रसज्यते इत्येवंप्रकारेण विशेषविरुद्धचोदनाभासतया उत्कर्षसमा अभीष्टा । क्रियावत्त्वाभावस्य तु प्रसञ्जने बाधचोदनाभासरूपेयं स्यात् । एवंरूपा त्वपकर्षसमैवाभिमतेति ।

बाधप्रतिरोधयोरिति । कृतकत्वापेक्षया व्यापकस्य रूपवत्त्वस्यानुपलब्धेर्बलवत्त्वविवक्षायां व्यापकानुपलब्ध्या बाधः कालात्ययापदिष्टः । समानबलताविवक्षायां तु प्रतिरोधः सप्रतिपक्षः

साधनापकर्षे इति । व्यापकानुपलब्धिदार्ढ्याभिमानेन दर्शनस्य भ्रान्तत्वारोपणाद् दृश्यमानस्यैव हेतोरपकर्षे स्वरूपासिद्धचोदनाभासः ।

शेषं पूर्ववदिति । सदसद्विषयत्वमस्यापि ज्ञेयम् ।

पक्षस्य वर्णनीयत्वेति । पक्षस्य यद्वर्णनीयत्वं साध्यत्वमिति [801a] यावत् । तस्यौपयिकानि उपाया यानि रूपाणि असिद्धार्थत्वम्, संशयसमानविषयत्वम्,

परामर्शविषयत्वापरपर्यायं प्रवृत्तसाध्यज्ञापनशक्तित्वम्, व्याप्तिग्राहकप्रमाणविरहः, प्रधानीभूत-स्वलक्षणत्वगुणीभूतसामान्यत्वाख्यः स्वरूपविशेषश्च इति हेतोः पक्षमात्रविवक्षिता धर्मास्तैः सम्पन्नस्य।

तथाभाव इति। वर्णनीयत्वौपयिकरूपसद्भावः।

इत्यभिमानिन इति। जातिवादिनः।

तथाभूतहेतुमत्त्वया ख्यापनीयत्वापादनं वर्ण्यसम इति। पक्षोपसंहार्यहेतुमत्तया सिद्धस्य दृष्टान्तस्य दृष्टान्तानपेक्षपक्षमात्रविवक्षितरूपवद्धेतुमत्तया असिद्धिर्धर्मविकल्पः। तस्माद् वर्ण्यत्वेन प्रत्यवस्थानं वर्ण्यसमः। अयं चैवं प्रवर्तते सिद्धौपयिकसमस्तविशेषण-वद्धेतुमत्तया हि दृष्टान्तः स्यात, न त्वन्यथा। असिद्धार्थत्वादयश्च हेतोः साध्य[1]सिद्धौपयिकाः। तद्यदि पक्षवदसिद्धार्थहेतुमांस्तर्हि साध्यधर्मवत्तया ख्यापनीयः स्यात, न हि साध्यविकलो दृष्टान्तो नाम। अथ नासिद्धार्थहेतुमान् तथापि विवक्षितरूपवद्धेतुमत्तया ख्यापनीयः स्यात्। न हि साधनविकलो दृष्टान्तः स्यादिति। एवं संशयमानविषयत्वादौ रूपचतुष्टये बोद्धव्यम्।

इयमेव विपर्ययेण रीतिरवर्ण्यसमस्य। तथा हि पक्षधर्मत्वौपयिकरूपवद्धेतुमत्तया सिद्धस्यापि पक्षस्य दृष्टान्तविवक्षितरूपवद्धेतुमत्तया असिद्धिर्धर्मविकल्पः। तस्मादवर्ण्यत्वेन प्रत्यवस्थानमवर्ण्यसमः। सिद्धार्थत्वम्, असन्दिग्धविषयत्वम्, अप्रवृत्तसाध्यज्ञापनशक्तित्वम्, साध्यसाधनप्रमाणान्तरवत्ता, प्रधानीभूतसामान्यत्वगुणीभूतस्वलक्षणत्वाख्यः स्वरूपविशेष-श्चेति। एते हि हेतुधर्मदृष्टान्ते विवक्षिता, न तु पक्षे। एवं च प्रवर्तते यदि दृष्टान्तवत् सिद्धार्थः, पक्षो न तर्हि ख्यापनीयस्तस्यासिद्धार्थत्वात्। अज्ञातं हि ज्ञाप्यते, न तु ज्ञातम्। ततश्चापक्षधर्मो हेतुः। तथा च सिद्धसाधनन्यायेनाश्रयासिद्धः। अथ न सिद्धार्थः, तथापि न ख्यापनीयः।

असिद्धार्थे पक्षे हि किं दृष्टान्तविवक्षितरूपतिरस्कारेण हेतोरुपादानं तत्पुरस्कारेण वा? आद्ये व्याप्यत्वासिद्धिः, सिद्धार्थताविशिष्टस्य हेतोर्व्याप्तिग्रहात्। सिद्धार्थतारहितस्य विशेष्यमात्रस्य संबन्धे सिद्धार्थत्वविशिष्टं कृतकत्वमनित्यत्वेन व्याप्तं भविष्यति, न त्वविशिष्ट-त्वमित्येवं विशिष्टस्योपाधित्वेन व्याप्यत्वानुपपत्तेः।

---

1 MSS. सिद्ध्युपयिक°

द्वितीये तु स्वरूपासिद्धिः दृष्टान्तदृष्टेन सिद्धार्थत्वरूपेण विशिष्टस्य हेतोरसिद्धार्थे पक्षेऽभावात् ।

एवं सिद्धार्थपदस्थाने तत्तत्पदप्रक्षेपेणापरत्रापि रूपचतुष्टये कथितः प्रवृत्तिप्रकार ऊह्यः । तदिदमाह—**दृष्टान्तमात्रेति** ।

तद्रहित इति । दृष्टान्तमात्रोपयोगिरूपवद्धेतुरहितः ।

पक्षसपक्षनियतेनेति । वर्ण्यसमे पक्षनियतेन, अवर्ण्यसमे सपक्षनियतेन ।

असाधारणानैकान्तिकचोदनाभास इति । पक्षमात्रोपयोगिरूपसंपन्नस्य हेतोः पक्षमात्रवृत्तित्वेन दृष्टान्तेऽभावादसाधारणानैकान्तिक[401b]चोदनाभासः ।

असिद्धार्थहेतुमत्त्वपक्षे तु दृष्टान्ते साध्यस्यासिद्धया दृष्टान्तस्य विपक्षतया विपक्षगामी हेतुर्विरुद्ध इति । विरुद्धचोदनाभास इत्यपि ज्ञेयम् ।

असिद्धचोदनाभास इति । आश्रयासिद्धचोदनाभासो व्याप्यत्वासिद्धचोदनाभासः स्वरूपासिद्धचोदनाभासश्च । भावितं चैतदनन्तरमेव ।

कञ्चिद्धर्ममिति । कृतकत्वादिकम् ।

कस्यचिद्धर्मस्येति । विभागजत्वादेः ।

तद्वदयमपीति । यथाकृतकत्वादिर्विभागजत्वादिं व्यभिचरति, तथा अयमपि कृतकत्वादिरपि विवक्षितमनित्यत्वादिं व्यभिचरतु ।

साध्यधर्मीति । यथा सिसाधयिषितस्य धर्मस्यानित्यत्वादेस्तेन लिङ्गेन कृतकत्वादिना साधनीयत्वमेवं साध्यधर्मिणोऽपि शब्दादेर्दृष्टान्तस्यापि घटादेः साधनधर्मस्यापि च कृतकत्वादेर्यत् तेन साध्यसाधनाय प्रकृतेनैव लिङ्गेन कृतकत्वादिना साधनीयत्वापादनं जातिवादिना स साध्यसमः ।

ननु जातिवादिना साध्यधर्मादीनां तल्लिङ्गसाधनीयत्वापादनं किं [1]शिवमुष्टिन्यायेनात आह— **लिङ्गस्य कृतकत्वादेस्तत्प्रयोजकत्वं** साध्यधर्मादीनां प्रयोजकत्वमाश्रित्य । एतच्चाग्रे स्फुटीभविष्यति ।

यथायथमाश्रयासिद्धीति । साध्यधर्मिणः साध्यत्वे आश्रयासिद्धिर्दृष्टान्तस्य साध्यत्वे व्याप्यत्वासिद्धिः । साधनस्य साध्यत्वे स्वरूपासिद्धिश्चोदनाभासः ।

---

1. शवमु° ?

इति कृते इति। हेत्वाद्यवयवयोगित्वप्रसञ्जनं साध्यसम इत्यनेन तात्पर्यतो व्युत्पादिते इत्यर्थः।

अयं विभज्यत एवेति। वर्ण्यसमे प्रसङ्गसमे च तत्प्रयोगसाधनीयत्वापादनाभावात्।

उपपत्त्याभासमिति। युक्त्याभासम्।

एतदिति। साध्यधर्म्यादीनां तत्प्रयोगसाधनीयत्वापादनम्।

साध्यदृष्टान्तयोरिति। दृष्टान्तशब्देनात्र साध्यधर्मिदृष्टान्तसाधनधर्मा उच्यन्ते।

वैचित्र्यमेव भावयति--**सिसाधयिषितस्येति**।

साधनधर्मादेस्तु प्रमाणान्तरसिद्धत्वमिति। पक्षहेतुदृष्टान्ता हि प्रमाणान्तरसिद्धा अनुमानाङ्गम्, नासिद्धाः। नापि तत एव प्रयोगात् सिद्धाः।

तस्माद्धेतोरिति। पारमार्थिकात् सिद्धासिद्धत्वरूपात् धर्मविकल्पात् हेतोः सिद्धस्यापि साधनधर्मादेर्वर्ण्यत्वं साध्यत्वं तेनैव प्रयोगेणेति यावत्।

अन्यथेति। यदि साध्यधर्म्यादीनां प्रमाणान्तरेण सिद्धिः स्यात् तदा।

तत्रेति। साध्यधर्म्यादौ।

ननु व्यापकं प्रत्येव हेतुः प्रयोजको न तु साध्यधर्म्यादयो हेतोर्व्यापकाः। साध्यं तु हेतोर्व्यापकम्। अतस्तेष्वप्रयोजकः। साध्ये तु प्रयोजको भविष्यत्यतः कथं तद्दृष्टान्तेन साध्येऽप्यप्रयोजकत्वमासज्यते। अत आह--**तत्प्रतिपत्तीति**। साध्यं प्रत्यपि हेतोः प्रयोजकत्वं तत्प्रतिपत्तिजनकत्वमेव। तच्च साध्यधर्म्याद्यपि प्रत्यस्ति। दृष्टान्ते तावत् तत्प्रतिपत्तिजनकत्वं साध्यप्रयोजकत्वाभ्युपगमात् साधनस्य।

दृष्टान्ते साध्यप्रयोजकं लिङ्गमवगम्य धर्मिण्यपि तत्प्रयोजकत्वेनोपादीयतेऽनुमातृभिर्नान्यथेति। धर्मिलिङ्गयोस्तु तत्प्रतिपत्ति[802a]जनकत्वं लैङ्गिकप्रतिपत्त्यन्तर्भावाभ्युपगमात्। न ह्यग्निरिति अयमग्निरिति वानुमितिरुत्पद्यते। किं तु तस्मादयमग्निमानित्यत्र च तस्मादिति व्याप्तिपक्षधर्मतोपेतात् लिङ्गादुपनते लिङ्गिप्रतिपत्तौ ह्यग्निमानिति साध्यधर्मस्फुरणवत् अयमिति धर्मिलिङ्गयोरपि स्फुरणात् लिङ्गिप्रतीतेः। साध्यधर्मविषयतावद्धर्मिलिङ्गविषयत्वमभ्युपगच्छामः। तथा ह्येवं प्रयुज्यते। साध्यसाधनधर्मवत्तया सिद्धो हि दृष्टान्तः स्यात्।

न च प्रस्तुतोपन्यस्तस्य साध्यसाधनधर्मवतो दृष्टान्तस्य प्रमाणान्तरं साधकं लिङ्गस्याप्रयोजकत्वप्रसङ्गात्। न हि साध्यप्रतिपादनादन्यत् लिङ्गस्य प्रयोजकत्वं नाम। तद् यदि प्रकृतं लिङ्गं दृष्टान्तगतस्य साध्यस्य न प्रतिपादकं तदा धर्मिगतसाध्यस्यापि न प्रतिपादकम्। न हि दृष्टान्तगतसाध्यं धर्मिगतसाध्यापेक्षया अन्यत्, किं तु तदेव। तस्मात् दृष्टान्तसिद्धयेऽपि प्रकृतलिङ्गमेव प्रयोक्तव्यम्। ततो यावत् न प्रयुज्यते तावत् साध्यविकलो दृष्टान्तः। एवं नासिद्धौ लिङ्गधर्मिणावनुमानाङ्गम्। न च तत्सिद्धये प्रमाणान्तरं प्रभवति, लिङ्गस्य तत्राप्रयोजकत्वप्रसङ्गात्। तथा च लिङ्गस्य साध्येऽप्यप्रयोजकत्वापत्तेर्लिङ्गधर्म्येकप्रतिपत्तिकत्वात् साध्यस्य। न हि लिङ्गधर्मिणावपोह्य साध्यप्रतिपत्तिः। तस्मात् तत्सिद्धये लिङ्गमेव प्रयोक्तव्यम्। तथा च तत्प्रयोगात् पूर्वं धर्मिणोऽसिद्धेराश्रयासिद्धिर्लिङ्गासिद्धौ स्वरूपासिद्धिरित्यभिसन्धिर्जातिवादिन इत्यर्थः।

तदेवेति। वर्ण्यत्वम्।

टीयाम् ॥ **उभयसाध्यत्वादिति**। उभयस्य साध्यस्य सिद्धस्य च धर्म्यादेः साध्यत्वात्।

किञ्चित्साधर्म्यादित्यादि [1]**सूत्रम्**। नानाधर्मिणि साध्ये दृष्टान्ते वा सत्यपि यो जिज्ञास्यो धर्मो यस्य च ज्ञानसाधनमस्ति स च साध्यते सिध्यति च इति किञ्चित्साधर्म्यादुपसंहारस्य हेतोः सिद्धेरन्योन्यवैधर्म्यमात्रात् प्रतिषेधो न युक्त इति कार्यत्वादनित्यत्वमेव सिध्यति। न धर्मान्तरम्, नापि धर्मान्तरासिद्धौ अनित्यत्वस्याप्यसिद्धिरित्यर्थः।

टीयाम् ॥ यस्येत्यादि तत्रोपसंह्रियते इत्यन्तं **वार्त्तिकं** विवृण्वन्नेव पठति—**यस्य धर्मिण** इति।

उने ॥ **सत्तामात्रेति**। सत्तामात्रेण विवक्षितताया व्यवस्थितता नियतता तया।

टीयाम् ॥ **वदता हीति**। जातिवादिना।

उने ॥ **इत्येवं वदत** इति। जातिवादिनः।

---

1 V. i. 5

टीयाम् ॥ **कारणमात्रविभागपूर्वक** इति । वंशदलविभागपूर्वकः ।

कारणाकारणविभागपूर्वक इति । वंशदलाकाशविभागपूर्वकः ।

साध्यातिदेशाच्च दृष्टान्तोपपत्तेरिति[1] । यथा घटस्तथा शब्द इति दृष्टान्तेन साध्यमतिदिश्यते । येन चातिदिश्यते स प्रमाणोपपन्न एवेति तत्प्रतिषेधायोग इत्यर्थः ।

वाके ॥ **अविहतयोर्दर्शनयोरिति** । मिथोऽविरुद्धयोर्वादिप्रतिवादिज्ञानयोः ।

लक्षणाभावादिति । लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति [2]लक्षणाभावात् ।

टीयाम् ॥ **चतुर्दशविधजातिवादिनामिति** । **बौद्धानाम्** ।

वाके ॥ अविशेषसमा चेयं जातिरित्येतदेव व्याचष्टे—**उत्कर्षादी**[802b]**नामिति** ।

उक्तमुत्तरमिति । तस्याप्यभ्युपगतं चतुर्दशत्वं निवर्तते इत्यादिना ।

॥ इति साध्यदृष्टान्तविकल्पप्रभवोत्कर्षसमादिषट्कप्रकरणं संपूर्णम् ॥

---

1 V. i. 6 2 I. i. 25

॥ प्राप्त्यप्राप्तिसमाजातिद्वयप्रकरणम् ॥

[५.१.७–८]

उने ॥ अविशेषातिप्रसङ्गयोरिति । प्राप्तिसमेऽविशेषः । अप्राप्तिसमे चातिप्रसङ्गः । तद्रूपयोः ।

गुणप्रधानभावेनेति । हेतुरप्राप्य वा साध्यं साधयेत् प्राप्य वा ? न तावदप्राप्य, अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् । तस्मात् प्राप्य साधयेदिति वाच्यम् । तच्च न, साध्यस्यापि सत्त्वेन साधनेनाविशेषप्रसङ्गादित्येवमप्राप्तिसमस्य गौणत्वम् । प्राप्तिसमस्य च प्राधान्यम् । विपर्ययेणोक्तौ तु प्राप्तिसमस्य गौणत्वम् । अप्राप्तिसमस्य च प्राधान्यम् ।

वाके ॥ त्रैकाल्यसमाद्याः प्रयुक्ता इति । त्रैकाल्यसमा अहेतुसमा तदाद्या अजातित्वेन चोद्यमाना निराकृताः ।

उने ॥ ननु घटः साधनानां प्राप्त्या सिध्यति । तत् कथमसौ न साधनधर्मेत्यत आह— **न च फलेनेति** । फलेन घटेन सह साधनानां मृद्दण्डादीनां प्राप्तिर्घटसिद्धावङ्गं कारणमिति न च वाच्यम्, इतरेतराश्रयप्रसङ्गात् । घटेन साधनानां प्राप्तौ घटसिद्धिर्घटसिद्धौ च घटेन साधनानां प्राप्तिरिति ।

ननु यदि घटेन साधनानां न प्राप्तिः, ततः कथं तेभ्यो घटस्यैवोत्पत्तिरप्राप्त्यविशेषात् पटस्याप्युत्पत्तिः स्यादत आह— **नियमस्त्विति** ।

भावशेष इति । न साध्य इति भाव इत्यत्र भावे शेषः ।

टीयाम् ॥ अन्यथा त्विति । यदा त्वप्राप्त्यर्थो न परस्परोपश्लेषाभावः । किं तर्हि ? संबन्धमात्राभावस्तदा ।

प्रत्यवाय इति । पीडा ।

उने ॥ ननु भवतूद्देश एव नियामकः । संबन्धस्त्वन्येन केनापि प्रयोजनेनोक्तो भविष्यति । अत आह— **नियमार्थं चेति** ।

यद्येवमसावपि नियामको भविष्यतीत्याह—**संयुक्तेति**।

अनियामकत्वादिति। यदुद्देशेन नाभिचारस्तत्रापि सुलभत्वेन।

टीयाम् ॥ **तस्यापीति**। संयुक्तसंयोगादेरपि संबन्धस्य।

उने ॥ **प्रवर्तमानेति चेति**। **वार्त्तिक**मिति संबन्धः।

॥ इति प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणं संपूर्णम् ॥

॥ प्रसङ्गप्रतिदृष्टान्तसमाप्रकरणम् ॥

[५.१.९–११]

टीयाम् ॥ दृष्टान्तगतानित्यत्वस्येति । शब्दधर्मिणि साध्यानित्यत्वापेक्षया दृष्टान्तगतानित्यत्वस्य साधनत्वम् ।

उने ॥ अनवस्थाभासप्रसञ्जनं प्रसङ्गसम इति । अनवस्था च ज्ञप्तौ कृतौ च । कारकाणां च कृतौ दृष्टान्तपुरस्कारेणाप्रवृत्तेः तस्मिन् पक्षे दृष्टान्तपदासङ्गतिरित्यतः **सूत्रे** दृष्टान्तपदं व्यवस्थितत्वमुपलक्षयति । दृष्टान्तो हि लोकव्यवस्थितोऽन्योऽपि व्यवस्थितोऽनेनोपलक्ष्यते । तथा चाभिमतलाभोऽनभिमतातिप्रसङ्गनिवारणमिति । तदयं **सूत्रार्थः ।** कृतिज्ञप्त्योर्व्यवस्थितस्य कारणं व्यवस्थापकं तस्यानपदेशात् [1]प्रत्यवस्थानं प्रसङ्गसमः । तत्र ज्ञप्तौ प्रमाणेऽपि किं प्रमाणमिति वा दृष्टान्तेऽपि को दृष्टान्त इति वा प्रवर्तते । कृतौ तु कारणस्यापि कारणं वाच्यमित्यादि ।

प्रतिदृष्टान्तमात्रेणेति । हेतुनिरपेक्षेण केवलेन प्रतिदृष्टान्तेन ।

तदाभास इति । प्रतिदृष्टान्तस्याधिकबलत्वविवक्षायां बाधचोदनाभासस्तुल्यबलत्वविवक्षायां[803a]प्रतिरोधचोदनाभासः ।

एवं च सतीति । यदा प्रतिदृष्टान्तसमस्य प्रतिदृष्टान्तमात्रेणेत्यादि लक्षणं तदा ।

भाष्यटीकयोर्हेतूपादानमिति । भाष्ये क्रियाहेतुगुणयुक्तमित्यनेन **टीका**यां क्रियाहेतुगुणयोग इत्यनेन च हेतूपादानं संपातायातं प्रसङ्गागतमुपेक्षणीयम् ।

ननु वादिना येन क्रियाहेतुगुणयोगेन क्रियावत्त्वमात्मनः साध्यते, तमेव हेतुमाश्रित्य आकाशप्रतिदृष्टान्तेन सक्रियत्वं सिध्यत्येवं जातिवादिना प्रत्यवस्थाने कथं हेतूपादानमुपेक्षणीयं स्यात्? अत आह—**सद्धेताविति** यद्यात्मनः सक्रियत्वसाधनार्थं वादिनोपन्यस्तः क्रियाहेतुगुणयोगो हेतुः सम्यक्, तदोक्तनीत्या जातिवादिनः प्रत्यवस्थासंभव एव । अथासद्धेतुः, तदेदमनैकान्तिकत्वोद्भावनं सदुत्तरमेव ।

---

1 J प्रत्यय°

ननु सक्रियत्वसाधनायोपन्यस्तस्य[1] क्रियाहेतुगुणयोगस्य प्रतिदृष्टान्तेनाकाशेनाक्रियतासाधकत्वमेव कस्मात् न स्यादित्येवं व्याघातोद्भावनमिदम् ? तत् कथमनैकान्तिकोद्भावनस्य सदुत्तरत्वादिति । अत आह—**व्याघातद्वारेणेति ।**

तदुद्भावनमिति । अनैकान्तिकत्वोद्भावनम् ।

ननु सक्रिय आत्मा क्रियाहेतुगुणयुक्तत्वात् लोष्टवदिति वाद्युक्तात् प्रयोगादन्यः प्रयोगोऽयं जातिवादिनो भविष्यति । अक्रिय आत्मा क्रियाहेतुगुणयुक्तत्वादाकाशवदित्यतः कथं हेतूपादानमुपेक्षणीयम् ? अत आह—**वाद्युक्तेति ।**

टीयाम् ॥ नत्वेवमेतदिति । न त्वेवं भणितविशेषे सति एतत् सदुत्तरम् ।

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तद्विनिवृत्तिरिति[2] । यथा घटादिप्रकाशनार्थमुपात्ते प्रदीपे स्वयंप्रकाशात्मके प्रदीपान्तरमुपादीयतामिति प्रसङ्गो निवर्तते वैयर्थ्यात् तथा दृष्टान्तेऽपि अन्यप्रज्ञापनार्थमुपात्ते स्वयंप्रज्ञातरूपे प्रज्ञापनाय प्रमाणप्रसङ्गो निवर्तते इति **सूत्रार्थः** ।

भाष्ये ॥ कारणापदेश इति । प्रमाणापदेशः ।

एवं प्रतिदृष्टान्तेति । यदि प्रतिदृष्टान्तः साधकः, तदा तस्य हेतुत्वे साधकत्वे दृष्टान्तो नाहेतुर्नासाधकस्तुल्यत्वात् ।

स चेति । दृष्टान्तः ।

टीयाम् ॥ अथैवं प्रयुङ्क्ते इति । जातिवादी ।

वाद्याह—**तथापीति ।**

मदीयस्येति । वादिसंबन्धिनः ।

तेनेति । जातिवादिना ।

स चेति । प्रतिदृष्टान्तः ।

॥ इति व्यवस्थिताऽव्यवस्थोपक्रमजातिद्वयप्रकरणं संपूर्णम् ॥

———

1 S °स्या 2 V. i. 10

॥ अनुत्पत्तिसमाप्रकरणम् ॥

[५.१.१२–१३]

उने ॥ **पक्षहेतुदृष्टान्तादीति** । आदिपदात् साध्यादिग्रहः ।

अत इति । यतः सामान्येन समस्तानुपपत्तिसमसंग्रहोऽनेन लक्षणेनातः ।

उदाहरणपुरःसरमिति । उदाहरणमात्रमेतदिति भावः ।

शब्दमात्रपक्षीकरणे इति । सर्वस्यापि शब्दस्य पक्षीकरणे ।

तस्यापि चेति । अनुत्पन्नस्यापि शब्दस्य ।

तद्विरुद्धेति । तच्छब्देनानुत्पत्तिधर्मकत्वस्य परामर्शः ।

टीयाम् ॥ अनित्यत्वकारणाभावादनित्यत्वं मा भूत् । नित्यत्वं तु कुतस्त्यम्? न हि नील-कारणाभावात् तद्विपरीतपीतसंभवः । अत आह— **कारणाभावादिति** ।

ननु कारणाभावादनित्यत्वाभावेऽपि[803b]कथं नित्यत्वम्? न हि कारणाभावात् नीलाभावे नियमेन पीतं भवतीत्यत उक्तम्—**नित्यत्वानित्यत्वाभ्यां राश्यन्तराभावादिति** । युक्तं यन्नीलाभावे पीतं न भवति हरितादे राश्यन्तरस्य भावात् । इह तु न नित्यानित्याभ्यां राश्यन्तरमस्ति । तस्मात् नीलानीलयोरिव परस्परविरुद्धयोर्नित्यत्वानित्यत्वयोरन्यतरनिषेधेनान्यतरस्य विधिरिति भावः ।

वाके ॥ उत्तरम्—**नैष दोष इति** ।

टीयाम् ॥ **सदैवानुत्पत्तिधर्मकत्वादिति** । यद्ययं शब्दः क्वचिदनुत्पत्तिधर्मको न स्यात्, अपि तूत्पत्तिधर्मक एव स्यात् ततोऽविशेषेणानुत्पत्तिधर्मकत्वादित्ययं हेतुरभिधीयमानोऽसिद्धो भवेदिति तन्निराकरणाय प्रागुत्पत्तेरिति विशेषणमुपादीयमानमर्थवत्तां बिभृयात् । सर्वदानुत्पत्तिधर्मकत्वे त्वसिद्धताशङ्कैव नास्तीति न प्रयोजनेन संबद्धं विशेषणमित्यर्थः ।

वाके ॥ त्रयी हि तस्य गतिरिति । तस्याप्रयत्नानन्तरीयकस्य ।

उने ॥ नेह परिहृतमिति । आशङ्कानन्तरं **वार्त्तिककृता** न परिहृतम् , नानुत्पन्नै-रित्यादिना अग्रे निराकरिष्यमाणत्वात् । तच्चैतावता चेत्यादि**टीका**यां स्फुटम् ।

॥ इत्यनुत्पत्तिसमाप्रकरणं संपूर्णम् ॥

॥ संशयसमाप्रकरणम् ॥

[५.१.१४–१५]

सामान्यदृष्टान्तयोरित्यादि **सूत्रम्**[1] । यथा कार्यत्वस्य विशेषस्य दर्शनेन नित्यत्वे निश्चयहेतुरस्तीति तन्निश्चयः, एवं सामान्ये गोत्वादौ दृष्टान्ते घटे नित्यत्वानित्यत्वसाधारणस्यैन्द्रियकत्वस्यापि दर्शनं संशयहेतुरस्तीति संशयः स्यादिति संशयेन प्रत्यवस्थानं संशयसम इत्यर्थः ।

उने ॥ **संशयकारणबलेनेति** । संशयस्य कारणानि समानधर्मोपपत्तिरनेकधर्मोपपत्तिर्विप्रतिपत्तिश्च ।

एवमिति । एवं सतीत्यर्थः ।

सूत्रादिष्विति । आदिपदाद् **भाष्या**दिग्रहः ।

एवं हि विषयतोऽनुमानान्तरेऽपि कारणतोऽनेकधर्मादेरपि संशयसमव्याप्तिरित्याह—**तेनसर्वव्याप्तिरिति** ।

एवं सामान्यदर्शनमात्रमिति पाठं **टीका**यां पश्यन् मात्रशब्दं व्याचष्टे—**एवं सामान्येति** ।

सामान्यस्वरूपपरमिति । न तु वैधर्म्यविप्रतिपत्तिव्यवच्छेदपरम् । तेन सामान्यस्वरूपदर्शनमित्यर्थः ।

सूत्रार्थप्रयोजनमिति पाठं **टीका**यां पश्यन् व्याचष्टे—**सूत्रार्थप्रयोजनमिति** ।

वाके ॥ **उभयसाधर्म्यादिति** । उभयेनानित्यत्वादिना साध्येन नित्यत्वादिना तद्विपर्ययेण च साधर्म्यादैन्द्रियकत्वादेः संशयसमा । एकेन साध्यविपर्ययेण नित्यत्वादिना साधर्म्याद्मूर्तत्वादेः साधर्म्यसमा ।

---

1 V. i. 14

उने ॥ **कार्यापेक्षयेति** । अप्रतिबद्धं हि कारणं कार्याय प्रर्याप्तम्, न तु प्रतिबद्धम् । अतः संशयकारणेन निर्णयकारणं प्रतिबद्धम् । न निर्णयं कार्यं करोति । संशयकारणशून्यं च न कदाचिदपीत्यभिमानः परस्येत्यर्थः ।

तथाप्यनुमाने किं दूषणमित्यत आह---**ज्ञाप्यापेक्षयेति** । प्रयत्नानन्तरीयकत्वमनित्यत्वस्य निश्चायकं तदा स्यात्, यदि संशयकारणसाधर्म्याद्यभाववत् स्यात् । एतच्च हेतोर्विशेषणमसिद्धमित्यभिमानो जातिवादिनः । ततश्च ज्ञाप्यस्य प्रयत्नानन्तरीयकत्वेन हेतुना साध्यस्यानित्यत्वस्यापेक्षया विशेषणस्य संशयकारण[804a]साधर्म्यादभाववत्त्वरूपस्यासिद्धिः । तच्चोदनाभासः । आभासता च संशयकारणसाधर्म्याद्यभाववत्त्वस्य हेतुविशेषणत्वेनानभ्युपगमादभ्युपगमे सर्वानुमानोच्छेदप्रसङ्गात् धूमानुमानेऽपि हि सन्दिग्धस्यैव पक्षत्वात् सन्देहकारणस्य च साधर्म्यादेर्धूमादिविशेषदर्शनेऽपि अनपगमादिति भावः ।

साधर्म्यात् संशये इत्यादि **सूत्रम्**[1] । साधर्म्यादूर्ध्वत्वादेः संशये सति वैधर्म्यात् करवक्रत्वादेर्न संशयः । उभयथा वा समानविशेषधर्मदर्शनाद् वा संशयेऽत्यन्तं सर्वदा संशयः प्रसज्येत । न च सामान्यस्य समानधर्मस्य नित्यत्वं सर्वदा संशयकारणत्वमभ्युपगम्यते । तस्मादप्रतिषेधोऽयमित्यर्थः ।

टीयाम् ॥ ननूक्तं निर्णयकारणं तत्संशयकारणस्य सामान्यदर्शनस्य भावात् संशयेनापि भवितव्यमत आह—**न सामान्यदर्शनमात्रमिति** ।

तद्रहितमिति । विशेषादर्शनरहितम् ।

प्रमाणेन नित्ये सामान्ये स्थिते सति नित्यत्वानभ्युपगमाच्च सामान्यस्येत्ययुक्तमत आह—**नित्यं संशयकारणत्वेति** ।

॥ इति संशयसमाप्रकरणं संपूर्णम् ॥

---

1 V. i. 15

॥ प्रकरणसमाप्रकरणम् ॥

[५.१.१६–१७]

उने ॥ **अभ्युपेतेति** । अभ्युपेतमनधिकबलत्वं यस्य प्रमाणान्तरस्य तेन ।

टीयाम् ॥ ननु **सूत्रे** साधर्म्यादित्युक्तम् , तत् कथं समानं चैतद्वैधर्म्येऽपीति **भाष्यम्**? अत आह—**उपलक्षणमिति** ।

प्रकरणसमचतुष्टयमिति । अनित्यः शब्दः कार्यत्वाद् घटवदिति प्रथमः । नित्यः शब्दः श्रावणत्वात् शब्दत्ववदिति द्वितीयः । अथवा नित्यः शब्दः श्रावणत्वात् शब्दत्ववदिति प्रथमः । अनित्यः शब्दः कार्यत्वाद् घटवदिति द्वितीयः इति साधर्म्येण द्वौ । तथा वैधर्म्येण, अनित्यः शब्दः कार्यत्वात् । यन्नानित्यं न तत् कार्यं यथा व्योम इति प्रथमः । नित्यः शब्दः श्रावणत्वात् । यदनित्यं तदश्रावणं यथा घट इति द्वितीयः । अत्रापि पूर्ववत् प्रथम एव वादी द्वितीयः, द्वितीय एव प्रथम इति प्रकरणसमचतुष्टयम् ।

ननु यदि प्रकरणसमे पक्षनिश्चयेन वादिप्रतिपक्षसाधनं दूष्यम् , तदा प्रकरणसमस्य वादिप्रतिपक्षसाधनबाधकत्वेनाभिमतस्य साधनसाम्याभिधानं साधर्म्यसमवत् **सूत्रकारस्य** नोपपद्यते । अत आह—**इह चेति** ।

साधनेनेति । प्रतिपक्षसाधनेन ।

सद्दूषणैरिति । कालात्ययापदिष्टादिभिः ।

उने ॥ **तदाभासश्चेति** । बाधाभासः ।

टीयाम् ॥ प्रतिपक्षात् प्रक्रियासिद्धिरुक्ता भवतीति **भाष्यं** केनेत्यपेक्षायां पूरयति—**प्रतिवादिनेति** ।

समाहृय इति । समाख्यात इत्यर्थः ।

प्रकरणसमोदाहरणमिति । प्रकरणसमाख्यहेत्वाभासोदाहरणम् ।

ननु द्वयोर्हेत्वोः परस्परविरुद्धार्थाविनाभूतयोरेकस्मिन् धर्मिणि उपनिपातं विरुद्धाव्यभिचारिलक्षणं वर्णयन्ति तद्वादिनः। न च जातिवादिना परसाधनप्रतिषेधनप्रतिषेधबुद्ध्या प्रवर्तमानेन द्वयोरव्यभिचार उक्तः। अतोऽनुपपन्नमेतद् विरुद्धाऽव्यभिचार्येष उक्त इत्यत आह—**तुल्यबलयोरिति**। विरुद्धाव्यभिचारिबलमभ्युपगम्य प्रतिषिद्धं **वार्त्तिककृते**त्यर्थः।

॥ इति प्रकरणसमाप्रकरणं संपूर्णम् ॥

॥ अहेतुसमाप्रकरणम् ॥

[५.१.१८–२०]

उने ॥ हेतुफलभावेति । हेतोः फलभावः साध्यसाधनम् ।

वाके ॥ [804b] **विरोध** इति । प्रमाणविरोधः ।

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः इति **सूत्रम्**[1] । प्राक् पश्चात् सह वेति विकल्पाः प्रतिषेधेऽपि तुल्या इत्युक्तमेव द्वितीयाध्याये इत्यर्थः ।

वाके ॥ उत्तरदोष इति । उत्तरस्याहेतुसमाया जातेर्दोषः । अहेतुसमाजात्योद्भाव्यो दोष इत्यर्थः ।

प्रतिषेधेऽपीति । अहेतुसमजातावपि ।

॥ इत्यहेतुसमाप्रकरणं संपूर्णम् ॥

---

1 V. i. 20

॥ अर्थापत्तिसमाप्रकरणम् ॥

[५.१.२१–२२]

उने ॥ नन्वर्थापत्तेः समधिगतेऽर्थे प्रत्यवस्थानं सद् दूषणमेव प्रत्यक्षादितः समधिगते बाधाद्यभिधानवदिति हृदि निधायाह—**अर्थापत्त्याभासेनेति ।**

सर्वचोदनाभासश्चायमिति । सत्प्रतिपक्षादिचोदनाभासः । तथा हि, अनित्यसाधर्म्यादनित्य इत्युक्तेऽर्थादापन्नं नित्यसाधर्म्यान्नित्य इति प्रतिरोधः । अनुमानादनित्य इत्युक्तेऽर्थादापन्नं प्रत्यक्षान्नित्य इति बाधः । शब्दोऽनित्य इत्युक्तेऽर्थादापद्यते नान्योऽनित्य इति विशेषविधेः शेषनिषेधविषयत्वात् । तथा च साध्यविकलो दृष्टान्त इति विरोध इत्यादि ।

एवमिति । अर्थापत्तिसमस्य यथोक्ते लक्षणे सति ।

उदाहरणपुरःसरमिति । उदाहरणमात्रमेतदित्यर्थः ।

टीयाम् ॥ नन्वनित्यसाधर्म्येण प्रयत्ननान्तरीयकत्वेनानित्यः शब्द इति स्थापिते पक्षेऽर्थापत्तिसमजातिवादी नित्याकाशसाधर्म्येणास्पर्शत्वेन प्रत्यवतिष्ठते । यद्यनित्यसाधर्म्यादनित्यः शब्दः, अर्थादापन्नं नित्यसाधर्म्यादस्पर्शत्वान्नित्य इति ततश्च नेयं साधर्म्यसमादिभ्यो भिद्यते । अत आह—**न साधर्म्यसमादाविति** । आदिग्रहणेन संशयसमप्रकरणसमयोर्ग्रहणमिति ।

उने ॥ न हि वाद्यनभिमताभिप्रायवर्णनमित्येतावन्मात्रेण छलं किं तु वाद्युक्तवाक्यविपरीतकल्पनया प्रतिषेधो वचनविघातोऽर्थविकल्पोपपत्त्येत्यत्र वचनग्रहणात् । तस्मात् तत्सामान्यलक्षणमत्र नास्तीत्याह—**शब्दार्थेति ।**

टीयाम् ॥ **तस्य तस्येति** । रात्रिभोजनापूर्वादेः ।

तस्येति । व्यभिचारिणा साधर्म्येण साध्यसाधनस्य ।

तदन्तरेणेति । व्यभिचारिणा साधर्म्येण साध्यसाधनमन्तरेण ।

वाके ॥ चोदयति परः—**पूर्वसूत्रव्याघात** इति । पूर्वस्य द्वितीयाध्यायोक्तस्य सूत्रस्य व्याघातः ।

॥ इत्यर्थापत्तिसमाप्रकरणं संपूर्णम् ॥

॥ अविशेषसमाप्रकरणम् ॥

[५.१.२३–२४]

उने ॥ साध्यदृष्टान्ताविशेषसाधकत्वमिति । साध्यधर्मिदृष्टान्तयोरविशेषेण साधकत्वम् ।

यतः कुतश्चिदिति । एतेन **सूत्रे**[1] सद्भावोपपत्तेरित्येतद्धर्मान्तरमात्रोपलक्षणं प्रमेयत्वद्रव्यत्वादिनापि प्रत्यवस्थानस्य संभवादिति ज्ञापितम् ।

अतिपीड्येति । अतिनिर्बन्धेन । अनैकान्तिकचोदनाभासः साधर्म्यं साध्यविपर्ययेऽपि गतमित्यभिमानात् ।

टीयाम् ॥ सद्भावव्यापकमित्यर्थः इति । यद् यस्योपपत्तिनिमित्तं तत् तस्य व्यापकम्, वह्निरिव धूमस्येत्यर्थः ।

क्वचित् साधर्म्यमुपलभ्यते क्वचिन्नेति अनुपपन्नम्, प्रयत्नानन्तरीयकत्वस्य सत्त्वस्य चोपलम्भाविशेषादत आह—**व्याप्यतयेति शेष** इति ।

॥ इत्यविशेष [805a] समाप्रकरणं संपूर्णम् ॥

---

1 V, i. 23

॥ उपपत्तिसमाप्रकरणम् ॥

[५.१.२५–२६]

टीयाम् ॥ यद्यनित्यकारणमित्यादि **भाष्यं** पूरयित्वा व्याचष्टे—यद्य**नित्यत्वेति** ।

उने ॥ **सामान्यतः स्वपक्षेति** । सामान्यतो मत्पक्षेऽपि किञ्चित्प्रमाणं भविष्यति मदुक्तत्वात् प्रकृतसन्देहविषयत्वादित्यादिप्रकारेण यत्स्वपक्षोपपत्तेरुपपादनं तेन ।

सत्त्वादेरिति । यतः सत्त्वप्रमेयत्वाद्यस्ति ।

अत इति । यतः सामान्यत उपपत्तिसमा प्रवर्ततेऽतः ।

ननु यद्युपपत्तिसमा सामान्यतः प्रवर्तते तर्हि **भाष्ये**ऽनित्यत्वकारणमप्युपपद्यतेऽस्यास्पर्शवत्त्वमिति विशेषोपदर्शनं कथम् ? अत आह—**अतो नित्यत्वेति** । बाधप्रतिरोधावारोप्यौ तदाभासा चेयम् ।

टीयाम् ॥ **अनुज्ञानादित्यर्थ** इति । अनुज्ञानं चास्य, मत्पक्षोऽपि प्रामाणिकः [1]प्रकृतसन्देहविषयत्वात् त्वत्पक्षवदिति वादिसाध्यविषयप्रमाणसत्त्वादत्तभरतया स्वपक्षं साधयता । ततश्च वाद्यभिमतसाध्यसिद्धौ जातिवाद्यभिमतः प्रतिषेधो विघटते इति भावः ।

॥ इत्युपपत्तिसमाप्रकरणं संपूर्णम् ॥

---

1 S प्रत्ययसन्देह

॥ उपलब्धिसमाप्रकरणम् ॥

[५.१.२७–२८]

उने ॥ ननु निर्दिष्टकारणस्य साधनस्याभावे साध्यसंभवे च न कश्चिद् दोषः, सपक्षैकदेशवृत्तेरपि धूमवत्त्वादेर्हेतुत्वाभ्युपगमात् साध्याभावे च साधनसंभवो हि व्यभिचारदोषः । न च प्रकृते तथा । तस्माद् दूषणाभासत्वाभावादुक्तेरसंभवादितरजातीनां च दूषणाभासतया प्रयोगसंभवात् जातिवैधर्म्येण च जातित्वानुपपत्तेरिति हृदि निधाय दूषणाभासजातित्वनिर्वाहायाह—**अवधारणविकल्पानुपपत्त्या प्रत्यवस्थानमनुपलब्धिसम** इति । अवधारणविकल्पश्चास्या जातेर्बीजम् । स चात्र **सूत्रे** अश्रूयमाणोऽपि अर्थाल्लभ्यते । एवकारार्थमनुपक्रम्य **सूत्रे**ऽप्यर्थेन प्रत्यवस्थानायोगात् । तथा हि, साधनाभावेऽपि साध्यमुपलभ्यते इति दूषणं दूष्यस्यावधारणात्मकतां[1] सूचयति—यदि हि स्थापयिता नियमेनोपक्रमते साधने सत्येव साध्यं भवतीति ।

तदेव साधनाभावेऽपि साध्योपलम्भादिति प्रत्यवस्थानं संबध्यते—**नान्यथेति ।**

अवधारणविकल्पानुपपत्त्येति । शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते किं शब्द एवानित्यः प्रयत्नानन्तरीयकत्वात् , आहो शब्दोऽनित्य एव प्रयत्नानन्तरीयकत्वात् , उताहो शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादेव ? नाद्यः, कुम्भादीनामप्यनित्यत्वोपलम्भात् । न द्वितीयः, शब्दे सत्त्वादीनामप्युपलब्धेः । न तृतीयः, अप्रयत्नानन्तरीयकस्यापि वायुनोदनात् वृक्षशाखाभङ्गजस्यापि शब्दस्यानित्यत्वोपलब्धेरित्यादिप्रकारेण वाद्यविवक्षितानामवधारणविकल्पानां यानुपपत्तिस्तया ।

अत्रेति । यथोक्तलक्षणविषये **भाष्यं** स्फुटमेव । निर्दिष्टस्य प्रयत्नेत्यादिना हि **भाष्येण** प्रयत्नानन्तरीयकत्वेनैव शब्दानित्यत्वं सिध्यति, नान्येनेत्यन्ययोगव्यवच्छेदम् , यत्र शब्दानित्यत्वं तत्र प्रयत्नानन्तरीयकत्वमस्त्येवेत्ययोगव्यवच्छेदं चावधारणं वाद्यविवक्षितं दूषयता यथोक्तमेव लक्षणमुक्तम् । एतेन [105b] **भाष्यकृ**दुक्तनीत्योद्भावितस्य जातिदूषणस्यास्यातिविस्पष्टदूषणत्वेनानुत्थानमाशङ्क्य **वार्त्तिककृता** यत्प्रकारान्तरमुदाहृतम् ,

---

1 S त्मकस्यात्मक°

तस्यैव ननु यद्वृत्तेत्यादिना **टीकाकृता** अभिप्रायो दर्शितः । न तु **भाष्यो**क्तप्रकारेणेदं दूषणेनोद्भाव्यते इति ज्ञापितम् ।

न हि सर्वसाध्याध्यारोपोऽवधारणविकल्पात् अन्यद्बीजमस्तीति । शब्दोऽनित्य इति प्रतिज्ञायां यदा हि जातिवादिनोच्यते न तावच्छब्द एवानित्य इति साध्यार्थो घटादीनामनित्यत्वाभावप्रसङ्गात् ततः शब्दोऽप्यनित्य इति साध्यार्थो वाच्य इति तदा सर्वमनित्यमिति साध्याध्यारोपः स्यादिति वादिना सर्वसाध्याध्यारोपेऽवधारणविकल्प एव बीजमिति भावः ।

टीयाम् ।। अनित्यत्वकारणस्येति **भाष्य**मनुपपन्नम् , न ह्यनित्यत्वं प्रध्वंसः, तदुपलक्षिता सत्ता वा प्रयत्नानन्तरीयकत्वेन क्रियते । अत आह—**ज्ञापकस्येत्यर्थ** इति ।

स हीति । साध्यधर्मः ।

ननु सर्वमनित्यमिति प्रतिज्ञां सामान्येत्यादिहेतुना साधयतो भागासिध्यतोद्भावनं सम्यगुत्तरं न जातितामवलम्बते इत्याशङ्क्य पूरयित्वा व्यवहितान्वयेन व्याचष्टे—**अनित्यः शब्द इति प्रतिज्ञायामपीति ।**

ननु शब्दोऽनित्य इति शब्दमात्रपक्षीकरणे शब्दारम्भकत्वादिति हेतुरव्यापक एवान्त्यस्य शब्दस्य शब्दानारम्भकत्वात् । अतः कथं तदुद्भावनं जातित्वं भजते ? अत आह—**यद्यप्यनित्यः शब्द इति सामर्थ्यादिति** । सामर्थ्यं प्रतिज्ञाहेत्वोः समञ्जसत्वस्यालोचनम् ।

विवक्षितमिति । वादिना .

शब्दान्तरोत्पा[द]कत्वमनैकान्तिकमाकाशेनेत्यत आह—**शब्दान्तरोत्पादकत्वं सजातीयेति** ।

एवं चेति । वादिना शब्दविशेषस्य पक्षत्वे विवक्षितेऽपि जातिवादिना शब्दमात्रस्य पक्षत्वेऽध्यारोप्यमाणे यत्र शब्दानित्यत्वं तत्र प्रयत्नानन्तरीयकत्वाद्यस्त्येवेत्येवं नायोगव्यवच्छेदेनायं प्रयत्नानन्तरीयकत्वं सजातीयोत्पादकत्वं वा शब्दानित्यत्वे हेतुरव्यापकत्वात् । न हि वायुनोदनाच्छाखाभङ्गजः शब्दः प्रयत्नानन्तरीयकः । न चान्त्यः शब्दः शब्दान्तरं जनयति ।

अन्ययोगव्यवच्छेदेनेति । प्रयत्नानन्तरीयकत्वादित एव शब्दानित्यत्वम्, न त्वन्यस्मादित्येवम् ।

हेत्वन्तरस्यापीति । प्रत्ययभेदभेदित्वादेः ।

उने ॥ प्रकृतोदाहरणे इति । **भाष्योक्ते वार्त्तिको**क्ते चोदाहरणे ।

टीयाम् ॥ अनित्यः शब्द इति ब्रुवतेति । ननु **सूत्रं** व्याचक्षाणेनैवं वक्तव्यम् । प्रयत्नानन्तरीयकत्वादिति कारणं ब्रुवता न कारणान्तरं निषिध्यते इत्यत आह—**प्रयत्नानन्तरीयकत्वेन हेतुनेति शेष** इति ।

अपक्षीकृतानामपि । अवर्णात्मकशब्दानाम् ।

न साध्यस्य कारणान्तरमिति **वार्त्तिकं** व्याचष्टे—**नापि शब्दस्येति** ।

अनित्यत्वेनेति । साध्यस्येत्यनेन संबन्धनीयम् ।

ननु योऽविवादेन प्रयत्नानन्तरीयकत्वं प्रतिपद्यते विप्रतिपद्यते[1] च तदधिकरणस्य शब्दस्यानित्यत्वं प्रति तं प्रति यत्नानन्तरीयकत्वेनानित्यत्वं साध्यत एवेति किमुच्यते न तं प्रति किञ्चित् साध्यते इत्यत आह—**अयमभिसन्धिरिति** ।

प्रमाणानधीनस्येति । पुंसः ।

वाके ॥ यदा तु प्रयत्नेति । [806a] यदेव प्रयत्नानन्तरीयकम् , तदेव तस्मादनित्यमिति ब्रुवाणैर्हि य एव प्रयत्नानन्तरीयकः शब्दः स एव प्रयत्नानन्तरीयकत्वादनित्य इति प्रयत्नानन्तरीयकत्वं वस्तुनः शब्दस्य विशेषणमुक्तम् । यदा चेदं विशेषणं तदान्यो हेतुर्वक्तव्यः ।

॥ इत्युपलब्धिसमाप्रकरणं संपूर्णम् ॥

---

1 J विप्रतिपद्येते

॥ अनुपलब्धिसमाप्रकरणम् ॥

[५.१.२९–३१]

उने ॥ विषयनिरूप्यस्य धर्मस्येति । विषयेण निरूप्यस्योपलब्ध्यनुपलब्धीच्छानिच्छादेर्विषयिणः ।

एतेनानुपलब्ध्या विषयी धर्म उपलक्ष्यते इति **सूत्र**स्योपलक्षणमर्थ इति दर्शितम् ।

विशेषणासिद्धीति । न प्रागुच्चारणादस्ति शब्द आवरणाद्यनुपलब्धौ सत्यामनुपलभ्यमानत्वादित्यत्रावरणानुपलब्धिर्विशेषणमसिद्धम् ।

टीयाम् ॥ आवरण इवावरणेति । किमावरणे आवरणानुपलब्धौ चानुपलब्धिः समा एकेत्यर्थः । एतदुक्तं भवति । आवरणानुपलब्धिरेवात्मनोऽनुपलब्धिः । एवं चावरणाभाववदात्माभावमपि गमयतीति सिद्धं भवति । उभयथावरणस्योपलब्धिर्नास्ति । तथावरणानुपलब्धेरपि उपलब्धिर्नास्तीत्यनुपलब्धिः समा तुल्येत्यर्थः ।

तत्र प्रथमं पक्षं दूषयति—आवरणाद्यनुपलब्धिरावरणादीनामभावं गमयति, न त्वात्मनोऽप्यभावमावरणाद्युपलब्धिभावरूपमिति । अनेनैतद्द र्शयति—**अनुपलब्धिरभावे प्रमाणं न भावे आवरणाद्यनुपलब्धेः** । अभावश्चावरणाद्युपलब्धिभावरूप एव भावाभावयोः परस्पराभावात्मकत्वात् । अतः कथमात्माभावेऽभावरूपे आवरणाद्यनुपलब्धिः प्रमाणं स्यादिति । अपि चानुपलब्धिर्यद्विषया, तस्याभावं बोधयति । न चासावात्मविषयेत्याह—**न ह्यसावनुपलब्धिरप्यात्मन** इति ।

एतदेव स्फेरयति—**उपलब्धिरपीति ।** तस्मादुपलभ्यविषयत्वादात्मविषयत्वाभावाच्चानुपलब्धिरुपलभ्याभावे हेतुर्नात्माभावस्येति ।

सिद्धान्त्येवैकग्रन्थेन तर्कमाह—तथा सत्यात्मविषयत्वे सति अनुपलब्धेः सैवानुपलब्धिरेव न स्यात् नरविषाणवत् सर्वदानुपलब्धिग्रस्तत्वादिति ।

अतोऽनुपलब्धेरभावपरिच्छेदिकाया अभावात् न स्यादुपलभ्याभावोऽपीति आवरणं च तदुपलब्धिश्च स्यातामिति । तथा सति लोकप्रसिद्धाभावव्यवहारविरोध इति भावः ।

अत्रैवार्थे **भाष्य**मवतारयति—**तदिदमाहेति ।**

मात्रग्रहणेन जातिवाद्यभिमतामात्माभावरूपतां व्यवच्छिनत्तीति । अनेन फलतोऽनुपलब्धेरात्मविषयतां निषेधति **भाष्यकार** इति दर्शयति । तदनेन अनुपलब्धिः समा एकेत्ययं पक्षो व्युदस्तः । यदस्ति यद्भावरूपं तदुपलब्धेर्विधायकस्य प्रमाणस्य विषयः । उपलब्ध्या विधायितया तदस्तीति ज्ञायते । यन्नास्ति यद्भावप्रतिषेधरूपं तदनुपलब्धेर्निषेधिकाया उपलब्धेर्विषयः । भावोपलब्धेरन्याभावोपलब्धिरेवानुपलब्धिर्यतः । अनेन च **भाष्य**ग्रन्थेन द्वितीयविकल्पनिराकरणं सूचितमिति मन्तव्यम् ।

सूचितमेव निराकरणं स्पष्टयितुं सोऽयमित्यादि**भाष्य**स्य सोपपत्तिकमर्थमाह—**त्वया हि जातिवादिनेति ।** अयमर्थः । न तावदावरणानुपलब्धेरुपलम्भो [806b] नास्तीति शक्यमावेदयितुम् , आवरणं नोपलभे इत्यावरणानुपलब्धेर्मानसप्रत्यक्षेणोपलभ्यमानत्वात् । तस्माद् भावोपलब्धिविलक्षणा आवरणाद्यनुपलब्धिरुपलब्धिरेवावरणाद्यनुपलब्धेरनुपलम्भोऽकामेनाप्यभ्युपगन्तव्यो न त्वावरणाद्यनुपलब्धेः स्वरूपोपलम्भाभावः । आवरणाद्यनुपलब्धेरनुपलम्भोऽभ्युपगन्तव्यः, तस्य मानसप्रत्यक्षोपलम्भबाधितत्वात् । तेन च वादिना अनुपलम्भेनावरणोपलम्भमावरणं च प्रसञ्जयता अनुपलम्भस्यानुपलब्ध्युपलम्भस्वरूपत्वेनोक्तस्यावरणाद्यनुपलब्धिलक्षणस्वविषयालोपेन प्रत्यवस्थेयम् । अन्यथा यद्यनुपलम्भ आवरणाद्यनुपलब्ध्युपलम्भस्वरूपः स्वविषयस्याभावस्य लोपं विदध्यात् ततोऽभावव्यवहारो लोके समुच्छिद्यते ।

एवं चेदित्यादि सुगमो ग्रन्थः ।

अर्थं परिशोध्येदानीमत्रैवार्थे **भाष्या**क्षराणि योजयति—**तदिदमुक्तं सोऽयमावरणाद्यनुपलब्धेरनुपलम्भ** इति । नोपलभ्यते । कोऽर्थः ? निषेध उपलभ्यते । येन सोऽनुपलम्भोऽभावग्राहकं प्रमाणमित्यर्थः । तत आवरणाद्यनुपलब्धेरनुपलम्भ इति किमुक्तं स्यात् ? आवरणाद्यनुपलब्धिलक्षणस्याभावस्य ग्राहकं प्रमाणमिति । तदिदमाह—**आवरणोपलम्भस्य निषेधविषयं प्रमाणमिति** । आवरणोपलम्भस्य निषेध आवरणानुपलम्भः । तद्विषयं प्रमाणमावरणानुपलम्भस्योपलम्भ उपलब्ध्यभावे स्वविषये प्रवर्तमानो न स्वविषयामनुपलब्धिं प्रतिषेधति । न हि यद् यस्य व्यवस्थापकं प्रमाणं तत् तस्यैव निषेधकमिति युक्तं विरोधात् ।

अपि तूपलब्धिमेवेति । उपलब्धिविरुद्धं तदभावं व्यवस्थापयता प्रमाणेनोपलब्धिः प्रतिषिद्धा भवतीत्यर्थः ।

जातिवादिनस्तु निषेधेदिति जातिवाद्यभिप्रायेणैवोच्यते ।

टीयाम् ।। नन्वनुपलम्भात्मकत्वादनुपलब्धेरित्यनेन **सूत्रेण**[1] निषेधविषयप्रमाणगम्यता अनुपलब्धेरुक्तैव । तत् **किं सूत्रान्तरेणे**त्यत आह—**न केवलमिति** । निषेधक-प्रमाणविषयत्वे उपलम्भाभावस्याभावव्यवहारानुपपत्तिरेवोपपत्तिरनुपलब्धेर्निषेधविषयप्रमाणगम्यतायाः । अथ वा अनुपलम्भात्मकत्वमुपलम्भाभावस्वरूपत्वमनुपलब्धेर्व्यपदिशन्निषेधविषय-प्रमाणगम्यतामनुपलब्धेः सूचयति--प्रमाणसापेक्षत्वाद्यपदेशस्य ।

भाष्ये ।। **ज्ञानविकल्पानामिति** । ज्ञानभेदानाम् ।

टीयाम् ।। **अनैकान्तिकत्वमिति** । भूमिगतनिध्यादिभिः ।

नन्वविशिष्टस्य हेतोर्व्यभिचारे विशेषणमुपादीयते । न चासत्त्वे साध्ये आवरणाद्य-संभवे सत्यनुपलब्धेरिति हेतुः क्वचिदपि व्यभिचरति । न च हेत्वाभासताव्युदासमन्तरेण हेतुविशेषणस्य फलं पश्याम इत्यत आह—**अयमर्थ** इति । नेदं विशेषणं व्यभिचार-निवृत्तिप्रयोजनमित्यर्थः ।

सत्त्वाभ्युपगम इतीति । सत्त्वाभ्युपगम इति पदेन ।

विपर्यय इति । साध्यस्यासत्त्वस्य विपर्ययः सत्त्वरूपः ।

अस्य च विपर्ययस्याव्यभिचारान्नार्थापत्तिसम इत्यर्थ इति । अस्य साध्यस्यासत्त्वस्य यो विपर्ययः सत्त्वं तस्यावरणाद्यसंभवे सत्युप[807a]लब्धेरित्यनेन साधनविपर्ययेणाव्यभिचारान्नावरणादिसंभवे सत्युपलब्धेः सत्त्वमिति रूपोऽर्थापत्तिसमः प्रतिषेधः समुद्भवति ।

एतदुक्तं स्यादेवं ह्यत्र जातिवादी प्रत्यवतिष्ठेत । असन्नरविषाणसाधर्म्येणावरणाद्य-संभवे सत्यनुपलब्धेरिति रूपेणासत्त्वं ब्रुवाणो न क्षरं सत्साधर्म्येणावरणादिसंभवे सत्युपलब्धे-रिति रूपेण सत्त्वं शब्दस्य वदतीति । न च साध्यविपर्ययस्य सत्त्वस्यावरणाद्यसंभवे सत्युप-लब्धेरित्यनेन साधनविपर्ययेणाविनाभावित्वे सत्त्वाभ्युपगम इति पदेन सूचिते सति एतत्प्रत्य-वस्थानं संभवति । सत्त्वस्य साध्यविपर्ययस्य साधनविपर्ययेणावरणाद्यसंभवे सत्युपलब्धिरित्य-नेन व्याप्तस्यावरणादिसंभवे सत्युपलब्धेरित्यनेन संबन्धानुपपत्तेरिति ।

।। इत्यनुपलब्धिसमाप्रकरणं संपूर्णम् ।।

---

1 V. i. 30

॥ अनित्यसमाप्रकरणम् ॥

[५.१.३२–३४]

उने ॥ **अनैकान्तिकचोदनाभास** इति । साधर्म्यस्य सपक्षवद् विपक्षेऽपि गतत्वात् ।

सौत्रे साधर्म्येति । सौत्रं साधर्म्यपदमापादकमासञ्जकं धर्ममुपलक्षयति । अनित्यत्वपदं चापाद्यमासञ्ज्यं धर्मम् । साधर्म्यवद् वैधर्म्येणापि प्रत्यवस्थानसंभवात् तथा शब्दानित्यत्ववत् पर्वताग्निमत्त्वादावपि साध्यन्तरे सावकाशत्वात । तथा हि प्रकृतोदाहरणवद् यद्याकाशवैधर्म्यादनित्यः शब्दः, त्रैलोक्यमेव तद्वैधर्म्यादनित्यं भवतु । यदि महानससाधर्म्यात् पर्वतोऽग्निमान् तत्साधर्म्यात् सत्त्वादेस्त्रैलोक्यमेवाग्निमद् भवेदिति ।

एतच्चेति । उपलक्षणपरत्वम् ।

उत्तरसूत्रे इति । प्रतिज्ञादियोगसाधर्म्यात् प्रतिषेधस्यासाधकत्वधर्मसञ्जनपरे ।

तेनायं **सूत्रार्थः** । अनित्यत्वप्रयोगे साधर्म्यात् सर्वानित्यत्वप्रसङ्गवद् धर्मान्तरात साध्यधर्मोपपत्तिप्रसङ्गेन प्रत्यवस्थानमनित्यसम इति ।

साधर्म्यादसिद्धेरित्यादि **सूत्रम्**[1] । यदि साधर्म्यादसिद्धिस्तदा तवापि प्रतिषेधस्य प्रतिषेधकवाक्यस्यासिद्धिः स्यात् । प्रतिषेध्येन मत्पक्षेण साधर्म्यात् प्रतिज्ञाद्यवयवयोगो हि तयोः साधर्म्यमित्यर्थः ।

दृष्टान्ते चेत्यादि **सूत्रम्**[2] ॥ दृष्टान्ते हि घटे साध्यसाधनत्वेन प्रतिज्ञातं साधर्म्यं कार्यत्वमनित्यत्वाव्यभिचारिशब्देऽस्ति । न चैवं सर्वस्य सत्त्वादिसाधर्म्यमनित्यत्वाविनाभाव्यस्ति व्योमादौ व्यभिचारादित्यर्थः ॥

॥ इत्यनित्यसमाप्रकरणं संपूर्णम् ॥

———

1 V. i. 33 2 V. i. 34

॥ नित्यसमाप्रकरणम् ॥

[५.१.३५–३६]

उने ॥ एवं च सर्वव्याप्तिरिति । उपलक्षणव्याख्यानेन नित्यसमस्य यथोक्ते लक्षणार्थे सति भिन्नाभिन्नकार्याकार्याश्रितानाश्रितादयः सर्वविकल्पोपक्रमाः संगृहीता भवन्तीत्यर्थः ।

नित्यानित्यलक्षणयोरिति । नित्यसमानित्यसमलक्षणयोः ।

अध्यायान्तरे इति । प्रथमाध्यायादौ प्रमाणादिक्रमस्य सतात्पर्यतया सहेतुकतया इहाप्यध्याये विभागोद्देशे जातीनां क्रमः सतात्पर्यो विद्यते इति शङ्का मा भूदित्येतदर्थं नित्यसमानित्यसमलक्षणयोः क्रमातिक्रम इत्युत्तरम् ।

तेन हीति । नित्यानित्यसमलक्षणयोर्विभागोद्देशक्रमातिक्रमेण हीदं ज्ञायते यदुत वाचः क्रमवृत्तित्वेन युगपदुच्चारणासंभवात् न्यायप्राप्तः क्रमोऽत्र न पुनः प्रयोजनप्राप्त इति ।

अयमिति । [807b]विभागोद्देशक्रमातिक्रमः ।

टीयाम् ॥ स्यादेतद् धर्मस्य सदातनत्वेऽपि कथं धर्मिणः शब्दस्य तथाभावो न हि सामान्यसमवायस्य च नित्यत्वे घटादेर्धर्मिणो नित्यत्वं दृष्टचरम् । अत आह—**न ह्यस्ति संभव** इति । ततोऽन्यत्वे सतीति विशेषणीयमित्यर्थः ।

प्रतिषेध्ये नित्यमित्यादि **सूत्रम्**[1] । अनित्यतया प्रतिषेध्ये शब्दे नित्यमनित्यभावादित्ययं हेतुर्यदि सिद्धः प्रतिज्ञार्थः । न सिध्यति प्रतिज्ञार्थश्चेत् सिद्धो हेत्वर्थो । न सिध्यतीति व्याघातादनित्ये नित्यत्वोपपत्तेर्हेतोर्यः प्रतिषेधः, तस्याभाव इति योजनेत्यक्षरार्थः ।

टीयाम् ॥ ननु नाभावोऽनित्यत्वम्, किं तर्हि ? परान्तावच्छिन्नसत्तासंबन्धः । अतः कथं **भाष्यकारः** प्रध्वंसाभावमनित्यत्वमङ्गीकृत्य प्रश्नानुपपत्तिमाहेत्यत आह—**यदि निरोधकादिति ।** सर्वथा परस्य प्रश्नो नोपपद्यते इत्यत्र तात्पर्यमित्यर्थः ।

---

1 V. i. 36

न चासाविति । न चासौ समवायशब्देनाधेयः, तस्य समवायस्य स्वतन्त्रत्वादिति । अनित्यत्वं शब्दे किं सर्वदा भवत्यथ नेत्येवमाधाराधेयभावेन प्रश्नस्यानुपपत्तेरित्यर्थः ।

ननु य एव शब्दस्तदेवानित्यत्वम् , अतः कथमुच्यते पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमादित्यत आह—**अनात्यन्तिकसत्तेति ।**

मा नामानित्यता समवायात् **पृथग्धर्मो भूत् ।** शब्दात् भविष्यति अन्यथा भावधर्मोऽनित्यतेति तन्त्रे व्यवहारो न स्यात् । अत आह—**न च समवायोऽपीति ।**

परिप्रश्नानुपपत्तेरित्युत्तरमिति । एवमत्र जातिवादी विरोधमुद्भावयेत् शब्देऽनित्यत्वं नित्यत्वानित्यत्वविकल्पाभ्यां प्रतिज्ञातुं न शक्यते इति । न च तद् युक्तम् , शब्द इति आधार निर्देशानुपपत्तेरिति ।

॥ इति नित्यसमाप्रकरणं संपूर्णम् ॥

॥ कार्यसमाप्रकरणम् ॥

[५.१.३७–३८]

प्रयत्नकार्यानेकत्वात् कार्यसम इत्यत्र **सूत्रे**[1] प्रयत्नकार्यत्वादिति पदं यदि द्विविधं प्रयत्नस्य कार्यमुत्पत्तिः यथा घटस्याभिव्यक्तिः यथा मूलकीलोदकादेरिति व्याख्यायते, तदोदाहरणपुरस्कारेणास्या जातेर्लक्षणं सर्वानुमानसाधारण्यविरुद्धं स्यात् । अथ प्रयत्नविषयानेकत्वादित्यर्थः, तदा प्रयत्नग्रहणं व्यर्थं कार्यपदादेव प्रयत्नकार्यलाभादित्यतः कार्यपदं व्यवहर्तव्यार्थकतया व्याख्येयम् । तथा हि, प्रयत्नस्य कार्यं विषयो हेयोपादेयतया व्यवहर्तव्य इति यावत् । तस्यानेकत्वं पारमार्थिकापारमार्थिकत्वं प्रयत्नानन्तरभावी वागात्मा खलु व्यवहारो मुख्यामुख्यतया द्विविध इत्यर्थः । तस्माद् यत्प्रत्यवस्थानं कार्यत्वादिति वाग्व्यवहारस्यामुख्यस्यार्थसाधकत्वेऽतिप्रसङ्गो मुख्यस्य वा सिद्धिः । अथ तत्साधनाय तत्र हृदयतल्पं प्रयत्नानन्तरोपलब्धिरधिशेते, सानैकान्तिकीत्येवंरूपम् , तत् कार्यसम इति ।

तदिदमाह **उदयनः । वास्तवाभिमानिकेति** । वास्तवमपि व्यवह्रियमाणं दृष्टम्, आभिमानिकमपि । तदिदमादिवादिप्रयुक्तं कार्यत्वादिरूपहेत्वादिसाधनाङ्गं किं रूपं सत् साधनाङ्गत्वेन व्यवहृतमित्येवं साधनाङ्गविषये संशय्य तन्निर्णयाय आदिवादिप्रयुक्तस्य हेत्वादिसाधनाङ्गस्य वास्तवत्वनिर्णयाय जातिवादिना स्वयमुत्प्रेक्षितं यत्प्रमाणं प्रयत्नानन्तरोपलम्भादित्यस्य दूषणेन प्रत्यवस्थानं [४०९a] कार्यसमः । एवं च प्रवर्तते । अनित्यः शब्दः कार्यत्वादित्युक्ते भवेदेवं यदि शब्दः कार्य इति परमार्थतो निश्चीयते । तदेव तु दुर्लभं प्रमाणाभावात् ।

प्रयत्नानन्तरोपलब्ध्या हि तत्साधनीयम् । सा चानैकान्तिकीति । एवमियं सर्वव्यापिका स्यादिति भावः ।

मौल इति । आदिवादिप्रयुक्ते हेत्वादिसाधनाङ्गे ।

अयमिति । कार्यसमः ।

अत एवेति । यत एव कार्यत्वलक्षणो मौलहेतुर्दूष्यः । अयमभिप्रायः ।

---

1 V. i. 37

अनित्यतां प्रत्ययसाधकमेव सद् यदि कार्यत्वं साधयितुं प्रयत्नानन्तरीयकत्वं हेतुः क्रियेतात्र- वादिना तदा अनित्यत्वमिति भूत्वा न भवतीति किमुत्कीर्त्तितं **भाष्यकृता ?** अथानित्यत्वमेव प्रयत्नानन्तरीयकत्वात् साध्यमाद्यवादिन इत्यभिप्रायेणोत्कीर्तितम्, तर्हि अभूत्वा भवतीति कार्यत्वं किमिति लक्षितम्। तस्मादनित्यत्वस्य कार्यत्वस्य च विवरणाद- नित्यत्वे साध्ये कार्यत्वं वादिना हेतूकृतम्। अत्र च सन्दिग्धासिद्धत्वमुद्भाव्य जातिवाद्युत्प्रे- क्षितप्रयत्नानन्तरीयकत्वानैकान्तिकत्वदर्शनेन मौलहेतोः कार्यत्वस्य सन्दिग्धासिद्धिनिर्वाहो **भाष्या**भिप्रेत इति सिद्धम्।

साधनीयमिति। वादिना।

प्रकृते इति। शब्दे।

एष च हेतुरिति। प्रयत्नानन्तरोपलब्धिः।

हेतुत्वाध्यारोपेणेति। वादिना हि कार्यत्वेन हेतुना शब्दानित्यत्वं साधयितुं प्रयोगः कृतः, न तु कार्यत्वमेव साधयितुं किञ्चिदुपन्यस्तम्। तत्रासिद्धं कार्यत्वं मन्यमानो जातिवादी तत्साधनाय प्रयत्नानन्तरोपलब्धिरेव हेतुरनेन वक्तव्य इति स्वयमुत्प्रेक्ष्य दूषयति स्म। सेयं स्वयमुत्प्रेक्षाध्यारोपः।

वदतेति। वार्त्तिककृता।

उदाहरणपूर्वमितीति। उदाहरणमात्रमेतत, न पुनरिदमेवैकमित्यर्थः।

मूलमूलिसङ्करभ्रमं निवारयतीति। मूलं प्रयत्नानन्तरोत्पादः। मूली च प्रयत्नानन्तरोपलब्धिः। ततः प्रयत्नानन्तरीयकत्वादिति **भाष्यं** कार्यत्वादिति विवृण्वं- **ष्टीकाकारः** प्रयत्नानन्तरीयकत्वादेतस्य प्रयत्नानन्तरोपलम्भार्थत्वशङ्कां निवारयतीत्यर्थः।

टीयाम्॥ ननु यदि प्रयत्नानन्तरीयकत्वस्य कार्यत्वमर्थः, तर्हि अनित्यत्वेनाभिन्नत्वादनित्य- त्वसाधनं न स्यादेवेत्याशङ्कय आह— **कार्यत्वानित्यत्वे चेति।** पूर्वान्तोपलक्षितसत्ता- समवायः कार्यत्वम्, परान्तावच्छिन्नसत्तासमवायोऽनित्यतेति प्रथमे निरूपितम्।

एवमत्रस्थिते प्रयोगेऽसिद्धत्वमुद्भाव्य तत्साधनाय स्वयमुत्प्रेक्षितं हेतुं प्रयत्नानन्तरीय- कत्वमाश्रित्य यदाह जातिवादी तद् दर्शयति—**प्रयत्नानन्तरीयकत्वमित्यादि।**

उने॥ साध्याविशिष्टत्वादिति। साध्यत्वादित्यर्थः।

टीयाम् ॥ **साध्येनानुगमादिति** । अनित्यत्वरूपसाध्याविनाभावपरिकल्पितकार्यत्व-सामान्यमात्रे हेतुतयोपन्यस्ते संबन्धिभेदेन कार्यत्वहेतोर्भेदापादनं कार्यसम इति **कीर्त्ति-**श्लोकार्थः ।

अनेनेति । **दिङ्नागेन** ।

अन्यत्कार्यत्वमिति । अशरीरि कार्यत्वम् ।

अन्यच्चेति । शरीरिकार्यत्वम् ।

एतदप्ययुक्तमिति । वक्ष्यमाणम् ।

तदेवाह—**वस्तुभेदे** इति ।

पाण्डुद्रव्यादिवद् धुताशने इति । पाण्डुद्रव्यं हि पर्वते श्वेतरेण्वादि ।

महानसे धूम इति । वस्तुनो भेदे शब्दमात्रेणाभिन्नात् पाण्डुद्रव्याद् [808b] यथाग्नौ नानुमितिः ।

उने ॥ **अन्यत्वमात्रेणेति** । अविवक्षितव्याप्यव्यापकभावं कार्यत्वं दण्डादिपूर्वकतया-न्यद् घटे, अन्यच्च विवक्षाप्रयत्नादिपूर्वकतया शब्दे इत्यन्यत्वमात्रं धर्मविकल्पः ।

वर्ण्यावर्ण्ययोरिति । यदि ताल्वादिव्यापारपूर्वकतया सिद्धो घटः तर्हि ख्यापनीयः शब्दसमानयोगक्षेमतया साध्यानित्यत्वसंबन्धत्वात् । न चेत् ताल्वादिव्यापार-पूर्वकतया सिद्धः तथापि ख्यापनीयः पक्षविवक्षितहेतुमत्तया असिद्धत्वादिति विवक्षायां वर्ण्यसमा । यदि दण्डादि व्यापारपूर्वकतया सिद्धः शब्दो न तर्हि ख्यापनीयो घटसमानयोग-क्षेमतया सिद्धानित्यत्वसंबन्धत्वात् । न चेत् तथापि ख्यापनीयो दृष्टान्तविवक्षितहेतुमत्तया अनुपसंहृतत्वादिति विवक्षायां त्ववर्ण्यसमेत्यर्थः ।

टीयाम् ॥ प्रयत्नस्याभिव्यक्ति प्रत्यहेतुत्वं कस्मादित्यपेक्षायामुक्तं **सूत्रकृता** अनुपलब्धि-कारणोपपत्तेरिति[1] । तदयुक्तमिव विरुद्धत्वात् । यत एवानुपलब्धिकारणमावरणाद्युपपद्यते, अतएव प्रयत्नस्याभिव्यक्तिहेतुत्वं भवति यथोदकादावित्याशङ्कयाह— **अनुपलब्धि-कारणस्येति** ।

---

1 V. i. 38

तदेव तु नास्तीति व्यतिरेकपरं द्रष्टव्यमिति । तदेव अनुपलब्धि-कारणमेव नास्तीति प्रकारेण व्यतिरेकपरम् अनुपलब्धिकारणोपपत्तेरित्येतत् । स्यादेव प्रयत्न-स्याभिव्यक्तिहेतुत्वं यद्यनुपलब्धिकारणोपपत्तिः स्यात् । न त्वेवम् । तस्मात् प्रयत्न उत्पत्तिं प्रत्येव हेतुरित्यर्थः ।

भाष्यं सूत्रवद् योजनीयमिति । **भाष्य**मपि व्यतिरेकपरं द्रष्टव्य-मित्यर्थः ।

विषयविशेषोद्देशेनाभिव्यक्तिर्विधीयमाना तच्छब्देन निर्देष्टव्या सती कस्माद् यच्छब्देन निर्दिष्टा **भाष्यकृते**त्यत आह—**यत्रतत्रयोर्व्यत्यास** इति ।

प्रयत्नानन्तरभाविनोऽर्थस्येत्यादि **भाष्यं** पूर्वापरविरुद्धम् । विद्यमानं वस्त्वभि-व्यज्यते, यश्चार्थः प्रयत्नानन्तरं भवति उत्पद्यते तस्याभिव्यक्तिर्भवतीति कथमुच्यते ? अत आह—**विषयेणेति** ।

भाविन इति । भावेन विषयेण विषयिणं प्रत्ययमुपलक्षयति ।

विशेषोपलब्धाविति । प्रयत्नानन्तरीयकत्वादेर्निश्चायकधर्मस्योपलब्धौ ।

॥ इति कार्यसमाप्रकरणं संपूर्णम् ॥

॥ षट्पक्षीप्रकरणम् ॥

[५.१.३९–४३]

टीयाम् ॥ **यतस्तु किञ्चित् प्रतिषेधतीति** । अनैकान्तिकत्वलक्षणो हि प्रतिषेधः किञ्चिदेव हेतोः साधकत्वं प्रतिषेधति, किञ्चिच्च स्वरूपं न प्रतिषेधतीति ।

नित्यपक्षेऽभिव्यक्तिरिति । यथा साधनवादिनः प्रयत्नानन्तरीयकत्वादित्येवं वदतः प्रयत्नानन्तर[1]मुत्पाद एव न सिध्यति तदनन्तरमभिव्यक्तेरपि भावादेवं प्रतिषेधवादिनोऽपि प्रयत्नकार्यानेकत्वं वदतः कथं तदनन्तरभाविनी केवलाभिव्यक्तिः सेत्स्यतीति भावः ।

टीयाम् ॥ **मतानुज्ञापादनमाहेति** । मतानुज्ञाप्रसञ्जनलक्षणं पञ्चमं पक्षमाह **सूत्रकार** इति योगः ।

भाष्ये ॥ **प्रसजत** इति । मां वादिनं प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः इति **सूत्रेण**[2] प्रसजतोऽहो जातिवादिन् ! तव ।

टीयाम् ॥ नन्वियं षट्पक्षीकथा चिन्तयोपदर्शिता । न त्वस्याः कथासु संभवोऽस्ति, समानदोषापादनेनानिर्णायकत्वात् पौनरुक्त्यदोषदुष्टत्वाच्च । जातिवादिनं प्रति सम्यक्समाधानेनैव साधनवादिनः[809a] प्रत्यवस्थाननियमात् । अतश्च कथासु षट्पक्ष्यसंभवात् क सभ्याः साधुत्वं वा मीमांसते इत्याशङ्क्य तेषामित्यादि **भाष्यम**वतारयति—**यदि त्वस्य कथञ्चिदिति** । कस्याञ्चिदवस्थायां षट्पक्ष्यपि संभवतीति सूचितम् एवं वदता **भाष्यकृता** । अन्यथा यदि क्वचिदपि षट्पक्षी नावतरेत् ततः पक्षाणां साधुत्वासाधुत्वविचारपरग्रन्थसन्दर्भारम्भवैफल्यं स्यादित्यर्थः ।

भाष्ये ॥ साध्वसाधुतायामिति आद्यपक्षस्य साधुतापि संभवेत् । अत उक्तम्—**साध्विति** ।

---

1 °मुत्पाद एव न...तदनन्तर° omitted in J 2 V. i. 41

चतुर्थषष्ठयोरित्यादि। जातिवाद्यभिमतयोश्चतुर्थषष्ठयोरर्थाभेदात् पौनरुक्त्यम्। षष्ठपक्षस्य पौनरुक्त्यस्य च निग्रहस्थानत्वमग्रे दर्शयिष्यति।

पुनरुक्ततां स्पष्टयति— **चतुर्थपक्ष** इत्यादिना **नार्थविषयः कश्चिद्**इत्यन्तेन।

समानस्तृतीयेति। वाद्यभिमतयोस्तृतीयपञ्चमपक्षयोरर्थाविशेषात् पुनरुक्तदोषप्रसङ्गः पञ्चमपक्षस्य। न चासद्वादप्रवृत्तेरनियमात् षट्पक्षीवत् लक्षपक्ष्यपि कस्मात् न प्रवर्तते इति जल्पनीयम्, षष्ठपदकस्थितजातिवाद्यभिहितप्रतीपवचनोपजीवनेन साधनवादिनः प्रत्यवस्थानासंभवात्। तथा हि प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति स्थापनाहेतौ प्रयुक्ते सति जातिवादी कार्यसमया जात्या प्रत्यवस्थितः। इदानीं साधनवादी तत एव शिक्षित्वा तृतीयस्थानस्थितः प्रत्यवतिष्ठतेऽनैकान्तेनानित्यमेव प्रयत्ननान्तरीयकं [1]नित्यस्यापि प्रयत्नानन्तरीयकत्वात्। एवं चेदनैकान्तिकत्वादसाधकत्वं मन्यसे प्रतिषेधोऽपि न साधकः स्यादनैकान्तिकत्वादिति। जातिवाद्यपि लब्धावसरस्तत एवानैकान्तिकत्वस्वरूपमवगम्य तुर्यं पक्षं प्रवर्तयति। यदि प्रतिषेधोऽनैकान्तिकः किञ्चिदेव साधनत्वं प्रतिषेधति न तु स्वरूपमिति। तर्हि मदुक्तप्रतिषेधस्य यस्तावकीनः प्रतिषेधः सोऽप्यनैकान्तिकः स्यात् न साधिमानमवलम्बते। तेनापि हि प्रतिषेधस्य प्रतिषेधकत्वं निषिध्यते न स्वरूपमिति।

इदानीं साधनवादी पञ्चमस्थानमारूढः सन्नेवंभूतामनैकान्तिकतां दुरन्तां निष्फलां च पश्यन्नुपेक्षमाणो मतानुजामभिनवं दूषणमित्युद्भावयति। जातिवादी तु साधनवादिवचनोपजीवनेनैव मतानुज्ञया षष्ठं पक्षं प्रस्तौति। यदि भवदुदीरितानैकान्तिकत्वानुद्धारेण मम प्रतिषेधाप्रतिषेधस्यानैकान्तिकत्वमुद्भावयतो मतानुज्ञामुद्भावयसि, तर्हि भवतैव मार्गः प्रदर्शित इति त्वामप्यहं मतानुज्ञया निगृह्णामि। भवतापि मदुक्तमनैकान्तिकत्वमनुद्धृत्य प्रतिषेधेऽपि समानो दोष इत्यभिधीयते इति।

इदानीं स्थापनाहेतुवादी मतानुज्ञोद्भावनापरम्परां निष्प्रयोजनां कलहप्रायामुपेक्ष्य लब्धावसरस्तूष्णीमवलम्बते इति मन्यमानः **सूत्र**कारः षट्पक्षीमेवोपदर्शितवान्।

उने॥ चतुर्विंशतिरिति। चतुर्विंशतेर्जातिभ्यः सकाशात्।

विकल्पसमाविपर्ययेणाविकल्पसमेति। यथा सत्युत्पत्तिमत्त्वे घटो न

---

1 S adds नित्यस्यापि प्रयत्ननान्तरीयकम्।

विभागजः शब्दस्तु विभागज इति व्यवस्थितं वैचित्र्यमेवं तस्मिन्नुत्पत्तिमत्त्वे सत्यपि विभागजवच्छब्दो नित्यो भविष्यति घटस्त्वनित्योऽविभागजवदित्येवं वैचित्र्येण प्रवर्तमानाया विकल्प-[४०9b]समाया विपर्ययेण वैचित्र्यनिषेधेनाविकल्पसमा ।

न सदसत्त्वविकल्प इति । न सदसत्त्ववैचित्र्यम्, किं तर्हि ? सत्त्वमेव ।

सात्मकत्वनैरात्म्यविकल्पोऽपि भविष्यतीति । किं तर्हि ? नैरात्म्यमेव भविष्यतीति हृदयम् ।

साध्यसमाविपर्ययेणेति । साध्यदृष्टान्तधर्मिणोस्तुल्यत्वे साध्यवद् दृष्टान्तस्यापि तेनैव पञ्चावयवप्रयोगेण साध्यत्वप्रसञ्जनमितिरूपायाः साध्यसमाया विपर्ययेण ।

प्रसङ्गसमाविपर्ययेणेति । निश्चितं हि प्रमाणं प्रमेयस्य साधकम् । प्रमाणनिश्चयश्च प्रमाणान्तरेण स्यात् । अन्यथा प्रमाणमन्तरेणैव प्रमेयस्यापि सिद्धिप्रसङ्गात् । ततश्च साधननिश्चयाय प्रमाणान्तरमभ्युपेयम् । तन्निश्चयायापि प्रमाणान्तरमित्येवमनवस्थाप्रसङ्गरूपायाः प्रसङ्गसमाया विपर्ययेण ।

प्रत्यक्षाभासादिप्रतिरोधबाधयोरिति । प्रत्यक्षाभासादिभिः समबलत्वविवक्षायां यः प्रतिरोधोऽधिकबलत्वविवक्षायां यो बाधस्तयोरुद्भावनेन ।

तथा हि पित्ताद्यन्तरितसितिमानं शङ्खमुपलभ्य शुक्लोऽयं शङ्खत्वादिति प्रयुक्ते जातिवाद्याह—**नायं तथा पीतस्यैवोपलब्धेः** । न चेदिदं बाधकं त्वदनुमानमपि न साधकं प्रमाणत्वेनाविशेषादिति । तथा प्रतिरोधेनापि प्रत्यवतिष्ठते, यावदनुमानात् शुक्लः, तावत् प्रत्यक्षात् पीत एवायं कस्मात् न स्यात् ? अस्ति च तदत्र । तथा प्रतिभासमानत्वात् । न चास्ति कश्चिद् विशेष इति । तथा सास्नादिमन्तं पिण्डमुपलभ्यायं पिण्डो गोशब्दवाच्यः सास्नादिमत्त्वाद् इत्युक्ते जातिवाद्याह—नायं गोशब्दवाच्यो गोसादृश्यस्य वाच्यो दर्शनात् । गवयशब्दवाच्यत्वस्य सिद्धेर्बाधप्रतिरोधभावना पूर्ववत् । तथा सात्मकं जीवच्छरं प्राणादिमत्त्वादित्युक्ते जातिवाद्याह—नेदं सात्मकमात्मादयः पञ्च संज्ञामात्रं संवृतिमात्रमित्याद्यागमदर्शनात् अत्रापि बाधप्रतिरोधभावना प्राग्वदिति ।

कारीषो न सिध्येदिति । करीषाग्नेरदृश्यत्वात् ।

तार्णादिर्न सिध्येदिति । तार्णाद्यग्नेरदृश्यत्वात् ।

साधारणव्याप्ताविति । दर्शनयोग्ययोर्दर्शनायोग्ययोश्च धूमानलयोरविशेषेण व्याप्तौ धूमानुमानात् पर्वतादावसंभवन्तौ चित्रकाख्यौषधिजठरस्थावग्निविशेषावपि सिध्येताम् ।

अथ नित्या बुद्धिरीश्वरस्यातो बुद्ध्युत्पादार्थस्य शरीरादेरनुपयोग इत्युभ्युपेयते, तदा नित्यप्रयत्न ईश्वरस्यातः प्रयत्नोत्पादार्थाया बुद्धेरप्यनुपयोगादसिद्धिः स्यादित्याह— **बुद्धिनित्यत्वे** इति ।

सा तु प्रसिद्धैवेति । त्वत्पक्षवत् मत्पक्षेऽपि किञ्चित् साधनं भविष्यतीत्यादि-रूपेण ।

तथा चेति । यदा च ज्ञातो घटो निषेध्यते, तदा ।

उपकारेऽप्युपकारान्तरापेक्षायामनवस्थेति । यदि मृत्तिका घटे कञ्चिदुपकारं करोतीत्यनयोः कार्यकारणभावनियम आस्थीयते, तदोपकारेऽपि कार्ये उपकारं कुर्वत्या मृदः कार्यकारणभावनियम आस्थेयः, तथा चानवस्थेत्यर्थः ।

द्वितीये त्विति । उपकारानियतत्वे ।

तत्सिद्धेरिति । बुद्धिमत्पूर्वकत्वसिद्धेः ।

स्वात्मनीति । स्वरूपे ।

ताद्रूप्येणेति । संशयरूपत्वेन ।

स्वात्मनि ताद्रूप्येणाप्रवृत्तेरिति । संशयस्य संशयस्वरूपत्वाभावादित्यर्थः ।

उपपत्तिसमाविपर्ययेणेति । [810a] त्वत्पक्षवन्मत्पक्षेऽपि किञ्चित् प्रमाणं भविष्यतीति रूपाया उपपत्तिसमाया विपर्ययेण ।

विशेषः स्यादिति । जीवच्छरीरे ।

विश्वस्यैव कश्चिद् विशेषः स्यादिति । न च विश्वस्यापि कश्चिद् विशेष इष्यते, तस्मात् जीवच्छरीरेऽपि नैरात्म्यनिवृत्तिलक्षणे वि[शे]षो न भविष्यतीति जातिवादिनोऽभिप्रायः ।

एवं सतीति । विभागस्य न्यूनसंख्याव्यवच्छेदकत्वे ।

अतिप्रसङ्ग इति । उक्तातिरिक्तानामपि प्रमाणादीनां प्राप्तिः ।

व्यतिरिक्तोपलम्भानुपलम्भाभ्यामिति । व्यतिरिक्तानां जातीनामुपलम्भः प्रमाणादीनां त्वनुपलम्भस्ताभ्याम् ।

तुल्यत्वादिति । यथा प्रमाणादावुक्तशेषनिषेधसामर्थ्यं विभागस्य तथा जातिष्वपीत्यर्थः ।

अपारिभाषिकत्वाच्चेति । तन्त्रविशेषप्रसिद्धसंज्ञया अनिवृत्तत्वाच्च विभागस्य । यदि हि विभागः पारिभाषिकः स्यात्, तदा परिभाषयोः स्वाभिप्रायविशेषनियततया विभागः प्रमाणादिषूक्तशेषनिषेधपरो न तु जातिष्विति भवेदपीति भावः ।

ननु भवतु विभागः प्रसक्तशेषनिषेधपरः, ततः किमित्याह—**आपातत** इति ।

तद्यथार्थत्वप्रतिपत्ताविति । तासामधिकजातीनां यथार्थत्वप्रतिपत्तौ ।

तत्त्यागे इति । अधिकजातीनां त्यागे ।

तथा च तदनाप्ताविति । चोऽप्यर्थः । यथार्थत्वेन प्रतिपन्नानां त्यागेऽपि चेत् तदनाप्तिरपसिद्धान्तानाप्तिस्तदा ।

तदेवेति । विभागस्य प्रसक्तशेषनिषेधपरत्वम् ।

निराकृतवानिति । अस्य स्थाने निराकृतवतेति पाठः संभाव्यते ।

यदि सत्त्वस्येति । घटादौ निरात्मकेऽपि सत्त्वं दृष्टमित्येवं सत्त्वस्य नैरात्म्येन कृत्वा नैरात्म्याभावेन साध्येन सह व्यभिचारं दृष्ट्वा प्राणादिमत्यपि जीवच्छरीरे नैरात्म्यं भविष्यतीत्येवं प्राणादिमत्त्वेऽपि तन्नैरात्म्यं यद्यापादयेत् तदा परैरुच्यमाना विकल्पसमा विकल्पसमैव ।

अन्यव्यभिचारेति । अन्यस्यैकस्य हेतोर्यो व्यभिचारस्तस्य यः सञ्चारोऽपरस्मिन् हेतौ तन्मात्रशरीरत्वात् तस्या विकल्पसमायाः ।

अथ सात्मकत्वेऽपि । यथा जीवच्छरीरघटयोर्न सदसत्त्वविकल्पः, तथा सात्मकत्वनैरात्म्यविकल्पोऽपि न भविष्यतीत्यनेन सात्मकत्वनैरात्म्यवैचित्र्यं निषेधता जातिवादिना निरात्मकं जीवच्छरीरं सत्त्वाद् घटवदित्यनुमानेन यदि नैरात्म्यमापाद्यते तदास्यानुमानस्य समानबलत्वविवक्षया प्रतिरोधपक्षे साधर्म्यसमा । अधिकबलत्वविवक्षया तु बाधपक्षे प्रकरणसमा ।

तदसाध्यत्वेति । यथा कृतकत्वमनित्यत्वेन सहचरितं दृष्टान्ते दृष्टं शब्देऽपि साध्ये स्वसहचारि अनित्यत्वमुपनयति, तथा प्रकृतप्रयोगासाध्यत्वेन सहचरितं दृष्टान्ते दृष्टं कृतकत्वं साध्ये शब्दे प्रकृतप्रयोगासाध्यत्वमुपनेष्यतीत्येवं तदसाध्यत्वेन प्रकृतप्रयोगासाध्यत्वेन

यत्साहचर्यं दृष्टान्ते हेतोः । कृतकत्वं हि हेतुः प्रकृतप्रयोगासाध्यत्वं च धर्मो दृष्टान्ते सहचारिणौ विद्येते तस्य साहचर्यस्यासाध्यसमां प्रति बीजत्वं चेदिष्यते तदोत्कर्षसमान्तर्भावः । वाद्युक्तहेतुबलेनैव तत्सहचरिताविद्यमानधर्मोत्कर्षेण प्रत्यवस्थानमुत्कर्षसमा एतद्रूपैव च यथोक्तबीजभावा असाध्यसमेति भावः ।

[810b] **तदितरेति** । तस्मात् प्रकृतप्रयोगादितरेण प्रयोगेण यत् साध्यत्वं तेन यत् साहचर्यं दृष्टान्ते हेतोस्तस्यापि बीजत्वे तथाभाव उत्कर्षसमान्तर्भावो भावना प्राग्वत् ।

सिद्धत्वमात्रेति । सिद्धत्वमात्रेण यत् साहचर्यं हेतोर्दृष्टान्ते तस्यापि बीजत्वे एवमेवोत्कर्षसमान्तर्भाव एवात्रापि भावना प्राग्वत् ।

दृष्टान्तगतेति । दृष्टान्तगतसिसाधयिषितधर्मं प्रति यदसाधकत्वं हेतोः, तदेव बीजं भविष्यति ।

एतदेव भावयति—**प्रकृतासाधक** इति ।

यथाकथञ्चिद्धेतुप्रयोगेणेति । अव्यवस्थापकेन हेतुमात्रेणेत्यर्थः ।

स्वतःसिद्धिव्युत्पादनस्येति । स्वतःसिद्धिव्युत्पादनं हि दूषणं हि जातिवादिना न तावत् सिद्धसाधनत्वप्रतिपादनार्थमुच्यते । आद्यवादिनः साध्यसिद्धया प्रतिवादिनः पक्षहानिप्रसङ्गात् । तस्मात् साध्याभावप्रतिपादनार्थमेवैतज्जातिवादिना वाच्यम् । न च साध्यस्य स्वतःसिद्धिव्युत्पादनेन साध्याभावः प्रतिपादयितुं शक्य इति न स्वतःसिद्धिव्युत्पादनं दूषणत्वेनान्वेति । दूषणत्वेनोपन्यस्यमानं दूषणं न स्याद् यत इति भावः ।

अस्येति । प्रमेयस्य ।

वाक्यार्थ इति । तथा च प्रमाणवत् प्रमेयस्यापि स्वतःसिद्धिप्रसङ्ग इत्यस्य वाक्यस्यार्थः ।

तदतद्रूपताखण्डनोपक्रमादिति । कृतकत्वं प्रमेयादनित्यत्वरूपाद् भिन्नमभिन्नं वा ? अभिन्नत्वे एकशेषस्थितौ हेत्वभावे स्वरूपासिद्धिः । साध्याभावे कालात्ययापदेशः । भिन्नत्वे तु गवाश्ववदसाधकत्वमित्येवं या तदतद्रूपताखण्डना प्रमाणस्य भिन्नाभिन्नत्वेन खण्डना तयोपक्रमात् ।

प्रतिप्रमाणेति । प्रतिकूलं प्रमाणं प्रतिप्रमाणम् । तेन यत् प्रत्यवस्थानं तद्रूपतया ।

प्रत्यक्षसमादयः साधर्म्यसमादिष्वन्तर्भवन्त्योऽपि यद्यपि निरनुयोज्यानुयोगे निग्रहस्थानेऽन्तर्भवन्ति, सर्वजातीनां निरनुयोज्यानुयोगरूपत्वात्, तथापि प्रतिपक्षप्रमाणप्रत्यवस्थानरूपतायां साधर्म्यसमादिरूपताद्वारेण निरनुयोज्यानुयोगेऽन्तर्भवन्ति। बाधप्रतिरोधोपक्रमानिर्वाहमात्रे तु साधर्म्यसमादिरूपतामन्तरेणैव निरनुयोज्यानुयोगेऽन्तर्भवन्तीत्याह— **बाधप्रतिरोधेति।**

विवक्षितमिति। व्याप्तिविषयतया वादिना विवक्षितं वह्निसामान्यम्।

एकदेशस्त्विति। दृश्ययोर्वा व्याप्तिरदृश्ययोर्वा, दृश्यादृश्ययोर्वा इत्येवंरूपाया अव्याप्तिसमाया एकदेशस्तूत्कर्षसमः।

कथं योऽसावेकदेश इत्याह— दृश्ये दृश्यविषयाणां व्याप्तावङ्गीक्रियमाणायां दृश्येनैव सेद्धव्यम्। एवमदृश्येऽदृश्यविषयाणां व्याप्तावङ्गीक्रियमाणायामदृश्यत्वेनैव सेद्धव्यमिति। प्रथमैकदेशदृष्टान्तदृष्टस्य दृश्यत्वस्य द्वितीयैकदेशे दृष्टान्तदृष्टस्यादृश्यत्वस्य धर्मस्य साध्ये उत्कर्षणादित्यर्थः।

व्यापकं हीति। व्यापकमेव सिध्यतीति व्यापकस्य सिद्धिसंभावनाविषयत्वमात्रे विवक्षिते व्यापकं सर्वं सिध्यत्येवेति व्यापकस्य नियतसिद्धिकत्वं कल्प्यत इति सामान्यच्छलमित्यर्थः।

इच्छाप्रयत्नौ हि न स्वयं विषयप्रवणौ। अतस्तयोर्विषयावच्छेदोपयोगिनी बुद्धिरीश्वरस्य नैयायिकैरभ्युपेयते, न तु तदुत्पादोपयोगिनी[811a]त्यभिप्रायवानाह— **नित्यप्रयत्नेति।**

साधनाभासान्तरवदिति। यथा साधनाभासान्तरे दूषणम्।

निषेध्यं प्राप्येति। अनुपलब्धिलक्षणं प्रमाणं निषेध्यं घटं प्राप्य वा निषेधति, अप्राप्य वेत्येवं विकल्पाभ्यामुपक्रमात्।

ननु प्राप्तिसमायां साध्यं प्रति प्राप्याप्राप्य वेति विकल्पोपक्रमः, अत्र तु निषेध्यं प्रति। तत् कथं ततोऽस्या न भेदः। अत आह— **निषेधस्यापीति।**

तन्निषेध्यतयेति। अनुपलब्धिप्रमाणनिषेध्यतया।

विषयिधर्मापेक्षयेति। उपकार उपकार्यरूपस्वविषयनिरूप्यतया विषयी धर्म इत्येवमुपकारस्य विषयिधर्मत्वविवक्षायामित्यर्थः।

अनुपलब्धिसमाप्रभेद इति। उपकारः स्वात्मन्यपि ताद्रूप्येण वर्तते वा, न वा? वर्तते चेत्? नोपकारः स्यात्, किं तूपकार एव स्यात् उपकारविषयस्योपकार्यत्वेनाभिमतत्वात्। अथ न वर्तते, तदा स्वात्मनि स्वरूपेणावृत्तेर्नासावुपकार इति कथं तेन कार्यकारणभावनियमः। तस्माद् भूयोऽपि कार्यकारणभावनियमार्थमुपकारान्तरं वाच्यम्। तत्राप्येवमित्यनवस्था। तदेवमुपकारस्य विषयिधर्मस्य स्वविषयाविषयत्वखण्डनोपक्रमानुपलब्धिसमैव स्यादित्यर्थः।

उपरञ्जकधर्मापेक्षया त्विति। उपकार उपकार्यस्य कार्यस्योपरञ्जको विशेषकोऽयं धर्म इत्येवमुपकारस्योपरञ्जकधर्मत्वविवक्षायामित्यर्थः।

नित्यसमाविशेष इति। उपकारस्योपकार्याकारतामन्तरेण नोपकार्यं कार्यं प्रत्युपरञ्जकत्वं स्यात्, न ह्यन्याकारो घटोऽन्यस्य पटस्योपरञ्जकः। तस्मादुपकारस्याप्युपकार्याकारत्वं वाच्यम्। तच्च स्वभावतो वा स्यात्, उपकारान्तरयोगाद् वा? नाद्यः, घटादेरप्युपकार्यस्योपरञ्जकोपकारमन्तरेणैवोपकार्यत्वव्यावस्था स्यात्। न द्वितीयः, उपरञ्जकोपकारेऽपि उपरञ्जकोपकारान्तरप्राप्त्या अनवस्थाप्रसङ्गादित्येवं विवक्षितधर्मस्योपकारस्य तदतद्रूपविकल्पानुपपत्त्या धर्मिणस्तद्विशिष्टत्वखण्डनरूपा नित्यसमैवेत्यर्थः।

बुद्धिमच्छब्दस्येति। बुद्धिमद्विशेषे साध्ये विवक्षिते बुद्धिमन्मात्रसिद्धिद्वारेण सिद्धसाध्यतापादनं वाक्छलमेव।

इष्टापादनरूपत्वादिति। विश्वस्यैव कश्चिद् विशेषः स्यादिति इष्टमेव तदापादनरूपत्वात्।

तद्वत्तामात्रेणेति। साध्यत्ववैशिष्ट्यरहितेनाग्निमत्तामात्रेण महानसादेः समुच्चयाभ्युपगमेऽपि।

तस्येति। महानसादेः। अग्निमत्त्वमात्रं महानसादावपीष्टं वादिनः। प्रतिवादी तु महानसादावपि साध्यत्वविशिष्टमग्निमत्त्वमारोप्य खण्डयन् छलवादी स्यादिति भावः।

तत्सिद्धेरिति। न्यूनसंख्याव्यवच्छेदसिद्धेः।

ननु यथाधिकलक्षणत एव न्यूनसंख्याव्यवच्छेदसिद्धिः, तथा न्यूनलक्षणत एवाधिकसंख्याव्यवच्छेदोऽपि सेत्स्यति। अतोऽधिकसंख्याव्यवच्छेदार्थत्वस्याप्यभावात् विभागोऽनर्थक एवेत्यत आह—**अधिकसंख्यासंभवे तु वस्तूनामिति**।

तद्व्यवच्छेद एवेति । न्यूनसंख्याव्यवच्छेद्य एव ।

॥ इति कथाभासरूपषट्पक्षीप्रकरणं संपूर्णम् ॥

तद्वद् यस्य सरस्वती स वहतेऽन्तर्भिन्दती पञ्चम-

न्यायाध्यायभवादिमाह्निकमहीपीठं यथार्थोच्चयः ।

गूढोऽपि प्रकटीबभूव सुचिरादस्माद्दशामच्छिदद्-

धीदौःस्थ्यं च कुलेऽपि लक्ष्मि[811b]तिलकोपाध्यायमेनं स्तुमः ॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां पञ्चमाध्यायस्याद्यमाह्निकं संपूर्णम् ॥

॥ पञ्चमाध्याये द्वितीयाह्निकम् ॥

॥ प्रतिज्ञाहेत्वाश्रितनिग्रहस्थानपञ्चकप्रकरणम् ॥

[५.२.१–६]

टीयाम् ॥ विप्रत्तिपत्तीत्यादि **भाष्यं** पूरणेन व्याचष्टे—**विप्रतिपत्तीति** ।

उने ॥ **तदर्थमिति** । विभागावतारार्थम् ।

वस्तुशब्दः स्वरूपवचनश्चेदिति । ननु पराजयो निग्रहोऽपराध इत्यनर्थान्तरम् । तत्र यदि निग्रहस्थानानि पराजयवस्तूनि, तर्हि अपराधाधिकरणानीति **भाष्यं** विरुध्यते । न ह्यपराधोऽपराधाधिकरणमिति घटते भेदाधिष्ठानत्वादाधाराधेयभावस्येति शङ्कार्थः ।

प्रकृतवस्त्विति । प्रतिज्ञादि ।

प्रतियोगीति । अन्यवादी ।

अपकर्षलिङ्गमिति । प्रतिपत्तेरपकर्षस्य ज्ञापकम् ।

एवमिति । प्रतिपत्त्यपकर्षलिङ्गस्य निग्रहस्थानत्वे ।

विरोधमुद्भावयितुं **सूत्रं** पठति—**विप्रतिपत्तिरिति** ।

तत्रापीति । **सूत्रे**ऽपि ।

लिङ्गस्य विषयाभ्यामिति । प्रतिज्ञाहान्यादिना ज्ञापकेन ज्ञेयाभ्यामित्यर्थः ।

अन्यथेति । विप्रतिपत्त्यप्रतिपत्त्योरेव निग्रहस्थानत्वे ।

प्रतिज्ञाहान्यादिसामानाधिकरण्यानुपपत्तेरिति । प्रतिज्ञाहान्यादीनां विप्रतिपत्त्यप्रतिपत्तिज्ञापकत्वेन विप्रतिपत्त्यप्रतिपत्तिरूपत्वाभावात् तैः सह सामानाधिकरण्यानुपपत्तेः । एतेन **सूत्रे** लक्षणायाः कारणं मुख्यार्थबाध उक्तः ।

टीयाम् ॥ **द्वयोरिति** । वादिप्रतिवादिनोरसाधनाङ्गवचनमदोषोद्भावनं च यथाक्रमं निग्रहस्थानम् ।

उने ।। **प्रतिज्ञाहान्यप्रतिभादीनामसंग्रहादिति** । स्वीकृतोक्तत्यागादिरूपत्वेन, न हि प्रतिज्ञाहान्यादिरसाधनाङ्गस्य वचनमुत्तराप्रतिपत्त्यादिरूपत्वेन, न चाप्रतिभादिरदोषस्योद्भावनं येनैषां संग्रहः स्यादित्यर्थः ।

तेनानिच्छाहेतोरयुक्तत्वस्यासिद्धेरिति[1] । तेनाग्रे निग्रहस्थानत्वव्युत्पादनेन हेतुना यस्मादप्रतिभादीनां निग्रहस्थानत्वेनानिच्छानिष्टिरनभ्युपगमः स्यात् तस्यायुक्तत्वासिद्धेः ।

तत्संग्रहायेति । अप्रतिभादीनां संग्रहाय ।

शास्त्रन्यूनत्वमापद्येतेति । परेषाम् ।

साधनाङ्गवचनाभाव इति । अनेन प्रतिज्ञाहान्यादिः संगृह्यते ।

दोषोद्भावनाभाव इति । एतेनाप्रतिभादि संगृह्यते ।

वाके ।। **न्यूनतावयवेति** । त्रैरूप्यसंपन्नो हेतुः पूर्णः । स त्रिषु रूपेषु अन्यतमेन रूपेण रहितो न्यूनोऽसिद्धो वा विरुद्धो वानैकान्तिको वा भवतीति सोऽयं न्यूनतादोषो हेतोरवयवदोषश्च प्रतिज्ञादोषः स्ववचनविरोधादिर्हेतुदोषोऽसिद्धत्वादिरेव उदाहरणदोषः साध्यविकलत्वादिः । उत्तरदोषो जातिः प्राप्त्यप्राप्तिसमादिः । तस्याक्षेप उपादानं स्वीकार इति यावत् । भावोऽप्रतिभादिः । स हि वादिनः प्रतिवादिनो वाभिप्रायः । तस्योद्भावनानि दूषणानीति व्याख्यानं **टीकाकृता** अवयवलक्षणे कृतमित्यतोऽत्र न कृतम् ।

टीयाम् ।। **तदाधारत्वादिति** । कर्त्राधारत्वात् ।

तथेति । दुष्टत्वेन ।

तद्द्वारेणेति । वाक्यद्वारेण ।

उने ।। ननु कथा वाक्यरूपा अवाक्यरूपा च भविष्यति, अतो वाक्यद्वारेणैव[812a] पुरुषो निगृह्यते इति नियमो न भविष्यत्यत आह—**न हि वचनावचनात्मकः समुदायो नामेति** । छायातपयोरिव वचनावचनयोर्मिथो विरुद्धत्वात् ।

यद्येवम् , अवचनरूपेष्वप्रतिभादिषु वाक्यद्वारेण पुरुषनिग्रहासंभवात् निग्रहस्थानत्वं न प्राप्नुयात् । अत आह—**तस्मादिति** ।

---

1 J सिद्धि°

व्रीडानभिधाने इति । लज्जया बहिरनुच्चारणे सति ।

न प्रतिभातीति । किमप्युत्तरं न स्फुरतीत्येवंरूपो योऽन्तर्जल्पो हृदये जल्पः, तत्सरूपं यद् वाक्यं तस्य धर्मा एव ।

छलजातिनिग्रहस्थानेति । यथा अनित्यत्वादिकं वस्तु अवचनरूपमपि विचारणीयतया कथाविषयः, तथा छलजातिनिग्रहस्थानान्यप्यवचनरूपाण्यपीदं छलं त्वया प्रयुक्तमित्यादिना प्रकारेण विचारणीयतां प्राप्तानि सन्ति कथाविषयी भवन्तीत्यर्थः ।

चिरं प्रतिसंदधानस्यापीति । एतेन न प्रतिभाति किञ्चिदित्यस्यान्तर्जल्पस्याभावो ज्ञापितः ।

टीयाम् ॥ उभयथापीति । सामान्यविवक्षायां विशेषविवक्षायां चेत्यर्थः ।

उने ॥ अविशेषफलप्रसङ्ग इति । प्रमाणप्रमेयेत्याद्युद्देशसूत्र[1]स्थेन निग्रहस्थानपदेन यावदुक्तं तावतोऽधिकं न किञ्चिदुक्तं स्यादिति भावः ।

टीयाम् ॥ तस्मात् लक्षणं प्रणयतेति । [2]विप्रतिपत्ति[रप्रतिपत्ति]निग्रहस्थानमिति लक्षणं प्रणयता **सूत्रकारे**णावान्तरसामान्यद्वैविध्यविवक्षया सामान्यं लक्षितमिति संबन्धः ।

कुत इत्यत आह — **अन्यथेति** । अवान्तरसामान्यद्वैविध्यविवक्षां विना ।

उने ॥ तस्येति । लक्षणस्य ।

फलत इति शेष इति । अवान्तरसामान्यभेदद्वयं दर्शयता तात्पर्यतो निग्रहस्थानसामान्यलक्षणं दर्शितमिति भावः ।

ननु विक्षेपादावप्रतिपत्तिरेव स्यात्, तत् कथमत्र विप्रतिपत्तिरत आह — **यदापि विक्षिप्तेति** ।

तथा चैवमिति निपातसमुदायः समुच्चयार्थः ।

प्रतिज्ञाहान्यादौ हि विप्रतिपत्तिः स्यात् । कथमत्राप्रतिपत्तिरत आह — **भ्राम्यन्नपि हीति** ।

---

1 I. i. 1 2 I. ii. 19

वचनायेति । त एव दोषाः, ये वक्तुरुद्भावयितुर्वचनायामुकेन दोषेण निगृहीतोऽसीत्येवंरूपायोद्भावनाय भवन्तीत्यर्थः ।

अत इति । अप्रतिभादीनां संग्रहात् ।

टीयाम् ॥ आक्षिप्तं प्रतिज्ञाद्याश्रयत्वं समर्थयता वचनदोषद्वारेणेत्येव वक्तव्यं कस्मात् क्रियेत्युक्तम् ? अत आह— **क्रियादोषाभिधानमिति ।**

सम्यक्साधने इति । विषयसप्तमीयम् ।

उने ॥ एतदिति । परस्परानपेक्षत्वसूचनम् ।

असमासप्रसक्तिरिति ! साधर्म्यवैधर्म्योत्कर्षेत्यादौ जातिविभाग**सूत्रे ।**

परस्परानपेक्षत्वसूचनायेति । स्वकार्ये मिथो निरपेक्षत्वकथनार्थम् ।

वाके ॥ उदाहरणभेददर्शनार्थमिति । आन्तर्गणिकभेदस्य उदाहरणरूपो यो भेदो द्वाविंशतिसंख्यावच्छिन्नः, तद्दर्शनार्थम् ।

टीयाम् ॥ यद्यप्याहेति । संबन्धः ।

नन्वसिद्धता हेतुदोषः । स कथं साध्यविकलत्वाद् व्यतिरेकी दृष्टान्तस्य भवेत् ? इत्यत आह— **साध्यविकलतेत्यर्थ** इति ।

यथा हेतुत्वेनासिद्धेरनैकान्तिको हेतुरसिद्धोऽभिधीयते, तथा दृष्टान्तोऽपि साध्यविकलो दृष्टान्तत्वेनासिद्धेरसिद्धव्यपदेशं लभते इति हेतुदोषेण वेति **वार्त्तिकस्य** व्याख्या— **विरुद्धत्वेनेति ।**

विरुद्धत्वमेव कुत इत्याह—[8.12b] **घटादीनामिति ।**

असाविति । उपचारः ।

दृष्टश्चासावन्ते निगमने व्यवस्थित इति दृष्टान्त इति । अर्थकथनमात्रमिदम् । प्रथमपक्षे दृष्टत्वात् दृष्टोऽन्ते निगमने व्यवस्थितत्वात् अन्तः । दृष्टश्चासावन्तश्च दृष्टान्त इति तु समासः ।

उने ॥ स्वीकृतोक्तः त्यागः प्रतिज्ञाहानिरिति । स्वीकृतत्याग इत्येतावदुच्य-

मानेऽपसिद्धान्तस्यापि प्रतिज्ञाहानित्वं स्यात् । अत उक्तम्—**उक्तेति** ।

एवं चेति । एवंविधे लक्षणे च सति लक्षणपरतया लक्षणपदविवरणपरतया **भाष्य**व्याख्यानं दूषितं **वार्त्तिककृता** न तूपलक्षणतयापि लक्षणोपलक्षकपदविवरणपरतयापि ।

ननु किमनेनोपलक्ष्यते, येनेदं लक्षणोपलक्षकपदविवरणपरं स्यादत आह—**उपलक्ष्यते हीति** । उपलक्ष्यते ह्यनेन **भाष्य**व्याख्यानेनोक्तसंप्रतिपत्तिरुक्तस्वीकारः ।

भाष्यदिशा दृष्टान्तस्योक्तस्वीकृतरूपत्वाद् दृष्टान्तशब्द उक्तस्वीकृतमुपलक्षयति । तेन यत्रोक्तस्वीकृतस्य साध्यधर्मसाधनधर्मादेस्त्यागः, सा प्रतिज्ञाहानिरिति सिद्धम् ।

यद्येवं तर्हि **वार्त्तिक**व्याख्यानमसंगतमव्यापकत्वात् । अत आह—**वार्त्तिकव्याख्यानमपीति** । **वार्त्तिके** व्याख्यानमस्य निग्रहस्थानस्य व्युत्पादनम् ।

लक्ष्यपदस्य प्रतिज्ञाहानेरिति । अस्य निरुक्तिमात्रानुरोधेन न तु हेतुहान्यादेर्व्यवच्छेदपरम् । अतो नाव्यापकतादोषावकाश इत्यर्थः ।

तेनापीति । **वार्त्तिक**व्याख्यानेनापि व्युत्पाद्य निर्देशो निर्वाह्यनिर्देश उपलक्ष्यते । **वार्त्तिक**दिशा दृष्टान्तः पक्षः । स च निर्वाह्यनिर्देश इति अन्यमपि निर्वाह्यनिर्देशमुपलक्षयति । विवादे हि यद् यथा निर्दिश्यते तत् तथा निर्वाह्यते । तेन यो यथा साध्यत्वादिना निर्दिष्टस्तस्य तथा निर्वाहमपश्यतस्तत्परित्यागः प्रतिज्ञाहानिरिति **सूत्रार्थः** ।

अन्यथेति । प्रतिज्ञामात्रत्यागस्य प्रतिज्ञाहानित्वाभ्युपगमे ।

हेतुहान्यादीनामिति । अनित्यः शब्दः प्रमेयत्वादित्युक्ते, अनेकान्तेन च दूषिते अस्तु तर्हि कृतकत्वादिति साधनधर्महानिः । अनित्ये वाङ्मनसे कार्यत्वादित्युक्ते भागसिद्ध्या च प्रत्युक्ते अस्तु तर्हि वागेव । तस्मादनित्येति पक्षहानिरित्यादि ।

टीयाम् ॥ यद्यप्यत्र शाब्द्यावृत्त्या अनैकान्तिकत्वेन प्रत्यवस्थित इत्येतत् क्वापि न दृश्यते तथाप्यार्थ्या वृत्त्या दृश्यते । अत आह—**अत्र चानैकान्तिकत्वेनेति** ।

उने ॥ **असिद्ध्या च प्रत्युक्त** इति । शब्दस्य कार्यत्वमसिद्धमिति प्रतिवादिना प्रत्युक्ते प्रकारानेवाह—**लक्षणेनेति** ।

टीयाम् ॥ **यदप्युच्यते** इति । **बौद्धैः** ।

सर्वं नित्यमिति । सांख्यीयराद्धान्तावलम्बनेनापि प्रवृत्तिसंभवादिति संबन्धः ।

उने ।। अनतिप्रसङ्गमाह—**अनैकान्तिकोद्धारायेति** । अनैकान्तिकत्वोद्धारायेत्यनेन हि यतोऽनैकान्तिकोद्धारस्तदभ्यनुजानता यत् तद्वादो निरस्तः तथा च यथात्र प्रतिज्ञात्यागं वदति वादी, तथा यत्किञ्चित् कस्मात् न वदतीत्येवंरूपोऽतिप्रसङ्गो निवारितः ।

वार्त्तिकोदाहरणानुरोधेनेति । भवतु शब्दोऽपि नित्य इत्युदाहरणं समर्थयितुमेष प्रयास उक्तिसंभवानतिप्रसङ्गप्रतिपादनरूपः **टीकाकृतः** ।

उने ।। **प्रतिज्ञैकदेशार्थ** इति । प्रतिज्ञैकदेशलक्षणोऽर्थः ।

[813a] **तेन पक्षतद्विशेषणेनेति** । पक्षप्रक्षेपेण यथा, नित्या वर्णाः श्रावणत्वात् शब्दत्ववदित्युक्ते ध्वनिभिरनेकान्त इति च प्रत्युक्ते सध्वनय एव वर्णा नित्या इति । पक्षविशेषणप्रक्षेपेण यथा, शब्दोऽनित्यः कार्यत्वादित्युक्ते ध्वनिरूपे भागे सिद्धसाधनमिति च प्रत्युक्ते वर्णात्मकः शब्दोऽनित्य इति । साध्यप्रक्षेपेण यथा, अग्निमदिदं सुरभिमलिनधूमवत्त्वादित्युक्तेऽसमर्थविशेषणतया प्रत्युक्ते साग्निकृष्णागुरुदारुमदिदमिति । साध्यविशेषणप्रक्षेपेण यथा, विवादाध्यासितं बुद्धिमत्पूर्वकमित्युक्ते कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनापादनमित्येवं सिद्धसाध्यतया च प्रयुक्ताभासे उपादानाद्यभिज्ञपूर्वकमिति । तथोदाहरणस्यांशौ साध्यधर्मः साधनधर्मश्च । तत्र साधनधर्मस्य हेत्वन्तरनिग्रहस्थानेनोपसंग्रहादुदाहरणस्यैकदेशोऽत्र साध्यधर्मः । तत्प्रक्षेपेण यथा, साग्निकृष्णागुरुदारुमदिदं सुरभिमलिन धूमवत्त्वात् । यत् सुरभिमलिनधूमवत् तदग्निमत्, यथा प्रसिद्धः प्रदेश इत्युक्ते साध्याङ्गन्यूनतया चोदाहरणे प्रत्युक्ते कृष्णागुरुदारुमत्त्वे सत्यग्निमान् प्रसिद्धः प्रदेश इत्युच्यते इति । उदाहरणैकदेशविशेषणप्रक्षेपेण यथा, विवादाध्यासितमुपादानाद्यभिज्ञकर्तृकं कार्यत्वात् । यत् कार्यं तत् सकर्तृकं यथा घट इत्युक्ते साध्यविशेषणन्यूनतयोदाहरणे प्रत्युक्ते उपादानाद्यभिज्ञेन सकर्तृको घट इत्युच्यते इति ।। निगमनप्रक्षेपेण यथा, यथावत् चतुर्ष्ववयवेषु प्रयुक्तेषु तस्मादग्निमदिति निगमने कृते न्यूनतया प्रत्युक्ते च, तस्मात् साग्निकृष्णागुरुदारुमदिति । निगमनविशेषणप्रक्षेपेण यथा, यथावत् चतुर्ष्ववयवेषु प्रयुक्तेषु तस्माद् बुद्धिमत्कर्तृकमिति निगमने कृते विशेषणन्यूनतया प्रत्युक्ते च तस्मादुपादानाद्यभिज्ञकर्तृकमिति ।

टीयाम् ।। अन्यमपि प्रति कस्मात् न भवतीत्यत आह—**तस्य हीति** । यस्मात्

मीमांसकस्य सर्वगतत्वाभ्युपगमेन शब्दस्यासर्वगतत्वमसिद्धम्, अतस्तं प्रत्येव साधयितुं निर्दिश्यते इत्यर्थः ।

इदं हीति । एवं शब्दोऽप्यसर्वगतोऽनित्य इत्येतत् ।

कृतकत्वादितिवदिति । कृतकत्वादित्यस्येव ।

अस्येति । शब्दोऽप्यसर्वगतोऽनित्य इत्यस्य ।

ननु परोक्तानैकान्तिकत्वदोषपरिजिहीर्षया यदि **मीमांसकं** प्रत्यसिद्धं सर्वगतत्वं प्रसाध्य हेतुं विशिनष्टि, तदा कथं निगृह्यते ? न हि कृतकत्वस्यासिद्धत्वे उद्भाविते कृतकः शब्द इति साधयन् प्रतिज्ञान्तरेण निगृह्यते प्रकृतौपयिकत्ववचनादत आह—**यद्यप्यस्येति** ।

यद्यसर्वगतः शब्द इति प्रतिज्ञाय हेतुना साधयेत्, साधयित्वा च हेतुं विशिष्यात्, को नाम हेत्वन्तरेण निग्रहार्हं सन्तं तं तदा प्रतिज्ञान्तरेण निगृह्णीयात् ? न चानेन तथा चेष्टितम् । केवलं प्रतिज्ञान्तरं कृत्वा तूष्णीं बभूव । तदिदमाह—**तथाप्येतदनेन न कृतमिति** ।

नन्वेवमप्यस्याज्ञानं नास्ति, जानन्नप्यसौ हेतुदोषपरिहारोपायं वचनं तु न तथोक्तवान् । अत आह—**परार्थे चेति** । पराभिप्रायस्य वचनानुमेयत्वात् यथावचनमनुमीयते । अतः कथमन्यादृशे[313b]वचने अन्यादृगेव ज्ञानं कल्प्यते इत्यर्थः ।

हेतुरहितेति । यद्यसर्वगतः शब्द इति प्रतिज्ञानन्तरं हेतुमभिदधीत, ततो हेतुदूषणपरिहारोपयोगि विशेषणसाधनात् न निगृह्यते । अनेन च हेतुरहिता प्रतिज्ञैव कृतेत्यर्थः ।

अनित्यः शब्द इत्यादि प्रतिज्ञान्तरमित्येवमन्तं **वार्त्तिक**मनन्वितमाशङ्क्य व्याचष्टे—अनित्य इत्यादिना अनुषज्यत इत्यन्तेन ।

तस्येति । अविशिष्टसाधनस्य ।

तदिति । सामर्थ्यम् ।

पञ्चावयवसाध्ये चेति । प्रतिज्ञातेऽर्थे सामर्थ्यापरोपणादिति प्रतिज्ञायाः ।

ननु साधनसामर्थ्यापरिज्ञानादिति **वार्त्तिक**स्य प्रतिज्ञा । यत्रार्थे समर्था तदपरिज्ञानादित्यर्थः प्रतीयमानत्वादस्तु, पञ्चावयवसाध्ये च सामर्थ्यारोपणादित्यर्थस्तु कथम् ? अत

आह—**अपरिज्ञानादिति हीति** ।

उने ॥ निग्रहस्थानान्तरसंकरमाशङ्क्य निराकरोति—**न च प्रतिज्ञामात्रमिति** ।

अभिहितहेत्वादिसंबन्धेनैवेति । अनित्यः शब्द ऐन्द्रियकत्वाद् घट-वदित्येवमभिहितं यद्धेत्वादि तत्संबन्धेनैव ।

तस्येति । न्यूननिग्रहस्थानस्य ।

प्रकृतसंगततयेति । अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदित्यादिप्रकृतं तत्संगततया ।

तदिति । पञ्चावयवं वाक्यान्तरम् ।

तस्यैवेति । पूर्वोपक्रान्तस्यैवावशिष्टस्य हेतोः ।

टीयाम् ॥ **तदभ्युपगमस्येति** । तत्प्रतिज्ञान्तरम् ।

असत्प्रलाप इति । निग्रहस्थानम् ।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध[1] इति । अत्र प्रतिज्ञाहेत्वोरिति पञ्चावयववाक्यगतविरोधिद्वयमात्रोपलक्षणपरं विरोधस्योभयमात्रनिष्ठत्वात् । लक्ष्यगतप्रतिज्ञापद-मप्युक्तमात्रोपलक्षणपरम् । एकपदोत्कीर्तनेन च एकपदांशविरोधसूचनया अवयवान्तराणा-मेवोपलक्षणमिति भ्रमं निवारयता । ये प्रतिज्ञायां पदयोर्विरोधं न मन्यन्ते प्रतिज्ञाहेत्वोर्वाक्य-योर्विरोधप्रतिपादनेनोपलक्षणपक्षेऽप्यवयवान्तरविरोधोपलक्षणेन तदंशविरोधस्याप्रतिपादनादिति **सूत्रकारा**भिप्रायं वर्णयन्तः, तन्मतमपास्तम् ।

यद्यवयवान्तरोपलक्षणमेवाभिमतं भवेत् **सूत्रकारस्य**, तदा प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाहेतुविरोध इति रचयेदेवं वक्तव्ये प्रतिज्ञाविरोध इति यदुक्तं तेन बोधयति प्रतिज्ञायां पदयोर्विरोधोऽपि संगृह्यत इति । तेनैकस्मिन् वाक्ये तदंशयोरवान्तरवाक्ययोः पदयोर्वा मिथो व्याघात उक्तविरोध इति **सूत्रार्थः** ।

तमिमं **टीकासंक्षेपा**र्थत्वेन आह **उदयनः एकवक्तृकेति** ।

टीयाम् ॥ **वाक्यगतानामिति** । वाक्येभ्यः प्रतीयमानानामित्यर्थः ।

---

1 V. ii. 4

न चैवं भाण्डालेख्यन्याय इति । यथा भाण्डस्यालेख्यमबुद्धिपूर्वकं भवति, तथा नेदमुपलक्षणमबुद्धिपूर्वकमित्यर्थः ।

स इति । भाण्डालेख्यन्यायः । व्यापकं वेदमनवयवेनेति प्रतिज्ञाहेतुपदेन एकवाक्यगतप्रतियोगिद्वयोपलक्षणं प्रतिज्ञापदेनैकवाक्यगतोक्तमात्रोपलक्षणं च सामस्त्येन व्यापकं सर्वेषामपि स्वस्वोपलक्षणीयानां तथाभावात् ।

उने ॥ **वक्ष्यमाणवार्त्तिके**ति । प्रमाणविरोधश्चेत्यादिना वक्ष्यमाणानि यानि **वार्त्तिको**दाहरणानि, तेषां यो विस्तरः, [814a] [1]तदनुरोधमात्रेण न तु प्रमाणविरोध[ः] प्रतिज्ञाविरोधत्वेनाभिमतः तस्य बाधितविषयत्वरूपहेत्वाभासेऽपसिद्धान्ते वान्तर्भूतत्वादित्यर्थः ।

ननु यत्प्रमाणविरोधोदाहरणमपसिद्धान्तोदाहरणत्वेनोच्यते, तद्विरोधोदाहरणमेव भविष्यति अपसिद्धान्तविरोधयोरभेदात् । अत आह—**अपसिद्धान्तस्त्वि**ति ।

विरोधादिति । प्रतिज्ञाविरोधात् ।

तत्रैवेति । अपसिद्धान्त एव ।

टीयाम् ॥ ननु हेतुश्च प्रतिज्ञया विरुध्यते इत्यभिधायास्मिन्नुदाहरणे प्रतिज्ञाया बलवत्त्वं स्वीकृतं **वार्त्तिककृता** । बलीयसी च प्रतिज्ञा हेतुं बाधते । बाधितश्च हेतुरसिद्ध एव भवति । तत्र यदि पश्चात्तनी हेतोरसिद्धिर्न निग्रहाद् भवति, व्यर्थं तर्हि हेत्वसिद्धिफलस्य प्रतिज्ञाबलवत्त्वस्यानुसरणमित्यत आह—**प्रतिज्ञाहेत्वोरि**ति । प्रतिज्ञाहेत्वोर्व्याहतार्थत्वेनैव निग्रहे सिद्धेऽस्तदभावेन वस्तुकथनमेतदित्यर्थः ।

ससाधनाङ्गस्य प्रतिज्ञाया इति । **बौद्धा** हि न साधनाङ्गं प्रतिज्ञेत्याहुः ।

तद्विरोधोद्भावनेनेति । प्रतिज्ञाविरोधोद्भावनेन ।

निष्पादितक्रिये इति । निष्पादिता क्रिया दूषणलक्षणा यस्य तस्मिन् व्याप्त्यनुस्मरणमिति ।

सर्वं पृथगिति [2]साधनस्य समूहे भावशब्दप्रयोगादिति साधनस्य च या व्याप्तिस्तदनुस्मरणम् ।

असति हेताविति । सर्वनास्तित्ववादित्वाद्धेतोरभावे इत्यर्थः ।

---

1 Page torn 2 S साध्यस्य

दृष्टान्तस्येति । कर्तरि षष्ठी । दृष्टान्तकर्तृकेणेत्यर्थः ।

उपनयेन विरोधं दृष्टान्तादिभिरित्यादिपदोपात्तं दर्शयति—**एवमिति** । प्रमाण-विरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्य इति प्रत्यक्षादिविरोधश्च प्रतिज्ञाहेत्वोर्विरोधो यथा शीतोऽग्नि-रित्यादि ।

इहापीति । विरोधेऽपि ।

दर्शितं चानन्तरमेवेति । सोऽयं प्रतिज्ञाहेतुपदयोर्व्याप्तीत्यादिना ।

स्वकीयशब्दत्वनिराकरणविरुद्धमिति । **प्रभाकरो** हि शब्दत्वं सामान्यं नेच्छति ।

परपक्षसिद्धगोत्वाद्यपीति । एतेन **वार्त्तिको**क्तस्योदाहरणस्यासुलभ-प्रयोगत्वं दर्शितम् ।

हेत्वाभासेनैव दृष्टान्ताभासस्योपसंग्रहात् न [1]पृथगुक्त इत्यत आह—**अवयवा-न्तरं हीति** ।

ननु मा भूद्धेत्वाभासपदं दृष्टान्ताभासस्याभिधायकमुपलक्षणं भविष्यति हेत्वाभास-स्योदाहरणाभासपूर्वकत्वात् । तथा हि न तावदुदाहरणं वचनात्मकं स्वरूपेणाभासी भवति । तस्य तादवस्थ्यात् किं [2]त्वर्थस्य दृष्टान्तस्याभासत्वादुदाहरणाभास इति व्यवह्रियते । तस्य च साध्यसाधनोभयविकलत्वादिनाभासत्वे हेतुर्व्याप्तिशून्यतया आभासीभवतीति युक्तं हेत्वा-भासैर्दृष्टान्ताभासैर्दृष्टान्ताभासा उपलक्ष्यन्ते इत्यत आह—**पारम्पर्येणेति** । एवं सति हेत्वाभासोपादानेनैव प्रतिज्ञादिविरोधस्योपलक्षितत्वात् भेदेनोपादानं न कर्तव्यं सर्वस्य हेतु-दूषकत्वात् । न हि प्रतिज्ञादिविरोधेनानन्वये वाक्यार्थश्चतूरूपोपपन्नः पञ्चरूपोपपन्नो वा हेतुः प्रतीयते इत्यर्थः ।

हेत्वाभासा इत्यत्रेति । हेत्वाभासाश्च यथोक्ता इत्यत्र **सूत्रे**[3] ।

ननु हेतुशब्दस्य दृष्टान्तोपलक्षकत्वे दृष्टान्ताभासानामेव निग्रहस्थानत्वं स्यात् न हेत्वाभासानाम्, अत आह—**स्वार्थमिति** ।

उपलक्षणे हेतुरुक्त इति । हेत्वाभासा इत्यत्र **सूत्रे** यदुपलक्षणं तत्र विषये **वार्त्तिककृता**त्र[814b] हेतुरुक्तो न तु हेत्वाभाससंग्रहे इत्यर्थः ।

---

1 S गुक्त इत्युक्त आह   2 J किं त्वस्य   3 V. ii. 25

हेतुमेवाह— **हेत्वाभासपूर्वकत्वादिति ।**

ननु न हेत्वाभासपूर्वकत्वं दृष्टान्ताभासानाम् । न हि प्रमेयत्वस्थानैकान्तिकत्वेन हेत्वाभासत्वे घटादिदृष्टान्ताभासो भवति साध्यसाधनोभयविकलत्वादेरभावात् । दृष्टान्ताभासत्वेन तु हेत्वाभासता भवत्येवेत्युक्तमेव । अतः कथं विपरीतमुच्यते **वार्त्तिककृता** इति ? अत आह— **हेत्वाभासप्रधानत्वादिति ।** हेत्वाभासप्रधानत्वे युक्तिमात्रं दृष्टान्ताभासेनेति ।

ननूक्तमदृष्टान्ताभासवत् प्रतिज्ञादिदोषोऽपि पृथग् न वाच्यो हेत्वाभासपदेनोपलक्षितत्वादित्यत आह— **न चैतावतेति ।**

भवतु वोपलक्षणं तथापि पृथक्प्रतिज्ञादिविरोधव्युत्पादनं न दोषमावहति शिष्यहितत्वात् **सूत्रकार**स्येत्याह— **न च सूत्रकारस्येति ।**

उने ॥ उक्तार्थापनयनमुक्तसंन्यास इति सूत्रार्थ इति । एतेनात्रापि प्रतिज्ञापदमुक्तमात्रोपलक्षणपरम्, तथा पक्षशब्दोऽपीति दर्शितम् । न च स्वस्थोऽकस्मादेवोक्तमपलपतीत्यत उक्तं पक्षप्रतिषेधे परेण कृते सति तेन च तत्परिहार्थमिति तात्पर्यम् ।

दीयाम् ॥ अपि च भवतैवोक्तं किमिदानीं हेत्वाभासोत्तरकालभाविप्रतिज्ञासंन्यासापेक्षणेन तस्य प्रतिवादि[नोद्भावितत्वात्] । अतः पूर्वोक्तमननुसन्धायैव कथं हेत्वाभासत्वोद्भावनोत्तरकालभावी तूष्णींभावो नाम निग्रहस्थानत्वेनाशङ्क्यते प्रतिज्ञासंन्यासस्य च पूर्वभावित्वमुक्तमेवास्माभिरित्यभिप्रायेणाह— **न चैत** इति ।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरं विशिष्यते— **अनेनेति ।** विशेषो विशेषणमुच्यते । नास्ति विशेषो यस्यासावविशेषः । स चासावुक्तश्च तस्मिन् । अत्र हेतुपदेन वाक्ये साधकभागमुपलक्षयति । अन्यथोदाहरणोपनययोः साधकभागप्रतिषेधे पश्चात् तद्विशेषवचनं हेत्वन्तरमभिमतं न संगृह्येत । ततश्चाव्याप्तिः स्यात् । तथेच्छाया दुरूहत्वेन कथं तया निग्रह इत्यत इच्छया वचनमुपलक्षयति । तेन प्रथममविशिष्टसाधनभागमभिधाय पुनर्विशेषवत्तद्वचनं हेत्वन्तरमित्यर्थः ।

न च स्वस्थस्यैतदकस्मात् संभवतीत्यत उक्तम्— **प्रतिषिद्ध** इति । तेन प्रतिषेधोद्दिधीर्षयेति तात्पर्यम् ।

तदिदं हेतुविशेषणादुदाहरणप्रयोजकांशविशेषणादुपनयविशेषणात् दूषणविशेषणाच्च [च]तुर्विधम्। तत्र प्रथमं यथा**भाष्यम्**। द्वितीयतृतीये यथा—अनित्यः शब्दः सामान्यविशेषवतोऽस्मदादिबाह्यकरणग्राह्यत्वात्। यदस्मदादिबाह्यकरणग्राह्यं तदनित्यं **दृष्टम्**, यथा घट इत्युक्ते प्रयोजकाङ्गन्यूनतया च प्रत्युक्ते सामान्यवत्त्वे सतीदमुच्यत इति। एवं तथा चायमस्मदादिकरणग्राह्य इत्युपनये न्यूनतया प्रयुक्ते तथैव विशेषणोपादाने उपनयान्तरम्। चतुर्थं तु हेतौ प्रयुक्तेऽसाधकोऽयं सपक्षे सत्त्वादनित्यत्वे प्रमेयत्ववदिति प्रयुक्ते जात्युत्तरतया च परिहृते विपक्षगतत्वे सति सपक्षे सत्त्वादिति यथेत्यादि।

तदिदमाह **उदयनः—अविशिष्टे साधनेति**।

उपनयान्तरदूषणान्तरयोरपीति। [815a]अत्रोदाहरणान्त[र]स्यापीति ज्ञेयम्।

इदमपीति। एकस्वभावसमन्वये सतीति विशेषणम्।

टीयाम्॥ **नर्मदायामिति**। नर्मदानामसु।

॥ इति प्रतिज्ञा[हेतू]पलक्षितोक्तमात्राश्रयनिग्रहस्थानप्रकरणं संपूर्णम्॥

।। अर्थाश्रितनिग्रहस्थानचतुष्कप्रकरणम् ।।

[५.२.७–१०]

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरमिति[1] । ल्यब्लोपे पञ्चमी । प्रकृतमर्थमपेक्ष्येत्यर्थः । प्रतिसंबन्धोऽनुरूपः संबन्धस्तेनाप्रतिसंबद्धोऽर्थोऽस्येति बहुव्रीहावन्यपदार्थतायोग्यं वचनमेव लभ्यते इत्यर्थपदादप्रतिसंबद्धमननुरूपसंबन्धं वचनमिति । एतदुक्तं स्यात् प्रकृतं साधनं दूषणं चोपक्रम्य तदनङ्गाभिधानमर्थान्तरमिति । तमिमं सिद्धमर्थमाह **उदयनः —प्रकृतार्थानुपपत्त्याभिधानमर्थान्तरमिति ।**

अस्येति । अर्थान्तरस्य ।

वादोपादानस्येति । साध्यसिद्धौ प्रकृतायां वादी साधनं ब्रूयादित्यत्र **टीका**यां वादीति शब्दस्यावकाशदानमात्रं फलं वादोपादानस्येति भावः ।

टीयाम् ।। क्रियाकारकसमुदायोऽभिधेयः । स कथमभिधानं स्यादित्यत आह—**विषयेणेति** । एतदुक्तं भवति । क्रियाकारकसमुदायाभिधाय्याख्यातमिति ।

उने ।। **तर्हीति** । यदि क्रियाक्षिप्तत्वात् कर्तृकर्मणी आख्यातेन नाभिधीयते तदा ।

सामान्याक्षेपलब्धयोरिति । सामान्येन जात्या य आक्षेपस्तेन लब्धयोः ।

तदनाक्षेपकस्येति । व्यक्त्याकृत्यनाक्षेपकत्वस्य ।

केवलसंख्येति । आख्यातेन केवलसंख्यामात्रे उच्यमाने संख्यायाश्च संख्येयाविनाभूतत्वात् संख्येयमात्रे आक्षिप्यमाणे च पचति देवदत्तः पच्यते ओदन इत्येवं कथं कर्तृकर्मणोरेवाख्यातेनान्वयनियम इत्यर्थः ।

टीयाम् ।। **कर्तृकर्मणोश्चेति** । इदमाकूतम् । गम्यमानत्वाविशेषेऽपि क्रिया कर्तारमेव प्रथममवगमयति, तदधीनत्वात् कारकान्तरसमवधानस्य । तथा ह्यचेतनानां चेतनायत्तप्रवृत्तित्वात् पारतन्त्र्येण स्वतोऽवान्तरव्यापारशून्यतया कारकत्वसंभवात् न प्रधानक्रिया कर्तार-

---

1 V. ii. 7

मनपेक्ष्य कारकान्तराण्यवगाहते। स्वतन्त्रं तु कर्तारं गृहीत्वा तन्नियोज्यानि तानि स्वोपपत्तये स्वीकरोतीति कर्तुः प्राधान्यमवसीयते। विशेषतश्च कर्तृव्यापाररूपेयं कारकान्तराण्युपेक्ष्य कर्तारमेव तावदादरादुपस्थापयति। तेन प्राप्तस्य प्राधान्यावगतकर्त्रतिक्रमकारणविरहात् संख्याकारकान्तराणि सुबभिहितसंख्यानिराकाङ्क्षाण्यवधीर्य कर्तारमेवोपसर्पति।

तदुक्तम्—**अभ्यर्हितत्वेनेति**। न चैवं पच्यते ओदन इत्यत्रापि तिङभिहिता संख्या कर्तृगामिन्येव प्राप्नोतीति वाच्यम्। विवक्षाभेदशब्दसामर्थ्याभ्यामभिधानपक्षवत् कर्मगामित्वोपपत्तेः। यैः किल तिङा कर्तृकर्मणी अभिधीयेते इत्यभ्युपेयते तन्मते यथा पचति देवदत्तः पच्यते ओदन इत्यादिषु तत्तदाख्यातविशेषेषु यथायथं कर्तुः कर्मणश्च प्राधान्यविवक्षया शब्दशक्तेश्च संख्याविशिष्टकर्तृकर्माभिधानव्यवस्थोच्यते, एवं तिङा कर्तृकर्मणी नाभिधीयेते इति पक्षेऽपि संख्याव्यवस्थोपपत्स्यते। अन्यथा अभिधानपक्षेऽपि पचते इतिवत् पच्यते इत्यत्रापि संख्याविशिष्टकर्त्रभिधानं[815b]कस्मात् न भवतीति वक्तुं शक्यम्। कर्मणोऽपि च भाव्यत्वेन भावनान्तर्गततया गम्यमानत्वादभ्यर्हितत्वम्। तथा हि भावना नाम प्रयोज्यस्य घटादेर्भवितुर्भावको व्यापारः। सा च प्रयोजकव्यापाररूपत्वात् प्रयोज्यस्य घटादेर्व्यापारभवनमुपादत्ते। न हि यस्य शशशृङ्गादेर्भवनरूपो व्यापारो नास्ति तस्य भावनोपपद्यते। अतश्च भावनाद्वारेण शब्दोपात्तव्यापारत्वादस्ति शब्दतोऽपि कर्मणः प्राधान्यमिति सर्वं रमणीयम्।

उने ॥ **व्यापारावेशमिति**। व्यापारसंबन्धम्।

फलान्वयानुपपत्तेरिति। प्रधानक्रियानुपपत्तेः।

भावनातुल्ययोगक्षेमत्वाच्चेति। यथैव हि व्यापारो नियमेन व्यापारिणं कर्त्रादिकमाक्षिपति, एवं संख्यापि उक्तयुक्त्या कर्त्राद्येवाक्षिपति।

तन्नियमादिति। भावनानियमात्।

टीयाम् ॥ **अभिधीयते इत्यभिधानमिति**। अभिधेय इत्यर्थः। ततः कालश्चासावभिधानं चेति समासः।

उने ॥ ननु रूपशब्दप्रतिपाद्यार्थो वक्ष्यते, ततो यदि नामार्थादाख्यातार्थाद् वा निपातानां प्रतिपाद्यं न भिद्यते तर्हि प्रयोगो न प्राप्नोति। न ह्यभिन्नार्थाः शब्दाः सहप्रयोगमर्हन्ति,

वृद्धव्यवहारे तथा अदर्शनात् । नापि निरर्थकानां प्रयोग उपपद्यते, अर्थगत्यर्थत्वात् शब्दप्रयोगस्येति विकल्पादिरूपोऽर्थोऽभ्युपगन्तव्यः । अतः कथमुच्यते अभिद्यमानरूपा निपाता इति[1] ? अत आह—**अभिद्यमानानीति ।**

टीयाम् ॥ ननु अभिद्यमानरूपा इत्यत्र गुणविशेषवाचिनो रूपशब्दस्यासंभवात् स्वरूपवाची रूपशब्दो ग्राह्यः । तथा च नैवं चवादयः स्वार्थं नामार्थादाख्यातार्थाद् वा भेदेनाभिदधतीत्ययमर्थः कथमित्यत आह— **रूप्यन्ते** इति ।

टीयाम् ॥ [2]वर्णक्रमनिर्देशवदिति किमयं मत्वर्थीयो वतेर्वा प्रयोगः ? तत्र पूर्वस्मिन् कल्पे सर्वं वर्णक्रमनिर्देशवदिति यत् किञ्चिदुच्येत तत् सर्वं निग्रहस्थानमापद्येतेति हस्तसंज्ञादिभिरिदानीमुद्ग्राहणिकाः क्रियेरन् । अथानर्थकवर्णक्रमनिर्देशयुक्तं निरर्थकमित्युच्यते, तदप्यसन्नियमानुपपत्तेः । तथा हि यदेव किञ्चिदसाधनाङ्गवचनं तदेवानर्थकं साध्यसिद्ध्युपयोगिनोऽनभिधानादिति मतुपः प्रयोगपक्षे **कीर्त्तं**दूषणमनभ्युपगमेनैव निरस्तमिति हृदि निधायाह—**वतिरिति ।**

वतिना चावाचकप्रयोगमुपमिनोति **सूत्रकारः** । अत आह **उदयनः—अवाचकप्रयोगो निरर्थकमिति ।**

तथा चैवं प्रकारमवाचकं निरर्थकं निग्रहस्थानमित्युक्तं स्यात् । तद्दर्शयति **टीकाकारः—अत्र चेति ।** परप्रतिपत्त्या प्रयोजनेन हि शब्दाः प्रयोगपदवीमास्कन्दन्ति, वृद्धव्यवहारे शब्दप्रयोगस्य पारार्थ्यावधारणात् । अतः **परे**ण येऽवगतसंबन्धाः शब्दास्त एव परप्रतिपिपादयिषया प्रयोक्तव्याः । तद् यदि वर्णान् अप्रसिद्धसमयानक्षरसमाम्नायवदन्ध्रद्रमिलवद् वा क्रमेणोच्चारयेत्, तदा परप्रतिपत्तिलक्षणादर्थात् निर्गच्छन्तो वर्णा इति निरर्थकं भवति निग्रहस्थानम् । तदुक्तम्—**तन्निरर्थकमिति ।**

निग्रहस्थानत्वमस्य स्फोरयति—**स खल्विति** । [3]आर्थप्रतिपादनोपायात् शब्दविशेषादन्यस्यानुपायभूतस्य प्रतिपत्त्या निगृह्यते[816a] इत्यर्थः ।

ननु समर्थं साधनं तेन विज्ञातं प्रतिपादितं च स्वभाषया, अतः कथं समर्थं साधनं विद्वानपि निगृह्यते ? प्रत्युत प्रतिवाद्येव निगृह्यते यः प्रतिपाद्यमानोऽपि न प्रतिपद्यते । अत

---

1 अत आह—**यथा समुच्चयेति** । प्रतिपादयन्तो निपाताः समुच्चयादिरूपमर्थं न समुच्चयादिनामपदतुल्यं प्रतिपादयतीत्यभिद्यमानरूपा उक्ता इत्यर्थः—इति टीकाग्रन्थप्रान्तटिप्पण्यामधिकम् ।

2 V. ii. 8 3 J °प्रतिवादिना°

आह—**वस्तुत** इति। न समर्थसाधनाप्रतिपत्त्या निगृह्णीमः, किं त्वार्यप्रतिपादकशब्दाप्रतिपत्त्या। एवं हि न निगृह्येत यदि स्वभाषानभिज्ञमार्यं प्रतिपादयितुं न शक्नोमीति विदित्वा कथामेव नारभेत। यदा तु साक्षिणां पुरतस्तत्प्रतिपादनायोद्यतो न शक्नोत्युपायापरिज्ञानात् प्रतिपादयितुं तदा कथं न निगृह्येत ? न चोपायाद् विना अप्रतिपद्यमानो निग्रहमर्हति, स्वभाषया संस्कृतेन च आर्यस्य प्रतिपत्तुं समर्थत्वादिति भावः।

यत्तूक्तं **न्यायवादिना** अत्यल्पमिदमुच्यते वर्णक्रमनिर्देशो निग्रहस्थानमिति, कपोलास्फालनादीनामपि वाच्यत्वादिति तत्राह—**अत्रैव चेति**।

वतिप्रयोगोत्पत्तिनिमित्तं दृष्टान्तदार्ष्टान्तिकयोस्तुल्यत्वं दर्शयति—**अप्रतिपादकत्वसाम्यादिति**।

एतेन यदुक्तं वतिप्रयोगपक्षेऽर्थान्तरं पृथक् न वक्तव्यम्, निरर्थकादनन्यत्वादिति तत्प्रत्युक्तम्। निरर्थके हि परस्य प्रतिपत्तिरेव न भवति। अर्थान्तरे तु परः प्रतिपद्यते किं तु तेन प्रकृतोपयोग्यर्थो नोक्त इति महान् विशेषः।

उदाहरण**भाष्ये** इत्यनुपपन्नम्। न हि **भाष्यकारेण** निरर्थकमुदाहृतम्। केवलं वत्यर्थं दर्शयता दृष्टान्तमात्रमुक्तम्। अत आह—**एवंप्रकारेति**। यद्यपि शृङ्ग्ग्राहिकया नोक्तम्, तथाप्येवंप्रकारमिति वदता उक्तं तदित्यर्थः।

ननु साधनानुपादानादित्यसिद्धम्, स्वभाषया साधनस्योपादानादित्यत आह—**परेति**।

टीयाम् ॥ परिषत्प्रतिवादिनौ युगपद्वा त्रिरभिधानं कुर्यातां क्रमेण वा ? न तावद् युगपदशक्यत्वात्। क्रमेण त्वभिधाने षट्कृत्वोऽभिधानं स्यादित्यत आह—**यद् वाक्यं पर्षदा प्रतिवादिना च न ज्ञायते** इति। अविज्ञातपदेन परिषत्प्रतिवादिभ्यामित्यस्यान्वयाददोष इत्यर्थः।

अमुमेवार्थं दर्शयितुमाह **उदयनः**—**वादिना त्रिर्भङ्ग्यन्तरेत्यादि**।

टीयाम् ॥ **एवमादिनेति**। आदिशब्देनोपांशूच्चारणं संगृहीतम्।

टीयाम् ॥ **वाक्यस्यैवेति**। अनेकस्येत्याद्यत्रापि योज्यते।

नास्तीति **भाष्यस्थ**मितिशब्दं व्याचष्टे—**इति तस्मादिति**।

॥ इति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणं संपूर्णम् ॥

॥ प्रयोगाश्रितानिग्रहस्थानात्रिकप्रकरणम् ॥

[५.२.११–१३]

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकमिति[1] । पौर्वापर्यं तु विशेषण-विशेष्यभावः । तस्य तेन वा अयोगो निराकाङ्क्षत्वं तस्मादप्रतिसंबद्धार्थमनन्वितार्थमपार्थकं पदजातं वाक्यजातं चेत्यर्थात् । एतस्य च साभिधेयत्वान्निरर्थकासंकरः । निश्चितानन्वयतया चान्वयवतोऽर्थान्तरादनिश्चितानन्वयादविज्ञातार्थाच्च भेदः ।

तदिदमाह**उदयनः—न निश्चितानन्वयमित्यादि** ।

टीयाम् ॥ श्वेतो धावतीति । सारमेय इतो द्रुततरं गच्छति । श्वित्री वा निर्णेनेक्तीत्युभयार्थसाधारण्यात् ।

टीयाम् ॥ तत्पूर्वकत्वाच्चेति । आकाङ्क्षापूर्वकत्वात् ।

यथाहुरिति । **बौद्धाः** ।

अत्रापीति । अस्मन्मतेऽपि ।

उभयत्रेति । क्रमेऽक्रमे वा ।

उने ॥ तदभावादिति । स्वाभाविकसंगत्यभावात् ।

इदमिति । दृष्टान्तो[816b]पादानम् ।

अनेन विशेषचिन्तनेनेति । साध्वसाधुविभागचिन्तया ।

तस्याश्चेति । अर्थगतेः ।

टीयाम् ॥ तदपेक्षाश्चेति । साधुशब्दापेक्षाः ।

उने ॥ एतस्येति । साधुभिर्भाषितव्यमित्यादिविधेः ।

---

1 V. ii. 10

टीयाम् ॥ **अनेकशब्दत्वमिति** । अर्थानाम् ।

उने ॥ **इहेति** । साधुत्वे ।

टीयाम् ॥ **अत** इति । गावीशब्दात् ।

अनेनेति । वृद्धतरेणेति ।

उने ॥ ननु माभूदपभ्रंशानां मूलशब्दस्मृतिद्वारेण वाचकत्वं स्वाभाविकशक्त्यैव भविष्यति, अत आह—**न चापभ्रंशा अपीति** ।

कार्यावसाय इति । वाचकत्वावसायः ।

तत इति । माणवकात् ।

ज्ञायमानज्ञानहेतुष्विति । ज्ञायमानाः सन्तो ये ज्ञानहेतवस्तेषु ।

तथेहापि स्यादिति । आरोपितशक्तिभावे गाव्यादावपि वाचकत्वबुद्धिः स्यात् । गाव्यादेरपि ज्ञायमानस्य ज्ञानहेतुत्वादित्यर्थः । एतेन शक्तिभावज्ञानस्य वाचकत्व-बुद्धिजनकत्वमाश्रित्य शक्त्यारोपेण गाव्यादिषु वाचकत्वं समर्थितम् । तच्च न ।

कुत इत्याह—**तज्ज्ञानस्येति** । शक्तिभावज्ञानस्य तत्प्रत्ययजनकत्वे वाचकत्व-बुद्धिजनकत्वे अभ्युपगम्यमाने ज्ञानस्य भ्रान्ताभ्रान्तभावेन फलस्य वाचकत्वबुद्धेस्तद्वदेव धूमादिज्ञानजन्यदहनादिज्ञानस्यैव तथाभावप्रसङ्गाद् भ्रान्ताभ्रान्तभावप्रसङ्गात् यथारोपितधूम-भावाद् बाष्पादेर्भ्रान्ताग्निबुद्धिः स्यात् तथारोपितशक्तिभावेभ्यो गाव्यादिशब्देभ्यो भ्रान्ता-वाचकत्वबुद्धिः स्यादिति भावः ।

तत इति । गाव्यादिशब्देभ्यः ।

उभयथापीति । गवादिरूपेण गाव्यादिरूपेण च ।

टीयाम् ॥ **अत एवेति** । यत एव साध्वसाधुशब्दविभागोऽस्त्यत एव च शब्दशास्त्र-मपि प्रयोजनवत् साध्वसाधुशब्दविभागज्ञानादिरूपफलवत् ।

प्रयोजनमेव व्यतिरेकमुखेन स्पष्टयति—**असत्यस्मिन्निति** । शब्दशास्त्रे ।

न म्लेच्छितवायिति । तव्यार्थे तवैशब्दो न म्लेच्छभाषया वक्तव्यमित्यर्थः ।

उने ॥ ननूक्तमिति । एतत्तु चिन्तनीयं विदितेत्यादिना ।

कोऽयं धर्मेति । ईश्वरकृतसङ्केत एव शब्दो धर्मोपयोगी नान्य इत्येवंरूपः कोऽयं धर्मोपयोगं प्रति नियमः अर्थप्रत्ययं प्रत्यविशिष्टत्वात् । आधुनिकसंङ्केतोऽपि शब्दो धर्मोपयोग्यस्त्वित्यर्थः ।

ज्ञापकोऽयं हेतुरिति । नकुलदन्ताग्रेण स्पर्श ओषधीनां सर्पविषहननशक्तेर्ज्ञापको न तु कारको यथा तथेश्वरसङ्केतोऽपि शब्दानां धर्मोपयोगित्वस्य ज्ञापको न तु कारक इत्यर्थः ।

नन्वीश्वरसङ्केतस्य यद्धर्मोपयोगित्वं ज्ञाप्यं तत्किं शब्दानां स्वरूपं व्यतिरिक्तं वा ? तत्राह——**ज्ञापकत्वे त्विति ।**

तत इति । स्वरूपात् । तदेतेनार्थप्रत्ययं प्रत्यविशेषेऽपि स्वभावविशेषादेव । केचित् शब्दा धर्मोपयोगित्वे नियता ईश्वरसङ्केतस्तु स्वभावविशेषस्यैव ज्ञापक इत्यर्थो यथा नकुलदन्ताग्रेणेत्यादिटीकया[1] दर्शितः ।

इह त्विति । इह तु गावीशब्दे तु फलाव्यभिचारः फलस्य गोलक्षणार्थबुद्धिरूपस्याभ्रान्तत्वम् ।

केन हेतुनेत्याह——**पारमार्थिकेति ।** ककुदादिमतोऽर्थस्य गोशब्दो वाचक इत्येवंरूपः पारमार्थिको यः समयः, तस्य फलं कार्यं यत् शब्दस्मरणविवक्षाप्रयत्नादिपूर्वकत्वं गावीश[817a]ब्दविषयाणि स्मरणविवक्षाप्रयत्नादीनि पूर्वाणि यस्य गावीशब्दोच्चारणस्य तद्भावः, तस्य नियमेन ।

एतदिति । पारम्पर्यसंबन्धनियमेनाभ्रान्तत्वनियमादित्यादि ।

टीयाम् ॥ वेदो ह्येवं यवमयश्चरुर्भवति, वाराही उपानहौ कुर्यात् तत्र चार्थे विवादः । आर्या यवशब्देन दीर्घशूकमाहुः । म्लेच्छास्तु प्रियङ्गुम् । वराहं शूकरमेके कृष्णशकुनिमन्ये । ततः क्व साधुत्वमित्यत आह——**वाक्यशेषादिति ।** यत्रान्या ओषधयो म्लायन्ति अथैते मोदमाना इवोत्तिष्ठन्ति इति वाक्यशेषो यवमयेषु करभपात्रेषु विहितेषु दीर्घशूकार्थत्वं यवशब्दस्य व्यवस्थापयति । तथा वराहस्य शूकरार्थत्वं वराहं गावोऽनुधावन्ति चतुश्चरणत्वेनानुकुर्वन्तीति वाक्यशेषो व्यवस्थापयति ।

---

1 J दिकाया, S टीकाया

तत्रेति । म्लेच्छसंमतेऽर्थे ।

उने ॥ तदेकेति । तेषां म्लेच्छानामेवैकेषां प्रसिद्धा ये पदार्थाः, तद्व्यवहारः ।

तन्त्रमिति । प्रधानम् ।

परस्पराश्रयेति । येऽन्वाख्याने त एव साधवो ये साधवस्ते अन्वाख्याने इति परस्पराश्रयः । तथान्वाख्यानोक्ताः साधवः । अन्वाख्यानं चान्वाख्यानान्तरात् साधु । अन्वाख्यानमप्यन्वाख्यानान्तरादित्यनवस्था । तथान्वाख्यानात् साधुशब्दानुकरणरूपात् साधव इत्युच्यमानेऽन्वाख्यानमित्यस्यैव स्ववचनस्य विरोधो येषामनुकरणरूपमन्वाख्यानं तेषामेवासाधुत्वापातात् । न हि तेषु साधुत्वहेतुत्वेनान्वाख्यानमभ्युपेयते । अभ्युपगमे वा अनवस्थापातः । आदिपदादनुक्रियमाणानामिव संप्रतितनानामपि अन्वाख्यानमन्तरेणैव साधुत्वेऽन्वाख्यानस्य व्यर्थतेत्यादिग्रहः ।

वाके ॥ अनेन च शब्देनेति । गोणीरूपेण ।

टीयाम् ॥ कृ तृ रा स दिवा द र भूत दिवेति ।

शु च रा ष्ट दिवैक र पूर्ण दिवा ।
यदि चन्द्रगतिश्च तिथिश्च समा
इति विष्टिगणं प्रवदन्ति बुधाः ॥

इति पादत्रयमपरम्[1] ।

---

1 द्रः कृ त रा स दिवा दर भूत दिवा
शु च राष्ट्र (? ष्ट) दिवेतर (°वैकर) पूर्ण दिवा ।
इति विष्टिगणं प्रवदन्ति बुधा
यदि चन्द्रगतिश्च तिथयश्च समाः ॥
कृष्णे च त्रि दश रात्रौ दिवा सप्त चतुर्दशी ।
चतुर्थ्यैकादशी रात्रावष्टमी पूर्णिमा दिवा ॥
भोजकृतराजमार्तण्ड (वेङ्कटेश्वर प्रेस १८१८) पृ. ९६
तुल° एकादश्याश्चतुर्थ्याश्च शेषार्धे शुक्लपक्षके ।
अष्टमीपौर्णमास्योश्च पूर्वार्धे विष्टिरीरिता ॥
कृष्णपक्षे तृतीयाया दशम्याश्च परार्धतः ।
सप्तम्याश्च चतुर्दश्याः पूर्वार्धे विष्टिसंभवः ॥ (ज्योतिस्तत्त्वधृतं वचनद्वयम्)
अत्र पूर्वार्धो दिवसः परार्धश्च रजनीति संभाव्यते प्रस्तुतश्लोकसामञ्जस्यात् ।

अर्थसंग्रह इति । कृ कृष्णपक्षे तृ तृतीयायां [रा] रात्रौ विष्टिः । तथा स सप्तम्यां दिवा विष्टिः । तथा द दशम्यां र रात्रौ विष्टिः । तथा भूत भूतेष्टायां चतुर्दश्यां दिवा विष्टिः । तथा शु शुचिपक्षे च चतुर्थ्यां रा रात्रौ । अष्टाष्टम्यां दिवा । एक एकादश्यां र रात्रौ । पूर्ण पूर्णिमायां दिवा विष्टिरिति रूपः ।

हीनमन्यतमेनाप्यवयवेन न्यूनमिति[1] ।

नन्वसंबद्धमेतत् **बौद्धनैयायिकादी**नां यथायथं प्रयोगे न्यूनाधिकोद्भावनसमाधानवाद एव वादिनामनिस्तारात् । तथा हि **सौगतो** यदि द्व्यवयवं प्रयोगं कुर्यात् न्यूनेन निगृह्येत । अनिग्रहे वा प्रतिवादी पर्यनुयोज्यमुपेक्षेत । पञ्चावयवे त्वधिकेन निगृह्येत । द्व्यवयवस्वीकारे वापसिद्धान्तेन । ततो द्व्यवयवे प्रयुक्ते नियमेन न्यूने चोद्भाविते ऽवयवान्तराणामनङ्गता **बौद्धेन** वक्तव्या । **नैयायिके**नाप्यङ्गता तेषां व्युत्पाद्येति प्रस्तुतार्थपर्यवसायिनी कथा न स्यात् । न चैवमेवास्त्विति वाच्यम्, निग्रहस्थानान्तरवैयर्थ्यप्रसङ्गादिति ।

इदमत्र तत्त्वम्—स्वसिद्धान्तनिर्णीतप्रयोगावयवपरिमाणापेक्षया न्यूनाद्यवतार इति हृदि निधायाह **उदयनः—असंपूर्णप्रयोगो न्यूनमिति** ।

टीयाम् ।। ननु प्रतिज्ञान्यूनं[817b]निग्रहस्थानं नास्तीति ब्रुवता **परेण** यः प्रतिज्ञान्यूनं वाक्यमाह स न निगृह्यते इत्यभिप्रायो दर्शित एवेति नास्य विकल्पस्यावतारोऽस्ति, किमसौ निगृह्यते अथ नेत्यत आह—**किं प्रतिज्ञेति** । प्रतिज्ञान्यूनं नास्तीत्युक्तम् । तत्र निग्रहस्थानान्तेरभ्यो व्यतिरिक्तं नास्तीति व्यतिरेको निषिध्यते, उत स्वरूपमिति **युक्तो** विकल्प इति भावः ।

वार्त्तिककारस्तु फलत इदं विकल्पस्वरूपमुपदर्शयति—व्यतिरेकनिषेधपक्षे निग्रहस्थानत्वाभ्युपगमात् निगृह्यते इति भवति स्वरूपनिषेधपक्षे ।

नेति । विकल्प इदं निग्रहस्थानं न भवतीत्यर्थ इत्यवधातव्यम् ।

वाके ।। ननु भवन्तु तत्र हेत्वादयः परं दुष्टा भविष्यन्ति । ततो हेत्वाभासाख्यमेवेदं निग्रहस्थानं भविष्यति । अत आह—**न च हेत्वादिदोषाः सन्तीति** ।

यद्येवं निग्रहस्थानमेवेदं न भविष्यति । अत आह—**निग्रहं चाभ्युपैतीति** ।

परम् ।

---

1 V. ii. 12

टीयाम् ॥ स्यादेतत् । कथं साधनाभावे सिद्धिरभ्युपगता भवति प्रतिज्ञावचनमसाधनाङ्ग-मित्युक्तत्वात्, प्रत्युत तदभिधानं निग्रहस्थानं स्यादित्यत आह—**प्रतिज्ञाया** इति । उक्तमवयवलक्षणे साधनाङ्गं प्रतिज्ञावचनमिति ।

उने ॥ **उपयुक्तापुनरुक्तकृतकर्तव्याभिधानमधिकमिति** । हेतूदाहरणाधिकमित्यनेन[1] हि अधिकानुवाददूषणाधिकयोर्न संग्रह इत्यतो हेतूदाहरणाधिकमित्यस्योपलक्षणपरत्वमाह—**कृतकर्तव्याभिधानमिति** ।

उपयुक्तापुनरुक्तेत्येतत्तु अर्थान्तरपुनरुक्तयोः प्रकृतार्थानुपपादकाभिधानरूपत्वेन पुनरुक्तरूपत्वेन च कृतकर्तव्याभिधानरूपयोरधिकत्वप्रसङ्गनिवारणायोक्तम् ।

टीयाम् ॥ **निग्रहस्थानप्रसङ्गादिति** । अज्ञानाख्यनिग्रहस्थानप्रसङ्गात् ।

दार्ढ्यार्थानभिधानादित्युपपादयितुं तत्तद्दार्ढ्यशब्दार्थमाशङ्क्य पराकरोति—**यदीति** ।

तेषामिति । अनुमानानाम् ।

सामान्यवद्द्रव्येति । द्रव्यग्रहणमुदाहरणार्थम् । तेन सामान्यवद्गुणविषयत्वेऽपि न व्यभिचारः ।

एवं व्यर्थमभिधानं स्याद् यदि प्रमां न कुर्यात् करोति चासौ स्वसामर्थ्येनेत्यत आह—**सत्यं द्वे अपीति** ।

॥ इति स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणं संपूर्णम् ॥

---

1 V. ii. 13

॥ पुनरुक्तप्रकरणम् ॥

[५.२.१४–१५]

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्[1] । यद्यपि पुनर्वचनं पुनरुक्तमन्यत्रानुवादादित्यनेनैव सर्वसंग्रहः । शब्दार्थयोरित्यनेनैव च प्रपञ्चः, तथाप्युक्तस्य पुनर्वचनं न चार्थादापन्नमुक्तम्, तत्राभिधानाभावादिति शङ्कां निराचिकीर्षुराह—अर्थादापन्नस्य स्वशब्देन पुनरभिधानं पुनरुक्तमिति वर्तते ।

ननु पुनःशब्द उक्तेरावृत्तिमाह । तत् कथमर्थापन्नस्य पुनरभिधानं पुनरुक्तमिति न वाच्यम् ? न ह्यत्र पुनःशब्द उक्तेरावृत्तिमाह, किं तु प्रतिपत्तेः । तेन प्रतिपन्नस्यार्थस्य प्रयोजनं विनोक्त्या पुनः प्रतिपादनं पुनरुक्तं नाम निग्रहस्थानमित्यर्थः । तच्च प्रतिपन्नं तत एव शब्दात् तत्पर्यायाद् वा तदाक्षेपाद् वेति ।

तदिदमाह **उदयनः प्रतीतस्यार्थस्येति** ।

अनेनैवाभिप्रायेण **टीकाकारोऽप्याह—तदनेन सूत्रद्वयेनेति** ।

॥ इति पुनरुक्तनिग्रहस्थानप्रकरणं संपूर्णम् ॥

———

1 V. ii. 14

॥ अनुत्तरफलकनिग्रहस्थानचतुष्कप्रकरणम् ॥

[५.२.१६–२०]

[818a] विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम्[1] ।

परिषदेति विज्ञाने कर्तारं निर्दिशता प्रतिवादिज्ञानमविवक्षितमिति दर्शितम् । प्रतिवादिनो ज्ञानाभ्युपगममात्रं तु विवक्षितम्, अनभ्युपगमे अज्ञाननिग्रहावतारात् ।

त्रिरभिहितस्यापीति । उच्चारणयोग्यतामात्रप्रदर्शनपरम् । परिषदेत्यत्र छेदे क्रियमाणे त्रिरभिहितस्येत्यत्र कर्त्राकाङ्क्षते इत्यतो वादिनेति शेषः । **सूत्रकृतैव** वादिनेत्यनिर्देशस्तु सभाक्षोभादिनाभिहितमावर्तयितुमक्षमे वादिनि कदाचित् परिषदाप्यनूद्य दीयते इति सूचनार्थम् । तदयमर्थो वादिनोक्तस्य परिषदा च बुद्धस्य पुनर्वादिना वा परिषदा वा अनूद्य दत्तस्यापि योग्यस्वच्छेनानवबोधमनाविष्कुर्वता कथामविच्छिन्दता अप्रत्युच्चारणमननुभाषणमिति ।

तदिममर्थमाह**ोदयनः परिषदा विज्ञातार्थस्येति** ।

टीयाम् ॥ नोत्तरेणावधारितगुणदोषेण प्रतिवादिनो मूढत्वममूढत्वं वाच्यवतिष्ठते इत्यत आह—**उत्तरेणोत्तरगुणदोषेणेति** । उत्तरेणेत्यत्र उत्तरगुणदोषज्ञानं विवक्षितमित्यर्थः ।

गम्यते इतीति **वार्त्तिक**स्थमितिशब्दं व्याचष्टे—**इति तस्मादिति** ।

अस्तीति क्रिया दृश्यते इत्यनया क्रियया न संगच्छते । अत आह—**निपातद्वयमिति** । नात्रास्तीति क्रियापदमित्यर्थः ।

खलीकारमात्रमिति । तिरस्कारमात्रम् ।

मात्रपदोपादानतात्पर्यमाह—**न तु तत्त्वेति** ।

तदिदं व्याहतमुच्यते इति । अयं हेतुरत्र विपक्षे वर्तमानोऽनेकान्त इति हेतुदोषो वाच्यः । तथा च सत्यवश्यंभाव्युच्चारणमित्यर्थः ।

तत्पुनरप्यनूद्यमिति । हेतोः सर्वानुवादे द्विरनुवादो दूष्यस्य ।

---

1 V. ii. 17

तमिति । आश्रयम् ।

कथमन्यस्य निग्रहस्थानत्वविधाने अन्यस्य विहितं तद्भवतीति अत उक्तम्— **तस्य तद्विशेषत्वादिति ।** अननुभाषणस्याप्रतिभाविशेषत्वात् ।

अवान्तरभेदविवक्षयेति । दूष्यविषयशब्दोच्चारणदूषणदूष्यावच्छेदभेदेना-ज्ञानमेव त्रिधोपदिष्टम् **ऋषिणे**त्यर्थः[1] ।

परप्रतिपादनार्थायां हि प्रवृत्तौ त्रिरभिधानं त्यक्त्वा तावद् वक्तव्यं यावदनेन गृहीतम् । तत् केयं त्रिरभिधानपरिभाषेत्यत आह—**त्रिरभिहितस्येति त्विति ।** न खलु यस्तथा प्रतिपादनीयः स कथयामभिक्रियते, तस्य कथाप्रवृत्तेः प्रागेव वर्जनीयस्य जडस्य सत्योपहासविषयत्वादित्यर्थः ।

अविज्ञातं चाज्ञानम्[2] ।

परिषद्विज्ञानवादित्रिरभिधानानुकर्षणार्थश्चकारः । तेन वादिनोक्तं परिषदा चावबुद्धं पुनर्वादिना परिषदा वानूद्य दत्तमपि प्रतिवादी न चेद् विजानीयात् तदा अज्ञानं तस्य निग्रहस्थानम् । अविज्ञातं येन तस्याज्ञानमिति **सूत्र**संबन्धः ।

एतच्चाज्ञानं न बुध्यते मया । किमनेनोक्तमित्यभिधाय तिष्ठासोरिष्यते ? एवं हि अननुभाषणादस्य भेदः । तदिदमाह **उदयनः परिषद्विज्ञानस्येति ।**

उने ॥ अनूदिते वादिवाक्यार्थे इति । एतेनानुवादानन्तरमप्रतिभोद्भावनावसरः । अन्यथा अतिप्रसङ्गादिति दर्शितम् ।

कार्यव्यासङ्गात् कथा[8.8b]विच्छेदो विक्षेपः[3] ।

सभ्यसभापतिवादिप्रतिवादिमेलके प्रतिज्ञानन्तरं प्रवृत्तायां कथायाम् अद्य मया न वक्तव्यम् । इदं मे करणीयमस्ति । श्वः परश्वो वा वदिष्यामीति व्याजोत्तरं विक्षेपः । अत्र च विक्षेपे नाप्रतिभाधर्मः श्लोकपाठादिना वाद्यवज्ञानम् , नाप्यप्रतिभायां विक्षेपधर्मो व्याजोत्तरमिति भेदेनोपादानम् ।

तदिदमाह**ोदयनः । कथामारभ्येति ।**

---

1 J दुष्टाद्दूषणादुष्टाविषयशब्दोच्चारणावच्छेदेनाज्ञानमेव त्रिधापदिष्टम् ऋषिणेत्यर्थः—प्रान्तटी° ता. टी. 2 V. ii. 17 3 V. ii. 19

टीयाम् ॥ **तदवस्थ** इति । सा साधनाद्युपन्याससंबन्धिनी अवस्था यस्य स तथाविधः प्रतीयमान एव प्रतीयमान कथाविच्छेदहेतु[ः] तथाविधरोगाद्यातङ्काभाव इत्यर्थः ।

न हि विक्षेपस्यान्यतमेति । हेत्वाभासो हि पक्षधर्मत्वादिषु अन्यतमं कञ्चन लिङ्गधर्ममनुविधत्ते, विक्षेपस्तु न कञ्चिदित्यर्थः ।

ननु मा भूद् विक्षेपस्यान्यतमलिङ्गधर्मानुविधानम्, परं प्रकृतसाध्यसिद्धये प्रयोगमात्रसाम्येन हेत्वाभासता भविष्यतीत्याशङ्कयाह—**नापीति** ।

ननु हेत्वाभासोपन्यासानन्तरं वादिना क्रियमाणत्वाद् विक्षेपो हेत्वाभासेष्वन्तर्भविष्यति । अत आह—**न चेति** ।

प्रकारान्तरेण हेत्वाभासतो विक्षेपस्य भेदमाह—**यदि चायमिति** । अयं वादी ।

तत्समर्थनेति । सम्यग्हेतुसमर्थनेऽसमर्थः ।

॥ इत्यनुत्तरफलक[निग्रहस्थान]चतुष्कप्रकरणं संपूर्णम् ॥

॥ भ्रान्तोत्तरनिग्रहस्थानत्रिकप्रकरणम् ॥

[५.२.२१–२२]

स्वपक्षे दोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा[1] ।

अत्र पक्षः सिद्धान्तः । दोषः प्रतिकूलमात्रम् । अभ्युपगमोऽनुद्धारः । तेन स्वसिद्धान्ते परोक्तं प्रतिकूलमनुद्धृत्य परसिद्धान्ते प्रतिकूलबुद्ध्येष्टप्रसङ्गो मतानुज्ञेति **सूत्रार्थः** । तेन साधनदूषणयोर्मतानुज्ञासंग्रहः । ततश्च साधुन्यसाधुनि वा साधने दूषणे वा प्रयुक्ते यदनिष्टभ्रमेणेष्टप्रसञ्जनं सा मतानुज्ञेति संक्षेपः ।

तदिदमाहोदयनः **अनिष्टभ्रमेणेति** ।

भाष्ये ॥ परमतमनुजानातीति । पराभिमतं दोषं स्वमतेऽनुजानाति ।

वाके ॥ स्वमतं तेनानुजानातीति । तेन दोषेण ।

उने ॥ निग्रहस्थानप्राप्तस्य तदनुद्भावनमिति । येन निग्रहार्होऽभूत्तस्यैवानुद्भावनं यत् तत् पर्यनुयोज्योपेक्षणम् । तेनासिद्धत्वविरुद्धत्वाद्यनेकनिग्रहप्राप्तावेकतमोद्भावने यदन्यानुद्भावनम्, न तत् पर्यनुयोज्योपेक्षणाख्यनिग्रहाय । एकतमनिग्रहोद्भावनेनैवोपन्यस्तप्रमाणसाधुत्वासाधुत्वनिर्धारणस्य सिद्ध्या अन्यनिग्रहोद्भावने अधिकत्वप्रसङ्गेन चान्यनिग्रहोद्भावनस्यानर्हत्वादित्यादि दर्शितम् । तथा चावश्योत्पाद्यस्य निग्रहस्थानस्यावसरेऽपि अग्रहणं पर्यनुयोज्योपेक्षणमिति **सूत्रार्थः** । प्राप्तपर्यनुयोज्यशब्दयोरर्हदर्थत्वादित्युपवर्णितं भवति ।

टीयाम् ॥ स्वसाधनावद्यमिति । स्वसाधनदोषम् । यदि प्रतिवादी दोषं विद्यात्, तदा निगृहीतोऽसीत्येवं ब्रूयात् । न चासौ वेत्ति, उपेक्षणात् । न हि प्रेक्षापूर्वकारी विजिगीषुर्दूषणं जानन्नुपेक्षते इति संभाव्यते इत्यभिप्रायेणाह— **अपि चेति** ।

कस्मादुपेक्षते । उपेक्षते चेन्न जानातीत्यर्थः ।

---

1 V. ii. 20

द्वयोरपि निग्रहादिति । वादिनो हेत्वाभासेन, प्रतिवादिनः पर्यनुयोज्योपेक्षणेन[819a]निग्रहात् ।

स्यादेतत् । नेदं निग्रहस्थानान्तरमपि त्वप्रतिभैव । तथा हि यदि तावदुत्तरपाक्षिकः पूर्वपाक्षिकं साधनाभासमप्याचक्षाणमुपेक्षेत; न तत्र दूषणमुद्भावयेत् तदुत्तराप्रतिपत्त्यैव निगृह्येत न पर्यनुयोज्योपेक्षणेन ।

अथ पूर्वापाक्षिको दूषणाभासवादिनं दोषप्राप्तमुत्तरपाक्षिकं न निगृह्णाति, तथाप्यस्योत्तराप्रतिभैवेत्यत आह—**सम्यक्साधनोपन्यास** इति । वादिना साधनाभासे प्रयुक्ते उत्तरवादी तत्रोत्तरं वक्तुं लब्धावसरोऽपि यदि कुतश्चित् निमित्तात् न ब्रूयात् तदोत्तराप्रतिपत्तिरस्तीति पश्यन्नपि यत् **सूत्रकारः** पर्यनुयोज्योपेक्षणमप्रतिभायाः पृथगनुशास्ति तत् ज्ञापयति उत्तराप्रतिपत्तेरन्यो विषय इति भावः ।

अदोषोद्भावनमिति । करोत्यनेन संबध्यते ।

असाविति । प्रतिवादी ।

तत्साधनदोषमिति । वादिसाधनदोषम् ।

उभयथापीति । अवचनेऽन्यवचनेऽपि च ।

ननूक्तमवचनेनान्यवचनेन वा । तेन साधनाभासवादित्वं सूचितम् , न तूपेक्षितमित्यत आह—**विनिश्चित**प्रमाणभावस्येति ।

उने ॥ ननु प्रतिज्ञाहान्याद्यापाते प्रतिज्ञान्तराद्युद्भावनम् , छलापाते जात्युद्भावनम् , वाक्छलाद्यापाते छलत्वेन सामान्येनोपचारच्छलाद्युद्भावनम् , साधर्म्यसमाद्यापाते जातित्वेन सामान्येन प्रकरणसमाद्युद्भावनमपि निरनुयोज्यानुयोग इष्यते । **सूत्रकारश्च** अनिग्रहस्थाने निग्रहस्थानानुयोगात् निरनुयोज्यानुयोग[1]माह । ततः प्रतिज्ञाहान्यादीनां निग्रहस्थानानामापत्तौ कथमिवानिग्रहस्थानत्वे प्रसङ्ग इति ?

[2]समाख्याविरोधोऽपि वानुयोज्यानुयोगस्य निरनुयोज्यानुयोगत्वे इत्याशङ्क्याह—**अतन्निग्रहस्थानेति ।** अतन्निग्रहस्थानापन्नो हि निरनुयोज्योऽत्र विवक्षितः । तस्यानुयोगेऽपि तन्निग्रहस्थानोद्भावनम् । तथा च यो निग्रह आपाद्यमानो वर्तते तमप्राप्तस्य तेना-

1 V. ii. 22   2 J सामा

प्राप्तेन निग्रहो निरनुयोज्यानुयोगः । स तु निग्राह्यो वस्तुतः सर्वनिग्रह[1]ग्रामबहिर्भूत एवास्तु, निग्रहान्तरापन्नो वास्तु न विशेष इत्यर्थसिद्धौ सर्वसंग्रहः । एतदेव महतः **सूत्र**स्य **प्रयोजनम्** । अन्यथा त्वनिग्राह्यनिग्रह इति प्रणयेदिति परमार्थः ।

टीयाम् ॥ ननु साधनवादिनं प्रत्युत्तरवादी निगृहीतोऽसीति ब्रुवन् भूतैर्वा दोषैर्ब्रूयात्, अभूतैर्वा ? यदि भूतैः, न निरनुयोज्यानुयोगः । अथाभूतैः, तर्हि निग्रहस्थानेन विना अस्थाने निग्रहमाचक्षाणो न भूतदोषोद्भावनमुत्तरं प्रतिपद्यते इत्यप्रतिभयैवोत्तराभासवादी निगृह्यते इति न पृथक् निरनुयोज्यानुयोगो निग्रहस्थानमित्याशङ्क्याह—**न चायमिति** । विपरीतप्रतिपत्तिर्भावरूपा । उत्तराप्रतिपत्तिस्त्वभावरूपा । अतो महान् भेद इत्यर्थः ।

॥ इति भ्रान्तोत्तरनिग्रहस्थानत्रिकप्रकरणं संपूर्णम् ॥

---

1 J ग्रास

॥ प्रमाणान्तरोपनयप्रयासोद्भाव्यनिग्रहस्थानद्विकप्रकरणम् ॥

[५.२.२३–२४]

टीयाम् ॥ प्रतिज्ञातार्थविपर्ययादिति **भाष्ये** यथाश्रुतेऽपसिद्धान्तस्य प्रतिज्ञाविरोधाद् भेदो न स्यादित्यत आह—**अभ्युपगतार्थेति । सूत्रे** सिद्धान्तानियमादित्येतावत्येव सिद्धे अभ्युपेत्येति पदमभ्यस्तगोतममतस्य बौद्धस्य सौगतमतमास्थाय कथामारभमाणस्य ईश्वरमनभ्युप[819b]गच्छतोऽभ्यस्तमात्रातिक्रमेऽपसिद्धान्तो मा भूदित्येतदर्थमुक्तम् ।

एका प्रकृतिर्व्यक्तस्येत्यनया प्रतिज्ञया विकाराणामन्वयदर्शनादिति हेतुर्न संबध्यते । यथा शुक्लः प्रासादः काकानां कृष्णत्वदर्शनादिति । न च व्यक्तस्यैव विकाराणामिति पदेनोपादानं युक्तम् । न ह्येवं प्रयुज्यते, शब्दानां कृतकत्वादिति । अत आह—**विकाराणामिति व्यक्तस्यैवानुवादः । अन्वयदर्शनादिति हेतुरिति ।**

अत्र यदुक्तं **न्यायवादि**ना **सांख्यो**क्तस्य हेतोर्दूषणमनभिधाय **कापिला**भिहितप्रकृतिविकारलक्षणप्रश्नः प्रकृतासंबद्धत्वात् प्रष्टुरेव **नैया**यिकस्यार्थान्तरलक्षणं निग्रहस्थानमापादयतीति तत्राह—**दूषणायानुयुज्यते** इति । वादिनाभिहिते साधने तदनन्तरं साधनार्थमजानता प्रतिवादिनासौ साधनार्थं प्रष्टव्यः । अन्यथा साधनार्थेऽनवगते तत्र दूषणस्य वक्तुमशक्यत्वादिति नेदमर्थान्तरं प्रकृतसाधनोपयोगित्वादित्यर्थः ।

सिद्धान्तेनैव कस्मान्न बाध्यते इति । एतत् ।

भाष्ये ॥ **प्रवृत्तिः संभवतीति** । प्रेक्षावतः ।

टीयाम् ॥ **मृद्धर्माणामिति** । रक्तत्वकृष्णत्वादीनाम् ।

नन्वनेन विकाराणामेकप्रकृतित्वसिद्ध्यर्थमन्वितत्वदर्शनादित्ययं हेतुरुपन्यस्तः । स चासत आत्मलाभं सतश्च आत्महानमनभ्युपगच्छतोऽपि निरवद्य एवेति कथमुच्यते ? अथ नाभ्युपैति, पक्षोऽस्य न सिध्यतीत्याशङ्क्योपपादयति--**विकारा ह्यनेनेति ।** सतो निरोधस्यासतश्चोत्पादस्य प्रतिज्ञातार्थविरोधकत्वादिति ब्रुवत**ष्टीकाकृतः** प्रतिज्ञार्थशब्देन सिद्धान्तो विवक्षित इति लक्ष्यते । न ह्येकप्रकृतिव्यक्तमितिरूपप्रतिज्ञार्थस्य विरोधकः सतो निरोधोऽसतश्चोत्पादः संभवतीति ।

साध्यविरुद्धेनेनि । साध्यस्यैकप्रकृतिकत्वस्य विरुद्धेन ।

ननु प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध इत्यत्र **सूत्रे**[1] प्रतिज्ञाहेतुपदे प्रतियोगिद्वयोपलक्षणपरे वर्णिते । लक्ष्यनिर्देशस्यापि प्रतिज्ञाग्रहणस्योपलक्षणार्थत्वमुक्तम् । एवं च सत्ययं **सूत्रार्थो** निष्पन्नः प्रतियोगिनोर्विरोधो विरोधो नाम निग्रहस्थानमिति । प्रतीयते चात्र न सदात्मानं जहाति, नासदुत्पद्यते इति सिद्धान्तस्य प्रकृतिविकारस्वरूपोपवर्णनेन विरोधः । तथा च श्रूयमाणे पदानन्वयमन्तरेण स्वसिद्धान्तविरुद्धं विरुद्धं नाम निग्रहस्थानमुदाहृतं **वार्तिककृता** स्वपक्षानपेक्षमित्यादिना । तस्मात् नापसिद्धान्तो विरोधात् पृथग्निग्रहस्थानम् । अत आह—**वैभवमात्रेण चेति** ।

बुद्धिवैभवमात्रेणोक्तं **स्वसिद्धान्तस्य गोत्वादेरित्यादि** ।

परमार्थतस्तु साध्यसाधनयोरुच्चारितयोरेकस्यार्थोऽन्यतरस्यार्थेन यत्र व्याहतः प्रतिभासते तत्र वाक्यार्थविरोधः प्रतिज्ञाविरोधो बोद्धव्य इति भावः ।

प्रतिज्ञाविरोधापसिद्धान्तयोर्भेदं प्रतिपाद्योदाहरणभेदमपि प्रतिपादयति—**अपि चेति** ।

तदुक्तं तदस्यानैकान्तिकत्वोद्भावनं **प्रभाकरस्य** स्वीयेन शब्दत्वनिराकरणेन विरुद्धमिति ।

उने ॥ अभ्युपेतप्रामाण्येति । अभ्युपेतं प्रामाण्यं यस्य तद् यत् पुरुषान्तरं **कपिलादि** तदभ्युपगमेन ।

उने ॥ यथोक्तेष्विति । [820a] असिद्ध्यादिषु ।

तल्लक्षणायोगादिति । असिद्ध्यादिलक्षणायोगात् ।

कुविन्दकार्यत्वादित्यादय इति । आदिपदात् कार्यद्रव्यत्वात् कुविन्दकार्यद्रव्यत्वादित्येतौ ग्राह्यौ ।

अनुपसंहार्यमिति । सर्वपक्षीकरणे दृष्टान्ताभावेन व्याप्तिग्रहणोपायाभावादनित्यत्वव्याप्तं प्रमेयत्ववदिदमित्युपसंहर्तुमशक्यम् ।

येन तर्केण प्रतिहतं तमेवाह—**एवं वदतो हीति** ।

---

1 V. ii. 4

अनुकूलतर्कशून्यमिति । अक्षणिकमपि सद्भविष्यतीत्यत्र विपक्षे बाधकरहितमित्यर्थः ।

स चेति । असिद्धः ।

तथेति । ज्ञातं सत् ।

अनुमितिं भावयति—**एवं सतीति ।**

निर्णीतस्याश्रयासिद्धयन्तर्भावे बाधितविषयस्याप्यत्रैवान्तर्भावः साध्यवैपरीत्येन निर्णीतत्वात् न शङ्कितव्यः ।

ननु सिद्धसाधनमपि स्वरूपेणैव दूषणं भविष्यतीत्याशङ्कयाह—**साध्यसिद्धेस्त्विति ।**

अनेनैव न्यायेनेति । व्याप्ततया पक्षे प्रतीतिः सिद्धिः, तस्या अभावेनैवेत्यर्थः ।

अनुपसंहार्यस्यासिद्धेऽन्तर्भावमुक्त्वा दूषणान्तरेऽप्यन्तर्भावमाह—**सर्वपक्षीकरणे इति ।** सर्वं हि पक्षीकृतमत आत्मादिर्यः पक्षैकदेशस्तत्र प्रमेयत्वादेर्धर्मिग्राहकप्रमाणबाधः । येन प्रमाणेनात्मादिधर्मी गृहीतस्तेनैवासौ नित्यो गृहीत इति धर्मिग्राहकप्रमाणबाधः । शब्दादौ भागे सिद्धसाधनं चानित्यत्वाभ्युपगमादित्यर्थः ।

साध्यविकलेति । शब्दो नित्योऽमूर्तत्वात् । यदमूर्तं तन्नित्यं यथा कर्म यथा परमाणुः यथा घटः इति साध्यविकलादयः । यन्नित्यं न भवति, तदमूर्तमपि न भवति, यथा परमाणुः, यथा कर्म यथा नभः इति साध्यव्यावृत्तादयः । अन्वये व्यतिरेके वा यथा तमो वाजिविषाणं वेत्याश्रयासिद्धः । यत्र साध्यसाधनयोर्व्याप्तिः प्रदश्यंते तस्य तमःप्रभृतेराश्रयस्यासिद्धेः ।

अप्रसिद्धविशेषणेति । शब्दो नित्यः, ईश्वरबुद्धिः सर्वविषया, आत्मा नित्य इति बौद्धं प्रत्यप्रसिद्धविशेषणादयः पक्षाभासाः ।

वैशेषिके गुणविभागवदिति । वैशेषिकैर्हि गुणविभागे सप्तदशगुणाः कण्ठत उक्ताः, सप्त च चशब्देन समुच्चिताः ।

एषामपीति । साध्यविकलादीनामपि ।

नन्वसाधारणानैकान्तिकः सर्वस्मात् पक्षाद् विपक्षाच्च व्यावृत्तः स्याद्, योऽमूर्तः स नित्यो यथा परमाणुः। यस्त्वनित्यः स मूर्तो यथा घट इत्यत्र त्वमूर्तत्वस्य हेतोर्नित्येष्वाकाशादिषु

सद्भावेन सपक्षैकदेशे एवाभावः। तथा अनित्येभ्यः कर्मादिभ्योऽव्यावृत्तेर्विपक्षैकदेशादेव वृत्तिः। तत् कथं परमाणौ दृष्टान्ते साधनविकलेऽमूर्तत्वस्य हेतोः साधारणानैकान्तिकता इत्याशङ्कयाह—**यथाप्रयोगमिति**। यः प्रयुज्यमानो दृष्टान्तः, तस्यैवानुसारेण, यौ प्रयुज्यमानौ सपक्षविपक्षदृष्टान्तौ तयोरेवापेक्षया सपक्षाद् विपक्षाच्च व्यावृत्तिं विवक्षित्वेत्यर्थः।

एवं साध्यविकलादावपि यथाप्रयोगमिति योज्यम्। तदनुसारेणास्य तात्पर्यं भाव्यं च। तथा हि, योऽमूर्तः स नित्यो यथा कर्म इति कर्मणि दृष्टान्ते साध्यविकलतया विपक्षतां गते परमाणुरूपसपक्षव्यावृत्त्यपेक्षया[820b] सपक्षव्यावृत्तिविवक्षायां विपक्ष एव गामित्वेन विरुद्धः। तथोभयविकले दृष्टान्ते प्रयुज्यमाने घटे एव व्याप्तेर्ग्रहीतुमशक्यतया व्याप्यत्वासिद्धः। तथा यन्नित्यं न भवति, तदमूर्तमपि न भवति यथा परमाणुरिति परमाणुर्विपक्षदृष्टान्तः साध्याव्यावृत्त्या सपक्षतां गतः। तस्माच्च हेतोर्व्यावृत्तत्वादसाधारणत्वम्। तथा यन्न नित्यं तन्नामूर्तं यथा कर्मेति कर्मणि साधनाव्यावृत्तविपक्षदृष्टान्ते गतत्वात् परमाणुरूपसपक्षव्यावृत्त्यपेक्षया सपक्षव्यावृत्तिविवक्षायां हेतुर्विरुद्धः। तथोभयव्यावृत्तेर्विपक्षदृष्टान्ते नभसि व्याप्तेर्ग्रहीतुमशक्यतया व्याप्यत्वेनासिद्ध इति।

तथेति। व्याप्यत्वासिद्धः।

अनुपदर्शितान्वयादावपीति। तथेति योगः।

तथाविधानामिति। अनुपदर्शितान्वयादीनाम्।

हेत्वाद्यनाकाङ्क्षितत्वेनेति। साध्यसाधनयोर्व्याप्त्यनुपदर्शने हि व्याप्त्याधारतोपदर्शनार्थमुपन्यस्यमानमुदाहरणं साध्यसाधनेनाकाङ्क्षति।

आत्माश्रयेत्यादि। स्वस्याव्यवहितस्यापेक्षणमात्माश्रयः। अन्योन्यस्याव्यवहितान्योन्यापेक्षित्वमन्योन्याश्रयः। अन्तरितस्य तदेव द्वयमात्माश्रयोऽन्योन्याश्रयश्च चक्रकम्। उपपाद्योपपादकप्रवाहोऽनवधिरनवस्था।

तत्प्रतिहतस्येति। आत्माश्रयादिप्रतिहतस्य।

विशेषस्त्वात्माश्रयेति। परीक्षा संशयलक्षणपरीक्षापूर्विका परीक्षात्वादित्यनुमाने संशयलक्षणपरीक्षापि संशयलक्षणपरीक्षापूर्विका। तथा च संशयलक्षणपरीक्षा संशयलक्षणपरीक्षामेवापेक्षते इति परीक्षायाः स्वापेक्षित्वेन परीक्षात्वहेतोः स्वरूपस्यैवासिद्धिः।

तथेश्वरः सर्वज्ञः सर्वकर्तृत्वादिति **कुनैयायिकानु**माने सर्वज्ञत्वे सति सर्वकर्तृत्वम्,

सर्वकर्तृत्वे च सर्वज्ञत्वमिति परस्पराश्रयत्वेन सर्वज्ञत्वासिद्ध्या सर्वकर्तृत्वस्यापि स्वरूपेणासिद्धिः ।

तथा प्रत्ययभेदोपाधिकेन विषयभेदेनैव प्रमाणानि भेदवन्ति प्रमाणत्वेनाभिन्नत्वादिति संख्यानुमाने, प्रत्ययभेदाद् विषयभेदो, विषयभेदात् प्रमाणभेदः, प्रमाणभेदाच्च प्रत्ययभेद इत्येवं चक्रकवृत्त्या बाधितस्य प्रमाणत्वेनाभिन्नत्वादित्यस्य हेतोः स्वरूपासिद्धिः ।

तथा पार्थिवाः परमाणवः सावयवा गन्धवत्वादित्यनुमाने परमाणवश्चेत् सावयवाः, ते परमाण्वन्तरैः कार्याः परमाण्वन्तराण्यपि परमाण्वन्तरैः कार्याणि इत्यनवस्थायां परमाण्वसिद्धौ हेतोराश्रयासिद्धिः ।

क्वचिदनवयवत्वव्यवस्थितौ च तैरेवानवयवैरपि गन्धवद्भिर्हेतोर्व्यभिचारः परमाणुरूपधर्म्यङ्गीकारे च येनैव प्रमाणेन परमाणवो गृहीताः, तेनैव निरवयवा इति धर्मिग्राहकप्रमाणबाधः ।

एवमन्यत्राप्यात्माश्रयादौ स्वरूपासिद्ध्यादि भाव्यम् ।

एतानीति । साध्यविकलादीनि ।

एषामेव पृथगिति । न ह्यमीषां हेतुदूषणपर्यवसायित्वेन समुच्चयः । किंतु पृथगुद्भाव्यत्वेन विशदप्रतिपत्तिकत्वात्, प्रतिज्ञाविरोधादिवत् ।

तस्मादमीषां हेत्वाभासप्रपञ्चत्वात् पृथगनुपादानं पृथगुद्भाव्यत्वाच्च चकारेण समुच्चितमिति[821a] भावः ।

॥ इति प्रमाणान्तरोपनयप्रयासोद्भाव्यनिग्रहस्थानद्विकप्रकरणं संपूर्णम् ॥

टीयाम् ॥ **सकलशास्त्रार्थमुपसंहरतीति** । भगवान् **सूत्रकार** इति योगः ।

भाष्ये ॥ **भवति ह्यपीति** । निपातसमुदायोऽयं शास्त्रपरिसमाप्तौ माङ्गल्यार्थः शुभमस्त्वित्यादिवत् ॥

टीयाम् ॥ ननु निग्रहस्थानलक्षणमिति समस्ते पदे लक्षणमित्यनेन संबन्धाप्रतीतिः। अतो निग्रहाणां च लक्षणमिति वक्तुमुचितं **वार्त्तिककृत** इत्याह—**समासेनेति**। समासे निग्रहस्थानस्यापि जातिभिः संबन्धाज्जातीनां निग्रहस्थानान्तर्भावः प्रतिपत्तुं शक्य इति भावः।

यदलम्भि किमपि पुण्यं तस्य फलमिति संबन्धः।

फलार्पणं दर्शयति—**एतेनेति**।

श्रीलक्ष्मीतिलको मुदेऽस्तु भगवान् श्रीन्यायतुर्याग्रिमा-
ध्याये भूमिगृहे स्थितानपि रहस्यार्थान् समाद्योतयत्।
श्रेयःस्नेहभराक्षयो न च मनाक्कम्प्योऽपि दुर्वादिवाग्-
वातैरव्ययसदृशः खलु नवो यद्धीः प्रदीपोदयः॥
प्राक्संहत्य सुरासुरेण जलधिं व्यालोड्य हेमाद्रिणो-
द्धूतं सारमुपाददे स्वयमहो एकाङ्गमल्लस्तु यः।
न्यायाम्भोधिममुं विगाह्य परितो बुद्धया कुशाग्रीयया
सामस्त्येन महार्थसारमचिराल्लात्वा व्यतारीन्मम॥
तस्य श्रीजिनरत्नसूरिचरणाम्भोजान्तिकेऽधीतिनः
श्रीलक्ष्मीतिलकाभिषेकनृपतेर्नानार्थरत्नैर्ज्वलत्—
कुर्वाणात्र सुवर्णदण्डरुचिरा दुर्गार्थवृत्तेश्छला-
देतस्या मयकोच्छ्रितोज्ज्वलयशःश्रीवैजयन्त्युच्चकैः॥

॥ इति युगप्रधानश्रीजिनेश्वरसूरिशिष्यलेशश्रीअभयतिलकोपाध्यायनिर्मितायां
पञ्चप्रस्थानन्यायमहातर्कविषमपदव्याख्यायां न्यायालङ्काराख्यायां
पञ्चमोऽध्यायः समर्थितः॥

जपुस्तके पुष्पिकान्ते—

नमोऽस्तु श्रीपार्श्वनाथाय॥

नमः श्रीजिनदत्तसूरिचरणकमलेभ्यः॥

सर्वदा सुप्रसादास्तु श्रीशारदामहादेवी॥

चान्द्रे कुलेऽजनि जिनेश्वरसूरिरिन्दु-
र्हत्वा तमो वसति मार्गविकासकारी।

श्रेजे ततोऽभयगुरुश्च नवाङ्गटीका-
पीयूषकुण्डनवकोद्धरणः श्रुताब्धेः ॥
यज्ञे तदीयपदवीनलिनीमरालः
खेल्यश्चरित्ररमया जिनवल्लभाख्यः ।
आसीत् पदेऽस्य जिनदत्तगुरुर्भटेन
येनादधे विधिपथः सुवहः खिलोऽपि ॥
आभात् पदेऽस्य जिनचन्द्रगुरुश्च पञ्च-
विंशो जिनो य इह सर्वजनेन गीतः ।
तस्मादुदैज्जिनपतिर्यतिराड् जयश्री-
गाढोपगूढपरिमाद्यदमन्दमोदः ॥
शिश्यास्तस्य जिनेश्वराः सुकृतसम्राजो जयन्त्यञ्जसा
सुव्यक्तैव सरस्वतीपरिवहोच्चैर्न्यायघण्टाध्वनः ।
उत्सर्पोत्सवसंहतिर्जिनगृहेषु स्वर्णकुम्भच्छलात्
पृथ्वीं हेमफलैः फलेति भुवनं यत्कोदये मोदते ॥
विद्यालब्धिक्रियाभिस्त्रिजगदभिभुवां सुप्रसत्त्यैव तेषां
टीका प्रोद्वाहितासावपि हि नयमहातर्कशक्रेण साकम् ॥
पुंमात्रेणाङ्गजा स्वा बत बत भयका निर्धनेनापि बुद्ध्या
तस्याभिप्रायवृत्तिर्भवतु सहचरी यावदिन्द्वर्कयोर्भा ॥
श्रीलक्ष्मीतिलकोपाध्यायैः संशोधितेयमतिनिपुणम् ।
अन्यदपि यच्च शोध्यं तदत्र[821b]शोध्यं महाकुशलैः ॥

॥ भद्रम् ॥

सुपुस्तके पुष्पिकान्ते—

शुभं भवतु ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

स्वस्ति, संवत् १५९० (= 1533 A.D.) वर्षे अधेर श्रीदुङ्गरपुरनगरे राउल-श्रीभट्टपालदेवराज्ये श्रीपार्श्वचैत्यालये लिखितं पद्माकेन ॥

परिशिष्ट-१

प्राचीनोक्तिसंग्रहः

अग्निकामो दारुणी मथ्नीयात् [द्रः न्यायभाष्य २.१.५९] ४२६

अग्निहोत्रं जुहुयात् स्वर्गकामः [तै. ब्रा. २.१] १३७

अचिन्त्यो हि योगातिशयः [द्रः ता. टी. १.१.१] ५१९

अप्राप्ते हि शास्त्रमर्थवदिति न्यायः ३४१, ३४७

अरुणया एकहायन्या पिङ्गाख्या सोमं क्रीणाति [तै. सं. ६. १.६.७] ४२४

असदेवेदमग्र आसीत् [छा. उ. ३.१९.१; ६.२.१] ६२१

अस्येदं [वै. सू. ९.१८] ९२

आत्मावारे [बृ. उ. २.४.५] १३७

आद्यः करणविन्यासः [द्रः विधिविवेक, पृ. १७७] ५४

आर्तिं दोषक्षयं विदुः [द्रः परिशुद्धि, पृ. ३६९] १३९

आप्तोपदेशः शब्दः [न्या. सू. १.१.७] १३३

उदिते होतव्यम् [ऐ. ब्रा. ५.३.१] ४२४

एनमहं पञ्चदशारेण वाग्वज्रेण भ्रातृव्यमवबाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्मः
[द्रः शतपथब्रा° १.३.५.] ४२७

कारणतो विकारात् [वै. सू. २.२.३४] —

कृ तृ रा स दिवा द र भूत दिवा [द्रः ता. टी. ५.२.११] १३६, ७७८

गोमयपायसीयन्यायः ६५४

चिन्तां प्रकृतिसिद्धार्थामुपोद्घातं प्रचक्षते [तन्त्रवा° २.१.१] ३३३

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव तु ॥
पाद्मोत्तरख° ११६ अ, [अत्रिसं १.४०] ११६

जरया ह वा एष एतस्मात् सत्राद् विप्रमुच्यते [द्रः शबरभा° २.४.४] ६६५

जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च [द्रः न्या. भा. ४.१.५८] ६६५

ज्वरापहारकामस्तक्षकचूडामणिमवधाव्य पिबेत् ४२९

तस्मात् षष्ठ्यस्तु तत्रापि विशेषणमनर्थकम् [दिङ्नागोक्तिः] २५८

द्रव्याणि द्रव्यान्तरमारभन्ते [वै० सू० १.१.८] ६२६

धूमाधीर्वह्निविज्ञानं धूमज्ञानमधीस्तयोः ।
प्रत्यक्षानुपलम्भाभ्यां त्रिकपञ्चभिरन्वयः ॥ ९५

न तच्चक्षुषि नो रूपे [द्रः न्या. वा. १.१.१४] ५१६

न तत्रापि द्विधा दोषात् प्रकृतत्वेऽन्यसंभवः ।
स्वलक्षणेन बाधा चेन्न विकल्पादिसंभवात् ॥ [दिङ्नागोक्तिः] २५८
न म्लेच्छितवै [द्रः म. भा. पस्पशा° १.१.१] ७७६
नित्यं सत्त्वमसत्त्वं वा [प्र. वा. ३.३४] ४४
पुत्रकामः पुत्रेष्ट्या यजेत [द्रः न्या. भा. ४.१.५२] ४२६
प्रवर्तनालक्षणा दोषाः [न्या. सू. १.१.१९] २०३
प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदिति ॥ [मनुसं° ६.३८] ६६७
बहु स्यां प्रजायेय [छा. उ. ६.२.३] ६२३
ब्राह्मणो ब्रह्मचर्येण संस्कारैर्द्विज उच्यते । —
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च ॥ [द्रः अत्रिसं° १.४०] ४१३
भालेऽग्निमयं नेत्रम् ७०३
भूमेरावपनवाक्यम् [द्रः यजु° माध्य° २३.१०] ४२७
मत्वा च सततं ध्येयः ६०१
मन्तव्यश्चोपपत्तिभिः ६०१
मृत्तिकेत्येव सत्यम् [छा. उ. ६.१.४] ६५५
यजेत स्वर्गकामः ५१२
यत्रान्या ओषधयो म्लायन्ति अथैते मोदमानास्तिष्ठन्ति [द्रः शाबरभा°] ६६६
यत्र दुःखेन संभिन्नम् ४१३
यवमयश्चरुर्भवति [शत. ब्रा. ५.२.४.११] ६६६
यवागुं पचति ३४१
लोहितोष्णिषा ऋत्विजः संचरन्ति [षड्विंशब्रा° ३.८] २३७
ल्यब्लोपे पञ्चमी [अष्टाध्यायी १.४.३१ वार्तिक] —
वराहं गावोऽनुधावन्ति । चतुश्चरणेनानुधावन्ति । ६६६
वामं तु नयनं सौम्यं भानवीयं तु दक्षिणम् ७०३
वाराही चोपानहौ कुर्यात् ६६६
शबलो वास्याहुतिमभ्यवहरति [शा° ब्रा. २.८.९] ४२६
शब्दस्तद्व्यापृतिः कार्यं फलं रागो नराशयः ।
इष्टाभ्युपायता चेति विधौ विप्रतिपत्तयः ॥ ४२८
शरीराच्च बहिर्मनः ५८४
शशकः शल्लकी गोधा कूर्मः खड्गी च पञ्चमः [रामायण किं° १७.३९] २९४
शिशमुष्टिन्यायः २,७१९
श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी [शाबरभा°] ६६६
षट्केन युगपद्योगात् [विंशतिकाका° १२] ६८४
षण्णामनन्तरातीतं यत् तन्मनः [अभिधर्मकोश १.१७] ५०३

सदेव सोम्य इदमग्र आसीत् [छान्दोग्य उ° ६.२.१] ६५२
सपक्षपरपक्षाभ्यां कृते हेतौ प्रसङ्गतः ।
साधर्म्योक्तिर्विपक्षेण सा साधर्म्यसमा मता ॥ ५२२
साधनं यदि साधर्म्यं न वाक्यांशो न पञ्चमी ।
वाक्यं चेत् तद्विशेष्यं स्यात् साधनत्वादसंभवः ॥ [दिङ्नागोक्तिः] २५८
सामान्यं परमपरं च [द्रः पदार्थधर्मसंग्रहः पृ. ९] ४३
सूचीकटाहन्यायः ७०
संबन्धेऽपि द्वयं नास्ति [दिङ्नागोक्तिः] १४४
संयोगविभागयोरनपेक्षं कारणं कर्म [वै. सू. १.१.१६] १२४, २२५
स्मृतिशीले च तद्विदाम् [मनुसंहिता २.६] ६६८
स्वच्छाः स्वभावशुचयः [ता° परिशुद्धि १.१.८] १४८
स्वर्गकामो ज्योतिष्टोमेन यजेत २८८
स्वर्गकामो यजेत ४१३

परिशिष्ट-२

शब्दसूचि

अकृताभ्यागमदोष ६२३
अकृताभ्यागमप्रसङ्ग ६०७, ६१५
अकृतोपादान २७३
अक्षणिक ५७०
अक्षपाद २,३, २५४, ६७६
अख्याति ६४८
—वादी ३९
अग्निहोत्र ४२६, ६०२
अजसंयोग ४६८
अज्ञातोपरतज्ञान २७
अज्ञातोपरतत्व २८
अज्ञान ३०१, ३३६, ५७९, ७८०, ७८३
अणु ४०१, ५२९, ६८१
—श्यामता ६६९
—संचय ३९८
अतिदिष्ट ६११
अतिदेश २७८, ३४९, ६८८
—वाक्य १२४, १३१, ४११
अतिप्रसङ्ग ३०, २६४, २८४, ४४२, ४५४, ४८०, ४३२, ५०९, ५५७, ५७४-५, ६९४, ७०९, ७२३, ७५३, ७६४
अतिप्रसञ्जकत्व १६४
अतिव्यापक ६९०
अतिव्यापकत्व ३६९
अतिव्याप्ति २४, १७४, १८१, २५९, ६८८
अतीत ४०८–९
अत्यन्तसंयोग ५४७, ६६५
अत्यन्ताभाव ३८०, ४९९
अत्यन्तायोगव्यवच्छेद २७६
अत्यन्तासिद्ध ३१७
अथर्ववेद ३३
अदृष्ट २००, ३८४, ५८५, ६०२, ६०७
—कारित ६०६
—निष्पाद्य ६०२
—वैकल्य २००
अदृष्टानुमान ६०७
अदृष्टार्थ ४३५
अदोषोद्भावन ७५९
अद्वैत ६५१, ६५३
—वादी २१६, ६५३
अद्रव्य ३२२
—समवेत ३१९
अधिक २९५, ७७९, ७८०
अधिकरण २५०, ६५४
—सिद्धान्त २४२-३,
अधिकहेतुप्रयोग ३३७
अधिकाराभिमान १९६
अधिगन्तव्य ३४१,६७३
अध्यवसाय ३४५
अध्यवसिताभ्यनुज्ञान ११३
अध्यात्मविधि ६९९
अध्यास ७०३
अध्येषणा ४०९, ४२८, ४३४
अध्वर्यु ४३३
अनतिप्रसङ्ग ७६४
अननुभाषण ३३६, ७८२-३
अननुविधेय ४२९
अनपदेश ४६५

अनभ्युपगम ३८५, ६१७

अनवच्छेदक ४०७

अनवस्था ८,२७, १२०, ३४२-३, ३७७, ३९२, ३९९, ४५३, ४९१, ४९८, ५६६, ६८५, ७५३, ७५७, ७७८, ७९१-२

—तर्क २७

अनवस्थान ५९५

अनवस्थाप्रसङ्ग ७५२

अनवस्थाभासप्रसञ्जन ७२५

अनवस्थिततत्वव्यवच्छेद ६१०

अनवस्थिततत्वव्युदास ७००

अनागत ४०८

—सिद्धि ४०९

अनागतावेक्षण ६१२

अनारम्भक १९८

अनित्यताप्रकरण ५९२

अनित्यसमा ७४३

अनिर्वचनीयख्याति ६५३

—वादी ३९

अनिर्वचनीयत्व ३९

अनिष्ट २५०

—प्रसङ्ग ३७, २८५, ६२४

—प्रसञ्जक ३७

अनुकूलतर्क ७९०

अनुगम ७४८

अनुग्राहकतर्क ४४८

अनुत्तरफलकनिग्रहस्थान ७८२

अनुत्पत्तिसम ७२७-८

अनुदितकाल ४३६

अनुपपत्ति १९९, ६४४, ६७८, ६८२-३, ७४५

अनुपलब्धि ४५७, ४५९-६०, ४६२, ४६३, ४८९, ५००-१, ५०६, ५५८, ५६६, ६९२, ७४०-१

—प्रमाण ७५६

—विरोध ७५६

—सम ७०७, ७३७, ७४०, ७४२, ७५७

अनुपलम्भ ७३, ४६०, ७४२

—बाधित ५५

अनुपसंहार २८१

अनुपसंहार्य ३०९, ७८९-९०

अनुपाख्येय ६१८

अनुमान २९३, ३८७, ४१८, ४२०, ४२३, ४४२-३, ४५५, ४७८, ५०७-८, ५१८, ५२१, ५४७, ५५२, ५८०, ५८९, ६१५-६, ७०८

—परीक्षा ४०५

—लक्षण ४१८

—विरुद्ध ३४

—विरोध ३४

अनुमिति ७९०

अनुयोग ४२९

अनुवाद ७८८

अनुविधेय ३०

अनुवृत्तिप्रत्यय ४८१

अनुव्यञ्जनसंज्ञा १८३, ६७४

अनुव्यवसाय १४-५, ७७, १५४-५, १६०, ५१४

अनुशयबीज ७७

अनेकद्रव्यवत्त्व ४६

अनेकधर्मोपपत्ति ७२९

अनेकान्त १८२, १९८, ३८४, ४६०, ५०४, ५९७, ६०३, ६१३, ६८२

—वाद २११

अनैकान्तिक ३२, ४९, ७१, १४४, १४६, १९३, १९५, २५६, ३०७, ३०९-१०, ३३२, ३९५-६, ४०४, ४१५, ४६२-३, ४६५, ४६७, ४८९, ५०९, ५३३, ५५२, ५९६-७, ६२९, ६४१, ६९३, ७०८-१४, ७२६, ७३५, ७४२, ७४६-७, ७५०-१, ७६०-५

—चोदनाभास ६४३
—ता ३३, १८२
—त्व ३२९, ४०४, ४२७, ४६१-२, ५००, ५५५, ५६१, ५८०, ५९५, ६०३, ७२५, ७८९
अन्तरालोपलब्धि ४६३
अन्तर्गडु ३९६
अन्तर्जल्प ७६१
अन्त्यतत्त्वज्ञान ५८३
अन्त्यतन्तुसंयोग ३८४
अन्त्यबीजक्षण ५७०
अन्त्यावयवी ३९५, ५२९-३०
अन्ध्र ७७३
अन्यतरासिद्धि ३०६, ३१७
अन्यतरासिद्धाश्रयविशेष्य ३०६
अन्यथाख्याति १०४
अन्यथानुपपत्ति ११९, ४३०
अन्यथासिद्ध ८, २७, ६४, १५५, १८८, ३०७, ३२५, ४८९, ५०७, ६४६, ६५७, ६७६
अन्यथासिद्धि ४९
अन्ययोगव्यवच्छेद ७९, ८०, २४७, २७६, ७३७-८
अन्यव्यावृत्ति ४८९-९०
अन्यापोह १२३, २७७, ५७९
अन्योन्यव्यावृत्ति ४९०
अन्योन्यसंश्रय ४७७
अन्योन्याभाव ३७९
अन्योन्याश्रय ४२०, ५५७, ५६६, ७९१
—ता १८५
—त्व ४१७
अन्वय २३३, २३६, २६९, २७५-७, २७९, ३०९, ३६६-७, ४१२, ४२५, ४३०, ४३८, ४५०, ४५४, ५६७, ५९९, ६१७, ७८८, ७९०
—ग्राहकानुमान ८
—नियम ५७०-१
—व्यतिरेक १८, ६३, २३०, ३२६, ३६६, ३६८-९, ६९६
—व्यतिरेकव्यवहार ५७६
—व्यतिरेकी ७, ११३, २५६, २६३, २६५, २६८, २८२, ६००
अन्वयी ११६, २६६, २८०, ५४०
अन्वाख्यान ७७८
अन्वाचय ७११
अन्वाहार्य ४२५
अन्विताभिधान ४७९
अपकर्षसम ६१६, ७१६-७
अपक्षधर्मता २६
अपभ्रंश ५६, ७७६
अपर २१८, २३६, ६२८
अपरापरोक्ति ५५८
अपरोक्षार्थ ४४१
अपवर्ग १२३, १५०-१, ३३८, ६०५-७, ६६४, ६६७, ६७०-१, ६९९
—शरीर ६१०
—साधनत्व ४२६
अपवाद ४९७
अपसिद्धत्व ७६०
अपसिद्धान्त ७०, २९५, ३१०-१, ३६५, ७६३, ७६७, ७७९, ७८८-९
अपार्थक ७७५
अपूर्व ५११
—कल्पना ४३१
अपेक्षाबुद्धि २०९, ३९५, ३९९, ४००, ५६२
अपेक्षितोपायता ४३०-१
अपोह ४९२-३
अपौरुषेयत्व ४३७
अप्रतिपत्ति ३३६-७, ७५९, ७६१
अप्रतिमा ३०१, ३३५-६, ७६०, ७६२, ७८३, ७८७

अप्रतिसंक्रम २१५
अप्रयत्नानन्तरीयक ७२८
अप्रयोजकत्व ४२७, ५७१, ६२१
अप्रसिद्धविशेषण ११६, ३९३, ७१०
अप्राप्तिसम ७२३, ७२४, ७६०
अप्राप्यकारी ४९
अबाधितविषयत्व ९९, २८१, २८३
अभयतिलकोपाध्याय २८९, ३३८, ४३९, ४९६, ५४९, ६०८, ६७०, ७०२, ७५८, ७९३
अभावोपलब्धि ४४४
अभिघात ३८४, ६१३
अभिधारण ४३३
अभिधानाभिधेयप्रपञ्च २१०
अभिधाव्यापार ४२८
अभिलापसंसर्गयोग्यत्व ४९१
अभ्युच्चय ३१०, ५९४
अभ्युपगतविरोधापादकत्व ५७५
अभ्युपगम ४१७, ७८५
—वाद १९०
अयावद्द्रव्यभावित्व ५९६
अयुगपत्क्रियाहेतुत्व ६०१
अयुतसिद्धि ३७६, ६१९
अयोगव्यवच्छेद १५, २५, ७९, ८०, २७६, ७३७
अर्थ १६, ५०८
—क्रिया २१ ५६६-७, ५६९, ५७७, ५७८
—क्रियास्थिति ४१४
—दूषण ३३५
—परिच्छेदकत्व ४२०
—परीक्षा ५४८
—प्रतिपत्ति २६
—प्रवृत्तिसामर्थ्य ४१४
—बन्धनत्व ६९३
—वाद ४२७, ४३३, ४३७
—विशेषप्राबल्य ६९९
—संबन्ध ३७२
—संबन्धप्रत्यायकत्व ४२०
—सामर्थ्यसमुत्थत्व ६०
—सामानाधिकरण्य ५३
अर्थानुपलब्धि ५४०
अर्थान्तर २५३, ५७१, ७७४-५, ७८०, ७८८
अर्थापत्ति ४४३, ४७८
—सम ७३४, ७४२
अर्थाभास ३४६
अलब्धभूमिकत्वव्युदास ७००
अलीक १६१, ४८८-९१, ५०१
अलीकालम्बन ६६
अवच्छेद ३७९
अवच्छेदकता ७७, ११८
अवच्छेदकत्व ८९, ९०
अवच्छेद्यावच्छेदकभाव ६२
अवध्यवधिमद्भाव २२२
अवयव ३५, ४२, १७०, १७५-६, १८१, २५२, २७८, ३४३, ३७४-५, ३७९, ३८२, ३८५-८, ३९२, ४०७, ४५७, ४७०, ४९५, ४९८, ५१३-४, ५३०, ५३६, ५३८, ५४१, ५५९, ६७८-८१, ६८४-५, ६८७, ७१५, ७४३
—दोष ७६०
—व्यूहन ५३६
—संसर्ग ३८१
अवयवि ४७०, ४८१, ४९५, ५२९, ५३८, ६७७
—कर्म ५६०
—परीक्षा ४०३-८
—प्रकरण ६८०
—वाद ६८०

–वादी ३९८
–सिद्धि ६८०
अवयवी १८६, ३५३-६, ३७८-८२, ३८५-६, ३८८, ३९२-८ ४०२, ४०७, ४५६, ५१४, ५३०, ५३६, ५३८, ५४१, ५७६, ६७८, ६८०-२
अवर्ण्यसम ७१८-९, ७४८
अवस्थापरिणाम ४४८
अवाचकप्रयोग ७७३
अवान्तरव्यापार २०७
अवान्तरसामान्य ४५४, ४५६, ४६१
अविकल्प ५९, ६४, ३९७
–समा ७५१
अविज्ञात ७७५, ७८३
अविद्या २१३, २१५, ६२३, ६७६
–संस्कार २०८
अविनाभाव १४७, २४१, ३२६, ४१५-६, ४७८, ५२२, ५९१
अविनाभावी ४९४
अविनाभूतता ४२४
अविशेषसमा ७२२, ७३५
अवीची ६६२
अव्यतिरेक ३८८
अव्यपदेशकत्व ४७
अव्यभिचार ९०, ४३१
अव्यवस्थान ५०९
अव्यवस्थाभ्यनुज्ञान ३८७
अव्यवहितविवाद २५३
अव्यापकलक्षण ४५७
अव्यापकव्यधिकरणासमर्थविशेषण ३०७
अव्यापकासमर्थविशेष्य ३०७
अव्याप्ति ९८
–सम ७५६
अव्याप्यवृत्तित्व १९९ ४०६, ४५१
अव्यावृत्ततत्प्रत्ययविषयत्व ४६५
अव्युत्थितैषणात्रय ४२६
अशक्तिसंगूहन २९५
अशुभसंज्ञोपासना ७००
अशोकवनिका १२६
अष्टद्रव्य १८९
अष्टादशधातु ५०३
असत्ख्याति १०६
–वादी ३९
असत्प्रतिपक्षत्व ९९, २८१, ३४७
असत्प्रतिपक्षितत्व ३०८
असदृशक्षणोत्पाद ५६५
असमर्थविशेषणता २३२, ६३२, ७६४
असमर्थाव्यापकासिद्ध ३०७
असमवायि २६
–कारण १२४, १९४, १९९, २२८, ४६५, ५२७, ५४८, ५६२, ५८२, ५८५, ६४०, ७०२, ७०८
असंयोगव्यावृत्ति ३८५
असंवेद्यत्व २८
असाधनाङ्गवचन ७५९, ७७३, ७८०
असाधारण २५६, २६३, ३८२, ३८६, ७९१
असाधारणानैकान्तिक २७१, ७१९, ७९०
असाध्यसम ७५५
असिद्ध १४०, १९१, १९२, ३१२, ३१४, ३३२, ३८९, ४६४-५, ४६७-८, ५०१, ५६६, ७०९, ७३०, ७६२ ७९०
–चोदनाभास ७१९
असिद्धत्व १७९, २४९, ३०७, ३५३, ४६०, ४६३, ५५२, ५६६, ७८५, ७८९
असिद्धार्थत्व ७१७
असिद्धि ३७, १९९, २९९, ३१२, ३१७, ३६८, ३८०, ५६९, ५८९, ६१४, ६३२, ६४९, ६५९, ७१४, ७१८, ७४३, ७६०, ७९१
–व्यवच्छेद ४८

अमूत्रिताभ्युपगम ३४४
अहेतुसम ७०७, ७२३, ७३३
आकस्मिकत्व ६४०
आकारार्पक १८
आकाङ्क्षा १३७, ४१५-६
आकृति ४५४, ४७५, ४८०-२, ४८५
आख्यात ४०९, ७७१-२
आगम २, १९८, ३६६, ४२५, ४३५, ४४६-७, ५८२, ६०२, ६६९
–बाध ४४८
–विरोध ५६१
आगामिन्याय ६२४
आचार्य १००, १२२, १५३, २१८, २३९, २४३, २५८, २७१, २७९, ४१४, ४५२, ४६३, ४७२, ४८६, ५५२, ५८६-७, ५९८, ६१७, ६६०, ६९३
–देशीय ५८७
आतोद्यसिद्धि ३५४
आत्मख्याति ६२३
आत्मगुणत्व ५८१, ६११
आत्मदृष्टि १६२
आत्मनित्यता ५२५
आत्मपरीक्षा ५२६
आत्मप्रकरण ५८१
आत्मप्रदेश ५८६, ७०१-२
आत्ममनःसन्निकर्ष ४७, ३६५-६, ३६९
आत्मलक्षण ५१२
आत्मलाभ ७८८
आत्मविशेषगुण २०३
आत्मसंस्कार ६९९
आत्महान ७८८
आत्मा ३४३, ६७४, ६९१
आत्माश्रय १६१, २८५, ३४२, ४२०, ७९१-२
आत्माश्रितत्व ५९२
आत्मास्तित्व ५२०
आत्मेन्द्रियार्थसन्निकर्ष ६०१
आत्यन्तिकाव्यभिचार ५६८
आदिवाक्य ११३, ३५६
आदेश ४७३
आधाराधेयभाव १८५
आधिदैविकदुःख ६६१, ६९९
आधिभौतिकदुःख ११, ६६१, ६९९
आधेयशौच ६७४
आध्यात्मिकदुःख ६६१, ६९९
आनुपलम्भिक ६८२
आनुमानिकविज्ञान ३८७
आनुश्रविक ४२६
आन्वीक्षिकी ३८, ५२०, ७००
आपातलिकाछन्द ६६३
आप्त २८२, ४१८, ४३८
आभिमानिक ५०५
आभिव्यक्तिक ५३२
आमिक्षा ४९५
आयुर्वेद ४३६-७
आरम्भकद्रव्य ५३७
आरोप्य ३२२
आलम्बन ४६४
–प्रत्यय ३९७
आलयज्ञान १५४, १५९
आलयविज्ञान १५८, १६०, १६७, ६९१
आलयसन्तान १५९, ६९०
आलोचनज्ञान ५४
आवरणानुपलब्धि ४६१
आवरणोपलब्धि ४६०
आवाप ४३८
आवापोद्धार ४२१
आवापोद्वाप ४२८
आशुतरविनाश ५९२, ५९५, ६१०
आशुसञ्चारित्व ६०१
आश्रयरूपोपाधि ३२१

आश्रयविनाश ४६२
आश्रयव्यतिरेक ६६०
आश्रयाश्रितभाव ६७९
आश्रयासिद्ध १४०, ३१७, ३७५, ६२०, ६२८, ७१९, ७९०
—ता २८६
—त्व ४४०
—विशेषण ३०९
आश्रयासिद्धि २००, ३१९, ३५०, ५००, ६३०, ६५९, ७१९, ७२१, ७९२
आसञ्जक ७
आसत्ति ४१५
आसन १६, ६०९, ६९९
आहङ्कारिक ५३२, ५४२
आहार्यलिङ्गारोप २८५
आहार्यारोप ३६
इतरव्यावृत्ति १९६
इतरेतरापेक्षसिद्धि ४६४
इतरेतराभाव ६४७, ६८२
इतरेतराश्रय ४२, १७२, १८१, ४१७, ४८७, ४९२, ५५७, ६५०, ६५४
—प्रसङ्ग ७२३
इतरेतरोत्पत्ति ६१३
इतिकरण ५४
इतिकर्तव्यता २८३, २८५, २९३, ४२८, ६००
इन्द्रिजित् ३०३
इन्द्रियनानात्व ५३८, ५४३
इन्द्रियप्रत्यासत्ति ४५
इन्द्रियभौतिकत्व ५३७
इन्द्रियमनःसंयोग ३६४
इन्द्रियव्यतिरेक ५१०
—व्यभिचार ७८
इन्द्रियसन्निकर्ष १८१, २८८
इन्द्रियसामर्थ्य ६५
इन्द्रियार्थसन्निकर्ष ५, ५२, ७२, ३६४, ३६९-७०, ५८१, ५८३
इन्द्रियाश्रयत्व ५९८
इष्टप्रसञ्जन ७८५
इष्टाभ्युपायता ४२८, ४३१
इष्टोपाय ४३१-२
ईशान ७०३
ईश्वर १३८, १४१, १५८, ४३६, ४३९, ६०३, ६२३-५, ६२७-८, ६३२-३, ६३८-९, ६६६-७, ७५६, ७७७, ७८८, ७९१
—बुद्धि ७९०
—सङ्केत ७७७
ईश्वरानुमान ५००
ईश्वरोपादानता ६२२, ६३९
उक्तसन्न्यास ७६९
उत्कर्षसम ६१६, ७१६-७, ७५५-६
उत्तरदोष ७६०
उत्तरवादी ६७२
उत्तराभास ३१४, ३२८
उत्पत्तिकारणोपलब्धि ५५९
उत्पन्नापवर्गित्व ५९२, ५९५-६
उत्पादोच्छेद ६१४
उत्सूत्रव्याख्या ३८
उदयन ३३, ५२, ६०, ६४, ९६, १४३, १५६, १७१, ३१०, ३४२, ३६९, ४२५, ४४८, ५१३, ५८९, ७१७, ७४६, ७६६, ७७०-१, ७७३-४, ७७९, ७८१-३, ७८५
उदयव्यय २१२
उदाहरण २७७, २७९-८०, २९३, ७१५, ७१७, ७६४, ७६९, ७८०
—दोष ७६०
—साधर्म्य २५९

उदाहरणाभास ७६८
उदितकाल ४२६
उदितहोम ४२४
उद्देश १८०, २१७, ३३७, ५३१, ६०९
—क्रम १८३
—सूत्र १८०
उद्योतकर ३
उद्धार ४३८
उद्भूतरूपत्व ५३५-६
उपचारच्छल ३२८, ३३२-४
उपजनापाय ६२
उपजीव्योपजीवक ३४
उपदेश १३७, ६५७
उपनय २१४, २५९, २७३-७, २७९-८०, २९३, ७०७, ७६८-७०
उपपत्तिलिङ्ग ३६९
उपपत्तिसमा ७३६, ७५३
उपपत्तिसामर्थ्य १९६
उपमान २९३, ४४२
उपमानपरीक्षा ४११
उपमानाभास १२५
उपलक्षण २६१, ४३५, ६१२, ६१४
—त्व ४४८
उपलब्धि ७४०-१
—सम ७३७, ७३९
—साधनत्व १८०
उपलम्भ ७४१-२
—योग्यत्व ४६२
—विरोध ३२०
उपसर्पणप्रत्यय ५७९
उपहितवाचक ४८०
उपादान ६२२
उपादानोपादेयभाव १६४
उपाधि ४४, ८६, ९३-४, ९६, २०८, २१२, ४५६, ४८०, ६६७, ६६९, ७०३, ७०५
—वाद ९५
उपाय ३४१, ६७३
उपायाभ्यासप्रकर्ष ३१
उपेक्षणीय ५४२
उपोद्घात ३३३, ६८२
उभयविकल ३२९, ३३२, ७६८, ७९१
उभयाप्रसिद्धाश्रयविशेष्य ३०६
उभयासिद्ध ३०६
ऋणचय ६६४
ऋणानुबन्ध ६६७
ऋषि ६६१, ७८३
एककर्तृकत्व ६१४
एकदेशाभ्यनुज्ञा ६४२
एकदेशिपरिहार ५८४
एकदेशी ३, ३७, ३२६, ३९०, ५६२, ५८४-६, ६२७, ६८२
एकदेशीय ५१५
एकदेशोपलब्धि ३७३
एकधर्मिप्रत्यासत्ति ५७७
एकप्रकृतिकत्व ५२७, ६८८
एकप्रत्यनीकत्व ६१३
एकप्रत्ययहेतु २२३
एकसन्ततिपतितत्व ६९१
एकसमुदायी ४५७
एकसामग्र्यधीनत्व ६८८
एकस्थूलप्रत्यय ३९२-३
एकाधारता १३४
एकार्थग्रहणव्यवस्था ५१९
एकार्थसमवाय १२०, २०५, ४८१, ५८०
एकार्थसमवायी १८०, ५९१
एकावयवसंसर्गाभाव ३८१
एकाश्रयत्व ५९२
एके २१८, २३६, ४४९
एकेन्द्रियवादी ५०९
एकोपकारक ४८७

एड्मूक १३४-५
एषणा ६६८
ऐकान्तिकत्व ६५५
ऐतिह्य ४४२
ऐन्द्रियविकल्प ६८
औदुम्बरीसर्ववेष्टन ६६६
औपचारिकत्व ६१५
औपचारिकार्थ ४८१
औपाधिक ७३, ४५२
–संबन्ध ३२४
कच्चोलक ४७०
कथा २८७, ३४३, ७७४, ७८८
कथाभास ७५८
कपिल ७८९
करणताभ्रम ५३
करणव्यापार २४
कर्त्रभिप्राय ५९०
कर्तव्याकरण ६१२
कर्तृकर्मसाधनवैगुण्य ४२६
कर्मकाण्ड ३
कर्मधारय ५२०
कर्मफल ६७३
कर्ममीमांसा ५२०
कर्मान्तरप्रतिबन्ध ४२६
कर्मोपसंग्रह २१०
कल्पनागौरव ४८२
काकतालीय ६४
काकोलूकयुद्ध ३०३
कात्यायनी ६६८
कादाचित्क ४६४, ६५३
कापिल ५५३, ६८८
कारकाधिकारिका ३५८
कारणत्रय १२०
कारणरूपप्रवृत्ति ६०७
कारणसामग्री ५७२
कारणाभाव ४६७
कारीरी ४२६, ४३१
कार्त्स्न्यैकदेशलक्षण ३८७
कार्यकारण ६९८
–त्वानुपपत्ति ५५९
–भाव २८, ५२, ७३, ७५, ९१, १५४-६, ४६०, ५५९
–भावनियम ७५३, ७५६
–सद्भाव १५७
–स्वभाव २०६
कार्यकारणाभेदोपचार ६१४
कार्यप्रत्यय ४२९
कार्यरूपप्रमेयषट्क ६०९
कार्यविधि ४२९
कार्यसम ७४६, ७४८-९
कार्यसाजात्य ५७२
कार्यानुपलब्धि ८६, ५७२
कालाक्षी १३३
कालात्ययापदिष्ट ३०८, ३१२, ३२५, ७१७, ७३१
कालात्ययापदेश ७५५
कीर्ति ३९९, ७४८, ७७३
कुनैयायिक ७९१
कूटस्थनित्यता २११, ५५१, ५८७
कृकाटिकाभङ्ग २७६
कृतनाश ६१५
केचित् १५, २१७
केवलव्यतिरेकी ११३, २४३, २६६, ५४०, ७०८
केवलव्यधिकरणविशेष्य ३१७
कोश ४२०
कौटस्थ्यविरोध ५८७
कौमारिल ४४६, ४५०
क्रम २२६
–यौगपद्य १८६, ५६६-८
–वत्कार्यनानात्व ५७६
–वत्सहकारिनानात्व ५७६

–विकल्प २२६
क्रमाक्रमानुपलम्भ ५६८
क्रमाक्रमोभयाभाव ५६६
क्रियाभ्यास ४०९
क्लेशानुबन्धाभाव ६६४
क्षणभङ्ग ४९, ६२, ३५५, ६६०
–प्रकरण ५८०
–भङ्गप्रकरण ६०१
–साधन १६६, ३५८
क्षणभेद ६९१
क्षणविनश्वर ४३१
क्षणिक ५५८, ५५६, ५७८
–त्व ८२, २०५, ५५८, ५६०, ५७८
–त्वसिद्धि ३९६
–त्वाभ्युपगम ६१४
क्षणिकोत्पत्तिवादी १९१
क्षेत्रज्ञ ६६६
क्षेपायोग १९४
खटचपेटा ७११
खण्डावयवी ३९५
खलीकार ७८२
गतिद्वयवाद ५८
गन्धर्वनगर ६८७
गर्भशोष १६९
गिरिज़ा ७०३
गुणगुणिवाद १८९
गुणलक्षण ३९२
गुणवाद ६५४
गुणविभाग ७९०
गृहस्थाश्रम ५१२
गोतममत ७८८
ग्रहणनिमित्त ५९४
ग्रहणानवस्थान ५९५
ग्रामेष्टि ६०३
घोट्टल ४७५
चक्रक ५५६, ७९१-२
चक्षुरद्वैतपरीक्षा ५१७
चक्षुःसन्निकर्ष ५९४-५
चतुरर्थविमर्श २१७
चतुर्थसन्निकर्ष ४३-४
चतुर्दशजातिवादी ७२२
चतुर्वर्ग २९, ३४, ३४१
चतुष्कोटी १६२
चतुष्ट्वाक्षेप ४४०
चतूरूपानुमान ३४
चतूरूपोपपन्नहेतु ७६८
चरकाध्वर्यु ४३३-४
चरमभावी ३८४
चातुराश्रम्य १९०
चान्द्रायण ४३७
चार्वाक ८४, ५०८, ५१२
–सूत्र ६५७
चितिशक्तिप्रतिबिम्बोद्ग्राहित्व ५५२
चित्तवृत्ति १९७
चित्रकाख्यौषधि ७५२
चोदक ४२७
चोदनाभास ७१६, ७३०, ७३४
छन्दः ४१४
छल ३०२, ३२८, ३३३, ७६१
–प्रकरण ३३४
–वादी ७५७
जयन्त १३४
–मञ्जरी ४०
जरद्बौद्ध ५५८
जरद्वैशेषिक १२७
जरन्नैयायिक १२८, १३०
जरन्मीमांसक १३२, ४४६
जरामर्य ६६४-५
जल्पवितिग्रह ६६२
जन्मान्तर ६९८

जल्प ३४३, ५७७ ७०१, ७०८
–कथा ५६४
जागरितान्त ६८७
जाग्रत्प्रत्यय ६८७
जाति ३३३, ३३५, ४३८, ४५४, ४७५, ४८०, ४८२-५, ४८६, ४९५, ७०३-५, ७०७-८, ७१०-३, ७१६, ७३३, ७३८, ७४४, ७४६, ७५४, ७६०-१, ७७०
–प्रत्यवस्थान ४६०
–मात्रपदार्थवादी २३१-२
–वादी ४३०, ७१५, ७१६, ७२१, ७२५-६, ७३०, ७३८, ७४१-२, ७४७, ७५०-१, ७५३-५
–सङ्कर १९५
जात्युत्तर ४७३, ७१०, ७१५
जिज्ञासा २४६
जिनचन्द्रसूरि ७०२
जिनेश्वरगुरु १
जिनेश्वरसूरि २८९, ३३८, ४३९, ४९६, ५४९, ६०८, ६७०, ७०२, ७५८, ७९३
जैगीषव्य ५९०
जैमनीय ८२
ज्ञातता ६, ६८९
ज्ञाताज्ञातसत्त्ववाद ५८
ज्ञाताभ्यनुज्ञान ७००
ज्ञातावबोधन ७००
ज्ञातृसामानाधिकरण्य ५८७
ज्ञातोपरतत्व २८
ज्ञानलक्षणैकाश्रय ७
ज्ञानवादी ६८७, ६९१, ६९४
ज्ञानश्री १०१, ५७०
ज्ञानयौगपद्य २००
ज्ञानसामानाधिकरण्य ६०
ज्ञानायौगपद्य ५१९
ज्ञापकत्व ४३०
ज्ञापकहेतु २०४
ज्ञाप्यज्ञापकभाव ६२, ४१७
ज्ञेयानुपलब्धि ५८२
टीका (प्रायशः)
–कार ९, ३३, ५३, ७८, ११५, १४८, १५१, १८८, १९८, २०४-५, २०८, २११, २३८, २५१, २६४, २७२, ३१२, ३१६, ३२२, ३३६, ३४०, ३७०, ५४०, ५७४, ५९५, ७४७, ७८१
–कृत् २, १२, ३०-१, ३३, ३५, ४१-२, १००, ११०, ११३, १२९-३०, १५०, १६८, १७३, १७६-७, १८३, १९८, २०७, २२३-४, २२८, २३३, २६३, २७८, २८४-५, २८७, २९५, ३२२, ३२८, ३४९, ३५७, ३६७, ३७०, ३७३, ३८८, ३९१-४, ३९७, ४००, ४१०, ४२४, ४९९, ५०९, ५१५, ५३०, ५५५, ५५८, ५६१, ५८५, ५८९, ५९४, ६०६, ६३३, ६४१, ६६६, ६६९, ६८५, ६९८, ७१४, ७३८, ७६०, ७६४, ७८८
टीकालङ्कार ७१६
तक्षक ४२९
तत्त्वज्ञान ६७२, ६७४, ६९७-८ ७००
तत्त्वज्ञानोत्पत्ति ६७१
तत्त्वसत्कारशालिता ६९८
तत्त्वसाक्षात्कार ६९८
तत्त्वाध्यवसाय १, २, ७०१, ७११
तत्त्वानुपलब्धि ३४५
तथागत ५०३
तदतद्रूपताविरोध ५७३
तदुत्पत्ति ६१, ८५-६, ८८-८९

तद्विद्य ७००
तन्त्रप्रतिज्ञा ३३८
तन्त्रान्तर ७८
तपः ६९९
तमः ३८९
तर्क ११७, २८४-५, ३५०, ६२८, ६७९, ७८९
तर्कापरिशुद्धि ६२४
तर्काभास ६२४
तात्पर्यभेद ५९६
तात्पर्यानुसन्धान ३२८
तादात्म्य ६१, ६७, ७१, ८५-६, २१५, ४१७, ६१९, ६८९
–प्रतीति ६७
–वादी ४०३, ४४८
–विकल्प ४१९
तादात्म्याभाव ३७९
तायी १
तार्किक ६३२-३
तिरोभाव ४४८
तीर्थिक ६२, ६१७, ६४८
तुल्योपलम्भयोग्यता ३७६
तैजसत्वपरीक्षा ५३२
तैमिरिक १८८
त्रयसन्निकर्ष ५८३
त्रसरेणु ३८८, ४८३
त्रिविधदुःख ६६१
त्रैकाल्य ३५४, ३६१
–सम ७२३
त्रैकाल्यासिद्धि ३४८, ३५०-३
दम ३
दर्श २०९
दर्शन ६१७
दर्शनाभ्यास ४०
दशरथ ३०३
दशायतन ५०३
दाक्षिणात्योद्भूद ५९०
दार्ष्टान्तिक ७१६
दिङ्नाग २५८, २७०, ७४८
दिनेश्वर १
दुःख ६६१-३
–परीक्षा ६६३
–सन्तति ६६४
दुःखाभावसुखवादीन् २०९
दूषणाभास २८९, २९८, ७३७
दूषणोद्धार ३२८
दृतिहरि ४८०-१
दृष्टकारण २००
दृष्टान्त १९९, ३४३, ५२२, ६९५, ७०७, ७१६, ७१८, ७२०-१, ७५५, ७६८, ७७२, ७९१
–क्षति ५३६
–वचन २५६
–सम ७२२
दृष्टान्ताभास ७६८-९
देवयान ६६७
देवह्रदीयसौवर्णराजतपद्मदर्शन ५९०
दोष ६०९, ६७५, ७८५
–त्रैराश्य ६१३
–विभागपरीक्षण ६१२
द्रमिल ७७३
द्रव्य ६११
–विकल्प ६३
–समवाय ३६८, ५३७, ५९३
द्रव्यारम्भसंयोग २२६, ३९३
द्वन्द्व ५१०
द्वादशायतन ५०३
द्वितीयलिङ्गदर्शन ८५, ९६
द्विशोडशी ३०६-७
द्वैध ६०९
द्व्यणुक ३८७, ४५७, ५१३, ६१५

द्व्यवयव ७७९
धर्मकीर्ति ८३
धर्मधर्मिग्रहण ३४६
धर्मपरिणाम ४४८, ५८७
धर्मप्रविवेक ६९८
धर्ममूल ६६८
धर्मविकल्प ४७२, ७१८-९, ७४८
धर्मशास्त्र ७००
धर्मायतन ५०३
धर्मिग्राहकप्रमाण १४०, १९९, २००
–बाध ६४२, ७९०
धारणा १६, ६०१, ६६६
धारावाहिकप्रत्यय १९२
ध्यान ६९९
ध्वंसोपलम्भ ३७८
नकुल ७७७
नखप्रसून ३२९
नर्मदा ७७०
नवकम्बल ३३०, ३३४
नागदन्तक ४७५
नान्तरीयक १२०, ४९४
–ता ३५१, ३७०, ४२४
–त्व ४
नामरूपप्रपञ्च २१०, ६२२
नास्तिक १४८, २६६, ७११
निगमन ३५, २१४, २७८, २८०-३, ७१५, ७६२
निग्रह ७७९
–स्थान २५३, ३३३, ३३५-७, ५७९, ७०३-५, ७०७-८, ७१७, ७५१, ७५९-६१, ७६६, ७७०-१, ७७३-४, ७७९-८१, ७८३, ७८५, ७८८-९
नित्यचैतन्य २१३
नित्यत्वप्रसङ्ग ६०६
नित्यसम ७०७, ७४४-५, ७५७
निदिध्यासन १६, ६०१
निपात ७७२
निमित्तकारण १२४, ४०३, ५६२, ६४०
–विनाश ५९४
निमित्तनाशनाश्य ५९४
निमित्तनैमित्तिकभाव ६१३
निमित्तसंज्ञा १८३, ६७४
निमित्तसप्तमी २४३
निमित्तसमावेश ३५५
नियतपुरुषसमवेतनिमित्त ६०४
नियतस्वभावत्व ५७८
नियम १६, ६६६
–हेतु ४२७
नियोग ३४२
निरनुयोज्यानुयोग ३१२, ७१७, ७५६, ७८७
निरर्थक ७७३
निरवयव ६८२
निराकारविज्ञान ६८८
निरुक्त ४२०
निरुपाख्य १०१, ११८-९, ६२२
निरुपाधिसंबन्ध ३१७
निर्णय ३४३
निर्वचन १८१
निर्विकल्प ५५, ६४, ६७, १९३, ३७४, ३९७
निर्विकल्पक ४३, ४७, ७०, १९६, ४९१, ५७७
निर्विकल्पोपाधि ३९७
निर्हेतुकविनाश ५६०, ५७८
निश्चेयनिश्चायकत्वनियम २२
निःश्रेयस ५, ९, १८३, २३८, ३५०, ५२०, ६१३
निःश्रेयसाधिगम ४२४
निषिद्धाचरणदोष ४३३
निषेध ५००
निःस्वभावता ७१
नीलविज्ञान ६९१

नूतनवैशेषिक १२७
नैयायिक २७, ५१, ६२-३, ७०, ७३, १००, १०४, १०८-९, ११४, १२८, १४१, १४४, १६७, १८९, १९१, १९३, २१४, २३३-४, २५०, २५२-३, २९९, ३३२, ३६५, ३७५, ३८७, ३९४, ३९७, ३९९, ४१४, ४६३, ५०५, ५०७, ५१२-३, ५५९, ५६६, ५७०-१, ५७४-५, ६१८, ६२१, ६३२, ६४६, ६५४, ६६६, ६७३, ६७९, ६८८, ६९२, ६९९, ७५६, ७७९, ७८८
नैयायिकैकदेशी ४७५
नैरात्म्यवादिदर्शन ६७३
नोदन ३८४, ३९१, ६१३
न्याय ११८, ६१७
न्यायकन्दली ४०६
न्यायवादी ४७१, ७७४, ७८८
न्यायवार्त्तिक ३१
न्यायशास्त्र २
न्यायाङ्ग २३८-९
न्यायाभास ३२६
न्यायालङ्कार २८९, ३३८, ४३९, ४९६, ५४९, ६०८, ६७०, ७०२, ७५८, ७९३
न्यून १९९, २९५, ७७९
न्यूनतादोष ७६०
पक्ष २७०, ३१५, ७०७, ७१८-२०, ७९०
–धर्म २७१, ४१८
–धर्मता ३४, ९६, ११२, २४३, २७७, ३०८, ४१५, ५५८, ६३१, ७२०, ७८४
–धर्मत्व ४१८
–निश्चय ३१८
–लक्षण ४१८
–सत्त्व १२१
–हानि ७५५
पक्षापरिभववादी ३३
पक्षाभास ७९०
पञ्चनख २९४
पञ्चप्रस्थानन्यायमहातर्क १, २८९, ३३८, ४३९, ४९६, ५४९, ६०८, ६७०, ७०२, ७५८, ७९३
पञ्चभूत ६४३-४
पञ्चरूप ३४
पञ्चरूपोपपन्नहेतु ७६८
पञ्चशराव १२२
पञ्चावयव ३४, ७६५-६, ७७९
–प्रयोग ७०९, ७५२
–वाक्य ३०१, ७६६
पटपक्षीकरण ३८६
पटुप्रत्ययाधायकत्व २०१
पट्वभ्यासादरप्रत्यय २२१
पट्वादरप्रत्यक्ष ५९०
पत्न्यवेक्षित ६६५
पदस्मृति ३५
पदार्थ ४५४
–संसर्ग ४१५
–स्मृति ३५
पर ७८-८०, ९९, १०३, ११८, १०५-६, १९६, २११, २१३, २१८, २४३, २६०, २७८-९, २९८, ३७८, ३९३, ४७१, ४७७, ४९०, ५०९, ५१९, ५२२, ५२८, ५३३, ५६०, ५६८, ६१३, ६१७-९, ६२८, ६४०, ६६२, ७०६, ७७३
–कृति ४३३-४
–तन्त्र ५८९
परतःप्रामाण्य ४१८
परप्रानुमान ५६७

परपक्ष ७८५
–दूषण ३०८
–निषेध ३४
–स्थापना ३०४
परमपुरुष ६०९
परमपुरुषार्थहेतुता २७
परममहत्परिमाण ६८१
परमाणु १७७, १७८, १८३, १८७, १९८, २९३, ३७२, ३७५, ३८०, ३८६, ३८८, ३९१-३, ३९६, ४१९, ४४७, ४५३, ४६१, ४६६-७, ५१३, ५२७-९, ५४६, ६०३, ६०७, ६१५-६, ६२८-३०, ६८१-२, ६८४-६, ७९०-२
परमेश्वर ४३६
परसूत्र ५९९, ६१२, ६१६
परस्परापेक्षसिद्धि ४०९, ४६४
परस्पराश्रय ७९२
–ता ९६, ३७६
परापरव्यतिकर ३६६, ४०६-७
पराभिनिवेश ६१२
परामर्श ८५, १०९, १३६, ७१८, ७२७
–ज्ञान २७८
परार्थानुमान २७७
पराहङ्कारप्रशमन ७०१
परिणाम ४४८
परिप्रश्न ७४५
परिप्लव १३०
परिव्राजक ७
परिशिष्ट ७०७
परिशेष ४०४, ५९०
परिषत् ७७४, ७८२-३
परिहार ४२९
–सूत्र ७०५
परीक्षक ७१२
परीक्षा ३३७, ३४२-३, ७०३-५, ७११
–पर्व १३३
पर्यनुयोग ३४२
पर्यनुयोगोपेक्षा ७७९
पर्यनुयोज्योपेक्षण ३३६, ६८५
पर्युदास १२३-५, ६४२
पर्येषणा ६६३
–दोष ६६२
पर्षत् ७७४
पशुपाश ६५३
पाक ६३३
–ज ५९८
–जगुण ५९७
पाञ्चरूप्य २८३
पाणिनि ४२८
–सूत्रवार्त्तिककार ४१०
–स्मृति ४४८
पाणिनीयस्मरण ४२८
पातकव्यवस्था ५१९
पातञ्जल ६९९
पात्रचय ६६८
पामरप्रत्यक्ष २३
पार्श्वप्रभु १
पिठर ५९२
पिपीलिकाण्डसञ्चार ४४५
पुद्गल ५०३
पुत्रकामेष्टि ४२६
पुत्रेष्टि ४२५
पुनरुक्त ४२७, ७८०
पुराकल्प ४३४
पुराण ४३७
पुनरुक्त ७८१
–दोष ६६५
पुनर्जन्म ३
पुरुषार्थक्रिया ६०३

पुरुषाशक्तिलिङ्गदोष ३३६
पुरुषोपराग १९६
पुरोडाश १२२
पूर्वपक्ष ४३५, ६२१, ६९९
  —त्व ३६४
  —वादी ६७७
  —सूत्र ६५४
  —हेतु ६१३
पूर्वपक्षी ४२३
पूर्वभावनियम ३५८
पूर्ववत् ३७२, ४०४
पूर्वापरजलधि ११०
पृषदाज्य ४३३-४
पृषदाज्याभिधारण ४३४
पौरुषेयत्व ४३७
पौष्टिक ४३७
प्रकरण ३१५, ३२०, ४१२
  —जिज्ञासा ३१५
  —संगति ५५०
  —सम ३१४-६, ५२२, ७०९, ७१४, ७३१-२, ७३४, ७५४
प्रकृतहान २७३
प्रकृति ४७१, ६०६, ७८८
  —भेद ४७१
  —विकार ४७२, ७८८-९
प्रचय २१८, ४०६
  —काष्ठा ६९८
प्रज्ञाकरगुप्त ४०४
प्रणिधान ५८५
प्रतिघातिद्रव्यसंयोग ४६५
प्रतिज्ञा १८१, २४८-९, २८०-२, २९३, ३५०, ४२५, ५०५, ५०७, ५२९, ५५५, ५७९, ६२९, ६३८, ६४६, ६५१, ६५८, ७०७, ७१८, ७४३, ७५९, ७६५-७०, ७८०, ७८३, ७८८-९
प्रतिज्ञातार्थविरोधक ७८८
प्रतिज्ञादोष २४९
प्रतिज्ञान्तर ३०२, ७६५-६
प्रतिज्ञान्यून ७७९
प्रतिज्ञाविरोध ३०२, ६२५, ७६६-९, ७८८-९, ७९२
प्रतिज्ञासन्न्यास ७६९
प्रतिज्ञाहानि ३१, ३०२, ३३५-६, ७०७, ७५९-६३, ७६६
प्रतितन्त्रसिद्धान्त २४१-३
प्रतिदृष्टान्त ७२५-६, ७०७
  —सम ७२५
प्रतिपक्ष ३१५
प्रतिपत्तिभेदव्यवस्था ४११
प्रतिपत्त्यनुबन्धिता ६५
प्रतिबद्धस्वभाव ८८
प्रतिबन्दी ३३, ७१, ६२५
प्रतिबन्ध ८५-६, ८९, १४७, ३१५-६, ५७२
प्रतिबन्धक ४५०
प्रतिबन्धनिश्चय ८६, ८९
प्रतिबन्धापगम ६०२
प्रतिभास ६९, ६२०
प्रतियोगिपरतन्त्र ५००
प्रतियोगी ३७७, ४४४, ५००, ५०६, ७८९
प्रतिरोधचोदनाभास ७२५
प्रतिवादी ७०३, ७०६, ७३१, ७५९-६०, ७६३, ७७४, ७७९, ७८२-३, ७८८
प्रतिवाद्यप्रसिद्धाश्रयविशेषणविशेष्य ३०६
प्रतिवाद्यसिद्धता ३०६
प्रतिसंख्या २७०
प्रतिसन्धान १५४, १५६-८, १६०-२, १६६-७, ५१३-५, ५२०, ६१०
  —ज्ञान ७०

—नैयत्य ५८८
प्रतीतिपर्यवसान ४१६
प्रतीतिबाध २०१
प्रत्यक्ष २९३, ४१४, ४४२-३, ५०१-५२१, ६१६, ६५९, ६७३
—परीक्षा ३६४, ४०३-४
—प्रामाण्य ६१५-६
—बाध ३९०, ५७४
—बाधित ५७४
—लक्षणपरीक्षा ३७०-१
—विरोध ७६८
—सम ७५६
—सामग्री १०
प्रत्यक्षाभास ७५२
प्रत्यनीकधर्म ३४५
प्रत्यनीकभाव ६१२
प्रत्यभिज्ञा ४५२, ५१६, ६५९
—प्रत्यय ५०८
प्रत्यभिज्ञान ६१, १५५-६, ३५७, ४५३, ५१४, ५१६, ५१८, ५३०, ५५१-३, ६३६
प्रत्ययनानात्वाभिमान ५५५
प्रत्ययव्यवस्था १९७, ५८९
प्रत्यात्मव्यवस्थान ६०४
प्रत्यासत्ति ४०५, ४०६, ५१८
प्रत्याहार ६०१, ६९९
प्रदेश ३८६
प्रदेशी ३८५
प्रधान ६०५, ६२३, ६२८, ६५९
—विकार ४४८
—विवर्तवाद ६२२
प्रध्वंस ३७७-८, ४६०, ५६३, ६२१, ६४१
प्रध्वंसाभाव ४५६
प्रभाकर ३९, २४१, ६५८, ७६८, ७८९
प्रमा ७८०
प्रमाण ३४१-३
—चतुष्ट्वपरीक्षा ४४५
—तन्त्र २४८
—परिकरता १७
—परीक्षा ३६४, ४९७
—संप्लव ५५७
—सामान्यपरीक्षा ३६३
प्रमाणान्तरोपनयप्रयासोद्भाव्यनिग्रहस्थान ७८८
प्रमाणापदेश ७२६
प्रमाणाभ्यनुज्ञा २८४-६
प्रमाता ३४१
प्रमिति ३४१
प्रमेय ३४१, ३४३
—परीक्षा ४९८
प्रयत्न ३८४, ७०१
प्रयत्नानन्तरीयकत्व २७०, ७३०, ७३४-५, ७३८-९, ७४७, ७५०-७५१
प्रयोगनियम ४८१
प्रयोजन ३४३
प्रयोजनाभिसंबन्ध ४१
प्रयोजकत्व ७२१
प्रयोजकव्यापार २०५
प्रयोज्यव्यापार २०५
प्रलय ६८१
प्रवर्तकप्रत्यय ४२८
प्रवाहानन्तता १२०
प्रवृत्ति ६०९, ६७३
—ज्ञान १५९
—निमित्त ११२, १८३
—विज्ञान १५८, १६०, १६७, ६९१
—सामर्थ्य १४
प्रसंख्यान ६७६
प्रसङ्ग ६७, २८४-५, ३१७, ३३३, ३६६, ४०७, ४५२, ४५३, ४६०, ४६५, ४६८, ४८३, ५१५, ५१९, ५३०, ५३६, ५५६, ५६४,

५७१, ५७३-४, ५९६, ६०६, ६१५,
६२१-२, ६९९, ७१२, ७१६, ७२६,
७३०
–तद्विपर्यय ५९६
–विपर्यय ३८०, ५७१
–सम ७०७, ७२५
–साधन ३८०
–सिद्ध ६०९
प्रसङ्गाभास ५१८, ५६९
प्रसज्यप्रतिषेध ४२५
प्रागभाव २६१, ३७७-८, ४०८, ४४४, ४५५,
४६०, ४६४, ६१७, ६२१, ६५९,
६७२, ६८३
–विरह ३७८
प्राणायाम १६, ६९९
प्रादेशिक ४५१, ५८८
प्राधानिकत्व १२३, ५५५
प्राप्तिसम ७२३-४, ७५६, ७६०
प्राप्यकारित्व ४९
प्राभाकर २११
प्रामाण्य ४३८
–ग्रह १६
–निश्चय ९, ४३८
प्रायण ६१४
प्रायणानुपपत्ति ६०६
प्रायश्चित्त ४३७
प्रावादुक ३४९
–दर्शन ७००
प्राश्निक ३००
प्रासङ्गिकविचार ७१५
प्रासर्पक ५९१
प्रेत्यभाव २०४, २०६
–प्रकरण ६१५–६
–सिद्धि ६१५
प्रैष ६४६
फलपरीक्षा ६६०
फलानुबन्ध ६९८
फलान्वयानुपपत्ति ७७२
फलोद्देश ४२८
बाध ३२६, ३७५, ३८१, ४६२-३, ६३२-३
बाधक ५०५
–प्रमाण ३८१
बाधचोदनाभास ७१७
बाधना ६६२
–बुद्धि २०८
–योग ६६३
बाधप्रतिरोधभावना ७५२
बाधाभास ७३१
बाधित ३९०, ४३७, ५३६, ७०९, ७६७
–पक्षैकदेशता ५३६
–विषय ७९०
बाध्यबाधकत्व ३४
बाध्यबाधकभाव १२, ३४
बाह्य ५०१-२
–विशेषगुणजातीय ५९८
बाह्यार्थवादी ६९१
बाह्यार्थव्यवस्था ६९६
बुद्धितत्त्व ५८१
बुद्धिलक्षणसूत्र २१
बुद्धिसमानाश्रयत्व ६११
बुद्ध्यनित्यता ५५७, ५८१
बुद्ध्यात्मगुणत्व ५८१, ५९१
बृहस्पति ३८
बौद्ध २८, ३२-३, ४९, ५१, ६९, ७०, ७४, ७६,
८७-८, ९०, ९२, १०१-२, १०४-९,
११४, १४३-५, १४७, १५५-९, १६१,
१६६, १८६-९, १९२, २१५-६, २४२,
२४९, २६६, २९९, ३०१, ३०६, ३०८,
३४४, ३५२, ३७२, ३७४-५, ३८१,
३९९, ४२७, ४३५, ४३७, ४८६, ४८९,

५००, ५०३, ५०५-६, ५११, ५५८, ५६३-४, ५६६-८, ५७२-५, ५७७, ६१४-५, ६१९, ६२६, ६४१, ६५२, ६७७, ६७९-८०, ६८४, ७२२, ७६३, ७६७, ७७५, ७७९, ७९०
—सूत्र १४२
बौद्धागम ५७२
ब्रह्म २१०-१, ६२२-३
—काण्ड ३
—परिणाम ६२३
—लोक २०९
—विवर्त ६२३
—संस्थता ६६४
—हत्याव्रत ४३३
ब्रह्माद्वैत ६२२, ६५१
ब्रह्मोपादान २११
ब्राह्मणकार ६६७
भक्ति ४५६
भट्ट २४१
भदन्त २५८, ३२७, ५०३
भागबाध ७०८
भागासिद्ध ७०५, ७३८
—ता २६, ३०, ४१४
—त्व १७९
भागासिद्धि ६३०, ६४७
भाण्डालेख्य ७६७
भावना ४७६, ५११, ७७२
भावविरह ३७८
भावानुवृत्ति ५६३
भावाभाव ३७९, ३८७
भाष्य ३, २९, ३१, ३८, ४०, ४६-७, ५३, ५६, ६०, ९९, १२४-५, १३३, १४८, १८१, १९६, २२२, २३५, २३७, २५१, २७५, २८०, २९५, ३०२, ३१२, ३२६, ३३२, ३३४-७, ३४०-१, ३४४, ३४७-८, ३५२, ३५४, ३५९-६०, ३६२, ३६५, ३६८, ३७१, ३७३, ३९२, ३९५, ४०५, ४०९, ४११, ४१८, ४२५, ४३५, ४४९, ४५९-६१, ४६३, ४६५-६, ४७०-१, ४७४, ४७९, ४९३-४, ४९९, ५११, ५१४, ५२०, ५२४, ५३२, ५३७, ५३९, ५४४-६, ५५३, ५५५, ५५८, ५८२, ५८४, ५८६, ५८८, ५९१, ५९४, ५९७, ६०१, ६१५-६, ६२३, ६२६, ६४४, ६४६-७, ६६६-८, ६७०-२, ६७६, ६८१, ६८७, ६९५-६, ६९९, ७०४-६, ७१२, ७१४-७, ७२५-६, ७३१, ७३७-४१, ७४७, ७४९-५०, ७५९, ७६३, ७७०, ७७४, ७८८
—कार ७७-८, ११५, १२६, १५०, १९६, १९८, २५१, २८७, २९४, ३१३, ३३२, ३३६, ३४६, ३९५, ४३५, ४४२, ४४४, ४५९, ४६१, ४६५, ४७२, ४९४, ४९७-८, ५१२, ५३५, ५३८-९, ५४७, ५८९, ६४४, ६६०, ६९८, ७०६, ७१२, ७४१, ७४४, ७६३, ७७४
—कृत् १७, २८, १५०, १६२, २२१, २२९, २३४, २५१, २७५, २८७-८, ३०२, ३१०, ३१३, ३६५, ३७०, ४११, ४१८, ४४५, ४५९, ४९४, ५०८, ५८१, ५९१, ६१६, ६४१, ६४५, ६६८-७०, ६९८, ७४७, ७४९-५०
भाष्यानुसारी ८४
भिक्षु ५६५
भिन्नाधिकरण ५०५
भूतचैतनिक ५११, ५८८-९,
भूतचैतन्य ५११, ५८९

भूतलक्षण ५६१
भूतसूक्ष्म ६१५
भूतस्वभाव ५६०
भूतार्थोपदेशकत्व १४३
भूतोपादानत्व ३७५
भूमेरावपनवाक्य ४२७
भूषण २४२
—कार १३३-४
भेदप्रतिपत्ति १३३
भेदाग्रह ५०२
भोगादिकरणत्व ५२७
भौतिक ५३२
भौतिकत्व ५४२
—परीक्षा ५३२
भ्रान्तोत्तरनिग्रहस्थान ७८५, ७८७
मतानुज्ञा ३३६, ७१७, ७५०-१, ७८५
मनआयतन ५०१
मनःपरीक्षा ६०१
मनःसन्निकर्ष २०३
मनोव्यतिरेकपरीक्षा ५१९
मन्त्र ४३६-७
मस्तु ४९५
महत् ४०१
महाभूत १८९-९०, ३८८
महावाक्य २९२, ४६०
महासामान्य ४५४
महेश्वर ४२८
माध्यमिक १९, ३९
मानसप्रत्यक्ष १५, ९७, ५९८, ६११
मानसप्रवृत्ति ४२९
माया ६८७
मिथ्याज्ञान ६७०, ६७२-४
मिथ्यात्व ६८७
मिथ्यादृष्टि ५०३
मिथ्याप्रतिपत्ति ६१२
मिथ्याप्रत्यय १८८
मिथ्योपलब्धि ६९५
मीमांसक ७९, ११८, २१६, २३३, २५२-३, २८८, ३१४, ३३२, ३८८, ४१४, ४२०, ४४७, ४६४, ६२१, ६२३, ६३३, ६३८-९, ६६५, ६८९, ७६५
मीमांसानय २११
मुख्यार्थबाध ४८२
मुनि २, ४, ६८०
मूढप्रश्न १०४
मूर्त ४९५
—समवाय ६११
मूर्ति ४९३-४
मैत्रेयी ६६७
मोक्ष ६७२
—विद्या ७११
म्लेच्छ ७७८
—भाषा ७७६
यथार्थानुभव २०
यथेष्टविनियोगयोग्यता २९६-७
यम १६, ६९९
यान ६०९
यायजूक ४२५
यावच्छरीरभावित्व ५९६, ५९८
यावच्छरीरभावी ५९७
यावद्द्रव्यभावित्व ४५७-८, ५९७
युक्तिगम्य ६२१
युक्तिशास्त्र ६२१
युगनद्धवाही ७०७
युगपज्ज्ञानानुपपत्ति ६०१
युतसिद्ध १२३, ३७६
योग १०६
योगजधर्म ५१९
योगजप्रत्यक्ष १४०
योगर्द्धि ५८१

योगशास्त्र ६९९
योगशास्त्रकृत् ५९०
योगाचार १९, ७००
–मत ६६
–विधान ६९९
योगाभ्यास २१५, ६९८
योगचित्त १६६
योगिप्रत्यक्ष ५१९, ५८०
योगी १७८, ४३६, ६०३, ६६७
योग्यता ४१५
योग्यदर्शननिवृत्ति १०९
योग्यानुपलब्धि ७५४
यौगपद्यविकल्प २२६
रजः ३८९
रण्डान्तःकरण ५८२
रसायन ४३७
राजतुला ६
राम ३०३
रुचक ४७०
रूढयौगिक १८१
रूपस्कन्ध ५०३, ५०७
रूपोपलब्धि ४४, १४७, ३६७, ३८७, ५३३
लक्षण ३३७, ४९८, ५३२, ६०९
–परिणाम ४४८
–परीक्षा ४९७
–माला २८५
–सूत्र १७९
लक्षणा २२१–२, ४८२, ५७७, ६१६
लक्षणानुपपत्ति ३४२
लक्षणाबीज २२३
लक्ष्मीतिलकोपाध्याय १, २८९, ३३८, ४३९, ४९६, ५८९, ६०८, ६७०, ७०२, ७५८, ७९३-४
लाक्षणिकवाद ६५४
लिङ्गज्ञान १९९
लिङ्गदर्शन ८४-५, ६६५
लिङ्गधर्म ७८४
लिङ्गपरामर्श ३६, ९८, १२७, २७८, ३७३
लिङ्गलिङ्गिसंबन्धदर्शन ८४
लिङ्गविकल्प १४१
लिङ्गिविकल्प १४१
लोकपक्ति ६५६-७
लौकिक ३४६, ७२२
वपा ४३३
वर्ण्यत्व ७२१
वर्ण्यसम ७१८-९, ७४८
वर्तमान ४०८-९
वर्धमानक ४५०
वाक्छल ३२८, ३३३-४, ५२९, ७५७
वाक्यशेष ७७७
वाक्यार्थप्रतिपत्ति १२६
वाक्यावयव ४२१
वाजिन ४९५
वाद ३४३, ७१०-१, ७१७
वादविधानटीका २५०
वादस्थान ३००
वादी ७०३, ७०६, ७३४, ७३६, ७३८, ७४१, ७५९-६०, ७७४, ७८२-४
वाद्यसिद्धता ३०६
वार्त्तिक-प्रायशः
–कार ९, १४२, १८०, १८७-८, २३४, २४६, २५१, २९४, ३०७, ३६१, ३६५, ४३५, ४९८, ५२३, ५९०, ६४४, ७७९
–कृत २, १०, ३१, ३७, ७८, ८१, ९९, १४२-३, १४८, १५१, १८७, १९२, १९६, २११, २२२, २२४, २२९, २६०, २७४-५, २८८-९, २९२, ३०२-३, ३१३, ३१६, ३४०, ३४८, ३६२, ३८३,

३८४, ३९२, ४००, ४०४, ४१८,
४३५, ४४५, ५१५ ५३७, ५३९,
५४८, ५५३, ५८७, ६११, ६१६,
६४५, ६५०, ६७६, ६८१, ६८८,
७०६, ७१६, ७२८, ७३२, ७३६,
७४७, ७६३, ७६७-९, ७८९

वाल्मीकि ६६८

वासना ७४, १०५, १५२, १६७, १८३

–परिपाक ६४, ६९०

विकल्प १७, ६६-७, ७०, ७२-३, ७६, ८५, ९०, १०१, १०५, १५२, १५८, १६८, १७६, २०२, २७५, ३२३, ३४२, ३७६, ४२५, ४८७-८, ४९०-१, ५००-१, ५८५, ७०३-५, ७०७, ७२८, ७३३, ७३७-८, ७४२, ७४४, ७५२, ७५४, ७५६-७, ७७३, ७७९

–ज्ञान ६९

–प्रभवोत्कर्षसम ७२२

–विज्ञान ४८८

–सम ४७२, ७५१, ७५४

विकल्पासहत्व ६९७

विकार ७८८

विकारविकारिभाव ६१९

विक्षेप ३३६, ७८३-४

विग्रह ६०९

विचाराभास ५६९

विजिगीषु ७८५

विज्ञाननय ६६

विज्ञानवादी ६७६, ६८२, ६८८, ६९०-२, ६९६

विज्ञानव्यक्ति २१२

विज्ञानस्कन्ध ५०३

वितण्डा ३४, ३:३, ७०१, ७०८

विद्या ६७६

विधि ४२७, ४२९, ४३३-४, ४४१, ४९०, ५००

–रूपता ४८९

–वाक्य ४३१

–सहकारिता ४३२

विन्ध्य ७१, ३८८

–वासी ५०७

विपक्ष २७०-१, ५६८, ५०८, ७१४-५, ७९०-१

–ता ७९१

–दृष्टान्त ७९१

विपक्षैकदेश ७९१

–वृत्ति २६३ ३०५

विपक्षावृत्तिमत्त्व १२१

विपरीतख्याति ३७२

विपरीतप्रतिपत्ति ७८७

विपर्यय ६७, २२६, ५७१, ६२४, ६२८, ६७५, ६९९, ७०७, ७४२

–ज्ञान ३१४

–शङ्का २८५

विप्रकर्ष ४०८

विप्रतिपत्ति २४५, ३३६-७, ३४७, ५३२, ६०१-२, ७२९, ७५९

विभाग १८३ ३८४

विभागजविभाग २२५

विभागसूत्र ९९

विभागोद्देश ४४६, ७४४

विभुकार्य १९९

विभुत्व ७१२

विभुद्रव्य ३६८

विरुद्ध २५६, ३०८, ३३२, ३६३, ३८२, ३८६, ४००, ५५२, ५६१, ६३०, ६४८, ६८५, ७१९, ७६०, ७८९, ७९१

–चोदनाभास ७१९

–ता ३०

–त्व ३६३, ७८५

–धर्मसंसर्ग ४५३, ५७८

–धर्माध्यास ७०, ३५७

—धर्मोपसंसर्ग ३७४
—व्याप्तोपलब्धि ५२८, ५६२
विरुद्धाव्यभिचारी १२२, ३०८, ३४४, ७४२
विरोध ३१०-१, ३७८, ३८१, ३९६, ४२८, ५६१, ६४६, ६५९-६०, ७४०, ७८९
विरोधोद्भावन ५५२
विवर्त ६२२
—वादी ६२२
विविक्तप्रत्यक्ष ४३
विवेकज्ञान ६२५
विशिष्टबुद्धि २२३
विशेष १६८, १६९-७१, ३१९, ६११
—गुण ५९७
विशेषणता ११९
विशेषणन्यूनता ७६४
विशेषणविशेष्यभाव ६२, ७०, ११७, १३५, ४१७
विशेषणविशेष्यव्यवहार ७४
विशेषणासिद्धि २६५
—दोष ४६०
विशेषदर्शन ५६०-१
विशेषलक्षण ४३
विशेषविधि २७५
विशेषविरुद्धचोदनाभास ७१७
विशेषविरुद्धत्व ५०७
विशेषव्याप्ति ५०
विशेषापेक्ष ३४५
विशेषोपसंहार ५०
विश्वजित् ४३३
विषमव्याप्ति २७६
विषय ११७
—तृष्णा ६६५
—स्वाव्यतिरेक ५४१
—प्रतिनियम ६९०
—व्यवस्था ५१६
—व्यासङ्ग ६०१
—सप्तमी २४३
—सुखसंवेदन २११
विषयोपधान २१२
विषयोपराग १६७, १९६
विसभाग ५६५
वीत २६५
वृक्षायुर्वेद ६५८
वृत्तिकृत् ३६०
वृत्तिनिवृत्ति ३७३
वृत्तिविकल्प ३८१, ३९८, ६७८, ६८१
वृत्तियौगपद्य ४८४
वृत्त्यविरोध ३९१
वृषभेश १
वेग ३८४
—वतीच्छद ६६३
वेगाख्यसंस्कार ५९६, ६१३
वेद ४३७-८, ६२४, ६६६, ६६८, ७७७
वेदनास्कन्ध ५०३
वेदप्रणयन १३८
वेदप्रामाण्य ४२४, ४३५, ४४६, ६५७
—वित् ३३६
वेदवाक्य ४२८, ४३३
वेदान्ती ३९
वैतण्डिक ३४
वैदिक ४४६
वैधर्म्य १७९, ५९९, ७१५, ७४३, ७६२
—विप्रतिपत्ति ७२९
—सम ७१२
—हेतु २६२
वैनयिकबुद्धि ९
वैभाषिक २७०, ६४६
वैयधिकरण्य ४४, ४६२
वैशेषिक ५१, ९२, १३०, २२७-८, २३६, ३१९, ३२१, ४०६, ४५७, ४६५, ६४९, ७९०

—विरोध ४६५
व्यक्त ७८८
व्यक्ति ४५४, ४७५, ४८०-५, ४९८, ७७१
व्यतिभेद ६८२
व्यतिरेक १९५, २३३, २६८-९, २७६-७, २७९-८०, २८६, ३०९, ३६६-७, ३८२, ३८९, ४१२, ४२५, ४३०, ४३८, ४५०, ४५४, ५६७, ५९६, ५९९, ६०५, ६१७, ६६०, ६७९, ६८४, ६८८, ७४९, ७७६, ७७९, ७९०
—गति २६६
—निश्चय ८
—निषेध २६९
—प्रतिषेध ६९२
—प्रतीति ६९२
—व्यभिचार २३६
—सन्देह ५७२
—सिद्ध ३६८
—हेतु २८०, ५१६, ५२०
व्यतिरेकिदृष्टान्त ५९, २६७
व्यतिरेकिप्रयोग ५४०
व्यतिरेकिलिङ्ग २८६
व्यतिरेकिसाधन २६८
व्यतिरेकिहेतु ३६८, ४९८
व्यतिरेकी ७, २६५, २६८, ३९३, ४०४, ५०२, ५४०, ५९९, ६१७
व्यतिरेकोदाहारण ५५८
व्यतिरेक्यनुमान २८६
व्यत्यय ७१५
व्यधिकरण ४१५
—ता ३८९, ६४८
—विशेषण ३०६
—विशेष्य ३०६-७
—सन्दिग्धविशेष्य ३०६
व्यधिकरणासमर्थविशेषण ३०६
व्यधिकरणासमर्थविशेष्य ३०६
व्यपदेश ५७, १८७, १९१, १९४, ३६१, ३८६, ३९५, ४७७, ४८५, ४९३, ४९५, ४९८-९, ५०४, ६६२
व्यपदेशक ८०
व्यपदेश्यत्व ४०८
व्यभिचार ३२-३, ११५, १७३, २१५, २३०, २४८, २७२, ३२५, ३७३, ४१४, ५३३, ५४३, ५८१, ६१६, ६२०, ६४६, ७१२-३, ७८०
—निवृत्ति ४६०
—परिहार ४१२
—प्रसङ्ग ४३१
—व्यभिचार ४०५
व्यभिचाराशङ्का ४२, ८६, ८८-९, ५७७
व्यभिचारित्व ४०५
व्यभिचारोद्भावन ७२
व्यभिचारोपलम्भ ९५
व्यवच्छेद ७५-६, ११०, १७१, १९१-२, ३८४
व्यवच्छेदक ८१
व्यवच्छेदहेतु २२०
व्यवच्छेद्य २७३
व्यवस्थितविभाषा २७८
व्यवहितविवाद २५३
व्याकरण ७७, ३६०
व्याख्यावक्रता ४५८
व्याघात १८४, १९०, ३५३, ३९८, ४२७, ४८७, ६५१, ६८३-४, ७२६
व्याजोत्तर ७८३
व्यापकद्रव्यसमवाय ५८०
व्यापकानुपलब्धि ६३२, ६३४, ७१७
व्यापारावेश १९६-७, ७७२
व्याप्ति ३२, २७७, ३७५, ३८०, ५५८, ५७८, ६३१, ६४१, ७१२, ७१५-७, ७१९

—ग्रह २४१, ४४३, ७१८
—ग्रहण ४२
—ग्रहणाभाव ७८९
—ग्राहकप्रमाण ११६
—बाध ३१४
—भङ्ग ३३
—साधन ५६८
—स्मरण ८५
व्याप्त्यवधारण ५५२
व्याप्यत्वासिद्ध ७९१
—चोदनाभास ७१९
व्याप्यत्वसिद्धि ७१८-९
व्याप्यव्यापकभाव ९०, ७४८
व्यास ६६८
व्यासक्त २०१
व्यासङ्ग २०१, ५५५
व्याहत ६८२
व्रात्य ३३१
शक्र ५४१
शङ्काशेष ५८६
शङ्कासूत्र ६०५
शङ्कितोपाधिकत्व ८६
शबरस्वामी १३२
शब्द २९३, ४२०, ४२३
शब्दनित्यत्व ५१३
शब्दपरिणाम ४७४
शब्दपरीक्षा ४४६
शब्दप्रवृत्तिनिमित्त ३५१
शब्दविशेष ४३९
शब्दशक्ति ४८३
शब्दशास्त्र ३६१
शब्दसन्तान ४६७
शब्दसामान्य ४२२, ४७९
शब्दानित्यत्व ४६९, ४७५
शब्दान्वाख्यान ४७४
शब्दाभिलाप ४५२
शम ३
शरीरगुणव्यतिरेक ६००
शरीरपरीक्षा ५३१
शरीरव्यतिरेक ५१३
शाक्य ५११-२, ७०१
शान्तिक ४३७
शाबर ६७८
शाब्दवृत्ति ६९९
शास्त्र ४, ५, २७, २१६, २६६, २८८, ३४३-४, ४४२, ५१२, ५१५, ५२०, ७९२
—कार ३०३
—कृत् ३४३
—फल ५९०
शास्त्रान्तर २३६
शास्त्रार्थ ७९२
शिवमुष्टि २, ७१९
शून्यता ६१७-८, ६२०-१
—वाद ६५१
शून्यतोपादानता ६२०-१, ६४१
शृङ्गग्राहिका ७७४
शेषनिषेध २७५
शेषवत् ३७२, ४०४
श्रीकण्ठ १
श्रीवत्स ३३९
श्रुघ्न २४७
श्रुतयाग ६५८
श्रुतसिद्धि ६५७
श्रुति ४३२, ६२३, ६६५
श्लोकपाठ ७८३
श्वेतकर १
षट्पदार्थ २१५
षट्पक्षी ७०६, ७५०-१, ७५८
सङ्कल्प ४२९
संकेतग्रह १३७, ४२१, ४७६

संख्यैकान्त ६५१, ६५३, ६५५
संगति ६०९
–ग्रह ४१३
–प्रतिसन्धान ४२८
संग्रह ३९३-४
–वाक्य ३९७
संघातपरार्थत्व ५०८
संचितकर्मोपभोग ५८२
सजातीयारम्भकत्व ११५
संज्ञासंज्ञिसंबन्ध १३०
संज्ञासमावेश ३५५, ३५९
संज्ञास्कन्ध ५०३
सत्कारणविनाश ५६५
सत्कार्यवाद ६०६, ६५८
सत्ता ६५५
–समवाय २५६ ५६६, ६६०
–सामान्य ५६६
सत्त्व ३८९
–लक्षण ५६६
सत्प्रतिपक्ष ३४, १४०, २३३, २५६, ३०३, ३१४, ६६२, ७१३-५, ७१७
–चोदनाभास ७०३
–ता ३४, १३९
–त्व ३४, ३१५, ३४७
सत्यलोक ६६२
सत्यवतीसुत ६८०
सदन्तरसंबन्ध ७२
सनक ३३१
सन्तानान्तर ६९१
सन्तानी ६७०
सन्दिग्धविपक्षवृत्तिता ५७४
सन्दिग्धविपक्षव्यावृति ६९४
सन्दिग्धविशेषण ३०६
सन्दिग्धव्यतिरेकानैकान्तिक ४८९
सन्दिग्धव्यतिरेकित्व ४८९, ५६९, ५७६
सन्दिग्धानैकान्तिकत्व ५०
सन्दिग्धाश्रयत्व ६१२
सन्दिग्धासमर्थविशेषण २३२
सन्दिग्धासिद्ध ३२५
–त्व ४६४
सन्दिग्धासिद्धि ७४७
सन्धि ६०९
सन्निकर्ष ७९, १२७, १८१, १९६, १९७, ३५०, ३६६, ३६९, ४०८, ५१४, ५३६, ५४२, ५८२
सन्निकर्षोत्पत्ति ५८१
सन्निधि ४१६
सपक्ष २७०-१, ५६८, ७०८, ७१४-५, ७१९, ७३६, ७९१
–दृष्टान्त ७९१
–व्यावृत्ति ७९१
सपक्षैकदेश ७९१
–वृत्ति २७०
–वृत्तित्व ४६१
संपातायात १७४, ५३६
सप्तचित्तधातु ५०३
सप्तदशावर ५९१
सप्तमरस २२१
सप्रतिघ १६५
सप्रयोजनाभिसंबन्ध १
संबन्धव्यभिचार ४०२
सभाग १६४
–क्षण १६५
सभापति २४५, ७८३
समाक्षोभ ७८२
संभवद्विद्याचरणसंपत् ३३१-२
संभूयकारिता ६९८
सभ्य २४५, ७८३
समनन्तरप्रत्यय ५०, ६४, ६९, १५३-४, ५०३, ६८९

समयग्रह १९६, ४१३
समयाध्युषित ४२४, ४२६
समर्थजातीयत्व ५७२
समर्थप्रवृत्ति १३
—जनकत्व ८, २६
समवाय ४१, ४५, ७८, ११८-२०, १४४, १६८-७१, १७५, १७८, १८२, २०५, ३१९-२०, ३५६, ३६८-९, ४०७, ४१७, ४४९-५०, ४५३, ४६८, ५१३, ५३०, ५३६-७, ५५९, ५८०, ६११, ६७९, ६९३, ७४५
—संबन्ध ५०५
समवायिकारण ११५, १२४, १७५-७, २६४, २६७, ३५८, ३७३, ३९१, ४०३, ५२७, ५५९, ६४०, ७०२
—त्व ४७०
समवायित्व ३६८
समवायिनी ४०७
समवायी ३८०, ४६८, ६७९
समवेतसमवाय १८२
समव्याप्तिक २९, १७०, २७६
—त्व ४६१
समाख्यानिर्वचन ४३
समाधानसूत्र ५९७
समाधानाभास ३२८
समाधि ६९८, ७००
—प्रत्यनीक ६९८
—योग ७००
—व्युत्थान ६९७
समानतन्त्रसिद्ध २४२
समानधर्मोपपत्ति ७२९
समानयोगक्षेमत्व १५३
समानाधिकरण ५०५
समानोपाधि ४३२
समुच्चय १२१, १२३, १८१, २७५, २७८, ३५५, ३९८-४००, ४३५, ४७९, ४९२, ६४५, ६५२, ७०३, ७५७, ७६१, ७९२
—निवृत्ति ३९८
—पक्ष ५४७
—वादी ५४६
समुच्चित ३९५
समुदाय ४०१, ६७२
संमूर्च्छना ५८०
सम्यक्प्रत्यय १८८
संयुक्तविशेषण ३८७
—त्व ७०
संयुक्तसमवाय ७७, ४०६-७ ५३६
—सन्निकर्ष ७६
संयुक्तसमवेतविशेषणत्व ५३६
संयुक्तसंयोग ५६०, ६१३, ७२४
संयोग १४४, ३८९, ३९३, ४१७
संयोगजसंयोग १२०
सरस्वती ७५८
सर्वजित् ४३३
सर्वज्ञ ७२, १५७-८, ६३८
—त्व ४३६
सर्वज्ञैकविज्ञान ६२
सर्वतन्त्रसिद्धान्त २४५
सर्वनास्तित्ववादी ७६७
सर्वनित्यतानिषेध ६४४
सर्वपक्षीकरण ७९०
सर्वपृथक्त्व ६४६
सर्वव्याप्ति ७४४
सर्वाग्रहण ६७७
सर्वानित्यता ६४२
सर्वाभाव ६५०
सर्वाभिसमयसूत्र ५०३
सर्वेन्द्रियव्यापकत्व ५८६

सर्वोपसंहार ३२
–वती ५६८
सर्वोपाख्यारहित ९२
सविकल्प ५९
सविकल्पक ४३, ४७, ५४, ६३, ५०३, ५७७
संवेदन २१३
सव्यभिचार ३०९, ३१५, ३२५, ५९५
संशय ३४०-४४, ४४६, ४६४, ६६१, ७३०, ७९१
–ज्ञान ७७
–परीक्षा ३४०, ३४७
–व्युदास २४६, २८८, ७००
–सम ७२९-३०, ७३४
संश्रय ६०९
संसारप्रध्वंस ६०६
संस्कार ४७६, ५२४-५, ६५८
–सन्तान १६७-८
–स्कन्ध ५०३
संस्थानविशेष ६५९
सहकारिकल्पना ४६८
सहकारिता ४३३
सहकारियोग्यता ३९६
सहकारिविरह ३२२, ५७०-१
सहकारिशक्तिविनाश ४५०
सहकारिसाकल्य ४२
सहकारिसामर्थ्य ३५
सहकारी ६९८
सहकार्यभाव ५७०
सहानवस्थानव्यभिचार ४०२
सहासंभवलक्षणविरोध ४५
सहेतुकविनाश ५७८
सहोपलम्भ ३११, ४०३, ६९४
साकारज्ञान ६८९
–वादी ६९०-१
साकारविज्ञान ६८८
साक्षात्कारिज्ञान ५१८
साक्षात्कारित्व ५१८
सांख्य १९६, २१६, २४२, ३१२, ३८३, ३८७, ३९९, ४४८, ४५१, ४५५, ४६७, ४७१, ५३१, ५४३, ५५०-१, ५५४-६, ५७९, ५८१, ५८७, ६४१, ६४४, ६६१, ७०१, ७६४, ७८८
सादृश्य ४९०
साधकबाधकत्व २२०
साधकबाधकप्रमाण २२०
साधन २८४
–धर्म ३७२
–वादी ३४, ७५१
–विकल ३२१, ३३२, ७६८
–विपर्यय ७४२
साधनाङ्गवचन ७६०
साधनान्तराभास ७५६
साधनाभास २९८, ३१४, ७११, ७१५
साधनाव्यापकता ९४
साधनाव्यापकत्व ६६
साधनाव्यावृत्तविपक्षदृष्टान्त ७९१
साधर्म्य ४११, ७१५, ७२१, ७४३, ७६२
–सम ५२२, ७०९-१०, ७१२, ७२९, ७५४, ७५६
साधारणानैकान्तिक २७१, ७९१
साध्य ७१६, ७२१
–धर्म ७१८-२०
–धर्मी ७१९
–निर्देश २८३
–विकल २४१, ३३२, ३७४-५, ६३०, ६९५, ७१८, ७२१, ७३४, ७६०, ७६२, ७६८, ७९०-२
–विकलता ७६२, ७९१
–विकलत्व ३७५
–विपर्यय ३३, ३१४, ३२९, ७४२

–विरुद्ध ७८९
–विशेषणन्यूनता ७६४
–वैधर्म्य ४६२
–वैपरीत्य ७९०
–सम ३१७-८, ३२५, ७०७, ७१६, ७१९-२०, ७२२, ७५२
–सिद्धनिर्देशता २८२
–सिद्धि ३१८, ७९०
साध्याङ्गन्यूनता ७६४
साध्यातिदेश ७२२
साध्याविशिष्ट ३१७
–ता ५४१
–त्व ५०९
साध्याव्यापकता ९४
साध्याव्यावृत्ति ७९१
साध्याव्यभिचार ४४२
साध्योपसंहार ३८३
सानातनि २९१
सान्तरग्रहण ४७-८
सान्तरत्व ५५६
सापेक्षत्व ६६०
सापेक्षसमास ३६९
सामग्री ३२४, ४५३-४, ६८८
–त्रयाभेद ५५७
–भेद ५७५
–भेदानन्त्य ५५७
–साजात्य ५७२
सामानाधिकरण्य ४४, ८१, १११, २६१, ३२०, ४८४, ५२०, ५७९, ६११, ६४८
सामान्य १६८-७१, १८१, ३१९, ५८०, ६११
–गुणे ६२७
–च्छल ३२८, ३३०, ७५६
–तो दृष्ट ११०, ११३, ११७, ३७२, ४०४
–तोदृष्टानुमान १६९
–लक्षण ४३, १३७, १३८, २०२-३
–लक्षणपरीक्षा ३४९
–विशेष ३७६
सामान्योपसंहार ५०
सामिधेनी ४२७
साम्प्रतिकबौद्ध ५५८, ५६५
सांवृत १९०
–ग्रहण ३९७
सांव्यवहारिक १३६
सिद्धसाधन ४०३, ५०७, ५६४, ७५५, ७९०
–त्व २११
–न्याय ७१८
सिद्धसाध्यता ६४२, ७५७, ७६४
सिद्धानुवाद ६१४
सिद्धान्त ३४३, ६१५, ६२१, ६८०, ७०७, ७८५
–प्रकरण २४५
–सूत्र ५९९
सिद्धान्तिसूत्र ७१२
सिद्धान्ती ३३, ५२, ५६, ३२७, ३६७, ३८८, ३९०, ४२३, ४२७, ५०६, ५०८, ५१२, ५४२, ५५२, ५५४, ५७३, ५८४, ५८६, ६१६, ६३७, ६५८, ६७१, ६९९, ७४०
सिद्धान्त्येकदेशी ५८६, ६३९
सिसाधयिषितधर्म ४१८
सिंहावलोकितन्याय ५९०
सुख ६६२-३
–दुःखसाक्षात्कार १७९
सुखानुशयी ६१३
सुगत ३८
सूत्रकर्ता २
–कार ३८, ८४, १९८, २४४, २४८, ३५३, ३६०, ३६६, ३९१, ४४१, ४५९, ५२३-४, ५३४, ५३९, ५४६, ५९३,

६४३, ६५९, ६६३, ६६८-९, ६७६, ७३१, ७५०-१, ७६१, ७६६, ७६९, ७७३
–कृत् १९६, २१९-२०, २४४, २८०, २९५, ३१७, ५३८-९, ६७६, ७४८, ७८२, ७८९
सोपाख्य ६१९
सौगत ४०, ६३, ५१३, ५७२, ७७९, ७८८
सौत्र ५३९, ५४५
सौत्रान्तिक ६०, ६४६, ६९१
स्तुतिवाद ४१३
स्तोत्रियानवक ४२१
स्त्यान ७००
स्थापनाहेतु ५८०
–वादी ७५१
स्थिरनय ५०
स्थिरसंस्कार ६९८
स्थूलप्रतिभास ७३
स्थूलप्रत्यय ३९७
स्थूलावयवी ३९६
स्थैर्य २४५, २८७, ३००
स्फोट ४७६-७
स्मृति ६६६
–यौगपद्य ५८६
–विपर्यास १४०
स्मृत्यनुबन्ध ५२२-३
स्वकारणसत्तासमवाय ३७६
स्वकृताभ्यागम ५८९
स्वर्ग ६५७
स्वतःप्रामाण्य १५
स्वपक्ष ६४३, ६८५
स्वप्रत्यय ६८७
स्वप्रोपाधि ६२२
स्वप्रतिभास ६६
स्वप्रामाण्यव्यवस्थिति ३८
स्वभावभेद ५६४
स्वभाववाद ९४
स्वभावसंबन्ध ४२२
स्वभावानुपलब्धि ८७
स्वरूपयोग्यता ३९६
स्वरूपव्यावृत्ति ५७१
स्वरूपासिद्ध ३१७-८
–चोदनाभास ७१७, ७१९
–ता २८६
स्वरूपासिद्धि १९९, ३५०, ६३०, ७१९, ७२१, ७९२
स्वर्गसाधनत्व ४२६
स्वर्णबीजपूर ४६४
स्वलक्षण १९, ६५, ७१, १०६, ४८७, ४८९-९२, ५७२-३, ५७६, ७१८
स्ववचनविरोध ७६०
स्वसमवेतद्रव्य १९९
स्वसंवेदन ४८८, ६९३
–ज्ञान ८२
–नय ७
–प्रत्यक्ष ४८८
स्वसंवेद्यत्व ४६०
स्वसाधनावद्य ७८५
स्वसिद्धान्त ७८०, ७८९
–विरुद्ध ७९९
स्वस्तिमती १३३
स्वस्वविषयग्राहकत्व ५४७
स्वाभाविकप्रतिबन्ध ५६६
स्वाभाविकसम्बन्ध ९५, ४२१-२
स्वाभ्युपगमविरुद्ध ४२३
स्वार्थानुमान १८०, २७७, ३११
स्वायम्भुव ३१२, ४४८
स्वालयज्ञान ६९१
स्वालयविज्ञानसन्तान ६९०
हान ३४१, ६७३

हानोपादानोपेक्षा ३०
हिमवान् ७१, ३८८
हिमाचल ११०
हीनक्लेश ६१०
हेतु २८०, २९३, ३४३, ६४६, ६१५, ७५१, ७५९, ७६५, ७६७-८, ७७०, ७८०
—दोष ७६०, ७७९
—पौनरुक्त्य ४२५
—विकल्प ५९४
—सिद्धि ६४९
—हानि ७६३
हेत्वनुकर्षण ४३५
हेत्वन्तर ४६३, ५७२, ७६४, ७६९
हेत्वपदेश २८०-१
हेत्वाभास ३७, २९५, ३०२, ३०५, ३०८, ३१०, ३३७, ७१३-४, ७३१, ७४२, ७६७-९, ७८४, ७९२
—लक्षण ३२७
हेय ३४१, ६७३